TEXT PROBLEM WITHIN THE BOOK ONLY

UNIVERSAL
LIBRARY

OU_184207

UNIVERSAL
LIBRARY

OSMANIA UNIVERSITY LIBRARY
Call No. S 294.94 | K18 P Accession No. G.H. 381
Author कर्णिक गोपि |
Title प्रमाण वार्तिक | 1943
This book should be returned on or before the date last marked below.

आचार्यधर्मकीर्तेः

प्रमाणवार्त्तिकम्

(स्वार्थानुमानपरिच्छेदः)

स्वोपज्ञवृत्त्या, कर्णकगोमिविरचितया तट्टीकया च सहितम्

राहुलसांकृत्यायनेन सम्पूरितं
सम्पादितश्च

किताब महल
इलाहाबाद

समर्पण

In the memory of the Soviet Savant the Academician Dr Thos Stcherbatsky (1870-1942)

The greatest orientalist of his time

आकर्णितं तव यशो बहुशः सुहृद्भ्यो,—
ऽधीताश्च विस्मिततया कृतयस्त्वदीयाः ।
वैदुष्यमीक्षितमहो नितरां गभीरं
लोकोत्तरेव विदिता त्वयि का विभूतिः ॥१॥

कीर्त्तिर्विवृत्तहृदया किल धर्मकीर्त्ते-
र्दौहित्र आत्मसदृशोऽस्तु मनोरथो मे ।
कुर्याव लेनिनपुरे सह शास्त्रचर्चा-
मित्यस्मरः किमु न लोकवियोगकाले ॥२॥

PREFACE

In the second decade of the twentieth century how difficult it was to study the old masters of Nyāya and Vaiśeṣika—the only two systems of the Brahmanic philosophy which could be classified as non-scholastic in their outlook. I have personal experience of Benares, Ajodhyạ, Lahore, and even of the Madras presidency—I was driven out of Nadia by its fierce mosquitos. So I cannot say anything about that place. In those days it was impossible to find a teacher who could satisfactorily help me in the study of Vātsyāyana, Uddyotakara, Vācaspati, Praśastapāda or Udayana ; there might be some improvement now but I do not think the present position is in any sense advanced. Why is it so ? The Indian philosophy in its creative period was not the static outcome of one mind and one epoch If we look back from the time of the king Pravāhana, the first Indian Philosopher, with his disciple Uddālaka and grand-disciple Yājñavalkya, to the time of Śrīharṣa, and Gaṁgeśa, we will find that the contemplative faculty of our race has developed as a result of the action and inter-action of several master-minds. By negating faulty old notions, and expounding the new propositions, they sought to perfect the ever-growing stream of Indian thought. As long as the students had a direct touch with that living stream, with its manifold waves

and whirlpools, they could contemplate the flow in its temporal and special course and could try to unfetter themselves from scholastic quibbles and degenerate narrow-mindedness. But after the destruction of the great Buddhist seats of learning, the repositories of the accumulated thoughts and clearing houses of India's best contribution to international treasures, the Buddhist Savants like Śākyaśrībhadra (1127-1225) left India to take shelter in the neighbouring Buddhist countries just as the Greek philosophers did when they were persecuted by Roman invaders, bigoted Christians, or Turk invaders. Thus the fresh breezes were shut out, opposing guns were silenced and the real *Kūpa-maṇḍūkatā* began to descend on the philosophical mind of India. Instead of thinking hard on the substance, our scholars devoted themselves to playing with set words and phrases, which landed them into such a position, where they formally paid homage to our great ancestors, but were totally ignorant of their own glorious heritage.


Like a great river at its source, our intellectual stream—in the form of Nyāya or Pramāṇa-Śāstra becomes tiny and then disappears into unknown nothingness. Then in the upward journey of exploration[1] of our heritage we got to Nāgārjuna, the oldest known non-scholastic philosopher of mediæval India, prior to whom we only get glimpses of certain cross currents between Greece and India. In order to understand the contribution of India to world philosophical

---

[1] *Vide* my "Darśana-Digdarśana" (Hindi)

thought, we have to go through the works of all the chief thinkers from Nāgārjuna down to Gaṁgeśa in their historical setting. Generation succeeds generation, each carrying the stream of thought to a higher stage, through a process of conflicts and agreements with their contemporaries or predecessors, ever making new contributions to thought. Indian contribution to the World philosophy—in its non-scholastic form—is not negligible, but it cannot be appreciated by us or by scholars in other lands, unless our scholars and orientalists abandon the tendency to look at it not as an ever flowing mighty river but as isolated unconnected ponds. A correct approach will not only give us the panoramic view of our past, but will also enable us to rescue our mighty stream from the moribund stinking marshes of scholasticism—scholasticism which is discredited, and left to its fate in the west, but is still paraded here, as the real contribution of the Indian mind.

It is these missing links—many important phases of the dynamic stream—which make it difficult to understand the works of our creative philosophers who have survived feudal devastation and our own negligence. Our stream of philosophy is made up of the four chief currents of thought: the Buddhist, the Nyāya-Vaiśeṣika, the Mīmāṁsaka and the Jaina schools of philosophy. They were the integral parts of the one whole, as the following chart will show (here only a few luminaries from the Brahmanic and Buddhist schools are given)—



The intellectual rivalries and the constructive criticism of the static philosophies of the Brahmanic and other schools, by the great Savants of dynamic philosophy of Buddha, as well as the original contributions of the latter to Indian philosophy, are so important that if you omit them, the whole philosophy becomes un-intelligible. But only a few decades ago

Vasubandhu, Dinnāga and Dharmakīrti were mere legendary names, which were only heard, when the long forgotten tomes of the old masters were dusted on ceremonial occasions. Thanks to the modern researches, now we know that these legendary persons and a host of their successors have left their monumental works which are unique in their quality: 1,37,000 ślokas are no small quantity, but we know that it is only a fraction of the vast literature, which escaped destruction by migrating to a sympathetic land in the foreign garb of Tibetan translations.[1] Except these and a few small treatises translated into Chinese, we have no knowledge of the existence of any other works. In my first journey to Central Tibet (1929-30), I was rather pessimistic, and after my return I began to restore the *Pramāṇavārtika* from Tibetan into Sanskrit. But I had to stop soon after, when I got the news of an incomplete Ms. of the P.V. from Nepal. My hope revived slightly, and I made my second pilgrimage to that country (in 1934). But after getting the Mss. of the *Vādanyāya* (with Śānta-rakṣhita's commentary), a portion of Prajñākara's *bhāṣya* on P. V. and many more works, my optimism increased considerably, which was justified by the two subsequent journeys[2] (1936 and 1938). Slowly but steadily the veil of darkness lifted itself. We recovered almost all *Pramāṇa-vārtika, Vādanyāya,* subcommentaries on the *Hetubindu* (by the help of which the original texts can be restored from Tibetan more

[1] See my appendixes D-J to the Vādanyāya (J. B. O. R. S. Vols. XXI, XXII)

[2] For the Catalogue of the discovered mss. see J. B. O. R. S. (1935, 1937, 1939).

faithfully) and *Nyāyabindu*. We got a very fine vṛtti (commentary) on P.V. by Manorathanandin which like the present work, was intended to be translated, which, however, was never accomplished. These sixteen or seventeen thousand ślokas are freshly salvaged material from the shipwreck. Another important work discovered is Jñānaśrī's 13 treatises, and they were never translated. With all these priceless acquisitions, we know that we still have not got the originals of Diṅnāga's *Pramāṇa-samuccaya* and *Nyāyamukha*, which are very important works for the study of Indian Philosophy. We have yet to discover or restore from the Tibetan Dharmakīrti's *Pramāṇaviniścaya* (1340 ślokas) *Santānāntara-Siddhi* (72 slokas) and *Sambandha-Parikṣā* (29 Ślokas, with author's own commentary). In order to complete our picture we have to make accessible to the student of philosophy, the Tibetan and Chinese translations which are yet to be restored to their Indian garb. Then alone can we have the material for a comprehensive study of Indian philosophy in all its aspects. The old masters are to be re-edited, giving the full quotations or references from their predecessors, where the hints are not clear enough. For example, if an edition of the Nyāyavārtika is published with copious quotations from the *Pramāṇa-Samuccaya* and the *Nyāyamukha*, or if the student has already studied these two masterpieces of Diṅnāga before going to Uddyotakara, the study of the Nyāyavārtika will become a joy and not a cause of headache to the teacher, and to the students. Similarly the study of the *Sloka-vārtika*, the *Kusumāñjali* and the *Ātmatattvaviveka* can be very much facilitated. No doubt Diṅnāga and his teacher Vasubandhu were

wo giants of Indian philosophy, but Dharmakīrti vas the culminating point of not only dynamic but the vhole of Indian philosophy. Dharmakīrti became the entral figure around whom all the creative minds in India revolved. He was never excelled by any one in his critical reasoning, bold analysis and clear thinking. We are fortunate to have his chief treatise Pramāṇavārtika with the word by word commentary of Manorathanandin. But in order to enter its world of thought more elaborate works were needed. This purpose is served by the present work which includes the commentary of the first chapter of Karṇakagomin, and the Bhāṣya (*Vārtikālaṁkāra*) by Prajñākaragupta on the remaining three chapters. But we must remember that the Pramāṇavārtika has 1,05,400 ślokas in Tibetan as its commentaries :—

Devendrabuddhi (pañjikā)	on	II-IV chapters
Śākyabuddhi (ṭīkā)	on	I-IV chapters
Prajñākaragupta (bhāṣya)	on	II-IV chapters
Jayānanta (bhāṣya-ṭīkā)	on	II-IV chapters
Yamāri (bhāṣya-ṭīkā)	on	II-IV chapters
Śaṁkarānanda (ṭīkā)		
Ravigupta (ṭīkā)		II-III chapters

Karṇakagomin and his commentary—The first chapter of P. V. (Svārthānumāna), which is really the third chapter of the work, has only two commentators—Śākyabuddhi[1] and Karṇakagomin. They both are subcommentators to the author's own *vṛtti* on the "Svārthānumāna" chapter. Karṇakagomin is more exacting in dealing with his subject, where he gives numerous

[1] A pupil of Devendrabuddhi, the disciple of Dharmakīrti.

quotations from Kumārila, Uddyotakara and others. He has demolished all the arguments advanced in favour of the static philosophy by the new opponents like Umbeka, Maṇḍana, Vāsudevabhaṭṭa and the Naiyyāyika Śaṁkara. Out of the 619 pages (including Svavṛtti) as many as 513 pages are devoted to a refutation of the static conception of "Sāmānya" (universal) etc. and the authority of scriptures which shows the main purpose of the book.

Karnakagomin's commentary seemed to be a much sought for text-book for the study of P. V. as the finds of three Mss., two in Tibet and one in Nepal, show. About the life and time of Karṇakagomin we know nothing, except from his criticism of Maṇḍana (822 A. D.) and his silence on Udayana (984 A. D.), we can only say that he lived between 822 and 984 A. D.—say in the ninth century. Apart from the present work, he wrote an independent treatise *Nairātmya-siddhi*, which is mentioned here four times. The theme of this work seems to be the demolition of all arguments in favour of Brahmanic thing-in-itself, criticism of the conception of any permanent substratum behind the phenomena of the world of change, refutation of any noumenon behind the phenomena. I am leaving the discussion of the subject here for the forth-coming edition of Prajñākara's Bhāṣya, as the two make a complete whole.

MSS.

PSVT. Dharmakīrti wrote his own commentaries on two of his works viz., PV first chapter and *Sambandha-Parīkṣā*, of which the first (PSV) has 3500 ślokas. Tibetan translation of PSV (PSVT) was known to us. It has about 115 leaves (410-535a) of the volume Mdo.

XCV of Narthang edition of Stan-ḥgyur. In PSVS we have only ¼ of the Sanskrit text. I restored the missing text into Sanskrit from its Tibetan translation (leaves 400b-486a3, 489a2-497b2-500a7-505a5, 521bi6, 528b6, 534a6 534b6, 535a), which was originally done by the Indian Pandit Subhūtiśrīśānti and the Tibetan translator (lo-tsa-va) Dge-vahi-blo-gros in about 1050 A. D. under the patronage of the Guge (W. Tibet) Kings. The help I got from Karṇakagomin made my restoration 99% certain.

PSVS. I discovered only one copy of the Sanskrit original of PSV in the Chhag-pe-lha-khang library of the Sa-Skya monastery in central Tibet. The original MS. contained 46 leaves, each side containing 8 lines with a few exceptions—lines are noted in Roman numerals in the edited text—, but in our Ms. there are only 11½ leaves (32, 34, 35-41, 44, 45, 46), so, as mentioned above, I have to restore three-fourth of the text from its Tibetan translation. There is a general tendency in the scribe of this Ms. to disregard the distinction of व and ब, ॰ व and म्व, also the retaining of anusvāra in the end of a sentence ; he often makes wrong use of स for श, and त् for त. The character is Māgadhī (Proto-Maithilī) which was used in Bihar in the eleventh century.

PVST MSS. I have three MSS. of Karṇakagomin's commentary on the Pramānavārtika—Svavṛtti of which :

PSVTa, a Ms. of 217 leaves (each side 7 lines) of which two leaves (12, 37) are missing and there are a few lacunae. Our present edition is based on this MS. The script is Māgadhī, the mistakes of व-ब, ॰ व-म्ब are common. This MS. with six leaves of another MS. (PSVTb) was discovered by me in Chhag-pe-lha-khang. Both belong to the same period. A

third paper MS. (PSVTc) the Rājaguru Pandit Hemarāja Śarman (Nepal) kindly placed at my disposal. It has only 24 leaves. The variations of the reading of these MSS. are noted in the foot-notes.

My late lamented friend Dr. K. P. Jayaswal was overjoyed with the discovery of these works, and along with other works he sent PVS and PVST to the press in 1937. Alas ! he could not live to see it published. After his demise like an unclaimed orphan it went from door to door for its publication. Thrice it was accepted and then refused or was somehow prevented from being published. At last Mr. Śrinivas Agrawal, the proprietor of Kitab-Mahal, came to its rescue from the sad plight. In this the help of Pandit Krishna Prasad Dar (The Manager of Allahabad Law Journal Press) was of as much importance. Mr. Dar kept the whole composed matter (about 3 ton lead in type) for seven years, and at the end also reduced the rate of printing, to facilitate the publication of such a least profitable work, from the commercial point of view. I cannot express in words my heart-felt thanks to these two friends.

Allahabad
5th Dec., 1943

RAHULA SANKRITYAYANA

Mss. Consulted

1. PSVs. प्रमाणवार्तिकस्ववृत्ति by धर्मकीर्ति (belonging to Sa-skya, Chag-pe-lha-khang, Tibet) incomplete, the leaves 32, 34, 35-41, 44-45, and 46
2. PSVt. The Tibetan translation of PSV, (Nar-thang edition), the leaves 420b-486a3, 489a2-497b2, 500a7-505a5, 521b-1-528b6, 534a6-534b6 are restored into Sa sk it.
3. PSVTa. प्रमाणवार्तिकस्ववृत्ति-टीका by कर्णकगोमी (belonging to Sa-skya, Chag-pe-lha-khang) Only 12th and 37th leaves missing.
4. PSVTb. ditto (ditto) incomplete. Only six leaves corresponding to PSVTa:—
   151a6–153a4 (इत्यादि–योग्य)
   153a4–154a3 (अर्थविशेष–श्लेषयेत्)
   154a3–155a2 (यमित्यादि–सामान्य)
   158a5–159a1 (नानुमेयः–त्येतिज्वाला)
   159a2–169b6 (याः सकाशात्–अत्रापि प्र)
   193a3–194a2 (न भवेवित्यादि–दर्शिता एत)
5. PSVTc. ditto (belonging to राजगुरु पण्डित हेमराजशर्मा, Nepal) incomplete. Only 24 leaves.
6. A. प्रमाणवार्तिकभाष्य by प्रज्ञाकरगुप्त (Sa-skya, Gu-rim-lha-khang) incomplete, copied by विभूतिचन्द्र (from Ch. III. 303 to the end)
7. B. प्रमाणवार्तिकभाष्य by प्रज्ञाकरगुप्त (Sa-skya, Chag-pe-lha-khang) complete.
8. PVa. प्रमाणवार्त्तिक, my edition JBORS. Vol. xxiv
9. PVb. ditto 1st chapter (Tag-la monastery, Tibet) incomplete, first 284 Kārikās only.

विषय-सूची

	पृष्ठं
नमस्कारश्लोकः	१
शास्त्रारम्भप्रयोजनम्	३
१. हेतु-चिन्ता	४
(१) पक्षधर्मता	,,
(२) हेतु-लक्षणम्	,,
(३) हेतु-स्त्रिधा	८
(४) हेत्वाभासा.	,,
२. अनुपलब्धि-चिन्ता	२९
(१) दृश्यानुपलब्धिफलम्	,,
(२) अनुपलब्धिश्चतुर्विधा	३५
(क) शेषवदनुमाननिरास	५६
(ख) त्रिरूपहेतुनिश्चय·	५७
३. व्याप्ति-चिन्ता	५७
(१) दिग्नागेष्ट· प्रतिबधः	,,
(२) आचार्यीयमतनिरासः	६५
(३) वैशेषिकमतनिरास	७२
(४) अविनाभाव-नियमः	८७
४. सामान्य चिन्ता	१०७
(१) न्यायमीमासामतनिरासः	१३९
(क) व्यावृत्तस्वभावा भावाः	,,
(ख) भिन्नानामभिन्नं कार्यम्	१७७
(ग) अपोहस्य विजातीय-व्यावर्त्तकत्वं	१८९
(घ) सामान्याभावे प्रत्य-भिज्ञासंगतिः	२०५
(ङ) तद्वत्ता-निश्चयः	२१३
(२) सांख्यमत-निरासः	३२०
(३) जैनमत-निरासः	३३९
५. शब्द-चिन्ता	३४१
(१) आप्तशब्द-चिन्ता	३४२
(२) निर्हेतुक-विनाश	३५८
(३) अनुपलब्धि-चिन्ता	३७०
क अनुपलब्धेः प्रामाण्यम्	,,
ख. स्वाभावानुपलब्धि.	३७८
ग अनुपलब्धिरेवाभाव	३७९
घ कल्पितस्यानुपलब्धि	३८८
६ आगम-चिन्ता	३८९
(१) पौरुषेयत्वे	३९६
क पुरुषातिशयप्रणीतं वचन प्रमाणम्	,
ख सत्कायदर्शन दोषकार-णम्	४०१
७. अपौरुषेय-चिन्ता	४०३
(१) सामान्येने	४०३
क अपौरुषेयत्वाऽप्रामाण्यम्	४१०
ख. सम्बन्ध-चिन्ता	४१८

	पृष्ठं		पृष्ठं
(वैयाकरणपक्षनिरास)	४३४	(२) कुमारिल-मत-निरास·	५३५
ग. नापौरुषेयता	४३८	क अपौरुषेयत्वे दोषाः	,,
घ. न नित्यता	४४१	ख कृतकत्वे दोषाः	५४१
(क) गुर्वभ्यमनपूर्वकत्वा-दपि	,,	ग नित्यत्वे दोषाः	५५६
(ख) अनादित्वे संशयः	४५८	घ समयकाराणा उक्त्या फलविशेषः	५६५
(ग) वर्णवाक्यनित्यत्वनि-रासः	४५९	ङ वर्णानुपूर्वि-चिन्ता	५६६
(घ) वर्णानुपूर्वि-चिन्ता	४८६	च. आप्त-चिन्ता	५८०
(ङ) निर्हेतुको विनाश	५१०	(३) जैमिनिमतनिरासः	६०८
(च) पुद्गल-चिन्ता	५२७	वेदैकदेशसत्यत्वेन सर्वस्या-प्रामाण्यम्	६०८

प्रमाणवार्त्तिकम्

नमोबुद्धाय ॥

१. नमस्कारश्लोकः—

[1](विधूतकल्पनाजालगम्भीरोदारमूर्त्तये । [1.420b
नमः समन्तभद्राय समन्तस्फरणत्विषे) ॥ १ ॥

यो विध्वस्तसमस्तबन्धनगतिस्सम्यग् वशित्वे स्थितः (,) 1b
सर्व्वज्ञेयविसारिनिर्म्मलतमज्ञानप्रबन्धोदयः ।
सत्त्वार्थोद्यतमानसश्च सुचिर श्रीमञ्जुनाथो विभुः (,)
तन्नत्वा बहुशोद्य वार्त्तिकगत किञ्चिद्विवक्षाम्यहं ॥

टीकाकृतः सकल एव गुणः स एष ब्रूतेत्र वस्तुगहनेपि यदस्मदादिः ।
दिग्नागदन्तमुस(?श) लैर्विषमेऽपनीते लब्धेषु वर्त्मसु सुख कलभा· प्रयान्ति[1] ॥

[2]यो मामवज्ञायति कोपि गुणाभिमानी जानात्यसौ किमपि त प्रति नैष यत्नः ।
कश्चिद् भविष्यति कदाचिदनेन चार्थी नानाधियाञ्जगति जन्मवतां हि नान्तः ॥

यद्यपि हि शास्त्रारम्भे नमस्कारश्लोकोपन्यासमन्तरेण कायवाङ्मनोभिरिष्ट-देवतानमस्कारकरणेन पुण्योपचयादविघ्नेन शास्त्रस्य परिसमाप्तिर्भवति । तथापि व्याख्यातृश्रोतृणा स्तुतिपुरस्सरया प्रवृत्त्या पुण्या[2]तिशयोत्पादात् पाराथ्यं सदाचारानुपालन चालोच्य विशिष्टदेवतापूजाश्लोकमुपन्यस्तवानाचार्यः । **विधूतकल्पनेत्यादि** ।

यदा **समन्तभद्रशब्दो** रूढया बोधिसत्त्ववृत्तो न गृह्यते तदेयं बुद्धस्य भगवतः पूजा । सा च द्विधा स्तोत्रतः प्रणामतश्च । **नमः**शब्देन प्रणामतः परिशिष्टैः स्तोत्रतः । स्तोत्रमपि स्वार्थसम्पत्तितः परार्थसम्पत्तितः परार्थ-सप[3]दुपायतश्च त्रिधा । स्वार्थसम्पन्नश्च परार्थप्रति समर्थो भवतीवि

---

[1] The reading in the bracket ( ) is from PVb.

[2] Stan-ḥgyur.

[3] A parady of Bhavabhūti's Malatīmādhavam 1:4.

प्रथमं पूर्व्वार्द्धेन स्वार्थसम्पदुक्ता। स्वार्थसम्पच्च कायत्रयलक्षणा त्रिभिर्व्विशेषैर्व्विशिष्टोद्भाविता। **आवरण**प्रहाणविशेषेण। **गाम्भीर्य**विशेषेण। **औदार्य**विशेषेण च।

तत्रात्मात्मीयाद्याकारप्रवृत्ता ग्राह्यग्राहकाकारप्रवृत्ताश्च त्रैधातुकाश्चित्तचैत्ताः **कल्पना**। सैव **जाल**म्बन्धनात्मकत्वात्।[4] तद्विधूतं विध्वस्त सवासनं पुनरनुत्पत्तिधर्मत्वमापादितं यासा **मूर्त्ती**नान्तास्तथोक्ताः। एतेनावरणप्रहाणविशेष उक्तः। गाम्भीर्यौदार्यविशेषौ तु गम्भीरोदारपदाभ्यामुक्तौ। विधूतकल्पनाजाला **गम्भीराः** श्रावकप्रत्येकबुद्धाद्यविषयत्वात्। **उदारा**स्सकलज्ञेयसकलसत्वार्थव्यापनात्। **मूर्त्ति**यस्त्रय.' काया' स्वाभाविकसाम्भोगिकनैर्माणिका[5] यस्य भगवतः। असौ विधूतकल्पनाजाल**गम्भीरोदारमूर्त्तिः**। भद्रं कल्याणमभ्युदयनिःश्रेयसलक्षण। तत् समन्तान्निरवशेषन्तदर्थिना यथा भव्यम्भवति यस्मात् सकाशा(दसौ **समन्तभद्रः**। एतेन परार्थसम्पदुक्ता। अस्याश्च परार्थसम्पदः समन्तस्फुरणत्विष)[1] इत्यनेन सिद्धयुपाय उक्तः। (त्विषो रश्मय इह तु यथावस्थितवस्तुग्रहण)[1] [6]एव साधर्म्येण धर्मदेशना। अभ्युदयनिःश्रेयससाधनविषयास्त्विष इव त्विष उच्यन्ते। समन्तो निरवशेषः परार्थसाधनोपायः स्फर्यते व्याप्यते विनयेभ्यः साकल्ये[न] (कथनात् याभिस्ताः समन्तस्फरण्यस्तत्रथाभूतास्त्विषो धर्मदेशना यस्य स समन्तस्फरणत्विट्। नमः शब्दयोगाच्च सर्व्वत्र चतुर्थी।

2a यदा तु रूढिरपेक्ष्यते तदायं समन्तभद्रश)[1] [7]ब्दो महायाने बोधिसत्वविशेषे रूढ इति बोधिसत्वस्येय पूजा (।) पदार्थस्तु पूर्व्ववद् योज्यः। अयन्तु विशेषो विधूतकल्पनाजालत्वं बोधिसत्वभूम्यावरणप्रहाणतो द्रष्टव्यं। गाम्भीर्यं श्रावक-[प्रत्येकबुद्धपृथग्जनाविषयत्वत.। औदार्यन्तु बोधिसत्वम(।)हात्म(?त्म्य)तः। कायत्रयमप्यनुरूपं बोधिसत्वानां विद्यत ए][1]व प्रकर्षगमनात्तु बुद्धानां व्यवस्थाप्यत इति॥

सन्त्येव हि सन्तोस्य[1] वा त्ति का ख्यस्य शास्त्रस्य ग्रहीतारस्तथापि श्रोतृदोषबाहुल्येन सन्तमप्युपकारमसन्तमिव कृत्वा सूक्ताभ्यासभावितचित्तत्त्वमेव शास्त्रारम्भे कारणन्दर्शयन्। अयं च महार्थभ्रङ्शे हेतुदोषस्त्यक्तुं युक्त इत्येतच्च वक्रोक्त्या कथयितु द्वितीयं श्लोकमाह।

[1] Missing portion is found in the margin in a different hand.

(शास्त्रारम्भप्रयोजनम्)

प्रायः प्राकृतसक्तिरप्रतिबलप्रज्ञो जनः केवलं,
नानर्थ्येव सुभाषितैः परिगतो विद्वेष्टयपीर्ष्यामलैः ।
तेनायं न परोपकार इति नश्चिन्तापि चेत(श्चिरं)[2],
सूक्ताभ्यासविवर्द्धितव्यसनमित्यत्रानुबद्धस्पृहम् ॥२॥

प्रायःप्राकृतेत्यादि । अत्र चतुर्व्विधः श्रोतृदोष उद्भावितः । **कुप्रज्ञत्वमज्ञत्व** मनर्थित्व अमाध्यस्थ्यञ्च । **प्रायः** शब्द ओकारान्तो[2] बाहुल्यवचनः । प्रायो जनो भूयान् जनः । **प्राकृतसक्तिः** प्राकृतानि बहिःशास्त्राणि तत्र **सक्तिर्यस्येति** (।) ामिकत्वाद् व्यधिकरणो बहुव्रीहिः । प्राकृता वा सक्तिर्यस्येति । समानाधिकरण एव । ाकृतविषयत्वाच्च सक्तिः प्राकृता । अनेन कुप्रज्ञत्व श्रोतृदोष उक्त ।

अप्रतिबला शास्त्रग्रहणम्प्रत्यस (श) क्ता प्रज्ञा यस्य सो**प्रतिबलप्रज्ञः प्रायो जन** इति सम्बन्धः । अनेनाज्ञत्वमुक्तं[3] (।) **सुभाषितैर्नानर्थ्येव** किन्तु सुभाषिताभिधायिन-**म्विद्वेष्टयपीर्ष्यामलैः परिगतः** सन् । अनर्थी च विद्वेष्टि चेत्यर्थः । एतेन यथा-क्रममनर्थित्वममाध्यस्थ्यं चोक्त । अत्रापि प्रायो जन इति सम्बन्धनीय ।

अन्ये तु प्रायशब्दस्या (?स) कारान्तोप्यस्ति निपातः (।) स च बाहुल्ये-त्यस्मिंस्तृतीयार्थे स्वभावाद्वर्त्तत इति व्याचक्षते । **ईर्ष्या** परसम्पत्तौ चेतसो ारोषः । सैव मलश्चित्तमलि[4]नीकरणात् । व्यक्तिभेदाद् बहुवचन । यत एवन्तेन ारणेनायमारिप्सितो वा र्ति का ख्यो ग्रन्थ । **परोपकारः** परेषामुपकार. । उप-क्रियतेनेनेति करणे घञ् । परान् वोपकरोतीति परोपकारः "कर्मण्यण्" (पाणिनिः ३।२।१) । परोपकार **इति नः अस्माकं चिन्तापि** नास्ति । कथर्न्हि ास्त्ररचनाया प्रवृत्तिरित्याह । **चेतश्चिरमित्यादि** । चिरन्दीर्घकाल **सूक्ताभ्यासेन वेवर्द्धितं व्यसन**[5] सक्तिस्तत्परता सूक्ताभ्यासविवर्द्धित व्यसनं यस्य चेतसस्त थोक्तं । इति हेतोरत्र वा र्त्ति क रचनाया**मनुबद्धस्पृहं** जाताभिलाषं चेत इति । वमेके व्याचक्षते ।

अन्ये त्वन्यथा । कस्मादयमाचार्यं ध र्म्म की र्त्ति र्वार्तिकन्यायेन **प्रमाणसमुच्चय**-याख्यां करोति न पुन. स्वतन्त्रमेव शास्त्रमित्यस्मिन् प्रश्नावसरे प्राह । **प्राय** इत्यादि । अस्य श्लोकस्यायं समासार्थः । **चिन्तया** करुणया च[6] मे प्र मा ण स मु-च्च य व्याख्यायां **चेतो** जाताभिलाषमिति । चिन्ता करुणा च आचार्य दि ग्ना ग-एचितशास्त्रस्याल्पोपकारित्वेन । अल्पोपकारित्वञ्च श्रातृजनापराधेन । पदार्थ-तूच्यते । **प्राय** इति बाहुल्येन **प्राकृतसक्तिर्जन** इति सम्बन्धः । प्राकृत उच्यते

१—हेतुचिन्ता

(१) पक्षधर्मता

(२) हेतुलक्षणम्

अर्थानर्थविवेचनस्यानुमानाश्रयत्वात् तद्विप्रतिपत्तेः, तद्व्यवस्थापनायाह।

लोके नीच·। यस्य दुष्टोन्वयः। एवन्ती थि क शास्त्राणि परप्रणीतानि चाचार्यनीति-
2b शास्त्रदूषणानि। विपर्यस्तज्ञानप्रभव[7]त्वाद् दुष्टान्वयाद् यत प्राकृतानि। तेषु सक्तिरनुरागो यस्य स·तथोक्तः। कस्मात्पुन. प्राकृतसक्तिरित्याह। **अप्रतिबलप्रज्ञ** इति। अतोसौ दुर्भाषितमपि सुभाषितमिति गृहीत्वा प्राकृते सज्यते। अप्रतिबलप्रज्ञत्वादेव चाचार्यसुभाषितानि स्वयं यथावदवबोद्धुमक्षमो दोषवत्त्वेन गृहीत्वा तैराचार्यसुभाषितैरनर्थी। आचार्ये च विद्वेषवान् भवतीत्याह। **केवलमित्या**[1]दि। न केवलमनर्थी **सुभाषितै**राचार्यीयैरपि तु **विद्वेष्टचपीर्ष्यामलैः परिगतः** सन्नाचार्यं·दि ग्ना गं (।) कि भूतं **सूक्ताभ्यासविवर्द्धितव्यसनं**। व्यवहितेनापि सम्बन्धो भवत्येव।

"येन यस्याभिसम्बन्धो दूरस्थस्यापि तेन स" इति न्यायात्।

शोभनमुक्त **सूक्तं** भगवत्प्रवचनन्तत्राभ्यासस्तत्र **विवर्द्धितं व्यसन**न्तत्रैवात्यर्थमासक्तत्वं यस्याचार्यदिग्नागस्य स तथोक्तः। अनेनाचार्यदिग्नागस्यो[2]पचितपुण्यज्ञानत्वमाह। उपचितपुण्यज्ञाना एव हि सूक्ताभ्यासविवर्द्धितव्यसना भवन्ति। येना·ऽ**प्रतिबलप्रज्ञ** आचार्यसुभाषितैरनर्थी प्राकृतसक्तिश्च **तेन** कारणेनायं प्र मा ण स मु च्च यो न **परोपकारः**। उपकरणमुपकारो भावे घञ् (पाणिनि·३।३।१८)। पर उत्कृष्ट उपकारो नास्माद् भवतीति कृत्वा न परोपकारोऽल्पस्तूपकारोस्त्येव स च प्रायशब्देन सूचित एव। **इति** शब्दो हेतौ[3] (।) अस्माद्धेतोरस्माक **चिन्ता**। महार्थमपीद शास्त्रं न· बहूनामुपकारक जातन्तत्कथमस्यात्यर्थं साफल्य कुर्यामित्येवमाकारा। आचार्ये च बोधिसत्वकल्पे विद्वेष. स्वल्पोप्यनर्थहेतुरतोहमाचार्यनीतेरविपरीतप्रकाशनेनाचार्ये बहुमानमुत्पाद्य ततोनर्थहेतोर्जनन्निवर्त्तयिष्यामीत्येव दु.खवियोगेच्छाकारा करुणाप्यपिशब्दात्। इत्यत्रानुबद्धस्पृहमिति द्वि[4]तीयेनेति शब्देन **चिन्ताकरुणयोर्हेतुत्वमाह**। इत्याभ्या चिन्ताकरुणाभ्या **चेतश्चिरं** दीर्घकाल**मत्र** प्र मा ण स मु च्च य व्याख्याभूत प्र मा ण वा त्ति क रचनाया**मनुबद्धस्पृहं** सन्तानेन **प्रवृत्तेच्छ**मिति ॥

यदि प्र मा ण स मु च्च य व्याख्यां चिकीर्षुराचार्यधर्मकीर्त्तिः कस्मात् स्वातन्त्र्येणानुमानं व्यवस्थापयतीत्याशङ्कामपनयन्नाह। **अर्थानर्थे**त्यादि। अर्थो हित-

महितमनर्थस्त[5]योर्विवेचनन्तस्यानुमानाश्रयत्वादनुमानमाश्रयो यस्येति विग्रहः। अनुमानेन ह्यर्थानर्थौ निश्चित्यानुमानपृष्ठभाविना प्रबन्धप्रवृत्तेन ज्ञानेनार्थानर्थौ यथाक्रम प्राप्ति(परिहारार्थम्विभागेन व्यवस्थापयति। तस्मादनुमानाश्रयमर्थानर्थविवेचनं। तद्विप्रतिपत्तेरिति तस्मिन्न)[1]नुमाने विप्रतिपत्तेस्तद्व्यवस्थापनायाहेत्येवमेके व्याचक्षते।

अत्र त्विदं चिन्त्यं।[6]

यदि तावदेवमवधार्यतेर्थाऽनर्थविवेचनस्यैवानुमानाश्रयत्वादिति (।) तन्न। अर्थानर्थाभ्यामन्यस्याप्युपेक्षणीयस्य तृतीयस्य विषयस्य यद्विवेचनन्तस्याप्यनुमानाश्रयत्वात् (अर्थानर्थविवेचनस्य चानियतत्वात्। प्रत्यक्षाश्रयत्वमनिवारितमिति कोतिशयोनुमानस्य ख्यापितो येन तदादौ व्युत्पाद्यते।)[1] अथाप्येवमवधार्यते। अर्थानर्थविवेचनस्यानुमानाश्र[7]यत्वादेवेति। तथाप्ययुक्तमवधारण। अर्थानर्थविवेचनस्य प्रत्यक्षाश्रयत्वादपि। तथा ह्यर्थानर्थौ विभक्तरूपावेव प्रत्यक्षे प्रतिभासेते। 3a
तच्च प्रत्यक्षमभ्यासातिशयसमासादितपाटवतया अपसारितभ्रान्तिनिमित्तं पाश्चात्यमर्थानर्थविवेचन[विकल्प जनयति। एतदे(व) हि प्रत्यक्षस्यार्थानर्थविवे][1]चनाश्रयत्व यदर्थानर्थौ विभागेनानुभूय यथानुभवन्तत्र निश्च[1]यजनन।

न च शक्यम्वक्तु पाश्चात्येनैवार्थानर्थौ विभक्ताविति। विकल्पेन वस्तुस्वरूपस्याग्रहणाद् ग्रहणे वा विकल्पकत्वहानेर्विकल्पानुबद्धस्य प्रमातु स्पष्टार्थप्रतिभासित्वविरोधात्।

यत्र तु क्वचिद् विषये पाटवाभावाद् भ्रान्तिनिमित्तापनयनासमर्थं प्रत्यक्ष तत्रानुमानान्निश्चय प्रार्थ्यते न सर्वत्र (।) तस्मात् प्रत्यक्षे स्वत परतश्च प्रामाण्यनिश्चयः। निश्चायय्यिष्यते चायमर्थो द्वितीय[2] परिच्छेद इति नेह प्रतन्यते।

अवश्य च प्रत्यक्षस्याभ्यासबलादपसारितभ्रान्तिनिमित्तस्य यथानुभवन्निश्चयजननात् स्वतोर्थानर्थविवेचनाश्रयत्वमेष्टव्यमन्यथानुमानस्यापि व्यवस्था न स्याद् धूमादेर्लिङ्गस्यानिश्चयात्। धूमादेरप्यनुमानात् प्रतिपत्तावनवस्था स्यात्। तत्रापि लिङ्गान्तरस्यानुमानान्तरेण निश्चयादिति।

यदि च प्रत्यक्षमर्थानर्थविवेचनस्यानाश्रय[3]स्तदा शास्त्रकारेण प्रकरणान्तरे यदुक्तं(।)"हिताहितप्राप्तिपरिहारयोर्नियमेन सम्यग्ज्ञानपूर्वकत्वादि"त्यादि तद् बाध्येत। तथा "न ह्यस्यामर्थम्परिच्छिद्ये"त्यादि। पुनश्चोक्तं

[1] In the margin.

"दृष्टेषु सम्वित्सामर्थ्यभाविनं स्मरणादि"त्यादि।

तस्मादन्यथा व्याख्यायत इत्यपरे। आचार्य दि ग्ना ग प्रणीत प्रमाणलक्षणादिकमर्थो युक्तत्वात्। ती र्थि क प्रणीत न युक्तत्वादनर्थस्त[4]योर्विवेचन युक्तायुक्तत्वेन व्यवस्थापनन्तस्यानुमानाश्रयत्वात्। अनुमानमेव ह्याश्रित्य लक्षणवाक्याना युक्तायुक्तत्वं व्यवस्थाप्यन्न प्रत्यक्षन्तस्याविचारकत्वादिति।

तदप्ययुक्त। यतो लक्षणवाक्याना न स्वरूपेण युक्तायुक्तत्वमपि त्वर्थद्वारेण (।) स चार्थो यथानुमानेन युक्त. प्रतीयते तथा प्रत्यक्षेणापि। तथा च वक्ष्यति (।)

"प्रत्यक्षं कल्पनापोढ प्रत्यक्षेणैव सिध्यति।" (प्र० वा० ३।१२३)

तथा

"पक्षधर्मत्वनिश्चय प्रत्यक्षत" इत्यादि।

योपि मन्यते (।) सत्यमर्थानर्थविवेचन प्रत्यक्षानुमानाभ्या क्रियत एव (।) केवलं यदर्थानर्थविवेचनस्यानुमानाश्रयत्वमुच्यते तत्प्रत्यक्षविषयेपि विवादसम्भवे सति नानुमानादन्यन्निर्णयनिबन्धनमस्त्यतोनुमानस्य प्राधान्यात्तद्विवेचनाश्रयत्वमुक्तमिति।

एतदप्ययुक्तं। यतः प्रत्यक्षस्य स एव विषयो व्यवस्थाप्यते यो निश्चितो[5] न च निश्चिते विवादः सम्भवतीत्ययुक्तमेतत्।

अन्यस्त्वाह (।) अर्थानर्थविवेचनमनुमानादेव भवति न प्रत्यक्षात्। यतो येर्थानर्था अनुभूतफला अनुभूयमानफला वा न ते प्रवृत्तिविषया निष्पन्नत्वात् फलस्य। तस्मादनागतार्थक्रियार्थन्तत्समर्थेष्वर्थानर्थेषु प्रवृत्ति·। न च तत्सामर्थ्यन्तेषु प्रत्य-
3b क्षेण प्रतीयते येन प्रवृत्तिविषयत्व स्यात्। प्रवृत्तिसाध्यार्थक्रियाया भा[7]वित्वेन तत्सामर्थ्यं (कुर्वद्रूपता) स्यापि भावित्वात्। तस्मात् पूर्वानुभूतार्थक्रियासाधनवस्तुसाधर्म्यात् प्रत्यक्षेष्वपि वस्तुष्वनागतफलयोग्यतानिश्चयो न प्रत्यक्षतस्तेनानुमानादेवार्थानर्थविवेचनमिति।

तदप्ययुक्तं। यतो यदि सा योग्यता (कुर्वद्रूपता) र्थेषु वर्त्तमानकालभाविनी तदाभ्यासातिशयवतापि प्रत्यक्षेण निश्चीयेत। लिङ्गवत्। अथानागतैव सा तदानुमानेनापि (न) निश्चीयेतानागतेर्थे[1]नुमानाभावादिति वक्ष्यति।

एतेन यदुच्यते "प्रवृत्तिविषयवस्तुप्रापण प्रत्यक्षानुमानयोरविशिष्टमि"ति तदपि निरस्त द्रष्टव्यं। अनागतार्थक्रियासमर्थो हि प्रवृत्तिविषयो न च तत्सामर्थ्यं प्रत्यक्षानुमानाभ्यां निश्चीयत इत्युक्तं। परिच्छिन्नश्च प्रवृत्तिविषय इष्यते न च सन्तानः प्रत्यक्षादिक्षणेन परिच्छिन्नस्तत्कथं प्रवृत्तिविषयः।

अथैकस्मिन् क्षणे प्रत्यक्षं प्रवृत्तमपि नि[2]श्चयवशात् क्षणसामान्यविषयत्वे-नैकसन्ततिविषयन्तदयुक्त। प्रतिभासमानेनैव हि विषयेण निश्चयवशात् प्रत्यक्ष सामान्यविषय व्यवस्थाप्यते न परमार्थत.। स्वलक्षणविषयत्वात्। यथा लिग-विषय प्रत्यक्ष। तथा हि प्रतिभासमानमिद धूमस्वलक्षणन्तार्ण्णम्वा पार्ण्णम्वा' न्यद्वा सम्भवति (।) तत्र च विशेषानवधारणेन क्षणमात्रनिश्चयेन च स्वलक्षण-विषयमपि सामान्य[3]विषय प्रत्यक्ष व्यवस्थाप्यते। प्रत्यक्षपृष्ठभाविनो निश्चयस्य प्रत्यक्षविषयानुसारित्वात्। न पुनरेकक्षणविषयम्प्रत्यक्षमेव व्यवस्थापयितु शक्यते यतो य. प्रत्यक्षे प्रतिभासते क्षणो नासौ निश्चितो नापि पूर्वक्षणरूपो परक्षण-रूपो वा सम्भवति भिन्नकालत्वात्। तत् कथन्तत्र विशेषानवधारणेन क्षण-मात्रनिश्चयेन च क्षणसामान्यविषय प्रत्यक्ष व्यवस्थाप्येत। प्रत्यक्ष[4]पृष्ठभाविनः स एवायमिति निश्चयस्य सामान्यविषयत्वेपि न सन्तानविषयत्व। प्रतिपन्नप्रतीय-मानयोर्विषयीकरणेनानागतक्षणानिश्चयाद् विजातीयव्यावृत्तरूपविषयत्वाच्चात एव क्षणस्य प्रतिभासेप्यय घट इति ज्ञापननिश्चयः।

ननु यद्यर्थक्रियासमर्थो वस्तुसन्तानो(न)प्रत्यक्षानुमानाभ्या परिच्छिद्यते (।) कथन्तर्हि तयो प्रवर्त्तकत्वम्(।) वस्तुस्वरूपमात्रपरि[5]च्छेदादिति ब्रूम । तथा ह्यग्न्यादिकम्वस्त्वेकत्र प्रबन्धवृत्त्या दाहाद्यर्थक्रियासमर्थं प्रत्यक्षेण निश्चिन्वन्नन्य-त्रापि देशादावेतदुपलभ्यमान प्रबन्धवृत्त्यैवेदृग्विधार्थकारीति निश्चाययति। स एव पुन. कालान्तरे फलार्थी तत्स्वरूपम्पर्येषमाणोग्न्यादिक प्रत्यक्षानुमाना-भ्या दृष्ट्वा तदेवेदमिति निश्चयपूर्व्वकं प्रवर्त्तते। तेनायमर्थस्तत्स्वरूपमात्रपरिच्छेदे प्रमाणव्यापारो न प्रबन्धवृ[6]त्तिपरिच्छेदे। नाप्यर्थक्रियासामर्थ्यपरिच्छेदे पूर्व-मेवास्य सर्वस्य परिच्छिन्नत्वात्। तेन प्रत्यक्षानुमानयो प्रवर्त्तकत्व युक्तमेव। कथन्तर्ह्यर्थानर्थविवेचनस्यानुमानाश्र[यत्वमुक्तम् ।.....
.....] त नैवात्रार्था (?त्म) ना[भिप्रेतमपि तु चतुरार्यसत्य।] यतो मुक्त्यर्थिनो वय मुक्तिश्च चतुरार्यसत्यदर्शनाद् भवतीति भगवतोक्त(।) तद्दर्शनञ्च[7] भावनाभ्यासतो निष्पद्यते(।)भावनाया प्रवृत्तिश्च चतुरार्यसत्यनिश्चयेन(।) 4a
तन्निश्चयश्च परोक्षत्वादनुमानादेव भवतीत्यर्थानर्थविवेचनाश्रयत्वमनुमानस्यैव।

अर्थो निरोधमार्गावुपादेयत्वादनर्थो दु.खसमुदयौ त्याज्यत्वात्। यद्वार्थः परमार्थसत्यमनर्थः (सवृत्तिसत्य तयोर्यद् विवेचनं स्वरूपेण व्यवस्थापनन्तस्यानु-मानाश्रयत्वात्। अर्थानर्थविवेचनकारि च सर्व ज्ञान[1] न स्वलक्षण गृह्णात्यपि त्वध्यवस्यतीति भ्रान्तमेव(।) तेन यदि शब्दादिज्ञानमर्थानर्थविवेचनाश्रयमिष्यते तदपि भ्रान्तत्वादप्रमाणमेव(।) अत एव न तस्येह व्युत्पाद्यताप्रसगः। अनुमानस्य

(३) हेतुस्त्रिधा

(४) हेत्वाभासाः

पक्षधर्मस्तदंशेन व्याप्तो हेतुः, त्रिधैव सः।
अविनाभावनियमात्; हेत्वाभासास्ततोऽपरे ॥ ३ ॥

तु भ्रान्तत्वे सत्यपि प्रतिबन्धवशात् प्रामाण्य (।) शब्दादिज्ञानस्य त्वेव प्रामाण्येभ्युपगम्यमानेऽनुमानेन्तर्भावादपक्षधर्मस्यागमकत्वादर्थानर्थविवेचनाश्रयत्व-मनुमानस्यैव।

ननु प्रतिब[2]न्धवशादनुमानस्य प्रामाण्ये नित्यादिविकल्पस्यापि प्रामाण्य स्यात् क्षणिकाद्यर्थे प्रतिबन्धाद्(।) अथाध्यवसितार्थप्रतिबन्धेन प्रामाण्य मणिप्र-भायाम्मणिज्ञानस्य प्रामाण्य स्यात्। तदपि ह्यध्यवसितेन मणिना सम्बद्धन्त-स्मात् सत्यपि प्रतिबन्धे यद्देशादिसम्बन्धितया योर्थोध्यवसितस्तद्देशादिसम्बन्धितया सन्तानैकत्वाध्यवसायात् तमर्थ प्रापयदनुमानज्ञान प्रमा[3]णमेव। न सर्वं ज्ञानं।

अर्थानर्थविवेचन चाधिगमरूपमाकारोनुमानम्प्रमाणत्वात्। यद्वा लिङ्ग-मेवानुमानमतोर्थानर्थविवेचनस्या**नुमानाश्रयत्वं**। **तद्विप्रतिपत्ते**रिति तस्मिन्ननुमाने सम्मोहात्। **तद्व्यवस्थापनाय** तस्यानुमानस्य विप्रतिपत्त्यपनयनेनावस्थापना**याह** सू त्र का र.।

पक्षधर्म इत्यादि।

यद्यनुमानं व्यवस्थाप्य कस्मात् पक्षधर्म इ[4]त्यादिना हेतुमेव व्यवस्थापयतीति चेत्। अदोषोयं हेतुविप्रतिपत्तिद्वारेणानुमाने विप्रतिपत्तेस्तद्व्युत्पत्तिद्वारेणैव तस्य व्यवस्थापन। अनुमानज्ञानं च त्रिरूपलिगादुत्पद्यमान लोकप्रतीतमेवातो विप्रतिपत्ति. प्रतीत्यैव निराक्रियते।

यद्वानुमानशब्देन यदा लिङ्गमेवोच्यते तदा तद्विप्रतिपत्तेर्हेतुमेव व्यवस्था-पयतीत्यदोषः।

अत्र[5] श्लोके लिगस्य लक्षण संख्यानियमः सख्यानियमकारणम्विपक्षनिवृत्ति-श्चोक्ता। **पक्षधर्मस्तदंशेन व्याप्त** इति लक्षण।

तस्य **पक्षस्या**ऽशः साधयितुमिष्टो **धर्मस्तेन व्याप्त** एवेत्यवधारण (।) **त्रिधैवे**ति संख्यानियम.। **अविनाभावनियमादि**ति सख्यानियमकारणं। त्रिष्वेवाविनाभावस्य नियतत्वादित्यर्थ'। **हेत्वाभासास्ततोपर** इति विपक्षनिवृत्तिः।[6] तस्माद्धेतुत्रयादन्ये हेत्वाभासाः।

ननु यदि तदंशव्याप्तिर्दृष्टान्त एव गृह्यते तदानुमानस्योत्थानन्न स्यात्। साध्यधर्मिणि साध्यधर्मेण हेतोर्व्याप्त्यग्रहात्। तदा च पक्षधर्मो हेतुरिति व्यर्थं लक्षणमगमकत्वात्। सर्वोपसहारेण व्याप्तिग्रहणेपि नानुमानस्य प्रामाण्य स्यात्। व्याप्तिग्राहकप्रमाणंप्रतिपन्नविषयत्वेन स्मृतिरूपत्वात्। पक्षधर्मो हेतुरिति[7] च न वक्तव्यन्तदङ्शव्याप्तिवचनेनैव गतत्वात्। तदङ्शव्याप्तिबलेन 4b
च पक्षधर्मस्य गमकत्वन्न पक्षे सत्तामात्रेण तत्रस्थस्य गर्दभादेरगमकत्वात्। तस्मान्न पक्षधर्मो हेतुरिति पृथग् लक्षणम्वक्तव्यं।

तदुक्तम्।

"अन्यथानुपपन्नत्व यत्र तत्र त्रयेण कि।
नान्यथानुपपन्नत्व यत्र तत्र त्रयेण किमि"ति।

कि चानुपलब्धेस्तावन्न पक्षधर्मत्वमन्योपलब्धे· पुरुषधर्मत्वात्। स्वभावहेतोश्च ध[1]र्मिरूपत्वात् कार्यहेतोरपि स्वातन्त्र्येण धर्म्यनपेक्षत्वात्। न च कल्पितस्य पक्षधर्मस्य कार्यस्वभावहेतुत्व साध्यव्याप्तिश्चेति न पक्षधर्मो हेतुरिति वक्तव्य।

तथा यदि हेतुत्वेन त्रित्व व्याप्तन्तदा हेतुत्वस्यानियतत्वादन्यत्रापि सयोग्यादिषु हेतुत्वमनिवारितमेवेति त्रिधैवेत्यवधारण न युज्यते।

अथ हेतुत्व त्रित्वेन व्याप्तन्तदा त्रित्वस्य हेतावनियतत्वात् कार्यादीनामप्यहेतु[2]त्वन्ततश्च कार्यादेरेव हेतुत्वमिति न घटते।

कि च। यद्यनुपलम्भस्य साध्यप्रतिबन्धो नास्ति तदाऽप्रतिबद्धोपि हेतुर्गमक इति **त्रिधैव स** इति नियमो न घटते (।)

अथ प्रतिबन्धोस्ति तदा कार्यस्वभावयोरेवान्तर्भावात् त्रिधैव स हेतुरिति तथापि न युज्यते। **हेत्वाभासास्ततोऽपर** इति न युक्त हेत्वन्तरस्यात्यन्तपरोक्षत्वान्न तदभाव: प्रत्यक्षादिनिश्चित इत्ययुक्तमुक्त।[3]

पक्षधर्मस्तदंशेन व्याप्तो हेतुस्त्रिधैव सः।
अविनाभावनियमाद्धेत्वाभासास्ततोऽपर इति॥

अत्रोच्यते। यद्यपि साध्यसाधनयोर्व्याप्ति. सर्वोपसहारेण प्रतिपन्ना तथापि न व्याप्तिग्रहणमात्रादिह साध्यधर्मिणीदानी साध्यधर्म इति विशेषेण निश्चयो भवत्यनुमानात्तु स्यात्। तस्माद् प्रतिपन्नविशिष्टदेशादिसम्बन्धिसाध्यार्थप्रतिपादकत्वेन प्रमाणमेवानु[4]मानन्तच्च पक्षधर्मत्वे सत्येव भवति नान्यथा। यतो नान्यदेशादिस्थेन साध्यधर्मिणान्यदेशादिस्थ. साधनधर्म. सम्बद्धोऽतो विशिष्टदेशाद्यवच्छिन्नसाधनावगतिसामर्थ्यादेव विशिष्टदेशाद्यवच्छिन्नसाध्यप्रतीतिरेवानुमानं (।) न तु धममात्रादग्निमात्रप्रतीतिस्तस्या व्याप्तिग्राहकप्रमाणफलत्वात्।

नापि यत्र साधनधर्मस्तत्र साध्यधर्मं इत्यविशेषेणावगमेपि सा[5]धनस्य पक्षधर्मत्वं सिध्यति साध्यधर्मिधर्मतया विशेषेणाप्रतीतेः. सामान्येनाभिधानात्। तस्माद् विशिष्टदेशाद्यवच्छिन्नसाध्यप्रतिपत्तये पक्षधर्मत्वन्दर्शनीयं।

तेन यदुक्त "यत्र यत्र धूमस्तत्र तत्राग्निरित्यनेनैव पक्षधर्मस्योक्तत्वात् प्रदेशविशेषेग्निसिद्ध्यर्थन्धूमश्चात्रेति न वक्तव्यमुक्तार्थत्वादि"ति तदपास्त।

नन्वेवमनुमानस्य प्रामाण्येऽपक्षधर्म्ममप्यनु[6]मानं प्रमाण स्यादप्रतिपन्नाधिगमात्। यथाऽधस्तान्नदीपूरन्दृष्ट्वोपरिवृष्टचनुमानं। तथा शिशुरयं ब्राह्मणः मातापित्रोर्ब्राह्मण्यादिति। तदुक्तं।

"नदीपूरोप्यधो देशे दृष्ट (सन्नुपरिस्थिता।
नियम्यो गमयत्येव)[1] वृत्ता वृष्टि नियामिका॥
एवं (प्रत्यक्षधर्मत्व ज्येष्ठ हेत्वङ्ग)[1] [मिष्यते]।
तत्पूर्वोक्तान्यधर्मत्वदर्शनाद् व्यभिचार्यते॥
5a पित्रोश्च ब्राह्मणत्वेन पुत्रब्राह्मण[7]तानुमा।
सर्वलोकप्रसिद्धा न पक्षधर्ममपेक्षते॥
क्लेशेन पक्षधर्मत्व यस्तत्रापि प्रकल्पयेत्।
न सगच्छेत तस्यैतल्लक्ष्येण सह लक्षण॥
यथा लोकप्रसिद्धं च लक्षणैरनुगम्यते।
लक्ष्यस्य लक्षणमेव [स्यात्] तदपूर्वन्न साध्यत" इति।

अत्रोच्यते। कस्मादुपर्येव वृष्टच(नुमान नान्यत्र (।) पूरस्य तत्सम्बन्धित्वादि)[1]ति चेत्। यद्येवं यतोयं नदीपूर आयातस्तत्र[1] वृष्ट्यनुमानन्नान्यत्र व्यभिचारात्। परस्य च तत्सम्बन्धित्वनिश्चये सति गमकत्वमन्यथा(ऽ)नैकान्तिकत्व स्यात्। तथा शिशुरय ब्राह्मण मातापित्रोर्ब्राह्मण्यादित्यत्रापि यस्यैव शिशोर्ब्राह्मण्यं साध्यन्तस्यैव मातापितृब्राह्मण्यलक्षणो धर्मः सम्बन्धी गमको न मातापितृ(ब्राह्मण्यमात्रमन्यसम्बन्धिमा)[1]तापितृब्राह्मण्यस्यागमकत्वात्। तेनास्यापि पक्षधर्मत्वे सति गमकत्वमतो[2] न क्लेशेन पक्षधर्मत्वकल्पना (।) यद्वा य एवाव्यभिचारे निमित्तं स एव हेतुर्यथा धूमस्याग्निकार्यत्व ब्राह्मणभूतमातापितृजन्यत्वं च शिशोर्ब्राह्मण्यनिमित्तमिति तदेव हेतुर्युक्तोन्यस्य तत्कल्पना क्लेशेन स्यादिति। तथा न चन्द्रोदयात् समुद्रवृद्ध्यनुमानं चन्द्रोदयात् (पूर्वं पश्चादपि)[1]

[1] In the maigin. 2 Ślokavārtika.

तदनुमानप्रसङ्गात्। चन्द्रोदयकाल एव तदनुमानन्तदैव व्याप्तेर्गृहीतत्वा[3]-दिति चेत्।

यद्येवन्तत्कालसम्बन्धित्वमेव साध्यसाधनयोः। तदा च स एव कालो धर्मी तत्रैव च साध्यानुमान चन्द्रोदयश्च तत्सम्बन्धीति कथमपक्षधर्मत्वम् (।) अथ कालो नेष्यते न तदा तर्ह्येतदनुमानम्व्यभिचाराद् (।) अथ बौ द्धा नामेतदनुमान-न्नास्ति कालाभावात्(।)

तदयुक्त। पूर्वाह्णादिप्रत्ययविषयस्य महाभूतविशेषस्य काल इत्यभिधेय-स्याभ्युपगमात्।[4] एवमन्यत्रापि पक्षधर्मत्व योज्यं।

ननु भवतु पक्षधर्मत्वे सत्यनुमानस्य प्रामाण्यन्तथापि पक्षधर्म इति पृथग् लक्षणं न कर्त्तव्यन्तदङ्गशव्याप्तवचनेनैव गतत्वात्।

सत्यं (।) किन्त्वपक्षधर्मस्यापि साध्यव्याप्तस्य हेतुत्वनिरासार्थं कृत। महान-सादिदृष्टधूमादि चोदधावग्न्यनुमाने।

ननु व्याप्तस्य लिङ्गत्व न च महानसादिगतो धूम उदधौ साध्येनाग्निना[5] व्याप्तः (।)

सत्यं(।)केवल व्याप्तो हेतुरित्येतावन्मात्रकेण लक्षणवचनेन यत्रैव व्याप्यधर्म-स्तत्रैव व्यापकधर्मानु(मान)मित्येतन्न लभ्यते। ततश्चान्यत्रापि साध्यानुमाना-शङ्कानिवृत्त्यर्थ पक्षधर्मवचन। अनुपलब्धेरपि पक्षधर्मत्वमस्त्येव। यदा ह्यन्यस्य भूतलादेरुपलम्भजननयोग्यतैवान्यानुपलब्धिस्तदा योग्यतान्यभूतलादिस्वभावेति[6] कथन्नानुपलब्धेः पक्षधर्मत्व। कृतकत्वादेरप्येव शब्दादिधर्मत्व। पुरुषधर्मरूपाया अप्यनुपलब्धेरन्यभूतलादिकार्यत्वमेव परमार्थतस्तद्धर्मत्वन्तदायत्तत्वात्। धूमा-देरपि कार्यस्यैवं प्रदेशादिधर्मत्वङ्केवलम्विकल्पेन तेषा सम्बन्धिस्वरूपमेव पक्षस्यायं धर्म इति व्यवस्थाप्यते।

हेतुत्व च धूमादेरविनाभावेन व्याप्तमज्ञाताविं[7]नाभावस्यागमकत्वेन(।)हेतु- 5b
त्वात्। अविनाभावश्च कार्यस्वभावाभ्यां व्याप्त·। विधिप्रतिषेधयोश्च साध्यत्वे सत्यर्थान्तरविधाने (कार्यहेतोः) स्वभावहेतो· प्रतिषेधे चानुपलब्धेस्तेन हेतु-स्त्रित्वेन व्याप्तोऽतोसौ त्रिविध एव भवति। न तु त्रिविधो हेतुरेव कार्यादिरप्य-ज्ञातस्याहेतुत्वात्। कारणव्यापकानुलब्दयोरपि प्रतिबन्धादेव गमकत्व।[1] तथा हि (।) यत एव प्रतिबन्धात् कार्यव्याप्ये कारणव्यापके गमयतः। तत एव प्रतिबन्धात् कारणव्यापकानुपलब्धी कार्यव्याप्याभावङ्गमयतः। स्वभावानुपल-ब्धावपि यदा घटादेरुपलम्भजननयोग्य आत्मा उपलब्धिरुच्यतेन्यहेतुसाकल्ये चोपलम्भाव्यभिचारादुपलब्धिः सत्ता तदानयोस्तादात्म्यन्तेनात्रापि पक्षे प्रति-

421a **पक्षो धर्मी। प्रयोजनाभावादनुपचार इति चेत्। न। सर्वधर्मिधर्मप्रतिषेधा-**

बन्धनिबन्धनमेव गमकत्व। न चानु[2]पलब्धेः कार्यादिहेतावन्तर्भाव. स्वसाध्ये प्रतिबन्धानपेक्षत्वात्। हेतोश्च सकाशात् साध्यप्रतीतिस्तदायत्तत्वे सति स्यात् (।) न च संयोगे सति तदायत्तत्वमसयुक्ताना सयोगाभावात् (।) संयुक्तानामपि न संयोगतस्तदायत्तताऽन्यत एव संयुक्तानामुत्पत्ते·। एव समवायेपि वाच्यं। तस्मात्तदायत्तत्वन्तादात्म्यतदुत्पत्तिभ्यान्तेन कार्यस्वभावानुपलम्भबहिर्भूताना सयो[3]ग्यादीनामहेतुत्वन्तदायत्तत्वाभावेनाविनाभावाभावात्।

अथ तदायत्तत्वमस्ति तदेव तर्हि गमकत्वे निमित्तमिति स हेतुस्त्रिधैवेति सिद्धं।

ननु तथापि कथमनुमानस्योत्थानन्निर्विकल्पकप्रत्यक्षेण धर्मधर्मितत्सम्बन्धाग्रहात् स्वातन्त्र्येण वस्तुद्वयाधिगतेः।

उच्यते (।) सविकल्पकेनापि धूमप्रदेशादीनां धर्मधर्मिभावग्रहणमुपर्युपरिभावप्रतिभास[4] एव (।) स च निर्विकल्पकेप्यस्ति केवल विकल्पेतरयोर्ज्ञानयोरुल्लेखानुल्लेखकृतो विशेषः (।) तच्च निर्विकल्पक ज्ञानं यथागृहीतविषयमेवेदमिहास्तीद नास्तीति विधिप्रतिषेध जनयत् प्रमाणमिष्यते। तेन धर्मधर्मिणो. स्वरूपनिश्चयः सम्बन्धनिश्चय(प्रत्यक्षकृत)[1] एव भवतीति॥

पक्षधर्म इत्युक्त (।) **सूत्रे** पक्षधर्मश्च धर्मधर्मिसमुदाय। न च प्रतिवादि[5]न प्रति समुदायधर्मत्व हेतो. सिद्धन्तेन स सर्वो हेतुरसिद्धः स्यात्। सिद्धौ वानुमानस्य वैयर्थ्यमित्याह।

पक्षो धर्मीति। अवयवे समुदायोपचारात्। एकदेशत्व च समुदायोपचारनिमित्तन्तेन न दृष्टान्तधर्मी पक्ष उच्यते।

ई श्व र से नः प्राह। धर्मिध(र्मो हेतुरित्येतावद् वक्तव्य प्र)[1]**योजनाभावादनुपचार इति**। तदाह। **प्रयोजने**त्यादि। नेत्यादिना प्र[6]तिषेधति। न प्रयोजनस्याभाव· कथ **सर्वधर्मिधर्मप्रतिषेधार्थत्वा**दुपचारस्येत्यपेक्ष्यते। असत्युपचारे धर्मिधर्म इति निर्देश. कार्यः। तथा च दृष्टान्तधर्मिणोपि धर्मो हेतु स्यात्। उपचारे तु सर्वस्य धर्मिणो धर्मः प्रतिषिद्धो भवति। कथ(मिति चेदाह। **तदेकदेशत्वादि**)[1]।
6a तथा हि समुदायस्यावयवेषूपचारः।[7] तदेकदेशत्वनिबन्धनत्वेन न सर्वत्रोपचार। साध्यधर्मी च तदेकदेशत्वात् पक्षस्यावयवत्वात् पक्षोपचारयोग्यस्तस्य यो धर्मस्तत्प्रतिपत्त्यर्थमुपचारकरणं। **तथा चेत्युपचारयोग्यधर्मिप्रतिपत्तौ चाक्षुषत्वादिपरिहारः**। आदिशब्दात् काकस्य का(ष्ण्यादित्यादि।

---

[1] In the margin.

र्थत्वात्। तदेकदेशत्वात्। तदुपचारयोग्यधर्मिप्रतिपत्त्यर्थम्। तथा च चाक्षुषत्वा-दित्यादिपरिहारः।

धर्मवचनेनापि धर्म्याश्रय(परिग्रह)सिद्धौ धर्मिधर्मवचन[1] सामर्थ्यात् प्रत्यासत्तेः[2] साध्यधर्मिसिद्धिरिति चेत्। न। दृष्टान्तधर्मिणोपि प्रत्या(सत्ते)ः। तदंशव्याप्त्येति दृष्टान्तधर्मिणि सत्त्वसिद्धेः धर्मिधर्मवचनात् साध्यधर्मिण[3] एव[२] परिग्रह इति

ननु यदि चाक्षुषत्वादिति)[३] चक्षुर्विज्ञानविषयत्वादिति हेत्वर्थस्तदाय हेतु-रनैकान्तिकत्वात् तदङ्गशव्या[1]प्तिवचनेनैव निरस्त इति किमुपचारेण। अथ चक्षुर्विज्ञानजनकत्वादिति हेत्वर्थस्तदापि तज्जनकत्व सत्त्वमेव (।) तच्च शब्दे-प्यस्तीति न दृष्टान्तधर्मिधर्म एवायमिति कश्चित्।

तदयुक्तं। चक्षुर्विज्ञानजनकत्व हि सत्त्वविशेषः स च घटादीनामेव धर्मो न श(ब्दस्यातस्तन्निवृत्यर्थमुपचार)[१]करण। न त्वसत्यप्युपचारे व्याप्तस्य लिगत्वं (।) न च शब्दानित्यत्त्वेन चाक्षुषत्व[2] व्याप्तन्तत्कथमस्य लिङ्गत्व।

नैष दोष.। अनित्यत्वमात्रेण ह्यस्य व्याप्तत्वन्तच्च शब्देप्यस्तीति कथम-हेतुत्व स्यात्।

धर्मवचनेनेत्यादि। धर्मस्तदंशेन व्याप्त इति केवलेन **धर्मवचनेना**पि धर्मि-परतन्त्रत्वाद् धर्मस्यावश्यमसौ धर्मिणमाक्षिपति(।) तेन **धर्मिण आश्रयण**माश्र-(य. **परिग्रहस्त**)[१]स्य **सिद्धौ** सत्या यदेतद्धर्मिधर्म इत्यत्र धर्मिग्रहणन्तस्य सामर्थ्यात् प्रत्यासत्तिरिह[3] विवक्षितेति गम्यते (।) व्याप्तिविवक्षाया धर्मिग्रहणमनर्थक स्यात्। तस्माद् **धर्मिवचनसामर्थ्यात् प्रत्या।सत्तिः** सिद्धा (।) प्रत्यासत्तिश्च साध्यधर्मिण एव तत्र प्रथम हेतूपदर्शनात्। तया प्रत्यासत्त्या साध्यधर्मिपरिग्रहो भविष्यति। न प्रत्यासत्ते साध्यधर्मिपरिग्रह कुतो(।)दृष्टान्तधर्मिणोपि न केवल साध्यधर्मिण प्रत्यासत्ते। कदाचिद् व्याप्तिदर्शनपूर्वके प्रयोगे दृ[4]ष्टान्त-धर्मिणोपि प्रथम हेतुसद्भावोपदर्शनात्।

यदि न प्रत्यासत्ते साध्यधर्मिसिद्धि पारिशेष्यात्तर्हि भविष्यति। यतस्तवं-**शव्याप्त्या** हेतुभूतया **दृष्टान्तधर्मिणि** धर्मस्य **सत्त्वसिद्धिः**। न हि दृष्टान्तमन्तरेण हेतो साध्येन व्याप्ति प्रदर्शयितु शक्यत इति मन्यते। ततो धर्मिग्रहणाद् व्यति-रिच्यमानात् **साध्यधर्मिण एव परिग्रहः**। तदशेनेति च तच्छब्देन धर्मवच[5]नाक्षिप्तो धर्मी सम्बध्यत इति तत्सम्बन्धनार्थमपि धर्मिग्रहण नाशङ्कनीय।

यत्र प्रयोजनानन्तर न सम्भवति स पारिशेष्यस्य विषयो धर्मिवचनस्य त्वन्य

---

[1] Smos-pa. [2] Yin-pa. [3] In the margin.

सिद्धौ नियमा[1]र्थमपि वचनमाशंक्यते। सजातीय एव सत्त्वमिति विजातीयाद् व्यतिरेकासिद्धस्य साध्याभावेऽसत्त्ववचनं यथा।[4]

सामर्थ्यादर्थप्रतिपत्तिगौरवपरिहारार्थमपि पक्ष(धर्म)वचनम्।

दपि प्रयोजनं सम्भाव्यत इति मन्यमान· सिद्धान्तवाद्याह। सिद्धे तदङ्गशव्याप्त्या दृष्टान्तधर्मिणि सत्त्वे पुनर्द्धर्मिणो **वचनन्दृष्टान्तधर्मिण एव यो धर्म·** स हेतुरिति **नियमार्थमाशंक्यते**। ततश्च चाक्षुषत्वा[6]दय एव हेतव· स्युर्न कृतकत्वादय इत्यनिष्टमेव स्यात्। तस्मादुपचारः कर्त्तव्य इति।

किं पुन· क्वचित् त क्र्क शा स्त्रे दृष्ट नियमार्थम्वचनमित्यत आह। **सजातीय एवेत्यादि**। तत्र यः सन् सजातीये द्वेधा चासस्तदत्यये स हेतुरित्यत्रा चार्यी ये हेतुलक्षणे। **सजातीय एव सत्त्वमित्यवधारणेन** सिद्धेपि **विजातीयाद्** विपक्षाद्धेतो-
6b **व्यतिरेके** यदेत[7]दसंस्तंदत्यय इति **साध्याभावेऽसत्त्ववचनं** तन्नियमार्थमा चार्येण व्याख्यातमसत्येव नास्तिता यथा स्यान्नान्यत्र न विरुद्ध इति। **तथेहा**पि धर्मिवचनम्भावनियमार्थमाशक्यते।

नन्वपक्षधर्मस्याहेतुत्वान्न नियमार्था शङ्का। यतो व्याप्तस्य **हेतुत्वं** न चान्यधर्मिस्थेन साध्यधर्मेणान्यधर्मिस्थ· साधनधर्मो व्याप्तस्तस्मात्तदंशव्याप्तहेतुवचनसामर्थ्यादेव साध्यधर्मिपरिग्रहो[1] भविष्यतीत्यत आह। **सामर्थ्यादित्यादि**। अनन्तरोदितात् **सामर्थ्यादर्थस्य** साध्यधर्मिपरिग्रहलक्षणस्य भवति प्रतीति· पटुधिया श्रोतृणा किन्त्वशब्दकमर्थ स्वयमनुसरता **प्रतिपत्तिगौरवं** स्यात्। अत उपचारमात्रात् स्वयमशब्दकीर्थाभ्यूहरहिताद् धर्मिधर्म इत्यनेन **पक्षधर्म** इति समाननिर्देशात् प्रतिपत्तिगौरवं च **परिहृत**म्भवति। च शब्देनैतदाह। ये परोपदे[2]शमाकाक्षन्ति तैरयमर्थो लक्षणवचनाद् बोद्धव्य इति।

यथालक्षण प्रतीतेरपक्षधर्मो न हेतुरिति कुत इयमाशङ्का। ततस्तेषा लक्षणानुसारिणां नियमाशकापरिहारार्थञ्चोपचारकरणमिति। इह व्यवच्छेदफलत्वाच्छब्दप्रयोगस्यावश्यमेवावधारयितव्य (।) षष्ठीसमासाच्च पक्षधर्म इति नान्यस्समासस्सम्भवति। तथा च पक्षस्यैव धर्म्म इत्येवमवधारणात् तदशव्या[3]प्तिर्विरुध्यत इति विरुद्धलक्षणतामुद्भावयन्नाह।

पक्षस्य धर्मत्वे तम्पक्षं **विशेषणमन्यतो व्यवच्छेदमपेक्षत** इति। तद्विशेषणापेक्षस्य धर्मस्यान्यत्र पक्षीकृतादन्यस्मिन् सपक्षेऽननुवृत्तिः। तथा हि यः

---

[1] Stan-paḥi-phyir.

पक्षधर्मत्वे तं विशेषणमपेक्षते अन्यत्राननुवृत्तेः असाधारणता स्यादिति चेत्। न।[5] **अयोगव्यवच्छेदेन विशेषणात्। यथा चैत्रो धनुर्धर इति। नान्ययोगव्यवच्छेदेन यथा पार्थो धनुर्धर**[6] **इति आक्षेप्स्यामः। तदा हि वक्तुरभिप्रायवशात् न**

पक्षेण विशेष्यते स पक्षस्यैव भवति। यथा देवदत्तस्य पुत्रः (।) ततोन्यत्राननुवृत्तेरसाधारणता साधारणता न स्यात्। तदऊशव्याप्तिविरोध इति या[4]वत्। साधारणतया तदशव्याप्तिप्रतिपादनात्। ततो यदि पक्षधर्मो न तदंशव्याप्तिरथ तदशव्याप्तिर्न पक्षधर्म इति व्याहत लक्षणमिति।

ननु यदि साध्यधर्मिणि साधनधर्मस्य साध्यव्याप्तिर्न गृहीता तदा हेतोरनैकान्तिकत्वमथ गृहीता किं दृष्टान्ते हेतो(रन्वयेन कथञ्च पक्षध)[1]र्मस्य तदशव्याप्तिर्विरुध्यते साध्यधर्मिण्यपि व्याप्तेः प्रतिपन्नत्वात्। सर्वपदार्थस्य[5] क्षणिकत्वे साध्ये सत्त्वलक्षणस्य वा हेतोः को दृष्टान्तेन्वयः। तस्मात् स्वसाध्यप्रतिबन्धाद्धेतुस्तेन व्याप्त· सिध्यति (।) स च विपर्यये बाधकप्रमाणवृत्त्या साध्यधर्मिण्यपि सिध्यतीति न किंचिदन्यत्रान्वयापेक्षया (।) तत्कथमिदमाशंकितमन्यत्राननवृत्तेरसाधारणतेति।

(सत्य यद्यपि साध्यधर्मिणि हेतोः)[1] साध्यव्याप्तिमन्तरेण नानुमानस्योत्थानन्तथापि दृष्टान्ते साध्यसाधनयो.[6] प्रतिबन्धग्राहकप्रमाणमन्तरेण न साध्यधर्म्मिण्यपि व्याप्ति· सिध्यतीति तदर्थमिदमाशंकितं।

यत्तूच्यते कार्यहेत्वपेक्षया स्वभावहेतुविशेषापेक्षयैतदाशंकितं तत्तु क्षणिकत्वानुमाने सत्त्वापेक्षया। तस्य हि विपक्षबाधकप्रमाणवृत्त्यैव गमकत्वा(दिति तदेतदुत्तरत्र निरूपयिष्या)[1]मः। तस्मात् पूर्वगृहीतप्रतिबन्धसाधकप्रमाणस्मृतये हेतोरन्यत्र वृत्तिरपे[7]क्षणीया। 7a

एतत्परिहरति **नेत्या**दिना (।) **न** अन्यत्राननुवृत्तिः (।) कुतः। अयोगो सम्बन्धस्तद्वयवच्छेदेन **विशेषणात्** पक्षस्य। न ह्यन्ययोगव्यवच्छेदेनैव विशेषणम्भवति किन्त्व**योगव्यवच्छेदे**नापि। यत्र धर्मिणि धर्मस्य सद्भावः सन्दिह्यते तत्रायोगव्यवच्छेदस्य न्यायप्राप्तत्वात्। अत्र दृष्टान्तो **यथा चैत्रो धनुर्धर इति** (।) चैत्रे हि धनुर्धरत्वं सन्दिह्यते किमस्ति नास्तीति। ततश्चैत्रो धनुर्द्ध[1]र इत्युक्ते पक्षान्तरमधनुर्द्धरत्व श्रोतुराकाक्षोपस्थापित निराकरोत्ययोगव्यवच्छेदोत्र न्यायप्राप्तः।

पराभिमतव्यवच्छेदं निराचिकीर्षन्नाह। **नान्ययोगव्यवच्छेदेन** विशेषणा-

---

[1] In the margin.

तदेकदेशस्तदंशः। पक्षशब्देन समुदायावचनाद्। (व्याप्तं पदं व्याप्तिः। व्याप्तं हि तत्र व्यापकस्य भाव एव नापि व्याप्यस्य तत्र भाव एव। एतेन
421b **चान्वयव्यतिरेकनिश्चयावपि (उक्तौ)।**

दन्यत्राननुवृत्तेरसाधारणतेति सम्बन्ध·। अत्रापि दृष्टान्तो **यथा (पार्थो धनुर्द्ध इति** सामान्यशब्दोप्यय)[1] धनुर्द्धरशब्द. प्रकरणसामर्थ्यादिना प्रकृष्टगुणवृत्तिरि पा र्थे हि धनु[2]र्द्धरत्व सिद्धमेवेति नायोगाशङ्का। तादृशन्तु सातिशयं किमन्यत्रा प्यस्ति नास्तीत्यन्ययोगशंकाया श्रोतुर्यदा पार्थो धनुर्द्धर इत्युच्यते तदा सातिशय पार्थ एव धनुर्द्धरो नान्य इति प्रतीयते। तेनात्रान्ययोगव्यवच्छेदो न्यायप्राप्त. तथा कि पक्षेस्त्ययं धर्मो न (वेति संशये पक्षधर्म)[1] इत्युक्ते पक्षस्य धर्म एव नाधर्म. धर्मश्चाश्रितत्वाद् विशेषणन्तेनायोगो व्यवच्छिद्य[3]ते नान्ययोग·। तदंशव्य प्त्यान्ययोगस्य प्रतिपादनेन दृष्टान्ते सन्देहाभावात्। **आक्षेप्स्याम** इति निर्देक्ष्याम श्चतुर्थे परिच्छेदे (४।१९०)।

तदशस्तद्धर्म इति तच्छब्देन पक्ष· परामृश्यते न धर्म.?।) धर्मस्य धर्मासम्भवात तस्य पक्षस्याशस्तस्यैव साध्यो धर्म·। एकदेशे रूढोऽशशब्द. कथ धर्म प्रतिपाद यतीति चेदाह। **वक्तुरभिप्रायवशादिति**। न वस्तुबलेन शब्दाना वाचकत्व[4] किन्त वक्तुर्विवक्षावशान्न **तदेकदेशस्तदंश** इति प्रकृतेन सम्बन्ध. (।)

कि पुनरेवमिति चेदाह। **पक्षशब्देन समुदायावचनादिति**। यदि पक्षशब्दे समुदायोभिहित स्यात् तदा धर्मधर्मिसमुदायात्मकस्य पक्षस्यैकदेशो धर्मात्मकोऽश भवति। उपचरितेन तु पक्षशब्देन धर्म्येवाभिधीयते (।) तस्य चैकात्मकस्य कु एकदेश.।

व्याप्तं पदम्व्याप्तिरित्यादिना व्याच[5]ष्टे। तस्य पक्षधर्मस्य सतो व्याप्ति व्याप्नोति यश्च व्याप्यते व्याप्यव्यापकधर्मतया प्रतीते.। यदा व्यापकधर्मत विवक्ष्यते तदा व्यापकस्य गम्यस्य भाव एवेति सम्बन्धः। **तत्रेति** सप्तम्य प्रधानमेतन्नाधारार्थप्रधान धर्माणा धर्मान्तरत्वाभावात्। तेनायमर्थः (। **यत्र धर्मिणि व्याप्यमस्ति तत्र सर्वत्र व्यापकस्य भाव एवेति** व्यापकधर्मो व्याप्ति न त्वे[6]वमवधार्यते व्यापकस्यैव तत्र भाव इति। हेत्वभावप्रसगात्। अव्यापकस्या मूर्त्तत्वादेस्तत्र भावात्। **नापि तत्रैवेत्यवधार्यते**। प्रयत्नानन्तरीयकत्वादेरहे त्वापत्तेः। साधारणश्च हेतुः स्यान्नित्यत्वस्य प्रमेयेष्वेव भावात्। यदा तु व्याप

---

[1] In the margin.

धर्मता व्याप्तेर्विवक्षिता तदा यत्र धर्मिणि व्यापकोस्ति तत्रैव **व्याप्यस्य भावो** नान्यत्र। अत्रापि व्याप्यस्यैव।[7] तत्र भाव इत्यवधारणं हेत्वभावप्रसक्तेरेव 7b
नाश्रितमव्याप्यस्यापि तत्र भावात्। नापि व्याप्यस्य तत्र भाव एवेत्यवधार्यते। सपक्षैकदेशवृत्तेरहेतुत्वप्राप्तेः। साधारणस्य च हेतुत्वं स्यात् प्रमेयत्वस्य नित्येष्ववश्यम्भावादिति। व्यापकस्य तत्र भाव इत्यनेन चान्वय आक्षिप्तो व्याप्यस्य वा तत्रैव भाव इत्यनेन व्यतिरेक आक्षिप्त.।

यद्वा व्याप्तेर्व्याप्यव्यापकधर्म्मसम्वर्ण्णनं नि[1]यतानियतत्वख्यापनार्थं। तेन व्याप्तो हेतुर्भवति न तु व्यापकोऽनियतत्वात्।

ननु यो धर्मो व्याप्यमन्तरेण भवति स कथं व्यापको व्याप्यासम्बन्धेनाव्यापकत्वात्।

सत्य। केवलन्धर्मयो· सामान्येन व्याप्यव्यापकभावो निश्चीयते। यच्चानित्यत्वसामान्य प्रयत्नानन्तरीयकत्वव्यापक निश्चितन्तदप्रयत्नानन्तरीयकेपि दृश्यत इति व्यापकोऽनियत उच्यते। अथ प्रय[2]त्नानन्तरीयकस्वभावमेवानित्यत्वं निश्चेतुम्पार्यते तदानयोः परस्पर व्याप्यत्वमिति व्याप्त एव हेतुर्भवति। यदा च यत्र विप्रतिपत्तिस्तदेव साध्यमितरत् साधनमिति न्याय एषः।

यदि तर्हि "पक्षधर्मस्तदंशेन व्याप्त" इत्येतावद्धेतुलक्षण तत. पक्षधर्मत्वन्तदङ्शव्याप्तिश्चेति द्विरूपो हेतुः स्यादन्यत्र च त्रिरूप उक्तस्तत्कथन्न व्याघात इत्याह।

एतेन तदं[3]शव्याप्तिवचनेनान्वयव्यतिरेकावुक्तौ। अन्वयव्यतिरेकरूपत्वाद् व्याप्तेरिति भावः। तथा हि (।)य एव येनान्वितो यन्निवृत्तौ च निवर्त्तते स एव तेन व्याप्त उच्यत इति तदात्मकत्वाद् व्याप्तेर्व्याप्तिवचनेनान्वयव्यतिरेकाभिधानन्ततो व्याप्तिवचनेन रूपद्वयाभिधानान्न व्याघात इति। तौ च ज्ञापकहेत्वधिकारान्निश्चितौ। निश्चयश्च तयोर्नैकेनेव प्रमाणेनापि तु[4] **यथास्वं** यस्य यदात्मीयं प्रमाण निश्चायकन्तेन। यस्य च यत्प्रमाणन्तदुत्तरत्र वक्ष्यते।

ननु भावरूपत्वाल्लिङ्गस्य कथं व्यतिरेक· (।) साध्याभावेऽभावलक्षणोस्य रूपमिति चेत्। न। य एव हि साध्य एव लिङ्गस्य भावः स एव साध्याभावे व्यतिरेकः। तेनान्वयव्यतिरेक(योरपि तादात्म्य वि)[5]कल्पकल्पितस्तु भेद·। साध्याभावे लिगस्य निर्वृत्तिधर्मकत्वं व्यतिरेक इ[6]त्यपरे। यतश्च यत्र यत्र साधनधर्म्मस्तत्र तत्र साध्यधर्म इत्येव रूपोन्वयः। तेन यदुच्यते (कु मा रि ल) भ ट्टे न॥

[1] In the margin.

पक्षधर्मश्च यथास्वं प्रमाणेन निश्चितः।

"यः सवित्रुदयो भावी न तेनाद्योदयोन्वितः।
अथ चाद्योदयात् सोपि भविता श्वोनुमीयते॥
व्योम्नि दृष्टं च धूमाग्रं भूमौ बह्निः प्रतीयते।
(धूमाग्रमग्नेरन्वेति न च भूमौ प्रति)[1]ष्ठितः॥
एवन्न देशकालाभ्यां लिङ्गं लिङ्गयनुगच्छति।
तस्मान्नास्यान्वयो नाम[6] सम्बन्धोऽशः प्रतीयत" इति (।)

तदपास्त। यतश्च यथोपवर्ण्णितः साध्यान्वयो हेतुर्विद्यते। तेनैतदपि प्रत्युक्तं।

"प्रत्याख्येयैवमेवेह व्याप्तिसम्बन्धकल्पना।
यो हि नान्वीयते येन स तेन व्याप्यते कुत" इति।

अत एवेदृशीम्परपरिकल्पि(तां व्याप्ति निराकर्त्तुमा चार्यो **व्यापकस्य**)[1]
8a **तत्र भाव** इत्यादिना लौकिकीव्याप्तिन्दर्शितवान्। सम्बन्धग्राह[7]क प्रमाणं लिङ्गस्य साध्यायत्तताग्राहकं। यच्च तदायत्तता गृह्णाति तदेवान्वयव्यतिरेकात्मिकाया व्याप्तेर्ग्राहक। साध्यायत्तताया एव व्याप्तिरूपत्वात्। तस्माद् व्याप्तिग्राहकादेव प्रमाणात् यत्र व्याप्यसम्भवस्तत्र व्यापकभावो यत्र व्यापकाभावस्तत्र व्याप्याभाव इत्य(भावेपि निश्चयो भवति। तेन यदुच्यते)[1] [कुमारिल] भ ट्टेन।[2]

"सामान्यविषयत्वाच्च न प्रत्यक्षेन्वयम्भवे(त्)।
न चानुमीयते पूर्वमविज्ञा[1]तान्वयान्तरात्॥
अथान्वयेनुमान स्यादन्वयान्तरवर्ज्जित।
सिद्धे तदनपेक्षेस्मिन्नन्यत्राप्यन्वयेन किं॥
व्यतिरेकोपि लिङ्गस्य विपक्षान्नैव लभ्यते।
अभावे स न गम्येत कृतयत्नैरबोधनात्॥
यावत्सर्वविपक्षाणां पर्यन्तो नावधारितः।
तावद्धेतोरवृत्तित्वं कस्तस्माज्ज्ञातुमर्हती"ति

तदप्यपास्तं।

---

[1] In the margin. 2 Ślokavārtika 114.

पक्ष) [1]धर्मश्च किं यथास्वं प्रमाणेन निश्चित उक्तो वेदितव्य इति सम्बन्धः पक्षधर्म्मव[2]चननैव। एवं च त्रैरूप्यमेवोक्त लिगस्येत्यविरोधः।

तेन यदुच्यते ऽवि द्ध क र्णेन। "सत्यमनुमानमिष्यत एवास्माभिः प्रमाण लोकप्रतीतत्वात् केवल लिंगलक्षणमयुक्त"मिति तदपास्तं। त्रैरूप्यस्यापि लिङ्ग-लक्षणस्य लोकप्रतीतत्वात् धूमादाविव।

ननु कथं यथास्वं प्रमा(णेन पक्षधर्मनिश्चय·) [1] सामान्यस्य लिङ्गत्वात् (।) तस्य च प्रत्यक्षेण स्वलक्षणविषयत्वेनाग्रहणात्। अगृही[3]तस्य न्वालिगत्वात्। गृहीतस्य च स्वलक्षणस्यानन्वयेनालिगत्वात्। नाप्यनुमानेन सामान्यग्रहणन्त-ल्लिङ्गस्यापि सामान्यरूपत्वेन प्रत्यक्षेणाग्रहणादनुमानेन ग्रहणेऽनवस्थाप्रसङ्गात्॥

तदाह।

"लिङ्गलिङ्ग्यनुमानानामानन्त्यादेकलिङ्गिनि।
गतिर्युगसहस्रेषु बहुष्वपि न (विद्यत)[1]" इति[2]।

अथ कार्यस्वभावविकल्पप्रतिभासि सामान्य कार्यादिदर्शनाश्रयतया तदध्यव[4]-सायाच्च कार्यादिहेतुरित्युच्यते।

तदयुक्त(।)तस्यापि विकल्पाव्यतिरिक्तत्वाद् विकल्पवद् अन्यत्र विकल्पा-न्तरेऽननुगमात् कथ सामान्य लिगं। तस्माद् विजातीयव्यावृत्तमेव धूमादे रूप ज्ञापकहेत्वधिकारात् प्रत्यक्षनिश्चितम्विशेषानवधारणेन सामान्यलक्षण लिंग-मुच्यते। न तु विजातीयव्यावृत्तिर्विकल्पाकारो वाऽवस्तुत्वात्। तेनायमर्थः। प्रत्यक्षपृष्ठभाविना निश्च[5]येनाधूमव्यावृत्तरूपावधारणेन धूमादिस्वलक्षणमिद प्रतिभासमान कदाचित्तार्ण्णम्पार्ण्णमन्यद्वेति विशेषानवधारणेन चानेकस्वलक्षण-रूपं सामान्यलक्षण लिङ्गं प्रत्यक्षविषये व्यवस्थाप्यते। यथा च लिङ्गस्य विशेषा-नवधारणेन सामान्यरूपत्वन्तथा साध्यस्यापि। तदाह।

"अतद्रूपपरावृत्तवस्तुमात्रप्रसाधनात् (।)
सामान्यविषयं प्रोक्त लिङ्गं भेदाप्रतिष्ठितेरि"ति।

तथाभूतस्य[6] च सामान्यलक्षणस्य लिङ्गस्य साध्यकार्यत्वं साध्यस्वभावत्वं च वस्तुत्वादविरुद्ध। तच्च लिङ्ग प्रत्यक्षादिनिश्चितमिति सर्वं सुस्थ॥

त एत इत्यादिना त्रिधैव स इत्येतद् व्याचष्टे।

[1] In the margin. [2] Ślokavārtika. 153:3

त एते कार्यस्वभावानुपलब्धिलक्षणा हेतवस्त्रयः। यथा धूमादग्निरत्र, शिंशपात्वाद् वृक्षोयम्।

त एत इति। पक्षधर्मत्वेन यथोक्तया च व्याप्त्या युक्ताः **कार्यस्वभावानुपलब्धयो लक्षणं** स्वभावो येषान्ते तथोक्ता.। **धूमादिति** कार्यहेतोराख्यानं। **अग्निरत्रेति** साध्यफलस्य। न त्वयम्पक्षप्रयोगः[7] (।)

8b ननु यः प्रदेशोग्निसम्बन्धी सोप्रत्यक्षः। यश्च प्रत्यक्षो नभोभागरूप आलोकाद्यात्मा धूमवत्तया दृश्यमानो न सोग्निमानतः कथ प्रदेशे धूमस्य प्रत्यक्षतः सिद्धिस्तस्माद् धूम एव धर्मी युक्तः।

"साग्निरयं धूमो धूमत्वादित्येवं साध्यसाधनभाव" इत्यु द्यो त क र[1]ः। तस्यापि साग्नेर्धूमावयवस्याप्रत्यक्षत्वात्। परिदृश्यमानस्य चोर्द्ध्वभागवर्तिनोग्निना सहावृत्तेः कथ धूमसामान्यस्य साध्यध[1]र्मिणि प्रत्यक्षतो निश्चयः। धूमावयवी प्रत्यक्ष इति चेत्। न (।) अवयवव्यतिरेकेण तस्याभावात। लोकाध्यवसाय. तस्यैकत्वे वा प्रदेशस्यापि तावतः कल्पितमेकात्मकत्व न वार्यते। प्रदेश एव च लोकोग्निं प्रतिपद्यते न धूमे धर्मिणि। तेन यद्यग्नेरनुमानमिष्यते प्रदेश एव धर्मिण्यनुमानमस्त्वित्यवम्परमेतत्।

न त्वत्र पूर्वोक्तो दोषपरिहार इत्येके। यद्वा दृश्यमा[2]नः प्रदेशो धर्मी अधस्तादग्निमानित्येतावत् साध्यधर्मो नाग्निमात्र। ईदृग्विधेन च साध्यधर्मेण पूर्वमेव व्याप्तिः प्रतिपन्ना। धूमश्चात्र प्रत्यक्षसिद्ध इति कथं नानुमानं। यत्तु देशाद्यपेक्षया कार्यहेतोर्गमकत्वमत्रोच्यते। तदसङ्गतमेव देशादेर्विशेषणस्यासिद्धत्वात्। धूममात्रदर्शनादेवास्य साध्यस्य सिद्धत्वाच्च। यद्वा प्रदेशेऽग्नि दृष्ट्वा किंशुकादिरूपेण स[3]न्देह यदा धूमदर्शनान्निवर्त्तयति। तदैतदुदाहरणं द्रष्टव्य। तदा हि प्रत्यक्षेण धर्मी साधनधर्मश्च सिद्धो भवति।

यत्तूच्यते (।) प्रत्यक्षाप्रत्यक्षरूप एव धर्मिण्यनुमानमिति। तदयुक्त। प्रत्यक्षाङ्शे यद्यपि हेतुः सिद्धस्तथापि न तत्र साध्यधर्मानुमान प्रत्यक्षबाधितत्वात्। परोक्षाङ्शे तु स्यादनुमानं केवलन्तत्र हेतुरसिद्ध.। न च प्रत्यक्ष प्रत्यक्षरूपस्य धर्मि[4]णो धर्मः प्रत्यक्षसिद्धोऽप्रत्यक्षेङ्शे प्रत्यक्षाव्यापारात्। यदा वा श्रवणग्राह्ये शब्देऽनित्यत्वानुमानन्तदा कथं धर्मिणः प्रत्यक्षाप्रत्यक्षरूपतेति यत्किञ्चिदेतत्।

शिङ्शपात्वादिति स्वभावहेतोरुदाहरणं।

---

[1] Cf. Nyāyavārtika (1:1:5).

प्रदेशविशेषे क्वचिन्न घट उपलब्धिलक्षणप्राप्तस्य अनुपलब्धेः।

उ म्वे क स्वत्राह। "स्वभावहेतोर्गमकत्वं दूरोत्सारि(तमेव। भेदाधिष्ठान)[1]त्वाद् गम्यगमकभावस्य। न ह्यभिन्ने प्रतिबन्धो नाम। न शिङ्शपा वृक्षात्मिका।[5] ततो व्यावर्त्तमानत्वात्। यो हि यस्माद् व्यावर्त्तते न स तदात्मा। घटादिव पटः। व्यावर्त्तते च खदिरादिभ्यः शिशपेत्यतदात्मिका। तदात्मत्वे च लिङ्गग्रहणवेलायामेवाव्यतिरेकात् साध्यस्वरूपवल्लिङ्गाग्रहणवत्त्व साध्यस्य गृहीतत्वादनुमे(यत्वहानिः। तादात्म्येन च शि)[1]शपात्वस्य गमकत्वे तादात्म्याविशेषाद् वृक्षत्वस्य शिशपा प्रति गम[6]कत्वप्रसङ्ग.। अथास्यानियतत्वादगमकत्व नियततैव तर्हि गमकत्वे निमित्त न तु तादात्म्य व्यभिचारिण्यपि वृक्षत्वे तादात्म्यस्य दर्शनात्। अथ तदात्मनैव वृक्षे नास्ति शिशपा

. तदात्मिका। सर्वथा ययोरेव तया गम्यगमक(भावो नानात्म्ये तु तादात्म्याभावः।)[1]एवमशिशपाऽवृक्षापोहयोरपोहबुद्ध्योर्वा गम्यगमकभावो निराक[7]र्त्तव्य"इति। 9a

तदयुक्तं। शिशपा हि वृक्षविशेषस्वभावा। वृक्षविशेषोपि शिशपास्वभाव एवेत्युभयगतन्तादात्म्य। तादात्म्येपि च कश्चिदवृक्षव्यावृत्ते स्वभावे कथचिन्मूढो नाशिशपाव्यावृत्ते (।) तेन शिशपादेर्लिङ्गस्य ग्रहणान्नानु(मेयत्वहानि·। यतश्च न वृक्षमात्र)[1]स्वभावा शिशपा (।) तेन न वृक्षत्वस्य शिशपा प्रति गमकत्व। साध्यसाधनाद्य[1]भावदोषन्तु स्वयमेव शास्त्रकारो निराकरिष्यतीति यत्किञ्चिदेतत्।

प्रदेश इत्यनुपलब्धे कथन। **प्रदेशविशेष** इत्युद्दिष्टे देशे। **क्वचिदिति** वादिप्रतिवादिप्रसिद्धे। **न घट** इति घटाभावव्यवहार· साध्य·। **उपलब्धीत्यादिना** हेतुनिर्देशः। उपलब्धे(र्लक्षणानि करणानि चक्षुरादीन्य)[1]प्रतिबद्धसामर्थ्याद्युपलब्धिलक्षणानि। तानि **प्राप्तः** स्वाभासज्ञानजननयो[2]ग्य. स्वभावविशेषः। स्वज्ञानजननसामग्र्यन्तर्भूतोर्थ इत्यर्थः। **तस्यानुपलब्धेस्तथाभूतस्यासद्व्यवहारसिद्धिः।**

कथं पुनर्यो यत्र नास्ति स तत्रोपलब्धिलक्षणप्राप्तो भवति। उपलब्धिलक्षणप्राप्तत्वं हि ज्ञानविषयत्वन्तस्मिश्च सति कुतो नास्तित्वं।

उच्यते। यावत्यां (सामग्र्यां सत्यां पूर्वं प्रति)[1]पन्नो भावस्तावत्यामेव

---

[1] In the margin.

यदि स्याद्उपलम्भयोग्यभाववदेव स्यात्[2] नान्यथा। तेनोपलब्धिलक्षणप्राप्तसत्त्वं ततस्येत्युक्तम्। तत्र द्वौ वस्तुसाधनौ एकः प्रतिषेधहेतुः।

सामग्र्यां सत्या **यदि स्यात्** पूर्वकालवदुपलभ्येतेत्येव[3]मुपलब्धिलक्षणप्राप्तत्व **बुद्ध्या** परामृश्य भावस्याप्रतिभासनान्नास्तीति निषेधः क्रियते। न त्वदृश्यस्य। प्रतिभासपरामर्शोपायाभावात्। सर्वदाऽप्रतिपन्नत्वात्।

ननु दृश्यस्याभावे सति सैव सामग्री कथ प्रतिपन्नेति चेत्। न। एकज्ञान-विषययोर्भावयोरेको(पलम्भादिति)[1] ब्रूम। स्वत एव च निषिध्यमानस्यो-पलब्धिलक्षणप्राप्तत्वन्निश्चीयते। एतदेवैक[4]ज्ञानजननयोग्यतयोपलब्धिलक्षण-प्राप्तत्वन्दर्शयितुमाह।

यदि स्याद् घटादिरुपलभ्य सत्त्व यस्य स तथाभूत एव स्यात्। **नान्यथेति** न कदाचिदग्राह्यस्तथाभूतोऽवश्य ज्ञानन्न व्यभिचरतीति यावत्। यत एवन्**तेन** कारणेन। **उपलब्धिलक्षणप्राप्तस्येति** यद्विशेषणमुक्तन्तदर्थादु**पलब्धिलक्षणप्राप्तसत्त्वस्येत्युक्त**-म्भवति। अत्र त्वयं बाह्यार्थ। लक्ष्यतेऽ[5]नेनेति लक्षण। उपलब्धिरेव लक्षणन्तत्प्राप्तमुपलब्धिलक्षणप्राप्त ज्ञानेनाव्यभिचरितसम्बन्धमित्यर्थ'। एवंभूतं सत्त्व यस्य तत्तथोक्त। तथाभूत हि सत्त्व ज्ञान निवृत्त्यावश्य निवर्त्तत इति भावः। विधिप्रतिषेधाभ्या सर्वं साधन व्याप्त। विधीयमानश्च साध्यः प्रतिबन्धद्वयेन भिद्यत इति विधिप्रतिषेधो हेतुत्रयायत्ताविति दर्शयन्नाह। **तत्रेत्यादि**।

त[6]त्र त्रिषु हेतुषु **द्वौ** कार्यस्वभावहेतू **वस्तुसाधनौ** विधिसाधनौ। **द्वावेवेति** चावधारण न तु वस्तुसाधनावेवेति। आभ्या सामर्थ्याद् व्यवच्छेदस्यापि सिद्धे.। **एकः प्रतिषेधहेतु**रिति। उक्तलक्षणोनुपलम्भ प्रतिषेधहेतुरेव। न त्वेक एवेत्यवधार्यते पूर्व्वाभ्यामपि व्यवच्छेदगतेः।

9b कश्चिदाह। "व्यवच्छेदः शब्दलिङ्गाभ्या प्रसाध्यते यावाश्चिद् व्यवच्छेद.[7] स सर्वोनुपलम्भादेवेत्यनुपलम्भ एवैको हेतुरि"ति।

तदयुक्तं। यतो न तावत् प्रमाणव्यापारापेक्षयैतदुच्यते। वस्तुन्येव प्रमाणव्यापारात्। तदाहात **एव** वस्तुविषय प्रामाण्य द्वयोरिति। नाप्यध्यव-सायवशादेतदुच्यते वस्तुन एवाध्यवसायात्। व्यवच्छेदेन सह लिगस्य **सम्बन्धाभावाच्च**।

---

[1] In the margin.

स्वभावप्रतिबद्धत्वेऽर्थोऽर्थं न व्यभिचरति[3]। स च तदात्मत्वात्। तदात्मत्वे साध्यसाधनयोर्भेदाभाव इति चेत्। न। धर्मभेदानां परिकल्पनात् इत्युच्यते।

यो पि मन्यतेऽनुपलम्भेऽसद्व्यवहारयोग्यता साध्यते न प्रतिषेधः।[1] **योग्यता** च स्वभावभूतैव। तथाग्निमति प्रदेशे साध्ये अग्निमत्ता प्रदेशस्य स्वभाव एव साध्यो धूमवत्त्वादिति च हेतुः। प्रदेशाभिन्न इति सर्वो हेतुः स्वभावहेतुरेवेति (।) तदयुक्तम्(।)एव हि गमकत्त्वे गर्दभत्वादेरपि गमकत्व स्यात्(।) न भवत्यग्निकार्यत्वाभावाद् गर्दभस्येति चेत्। यद्येव धूमस्याग्निकार्यत्वमेव गमकत्वे निबन्धनमिति कथं न कार्यहेतुः।

अन्य[2]स्तु मन्यते"ऽनुपलम्भस्तु प्रदेशकार्यं इत्यसद्व्यवहारे साध्ये कार्यहेतुरेव। कृतकविकल्पश्चानित्यशब्दकार्यं इति सर्व एव हेतु. कार्यहेतुरि"ति।

तदप्ययुक्तं (।) कृतकविकल्पो हि कृतककारणत्वात् तस्यैवानुमापकः स्यान्नानित्यस्य। कृतकस्यानित्यस्वभावत्वादनित्यत्वं साधयतीति चेत्। यद्येव कृतकत्वादेवानित्यत्वप्रतीतिः स्यान्न कृतकविकल्पात्। कृ[3]तकस्वभावतयैवानित्यत्वे गमकत्वात्। यद्वा कृतकविकल्पश्च स्यान्न वानित्य इत्यनैकान्तः। कृतकविकल्पजननसामर्थ्यं कृतकाव्यतिरिक्तन्तच्च न पूर्वन्न पश्चात्तेनासावनित्योऽव्यतिरिक्तन्तर्हि सामर्थ्यमनित्यत्व साधयतीति कथ न स्वभावो हेतुरिति यत्किञ्चिदेतत्।

किं पुनर्द्वावेव वस्तुसाधनावित्याह। **स्वभावेन प्रतिबन्धः** "साधनं कृते"ति स[4]मासः। **स्वभावेन प्रतिबद्धत्वं**। प्रतिबद्धस्वभावमिति यावत्। **तस्मिन् सत्यर्थो लिंगमर्थमिति लिङ्गिन न व्यभिचरति।**

स च स्वभावप्रतिबन्धः कुत इत्याह। **तदात्मत्वादिति** साध्यस्वभावत्वात्। **तदात्मत्वे** साध्यस्वभावात्मत्वे साधनस्य। यदेव साध्यन्तदेव साध(नमिति **साध्यसाधनयो**)[1]**र्भेदाभावस्तेन** प्रतिज्ञार्थैकदेशो हेतुरिति परमाशङ्क्याह। **नेत्यादि। सा[5]ध्यसाधनभूताना धर्मभेदानां** व्यावृत्तिभेदेन **परिकल्पनादा**रोपाद् (।)

एतदुक्तम्भवति। धर्मभेदः समारोप्यते तेन साध्यसाधनभेदः। यतो निश्चितो गमको निश्चेतव्यश्च गम्य उच्यते। निश्चयविषयश्चारोपित एवेति निश्चयभेदारोपितो धर्मं(भेदः। एतच्च वक्ष्यामोऽन्यापोहप्र)[1]स्तावे।[2]

---

[1] In the margin. [2] Pramāṇavārtika 3:163-73.

तथा चानुमानानु[4]मेयव्यवहारोऽयं सर्वो हि बुद्धिपरिकल्पितो बुद्ध्यारूढेन धर्मधर्मिभेदेनेति उक्तम्। धर्मधर्मितया भेदो बुद्ध्याकारकृतो नार्थोऽपि। बुद्धि-(विकल्प)भेदानां स्वेच्छामात्रानुरोधिनां[1] अनर्थाश्रयात्[5]। तत्कल्पितविषयाऽर्थप्रतीतावनर्थप्रतिलम्भ एव स्यात्। कार्यस्यापि स्वभावप्रतिबन्धः। तत्स्वभावस्य तदुत्पत्तेः। एतावनुमेयप्रत्ययौ अतत्प्रतिभासित्वेऽपि साक्षादनुत्पत्तेः[6]।

आचार्य दि ग्ना गे नाप्येतदुक्तमित्याह। **तथा चे**त्यादि। **सर्व एवेति**[6] यत्रापि साध्यसाधनयोरग्निधूमयोर्वास्तवो भेदस्तत्रापि स्वलक्षणेन व्यवहारायोगादनुमीयतेनेनेत्यनुमानलिङ्गमनुमेयः साध्यधर्मी साध्यधर्मश्च तेषां **व्यवहारो** नानात्वप्रतिरूपः। **बुद्ध्यारूढेन धर्मधर्मिणो**(**र्भेदस्तेन** बुद्धिप्रतिभासगतेन)[3] भिन्नेन रूपेण भेदव्यवहार इति यावत्। यदि तर्हि **बुद्धिपरिकल्पितो** ध[7]र्मधर्मि-
10a व्यवहार एवन्तर्हि कल्पिताद्धेतो. साध्यसिद्धि प्राप्ता। ततश्च हेतुदोषो यावानुच्यते स सर्वः स्यात्। तदाह भ ट्ट· ॥[2]

"यदि वा विद्यमानोपि भेदो बुद्धिप्रकल्पितः (।)
साध्यसाधनधर्मादेर्व्यवहाराय कल्प्यते ॥
ततो भवत्प्रयुक्तेस्मिन् साधन या(वदुच्यते।
सर्वत्रोत्पद्यते बुद्धिरिति)[3] दूषणता भवेदि"ति ।

अत्राह। **भेद** इत्यादि। एतदाहार्थ **एव** वार्थं गमयति केवलं **धर्मधर्मितयाऽ**य धर्मोऽय धर्मीति यो भेदो नानात्वमयमेव **बुद्ध्याकारकृतो** बुद्ध्या परिकल्पितो **नार्थो**पि न लिङ्गमपि बुद्धयाकारकृतम्(।)विकल्पनिर्मितादेव लिङ्गात् कस्माद् अर्थप्रतिपत्तिर्न भवतीत्याह। **विकल्पे**त्यादि। **विकल्पभेदानां** विकल्पविशे(षाणामिच्छामात्रानुरोधित्वेन स्वत)[3]न्त्राणामनर्थाश्रयादर्थाप्रतिबद्धत्वे (साक्षादनुत्पत्ते)[3]र्नार्थालम्बनत्वादित्यर्थ· । तैरर्थी नाश्रयै[2]र्विकल्प कल्पित-**श्चासौ** विषयश्चेति **तत्कल्पितविषयस्तस्मादेवभूताद्धेतोरर्थप्रतीतावभ्युपगम्यमानायामनर्थप्रतिलम्भ एव स्यादर्थप्रतिलम्भ** एव न स्यात्।

द्वितीय प्रतिबन्धलक्षणमाह। **कार्यस्यापी**त्यादि। **तत्स्वभावस्ये**ति **कार्यस्वभावस्य तदुत्पत्तेः** का(रणादुत्पत्तेर् योऽनुमा)नस्य प्रामाण्य नेच्छति तं प्रत्याह। **एतावनुमेयप्रत्ययौ** प्रमाणमिति सम्ब[3]न्ध । एताविति स्वभावकार्यलिङ्गौ। अनुपलब्धेः स्वभावहेतावन्तर्भावाद् द्वावित्याह। यद्वा प्रक्रान्तापेक्षया द्वावित्याह।

---

[1] Raṅ-dgaḥ-va-rnams. [2] Ślokavārtika, Nirālamba 171-72.
[3] In the margin.

तदुत्पत्तेः तदव्यभिचारिणौ । इति प्रमाणं प्रत्यक्षवत् ।

**प्रत्यक्षस्यापि (प्रामाण्यं) अर्थाव्यभिचार एवेति । तदभाव भाविनः तद्विप्रलम्भ[7]ात् । अव्यभिचारश्चान्यस्य कोन्यस्तदुत्पत्तेः । अनायत्तरूपाणां सहभाव- 422a
नियमाभावात् ।**

स्वभावकारणयोरनुमेययोः प्रत्ययावित्यनुमेयप्रत्ययौ **अतत्प्रतिभासित्वेपीत्य**नुमेयस्वलक्षणाप्रतिभासित्वेपि । अतत्प्रतिभासित्वन्ततः **साक्षादनुत्पत्तेः** । कथन्तर्ह्यव्यभिचार इत्याह । **तदुत्पत्तेरित्यनुमेयाभ्या स्वभावकारणाभ्यां पा[4]रम्पर्येणोत्पत्तेः** । **तदव्यभिचारिणावित्यनुमेयाव्यभिचारिणौ । इति हेतो प्रमाणं प्रत्यक्षवत् ।**

तेन यदुच्यते ऽ वि द्ध क र्णे ना "नधिगतार्थपरिच्छित्ति प्रमाणमतो नानुमानम्प्रमाणमर्थपरिच्छेदकत्वाभावादि" ति तदपास्त । यत. सर्व एव प्रेक्षावान् प्रवृत्तिकाम· प्रमाणमन्वेषते प्रवृत्तिविषयार्थोपदर्शकत्वेन प्रवृत्तिविषयश्चार्थोऽर्थक्रियासमर्थ ए[5]व । न चानागत प्रवृत्तिसाध्यार्थक्रिया सामर्थ्यम्वस्तुन प्रत्यक्षम्परिच्छिनत्तीत्युक्तमत कथमस्यार्थपरिच्छेदमात्रात्प्रामाण्य । तस्मात् स्वविषये तदुत्पत्त्या प्रत्यक्ष यन्मया पूर्वप्रतिपन्न प्रबन्धेनार्थक्रियाकारि तदेवेदमिति निश्चय, कुर्वत् प्रवर्त्तकत्वात् प्रमाणन्तथानुमानमपि ।

प्रत्यक्षस्यापीत्यादिना व्याप्तिमाह । **अर्थाव्यभिचार एवेति** । पूर्वमभिमतार्थ[6]कारित्वेन निश्चितस्यार्थस्य सम्भवे सति भाव एव प्रत्यक्षस्य प्रामाण्यमन्यथा **तदभावे** अर्थाभावे **भाविनः** प्रत्यक्षस्य **तद्विप्रलम्भान्निश्चितार्थासम्वादात्** । एतदुक्तम्भवति । यदार्थक्रियासमर्थम्वस्तु प्रत्यक्ष न परिच्छिनत्ति । यदि च तथाभूतमपि वस्तु व्यभिचरेत्प्रमाणमपि न स्यात् । **अव्यभिचारश्चान्यस्य कोन्यस्तदुत्पत्ते**रित्यन्यस्यार्थान्तरभूतस्य[7] योन्येन सहाव्यभिचार. स तदुत्पत्तेः कोन्यो नैवान्यः । 10b
तदुत्पत्तिरेवाव्यभिचार इत्यर्थः ।

कस्माद्(।) **अनायत्तरूपाणामप्रतिबद्धस्वभावानां सहभावनियमाभावादव्यभिचारनियमाभावात्** । तस्मादर्थक्रियाकारित्वेन निश्चितादर्थादुत्पत्तिरेव प्रत्यक्षस्याव्यभिचार इति प्रामाण्यन्तच्चानुमानेप्यस्तीति सम द्वयमिति भाव. ।

एतेनैतदपि निरस्तं "प्रमाणस्यागौ[1]णत्वादनुमानादर्थनिश्चयो दुर्लभ" इति । यद्यगौणत्वमनुपचरितत्वमुच्यते तदानुमानमप्यनुपचरितमेवास्खलद्बुद्धिरूपत्वात् ।

अथ धर्मधर्मिसमुदायस्य साध्यत्वे हेतोः पक्षधर्मत्वमन्वयो वा न सम्भवति तेन पक्षधर्मत्वप्रसिद्ध्यर्थं धर्मिणः साध्यत्वमुपचरितव्यमन्वयसिद्ध्यर्थञ्च धर्मस्येत्येवमुपचरितविषयत्वादनुमानमुपचरित ।

यदि तदुत्पत्तेः कार्यं गमकं सर्वथा गम्यगमकभावः प्राप्तः।

तदयुक्त[2] यतो लोके धूममात्रमग्निमात्रव्याप्तं यत्र धर्मिणि दृश्यते तत्रैवाग्नि-प्रतीतिर्भवतीति कस्यात्रोपचार एवं च समुदायस्यापि साध्यत्वं सिध्यति। यदाह। "केवल एव धर्मो धर्मिणि साध्यस्तथेष्टसमुदायस्य सिद्धिः कृता भवती"ति (।) न चानुमानविषये साध्यशब्दोपचारे सत्यनुमानमुपचरितन्नाम।

अथ प्रमाणस्यागौणत्वादभ्रान्तत्वादनुमानस्य तु भ्रान्तत्वादप्रा[3]माण्यमित्यु-च्यते।

तदयुक्त (।) भ्रान्तस्याप्यग्न्यनुमानस्य तदुत्पत्त्या बाह्याग्न्यध्यवसायेन लोके प्रामाण्यदर्शनात् प्रत्यक्षवत्। अथ प्रत्यक्षमपि प्रमाणन्नेष्यते तदा लोकप्रतीति-बाधा। प्रत्यक्षानुमानयोः प्रमाणयोर्लोकप्रतीतत्वात्।

अथ नैव प्रत्यक्षानुमानयोः प्रमाणत्वं प्रतिषिध्यते। किन्तु लिङ्गन्त्रिलक्षणं चतुर्लक्षण वा न केनचित् प्रमाणेन सिद्धमिति पर्य[4]नुयोगे यद्यनुमानमुच्यते साधकं। पुनस्तत्रापि स एव पर्यनुयोग इत्येवं सर्वत्र पर्यनुयोगपराण्येव सूत्राणि। तथा च सूत्रं (।)

"विशेषेनुगमाभावः सामान्ये सिद्धसाधनमि"ति[1] (।)

तदप्ययुक्त। पूर्वमेव त्रैरूप्यग्राहकस्य प्रमाणस्य व्याप्तिवचनेनाक्षिप्तत्वात्। (न चाप्रमाणकेन परः)[2] पर्यनुयुज्यते वादिप्रतिवादिनोरसिद्धत्वात्।

अथ वचनात्मकमनुमा[5]नं न वक्तुः प्रमाणमथ (व)चनेन परं प्रतिपादयति तथाऽप्रमाणकेन पर्यनुयोगः क्रियत इति।

तदप्ययुक्त। द्वयोरपि हि वचनादर्थप्रतीतिः प्रमाणभूतैवोत्पद्यतेऽर्थपरिच्छेद-कत्वात् केवलम्वक्तुरधिगमस्य निष्पन्नत्वात् प्रमाणं नो वा तेन पुनरप्रमा(णं भवत्यप्रामाण्ये वा द्वयोरप्यप्रमा)[3]णमिति कथन्ततोर्थप्रतीतिः।

यदप्युच्यते (।) "परसिद्धेनानुमानेनानुमा[6]नन्निषिध्यत"इति तदप्येतेन निरस्तमिति। संयोगवशाद् गमकत्वे।

"न च केनचिदङ्गेन न संयोगी हुताशनः।
धूमो वा सर्वथा तेन प्राप्तं धूमात् प्रकाशनमि"ति।

य. सर्वथा गम्यगमकभावप्रसंग आचार्य दि ग्ना गे नाक्षिप्तं परं प्रति तदिहापि कार्य(हेतौ आशङ्कते **यदीत्यादिना**)[1] साध्यादुत्पत्तेः कारणात् **कार्य-**

---

[1] Pramāna-Samuccaya. [2] In the margin.

सर्वथा जन्यजनकभावादिति चेत्। न। तदभावे भवतस्तदुत्पत्तिनियमाभावात्। एवं हि (।)

कार्यं स्वभावैर्यावद्भिरविनाभावि कारणे।
हेतुः स्वभावः;

हेतुः, तत्कार्यत्वनियमात्। तैरेव ये तैर्विना न भवन्ति।

ङ्गमकङ्कारणस्येत्यध्याहारः **सर्वथा गम्य**[7]**गमकभावः प्राप्तः**। अग्नेः सामान्य- 11a
धर्मवद्विशेषधर्मा अपि तार्ण्यपार्ण्यादयो गम्याः स्युः। धूमस्यापि विशेषधर्मवद् द्रव्यत्वपार्थिवत्वादयोपि सामान्यधर्मा गमका भवेयुः। कुतः। **सर्वथा जन्यजनकभावात्** (।) तथा हि यथाग्निरग्नित्वद्रव्यत्वसत्त्वादिभिः (सामान्यधर्म्मैर्जनकः तथा तार्ण्यपार्ण्यादिभि)[1]र्विशेषैरपि। यथा च धूमो धूमत्वपाण्डुत्वादिभिः स्वनियतैर्विशेषधर्मै[1]र्युक्तो जन्यस्तथा सामान्यधर्मैरपि सत्त्वद्रव्यत्वादिभिस्ततश्च यथानयोः कार्यकारणभावस्तथैव गम्यगमकभावः स्यादित्यत आह।

नेत्यादि। न सर्वथा जन्यजनकभावस्ततश्च कुतस्तथा गम्यगमकभावः स्यात्। कस्मादिति चेत्। तदभावे तेषान्तार्ण्य(पार्ण्यत्वादीना विशेषधर्म्माणामभावे)[1] भवतो धूममात्रस्य तेभ्य एव विशेषधर्मेभ्यो भवतीत्येवमात्मनस्त[2]दुत्पत्तिनियमस्याभावात्। तथा **तदभावे**ऽन्यभावे **भवतो** द्रव्यत्वादे. सामान्यधर्मस्याग्नेरेबाय भवतीत्येव रूपस्य **तदुत्पत्तिनियमस्याभावात्**। कुतः सर्वथा जन्यजनकभावो यतः सर्वथा गम्यगमकभावः स्यात्॥

यत **एवन्तस्मात् कार्यं** धूमादिक **स्वभावैर्या**(**वद्भि**र्धूमत्वादिभिः स्वगतै)[1]-रित्थभूतलक्षणा तृतीया। **अविनाभावि**। विना न भवति। क्वाविनाभावि (।) **कार**[3]**णे**। कारणविषये। यद्वा कारणे इत्याधारसप्तमी। कारणस्थैः स्वभावैर्यावद्भिरग्नित्वद्रव्यत्वादिभिरविनाभावि। **तेषां** कारणगतानां सामान्यधर्माणां **हेतुः** कार्य गमकमित्यर्थः। किङ्कारणं (।) **तत्कार्यत्वनियमात्**। तेषामेव कारणगताना सामान्यधर्माणान्तत्कार्यमित्ये(व रूपस्य निय)[1]मस्य सद्भावात्। न हि तत्सामान्यधर्मात् कदाचिदपि कार्य व्यभिचरति। एवन्ताव[4]त् कारणगताः सामान्यधर्मा गम्या इत्याख्यात।

कार्यगतास्तु विशेषधर्मा गमका इति दर्शयन्नाह। **तैरेवेत्यादि**। कार्यमपि **तैरेव** धर्मैः स्वगतैः कारणगतानां धर्माणा गमकाः। येर्थान्तरासम्भविनो धूमत्वपा-

---

[1] In the margin.

अंशेन जन्यजनकभावप्रसंग इति चेत्। न। तज्जन्यलिङ्गविशेषोपाधीनां ग्रहणेऽभिमतत्वात्। यदा द्रव्यत्वादीनि अविशिष्टानि विवक्षितानि तदा तेषां

ण्डुत्वादयो विशेषरूपास्तैः कारणगतै· सामान्यधर्मैर्विना न भवन्ति। अत्रापि तत्कार्यत्वनियमादित्यपेक्ष्यते। तेषामेव कार्यगताना विशेष[5]धर्माणा कारणगत-सामान्यधर्मापेक्षया कार्यत्वनियमात्।

यदि सामान्यधर्माणां कारणगतानां कार्यगतैर्विशेषधर्मैरेवाविनाभावाद् गम्यगमकभावस्तदा**शेन जन्यजनकभावः** स्यात्। अग्ने सामान्यधर्मा एव जनका (।) धूमस्य च विशेषधर्मा एव जन्या. स्यु:। सर्वथा च जन्यजनकभावोभिमत इत्यभ्युपगमविरोधः। एतत्परिहरति (।) नाशेन[6] जन्यजनकभावप्रसङ्गः। निरशत्वेन वस्तुन सर्वथा जन्यजनकत्वाभ्युपगमात्। गम्यगमकभावस्यापि सर्वथाभिमतत्वात्। तदाह। **तज्जन्ये**त्यादि। यदि हि कार्यस्य तै कारणगतैर्विशेषधर्मैर्जन्यो यो विशेष. स ग्रहीतु शक्यते ज्ञापकहेत्वधि-कारात्। तदा **तज्जन्यविशेषग्रहणेऽभिमतत्वात्** कारणगतविशेषधर्माणां
11b गम्यत्वस्य। तथा ह्यगुरु[7]धूमग्रहणे भवत्येव तदग्नेरनुमान। तथा लिङ्गविशेषो लिङ्गमेव विशेषो धूमलक्षणः स उपाधिर्विशेषण येषा द्रव्यत्वादीनान्तेषा **ग्रहणेऽभिमतत्वाद्** गमकत्वस्य। न हि धूमेन विशेषिता द्रव्यत्वादयोऽग्नि व्यभिचरन्ति।

ननु धूम एव तत्र गमको न तु तद्विशिष्टा द्रव्यत्वादय। यथा कृतकत्वे सति प्रमेयत्वादित्यत्र कृतकत्वमेव गमक न प्रमेयत्व।

सत्यमेतद्। अव्यभि[1]चारमात्रप्रदर्शनार्थत्वेवमभिधानमित्येके। अन्यस्त्वाह। न धूमस्य व्यभिचारादिह सामान्योपादान किन्तर्हि सर्वेषां प्रतिपत्तृणा दृष्टे वस्तुनि सामान्याकारे प्रतिपत्तिर्भवति पश्चाद् विशेषावसाय· (।) तत्र च यदुपात्त सामान्यन्तदपरित्यक्तमेव। तस्मात् प्रतिपत्तुरध्यवसायवशाद् विशेषोपहित सामान्यङ्गमकम्भवति न विशेषस्य व्यभिचारादिति।

यु[2]क्तमेतत्। केवलं यद्येष नियम. सामान्यप्रतिपत्तिपुरस्सरैव विशेषप्रतिपत्ति (।) कथन्तर्हि धूममात्रस्य द्रव्यत्वादिरहितस्य प्रतीति। पूर्वोक्त च चोद्यन्तद वस्थमेव। तस्मादिदमत्र साधु (।) लिङ्गविशेषस्य सामान्यविशेषणत्वेनैवोपादान (द्) अहेतुत्व हेतुत्वोपादाने हि हेतुत्व स्यान्नान्यथा।

कदा तर्हि लिङ्गगतानां सामान्यधर्माणामगमकत्वमित्याह[3]। **अविशिष्टे** त्यादि। **यदा द्रव्यत्वादीन्यविशिष्टानि विवक्षितानि तदा तेषां व्यभिचाराद्**

व्यभिचाराद् गमकत्वं नेष्यते।

भावोपि भावमात्रानुरोधिनि ॥४॥

हेतुरिति वर्त्तते। हेतोः तादात्म्यं तन्मात्रानुरोधिन्येव। नान्यायत्ते। तद्भावभाविनः पश्चाद्भावनियमाभावात्। कारणानां कार्यव्यभिचारात्।

२—अनुपलब्धिचिन्ता

(१) दृश्यानुपलब्धिफलम्

अप्रवृत्तिः प्रमाणानामप्रवृत्तिफलाऽसति।
असज्ज्ञानफला कचिद्धेतुभेदव्यपेक्षया ॥५॥

अप्रवृत्तिः प्रमाणानामनुपलब्धिः। अभावेऽप्रवृत्तिः कार्यवत्। सत्ताज्ञानशब्दव्यव

गमकत्वन्नेष्यते।

स्वभावहेतुमधिकृत्याह।

स्वभाव इत्यादि। **हेतुरिति वर्त्तत** इति तेषा हेतुरित्यतः। स्वभावे साध्ये किम्भूते **भावमात्रानुरोधिनि** हेतुसद्भावमात्रानुरोधिनि (**भावो** हेतु)[1] स्वभावो हेतुः। मात्रग्रहणमर्थान्तरानपेक्षासन्दर्शनार्थं। कस्मात्तन्मात्रा[4]नुरोधिन्येव स्वभावो हेतुरित्याह। **तादात्म्यं** ह्यर्थस्य **तन्मात्रानुरोधिन्येवेति**। योसावर्थस्य साधनस्यात्मा तद्भाविन्येव। **नान्यायत्ते**। न कारणान्तरप्रतिबद्धे पश्चाद्भाविनि तादात्म्य। कस्मादिति चेदाह। **तद्भाव** इत्यादि। तस्य हेतोर्भावि(**नि**) भूतस्य कार(णान्तरायत्तस्य धर्मस्य **पश्चाद् यो भा**)[1]वस्तस्य **नियमाभावात्**। न हि कारणान्तरप्रतिबद्धेन पश्चाद्भाविनाऽव[5]श्य भवितव्य। किङ्कारण (।) **कारणानां कार्यव्यभिचारात्**। सम्भवत्प्रतिबन्धत्वात् कारणाना कुतस्तेभ्योऽवश्यम्भावः कार्यस्य॥

ननु च साध्यस्वभावता साधनस्य न केनचिदिष्टं तत्कथमुच्यते **तद्भावमात्रानुरोधिन्येव तादात्म्यमिति**। एवम्मन्यते व्यति(रिक्तावपि कृतकत्वानित्यत्वाख्यौ)[1] धर्मावप्युपगच्छद्भिरवश्यमभूत्वा भवन भूत्वा चाभवनमभ्युपगन्तव्य[6]मन्यथात्मादेरिव कृतकत्वानित्यत्वे पटादेर्न स्याता। तस्माद् यदेवाभूत्वा भवनम्भावस्य तदेव कृतकत्व यदेव च भूत्वाऽभवनमनवस्थायित्वन्तदेवानित्यत्वमस्तु किमन्येन सामान्येन कल्पितेनेति। अनुपल....इत्याह।

---

[1] In the margin.

हारप्रतिषेधस्य कार्यवत्। तेषां[6] हि उपलब्धिस्सत्वात्। पुर अयं हि भावाभाव-प्रतिषेधसाधनहेतूनां सदृशो भावः। एवं उपलब्धिरेव न भावः। वस्तुयोग्यस्य
422b **लक्षणं वा। अथवा[7] तदाश्रयज्ञानप्रवृत्तिः। ततः सत्ताज्ञानशब्दव्यवहारप्रवृत्तेः। अनुपलब्धिर्हि भावानामभावः। हेतुभेदापेक्षया। क्वचिद् अभावज्ञानकार्यत्वात् हेतुर्हि अनुपलब्धिः तस्य भेदो हि विशेषणमिति। नोपलब्धिलक्षणप्राप्त-सत्तावान्। अत्र अनुपलब्धिलिङ्गेनाभावः साध्यश्चेत्। अनुपलब्धिरपि उप-लब्ध्यन्तरस्य साध्ये(ति) अनवस्थाप्रसंगात् न स्यात् प्रतिपत्तिः।**

अथोपलब्ध्यभावेऽप्यनुपलब्ध्यभावः स्यात्। तथा सत्ताभावोऽपि सिद्धः स्यात्। अपार्थिकाऽनुपलब्धिः। अथान्योपलब्ध्याऽनुपलब्धिः प्रत्यक्षसिद्धाऽनुपलब्धिः।

अप्रवृ(त्तिरित्यादि। केषामप्रवृत्ति प्रमा)[1]णानाम्(।) बहुवचन व्यक्तिभेदेन प्रमाणानाम्बहुत्वात्। आगमापेक्ष[7].....[2]

× × ×

13a सिध्यतीत्युच्यत इति।

एवम्मन्यते। ज्ञानज्ञेययोर्बाधा बोधरूपत्वेन विशेषाद् बोधरूपं प्रत्यक्षादिक प्रमाण स्वत एव सिध्यति (।) ज्ञेयन्तु घटादिकं जडरूपत्वात् प्रमाणमपेक्षते। ज्ञानज्ञेयाभावयोस्तु नीरूपत्वेन विशेषाभावात् कथ ज्ञा(नाभावस्य स्वतःसिद्धि र्ज्ञेयाभावस्य च)[1] ज्ञानाभावात् सिद्धिरुच्यते। अथ ज्ञानाभावो नान्येन सिध्यति। तथा हि[1] ज्ञानाना स्वसम्विदितरूपत्वेनैकज्ञानससर्गित्वाभावात्। केवलं यदि स्वसन्ताने ज्ञान स्याद् उपलभ्येतानुपलम्भादसदेव तदिति स्वत एव ज्ञानाभावः सिद्ध इष्यते।

तथा सत्ताऽभावोपि सिद्धः स्यात्। तत्रापि हि यदि सत्ता स्यादुपलभ्येतानुप-(लम्भान्नास्तीति निश्चीयते ततश्चा)[1]**पार्थिकानुपलब्धिरभावसिद्धौ**। विज्ञानं वान्यवस्तुनीति पक्ष दूषयितुमा[2]ह। **अथेत्यादि। अन्यस्य** घटादिविविक्तस्य **भूतलस्योपलब्ध्या** घटानुपलब्धिसिद्धिरिति **प्रत्यक्षसिद्धानुपलब्धिः।**

एतदुक्तम्भवति। घटग्राहकत्वस्य भूतलग्राहकस्य चैकज्ञानसंसर्गित्वाद् यदा भूतलग्राहकमेव तज्ज्ञानम्भवति। तदा घटाग्राहकत्वाभावं (निश्चाययतीति प्रतीतिप्र)त्यक्षसिद्धैव घटानुपलब्धिः।

---

[1] In the margin. [2] 12th leaf is missing.

तथाऽन्यसत्तयाऽसत्ता किन्न सिध्यति ।

तथान्यसत्तयाऽसत्ता किन्न सिध्यति। तथेत्य[3]नुपलब्धिवत्। द्वयोरपि घटप्रदेशयोरेकज्ञानसंसर्गित्वादित्यभिप्रायः। अन्यस्य घटविविक्तस्य भूतलादेः सत्तया सिद्धया निषेध्यस्यार्थस्य सत्ता किन्न सिध्यति।

ननु भावनिवृत्तिरूपोऽभावः स कथं प्रत्यक्षसिद्ध इत्युच्यते।

एवम्मन्यते। अभावो नाम नास्त्येव केवलं मूढस्य भावविषयमेव प्रत्यक्षमन्याभावं व्यवहारयति। तेन यदुक्त[4]म **र्था प त्त्याऽभावः** प्रतीयत इति तदयुक्त। यतो न तावद् घटादीनामन्योन्याभावोऽभिन्नः घटविनाशे पटाद्युत्पत्तिप्रसङ्गात्। पटाद्यभावस्य विनष्टत्वात्। अथ भिन्नोऽभावस्तदा घटादीना परस्परं भेदो न स्यात्। यदा हि घटाभावरूपः पटो न भवति तदा पटो घट एव स्यात्। यथा वा घटस्य पटाभावाद् भिन्नत्वाद् घटरूपता तथा पटा[5]देरपि स्यात्। घटाभावाद् भिन्नत्वादेव।

नाप्येषा परस्पराभिन्नानामभावे न भेदः शक्यते कर्तुं। तस्य भिन्नाभिन्नभेदकरणेऽकिंचित्करत्वात्। न चाभिन्नानामन्योन्याभावः सम्भवति। नापि परस्परभिन्नानामभावेन भेदः क्रियते स्वहेतुभ्य एव भिन्नानामुत्पत्तेः। नापि भेदव्यवहारः क्रियते। यतो भावानामात्मीयात्मीय (?) रूपेणोत्पत्तिरेव स्वतो भे[6]दः (।) स च प्रत्यक्षप्रतिभासनादेव भेदव्यवहारहेतुः।

तेन यदुच्यते "वस्त्वसंकरसिद्धिश्चाभावप्रमाणाश्रिते"ति तदपास्तं। किञ्च (।) भावाभावयोर्भेदो नाभावनिबन्धनोऽनवस्थाप्रसगात्। अथ स्वरूपेण भेदस्तथाभावानामपि स स्यादिति किमभावेन कल्पितेन (।) नापि प्रागभावाभावे कार्यस्यानादित्व प्रसज्यते। हेत्वभावेनानुत्पत्तेः।

ननु[7] **प्रागभावे** सति हेतोः सकाशादुत्पत्तिः स्यान्नासति प्रागभावे विद्यमान- 13b
त्वात्।

यद्येवन्न कदाचनापि कार्योत्पत्तिः स्याद् विरोधिनः प्रागभावस्य सन्निहितत्वात्। न च तद्विनाशात् कार्योत्पत्तिः प्रागभावमन्तरेण कार्योत्पत्त्यभ्युपगमप्रसङ्गात्। नापि कार्योत्पत्तिरेव प्रागभावविनाशस्तदुत्पत्तेरेव विरोधिसन्निधानेनासम्भवात्। कारणसत्ताकाले प्रागभावस्याविनाशात्।[1] कार्योत्पत्तिकाले च तद्विनाशात् कारणविनाशवत्। तस्मादुत्पत्तेः पूर्वं कार्यस्य न भावो नाप्यभावो धर्मोसत्त्वात्। निरंशत्वाच्च वस्तुनः। किन्तु यदोत्पद्यते तदा सत्त्वमस्यान्यदा नास्तीति व्यवह्रियते। तेनासदुत्पद्यत इत्युच्यते।

प्र ध्वं सा भा व स्य चासत्त्वं स्वयमेवाचार्योभिधास्यते। यच्च यस्मादुत्पद्यते

तत्तस्य कार्यं कारणं चोच्यते। तेषां चैकक्षणस्थायि[2]त्वेनोत्पत्तेर्नाशित्वं स्वस्वरूपेणैवोत्पत्तेः परस्परभिन्नता च सिध्यति। तेन प्रागभावाद्यभावेपि कारणादिविभागतो व्यवहारो भवत्येव। न च प्रागभावादीनाम्परस्परम्भेदः प्रतिभासते। यस्माद् घटादेः पूर्वम्पश्चादन्यत्र च निवृत्तिमात्रमभिन्नं प्रतिभासते। यदि नाम कालभेदः प्रतीयते। न हि गोत्वमनेककालादिसम्बन्धित्वेन प्रतीयमानम[3]नेकम्भवति। निवृत्तेर्नीरूपत्वाच्च कथमभावस्य नानात्व भावनिवृत्तिरूपत्वाच्चाभावस्य। केवल यो मूढ उत्पत्तेः पूर्वं पश्चादन्यत्र च कार्यस्य भावमिच्छति त प्रतीदमुच्यते (।) कार्यस्य पूर्वम्पश्चादन्यत्र चाभाव इति भावारोपनिषेधमात्र क्रियते।

तेन। **न चावस्तुन** एते स्युराकारा इत्यादि यदुक्तन्तन्निरस्तं।

इतश्चैतन्निरस्त द्रष्टव्य यतो न प्राक्प्रध्वसा[4]भावाभ्यामभावस्य कश्चित् तदुत्पत्तिलक्षणो विरोधलक्षणो वा सम्बन्धोऽसहभावित्वेनाद्विष्ठत्वात्। अत एव न विशेषणविशेष्यभाव. सम्बन्धः। नापि विशेषणविशेष्यभावोऽसहभावित्वादेव। विशेषणविशेष्यरूपतायाश्च वस्तुनोऽभावात्। केवल(मन्यसम्बन्धद्वारेणा)[1]य कल्प्यते। दण्डदण्डिनोरिव। यदि च विशेषणविशेष्यभावसम्बन्धबले[5]न भावस्य प्रागभाव इति प्रतीतिस्तथा प्रागभावादेर्भाव इत्यपि प्रतीतिः स्यात् सम्बन्धस्याविशेषात्। तस्मात् प्रागभावादेरसम्बन्धिनो भावसम्बन्धित्वेन प्रतीतिर्भ्रान्तिरेव।

न **चान्योन्याभावो** भावानामस्ति। न हि घटस्य निवृत्तिः पटस्य निवृत्तिर्भव(त्यप्रतीते न च पटेऽवस्थानात्सा)[1] तत्सम्बन्धिनी युक्ता। एवं हि प्रागभावाद्यप्यन्योन्याभाव स्यात् कारणादाव[6]वस्थानात्। तस्मादन्याभाव एवास्ति नान्योन्याभावस्तेनान्याभावात् प्रागभावादीना न भेद इति कथं चतुर्विधोऽभाव उच्यते।

प्रत्यक्षाभावनिराश(?)सश्च **नैरात्म्यसिद्धा**वभिहित इति नेहोच्यते।

न त्वभावस्यासत्त्वेनानुभूतत्वात् (कथ प्रत्यक्षेण निश्चयः। नैष दोषो य)[1]-
142a स्मादेकज्ञानसर्सगिणो· प्रत्यक्षेणैकस्य ग्रहणमेवान्यस्याग्रहण[7]न्तदग्रहणमेव च तस्याभावग्रहणम्भावे हि तस्याग्रहणायोगाद् (।) यदाहान्यहेतुसाकल्ये तदव्यभिचाराच्चोपलम्भ· सत्ता। तदभावोनुपलब्धिरसत्तान्योपलब्धिश्चानुपलब्धिरिति।

तेनायमर्थः(।) प्रत्यक्षमभावन्निश्चाययतीति तावन्न निश्चाय(यतीत्यर्थः। स च दृश्यस्य भावानिश्च)[1]योऽभावनिश्चय एव। एव प्रत्यक्षपृष्ठभाविनो विकल्पस्य प्रत्यक्षवि[1]षयानुसारित्व समर्थितम्भवति। तदेवमुपलब्ध्यभावव्यवहारवद् अर्थाभावव्यवहारस्यापि प्रत्यक्षसिद्धत्वान्न लिङ्गेनासौ साध्यते। एवन्तावदमूढ

[1] In the margin.

यदा पुनः एवंविधेऽनुपलब्धिरेवासतां, तदा सिद्धेऽपि विषये मोहाद् विषयिणो ज्ञानशब्द[4]व्यवहारान् अप्रतिपद्यमानः[1] विषयप्रदर्शनेन समये प्रवर्त्तते। यथा सास्नादिसमुदायात्मकत्वादयं हि गौरिति। तथा च दृष्टान्ताऽसिद्धिचोदनाऽपि प्रतिव्यूढा। विषयप्रतिपत्तावप्यप्रतिपन्नविषयिणां दर्शनात्। एवमनयोरनुप-

---

प्रति दृश्यानुपलम्भो नाभाव व्यभिचरतीत्यभावव्यवहार· प्रत्यक्षसिद्ध ।

न चाप्यभावोनुपलब्धानामपि (सत्त्वान्नित्य शक्यमानानुप)[1] लंभव्यभिचार इति कृत्वा व्यवहर्त्तुमशक्य इति वक्तु युक्त। एव ह्यभाव[2]स्य निश्चायकमपि प्रत्यक्षन्न स्यात्। सन्देहान्न चान्यन्निश्चायकमन्यद् व्यवहाराङ्ग युक्त। तस्मात् प्रत्यक्षनिश्चायकत्वाद् भाववद् दृश्यस्याभावमपि व्यवहारयति।

कथन्तर्ह्यसद्व्यवहारस्य साध्यत्वमित्याह। **यदा पुनरित्यादि। एवं विधे** ह्युपलम्भयोग्यानु(**पलब्धिरेवासतां** पदा)[1]र्थानामसत्ता नान्या। **तदा सिद्धेपि** प्रत्यक्षेणाभावव्यवहारस्य **विषये**[3]। **मोहाद् विषयिणो** [ऽसतो(ऽ)विद्यमानस्य][2] **ज्ञानं**। नास्तीत्येवमाकार। नास्तीत्येवम्भूतश्च **शब्दः** नि शङ्कावगमनागमनलक्षणा पुरुषस्य प्रवृत्तिर्व्यवहारः। तान**प्रतिपद्यमानः** पुमान्। **विषयप्रदर्शनेनासद्व्यवहारविषयस्य** घटविविक्तप्रदेशस्योपलम्भमानस्य प्रदर्शनेन। **समयेऽभावव्यवहारे प्रवर्त्यते**। दृष्टान्तमाह। **यथेत्यादि। सास्नादिसमुदायात्म[4]क एव गौः**। ततो न तत्र गोत्व साध्यते किन्तु गोव्यवहार । यदाय मूढमति· शावलेये प्रवर्त्तितगोव्यवहारो बाहुलेये शावलेयरूपशून्यत्वाद् गोव्यवहार न प्रवर्त्तयति स निमित्तप्रदर्शनेन गोव्यवहारे प्रवर्त्यते। सास्नादिसमुदायनिमित्तको हि गोव्यवहारो न शावलेयरूपनिमित्तक । बाहुलेयेऽपि तन्निमित्तमस्तीति कथमसौ न[5] प्रवर्त्यते। तद्वद् घटविविक्तेपि प्रदेशेनुपलम्भनिमित्तप्रदर्शनेनासद्व्यवहारे प्रवर्त्यते ।

तथा चेति येनैव व्यवहार साध्यते तेन **दृष्टान्तासिद्धिचोदनापि प्रतिव्यूढा** प्रतिक्षिप्ता। अनुपलब्धेर्लिङ्गादभावे साध्ये येनैव लिङ्गो न साध्यधर्मिण्यभावः-साध्यस्तेनैव दृष्टान्तधर्मिण्यपि तत्राप्यपरो दृष्टान्त इत्यनवस्था स्यात् (।) व्यव हारे तु साध्ये ना[6]नवस्था। प्रवर्त्तितव्यवहारस्यैव पुन. समये प्रवर्त्तनात्।

ननु यो हि विषयं प्रतिपद्यते स विषयिणमपि प्रतिपद्यत इति कथ व्यवहारस्यापि साध्यत्वमित्याह। **विषयेत्यादि**। दृश्यन्ते हि लोके तथाविधा ये **विषयप्रतिपत्तावप्यप्रतिपन्नविषयिणः**। यथा **सांख्यः** सत्त्वे रजो नास्तीति प्रवर्त्तितास

---

[1] Ron-du-med-pa. [2] In the margin.

लब्ध्योर्हि स्वविपर्ययहेत्वभावभावाभ्यां सद्व्यवहारप्रतिषेधफलत्वमुक्तम्। एकत्र संशया[0]त् अन्यत्र तु विपर्ययात्। तत्राद्या प्रमाणमुक्ता सद्व्यवहारनिषेधे उपयोगात्। न तु व्यतिरेकदर्शनादौ संशयादुपयोगः। युक्ता द्वितीया त्वत्र प्रमाणं
423a **निश्चय[7]फलत्वात्॥**

14b द्वयवहारोपि निमित्तनिश्चया[7]भावान्मृत्पिण्डे न प्रवर्त्तयत्यनुपलम्भनिमित्तप्रदर्शने घटाभावव्यवहारे प्रवर्त्तयते।

एवमित्यादिनोपसहारः। एवमुक्तेन प्रकारेणा**नयोरनुपलब्ध्योर्दृश्यादृश्ययो. सद्व्यवहारप्रतिषेधफलत्वन्तुल्य।**

कथ स्वविपर्ययहेत्वभावभावाभ्या स्वशब्देन सद्व्यवहारस्य स्वरूप गृह्यते विपर्ययशब्देन सद्व्यवहारविरुद्धोसद्व्यवहारो गृह्यते। तयोर्हे[1]तू। स्वविपर्ययहेतू। तत्र **स्वहेतुरुपलब्धिर्विपर्ययहेतुर्दृश्यानुपलब्धि.।** तयोरभावभावौ। स्वविपर्ययहेत्वभावभावौ। **ताभ्यां।**

एतदुक्तम्भवति (।) अदृश्यानुपलब्धौ सद्व्यवहारनिमित्ताया उपलब्धे. प्रत्यक्षानुमाननिवृत्तावभावात् सद्व्यवहारनिवृत्ति.। दृश्यानुपलम्भे तु सद्व्यवहारविरुद्धस्यासद्व्यवहारस्य निमित्तसद्भावात् प्रवृत्तिस्तेन सद्व्यवहारस्य निवृत्ति-[2]रिति सद्व्यवहारप्रतिषेधफलत्वन्तुल्य।

ननूपलम्भनिवृत्तावप्यर्थस्य सन्देहात् कथ सद्व्यवहारो निवर्त्तत इत्याह। **एकत्रेत्यदृश्यविषयायामनुपलब्धौ** सत्त्वस्य **संशयात्** ततो निश्चयात्मक सत्त्वव्यवहारो निवर्त्तत एव। सन्दिग्धस्तु सत्त्वव्यवहारो न निवर्त्तते। **अन्यत्र तु** दृश्यानुपलब्धौ **विपर्ययादिति** सशयविपर्ययो निश्चयस्तस्मात्। असत्त्वस्य निश्चया[3]दित्यर्थ।

यद्यदृश्यानुपलब्धौ सशय कथ सा प्रमाणमित्याह। **तत्राद्येत्यादि।** तत्र द्वयोरनुपलब्ध्योर्मध्ये **आद्या** दृश्यानुपलब्धि **प्रमाणमुक्ता सद्व्यवहारनिषेधे उपयोगाद्** व्यापारात्।

क्व तर्हि तस्या अप्रामाण्यमित्याह। **न त्वित्यादि। व्यतिरेकस्याभावस्य दर्शनन्निश्चयः। आदिग्रहणाच्छब्दो** व्यवहारश्च गृह्यते। **संशयाद्** यतो नाभावनिश्चय उत्पद्यते।[4] तस्मान्न प्रमाण। **द्वितीया** त्विति। दृश्यविषयानुपलब्धि.। **अत्रेति** व्यतिरेकदर्शनादौ **निश्चयफलत्वान्निश्चय** एव फलमस्या इति कृत्वा। **सा च** दृश्यविषयानुपलब्धि: **प्रयोगभेदाच्चतुर्विधेति** सम्बन्ध। **विरुद्धश्च** विरुद्धकार्य **चेति** विरूपैकशेष। **सिद्धिरु**(पलब्धिर्दृश्यात्मनो)[1]रित्यत्रापि सम्बन्धनीय।

---

[1] In the margin.

(२) अनुपलब्धिश्चतुर्विधा

सा च प्रयोगभेदात्।

(विरुद्धकार्ययोः सिद्धिः; असिद्धिर्हेतुभावयोः।)
दृश्यात्मनोः; अभावाच्चानुपलब्धिश्चतुर्विधा ॥६॥

यावान् कश्चित् प्रतिषेधव्यवहारः सर्वोह्यनुपलब्ध्या। तथा हि स द्विधा क्रियेत। कस्यचिद् विधिना निषेधेन वा। विधावपि विरुद्धो वा विधीयेताविरुद्धो वा। अविरुद्धस्य विधौ सहभावविरोधाभावाद् अप्रतिषेधः। विरुद्धस्याप्यनुपलब्ध्यभावेन प्रतिषेधगतिः।[1] **तथा हि अपर्यन्तकारणस्य भवतोऽन्यभावेऽभावाद् विरोधगतिः। साऽपि अनुपलब्धितः।**

एतेन स्वभावविरुद्धोपलब्धिर्विरुद्धकार्योपलब्धिश्च द्वे निर्दिष्टे।

"असिद्धिर्हेतुभावयो दृश्यात्मनोः"

इत्युपलब्धिलक्षणप्राप्तयो कारणस्वभावयोरनुपलब्धिरित्यर्थं।

एतेनापि कारणानुपलब्धि स्वभावानुपलब्धिश्च द्वे निर्दिष्टे इति **चतुर्धा** भवति। **अभावार्थेत्यभावोऽभावव्यवहारश्चार्थं** प्रयोजन (यस्या सा तथा।)[2]

ननु **विरुद्धकार्ययोः सिद्धि**रित्यत्रानुपलब्धिरिति न श्रूयते (।) तत्कथमनयोर्[6]-नुपलब्धित्वमित्यत आह। **यावान् कश्चिदि**त्यादि। यावान् कश्चिदिति व्याप्ता(?) चैतत् कथ्येत। न कश्चित् **प्रतिषेधव्यवहारो** लिङ्गजोस्ति योनुपलब्धिमन्तरेण शक्यते कर्त्तुं। न तु प्रत्यक्षसाध्यत्वमभावव्यवहारस्य निराकृतमेतच्च-प्रागेवोक्तन्तामेव (व्याप्ति दर्शयितुमाह। **तथा** हीति)[3]। **स** इति प्रतिषेध। **द्विधा क्रियेत** व्यवह्रियेत **कस्यचिदर्थस्य विधिना**[7] **निषेधेन वा** (।) कस्यचिद्विधा- 15a
वपि क्रियमाणे। **विरुद्धो वा विधीयेताविरुद्धो वाऽविरुद्धस्य विधौ** निषिध्यमा-नविधीयमानयो **सहभावविरोधाभावादप्रतिषेधो** निषेध्याभिमतस्य। **विरुद्धस्यापी-त्यादि**। एवं ह्यसौ विरुद्ध. स्याद् यदि तत्र स्वविरुद्धस्यानुपल(धेः। **तथा हीत्या-**दिनैतदेवा)[3]ह। **अपर्यन्तकारणस्येत्यक्षीणकारणस्य**[1] **भवतः** सन्तानेनोत्पद्यमानस्य शीतस्पर्शादिरग्न्यादिसन्निधानात् पूर्वमिति द्रष्टव्य। **अन्यभावेऽग्न्यादिभावेऽभा-वादनुत्पादाद् विरोधगतिः**। न त्वभावादहेतुकत्वाद् विनाशस्य।

एतदुक्तम्भवति। पूर्वपूर्वस्य शीतस्पर्शस्य स्वरसनिरोधे सत्युत्तरोत्तरस्य

---

[1] Dag-gam ? Dgag-pa. [2] In the margin.

अन्योन्यो[3]पलब्धिपरिहारेण स्थितिलक्षणता वा विरोधः नित्यानित्यवद्।

चा(ग्नितारतम्येन शीतस्पर्श)[1]स्यापचयतारतम्ययोगिन क्रमेणोत्पद्यमानस्य यावत्सर्वसर्वेणानु[2]त्पत्तिरुष्णस्पर्शलक्षणो भवति। तेन निर्हेतुकेपि विनाशेऽग्निसन्निधानात् पूर्व प्रबन्धप्रवृत्तस्य शीतस्पर्शस्य स्वरसनिरोधेऽन्यस्य च प्रबन्धेनोत्पित्सोरग्निसन्निधाने सत्यनुत्पत्तेरग्निशीतयोर्विरोधावगतिर्लोके न तु परमार्थतो विरोध। अत एव विरोधगतिरि(त्याह।

(यत्पुनरुच्य)[1] ते(।)न कारणनिवर्त्तनमन्तरेण कस्यचिदग्न्यादिर्निवर्त्तको नामेति।

तदयुक्त।[3] निर्हेतुकत्वाद् विनाशस्य कथ कारणस्य निवर्त्तक। अथ सहेतुकविनाशमभ्युपगम्यैवमुच्यते तदा यथासौ कारण निवर्त्तयति कार्य किन्न निवर्त्तयति। यदि च कारणनिवर्त्तनमन्तरेण न कार्य निवर्त्तयितु शक्यते तदा तत्कारणस्यापि कथन्निवर्त्तक यावत्तत्कारण न निवर्त्तयति तत्कारणस्याप्येवमित्यनवस्थया न कश्चित् कस्यचिन्निवर्त्तक स्यात् (।) न च सन्ताना[4]पेक्षयैतद्वक्तु युज्यते सहेतुके विनाशे सन्तानस्यैवाभावादिति यत्किञ्चिदेतत्। स चेत्यन्यभावे सत्यभावोनुत्पत्तिलक्षणो विरोधहेतुरनुपलब्धे. सकाशाद् व्यवह्रियते।

अनेन सहानवस्थालक्षणो विरोधो व्याख्यातः।

द्वितीय विरोधन्दर्शयन्नाह। **अन्योन्योपलब्धी**त्यादि। **अन्योन्योपलब्धिः** परस्परप्रतिपत्तिस्तस्या **परिहारो** विवेकस्तेन[5] **स्थितं लक्षणं** स्वरूप ययोस्तौ तथोक्तौ। तयोर्भावोन्योन्योपलब्धिपरिहारस्थितलक्षणता। सा वा विरोधः (।) वा शब्द· समुच्चये। **नित्यानित्यत्ववदि**ति दृष्टान्त।

ननु प्रथमविरोधेप्यस्त्येव परस्परपरिहार। द्वितीयेपि सहानवस्थान। तथा हि ययोरेव धर्मयोरेकत्रानवस्थानन्तयोरेव द्वितीयो विरोध। तथा हि रूपरसयोरयं नेष्यते।[6] तत्कस्माद् विरोधद्वयमुक्तमिति चेत् (।)

सत्य विषयविभागार्थन्तूक्त। पूर्वो विरोधो दृश्यवस्तुविषय एव। द्वितीयस्त्ववस्तुविषयोप्यदृश्यविषयश्चेत्येके। यद्वा पूर्वकोन्यतोन्यस्याभावप्रतिपत्त्यान्येन सह विरोधः। द्वितीयस्त्वन्येन सहैकत्वाभावेन स्वरूपविषय इत्यनयोर्विरोध-
15b योर्महान् भेद। तथा हि नित्यत्वनिवृत्तिरूपमनित्यत्वम[7]नित्यत्वनिवृत्तिरूपञ्चानित्यत्वमित्येवमन्योन्यपरिहार एव विरोध. स्वरूपनिष्ठ। न च नील-

---

[1] In the margin.

तत्राप्येकोपलब्ध्याऽन्यानुपलब्धिरेवोच्यते । अन्यथाऽनिषिद्धोपलब्धिकस्या[4]-

---

निवृत्तिरूपम्पीतम्पीतनिवृत्तिरूप च नीलमनयोर्भावरूपत्वान्नीलाभावे पीतस्य भावप्रसगाच्च (।) तस्मान्नानयोरयं विरोधः। नाप्यनयोरन्योन्याभावाव्यभिचारेणाय विरोधोऽप्रतीते.। अत एवाविरुद्धस्य विधानमुच्यते। नीलस्यापि नीलनिवृत्ति-रूपेणानीलेना[1]य विरोधो न नीलाभावनियतेनानीलेन तथाभूतस्यानीलवस्तुन पीतादिव्यतिरिक्तस्याभावात्। कथन्तर्हि नीलादौ दृश्यमाने पीतादेस्तादात्म्य-निषेध·।

नैष दोषो यस्मात्। नीलस्यैकस्योपलम्भेन्यस्यादृश्यस्याप्युपलम्भमान-स्वभावत्वे सति तथैवोपलम्भः स्यादित्येवमुपलब्धिलक्षणप्राप्तत्वम्परामृश्य तादात्म्य स्वभावानुपलम्भान्निषिध्यते। अ[2]त्रापि च विरोधे स चानुपलब्धे-रित्यपेक्षणीयन्तेनायमर्थ.(।)स चान्योन्यपरिहारो विरोधोनुपलब्धेरेव निश्चेत-व्यः। तथा हि (।) विरोधिनाम्विरोध एकप्रतिभासे सत्यन्याप्रतिभासनमेवोच्यते (।)भावस्य च रूपे प्रतिभासमाने तदभावो न प्रतिभासते (।) तस्माद् भावाभा-वयोस्तादात्म्येनाप्रतिभासनाद् विरोधो निश्चीयते। एव नित्यानित्यादावय-न्निश्चेतव्यः।

अप्रति[3]भासन चैकप्रतिभासनमेवोच्यते। तदाह। **तत्रापी**त्यादि। तत्राप्य-नन्तरोक्ते विरोधे। **एकोपलब्ध्या**। एकस्य विरोधिन उपलब्ध्या**न्यानुपलब्धिरेव** निषेध्यानुपलब्धिरे**वोच्यते**। **अन्यथे**ति यद्येकोपलब्ध्यान्यानुपलब्धिर्नोच्यते। तदा-**ऽनिषिद्धा उपलब्धि**र्यस्य निषेध्यस्य तस्यैकोपलब्धावप्य**भावासिद्धे**ः। ततश्चो-पलभ्यमानस्य विरोधित्वमेव न स्यात्।[4] तस्माद् विरोधद्वयस्याप्यनुपलब्धि-कृतत्वाद् विरुद्धोपलब्ध्यादयो विधिमुखेन प्रयुक्ता अप्यनुपलब्धिस्वभावा भवन्ति।

ननु विरोधिनोर्विरोधलक्षणसम्बन्धग्राहिकानुपलब्धिर्दृष्टान्ते। न च सम्बन्ध-ग्राहकस्य प्रमाणस्य रूप सम्बन्धिनोर्भवति। न ह्यग्निधूमयो· (सम्बन्धग्राह)[1]कस्य प्रत्यक्षस्य रूप धूमस्य भवति नाग्ने। तत्कथम्विरुद्धोपलब्धिरनुपल।ब्धिर्भवत्यु-पलब्धि[5]रूपतया प्रतिभासनात्। तस्माद् दृष्टान्ते गृहीतविरोधमग्न्यादिकमन्यत्र प्रदेशे दृष्ट्वा शीताद्यभावोनुमीयत इति।

अत्रोच्यते। यदि विरोधसम्बन्धद्वारेग गम्यगमकभावो विरोधिनान्ततश्चा-

---

[1] In the margin.

भावासिद्धेः। एकस्य निषेधात् अन्याभावासिद्धौ हि अनुपलब्धिसिद्धिरेव। निषेधस्य हि अनुपलब्धिरूपत्वात्। अथान्यनिषेधः तत्रापि कार्यकारणयोः अनुभयस्य वा।[5] **तत्रानुभयस्य प्रतिबन्धाभावात्। तदभावेऽन्येन न भवितव्यमिति कुत एतत्। कार्यानुपलब्धावपि तदभावः, यतो नाकारणानि तद्वन्ति वैकल्य(प्रतिबंधसंभव)प्रसंगात् तदभावः कुतः स्यात्। तस्मात्**[6] **कारणानुपलब्धिरेवाभावं गमयति। स्वभावानुपलब्धिस्तु स्वयमसत्तैव (।) नात्रार्था-**

ग्निदर्शनाच्छीतस्य प्रतीतिः स्यात्तयोरेव विरोधसम्बन्धेन (समुत्थि[त]त्वात्। न शीता)[1]भावस्यासम्बन्धित्वात्। यदा चाग्निना शीतो निवर्त्त्यते तदा कथ विरोध सम्बन्धो[6] द्विष्ठत्वाभावात्। न च शीताभावेन सहाग्नेर्विरोध सहावस्थानात्। नाप्यग्ने शीताभावाव्यभिचारित्वात्तत शीताभावाद्यनुमान। अग्निभावेपि शीतभावदर्शनात्। तस्माद् यथा यथाग्निसद्भावे शीतस्यानुपलम्भस्तथा तथा दृष्टान्ते तदभावस्य प्र(तिपन्नत्वात्। अन्यत्राप्यग्ने)[1] शीताभावस्तथैवानु-
6a मीयते। तेनायमर्थो[7] भवति (।) साध्यधर्मिण्यप्यग्निसद्भावे यदा शीतस्यानुपलम्भस्तदैवाग्नेर्विरोधित्व नान्यदा। विरोधित्वेन च गमकत्वमित्यन्यानुपलम्भेन गमकत्वमित्युक्तम्भवति (।) अतो विरुद्धोपलब्धिरनुपलब्धिनियतत्वादनुपलब्धिरूपत्व। केवलभूतलोपलब्धेर्घटानुप(लब्धिरूपत्ववत्। ए)[1]व परस्परपरिहारेपि विरुद्धोपलब्धिरनुपलब्धिरेव। यथार्हता स्याद्(।)अनित्यो[1]घट स्यान्नित्य इत्यत्र ह्यनित्योपलब्धिरेव नित्यानुपलब्धिरतो न नित्यानित्यरूपम्वस्तु।

एवमर्थान्तरविधावपि निषेध्यस्यानुपलब्धिङ्गमिका प्रतिपाद्यार्थान्तरनिषेधेपि प्रतिपादयितुमाह। **एकस्ये**त्यादि। कस्मात् (।) **निषेधस्ये**त्यादि। न चार्थान्तराभावाद(र्थान्तरनिषेधेति)[1]प्रसङ्ग (।) यत**स्तत्रा**पीत्यन्यनिषेधे साध्ये **कार्यकाहणयो**र्निषेधो हेतु स्यात्।[2] **अनुभयस्या**कार्यस्याकारणस्य **वा** निषेधो हेतु स्यात्। **तत्र** तेषु। **अनुभयस्या**कार्यकारणात्मकस्य निषेध्येन सह **प्रतिबन्धाभावात् तदभावे**ऽप्रतिबद्धस्याभावे। **अन्येने**ति प्रतिषेध्याभिमतेन। न **भवितव्यमिति कुत एतत्। कार्यानुपलब्धावपि** कुतस्तदभाव इति सम्बन्ध। **तदभाव** इति कारणाभाव। **यतो नानाकारणानि तद्वन्ति** कार्यवन्ति **वैकल्य**[3]प्रतिबन्धसम्भवात्। एतच्च कारणमात्रे गृहीत्वोक्तमप्रतिबद्धासामर्थ्यस्य कारणस्याभाव कार्याभावाद् गम्यत एव(।) यतोनुभयस्य कार्यस्य चानुपलब्धिर्गमिका। **तस्मात् कारणानुपल-**

---

[1] In the margin.

न्तरस्याभावः साध्यते। केवलं तत्र विषयी साध्यते। अस्यामपि यदा व्यापक-धर्मानुपलब्ध्या व्याप्याभाव[7]माह तदाऽभावोऽपि। इयं हि विरुद्धविषयिणोऽनुप- 423b
लब्धिः योगविभागेन चतुर्विधा। विरुद्धसिद्धचा। यथा नात्र शीतस्पर्श(:)वह्नेः।

एतेन व्यापकविरुद्धसिद्धिरुक्ता वेदितव्या। यथा नात्र तुषारस्पर्शः वह्नेः।

विरुद्धकार्यसिद्धचा हि। यथा न शीतस्पर्शोऽत्र धूमाद्।

ब्धिरेवाभावं गमयति। कार्यस्येति सम्बन्धाद् गम्यते।

स्वभावानुपलब्धेरप्यभावहेतुत्वादवधारणमयुक्तमिति चेदाह। **स्वभावानुपल-ब्धिस्तु स्वयमसत्तैव**[4](।) **नात्रार्थान्तरस्याभावः साध्यते**। स्वभावान्तरस्य च निषेधे साध्ये कारणानुपलब्धिरेवेत्यवधारणमतो न व्याघात ।

किन्तर्हि तत्र साध्यत इत्याह। **केवलमित्यादि। तत्रेति** स्वभावानुपलब्धौ **विषयी** असज्ज्ञानादिः। **अस्यामपीति** स्वभावानुपलब्धौ **यदा व्यापको यो धर्मस्त-स्यानुपलब्ध्या व्याप्याभावमाह**। यथा नात्र शिशपा वृक्षाभावादिति। **तदा** ऽभे[5]१-दोपि व्याप्यस्य साध्यते। अपिशब्दाद् व्यवहारोपि। यदा हि समुन्नतयो पर्वत-प्रदेशयोरेकस्मिन् प्रदेशे तरुवन दृश्यमानमतिगहनत्वादनवधारितवृक्षविशेषम्भवति। तत्रापरस्मिन् पर्व्वतोद्देशे शिशपाभावो न निश्चेतुम्पार्यते शिशपाया अदृश्यत्वाद् वृक्षस्तूपलब्धिलक्षणप्राप्त इति शक्यतेऽभावनिश्चय कर्त्तुन्तस्य । तदा व्यापका-भावा[6]द् व्याप्यस्याभाव साध्यते।

इयमित्यादिनाऽभावार्थेत्यादिकारिकाभाग व्याचष्टे। **विरुद्धसिद्धचेति**। स्वभावविरुद्धोपलब्ध्या। **यथेत्यादि**। यत्र धर्मिणि शीतस्पर्श परोक्ष । वह्निश्च दृश्यते (।) दूरात्तस्मिन् विषयेऽय प्रयोग । **एतेनेति** स्वभावविरुद्धोपलब्ध्युदाह-रणेन **व्यापकविरुद्धसिद्धिरुक्ता वेदितव्या। यथेत्याद्युदाहरण**। शीत[7]स्पर्श- 16b
विशेष एव। हिमानुगतस्तुषारस्तस्य व्यापक शीतस्तस्य विरुद्धोग्नि । तत्राग्नि-विरुद्ध शीत निवर्त्तयन् तद्व्याप्यन्तुषारस्पर्शमपि निवर्त्तयतीत्यर्थत स्वभावविरुद्धो-पलब्धावि[8]मन्तर्भवति। यत्र च वह्नि प्रत्यक्ष शीतस्पर्शस्तुषारस्पर्शश्चाप्रत्यक्ष-स्तत्रायमपि प्रयोगो द्रष्टव्य । **विरुद्धस्य यत्कार्यन्तस्यासिद्धचा। यथेत्यादि**। **न शीतस्पर्शोत्र धूमादिति** शी[1]तविरुद्धोग्निस्तस्य कार्य धूम सोग्नि सन्निधापयति स च शीतमपनयति। यत्र च शीतस्पर्श परोक्षो वह्निरपि धूमश्च प्रत्यक्षस्तत्राय प्रयोगो द्रष्टव्यं.। एवन्तावद्विरुद्धकार्ययोः सिद्धिरित्येतद् व्याख्यात।

अधुना (।)

---

[1]Cf. **तदाऽभावोऽपि**

हेत्वसिद्धया। यथा नात्र धूमो वह्न्यभावात्।

स्वभावासिद्धया। यथा नात्र धूमो वह्नेरनुपलम्भात्।

एतेन व्यापकस्वभावासिद्धिरुक्ता। यथा नात्र[3] शिंशपा वृक्षाभावात्।

सर्वत्रापि अभावसिद्धयनुपलब्धेः दृश्यात्मनां तेषां च विरुद्धसिद्धयसिद्धी वेदितव्ये। अन्येषामभावा[4]सिद्धेः।

यदि विरुद्धकार्योपलब्ध्याऽप्यभावसिद्धिः तत्कारणोपलब्ध्या किन्न सिध्यति।

तद्विरुद्धनिमित्तस्य योपलब्धिः प्रयुज्यते।
निमित्तयोर्ह्यविरुद्धत्वा(भावे सा व्यभिचारिणी)॥७॥

"असिद्धिर्हेतुभावयोः"।

इत्येतदुदाहरणाख्यानेनाचष्टे (।) **हेत्वसिद्ध्येति** कारणानुपलब्ध्या। **यथेत्यादि**। यदा महाह्रदस्योपरि[2] वाष्पादौ धूमादिरूपतया सन्देहो भवति तदाऽय प्रयोगो द्रष्टव्यः। तत्र हि निष्कम्पे महाह्रदे यद्यग्नि· स्यात् प्रभास्वरतया प्रत्यक्ष एव स्याद् (।) अप्रत्यक्षत्वादेव वह्नेरभावात् कार्याभाव· साध्यते। **स्वभावासिद्धेति** स्वभावानुपलब्ध्या न तत्र धूमोऽनुपलब्धेरिति। उपलब्धिलक्षणप्राप्तस्येति द्रष्टव्य। **एतेनेति** स्वभावानुपलम्भप्रयोगेण। **व्यापकश्चा[3]सौ स्वभावश्च . तस्यासिद्धिरनुपलब्धिरुक्ता। यथा नात्र शिंशपा वृक्षाभावात्।** स्वभाव एव वृक्षत्व शिंशपात्वस्यातो वृक्षत्वेन शिंशपा व्याप्ता॥

ननु च स्वभावानुपलब्धावेव दृश्यनिषेधो न तु विरुद्धोपलब्ध्यादौ (।) तथा ह्यदृश्यस्यैव शीतस्पर्शस्य कार्यस्य चादृश्यस्यैव निषेध. साध्यते (।) दृश्यत्वे हि स्वभावानुपलब्धिरेव स्यात्। तेन यथाऽदृश्यस्य शीतस्प[4]र्शदिर्निषेधस्तथा पिशाचादेरपि स्यादित्यत आह। **सर्वत्रेत्यादि**।

एतदुक्तम्भवति। यथा स्वभावानुपलब्धावन्यत्रोपलब्धस्य घटादे प्रदेशविशेषेऽभाव· साध्यते तथान्यत्र प्रतिपन्नविरोधस्य शीतस्पर्शस्य प्रतिपन्नकार्यत्वस्य च कार्यस्य विरुद्धोपलब्ध्यादिना साध्यधर्मिण्यभाव. साध्यते न तु सर्वदाऽदृश्यस्येति। **सर्वत्रेति** विधिमुखेन[5] प्रतिषेधमुखेन च प्रयुक्तायामभावसाधन्यामित्यभावश्चाभावव्यवहारश्चाभावशब्देनोक्त.।

तेषामपि येषामभावेनाभाव साध्यते तेषां कारणादीनां **दृश्यात्मनामेवासिद्धिरनुपलब्धिः। तद्विरुद्धानां** च प्रतिषेध्यार्थविरुद्धानाञ्च स्वभावविरु(द्धादीनां

यथा नात्र शीतस्पर्शः काष्ठात्। निमित्तयोर्विरोधे गमिके च। यथा नास्य (पुंसो) रोमहर्षादिविशेषाः सन्निहितद[6]हनविशेषत्वात्।

एतेन तत्कार्यादपि तद्विरुद्धकार्याभावगतिरुक्ता। यथा न रोमहर्षादिविशेष-युक्तपुरुषवानयं प्रदेशः धूमात्।[7]

सिद्धिरुपल)[1]ब्धिलिङ्गत्वेन **वेदितव्या**। अत्र च **दृश्यात्मनां सिद्धिरिति** न सम्बध्यते उपल[6]ब्धिवचनादेव दृश्यात्मताया लब्धत्वात्। किन्त्वेव सम्बन्धः कर्त्तव्यः। **दृश्यात्मनान्निषेध्याभिमताना** ये विरुद्धास्तेषा सिद्धिरिति। किङ्कारणम् (।) **अन्येषा**मदृश्यात्मना कारणादीना**मभावासिद्धेः**। अदृश्याना निषेध्याभिमताना स्वभावविरुद्धादिति विरो(धाद्यसिद्धि. ॥

यदी)[1]त्यादि परः। शीत**विरुद्धस्याग्नेः कार्यं** धूमस्यो**पलब्ध्याप्यभाव-सिद्धिः**[7] शीतस्य। तत्कारणोपलब्ध्या। **तस्य** शीतविरुद्धस्याग्नेर्यत् **कारणं** 17a काष्ठादिस्तस्यो**पलब्ध्या किन्न सिध्यति** शीताभाव।

तद्विरुद्धस्येत्याद्याचार्यः। तेन शीतस्पर्शेन विरुद्धस्य वह्ने**र्निमित्तं** काष्ठादि-**स्तस्य योपलब्धिः प्रयुज्यते सा व्यभिचारिणी**। कदा (।) **निमित्तयोर्विरुद्धत्वा-(भावे** सति। अ)[1]ग्निशीतनिमित्तयोर्विरोधाभावे सति। उदाहरणमाह। **यथे**त्यादि। अत्र हि काष्ठमा[1]त्रस्य दहनहेतो. शीतनिमित्तेन तुषारादिना विरोधाभावात्। यत्पुनरप्रतिबद्धसामर्थ्यमग्निजनक काष्ठन्तस्य यद्यपि शीतनिमित्तेन विरोधस्तथापि तथाभूतस्य काष्ठस्य कार्यदर्शनादेव निश्चयात् कार्यविरोध एव स्यात्। **निमित्तयोः** पुनर्**विरोधे गमिके** च कारणानुपलब्धि.। **यथा नास्य पुंस रोमहर्षादिविशेषा**। आदिशब्दाद् दन्तवीणाक[2]म्पादय। विशेषग्रहण शीतकार्याणा परिहारार्थं। पिशाचादिविकारकृता अपि हि ते सम्भवन्ति। **सन्निहितो दहनविशेषो** यस्य पुरुषस्य स तथा तद्भावस्तस्मात्(।)अत्रापि विशेषग्रहण यथाभूतो दहनो रोमहर्षाद्यपनयनसमर्थस्तथाभूतस्य परिग्रहार्थं। अत्र हि परितापनिमित्तस्य दहनस्य रोमहर्षादिनिमित्तेन शीतेन विरोधो[3]स्ति। तस्माद् दहनः स्वविरुद्धं शीतमपनयस्तत्कार्यमपि रोमहर्षादिकमपनयतीति। शीतस्पर्शस्य तत्कार्यस्य च रोमहर्षादे. परोक्षत्वे सति वह्निदर्शनाच्छीतकारणनिवृत्त्या यदा रोमहर्षादिनिवृत्ति. साध्याभिप्रेता तदाऽय प्रयोगो द्रष्टव्यः।

एतेन कारणविरुद्धोदाहरणेन **तत्कार्यादपी**ति विरुद्धस्य यत्कार्यन्तस्मादपि।

---

[1] In the margin.

इष्टं विरुद्धकार्येऽपि देशकालाद्यपेक्षणम् ।
4242 **अन्यथा व्यभिचारि स्याद् भस्मेवाशीतसाधने ॥८॥**

तद्विरुद्धकार्याभा[4]वगतिरुक्तेति। यस्य विरुद्धस्य कार्यमुपलभ्यते तेन विरुद्धो यो द्वितीय. प्रतियोगी स तद्विरुद्धस्तस्य यत् कार्यन्तस्याभावगतिरुक्ता। **यथेत्युदाहरण**। **रोमहर्षादिविशेषो** यः शीतकृतस्तेन **युक्तो** य **पुरुषः** स यस्मिन् **प्रदेशे** विद्यते स तथा। प्रदेशोपादान धूमादित्यस्य पक्षधर्मत्वप्रतिपादनार्थं। पुरुषे हि धर्मिणि न पक्षधर्मो हे[5]तुः स्याद् धूमस्य प्रदेशधर्मत्वात्। अय च प्रयोगः (।) यत्र वह्निः शीतस्पर्शो रोमहर्षादिविशेषश्च परोक्षस्तत्राभावसाधने द्रष्टव्यः। तत्र हि शीतविरुद्धाग्निकार्यस्य धूमस्योपलब्ध्या अग्निविरुद्धशीतकार्यस्य रोमहर्षादेरभाव. साधयितुमिष्टस्तेन तथाभूत एव साध्य·। धूमो हि दहन सन्निधापयति स शीतन्निवर्तयति (।) स निवर्त्तमान[6] स्वकार्य रोमहर्षादिकन्निवर्त्तयतीत्यर्थात् कारणविरुद्धोपलब्धिरिय।

17b **इयन्तद्विरुद्धोपलब्धि**(१।३२)रिति सम्बन्ध·। कारणविरुद्धोपलब्धिरित्यर्थः। **हेत्वसिद्धयै**व कारणानुपलब्ध्यैव **प्रागेव निर्दिष्टा**। यस्मादनयोरपि प्रयोगयोः कारणानुपब्धेरेव कार्याभावगतिस्तस्मादिय कारणानुपलब्ध्यैवोक्ता।[7]

इतीयमित्यादि। मौलेन प्रभेदेन चतुर्विधापि सती अवान्तरप्र**योगभेदाद् अष्टविधा** भवति। तथा हि स्वभावविरुद्धोपलब्धेर्व्यापकविरुद्धोपलब्धि प्रभेद उक्त.। स्वभावानुपलब्धेर्व्यापकानुपलब्धिः। कारणानुपलब्धे. कारणविरुद्धोपलब्धि· कारणविरुद्धकार्योपलब्धिश्च। विरुद्धकार्योपलब्धिस्त्वेकप्रकारेत्यष्टवि[1]धा भवति ॥

ननु चिरविनष्टेप्यग्नौ वासगृहादौ धूमस्य सद्भावात् कथम्विरुद्धकार्योपलब्धेर्न व्यभिचार इत्यत आह।

तत्रेत्यादि। **तत्र विरुद्धकार्येपीष्टं देशकालाद्यपेक्षणं**। नात्र शीतः कस्मिंश्चित् काले यदाऽग्निर्वर्तमानीभूत इति कालापेक्षण व्योम्नि धूमात् कुत्रचिद्देशे नास्ति शीतो यत्र सन्निहितो वह्निर्यतोय धूम उत्थित इति देशापेक्षण।[2] आदिशब्दाद् अवस्थाविशेषापेक्षण (।) योवस्थाविशेषो धूमस्य सन्निहिताग्नेर्दृष्टस्तमपेक्ष्य वर्त्तमानेपि काले शीताभावोनुमीयते। अग्निरत्र धूमादिति कार्यहेतावपि देशकालाद्यपेक्षणमिष्ट। अस्यैवार्थस्य समुच्चयार्थोऽपिशब्द.।

ननु देशकालाद्यपेक्षित्वस्य कार्यहेतुविशेषणत्वेऽसिद्धो हेतु. स्याद् धर्मिणोऽभावादिति चेत् (।) न। प्रदेश ए[3]व धर्मिणि देशकालाद्यपेक्षित्वेन गमकत्वादित्युक्तत्वात्।

यस्तर्हि (समगुणेन) कारणकलापेन कार्योत्पादोऽनुमीयते स कथं त्रिविधे[2] हेतावन्तर्भवति ॥

हेतुना यः समग्रेण कार्योत्पादोऽनुमीयते ।
(अर्थान्तरा)नपेक्षत्वात् स स्वभावोऽनुवर्ण्यितः ॥९॥

असावपि यथासन्निहितात् नान्यमर्थमपेक्षत इति तादृग्मात्रानुबन्धी स्वभावः। तत्र कारणकलापात् कार्योत्पत्तिसम्भवोऽनुमीयते केवलम्। समग्राणां कार्यो-

---

अन्यथेति यदि न देशाद्यपेक्षणन्तदा **व्यभिचारि** विरुद्धकार्य **स्यात्**। यथा **भस्मा**नपेक्षितदेशकाल **अशीतसाधने** शीताभावे साध्ये व्यभिचारि। तद्वत् एवन्तावद् विरुद्धाद्युपलब्धिरनुपलब्धिरिति प्रतिपादित।

यस्तर्हीत्यादि परः। **समगुणेति** सन्निहितानुपहितेन यथा क्षितिबीजो[4]दकादि**कारणकलापं** दृष्ट्वाकुर कार्योनुमीयते। **स कथं** कारणाख्यो हेतु**स्त्रिविधे** स्वभावकार्यानुपलम्भाख्ये **हेतावन्तर्भवति**। न तावदनुपलब्धौ विधिसाधनत्वात्। कारणस्वभावत्वान्न कार्यहेतौ। अर्थान्तरेणार्थान्तरस्यानुमानान्न स्वभावहेतौ ॥

अन्तर्भावमाह।

हेतुनेत्यादि। **समग्रेणेति** यावत कारणकलापात् कार्यमुत्पद्यमान दृष्टन्तावता[5] नान्त्यावस्थाप्राप्तेन तत्र लिङ्गिग्रहणात् प्रागेव कार्यस्य प्रत्यक्षत्वात्। अप्रत्यक्षत्वे वाऽन्त्यावस्थानिश्चययायोगादनुमान। न च यस्तान् निश्चेतु शक्ष्यति तस्यानुमानमन्त्यक्षणानामवगृदर्शनेनानिश्चयात्। **यः कार्योत्पादोनुमीयते** स हेतो **स्वभावो वर्णितः**। कुतोर्थान्तरानपेक्षत्वात्। तेनायमर्थ कार्योत्पादनयोग्यता**मात्रानुबन्धि**[6]**त्वात् स्वभावभूता** ॥

ननु यदाऽन्त्यावस्थापेक्षः कार्योत्पादस्तदा कथमन्यानपेक्ष इत्याह। **असावपीति** कार्योत्पाद.। यथासन्निहितो यादृश सन्निहित.। कारणकलाप। तादृशात् सन्निहितान्नान्यमर्थमपेक्षत **इति तादृग्मात्रानुबन्धी स्वभाव**ः। (कस्य भाव)। समग्रस्य कारणकलापस्य(।)सन्तानापेक्षयैतद् उच्यते न क्षणापेक्षया। जनक.[7] कारणकलापसन्तानोनपेक्ष इत्यर्थ.। 18a

यद्यप्यनपेक्ष. कार्योत्पादस्तथाप्यर्थान्तरत्वात् कथ स्वभाव इत्याह। **तत्रेत्यादि**। यस्मात्तत्र समग्रेषु कारणेषु समग्रात् कारणाल्लिङ्गात् **कार्योत्पत्ति(सम्भव)स्तथानुमीयते**। सम्भवत्यस्मादिति सम्भव.। कार्योत्पादनयोग्यतानुमीयत इत्यर्थः। एतदेव व्यनक्ति। **समग्राणां कार्योत्पादनयोग्यतानुमानादिति**। **योग्यता**[1] **च**

त्पादनयोग्यतानुमानात्। योग्यता च सामग्रीमात्रानुबन्धित्वात् स्वभावभूतैवा[4]नुमिता।

किं पुनः सामग्र्याः कार्यमेव नानुमीयत इति।

सामग्रीफलशक्तीनां परिणामानुबन्धिनि।
अनैकान्तिकता (कार्ये) प्रतिबन्धस्य सम्भवात् ॥१०॥

न हि समग्राणीत्येव कारणद्रव्याणि स्वकार्यं जनयन्ति। सामग्रीजन्यशक्तीनां परिणामापेक्षत्वाद्धि कार्योत्पादस्य। अत्रान्तरे प्रतिबन्धसम्भवात् न कार्यानुमानम्।[6]

योग्यताया द्रव्यान्तरानपेक्षत्वात् न विरुध्यतेऽनुमानम्। उत्तरोत्तरशक्ति-परिणामेन नाना कार्योत्पादनसमर्था, शक्तिपरिणामप्रत्ययस्यान्यस्यापेक्षणीयस्या-
424b **भावात्।[7] पूर्वसजातिमात्रहेतुकशक्तिप्रसूतित्वात्। सामग्रीयोग्यता ह्यनन्यापेक्षि-**

सामग्रीमात्रानुबन्धिनी कारणान्तरानपेक्षत्वात्।

यदि तर्हि कार्योत्पादनशक्तिस्तन्मात्रानुबन्धिनी नियतस्तर्हि कार्योत्पाद इति स एव **कस्मान्नानुमीयत** इति पर पृच्छति। **किं पुनः सामग्र्याः** सकाशात् **कार्यमेवानुमीयत** इत्यत्राह। **सामग्रीत्यादि।** सामग्र्या. फलञ्च ताः शक्तयश्चेति सामग्रीफलशक्तयः। तथा हि पूर्वस्मात् समग्रादुत्तरस्य समर्थस्य क्षण[2]स्योत्पत्तिस्तस्य चात्मातिशय शक्तिरिति **सामग्री फलं शक्तिस्तासा** परिणाम.। उत्तरोत्तरप्रबन्धे-नोत्पत्तिस्तदनुबन्धिनि तदपेक्षिणि कार्ये। कारणेनानुमातव्येऽनैकान्तिकता। किङ्कारणं (।) **प्रतिबनध(स्य)सम्भवात्।**

तद्व्याचष्टे। **न हीत्यादि। समग्राणीत्येव** सन्निहितानीत्येव **कारणद्रव्याणि स्वकार्यं जनयन्ति।** किङ्कारण। **सामग्रीत्यादि। सामग्र्याः** सकाशा[3]ज्जन्म यासा **शक्तीनान्तासामुत्तरोत्तरपरिणामः।** पूर्व्वपूर्व्वक्षणादुत्तरोत्तरविशिष्टक्षणो-त्पादो यस्तदपेक्षत्वात् **कार्योत्पादस्य। अत्रान्तरे** चेति सन्तानपरिणामकाले। **प्रतिबन्धसम्भवात्।**

ननु योग्यताप्युत्तरोत्तरक्षणपरिणामप्रतिबद्धा तत्रापि च प्रतिबन्धसम्भ-वात् कथन्तदनुमानमपीत्याह। **योग्यतायास्त्वित्यादि।** द्रव्यान्तरानपेक्षत्वात् सन्निहि[4]तकारणकलापव्यतिरेकेण कारणान्तरानपेक्षत्वान्न **विरुध्यतेऽनुमानं।**

तदेवानुमानमाह। **उत्तरोत्तरेत्यादि।** पूर्वपूर्वक्षणमुपादायोत्तरसमर्थक्षणोत्पाद **उत्तरोत्तरशक्तिपरिणामः।** तेन हेतुभूतेन **कार्योत्पादनसमर्थेति** साध्यनिर्देशः। **इयं** कारणसामग्रीति धर्मी। **शक्तिपरिणामप्रत्ययस्यान्यस्यापेक्षणीयस्याभावा-दिति** हेतुः[5] शक्तेः परिणामस्य योऽपरः सहकारिप्रत्ययस्तस्यापेक्षणीयस्याभावात्।

णीत्युच्यते ॥

या तर्हीयं अकार्यकारणभूतेनान्येन रसादिना रूपादिगतिः, एवं चेत् (सापि)—

एकसामग्र्यधीनस्य रूपादेरसतो गतिः ।
हेतु(धर्मा)नुमानेन धूमेन्धनविकार(वत्) ॥११॥

कुतस्तर्हि शक्ते प्रसव इत्याह । **पूर्वेत्यादि। पूर्वसजातिः** सदृशः पूर्व कारणकलापस्तावन्**मात्रं हेतुर्यस्या शक्तिप्रसूतेः** सा तथा। तद्भावस्तस्मात्। अतः कारणात् सा योग्यतानन्यापेक्षिणीत्युच्यते ॥

ननु कार्य प्रति कारणस्य योग्यता यदि शक्तिरुच्यते तदा का[6]र्यव्यभिचारे योग्यताया अपि व्यभिचार इति कथमेतदनुमान। अथ योग्यतासम्भव उच्यते तदायमर्थः स्यात् कार्य स्याद्वा न वेति। तथापि कथमस्यानुमान सन्देहादिति।

अत्रोच्यते। परेण हि कथमेतदनुमानन्त्रिविधहेतुजन्यमिति चोद्यते। यद्येतदनुमानम्परेण समर्थ्यते तदा त्रिविधलिङ्गजमेवेत्या चा र्यं ण प्रतिपाद्यते। न त्वेतत्परमा[7]र्थतानुमानमित्येवम्परमेतदित्येके। अथवा यद्येकान्तेन कार्योत्पादन- 18b
योग्यतानुमीयते। तदा व्यभिचारादनुमान न स्यात्। यदा तु कदाचित् कार्यं स्यादित्येवरूप. सम्भवोनुमीयते तदा कथमस्य व्यभिचार। तेनायमर्थं उत्तरोत्तरपरिणामे यदि प्रबन्धाभावस्तदा कार्य स्यादन्यदा तु नास्तीति। परोक्ते त्वेकान्तेनकार्यानुमाने व्यभिचार एव।

अन्ये तु परि[1]णामवत्या सामग्र्या प्रतिबन्धकाभावे सत्येकान्तेन कार्योत्पादनयोग्यता भवतीति सैवानुमीयते। कार्योत्पादनयोग्यताप्रतीतिश्च कार्यमपि विशेषणत्वेनाक्षिपतीति न पृथक् कार्यानुमान क्रियत इति मन्यन्ते। केवल सामग्रीमात्रात् कार्यानुमाने व्यभिचार उच्यते प्रतिबन्धकाभाव कथम्प्रतिपन्न इति चेत् (।) सत्य। यो हि त ज्ञातु शक्नोति, तस्यैतदनु[2]मान यो हि धूमस्याग्निजन्यत्व ज्ञातु शक्नोति तस्य धूमादग्न्यनुमान नान्यस्य तद्वत्।

या तर्हीत्यादिना पुनरपि त्रिधैव स इत्यस्य व्याघातमाह। **अकार्यकारणभूतेन** । अनुमेयादर्थाद**न्येनास्वभावेन रसादिना**। आदेशब्दाद् गन्धादि**ना रूपादिगतिः**। अत्राप्यादिशब्दात् स्पर्शादिग्रहण। अन्धकारे हि मातुलुङ्गादिरसमास्वाद्य । चम्पकगन्धमाघ्राय। व[3]ह्नेश्च स्पर्शमनुभूय। तेषा रूपसामान्यमनुमीयते तथा वह्निरूप दृष्ट्वा तत्स्पर्श । सा कथन्त्रिविधे हेतावन्तर्भवतीति प्रकृते।

न चाप्रमाणमियन्ततो लिङ्गान्तरप्रसंग इत्याह। सापीत्यादि। सापि गतिरिति सम्बन्धः। रूपादेः किम्विशिष्टस्यैकसामग्र्यधीनस्य। रसस्य जनिका या सामग्री तस्यामेव सामग्र्यामायत्तस्य रसतो लिङ्गाद्या गतिः (।) सा हे[4]तुधर्मानुमानेन। रसस्य यो हेतुः पूर्वमपादानन्तस्य यो धर्मो रूपजनकत्वन्तस्यानुमानेन। तेनायमर्थो रसात् सकशात् तद्धेतोरससमानकालभावि रूपजनकत्वन्निश्चीयते। एव हि तस्य रससमानकालभावि रूपजनकत्व निश्चीयते। यदि समानकालभाविनो रूपस्यापि निश्चय स्यात्तेनातीतैककालानामेकैव गति कार्यलिङ्गजा[5]।

नन्वनभिहिताद् रसहेतो सकाशात् पश्चात्समानकालस्य रुपस्यानुमान हेतो कार्यानुमाने व्यभिचारात्। कार्योत्पादनयोग्यतानुमाने च न रससमानकालस्य रूपस्यानुमान स्यात्। अनुमितानुमानप्रतीतेरभावाच्च। तेन यदुच्यते (।) यदातीताना गतिस्तदा कार्यश्च तल्लिङ्गश्च (।) तस्माज्जातेति कार्यलिङ्गजा (।) यदा तु समानकालानाङ्गतिस्तदा का[6]र्य लिङ्ग यस्य हेतुधर्मानुमानस्य तत्कार्यलिङ्गन्तस्माज्जाता कार्यलिङ्गजेति तदपास्त। [तत्र परे मा] चावयविद्रव्यं रूपादयो गुणा व्यवस्थितास्तेन तत्र रूपादेरसतो गतिर्युक्ता। न बौद्धानां रूपादिव्यतिरेकेणावयविनोऽनभ्युपगमात् न धर्मिणोऽभावात्। धर्मिणमन्तरेण चानुमाने
19a रसतो रूपादेः सर्वत्रानुमानप्रसङ्गात्।[7] असमुदायश्च साध्य. स्यात्। अपक्षधर्मश्च हेतुः स्यात्। नापि हेतुधर्मानुमान युज्यते रूपादिकार्यत्वेन रसादेरप्रतिपन्नत्वात्। न च क्षणिकपक्षमनिश्चित्यैवमुच्यते। क्षणिकत्वे हि रूपादे· समानजातीयकार्यत्व स्यान्न रसादिकार्यत्व प्रतिबन्धग्राहकाभावात्। न क्षणानामनुमानानुमेयव्यवहार· सम्बन्धानिश्चयात्। सन्तानाश्रयेण त्वनुमानादिव्यवहारे रूपादिसन्ता[1]नाना न परस्पर कार्यकारणभाव. प्रतिपन्न इति कथमनुमानानुमेयव्यवहार इति।

एवम्मन्यते (।) न सर्वत्ररसादे रूपाद्यनुमानमपि त्वाम्रादौ धर्मिणि। तत्र च रूपादीना परस्पराविनिर्भागभाग (?) नियम. प्रतीयत एव (।) स च प्रतिबन्धहेतुकोऽन्यथा घटपटादीनामपि परस्पराविनिर्भागनियम स्यात्। प्रतिबन्धश्च तेषा न तादात्म्य[2] भेदेन प्रतीतेर्(।)नापि तदुत्पत्ति. समानकालत्वात्। न चैकार्थसमवायस्तेषा यतो न तावदसमवेताना समवायबलादेकार्थसमवाय. समवायस्यैवाभावात्। अतिप्रसङ्गाच्च। समवेतानामपि कि समवायेन स्वहेतुभ्य एव तथा निष्पत्तेः। तथा निष्पत्त्यैव वाच्याभिधानाद् गमकत्वम्(।)तस्मादेकसामग्र्यधीनत्व प्रतिबन्धः। निश्चितप्रतिबन्धस्य चान्य[3]स्मिन् कालेनुमान। यद्यपि चात्रावयवी न विद्यते तथाप्याम्रादिप्रत्ययविषयस्य धर्मित्वन्तेन तत्र रसतो रूपादिगति·।

ननु तथापि कथमेषामेकसामग्र्यधीनत्व। यतो यै(?येनै)व स्वभावेन रूप

रूपं जनयति न तेनैव रसादिकं जनयति तेषां परस्पराभेदप्रसंगात्। नाप्यन्येनान्यं जनयति तस्य स्वभावभेदप्रसंगात्।

नैष दोषो यस्मात्। न तत्र रूपस्य पूर्व्वमेक[4]कार्यजनकत्वं येनायन्दोषः स्यात्। किन्त्वेककालमनेककार्यजनकत्वमेव। ततस्तस्यैवोत्पत्तिदर्शनात्। न च कारणस्य कार्याभाव एव कारणत्वं येनानेकमेकस्मादुत्पद्यमानमेक प्रसज्येत किन्तु कार्योत्पत्तौ प्राग्भाव एव तस्य कारणत्व लोके। यथा चैककार्योत्पत्तौ तस्य प्राग्भावकारणत्वन्तथां कलापोत्पत्तावपि[5] दृष्टत्वात्। यद्वा येनैव स्वभावेन रूपं रूप जनयति तेनैव रसादिकमपि स्वरूपभेदस्त्वेषामुपादानभेदकृतो न सहकारिकृतः। तथा हि वायौ स्पर्शसद्भावेपि रूपाद्यभावाद् रूपाद्यनुत्पत्ति। अग्नौ च रूपादिसद्भावेपि रसाभावाद् रसानुत्पत्ति.। अप्सु रसादिभावेपि गन्धाभावाद् गन्धानुत्पत्तिस्तेन रसादेर्नियत का[6]रण रसादिरेवावसीयते। नियत च कारणमुपादानकारण समानजातीयमभिन्नसन्तानवर्त्ति वा। तस्मादुपादानकारणभेदाद् रूपादीना स्वभावभेदः।

यत्पुनरुच्यते। तत्रानेकशक्तीना समुच्चय·। तेन रूपमेकया शक्त्या रूप जनयत्यन्यान्यया रसादिकमिति।

तदयुक्तम् (।) अनेकशक्तिद्वारेणाप्ये[7]कस्यानेककार्यकारणाभ्युपगमेऽनेकत्व- 19b
प्रसङ्गोऽनिवारित एव भावस्यानेकशक्तीनामेवानेकस्वभावत्वात्। अभिन्नत्वाच्च शक्तीना शक्तिभेदे रूपस्य भेदप्रसङ्ग·। भेदे वा शक्तीना रूपस्याकारकत्वप्रसङ्गात्। न च शक्तियोगात् कारकत्वमशक्तस्य शक्तियोगाभावात्। शक्तस्यापि कि शक्तियोगेन स्वरूपेणै[1]व कारकत्वाच्छक्तेश्च कारकत्वं नु स्याच्छक्तियोगाभावात्। अथ शक्तित्वान्न सा शक्तिमपेक्षते (।) भावोपि तर्हि श(ि)क्तत्वात् किमिति शक्तिमपेक्षते।

योपि मी मा स को मन्यते। भावस्य स्वरूपातिशय एव **श क्तिः** सा च भिन्नाभिन्ना। यतो भावे गृह्यमाणे शक्तिर्न गृह्यतेऽतो भावाद् भिन्ना। कार्यान्यथानुपपत्त्या तु सा भावस्याभिन्नाऽन्यथा भाव[2]स्य कारकत्वन्न स्यात्। तदुक्त (।)

"शक्तयः सर्वभावाना कार्यार्थापत्तिकल्पिता" इति (।)

सोपि निरस्तः। एकस्या शक्तेर्भिन्नाभिन्नरूपत्वविरोधात्। कि चार्थापत्त्या कार्यात् प्राग्भाविन एव भावस्याभिन्ना शक्तिः कल्प्यता इति प्राग्भाव एव शक्तिः (।) स च प्रत्यक्षसिद्ध इति कथ न शक्ति· प्रत्यक्षा। केवल सा कार्यदर्शनान्निश्चीयते। तस्मात् कार्याद् रसादे कारण[3]धर्मानुमानाद् अस्य कार्यहेतावन्तर्भावः। **धूमेस्धनविकारवदिति**। यथा धूमादग्न्यादिसामग्र्यनुमितौ भस्मा-

तत्र हेतुरेव तथाभूतोऽनुमीयते। तस्य हेतुः। तथा हि

शक्तिप्रवृत्त्या न विना रसः सैवान्यकारणम्।
इत्यती(तैककालानां गतिस्तत्) कार्यलिङ्गजा ॥१२॥

प्रवृत्तशक्तिरूपोपादान[2]कारणस्य सहकारिप्रत्ययो रसं जनयति। इन्धनविकारविशेषोपादानहेतुसहकारिप्रत्ययः सन् धूमजननतुल्यवत्। तथा हि शक्तिप्रवृत्तम्। स्वकारणस्य फलो[3]त्पादनाभिमुख्येन विना न रस(उत्पद्यते)। सैवान्यकारणम्। रूपोपादानहेतूनां प्रवृत्तिकारणम्। रसोपादानकारणप्रवृत्तिरपि रसोपादानकारणप्रवृत्तेः सहकारिणी[4]। तस्मात् यथाभूताद्धेतोरुत्पन्नस्तथाभूतमनुमापयन् रूपमनुमापयति।

ङ्गारादीन्धनविकारानुमितिः तद्वत्॥

ननु च रसकार्येणानुमितात् कारणात् सकाशात् समानकालिन कार्यस्यानुमानमिदं न तु हेतुधर्मानुमानमित्यत आह। **तत्रेति** (।) रसाद् रूपे प्रतिपत्तौ **हेतुरेव तथाभूत** इति रूपजननसम्बन्धोनुमी[4]यते (।) यस्मिन्ननुमीयमाने कार्यान्तरमपि तद्विशेषणन्निश्चितम्भवति। न त्वनुमितात् कारणात् पश्चात् कार्यान्तरमनुमेय। कुत इत्याह। **हि** यस्मात्। प्रवृत्ता न प्रतिबद्धा शक्तिर्यस्य तत् **प्रवृत्तशक्ति**। तथाभूत च **तद्रूपोपादानकारणं** चेति तथोक्त। तस्य **सहकारिप्रत्ययः** सन्। रसहेतू **रसं जनयति**। तथाभूते च हेतावनुमितेर्थाद् रूपानुमान रू[5]परसयोरेकसामग्र्यधीनत्वात्। **इन्धनविकारविशेषो** भस्माङ्गारादि.। तस्योपादानं काष्ठ तस्य सहकारिप्रत्ययोग्निः। तस्य यथा धूमजननन्तेन तुल्यन्तद्वद् रूपरसयोरेकसामग्र्यधीनत्व।

तथा हीत्यादिना समर्थयते **शक्तिप्रवृत्तेति** सूत्र।[1] अस्य व्याख्यान **स्वकारणस्येत्यादि। स्वकारणस्येति** रसस्य यत् स्वकारणन्तस्य **फलोत्पादनं** प्रतीतिर[6]सोत्पादन प्रत्याभिमुख्येनानुगुण्येन **विना न रस उत्पद्यते। सैवेति** शक्तिप्रवृत्तः। **अन्यकारण**मित्यस्य व्याख्यान **रूपोपादानेत्यादि**। रूपस्य य **उपादानहेतवः** पूर्वलक्षणसङ्गृहीता रूपपरमाणवस्तेषां रूपजननम्प्रत्याभिमुख्य **प्रवृत्तिस्तस्या कारणं**।
20b रसहेतुनैव सहकारिणा रूपोपादानस्य स्वकार्यं प्रत्याभिमुख्यात्। सापि र[7]**सोपादानकारणप्रवृत्ती रूपोपादानकारणस्य** रूपजननम्प्रति या **प्रवृत्तिस्तया** सह कर्त्तुं शील यस्या **रसोपादानकारणप्रवृत्तेः** सा तथोक्ता। यत एवन्तस्माद् **यथाभूताद्धेतो**रिति प्रवृत्तशक्तिरूपोपादानकारणसहितात् पूर्वक्षणसगृहीताद् रसा-

---

[1] Pramāṇa-Samuccaya.

इति तत्रापि अतीतानामेककालानांच गतिः नानागतानां, व्यभिचा[5]रात्। तस्मादियमपि कार्यलिङ्गजा। तेन नान्यो हेतुर्गमकः। अप्रतिबद्धस्वभावस्याविनाभावनियमाभावात्।

लिङ्गत्वेनाभिमतो रस **उत्त्रस्तथाभूतमेव** हेतुम**नुमापयन्** गमयन् समानका[1]ल **रूपं** गमयति। तेनायमर्थो हेतुनिश्चय एवेदृशो नान्य.।

न पुनरनुमितात् कारणात् पश्चात् कार्यानुमान। यतश्च कार्यजनकत्वेनैव हेतुधर्मनिश्चयो नान्यथा तेनैवाह। **इति तत्रापीत्यादि**। इति अनेन द्वारेण। तत्रापि रसादे रूपाद्यनुमानेऽ**तीतानामेककालानां च गतिः**। रसोपादानसमानकाल-भाविनोऽतीता। लिङ्गभूतरससहभा[2]विन एककालास्तेषाङ्गति। **नाऽनाग-तानाम्वर्त्तमानेन** लिगेनानुमान **व्यभिचारात्**। अनागत हि कारणान्तरप्रतिबद्ध-न्तत्र प्रतिबन्धवैकल्यसम्भवान्न भवेदपि। यच्चाद्योदयात् श्व सूर्योदयाद्यनुमानन्न तदनुमान नियामकलिङ्गाभावात्। अद्य गर्दभदर्शनात् श्व सूर्योदयानुमानवत्। **तस्मादियमपि** रसादे रूपादिगति **कार्य[3]लिङ्गजेत्यनुमान**। यतश्च साध्यायत्त-त्वेन हेतुर्गमक**स्तेन** कारणेन त्रिविधाद्धेतो**र्नान्यो हेतुः** सयोग्यादिर्गमकोस्ति। कस्मा-त्तादात्म्यतदुत्पत्तिभ्या लिङ्गन्य**प्रतिबद्धस्वभावस्याविनाभावनियमाभावात्।**

एतदुक्तम्भवति। न तावदश्लिष्टाना सयोगोस्ति। श्लिष्टानामपि कि **सयोगेन स्वहेतुभ्य.** एव श्लिष्टानामुत्पत्ते। तस्मान्न सयोगवशाद् ग[4]मकत्वमप्रतिबद्ध-त्वात्। घटघटयोरिव। तथा पृथक्सिद्धानान्न समवाय.। अपृथक्सिद्धानामपि कि समवायेन स्वहेतुभ्य एवोपर्युपरिभावेन निष्पत्तेस्तेन न समवायेनापि गमकत्व (।) साध्यायत्तत्वाभावान्न च समवायोस्तीति वक्ष्यति। अत **एवैकार्थसमवायि-नोरभाव** इति पूर्वमेवोक्त रसाद्यनुमाने। विरोधी चानुपलब्धावन्तर्भा[5]वि[5]त।

यच्च नै या यि कोक्त "**पूर्ववच्छेषवत्सामान्यतो दृष्टं चानुमानं**' [न्याय-सूत्र १।१।५]। तत्र पूर्ववत् कारणात् कार्यानुमान। तच्च व्यभिचारीति प्रति-पादित। शेषवदनुमान च कार्यात् कारणानुमान तदिष्टमेव शास्त्रकृता। सामा-न्यतो दृष्टन्त्वनुमान यदन्यत्र धर्मिणि साध्यसाधनयोर्व्याप्तिन्दृष्ट्वान्यत्रानुमान। यथा देवदत्तस्य देशान्तरप्राप्ति गतिपूर्विका दृष्ट्वा[6]ऽदित्यस्यापि देशान्तरप्राप्त्या गत्यनुमान। **एतदपि कार्यलिङ्गजमेव**। देशान्तरप्राप्तेर्गतिकार्यत्वात्। सर्वमेवा-नुमान सामान्यतो दृष्टमेवेति स्वयमेवा चार्यस्तृतीये परिच्छेदे वक्ष्यति।

यदप्यु द्यो त क रे ण[1] सामान्यतो दृष्टमुदाहृत (।) यथा वलाकातस्तो-

---

[1] Nyāyavārtika 1 : 5

एतेन पिपीलिकोत्सरणमत्स्योद्वर्त्तनादिना[6] वर्षाद्यनुमानमप्युक्तम्।
तत्रापि वर्षहेतुरेव भूतपरिणामः पिपीलकादिव्यभिचारादहेंतुः॥

हेतुना (त्व)समग्रेण यत् कार्यमनुमीयते।
तच्छेषवदसामर्थ्याद् देहाद् रागानुमानवत्॥१३॥

यानुमानन्तदपि कार्यलिङ्गजमेवेति [प्र मा ण] वि नि श्च येऽभिहित।

20b　**तस्माद्धेतुत्रयव्यतिरेके[7]ण नान्यो हेतुर्गमकोस्ती**ति स्थित।

एतेनेति रसादे रूपाद्यनुमानस्य कार्यलिङ्गजत्वकथनेन। **पिपीलिकोत्सरण**न्तासा गृहीताण्डानामन्यत्र सञ्चरण। **मत्स्या**नामुद्वर्त्तनम्मत्स्यविकार। **आदि**शब्दाद् विद्युद्विकासमण्डूकरुतादिपरिग्रह। **वर्षाद्यनुमानमित्यत्रापि** आदिशब्दाद् वाताद्यनुमान**मुक्तं**। यथा तदपि कार्यलिङ्गजहेतुधर्मानुमानात्।

एतदेवाह।[1] **तत्रापी**त्यादि। तत्रापि पिपीलिकोत्सरणादौ। भूतपरिणाम एव वर्षहेतुरिति। एवकारो भिन्नक्रम। **वर्षहेतुरेव भूतपरिणामः**। पिपीलिकासक्षोभादेरुत्सरणादिलक्षणस्य हेतु। तस्माद् यथाभूताद् भूतपरिणामाद् वर्षहेतु **पिपीलिकादी**नाम्विकारो जात। तथाभूतस्य हेतोरनुमानात् समानकालवर्षाद्यनुमान। अन्यत्र तु योग्यतानुमी[2]यते न तु वर्ष एव प्रतिवन्धसम्भवेन **व्यभिचा**रात्। तस्मात् समग्रादपि कारणकलापान्नास्ति कार्यानुमान केवल योग्यतानुमानमेव॥

ये तु मी मा स का दयोऽसमग्रादपि कारणात् कार्यमनुमिमते। तेऽत्यन्तन्यायबहिष्कृता इत्येतद् दर्शयन्नाह (।)

हेतुना त्वसमग्रेणेत्यादि। असमग्रेणेति विकलेन। **शेषवदनु**मानमनैकान्तिकमित्यर्थ। कुतो[3]सामर्थ्यात्। अस्य व्याख्यान **समग्राण्येव** हीत्यादि। कार्यस्य तावत् सर्वथा नानुमान। **योग्यतामप्यनुप्रापयन्ति** समग्राण्येवानुमापयन्तीत्येतदपिशब्देनाह। **असमग्रस्यैकान्तेनासामर्थ्यादि**त्यु(त्त)रोत्तरपरिणामेनाप्यसामर्थ्यान्न पाक्षिकमपि कार्यानुमान। **देहाद् रागानुमानवद्** इत्यस्योदाहरणस्य व्याख्यान। **यथे**त्यादि। **देहश्चेन्द्रियाणि च बुद्ध्य[4]श्चेति** द्वन्द्व। रागादिमानय पुरुषो देहवत्त्वादिन्द्रियवत्त्वात् बुद्धिमत्त्वात्। एवन्देहादिभ्यो **रागाद्यनुमानं**। आदिशब्दाद् द्वेषमोहादिपरिग्रह। **सूत्रे** तु देहरागग्रहणमुपलक्षण। न हीन्द्रियाद्येव कारण रागादे। यस्मा**दात्मात्मीयाभिनिवेशपूर्वका रागादयः**। आत्मन्यात्मीये चाहम्ममेति योभिनिवेश. स पूर्व कारण येषा राग[5]दीनान्तेन तथोक्ता.। **अयोनिश** इत्याद्यस्यैव समर्थन। योनि पदार्थानामनित्यदु खानात्मादि। सम्यग्दर्शनप्रसूतिहेतुत्वात्। त शसत्यालम्बत इति

समग्राण्येव हि हेतवो योग्यतामनुमापयन्ति, असमग्रस्यैकान्त्येनासामर्थ्याद्। 425a
यथा देहेन्द्रियबुद्धिमत्त्वाद् रागाद्यनु[1]मानम्। आत्मात्मीयाभिनिवेशपूर्वका रागादयः, अयोनिशोमनस्कारपूर्वकत्वात् सर्वदोषोत्पत्तेः।

देहादीनां हेतुत्वेऽपि असामर्थ्यात् केवलानां विपक्षे वृत्त्यदृष्टावपि शेषवदनुमानात् संशयो भवति। तथा—

विपक्षेऽदृष्टिमात्रेण कार्यसामान्यदर्शनात्।
हेतुज्ञानं प्रमाणाभं वचनाद् रागितादिवत् ॥१४॥

न हि चलनवचनाद्येव रागादिकार्यं, वक्तुकामताहेतुकत्वात्। सैव राग इति चेत्।[4] इष्टत्वान्न किञ्चिद् बाधितम्। राग हि नित्यसुखात्मात्मीयदर्शना-

---

योनिश। योनि योनि मनस्करोतीति "सख्यैकवचनाच्च वीप्सायां"[1]मिति शस् प्रत्ययो वा। तथाभूतश्चासौ मनस्कारश्चेति योनिशोमनस्कारो नैरात्म्यज्ञान। तद्विरुद्धमात्मादिज्ञानम**योनि[6]शोमनस्कार**स्तत्**पूर्वकत्वात् सर्व**रागादि-**दोषोत्पत्तेः**॥

ननु देहेन्द्रियबुद्धयोपि रागादिना हेतवस्तद्रहितेषु रागाद्यदर्शनादित्याह। **देहादीनां हेतुत्वेपीति केवलानामित्ययोनिशोमनस्काररहितानाम्।** रागादौ साध्ये। रागादिरहिता उपलखण्डादयो **विपक्षस्तत्र** हेतुर्देहादिमत्त्वस्य या **वृत्तिस्तस्या[7] अदृष्टावपि**। विपर्यये बाधकप्रमाणाभावाच्**छेषवदनुमानमस्माच्च संशयो भवति** 21a न निश्चय। यथा चैतदनन्तरोक्त न प्रमाणन्**तथा विपक्षे** हेतोर**दृष्टिमात्रेण कार्यसामान्यस्य** कार्यमात्रस्य **दर्शनात्। हेतुज्ञानम्**विशिष्टकारणानुमान **प्रमाणाभं** प्रमाणाभासमनैकान्तिकमिति यावत्। किमिव (।) **वचनाद्रागितादिवत्।**

ननु सर्वमेव वचन[1] **रागादिकार्य**मिति कथन्तत्कार्यसामान्यमित्यत आह। **न हीत्यादि**। ओष्ठयोश्**चलनं** स्पन्दो **वचन**काले च तस्यावश्यभावात्। **आदि**शब्दाद् अन्यस्यापि वचनकालभाविनो मुखविकारादेर्ग्रहण। अविशिष्टविवक्षामात्र वक्तुकामता सामान्यन्तदेव **हेतुर्यैषा** स्पन्दादीनान्ते तथोक्तास्तद्भावस्तस्मात्। **सैव** वक्तुकामता **राग इति चेत्**। आसक्तिरूपत्वाद् रागस्येति म[2]न्यते। आ चा र्य आह। **इष्टत्वान्न किंचिद् बाधितं।** वक्तुकामता कार्यस्य वचनस्येष्टत्वान्न किञ्चिद् अनिष्ट। न च वक्तुकामता राग.(,अ)पि तु **नित्यसुखात्मात्मीयाकारं यद्दर्शन-**

---

[1] Pāṇini 5:4:43.

भिनेवेशाक्षिप्तं सास्रवधर्मविषयमाहुः।

नैवं करुणादयः। अन्यथाऽपि सम्भवात् इति निवेदयिष्यामः। यथा रक्तो ब्रवीति तथा विरक्तोऽपि। एवं न वचनमात्रात् नापि विशेषाद् प्रतिपत्तिः अभिप्रायस्य दुर्बोधत्वात्। व्यवहारसंकरेण सर्वेषां व्यभिचारात्। प्रयोजनाभावेऽवचनमिति चेत्। न। परार्थत्वात्।

425b **न युक्तो वीतरागत्वादिति चेत्। न। करुणयाऽपि प्रवृत्तेः।[7] सैव करुणा राग इति चेत्। इष्टम्। अविपर्यासोद्भवत्वात् अदोषः। करुणा असत्यप्यात्म**

मभिनिवेशस्तेनाक्षिप्तं जनितं। **सास्रवधर्मविषयमिति** पञ्चोपादानस्कन्धालम्बन चेतसोभिष्वङ्ग **रागमाहुर्**विद्वास ।

स्यान्मत (।) वीतरागाभिमताना मैत्रीकरुणादय इष्यन्ते। ते च सत्वा[3] लम्बनत्वाद् आत्मादिदर्शनप्रवृत्ता सत्त्वानुनयप्रवृत्त्या चाभिष्वङ्गस्वभावास्तत वीतरागा अपि रागिण. प्रसक्ता इत्यत आह। **नैवं करुणादय** इति (।) न सत्त्वा लम्बना वीतरागाणा करुणादय । **अन्यथापि सम्भवात्**। (धर्मालम्बनानामपि सम्भवात्)[1] एतच्चानन्तरमेव **निवेदयिष्यामः**। अत्र वचनाद् रागानुमाने क्रियमाण वचनमात्रादप्रतिपत्तिरित्यनेन सम्बन्ध । यस्माद् **यथा र[4]क्तो ब्रवीति तथ विरक्तोपी**ति प्रक्षीणरागोपि। **न वचनमात्राद्** रागानुमान किन्तर्हि वचनविशेषात् यो रागेणैव जन्यत इत्याह। **नापि विशेषा**दिति। किङ्कारणम् (।) **अभिप्रायस्य दुर्बोधत्वात्**। विरक्तो हि रक्तवच्चेष्टते। रक्तोपि विरक्तवदित्यभिप्रायो दुर्बोध ततश्च **व्यवहारसं[1]करेण सर्वेषा**मिति वचनाना। वचनमात्रस्य वचनविशेषस्य च रा[5]गादेर्लिङ्गत्वेनोपनीतस्य **व्यभिचारात्**। न विशेषादपि रागाद्यनुमान। यदुक्त न्तथा विरक्तो ब्रवीतीति तत्रोत्तरमाशकते। **प्रयोजनेत्यादि** । वचनोच्चारण व्यव हार । न हि वीतरागस्य वचनोच्चारणे फलमस्ति तथा चाव्यभिचारो रागवचन योरिति भाव'। नेत्या चार्यः। **न** प्रयोजनाभाव **परार्थत्वाद्** व्याहारस्य।

न युक्त इत्यादिपर.।[6] वीतरागो हि परेष्टव्यासक्तो न च सक्तिमन्तरेण परार्थप्रवृत्तिरस्तीति भाव'। नैतदेव। **करुणयापि प्रवृत्तेः। सैव करुणा राग इति चेत्**। तदेतदिष्टं करुणा राग इति नामकरण। सत्त्वदर्शन**विपर्यासायातत्वात** करुणापि रागात्मको **दोष** इति चेदाह। **अविपर्यासे**त्यादि। **अविपर्यासोद्भवत्व**
21b मेवाह। **असत्यप्यात्म**ग्रहण इत्यादि। **दुःख[7]विशेषदर्शनमात्रेणेति** सस्कारदुःखता

---

[1] In the margin.

ग्रहणे दुःखविशेषदर्शनमात्रेण अभ्यासबलोत्पादिता। तथा हि मैत्र्यादयः[1] सत्त्व-धर्मालम्बना इष्यन्ते। एताश्च सजातीयाभ्यासवृत्तयो न रागापेक्षिण्यः। नैवं रागादयः। विपर्यासाभावेऽभावात्।[2] कारुणिकस्य निष्फल आरम्भोऽविपर्यासादिति चेत्। न। परार्थस्यैव फलत्वेनेष्टत्वात्। इच्छया हि फललक्षणत्वम्।

सर्वथाऽभूतासमारोपाद्[3] निर्दोषः। तदन्येन वीतरागस्य दोषवत्त्वसाधने न किञ्चिदनिष्टम्।

निरूपणमात्रेण। अभ्यासबलोत्पादितेति पूर्वपूर्वसजातीयक्षणोत्पन्ना भवत्येव करुणा। आगमेनापि सस्यन्दयन्नाह। तथा हीत्यादि। आदिशब्दाद् अनालम्बना गृह्यन्ते। सत्त्वालम्बना पृथग्जनाना। धर्मालम्बना आर्याणा। अनालम्बना ग्राह्य-ग्राहकाभिनिवेशविगताना बुद्धबोधिसत्त्वाना। मैत्र्यादयो मैत्रीकरुणामुदितो[1]पेक्षा इष्यन्ते सिद्धान्ते।

ननु च सत्त्वालम्बना एव पृथग्जनेनाभ्यस्तास्तास्तत्कथ धर्माद्यालम्बना उच्यन्त इत्यत आह।

एताश्च मैत्रीकरुणामुदितोपेक्षा। सजातीयाभ्यासवृत्तयः पूर्वपूर्वसदृशक्षणबले-नोत्पत्ते। एतावास्तु विशेषो यावत् सत्त्वम्पश्यति तावत्सत्त्वालम्बना। यावद्धर्म-न्तावद् धर्मालम्बना। न रागापेक्षिण्य इति नानुशयेन सत्त्वेषु प्रवर्त्तन्त[2] इत्यर्थ।

ननु दुःखविशेषदर्शनमात्रेणाभ्यासबलोत्पादिनीत्यनन्तरमेवायमर्थ उक्त।

सत्य। करुणामेवाश्रित्याधुना सर्वाण्येवेति विशेष। आत्मदर्शननिवृत्तावपि तर्हि करुणावदभ्यासाद् रागादय प्रवर्त्तन्त इत्याह। नैवं रागादयस्सजातीयाभ्यास-वृत्तयो येनात्मदृष्टिनिवृत्तावपि प्रवर्त्तेरन्। आत्मादिविपर्यासाभावेऽभावात्।

कारुणिकस्य निष्फ[3]लः परार्थ आरम्भोऽविपर्यासादात्माद्यभिनिवेशाभावेन स्वार्थस्यैवाभावात्। नायन्दोषः परार्थस्यैव फलत्वेनेष्टत्वात्। इष्टो नाम परार्थ-स्तथापि कथ फलत्वमिति चेत्। आह। इच्छेत्यादि। इच्छया लक्ष्यत इतीच्छा-लक्षणमिच्छाविषयत्वादित्यर्थ.। यदिष्टन्तत्फलमिति यावत्।

नन्वहमिति बुद्धिरहितस्य कथ परार्थापि प्रवृत्तिरिति चेत् (।) न (।) अक्लिष्टा[4] ज्ञानसद्भावात् प्रवृत्तिरित्येके। योगबलेन शुद्धलौकिकचित्तसम्मुखी-करणादित्यपरे। विनेयाना तथा प्रतिभासनादित्यन्ये।

सर्वथेत्युपसहार। यदि वचनाद् वीतरागस्य वक्तुकामता साध्यते अथ करुणा तेन सराग इत्युच्यते। सर्वथाऽभूतासमारोपाद् वीतरागादिर्निर्दोषः। दोषस्वभाव-स्य रागादेरवश्यभावात्। तदन्येन रागादिभ्योन्येन वक्तु[5]कामतादिना वीतरागस्य

वक्तर्यात्मनि रागादिदर्शनाद् अन्यत्र तदनुमाने हि अतिप्रसङ्गः। व्यभिचारा अनन्यानुमाने[4] इहाव्यभिचार इति को निश्चयः? करणगुणवक्तुकामते वचनम नुमापयेत्। रागोत्पादनयोग्यतारहिते वचनादर्शनात्। तदनु[5]मानेऽप्यतिप्रसङ् इत्युक्तम्। रागस्यानुपयोगे हि कथं तच्छक्तिरुपयुज्यते। शक्त्युपयोगे हि एवोपयुक्तः स्यादिति तन्नास्तीत्युक्तम्।[6]

दोषवत्त्वसाधने न किंचिद् अनिष्टं।

स्यान्मति (।) वक्तर्यात्मनि रागादिर्दृष्टस्तत. सपक्षे सत्त्वदर्शनमात्रेण वीत रागाभिमतेष्वप्यनुमानम्भविष्यतीत्याह। **वक्तर्यात्मनी**त्यादि। **अन्यत्र तदनुमा** इति वीतरागाभिमते रागाद्यनुमानेऽतिप्रसंगः। वक्तर्यात्मनि यावान् कश्चिद् विशेष दृष्टस्तस्य सर्वस्यान्यत्रानुमानप्रसङ्ग।[6] आत्मनि दृष्टस्य श्यामगौरतादिलक्षणस विशेषस्य **व्यभिचारात्**। **अनन्यानुमान** इति रागादन्यस्यात्मगतस्य विशेषस्यानुमाने **इहेति** साध्याभिमते रागादावप्य**व्यभिचार इति को निश्चयः**। नैव कश्चित् प्रतिबन्धाभावाद् रागवचनयो। यस्मादात्मनिदर्शनान्नानुमानन्तस्मात् **करण**
22a **गुणवक्तुकामते वचनमनुमापयेत्**।[7] करणगुणस्तालवादीनाम्पाटवादि· स वक्तुकामता चेति द्वन्द्व·। द्वितीयाद्विवचनमेवैतत्। **रागोत्पादनयोग्यतारहि** पाषाणादौ **वचनादर्शनात्**। सैव वचनादवसीयत इत्याह। **रागे**त्यादि। **तदनुमा** इति योग्यतानुमानेऽतिप्रसंगः। तथा हि यथा पाषाणादौ रागोत्पादनयोग्यताविर **हस्तथा** सर्वपुरुषधर्मैरपि ततस्तथाभूते वचनादर्श[1]नाद् यदि रागोत्पादनयोग्यत नुमानमेव सर्वपुरुषधर्मस्य।

अथ मतं (।) रागोत्पादनयोग्यता हि रागवचनयोरेकङ्कारणन्तदनुमाने रागोप्यर्थतोनुमितो भवति तेन योग्यता एवानुमान न सर्वेषा पुरुषधर्माणामि त्यत्राह (।) **रागस्ये**त्यादि। **रागस्यानुपयोगे** वचन प्रति तालवादिव्यापारादे शब्दनिष्पते। **कथन्तच्छक्तिः** रागशक्ति(र्) वचन[2]प्रत्युपयुज्यते। अथ तालव दिव्यापारकाले रागशक्तेरपि वचनम्प्रत्युपयोग इष्यते (।) ततश्चाद्यवर्णनिष्प त्तिकाले रागस्यापि निष्पत्तिरेकसामग्र्यधीनत्वात् (।) तस्य च रागस्य सन्ता वाहित्वन्तथा च द्वितीयादिवर्णनिष्पतौ राग एवोपयुक्तस्स्यात्। तदाह (। **शक्त्युपयोगे हि स एवोपयुक्तः स्यादिति। न च** रागस्योपयोगोस्तीत्यु प्राक्।

अथवात्मात्मीयाभिनिवे[3]शरहिताना रागस्यानुपयोगे वचनप्रति। **कथं तच्छ क्ती** रागशक्तिर्वासनाख्यात्मात्मीयाभिनिवेशलक्षणा **वचनम्प्रत्युपयुज्यते**। वी

तस्मादविनाभाव्येव कार्यं कारणमनुमापयति। तत्रायत्तत्वात्। नान्यद् विपक्षेऽदर्शनेऽपि। सर्वदर्शिनस्तु दर्शननिवृत्याऽभाव[7]निश्चयः। क्वचित् तथा दृष्टानां पुनर् (देश)कालसंस्कारभेदेन अन्यथादर्शनात्। यथाऽऽमलक्यः क्षीरावसेके मधुरफला न चैवम्बहुलं दृश्यन्ते।[1] तेन एतद् युक्तं वक्तुं मादृशो वक्ता रागादि- 426a

---

रागाणामात्माद्यभिनिवेशस्याभावात्। शक्त्युपयोगे हि वचन प्रति। स एव राग उपयुक्त स्यादात्माद्यभिनिवेशवता सर्वेषामेव रागित्वात्। तच्च रागस्य वचन-प्रत्युपयोगित्वन्नास्तीत्युक्त। वक्तुकामता सामान्यहेतु[4]त्वादित्यत्रान्तरे।

तस्मादित्यादि निगमन नान्तरीयकमेवेति कारणेनाविनाभाव्येव। तत्प्रतिबन्धात्। **तत्र** कारणे **आयत्तत्वात्। नान्यद**प्रतिबद्ध **विपक्षे** हेतोर**दर्शनेपि**। अदर्शनस्यादर्शनमात्रेणानिश्चयात्। **सर्वदर्शिनस्तु दर्शननिवृत्त्या** स्यान्निश्चयस्तस्य हि सर्वज्ञेयव्यापि ज्ञान। एतदेवाह। **सर्वदर्शन** इत्यादि। किम्पुनरदर्शनमात्रा[5]न्नाभावनिश्चय इत्याह। **क्वचित्तथे**त्यादि। तेन प्रकारेण **दृष्टाना** प्राक्। **पुनर्देशकालसस्कारभेदे**नेति भेदशब्दस्य प्रत्येक सम्बन्ध.। सस्कार क्षीरावसेकादि.। पूर्वदृष्टप्रकारादन्यथा स्यात्। किमिवेत्याह। **यथामलक्य** इति। सस्कारभेदस्यैतदुदाहरणन्न **चैवम्बहुल**मिति न मधुरफला बहुलन्**दृश्यन्ते**। कषायफलाना बाहुल्येन दर्शनात्। न चेदा[6]नी बहुल मधुरफलानामदर्शनात्। क्वचित्सम्भविनो मधुरफलस्य प्रतिक्षेप.। तथा देशभेदेन पिण्डखर्ज्जूरस्य सम्भव.। कालभेदेन पुष्पादे.। आमलकीदृष्टान्तेन चैतदाह। यथामलक्यः क्षीरादिसस्कारादन्यथा भवन्ति। तथा रागादियोग्यश्चित्तसन्तानस्तत्त्वाभ्यासाभिसस्काराद् योग्यो भवति। अभ्यासाच्च नैरात्म्यालम्बनमेव विज्ञान स्प[7]ष्टाभम्वैरा- 22b
राग्यमुच्यते। नैरात्म्यदर्शनादात्माद्यभिनिवेशविगमेन रागाद्यनुत्पत्तेः। सर्वधर्मक्षणिकत्वाद्यालम्बन च ज्ञान स्पष्टाभ **सर्वज्ञत्वं** चोच्यते। सर्वाज्ञानविगमात्। तस्मात् तत्त्वाभ्यासनिमित्ता स्फुटाभत्वबृद्धिरेव तत्त्वसाक्षात्करणेन प्रत्यक्षत्वकारिणी रागादियोग्यस्वभावता ज्ञानस्य बाधते। ततश्चान्यथादृष्टमपि **हेतुबला**दन्यथा भवेदपि(।)तेन यदि नाम[1] रागारहिते क्वचिद् वचन न दृष्टन्तावता सर्वत्र वीतरागे वचनेन न भाव्यमिति नास्ति निश्चय.। **ततश्चानिश्चितव्यतिरेकाद्** वचनमात्रान्न रागद्यनुमान। यत एवन्तेन कारणे**नैतद्युक्तम्वक्तुं मादृशो वक्ता**। योहमिवायोनिशोमनस्कारान्। तदेवाह। **रागोत्पत्ती**त्यादि। कः पुनरसावित्याह। **आत्मे**त्यादि। **आत्मदर्शनं** स त्का य दृ ष्टि.। नित्यसुखादिविपर्या[2]सोऽयोनिशोमनस्कार.। द्वन्द्वसमासश्चाय। आत्मदर्शनमेवायोनिशोमनस्कार इति विशेषण-

मान् रागोत्पत्तिप्रत्ययविशेषवेण युक्त आत्मदर्शनायोनिशोमनस्कारवस्त्वात्। तदा वक्ते (ति) अपार्थको वचनोदाहारः[2]। तस्माद् विपक्षेऽदृष्टिरहेतुः॥

न चादर्शनमात्रेण विपक्षेऽव्यभिचारिता।
संभाव्यव्यभिचा(र)त्वात्, स्थालीतंडुलपाकवत् ॥१५॥

न हि बाहुल्येन[3] पक्वानां दर्शनेऽपि स्थाल्यन्तर्गतत्वेन केवलेन पाकः सिध्यति। व्यभिचारदर्शनात्। एवं एवंस्वभावसमानपाकहेतुकाः पक्वा इति युक्तम्। अन्यथा तु तदनु[4]मानं शेषवद्व्यभिचारि॥

(क) शेषवदनुमाननिरासः

किं पुनः शेषवदिति।

यस्यादर्शनमात्रेण व्यतिरेकः प्रदर्श्यते।
(तस्य) संशयहेतुत्वाच्छेषवत् तदुदाहृतम् ॥१६॥

समासो वा। तदेति मादृशो वक्तेति विशेषणेप्यपार्थको वचनोदाहारः। वचनादित्यस्य हेतोरुदाहरणमनर्थकमित्यर्थ। तदा हि यो मादृशो रागोत्पत्तिप्रत्ययविशेषेण युक्त· स रागी। यथाहमित्ययमेव हेतु स्यात्। यत एवमदर्शनमात्रा[3]न्नास्ति निश्चयस्तस्माद् विपक्षेऽदृष्टिर्विपक्षे हेतोरदर्शनमहेतुर्लिङ्गस्य व्यतिरेकनिश्चय प्रति॥

स्यान्मति (।) विपक्षदृष्टचा हेतोर्व्यभिचारो न च वीतरागे वचन दृष्टन्त-स्माददर्शनात् साध्याभावे व्यतिरेकः सिद्ध इत्यत आह।

न चादर्शनमात्रेगेति विपक्षे हेतोरव्यभिचारिता। कस्मात् (।) सम्भाव्य-व्यभिचारत्वात्। सम्भाव्यो व्यभिचारो यस्य स तथा तद्भावस्तस्मात्[4]। यद्यपि न दृष्टो विपक्षे तथापि तत्र सम्भवो न विरुद्ध इति सम्भाव्यते व्यभिचारः। स्थाल्यन्तर्गतास्तण्डुलाः स्थालीतण्डुलास्तेषा पाकवत्।

एतमेव दृष्टान्त समर्थयितुमाह। न हीत्यादि। बाहुल्येन स्थाल्यन्तर्गतानां पक्वानान्दर्शनेपि न स्थाल्यन्तर्गतत्वेन केवलेन पाकः सिध्यति। मात्रग्रहणन्तु विशेष-निरासार्थ। यद् वक्ष्यत्येवन्तु स्यादिति। कुतोऽ[5]सिद्धिर्व्यभिचारस्य दर्शनात्। एवं-स्वभावा इति ये पक्वा दृष्टास्तैस्तुल्यस्वभावा·। एतैरेव पक्वैः समानः पाकहेतुर्येषान्तें पक्वा इति। अन्यथा त्वित्यसत्ये तस्मिन् विशेषणे। शेषोस्तीति शेषवदनिर्णीतो विषयोस्तीति यावत्। तच्च व्यभिचारि॥

किन्नै या यि को क्त कार्यात् कारणानुमानरूप शेषवदनुमानमिहाभिप्रेतम्ता-

तस्य स व्यतिरेकोऽनिश्चित इति विपक्षेऽपि वृत्तिराशङ्क्येत। व्यतिरेक-सिद्धयदर्शनमात्रस्य हि संशयहेतुत्वात्। न सर्वाऽनुपलब्धिरेव गमिका। तस्मा-देकनिवृत्याऽन्यनिवृत्तिमिच्छता तयोः स्वभावप्रतिबन्धोऽपि कश्चिदेष्टव्यः। अन्यथाऽगमको हेतुः स्यात्॥

(ख) त्रिरूपहेतुनिश्चय.

हेतोस्त्रिष्वपि रूपे(षु) निश्चयस्तेन वर्णितः।
असिद्धविपरीतार्थव्यभिचारिविपक्षतः॥१७॥ 426b

३—व्याप्तिचिन्ता

क दिग्नागेष्ट प्रतिबध·

न ह्यसति प्रतिबन्धेऽन्वयव्यतिरेकनिश्चयोऽस्ति। तेन तमेव दर्शयन् निश्चय-

---

न्यदेवेति पृच्छति। **किं[6]पुनरित्यादि**। शेषवत्स्वरूपमाह। **यस्येत्यादि**। **यस्य** हेतोर-**दर्शनमात्रेण**।प्रमाणकेन विपक्षव्यतिरेकः **प्रसाध्यते**। **तस्य** हेतो. **संशयहेतुत्वात्** सशयकारित्वाच्छेषवत्तदनुमानमुदाहृतं। किङ्कारणन्तस्य हेतो **स व्यतिरेकोऽनिश्चित इति विपक्षेपि वृत्तिराशंक्येत**। किपुनर्न निश्चित इत्याह। **व्यतिरेकेत्यादि**। अनुपलम्भेपि कथ सश[7]य इत्याह। **न सर्वेत्यादि**। दृश्यानुपलब्धिरेव **न गमिका**। 53a यत एवन्नादर्शनमात्राद् व्यतिरेकस्तस्मादेकनिवृत्त्या साध्यनिवृत्त्यान्यनिवृत्तिसाधन-निवृत्तिमिच्छता **तयोः** साध्यसाधनयो **कश्चित्** स्वभावेन **प्रतिबन्धस्तादात्म्यत-दुत्पत्तिलक्षणोप्येष्टव्यः**। न केवलमदृष्टिमात्र। **अन्यथा** प्रतिबन्धानिष्टावगमको **हेतुः स्यात्**। व्याप्तेरनिश्चितत्वात्॥

यत एवन्तेन कारणेन **हे[1]तोस्त्रिष्वपि रूपेषु** पक्षधर्मान्वयव्यतिरेकेषु **निश्चयो वर्णितः**। आचार्य दि ग्ना गे न प्र मा ण स मु च्च या दिषु। **असिद्धस्तु** द्वयोरपि साधनमित्यादिना। कस्य निरासेनेत्याह। असिद्धेत्यादि। **आद्यादित्वात्** तृतीयार्थे तसि विपक्षेणेत्यर्थ.।

तत्रासिद्धविपक्षेण पक्षधर्मत्वनिश्चयो वर्णित। **विपरोतार्थाविरुद्धस्तस्य** विपक्षेणान्वयनिश्चय। **व्यभिचार्यनै[2]कान्तिकस्तस्य** विपक्षेण व्यतिरेकनिश्चयः॥

अन्वयव्यतिरेकनिश्चय च वर्णयता प्रतिबन्धोप्यर्थतो दर्शित एव। **यस्मान्न ह्यसति प्रतिबन्धेऽन्वयव्यतिरेकनिश्चयोस्ति** (।) **तेन** कारणेन **तमेव** तादात्म्य-तदुत्पत्तिलक्षण प्रतिबन्धन्दर्शयन्नाक्षिपन्निश्चयमाह। यस्य दोषस्य निराशे (?से)

माह। तत्रान्वयनिश्चयेन विरुद्धतत्पक्ष्याणां[1] निरासः। व्यतिरेकस्यानिश्चयेन तत्पक्षशेषवदादेः॥

(प्रसिद्धस्तु) द्वयोरिति हि एकत्र सिद्धस्य प्रतिषेधः। प्रसिद्धवचनेन शेषवदसाधारणयोः सपक्षविपक्षयो[2]रपि असन्देहः।

अन्यथाऽसति प्रतिबन्धे विपक्षेऽदर्शनमात्रेण व्यतिरेके हि।

व्यभिचारिविपक्षेण वैधर्म्यवचनञ्च यत्।

यदुभयं विरुद्धानैकान्तिकप्रति[3]पक्षेण वक्तव्यमिति तच्च वैधर्म्यवचनं ऐ(?अनै)कान्तिकप्रतिपक्षेण॥

यद्यदृष्टिफलन्तच्च

यदि तेन (वैधर्म्यवचनेन विपक्षे) ऽदर्शनं ख्याप्यते

न यो निश्चय उक्तस्त व्याचष्टे। तत्रेत्यादि। **विरुद्धतत्पक्ष्याणामिति** विरु[3]द्धाना विरुद्धपक्ष्याणा च विरुद्धपक्ष्या येषा सत्त्व विपक्षे निश्चित सपक्षसत्त्व सन्दिग्ध। सन्दिग्धानैकान्तिका एवैते परप्रसिद्ध्या त्वेवमभिधान। **व्यतिरेकस्यानिश्चयेने**ति प्रकृतेन सम्बन्ध। अनैकान्तिकस्य निरास इति सम्बन्ध.। तेनायमर्थ साधारणानैकान्तिकस्येति। **तत्पक्षस्य** च। अनैकान्तिकपक्षस्य च। **शेषवदादेः**। आदिशब्दात् सपक्षवि[4]पक्षयोस्सन्दिग्धस्य निरास.। यस्य सपक्षसत्त्व विपक्षे चादर्शनमात्राद् व्यतिरेकस्तच्छेषवत्।

प्रसिद्धस्तु द्वयोरित्या चा र्य ग्रन्थमिदानी व्याचष्टे। **द्वयो**रित्यादि। द्वयोरित्य नेनैकस्य वादिन प्रतिवादिनो वा य **सिद्धस्तस्यप्रतिषेध** (।) **प्रसिद्धवचनेन** सन्दिग्धयो **शेषवदसाधारणयोः** प्रतिषेध इति सम्बन्ध. (।) क्व सन्दिग्धयोरित्याह। **सपक्षवि[5]पक्षयो**रपीति **शेषवतो**ऽसपक्षसन्देह। **असा**धारणस्य तु सपक्षविपक्षयो। तस्मान्निश्चयवचनादा चा र्ये णा पि प्रतिबन्ध इष्ट एव॥

अन्यथाऽसति प्रतिबन्धे साध्यसाधनयो·। **विपक्षेऽदर्शनमात्रेण व्यतिरेके** आचार्येणेष्यमाणे। **व्यभिचारिविपक्षेणानैकान्तिकप्रतिपक्षेण वैधर्म्यवचनं च यत्** प्रतिज्ञातन्तदपार्थकमित्याकूत।

क्व पुनराचा[6]र्येण प्रतिज्ञातमित्याह। **यदे**त्यादि। न्या य मु खे चैतदुक्त **यदुभयं वक्तव्य**मिति साधर्म्य वैधर्म्य च। कस्य प्रतिपक्षेण किमुक्तमित्याह **विरुद्धे**त्यादि। साधनस्य वचन **विरुद्धप्रतिपक्षेण वैधर्म्यवचनमनैकान्तिकप्रतिपक्षेण यद्यदृष्टिफलन्तच्च**। अदर्शनमात्रफलन्तच्चेति **वैधर्म्यवचनं**।

तदनुक्तेपि गम्यते ॥१८॥

न हि तस्य प्राक् दर्शनभ्रान्तिर्या वचनेन निवर्त्यते। स्मृतिः वाचाऽदर्शने क्रियत इति चेत्। दर्शनमप्रतीयमानं नाङ्गमिति युक्तं तत्र स्मरणाधानम्। अदर्शनन्तु दर्शना[5]भावः। स दर्शनेन बाध्यते। तदभावे सिद्ध एव इत्यपार्थकं तत्सिद्धये वचनं।

एतदेव व्याचष्टे। **यदीत्यादि। तेनेति वैधर्म्यवचने[7]न विपक्षे हेतोरदर्शनं** 23b
ख्याप्यते। तदित्यदर्शनमनुक्तेपि वैधर्म्ये **गम्यते।** दर्शनाभावलक्षणस्यादर्शनस्य वैधर्म्यवचनात् प्रागपि सिद्धत्वात्। तस्मादपार्थकम्वैधर्म्यवचन।

हेतोर्दर्शनभ्रान्तिर्विपक्षेस्ति तन्निवृत्यर्थम्वैधर्म्यवचनमिति चेदाह। **न ही-**त्यादि। **तस्येति** प्रतिपाद्यस्य वैधर्म्यवचनात् **प्राक्।** हेतोर्विपक्षे **दर्शनभ्रान्ति-**रस्ति **या** वैधर्म्य**वचनेन निवर्त्यते।** तस्मादेतद् यथा[1] सपक्षे हेतोर्दर्शने न भ्रान्तिः किन्तु तद्विस्मृतमिति साधर्म्यवचनेन स्मर्यते। तथा **स्मृतिर्वाचा** वैधर्म्यवचने-**नादर्शने क्रियत इति चेत्।** दृष्टान्तमेव विघटयितुमाह। **दर्शन**मित्यादि। **दर्शनमप्रतीयमानमस्मर्यमाण न** साध्यप्रतिपत्त्यङ्गमिति **युक्तन्तत्रेति** दर्शने **वाचा स्मरणाधानं** स्मृतिजनन। अदर्शनार्थन्तु न युक्त। यस्माद**दर्शनन्तु दर्शनाभावो** हेतो[2]र्विपक्षे। **स दर्शनेन बाध्यते। तदभावे** विपक्षदर्शनाभावे **सिद्ध एव** दर्शना-भाव **इत्यपार्थकन्तत्सिद्धये** दर्शनाभावसिद्धये वैधर्म्य**वचनं।** अयमभिप्रायो दर्श-नम्परोक्षत्वाद् विस्मर्येतेति तत्स्मरणार्थम्वचन युक्त। दर्शनाभावस्तु दर्शननिवृ-त्तिरूपः स च दर्शनानुभवाभावादेव प्रतिभासते (।) प्रतिभासमानस्य च कि स्मर-णेन। **तत्सिद्धयेऽपार्थकम्वचन ॥**[3]

न वै अनुपलभमानस्य पुंसस्तावतेत्यदर्शनमात्रेण विपक्षे हेतुर्नास्तीत्येव निश्चयो भवति देशादिविप्रकृष्टानामनुपलम्भेपि सत्त्वात्। तदर्थन्नास्तीति निश्चयोत्पादनार्थम्वैधर्म्यवचनमिति चेत्तन्न। यस्मान्न च नास्तीति वचनाद-प्रमाणकात् तत्प्रतिक्षिप्यमाण नास्त्येव। कथन्तर्हि नास्तीति गम्यत इत्याह। **यथेत्यादि।**

एतदुक्तम्भवति। हेतो स्वसाध्ये प्रतिबन्धग्राह[4]कमेव प्रमाण साध्यायत्तता-ग्राहकन्तच्चेह दर्शनमभिप्रेत यच्च साध्य एव हेतोर्दर्शनमिदमेव सर्वत्र विपक्षेऽदर्शन। **तेन यस्य साध्यसाधनयो प्रतिबन्धग्राहकं दर्शन प्रवृत्तम्विस्मृत च तस्यैव पुस-दर्शनादर्शनयोः प्रतीतयोः साधर्म्यवैधर्म्यवचनाभ्या स्मरण क्रियते नान्यस्येत्यर्थः। यदाह** (।) **प्रमाणं दृष्टान्ताभ्यामुपदर्श्यत** इति। यथा यदि नास्ति स [5]ख्याप्यत

यद्यनुपलभमानो तन्मात्रान्नास्तीति असत्ता तेन ख्यापयतीति।

न च नास्तीति वचनात् तन्नास्त्येव यथा यदि।
नास्ति, (स) ख्याप्यते न्यायस्तदा नास्तीति गम्यते ॥१९॥

यद्यनुपलम्भादभाव इति चेत् अप्रतीतौ वचनेनापि अप्रतीतिरेव स्यात् सापि अनुपलब्धिरेव वचनम्[7]।

427a **न चैकानुपलम्भोऽन्याभावं साधयति, अतिप्रसङ्गात्। न च तेन नास्तीति वचनात् तथा भवति, अतिप्रसङ्गात्।[1] तत् कथं वैधर्म्यवचनेनानैकान्तिकपरिहारः तस्माद् व्यावृत्तिमिच्छता तत्र न्यायो वक्तव्यो यतोऽत्र व्यावृत्तमिति निश्चयं भवति॥**

ननु तदभावेऽनुपलम्भात् असिद्धा व्यावृत्तिरिति[2]।

इति। यथा येन प्रकारेण स्वसाध्यप्रतिबन्धेन विपक्षे हेतुर्नास्ति यदि स न्याः इति प्रतिबन्धग्राहक प्रमाण ख्याप्यते स्मर्यते तदा नास्तीति गम्यते। न तु प्रतिबन्धमन्तरेण (।)

यदीत्यादि प्रथमं कारिकाभागमाह। **यद्यनुपलभमानोनुपलम्भमात्रान्नास्ती**ति न प्रत्येति तदा वैधर्म्यवचनादप्यप्रमाणकान्न प्रत्येष्यति। यस्मात्तदपि वैधर्म्यवचनत्व[6]ता(?) **तेनानुपलम्भमेव ख्यापयति** नाधिकम्विशेष।

स्यान्मत। साध्याभावकृतो हेत्वभावो वैधर्म्यवचनेन ख्याप्यते ततोसि विशेष इत्यत आह। **न चैकेत्यादि। एकानुपलम्भ** इति साध्यानुपलम्भ। अन्या **भावं** साधनाभाव। असति प्रतिबन्ध इति भावः। **अतिप्रसंगादिति** प्रतिबन्धमन्तरेण निवृत्तौ गोनिवृत्त्याप्यश्वस्य नियमेन निवृत्तिः स्यात्।

24a अथ मतम् (।) आचार्यदि[7] ग्ना गे न "विपक्षे हेतुर्नास्ती"त्युक्तमत एव निश्चय इत्यत आह। **न चेत्यादि। तेना** चा र्ये ण **नास्तीति** यद् वैधर्म्य**वचनं** कृत तस्मात्तथ **भवति** वस्तुनो नास्तित्वमेव भवत्यतिप्रसङ्गात्। तद्वचनस्य हि प्रामाण्ये प्रतिज्ञामात्रादपि साध्यसिद्धिः स्यात्। **तदिति** तस्मात् **कथम्वैधर्म्यवचनेनानैकान्तिकपरिहारः**(।)नैव। **तस्माद्** विपक्षाद्धेतोर्**व्यावृत्तिमिच्छता तत्र** व्यावृत्तौ **न्यायो वक्तव्यः** सा[1]ध्यसाधनयो. प्रतिबन्धग्राहक प्रमाण **यत** इति न्यायात्। **अस्ये**ति प्रतिपाद्यस्य **साधन व्यावृत्तिमिति निश्चयो भवति॥**

नन्वित्यादि परः। **तदभावे** साध्याभावेऽनुपलम्भात्(ऽ)**सिद्धा** व्यावृत्तिर्हेतो रयमेव न्याय इति मन्यते। **यद्यदृष्टचा** हेतोर्विपक्षान्**निवृत्तिः स्यात्तदा** शेषवदनुमा **व्यभिचारि किं**। नैव व्यभिचारि स्यात् (।) कीदृश पुनस्तदित्याह। यथेत्यादि

यद्यदृष्ट्या निवृत्तिः स्याच्छेषवद् व्यभिचारि किम् ।

यथा एतानि फलानि पक्वानि (एवं) रसानि च मधुराणि। रूपाविशेषाद् एकशाखाप्रभवत्वाद् वा उपयुक्तवद् ।[3] अत्रापि विवक्षितस्याशेषस्य पक्षीकरणे साध्याभावे हेतोरनुपलम्भोस्तीति कथं व्यभिचारः? प्रत्यक्षबाधाशंका एव व्यभिचार इत्येके। न ।[4] पक्षीकृतविषयेऽभावात्। अथ चेत् स्यात्। तथाऽति-प्रसङ्गः। अन्यत्राप्यभावनियमाभावात्, वृत्तं प्रमाणं बाधकम्। अवृत्तबाधने[5] सर्वत्रानाश्वासः।

एतानि फला[2]नीत्युपयुक्तादन्यानि। अय च धर्मिनिर्देशः। पक्वान्येवं रसानि चेति साध्यधर्मः। एव रसानि मधुराण्यम्लानि वा। रूपाविशेषादिति हेतु । उप-युक्तस्य फलस्य यद्रूप रक्ततादि। तेन तुल्यत्वात् । एकशाखाप्रभवाद्वेति हेतु । उपयुक्तवदिति दृष्टान्त । कस्माददर्शनमात्राद् व्यतिरेक इष्यमाणे शेषवतो-व्यभिचारित्व स्यादित्याह। अत्रापीत्यादि। अत्र शेषवद[3]नुमाने विवक्षितं रूपविशेषादियुक्तमुपभुक्तादन्यत्फलन्तस्याशेषस्य पक्षीकरणे। हेतो रूपादिशेषा-दिकस्य साध्याभावेनुपलंभोस्तीति विपक्षाव्यावृत्तिरतश्चाव्यभिचारिता स्यात्। तथा हि यत् पक्षीकृत फल यच्चोपयुक्त सपक्षत्वेनोपात्तन्तद्व्यतिरेकेण विपक्षभूते तृतीये राशौ नास्ति यथोक्तस्य हेतोर्वृत्ति.।

प्रत्यक्षबाधेत्यादि। कदाचिदेकशाखाप्रभवस्यापि फ[4]लस्यापक्वस्यातद्र-सस्य वा प्रत्यक्षेणानुभवसम्भवात् **प्रत्यक्षबाधाशङ्का एव** शेषवतो **व्यभि-चार इत्येके** ई श्व र से न प्रभृतय । तदयमर्थो न केवलाभ्यामन्वयव्यतिरेकाभ्या हेतुर्गमक (, अ) पि त्वबाधितविषयत्वे सतीति। नेत्यादिना परिहरति। **पक्षीकृतो** यो**विषय** परोक्षस्तत्र प्रत्यक्षबाधाया **अभावात्**। न प्रवृत्तेन प्रत्यक्षेण बाधाशङ्का किन्तु कदाचिद् ग[5]न्धप्रत्यक्षबाधापक्ष इति चेदाह। **तथेत्यादि। तथा** कदाचित् प्रत्यक्षबाधा भवेदित्याशङ्कायामतिप्रसग । यस्मादन्यत्राभिमते हेतौ प्रत्यक्ष-बाधाया **अभावनियमाभावात्**। न हि सम्बन्धाभ्युपगमे परस्य बाधाशङ्का निवर्त्तत इति भाव । तस्मात् प्रतिबन्धानभ्युपगमवादिना **वृत्तं प्रमाणं बाधकमेष्टव्य। अवृत्तबाधनेऽप्रवृत्तेनैव** प्रमाणेन बाधने **सर्वत्रानाश्वा[6]सः** सर्वत्र हेतौ न स्यादाश्वासो गमकत्वनिश्चयः। बाधकस्य शक्यमानत्वात्। नैवं प्रतिबन्धवादिनः सर्वत्र हेतावा-नाश्वास. साध्यप्रतिबद्धे हेतौ बाधाशकाया अप्यभावात्। हेतुप्रयोगात्तु पूर्वं स्याद् बाधाशका (।) अत एव सन्दिग्धे हेतुवचनमुच्यते (।) न च वृत्त प्रमाण शेषवतो बाधकमस्ति। तस्मात् स्थितमेतद् अदर्शनमात्राद् व्यतिरेके शेषवतो[7]प्यव्यभि- 24b

व्यतिरेकः सिद्ध एव साधनं इति तथाभावनिश्चयमपेक्षते। अनुपलम्भात्तु क्वचित् अभावसिद्धावप्यप्रतिबद्धस्य तदभावे सर्वत्र[6] अभावासिद्धेः। संशयादव्यतिरेक एव शेषवद्व्यभिचारः ॥१९॥

किञ्च।

व्यतिरेक्यपि हेतुः स्यात्;

427b **नेदं निरात्मकं जीवच्छरीरं अप्राणादिमत्त्वप्र[7]सङ्गात्। निरात्मकेषु घटादिषु दृष्टादृष्टेषु प्राणाद्यदर्शनात्। तन्निवृत्त्या आत्मगतेः। अदृश्यानुपलम्भात् अभावासिद्धौ घटादे[1]र्नैरात्म्यासिद्धेः प्राणादेरनिवृत्तिः।**

चारित्व स्यादिति।

ननु प्रतिबन्धबलात् साध्याभावे हेतोर्व्यतिरेके सति सत्तामात्रेण व्यतिरेको गमक स्यादित्यत आह। **व्यतिरेकस्त्वित्यादि**। हेतोर्यो विपक्षाद् **व्यतिरेकः स सिद्ध एव** निश्चित एव **साधनं। इति** हेतोस्तथाभावनिश्चयं साध्याभावे यो हेत्वभावस्तन्निश्चयमपेक्षते। एतदाह (।) नास्माकम्भवतामिव दर्शनाभावमात्राद् व्यतिरेक.। किन्तु साध्यसा[1]धनयो. सति प्रतिबन्धे साध्याभावे हेतोर्विपक्षाद्व्यावृत्तत्व स्वगतो धर्म.। हेतोश्च यद्रूपन्तदवश्य स्वनिश्चयमपेक्षते ज्ञापकत्वादिति। कथ त्वन्मतेन शेषवतो व्यभिचारित्वमिति चेदाह। **अनुपलम्भात्त्वित्यादि**। **क्वचिद्विपक्षैकदेशे** हेतोरभावसिद्धावप्यप्रतिबद्धस्य हेतो साध्ये। **तदभावे** साध्याभावे **सर्वत्र** विपक्षेऽभावासिद्धेः कारणात् **संशयस्ततो** वि[2]पक्षाद**व्यतिरेको** य स **एव व्यभिचारः शेषवतः** (।)

किञ्चेति दोषान्तरसमुच्चय। यद्यदर्शनाद व्यतिरेकस्तदा **व्यतिरेक्यपि हेतुः स्यात्**। कीदृश **नेदं निरात्मक**मित्यादि। प्रसङ्गमुखेन चेदमुक्तम**प्राणादिमत्त्व-प्रसङ्गात्**। प्राणादिम त्वाच्च सात्मक। अय च हेतु सात्मके क्वचिन्न दृष्टो-निरात्मके**ष्व**श्च व्यावृत्त इति साध्यनिवृत्तौ निवृत्तिधर्माव्यतिरे[3]की कथ्यते। तथा हि **निरात्मके**ष्वात्मरहितेषु **घटादिषु दृष्टादृष्टेषु प्राणाद्यदर्शनात्** प्राणापानो-न्मेषनिमेषादर्शनात्। दृष्टेषु स्वभावानुपलम्भेनैवादर्शनं प्राणादीनामुपलब्धिलक्षण प्राप्तत्वात्। अदृष्टेष्वपि तज्जातीयतया। तेन नैरात्म्य प्राणाद्यभावेन व्याप्त। **जीवच्छरीरे** तु **तन्निवृत्त्या** प्राणादिमत्त्वाभावनिवृत्त्या नैरात्म्यस्य निवृत्ते**रात्मगतिः** स्या[4]त्। तव तर्हि कथ सशयहेतुरिति चेदाह। **अदृश्ये**त्यादि। **अदृश्यस्यात्मनो-नुपलम्भाद्** घटादिस्व(?ष्व)भावाप्रसिद्धौ घटादौ(ना)**ऽनैरात्म्यासिद्धेः** कार-णान्निरात्मकात् **प्राणादेरनिवृत्तिः**। प्राणाद्यभावेन सन्दिग्धस्य नैरात्म्यस्याप्य-

अभ्युपगमात् सिद्धमिति चेत्। कथमिदानीमात्मसिद्धिः। अन्यस्याअप्रमाणिका कथं नैरात्म्य सिद्धिः। अभ्युपगमेन हि सात्मका[2]नात्मकौ विभज्यतत्र भावेन गमकत्वं कथयताऽपि आगमिकत्वमात्मनि प्रतिपन्नं नानुमेयत्वम्। तस्मादृदर्शने[3]-नापि आत्मनो निवृत्त्यसिद्धे (नास्ति) कुतश्चित् तन्निवृत्तिः। निवृत्तावपि प्राणादीनां सम्बन्धाभावात् सर्वत्र निवृत्त्यसिद्धेः न गमकत्वम्॥

याऽप्यसिद्धियोजना "तथा सपक्षे[4] सन्नसन्नित्ये" वमादिष्वपि यथायोग-मुदाहार्यमित्येवमादि। साऽपि--

न वाच्याऽसिद्धियोजना॥२०॥

सिद्धिरिति यावत्।

बौद्धेन नैरात्म्यमभ्युगतमतोभ्युपगमान्निरात्मकत्व घटादे **सिद्धमिति चेत्।** यदि बौद्धाभ्युपग[5]म प्रमाण **कथमिदानीमात्मसिद्धिर्जीवच्छरीरे।** तदपि बौद्धेन निरात्मकमिष्ट। जीवच्छरीरे नैरात्म्याभ्युपगमोऽप्रमाणकस्ततोस्यात्मा साध्यत इति। यद्येव परस्यापि जीवच्छरीरा**दन्यस्या**पि घटादे**रप्रमाणिका कथं नैरात्म्य-सिद्धिः।** न हि **बौद्धस्याभ्युपगम** क्वचित्प्रमाण क्वचिन्नेति। कि चा**भ्युपगमेन केवलेन सात्मकानात्मकौ विभज्य**[6] घटादय परेणास्माभिश्चानात्मका अभ्यु-पगता.। तेनानात्मका। जीवच्छरीर सात्मकमस्माभिरभ्युपगतन्त्वया तु निरा-त्मकमेवम्विभज्य **तत्र** निरात्मकेषु प्राणादीनामभावे नात्मविषये **गमकत्वं कथयता** परेणा**गमिकत्वमात्मनि प्रतिपन्नं नानुमेयत्वं। तस्मा**दात्मनो घटादावदर्शनेप्य-दृश्यस्वभावस्या**त्मनो निवृत्त्यसिद्धेर्नास्ति कुतश्चिन्नि**[7]रात्मकात् प्राणादेर्निवृ- 25a
त्तिरित्यगमकत्व। एतत्तावन्नैवात्मन कुतश्चिन्निवृत्ति सिद्धा। अभ्युपगम्य तूच्यते। तन्निवृत्तावप्यात्मनिवृत्तावपि क्वचिदिति दृष्टे घटादौ **निवृत्तावापे प्राणा-दीनामप्रतिबन्धादात्मना सह सम्बन्धाभावात्। सर्वत्रादृष्टेष्वपि** घटादिष्वात्म-निवृत्त्या प्राणादीना **निवृत्त्यसिद्धेः** सन्दिग्धव्यतिरेकित्वाद्(न) **गमकत्व।**[1]

अदर्शनमात्राद् व्यतिरेकाभ्युपगमे सत्ययमपरो दोष इत्याह। **यापीत्यादि।** का पुन. सेत्याह। **तथा सपक्षे सन्नित्यादि।** आ चा र्य स्य चायड्ग्रन्थ। तत्र सन्दिह्युक्तम्पक्षधर्मो वादिप्रतिवादिनिश्चितो गृह्यते। तेनोभयोरन्यतरस्य चासिद्धस्य ग्धस्याश्रयासिद्धस्य च व्युदासः। यथा च पक्षधर्मनिश्चयेन चतुर्विधस्यासिद्धस्य **व्युदासस्तथा सपक्षे सन्न[2]सन्नित्येवमादिष्वप्यन्वयव्यतिरेकनिश्चयेन निरस्त-मसिद्धजातमन्यतरासिद्धादीना** सपक्षादिष्वसम्भवात्। **यथायोगमुदाहार्यमित्याह। सापि न वाच्या** असिद्धियोजना।

अनुपलम्भ एव सति संशयात् उपलम्भेऽभावात्। अनु[6]पलम्भाद् व्यतिरेक इति संशयितोऽनिवार्यः। यथायोग(मुदाहार्यमिति यथायोग)वचनात् अनिवारित एवेति चेत्। न। य एव तूभयनिश्चयवाचीत्यादि[6]भूतात्[1] तेनाऽनुपलम्भेऽपि संशयात् अनिवृत्ति मन्यमानः तत्प्रतिषेधमाह॥

किञ्च।

विशेषस्य व्यवच्छेदहेतुता स्याददर्शनात्।

428a श्रावणत्वस्यापि नित्यनित्ययोरदर्शनात् व्यावृत्त्या तद्व्यवच्छेदहेतुता स्यात्।

तद्व्याचष्टेऽनुपलम्भ एवेत्यादि। अप्रमाणकेनुपलम्भ एव सति हेतोर्विपक्षे सशयात् (।) कथमुपलम्भे तदसम्भवात्। विपक्षे हेतोरुपलम्भे सति तस्य सङ्गयस्याभावात्। तस्मा[3]दनुपलम्भाद्धेतोः विपक्षाद् व्यतिरेक इत्यर्थात् सन्दिग्धव्यतिरेको हेतुरिष्ट एव। तस्मात् संशयितोऽनिवार्यः। सशयेन विषयीकृतः सशयितो व्यतिरेको न वार्य. स्यात्।

यथायोगमुदाहार्यमित्यतो यथायोगवचनात् सशयितोऽनिवारित एवेति चेत। नैतदेव। तदनन्तरमेव "य एव तूभयनिश्चयवाची"त्यादि वचनात। य एव शब्द उ[4]भयनिश्चितस्य त्रैरूप्यस्यासिद्धत्वादेर्वाचक स एव साधन दूषण "न चान्यतरप्रसिद्धसन्दिग्धवाची पुन साधनापेक्षणादि"त्यय ग्रन्थ इहोदाहरण। अन्यतरस्य वादिन प्रतिवादिनो वा(।)योसिद्ध सन्दिग्धम्वा वक्ति न स साधन दूषण वा (।) सन्दिग्धव्यतिरेकनिश्चयहेतुरुभयोरपि विपक्षे सन्दिग्धस्तस्मात्तदभिधानमसाधनम्। यस्मादुभयनि[5]श्चित एव हेतुरुक्तस्तेनानुपलम्भेपि सति निवृत्तिसंशयाद् विपक्षाद्धेतोरनिवृत्तिं मन्यमानस्तस्य सन्दिग्धव्यतिरेकस्य •हेतुत्वप्रतिषेधमाह असिद्धियोजनया॥

किञ्च। यद्यदृष्ट्या निवृत्तिरिष्यते तदा विशेषस्यासाधारणस्य श्रावणत्वादेर्व्यवच्छेदहेतुता स्यात्। कि कारण (।) नित्यानित्ययोरदर्शनात्। तद् व्याचष्टे(।)श्रावणत्वस्यापीत्यादि। तथा ह्यदर्श[6]नमात्राद् व्यावृत्तिरिष्टा(।अ)स्ति च नित्यानित्ययोरदर्शन श्रावणत्वस्य तद्व्यवच्छेदहेतुता स्यात्। नित्यानित्यप्रतिषेधहेतुत्वम्भवेत्। यदि नामादर्शनात् ततो व्यावर्त्तेत श्रावणत्वन्तद्व्यवच्छेदहेतुत्वन्तु कुत इत्याह। न हीति। न तद्व्यावृत्तेरन्यद् व्यवच्छेदननित्यानित्यव्यवच्छेदनम्(।)तवापि कथ श्रावणत्वन्न व्यवच्छेदहेतुरिति चेदाह। अव्यवच्छे-

---

[1] Ḥbyun-baḥi-phyir-ro.

न हि तद्व्यावृत्तेरन्यद् व्यवच्छेदनम्। अव्यवच्छेदस्तु कुतश्चिद् व्यावृत्तेरेवानिश्चयाद्। क्वचिद् यत्र नास्तीति निश्चितः स भवन् कथं तदभावं न गमयेत्?

प्रमाणान्तरबाधा चेन्नेदानीं नास्तिताऽदृशः ॥२१॥

अथाऽपि उभयव्यवच्छेदे प्रमाणान्तरं बाधकमस्ति। अन्योन्यव्य[2]वच्छेदरूपाणां हि एकस्य व्यवच्छेदेन द्वितीयस्य विधानात् अप्रतिषेधः। विधिप्रतिषेधयो (र्युगपद्) विरोधादिति।

नेदानीं अदृशो नास्तिता। एवं सति अदर्शनं न प्रमाणं, बाधासम्भ[3]वात्।

ख आचार्यीयमतनिरास

तथान्यत्रापि संभाव्यं प्रमाणान्तरबाधनं।

दस्ति[7]त्यादि। कुतश्चिन्नित्यादनित्याच्चादर्शनमात्रेण व्यावृत्तेरेवानिश्चयात्। 25b
अनिश्चयश्चान्यतरत्र प्रतिबन्धानिश्चयात्। अवश्य चैतदेवमन्यथा यो हि धर्मो **यत्र नास्तीति निश्चितः स भवन् क्वचिद्** धर्मिणि **कथन्तदभावं यत्र नास्तीति** निश्चितस्तस्याभाव **कथं न गमयेत्।**

नित्यानित्याद् व्यावृत्तस्यापि श्रावणत्वस्योभयव्यवच्छेदे साध्ये **प्रमाणान्तरबाधा चेच्छक्येत।** अ[1]**थापीत्याद्यस्यैव** व्याख्यान। श्रावणत्वे**नोभयव्यवच्छेदे** नित्यानित्यव्यवच्छेदे साध्ये **प्रमाणान्तरं बाधकमस्ति।** तदाह। **अन्योन्येत्यादि। अन्योन्यव्यवच्छेदो रूप** येषान्ते तथा। तथा हि नित्यव्यवच्छेद एवानित्यत्वन्तद्व्यवच्छेद एव च नित्यत्वन्तथा भावव्यवच्छेद एवाभावोऽभावव्यवच्छेद एव च भाव। **तेषामेकस्य व्यवच्छेदेनान्यविधानात्।** द्वितीयस्य विरुद्धस्य[2]विधानादप्रतिषेधः।

एतदुक्तम्भवति। यदा हि श्रावणत्व नित्याद् व्यावृत्तमिति तद् व्यवच्छिद्यात्। तदेवानित्यत्वम्विदध्यात्। तदेव च तदनित्याद् व्यावृत्तमित्यनित्य व्यवच्छिद्यात्। नित्य च विधत्त इत्येकस्यैकदैव विधिप्रतिषेधौ स्याता तच्चायुक्तमिति **विधिप्रतिषेधयोर्युगपद्विरोधान्न** कस्यचिदपि प्रतिषेध.। प्रतिषेधविनिवृत्तिलक्षणो हि विधि.। विधिनिवृत्ति[3]रेव च प्रतिषेधस्तौ च परस्परविरुद्धौ युगपदेकस्य कथ स्याताम् (।) अतो न कुतश्चिदपि व्यावृत्तिनिश्चय. श्रावणत्वात्।

नेदानीमिति सिद्धान्तवादी। इदानीमिति बाधासम्भवे सति। **अदृशोऽ**दर्शनाद् विपक्षे हेतोर्नास्तिता। तस्मादेवं **सत्यदर्शनन्न प्रमाणम्बाधासम्भवात्।**

श्रावणत्व एवाप्रमाण भवतु नान्यत्र बाधाऽभावादिति चेदाह। **तथेत्यादि।** अन्य[4]त्रापि हेतोर्व्यतिरेकसाधनस्यादर्शनस्य **सम्भाव्यं प्रमाणान्तरबाधनं।** कुत.। **लक्षणेत्यादि।** हेतोर्विपक्षादर्शनव्यावृत्तिनिबन्धनमिति यल्लक्षणन्तेन युक्त श्राव-

तल्लक्षणयुक्ते बाधासम्भवे तल्लक्षणमेव दूषितं स्यादिति सर्वत्राऽनाश्वासः।

यद्ये(वम)नुमानविषये[4]ऽपि प्रत्यक्षानुमानविरोधदर्शनात् अनाश्वासप्रसङ्ग इति चेत्।

नैतदेवम्। यथोक्तेऽसम्भवात्। सम्भविनश्चातल्लक्षणत्वात्। यदि विरु[5]द्धाव्यभिचार्युक्तमिति। अनुमानविषयेऽवचनादिष्टम्। विषयोऽस्य निर्वेष्टव्यः[1] ॥२१॥

किंच।

दृष्टाऽयुक्तिरदृष्टेश्च स्यात् स्पर्शस्याविरोधिनी ॥२२॥

णत्वस्य यददर्शनन्तस्मिन्**बाधासम्भवे** सति **तल्लक्षणमेव** तस्य व्यतिरेकसाधनस्यादर्शनस्य सर्वविषयमेव लक्षण स्वरूप **दूषित स्यादिति सर्वत्रा**दर्शने व्यतिरेकसाधने[5]**नाश्वासः**। न गमकत्वनिश्चय ॥

यद्येवमनुमानविषयेपि क्वचित् प्रत्यक्षानुमानविरोधदर्शनात्(।)तथा हि नित्य शब्द श्रावणत्वाच्छब्दत्ववदिति कृते नित्यत्वमनुमानेन बाध्यते। एवमश्रावण शब्दः सत्त्वाद् घटवदिति प्रत्यक्षेण। ततश्च सर्वत्र तदवशिष्टलक्षणेनानुमानेप्यनाश्वासप्रसंग **इति चेत्।**

नैतदेव। यथोक्त इति कार्यस्वभा[6]वानुपलम्भजेङ्गजेनुमाने प्रत्यक्षानुमानविरोधस्याभावात्। प्रत्यक्षादिविरोधसम्भविनश्चातल्लक्षणत्वात् तदनुमानालक्षणत्वात्। **यदि** यथोक्तलक्षणेऽनुमाने नास्ति बाधा तदा हेतुलक्षणयुक्त परस्परविरुद्धार्थसाधक हेतुद्वयमेकस्मिन् धर्मिण्यवतीर्ण**म्विरुद्धाव्यभिचार्युक्तमा** चा र्ये
26a ण तस्यावच[7]नमिति चेत्। अनेनाभ्युपेतहानिमाह। **अनुमानविषये** विरुद्धव्यभिचार्य**वचनादिष्टमेवे**ति कुतोभ्युपेतहान। क्व तर्ह्याचार्येणोक्त इत्याह। **विषय** चेत्यादि। अस्य विरुद्धाव्यभिचारिण। **किंचे**त्यादि। इह **वै शे षि** के ण वायो. सत्त्वसाधनार्थं "**स्पर्शश्च** न च दृष्टानामि"ति सूत्र[2]मुक्त। अस्यायमर्थ. (।) यो गुण· स द्रव्याश्रयी तद्यथा रूपादि। अपाक[1]जानुष्णाशीतस्पर्शश्च गुणस्तस्मात्तस्याश्रयभूतेन द्रव्येण भवितव्य। न चाय दृष्टाना पृथिव्यादीना गुणस्तेषा पाकजानुष्णाशीतस्पर्शादिगुणत्वात्। ततो यस्याय गुण. स वायुर्भविष्यतीत्युक्ते वैशेषिकेण। तत्राचार्य दिङ्ना गे नोक्त(।) यद्यदर्शनमात्रेण दृष्टेभ्यः प्रतिषेध क्रियते न च सोपि युक्त इति (।) यदेतदुक्तन्तद् विरुध्यत इति वा त्ति[2] क का रो दर्शयन्नाह। **दृष्टेत्यादि**। यद्यदृष्ट्या निवृत्ति **स्यात्** तथाऽदृष्टेरदर्शनात् कारणाद्

---

[1] Bstan-pai-bya. [2] Vaiśesikasūtra 2 : 9.

यदि[6] **अनुपलम्भाद् निवृत्तिसिद्धिः स्याद्। यदि अदर्शनमात्रेण दृष्टेभ्यः प्रतिषेधः क्रियते न च सोऽपि युक्त इति य उक्तः (स) कथमयुक्तः। अनुपलम्भाद-भावसिद्धेः।**[7]

ननु स्पर्शवचनलक्षणस्य युक्त एव प्रतिषेधः। 428b

न युक्तः। दृश्यतत्स्वभावविषयमात्रेऽप्रतिषेधात्।[1] **यावता पृथिव्यादि (सामान्येन) गृहीत्वा प्रतिषेधमाह। तत्र तूलोपलपल्लवादिषु तद्भावेऽपि स्पर्शभेददर्शनात्। अस्यापि क्वचिद् विशेषे सम्भवाशंकया भवितव्यमिति सर्वत्र अदर्शनमात्रेण अयुक्तः**

अपाकजस्यानुष्णाशीतस्पर्शस्य **दृष्टाऽयुक्तिः**। दृष्टेषु पृथिव्यादिष्वसङ्गतिर्या वर्णिता वैशेषिकैर्यस्या आचार्येणायुक्तत्वमुक्त सा स्याद् **अविरोधिनी** युक्तैव स्यादित्यर्थ ।

तद्व्याचष्टे। **यद्वीत्यादि**। यदाहाचार्य । वायुप्रकरणे **यद्यदर्शनमात्रेण दृष्टेभ्यः** पृ[3]थिव्यादिभ्य स्पर्शस्य **प्रतिषेधः क्रियते** वै शे षि के ण **न च सोपि युक्त** इति। यद्याचार्यस्याप्यदर्शनमात्रेण व्यतिरेकोभिमतस्तदा **कथमयुक्तः** स्पर्शस्य प्रतिषेधो युक्त एव स्यात्। कि कारणम् (।) अत्रापि हेतोर**नुपलम्भाद्भावसिद्धेर**भ्युपगमात्।

नन्वित्यादि पर । उपलब्धिलक्षणप्राप्ते कारणाद् अपाकजस्यानुष्णाशीत-**स्पर्शस्यानुपल**[4]**भ्यमानस्य** पृथिव्यादिषु **युक्त एव प्रतिषेधः**।

न युक्त इति सिद्धान्तवादी। कि कारण (।) य पृथिव्यादिरनुष्णाशीतादन्येन स्पर्शेन युक्त प्रत्यक्ष स दृश्य । अन्यत्र च देशादावप्रत्यक्षोपि तथाभूतस्पर्शयुक्त एव पृथिव्यादिस्तत्स्वभाव । **दृश्यश्च तत्स्वभावश्चेति** द्वन्द्व । तदेव **विषयः** स एव तन्मात्र "सुप्सुपेति" समास । तस्मिन्न**प्रतिषेधात्** स्पर्श[5]स्य। तत्र हि प्रतिषेधे स्यादेव **निश्चयः यावता पृथिव्यादिर्धर्मिभूत सामान्येनाविशेषेणैव गृहीत्वाऽयम्वै-**शे षि क स्पर्शस्य **प्रतिषेधमाह**। यत्किचित् पृथिव्यादि तत्सर्वमनुष्णाशीतस्पर्श-रहितमिति। न च पृथिव्यादिमात्रे स्पर्शस्योपलब्धिलक्षणप्राप्तिरस्ति। न चैक-स्पर्शनियम पृथिव्यादीना यतस्तत्र पृथिव्यादिसामान्ये **तूलोपलपल्लवा**[6]**दिषु** भेदेषु **तद्भावेपि** पृथिव्यादिभावेपि **स्पर्शभेददर्शनात्**। तथा हि तूलस्यान्य स्पर्श-श्लक्ष्णत्वलक्षणोन्यश्चोपलादे कर्कशत्वादिलक्षण । **अस्यापीत्यनुष्णाशीतस्पर्शस्य क्वचित्** पार्थिवद्रव्यविशेषे **सम्भवाशंकया भवितव्यमिति** कृत्वा **सर्वत्र** पृथिव्या-

---

[1] Tsam-la-sogs-pa ? = Tsam-la-hgogs-pa.

प्रतिषेधः।

एवमाचार्यीयः कश्चित् अनुपलम्भाद्[2] अभावं ब्रुवाण उपालब्धः।

अपि च।

देशादिभेदाद् दृश्यन्ते भिन्ना द्रव्येषु शक्तयः।
तत्रैकदृष्ट्या नान्यत्र युक्तस्तद्भावनिश्चयः ॥२३॥

दावदर्शनमात्रेणानुष्णाशीतस्पर्शस्यायुक्तः प्रतिषेध ।

26b यत्तूच्यते (।) सर्वत्र पृथिव्यादेस्तुल्य[7]त्वात्तुल्य एवानुष्णाशीतस्पर्शो यस्तु पृथिव्यादिभावेपि श्लक्ष्णत्वादिभेद स पृथिव्यादिपरमाणुसयोगस्य निविडानिविडकृतत्वादिति ।

तदयुक्तम् (।) अनिविडाना हि नैरन्तर्याभावात् सयोगाभाव । तेन यथोपलपरमाणूना सयोगस्य निविडत्वन्तथा तूलपरमाणूनामिति कथ श्लक्ष्णत्वादिभेद स्यात्। तस्माद् सत्यपि सयोगे स्वरूपेणान्यादृ[1]शा एवौपलपरमाणवोन्यादृशाश्च तूलपरमाणवस्तत्कृत एव च श्लक्ष्णत्वादिभेद । न सयोगनिविडानिविडकृत । तथा च यथा पृथिव्यादिभेदात् स्पर्शस्य श्लक्ष्णत्वादिभेदस्तथानुष्णाशीतभेदोपि सम्भाव्येत ।

ननु माभूद् अदृष्टविषये वाय्वनुमान दृष्टविषये त्वनुष्णाशीतस्पर्शस्य दृश्यस्य पथिव्यादिसम्बन्धित्वेनानुपलभ्यमानत्वा[2]त् ततो वाय्वनुमान स्यात् ।

एवम्मन्यते। यदि स्पर्शादिर्गुणरूपता सिद्धा स्यात् ततो वायुद्रव्यानुमान स्यात् सैव त्वसिद्धा। स्वातन्त्र्येण प्रतीते स्पर्शविशेष एव चास्माकम्वायुरुच्यते। आचार्य दि ग्ना गे न तु स्पर्शव्यतिरिक्त वायुमभ्युपगम्य तत्र परकीयमनुमानमयुक्तमुक्तमित्यदोष· ।

तस्मात् स्थितमेतद् (।) अन्वयव्यतिरेकयोर्निश्चयमदर्श[3]नमात्राच्च प्रतिषेधाभाव ब्रुवताचार्येणेष्ट· प्रतिबन्ध इति ॥

कस्तर्ह्येवमुपालब्ध इति चेदाह। **एवमित्यादि**। एवमित्यनन्तरोक्ताभिरुपपत्तिभि । आचार्यस्य शिष्य आ चा र्यी य कश्चिदाचार्यग्रन्थानभिज्ञः **अनुपलम्भाद् अभावं ब्रुवाण उपालब्धः।**

अपि चेत्यदर्शनमात्रेणाभावाभ्युपगमे प्रत्यक्षबाधा दर्शयितुमाह। देशादि[4]-भेदात्। आदिशब्दात् कालसस्कारभेदात्। **भिन्ना** नानारूपा **दृश्यन्ते द्रव्येष्वेक**-जातीयेष्वपि **शक्तयो** रसवीर्यविपाकादिलक्षणा । तत्रेत्यनेकशक्तिषु द्रव्येष्वेकदृष्ट्या एकस्वभावस्य द्रव्यस्य क्वचिद् दर्शनान्नान्यत्रापि देशादौ **युक्तस्तद्भावनिश्चयः।**

यदि (एवं) विपक्षे[3]ऽदर्शनमात्रेणाऽप्रतिबद्धस्याऽपि तदव्यभिचारः। क्वचिद् देशे कानिचिद् द्रव्याणि कथंचिद् दृष्टानि अन्यत्र अन्यथाऽपि दृश्यन्ते। यथा ओषधयः काश्चन क्षेत्रविशेषाद् विशिष्टरसवीर्यविपाका[4] भवन्ति नान्यत्र। तथा कालसंस्कारभेदाद् अपि। न च तद्देशैः तथा दृष्टा इति सर्वाः तत्त्वेन तथाभूताः सिध्यन्ति। गुणान्तराणां कारणान्तरापेक्षत्वात्। विशेषहेत्वभावे तु स्याद् अनुमानम्। अदृष्टकर्तृकमपि पुरुषसंस्कारपूर्वकम्। वाक्येषु विशेषाभावात्।[6] सर्वप्रकाराणां पुरुषैः कारणदर्शनात्। सर्वेषु गुणेषु विशेषस्य दर्शनात्। नैव सम्भ-

---

यथापरिदृष्टद्रव्यस्वभावनिश्चय ।

यदीत्यादिनैतदेव व्याचष्टे । **यदि विपक्षे** हेतोर्द[5]र्शनमात्रेणाप्रतिबद्धस्य स्वसाध्ये **तदव्यभिचारः** साध्याव्यभिचार इष्यते। तदैकत्र दृष्टस्य द्रव्यस्य यद् रूपमुपलब्धन्तत्तस्यान्यत्रापि द्रव्यसामान्यादनुमेय स्यात् । अस्ति हि तत्रापि तत्काल हेतोर्विपक्षेऽदर्शनमात्र ।

न चेद युक्त। यस्मात् **क्वचिद् देशे कानिचिद् द्रव्याणि कथंचिद् दृष्टानि** प्रतिनियतरसादित्वेन। पुनरन्य**थे**[6]ति यथादृष्टाकारवैपरीत्येनान्**यत्र** देशे **दृश्यन्ते**। **यथे**त्यादिना विषयमाह। वीर्यन्दोषापनयनशक्ति (।) परिणामो विपाक । **विशिष्टा रसवीर्यविपाका** यासामिति विग्रह । **नान्यत्रे**ति क्षेत्रविशेषादन्यत्र। **यथा** देश**विशेषात् तथा कालसस्कारभेदाद् विशिष्टरसवीर्यविपा**का भवन्ति। सस्कार क्षीराद्यवसेक । **न च तद्दे**[7]**शै**रिति प्रदेशो येषा पुरुपाणान्तैस्त**था**विशिष्टरसा- 27a
दियुक्ता **दृष्टा इति** कृत्वा **सर्वा** अतद्देशा अपि **तत्त्वेन** तुल्यरूपादित्वेन **तथाभूता** यथागृहीतस्वभावतुल्या **सिध्यन्ति**। कि कारण (।) **गुणान्तराणा** रसादिविशेषाणा **कारणान्तरापेक्षत्वात्। विशेषहेत्वभावे तु स्यादे**कस्वभावता**नुमानं। अदृष्टः कर्त्ता** यस्य वैदिक**स्य** तत्तथा। **तदपि पुरुषसंस्कारपूर्वकं** पुरुषप्रयत्न[1]हेतुक। एतच्च साध्यफल। **वाक्येषु** पौरुषेयापौरुषेयत्वेनाभिमतेषु **विशेषाभावाद**नेन हेतु कथित । प्रयोगा पुनर्यद्वस्तु यदभिन्नस्वभावन्त (त्त) त्समानहेतुक (।) यथैको धूमो धूमान्तरसमानजातीय । पौरुषेयवाक्याभिन्नस्वभावानि चापौरुषेयाभिमतानि वाक्यानीति स्वभावहेतु । न चासिद्धो हेतु । तथा हि यै प्रकारैर्विषाद्यपनयनादिति वैदिकाना विशेष[2] इष्यते। तेषा **सर्वप्रकाराणां पुरुषैः कारणदर्शनात**। तथा हि श ब रा दिमन्त्राणामपि विषाद्यपनयनादयो दृश्यन्ते।

यदि शब्दस्वभावसाम्याददृष्टकर्तृकस्यापि पौरुषेयत्वमनुमीयते। एवन्तर्हि स्वचित्तसन्ततिदर्शनात् सर्वे चित्तधर्मा ज्ञाता (।) तेन यावद् बोधरूपन्तावत्

429a **वद्विशेषहेतवः पुरुषा येन वचनादेः किंचिन्मात्रसाधर्म्यात्[7] सर्वाकारेण साम्यमनुमीयेत। संस्कारविशेषेण विशेषप्रतीतेः। तद्वत् अन्यस्यापि सम्भवात्। असम्भवे त्वनुमातव्ये हेत्वभावात्। वैराग्यस्यादृष्टत्वात्। अदृ[1]ष्टेन च बाध्यबाधक-**

पञ्चेन्द्रियाश्रित सविकल्पक च सर्व च रागादिजननवासनागर्भ यथेदानीन्तथानागताव[3]स्थायामपि यथा च मम तथा परेषामपि(।) तेन चित्तत्वेनेन्द्रियाश्रितत्वेन वचनादिहेतुत्वेन च सर्वस्य पुसश्चित्त सर्वदा रागादियुक्तन्नियतवस्तुग्राहित्वादसर्वविषय किन्नानुमीयत इत्याशक्याह। **नैव**मित्यादि। यथा वाक्यान्यसम्भवद्विशेषहेतूनि **नैवं सम्भवद्विशेषहेतवः पुरुषाः** येन विशेषहेत्वसम्भवेन। वचनादेरादिग्रहणेनेन्द्रियाश्रितत्वचित्तत्वादि[4]ग्रहण। **वचनादेरेव किंचिन्मात्रेणै**कदेशेन **साधर्म्यात्**तस्माल्लिङ्गात् पुसा रागादिमत्वेन नियतविषयत्वेनान्येन वा **सर्वाकारेण साम्यमनुमीयेत**।

विशेषहेतुसम्भव एव कुत इत्याह। **सर्वे**ष्वेव चेतोगु**णेषु विशेषस्य दर्शनात्**। रागप्रज्ञादयो हि स्वविषयग्रहणप्रति मन्दमन्दवृत्तयोपि कालान्तरेण पटुतरा भवन्ति। स्वविषयश्चैषा स्पष्टतरो भवतीति वि[5]शेषो दृश्यते। स पुन कुतो भवतीत्याह। **संस्कारो**भ्यासस्तस्य **विशेषेण** प्रज्ञादीना **विशेषप्रतीतेः**। भवतु प्रज्ञादीना मनोगुणानामभ्यासात् प्रकर्षो दृष्टत्वात् सर्वज्ञादयस्तु न दृष्टा इति कथन्तेषाम्भावइत्यत आह। **तद्वदि**त्यादि। **अन्यस्यापि** सर्वज्ञत्वादेर्विशेषस्य **सम्भवात्**। अभ्यासवशाच्च नैरात्म्याकारस्य सर्वपदार्थग्राहिणश्च सामान्यविकल्पस्य यत्स्फुटाभ[6]त्वन्तदेव वैराग्य सार्वज्ञ च पद। तेन त्रिभि. प्रकारैर्वैराग्यसर्वज्ञत्वविशेषासम्भवानुमान स्यात्। यदि नैरात्म्यविषयस्य सर्वविषयस्य वा विकल्पस्यासम्भव। सम्भवे वा यदि मनोगुणाना न विशेष स्यात्। सति वा विशेषे विशेषहेतुर्यदि न ज्ञात स्यात्। यावता नैरात्म्यादिविषयस्य विकल्पस्य सम्भवोस्ति विशेषहेतुश्चाभ्यासो
27b विज्ञात। तस्माद् यथाऽस[7]ति प्रतिबन्धवैकल्ये समर्थेयं बीजकारणसामग्री अङ्कुरोत्पादायेति सामर्थ्यानुमान। तद्वदसति प्रतिबन्धवैकल्ये चिरकालान्नैरन्तर्यवतश्चाभ्यासविशेषाच्च नैरात्म्यविषयस्य सर्वपदार्थविषयस्य च ज्ञानस्य स्फुटाभत्व सम्भवतीति वैराग्यसर्वज्ञत्वयो. सम्भवानुमान। एवन्तावत् सम्भवानुमानमस्माक।

असम्भवे त्वनुमातव्ये भवता न तस्य[1]धर्मस्य बाधक. कश्चिद्धेतुर्विद्यते। तद**भावान्**नासभवद्विशेषहेतव. पुमांस इति सम्बन्ध·। कथ पुनर्बाधकस्याभाव इत्याह। **वैराग्यस्यादृष्टत्वाद्** (।) उपलक्षणं चैतत्सर्वज्ञस्याप्यदृष्टत्वात्। **अदृष्टेन च** वैरा-

---

[1] Ma-mthoṅ-ba-yan-ma-gnod-par-bya-ba

भावासिद्धेः। न हि रागादीनां व्यभिचारकार्यमस्ति[2]। सम्भवेऽपि विशेषाणां द्रष्टुमशक्यत्वात्।

नैवं प्रतिक्षेपार्हाणि वाक्यानि यथा पुरुषाः। दृश्यविशेषत्वात्। अदृश्यत्वेऽपि अदृष्टविशेषाणां[3] विजातीयत्वोपगमविरोधात्। तद्विशेषाणामन्यत्र कर्तुं शक्यत्वात्। प्रत्यक्षाणां (वाक्याना)मप्रत्यक्षस्वभावविरोधात्। भ्रान्ति-

---

ग्येण सह हेतोर्बाध्यबाधकभावासिद्धे.।

स्यान्मत (।) न वचनादेर्वैराग्यादीना साक्षाद् असम्भवोनुमीयते येन बाधको हेतुर्मृग्यते। किन्तु वीतरा[2]गाभिमतेषु रागादयोनुमीयन्ते (।) तेष्वनुमितेष्वर्थतो वीतरागादिप्रतिषिद्धमदृष्टेनापि वैराग्येन (?ण) रागित्वस्य विरोधादित्यत आह। **रागेत्यादि। न हि रागादीनामव्यभिचारि कार्यमस्ति।** आदिग्रहणाद् असर्वज्ञपरिग्रह। तथा हि व्यवहारव्युत्पत्तिमारभ्य यथा यथार्थपरिज्ञानन्तथा तथा तद्विषयम्वक्तृत्वम्भवतीति तेन यदि सर्वविषय क[3]स्यचिद् विज्ञान स्यात् तद्विषयमपि वक्तृत्व केन वार्यते।

स्यादेतद्(।) यदि वैराग्यादिलक्षणन्तस्य विशेषोस्ति कथमस्माभिर्नोपलभ्यत इत्याह। **सम्भवेपि** तेषा वैराग्यादिलक्षणाना **विशेषाणां** परसन्ताने **द्रष्टुमशक्यत्वात्।** न च तथाभूतानामनुपलम्भात् प्रतिक्षेप इत्याह। तादृशो च विप्रकर्षिणामप्रतिक्षेपार्हत्वात्।

स्यादेतद् (।) यथा पुरुषा अप्रतिक्षेपार्हा[4]स्तद्वद् वाक्यानीत्याह। **नैवमित्यादि।** कि कारण। **दृश्यविशेषत्वात्।** तथा हि वैदिकाना वाक्यानाम्विशेषो दृश्य एवेष्यते। अथ नेष्यते। एवम**दृश्यत्वेपि** विशेषस्याभ्युपगम्यमाने। तेनानुपलब्धेन विशेषेणा**दृष्टविशेषाणां** वैदिकवाक्याना लौकिकवाक्येभ्यो **विजातीयत्वोपगमविरोधात्।**

स्यान्मत (।) दृश्या एव विशेषा वैदिकाना दु श्रवणत्व[5]दुर्भणत्वादयस्तै पौरुषेयेभ्यो भिन्नानि भविष्यन्तीत्यत आह। **तद्विशेषाणामित्यादि। अन्यत्रेति** पौरुषेयेषु। न केवलमदृष्टविशेषाणा विजातीयत्वोपगमविरोधाददृश्यत्व विशेषाणामयुक्तमितश्च **प्रत्यक्षाणामप्रत्यक्षस्वभावविरोधात्।** न ह्येकस्य स्वभावद्वय विरुद्ध घटते। विशेषा. प्रत्यक्षा एव केवल भ्रान्तिनिमित्तसद्भावात्। वि[6]षादिशक्तिवन्नावधार्यन्त इति चेदाह। **भ्रान्तिनिमित्ताभावादिति।** रूपसाधर्म्यदर्शन हि भ्रान्तिनिमित्त विषादिषु। नैव वैदिकेषु। कथङ्गम्यत इति चेदाह। **बाधकाभावात् भ्रान्त्यसिद्धेरिति।** यदि वैदिकाना विशेषे भ्रान्त्यानपलक्ष्यमाणे पुनर्विशेषावलम्बि

निमित्ताभावात् ।[4] बाधकाभावात् भ्रान्त्यसिद्धेः । पुरुषेषु विशेषदर्शनस्य बाधकत्वाद् असमानम् । (न) वाक्यानां विशेषः परभावभूतस्य अतद्विशेषत्वात् । तदभिन्नस्वभावानां सर्वेषां पुरुषक्रिया न वा कस्यचित् ॥

ग. वैशेषिकमतनिरासः

किञ्च ।

आत्ममृच्चेतनादीनां यो(ऽ)भावस्याप्रसाधकः ।
स एवानुपलम्भः कि हेत्वभावस्य साधकः ॥२४॥

अनुपलम्भमस्य प्रमाणयत आत्मवादो निरालम्बः स्यात्, आत्मनोऽप्रत्यक्ष-

---

प्रमाणमुत्पद्येत भ्रान्तेर्बाधकन्तदा भ्रान्तेस्तन्निमित्तस्य च भवति निश्चयस्तच्च
28a नास्ति ।[7] तस्माल्लौकिकै शब्दै वैदिकानामविशेषे साध्ये नास्ति साधक प्रमाण ।

पुरुषेषु तर्हि कि बाधक येन सर्वाकारगुणसाम्यसाधने दोष इत्याह । **पुरुषे-**ष्वित्यादि । प्रज्ञादिविषयस्यातिशयस्याभ्यासपूर्वकस्य यद् दर्शनन्तदेव बाधक । यद्यसम्भवद्वैराग्य पुरुषस्य चित्तम्भवेत् । नाभ्यासाधेयविशेषम्भवेद् (।) भवति च (।) ततो **विशेषदर्शनस्य बाधकत्वाद् अ[1]समान** । वेदवाक्यानुमाने यदुक्त प्रत्यक्षाणा शब्दानामप्रत्यक्षस्वभावाभावादिति (।) स्यादयन्दोषो यदि विशेष स्वभावभूत स्यात् । किन्तु परभावभूत इत्याह । **परभावभूतस्ये**ति । परभावङ्गत परभावभूत । अन्यस्वभाव इत्यर्थ । **अतद्विशेषत्वा**दित्यवाक्यविशेषत्वात् । **यतो नास्ति विशेषो वाक्यानान्तत्तस्मादभिन्नस्वभावानां सर्वेषां** पौ[2]रुषेयापौरुषेयाभिमताना **पुरुषक्रिया** । पुरुषै करण । **न वा कस्यचित्** । लौकिस्यापि न पुरुषक्रियेत्यर्थ ॥

एवमाचार्यीयस्यादर्शनमात्रेण विपक्षाद्धेतोर्व्यतिरेकमिच्छत ग्रन्थविरोध प्रमाणविरोध चोक्त्वा ती थि का ना परस्परव्याघातमाह । **किंचे**त्यादि । मृदश्चेतना । एतच्च लो का य त दर्शन । **आत्मा च मृच्चेतना** चेति द्वन्द्व । **आदि-**श[3]ब्दात् क्षीरादिषु द्रव्यादि । तेषा**मभावस्य** साधनायानुपलम्भ परेणोक्तोपि **यस्तस्याभावस्याप्रसाधक** इष्ट आत्मादिवादिभिरनुपलम्भमात्रस्याप्रमाणत्वादिति । **स एवानुपलम्भ** आत्मादिनिषेधे प्रमाणत्वेनानिष्ट **कि हेत्वभावस्य** हेतोर्विपक्षाद् व्यतिरेकस्य **साधकः** । हेत्वभावे चा**नुपलम्भं चास्य** वै शे षि का दे. **प्रमाणयतः आत्मवादो निरालम्बो** निरा[4]श्रय **स्यात्** । तत्रानुपलम्भस्याभावसाधनस्य सम्भवात् । तथा हि न **प्रत्यक्षेणात्मन उपलम्भो** नित्यपरोक्षत्वाभ्युपगमात् । अथ स्यादात्मनोनुमानमेवोपलम्भोस्त्येवेत्यत आह । **तत्कार्ये**त्यादि । अप्रत्यक्षत्वादेवात्मनस्तत्कार्यस्वभावरूपस्य लिङ्गस्यानिश्चयान्नानुमानमुपलम्भ. ।

त्वात्, (तत्) कार्यस्यासिद्धत्वात्। इन्द्रियादीनां विज्ञानमेव कार्यं, तस्य कादाचित्कत्वात्[7]। सापेक्ष्यसिद्धया प्रसिद्धिरुच्यते। 429b

किमप्यस्य कारणमस्तीति। न त्वेवम्भूतमिति एवं सुखादिकार्यं प्रसाधित कञ्चिदर्थं न पुष्णाति। येन केनचित् कारणवत्त्वाभ्युपगमात्। तथा च सत्यनुपलम्भ एवात्मनः स्यात्। तस्मात् तमनुपलम्भेन प्रत्याचक्षाणः किमिति प्रतिव्यूढः कथं व्यतिरेकं साधयेत्।

कश्चिच्च मृदश्चैतन्यमनुपलभ्यमानमिच्छन् अदर्शनाद् वचनादेर्व्यावृत्ति-

---

यथा नित्यपरोक्षाणामपीन्द्रियादीनामनुमानन्तथात्मनो भविष्यतीति चे[5] दाह। **इन्द्रियाणामित्यादि**। आदिशब्दात् स्मृतिबीजादीना। **विज्ञानमेव कार्यन्तस्य कादाचित्कत्वात्**। तथा हि सत्स्वपि रूपालोकमनस्कारेषु निमीलितलोचनाद्यवस्थासु विज्ञानस्याभावात्। पुनश्चोन्मीलितलोचनावस्थासु भावात्। विज्ञानकार्य कारणान्तरसापेक्ष सिध्यति ततोस्य **सापेक्ष्यसिद्ध्या** इन्द्रियादीनाम्**प्रसिद्धिरुच्यते**।

एतदुक्तम्भवति। यत्सापेक्ष[6]मिदङ्कादाचित्क। विज्ञानन्तत्**किमप्यस्य** विज्ञानस्य **कारणमस्तीत्यनुमीयते** तदेव चेन्द्रियमिति व्यवह्रियते। **न त्वेवंभूतमिति** न रूपविशेषेण मूर्त्तत्वादिना युक्तमिन्द्रियमनुमीयत इत्यर्थ। **एवमिति** यथा कादाचित्कविज्ञानकार्यान्यथानुपपत्त्येन्द्रियानुमान। तथा सुखादिकार्य यस्य **सुखादिकार्यन्तत्किमप्यस्तीत्यनुमानेन** तच्चात्मस्वरूपमिति **प्रसाधित[7] कञ्चि-** 28b
दर्थंमात्मवादिनो न पुष्णाति। येन केनचिदनिर्दिष्टविशेषेण कारणेन कारणवत्त्वाभ्युपगमात् सुखादीना। न चैवभूत आत्मा नित्यकर्त्तृभोक्तृत्वादिलक्षणत्वेनाभ्युपगमात्। यतश्च यथाभ्युपगतस्यात्मनो नास्ति कार्यलिङ्ग। **तथा च सत्यनुपलम्भ एवात्मनः स्यात्। तस्मात् तमात्मानन्तेनानुपलम्भेन** प्रत्यक्षानुमाननिवृत्तिलक्षणेन **प्रत्याचक्षाणः किमिति प्रतिव्यूढः** प्रतिक्षिप्त आ[1]त्मवादिना। अनुपलम्भमात्रान्नास्त्यसत्त्वमात्मन इति। कथमसाधन सद् विपक्षाद्धेतो प्राणादिमत्वादे**र्व्यतिरेकं साधयेत्**। भूतानामेव शक्तिश्चैतन्यमिष्यते चा र्वा कै. (।) भूतस्वभावा च मृदित्येव **मृदः** खल्वपि **चैतन्यमनुपलभ्यमानमपीच्छन्** लो का - य ति कः। यदाह (।) "**तेभ्यो भूतेभ्यश्चैतन्यम्मदशक्तिवद्विज्ञानमि**"ति। पुनस्तत एवाप्रमाणकादनुपलम्भात्। **अद[2]र्शनाद् वचनादे**रसर्वज्ञत्वादिसाधनाय लिगत्वेनोपनीतस्य विपक्षाद् **व्यावृत्तिमाह**। **दध्यादिक क्षीरादिष्वनुपलभ्यमानमपीच्छन्**।

माह। अन्यो हि दध्यादिकं क्षीरादिषु। अपरः निरर्थकेषु(? अपरार्थेषु)संघातत्व-स्यादर्शनाद् व्यतिरेकमाह। को ह्यत्र नियमः संघातैरवश्यं परार्थैर्भवितव्यमिति। उपलम्भो दध्यादीनां क्षीरादिषु अनुमानमेव। अशक्तादनुत्पत्तेः।

अथ किं स एव भावः शक्तिरुतान्यदेव किञ्चिद्। तदेवेति चेत् तथैवोपलभ्येत, विशेषाभावात् (।) अन्यच्चेत्, कथमन्याभावे तद् अस्ति। उपचारमात्रं स्यात्॥ अयं परस्परव्याघात एषाम्॥

तस्मात् तन्मात्रसम्बन्धः स्वभावो भावमेव वा।
निवर्त्तयेत्;

अपर इति सा ख्य पुन स एव। परार्थाश्चक्षुरादय सङ्घातत्वादित्यभिधा-या**परार्थेषु** शशविषाणादिषु **सङ्घातत्वस्यादर्शनाद् व्यतिरेक**माह। एवन्तावदस्य परस्परव्याघात.। न चादर्शनमात्रेणास्य हेतोर्व्याप्ति सिध्यति।[3] **को ह्यत्र नियमः सङ्घातैरवश्यं परार्थैर्भवितव्यं** यत सघातत्वाच्चक्षुरादीना पारार्थ्यसिद्ध्या-त्मार्थत्व सा ख्य स्य सिध्येत्। यदुक्त दध्यादिक क्षीरादिष्वप्यनुपलभ्यमानमपीति(।) तन्न। यस्मादस्त्येवो**पलम्भो दध्यादीनां क्षीरादिषु** (।) कोसावित्याह**ानुमा-नमिति**। अनुमान चाहा**शक्तादनुत्पत्ते**रिति। यदि हि क्षीरादौ दध्यादिशक्तिर्न स्यात्ततो शक्तात् क्षीरादेर्दध्या[4]दि नोत्पद्येत। प्रयोगस्तु यद्यज्जनने न शक्त न तस्य तत उत्पत्तिर्यथा शालिवीजाद् यवाङ्कुरस्य (।) उत्पद्यते च दध्यादि क्षीरादिभ्यस्तस्मादस्ति दध्यादिशक्ति क्षीरादाविति कार्यहेतुप्रतिरूपको वैधर्म्य-प्रयोग। शक्तेरेव च दध्यादि कार्यकारणयोरभेदादिति मन्यते।

अथेत्यादि सिद्धान्तवादी। योसौ दध्यादिको भाव पश्चादुपलभ्यते **किं स एव भा[5]वः शक्तिरुतान्यदेव किञ्चिद्** दध्यादेरर्थान्तर। **तथैवेति** निष्पन्नरूपदध्यादिवत् क्षीरावस्थाया**मुपलभ्येत विशेषाभावात्**। **अन्यच्चे**दिति। दध्यादिभ्योर्थान्तर चेच्छक्ति । तदा **कथमन्याभावेन्यस्य** शक्त्याख्यस्य भावे। **तद्दध्यादिकमस्ति**। नैवेत्यभिप्राय.। दध्यादिजननसामर्थ्यात् क्षीरादौ दध्यादीत्यु**पचारमात्रं स्यात्**। अनुपलम्भमप्रमाणीकृत्य पुनस्तस्यैव[6] प्रमाणीकरण**मयम्परस्परव्याघात एषाम**ात्मा-दिवादिनामित्युपसहार ॥

यतश्चादर्शनमात्रान्नास्ति व्यतिरेकस्त**स्मात्तन्मात्रसम्बन्धः**। हेतुसत्तामात्र-सम्बद्ध**स्वभावः** साध्यत्वेनाभिमतः स्वयन्निवर्त्तमानो **भावमेवं** स्वभावभूतमेव हेतुत्वेनोपनीत **निवर्त्तयेत्**। **वा** शब्दो वक्ष्यमाणविकल्पापेक्षी। **यथा** वृ**क्षो** निवर्त्तमान.
2,a **शिंशपान्नि**[7]वर्त्तयति। कस्माच्छाखादिमद्विशेषस्यैव **तथा** शिंशपेति **प्रसिद्धेः स**

यथा वृक्षः शिंशपां, शाखादिमद्विशेषस्यैव[6] **तथा तच्छब्दप्रसिद्धेः स हि तस्य स्वभावः। स्वञ्च स्वभावं परित्यज्य कथं भावो भवेत्। स्वभावस्यैव रूपत्वादिति तस्य प्रतिबन्धादेव अव्यभिचारः॥**

कारणं वा कार्यमव्यभिचारतः ॥२५॥

कारणं निवर्त्तमानं कार्यं निवर्त्तयति॥ 430a

अन्यथा तद्धि तस्य कार्यमेव न स्यात्। सिद्धस्तु कार्यकारणभावः स्वभावं नियमयति। उभयथा स्वभावप्रतिबन्धादेव[1] **निवृत्तिः॥**

अन्यथैकनिवृत्त्यान्यविनिवृत्तिः कथं भवेत्।
(नाश्ववानिति मर्त्त्येन न भाव्यं गोमतापि किम्) ॥२६॥
सन्निधानात् तथैकस्य कथमन्यस्य सन्निधिः।
गोमानित्येव मर्त्त्येन भाव्यमश्ववतापि किम् ॥२७॥

वृक्षस्तस्य शिंशपाख्यस्य स्वभावः। **स्वञ्च स्वभाव** वृक्ष **परित्यज्य कथं** शिंशपाख्यो **भावो भवेत्**। किङ्कारण(।) **स्वभावस्यैव** वृक्षस्वात्मन एव भावत्वाच्छिंशपारूपत्वात्। **इति** हेतोस्तस्यात्मभूतस्य साधनस्य शिंशपादे स्वभाव**प्रतिबन्धादेव** स्वभावे साध्याभिमते वृक्षादौ यथोक्तेन प्रकारेण प्रति[1]बन्धादेवा**व्यभिचारः**। **कारणं वा** निवर्त्तमानमित्यध्याहार। **कार्यन्निवर्त्तयेदिति** प्रकृत। कस्माद् (।) **अव्यभिचारतः** कार्यस्य कारणाव्यभिचारादित्यर्थ। **कारणमित्यादि**ना व्याचष्टे।

अन्यथेति। यदि कारणे निवर्त्तमाने कार्य न निवर्त्तेत। तदा **तत्**कार्याभिमत **तस्य** कारणस्य **कार्यमेव न स्यात्**। तस्मात् **कारणं निवर्त्तमानं कार्यम**वश्य **निवर्त्तयति**। यद्यपि वासगृहादावग्निकारण[2]निवृत्तावपि न धूमस्य निवृत्तिस्तथापि दृष्टकारणव्यतिरेकेण नान्यस्मादस्योत्पत्तिरभिप्रेतेत्यर्थ। अत एवाह। **सिद्धस्त्वित्यादि**। **सिद्धस्तु कार्यकारणभावः** कार्यस्य **स्वभावं** कारणे **नियमयति** (।) सति तस्मिन्भवत्यसति न भवतीत्येवन्तदव्यभिचारिण करोति। **उभयथेति** तादात्म्येन तदुत्पत्त्या वा य **स्वभावप्रतिबन्धस्तस्मादेव**। साध्यनिवृत्त्या हेतो**र्निवृत्तिः**।

अन्यथेति यदि[3] प्रतिबन्धो नेष्यते। **एक**स्याप्रतिबन्धकस्य साध्यस्य **निवृत्त्यान्यनिवृत्तिः**। अप्रतिबद्धस्य साधनधर्मस्य **निवृतिः कथम्भवेत्** (।) नैव। यस्मा**न्नाश्ववानित्यश्वरहित** इति कृत्वा **मर्त्त्येन** मनुष्येण **न भाव्यं गोमतापि किं**। **सन्निधानात्तथैकस्ये**ति स्वभावेनासम्बद्धस्य हेतो सन्निधानात् **कथमन्यस्य** साध्यस्य **सन्निधि**र्नैव सन्निधान। यस्माद्(।)

"गोमानित्येव मर्त्त्येन भाव्यमश्ववता[4]पि किं।"

तस्मात् स्वभावप्रतिबन्धादेव हेतुः साध्यं गमयति। स च तद्भावलक्षणस्तदुत्पत्तिलक्षणो वा अविनाभावाख्यः ताभ्यां प्रदर्श्यते ॥२७॥

तस्माद् वैधर्म्यदृष्टान्ते नेष्टोवश्यमिहाश्रयः।
तदभावे (च तन्नेति वचनादपि तद्गतेः ॥२८॥

यतः।

तद्भा(व) हेतुभावौ हि दृष्टान्ते तदवेदिनः।
ख्याप्येते;

दृष्टान्ते हि साध्यधर्मस्य तद्भावः तन्मात्रानुबन्धेन[4] तत्स्वभावत्वेन ख्याप्यते।

यत एवन्तस्मात् **स्वभावप्रतिबन्धादेव** साध्याभिमते वस्तुनि प्रतिबद्धत्वादेव **हेतुः** स्वसाध्यङ्गमयति। न तु सम्बन्धात्। कार्यकारणयोरसहभावेन व्याप्य-व्यापकयोश्चैकत्वेन द्विष्ठसम्बन्धाभावात्। **स चेति** स्वभावप्रतिबन्ध·। **तद्भावलक्षण** इति साध्यस्वभावलक्षणस्तदुत्पत्तिलक्षणो वा। स एव स्वभावप्रतिबन्धो-ऽविनाभावाख्य· साधर्म्यवैधर्म्यदृष्टान्ताभ्यां[5] प्रदर्श्यते ॥

एतदुक्तम्भवति। साध्यसाधनयो प्रतिबन्धग्राहकमेव प्रमाण व्याप्तिग्राहक-न्तेनैव साधनस्य साध्यायत्तताग्रहणात् साध्याभावेऽभावो गृहीत एव केवलन्तद-विनाभावग्राहक प्रमाण विस्मृतत्वाद् दृष्टान्ताभ्यामुपदर्श्यते (।) यतश्च प्रमाण-ख्यापनादेवाविनाभावस्मृत्या साध्याभावे साधनाभावो निश्चितो भवति (।)

तस्माद् वैधर्म्यदृष्टान्ते। तद्विषयेऽवश्यं नियं[6]मेन इह हेतौ कार्यस्वभावलक्षण **आश्रयो** वस्तुभूतो धर्मी **नेष्टः** स्वभावानुपलम्भे त्विष्ट एव।

तत्र हि विपर्ययेणोपलम्भ· ख्यापनीय । किङ्कारणम् (।) **आश्रयो नेष्ट** इत्याह। **तदभावे** चेत्यादि। **तदभावे** व्यापककारणयोरभावे तद्व्याप्यकार्याख्य लिङ्ग **नेति** न भवतीत्येव वैधर्म्यवचनाद् अन्याश्रयरहितात्तद्गतेर्व्यतिरेकगते (॥२८॥)

29b किङ्कारण। **यत** इत्यादि। स्वभावहेतौ सा[7]ध्यस्य **तद्भाव**. साधनव्या-पकत्व। कार्यहेतौ साध्यस्य **हेतुभाव**. कारणत्व **ख्याप्यते**। **तदवेदिन** इति तद्-भावहेतुभावावेदिनः पुस·।

तद्व्याचष्टे। **दृष्टान्ते हीत्यादि**। **साध्यधर्मस्य तद्भाव** साधनस्वभावत्वं **ख्याप्यते तन्मात्रानुबन्धेन**। साधनमात्रानुबन्धेन। **कृतक(त्व)निष्पत्तावेव** निष्पन्नस्यानित्यत्वस्य कृतकमात्रानुबन्धेन या **तत्स्वभावता** साधनस्वभावता तया। एवभू[1]तया तद्भावः **ख्याप्यते**। न तु निमित्तान्तरात् पश्चाद् उत्पद्य-

यः कृतकं स्वभावे जनयति सोऽनित्यरूपमेव सन्तं जनयतीति प्रमाणं दृष्टान्तेन ख्याप्यते। अन्यथा एकधर्मसद्भावात् तदन्येनाऽपि भवितव्य[5]मिति नियमाभावात् व्यभिचाराशंका स्यात्। तेन च प्रमाणेन साध्यधर्मस्य तन्मात्रानुबन्धः ख्याप्यते स्वकारणादेव तथा जातो नश्वरः क्षणस्थितिधर्मा[6]। अन्यतः तद्भावनिषेधात्। हेतुभावो वा सत्येव भावादिति प्रदर्श्यतेऽर्थान्तरस्य।[1]

तथा तद्भावहेतुभावे प्रसिद्धे सति अनित्य[7]त्वाभावे कृतकत्वाभावः। दहनाभावेऽपि धूमः। एवं स्वभावो हेतुश्च चेत् कथं स्वं स्वभावं हेतुं चान्तरेण 430b

---

मानेनानित्यत्वेन। **यथैके** विप्रतिपन्ना इति। तन्मात्रवत्वमेव दर्शयन्नाह। **य** इत्यादि। **यो** हेतु· **कृतकं स्वभावे जनयति सोऽनित्यरूपमेव सन्तं जनयतीत्यर्थ**। इति अनेन द्वारेणाविनाभावविषय **प्रमाणं दृष्टान्तेन ख्याप्यते**। न तु दर्शनादर्शनमात्र। **अन्यथेति** यद्येव प्रमाण नोप[2]दर्श्यते। **तदैकधर्मसद्भावात्** साधनधर्मसद्भावात्। **तदन्येनापि** साध्यधर्मेणापि **भवितव्यमिति नियमाभावात्** साधनस्य साध्य**व्यभिचाराशंका स्यात्**।

यदि नाम दृष्टान्तेन प्रमाणमुपदर्शनीयन्तथापि कि सिद्धमित्याह। **तेन च प्रमाणेन तन्मात्रानुबन्ध** इति साधनमात्रानुबन्ध। कथ ख्याप्यत इत्याह। **कृतक**स्य यत्**कारण**न्तस्मा**देव** कृतक**स्तथा जातो**[3] जातो यो **नश्वरः** क्षणस्थितिधर्मा। क्षणिकत्वेनैव नश्वरो न तु कालान्तर स्थित्वेत्यर्थः।

कथ पुन स्वहेतोरेव तथोत्पन्न इत्याह। **अन्यत** इति स्वहेतोरन्यस्माद्विनाशहेतो। तस्य कृतकस्य **तद्भावनिषेधाद्** अनित्यतास्वभावनिषेधाद् वक्ष्यमाणकात्। **हेतुभावो** वा। तेन च प्रमाणेन ख्याप्यत इति सम्बन्ध। साध्यधर्मस्य साधनप्रति **हेतुभावो वा** कारण[4]त्वम्वा ख्याप्यते तस्मिन् **सत्येव** साधनस्य **भावा**दित्यनेन प्रकारेण प्रमाण दृष्टान्तेन **प्रदर्श्यते**। कस्य पुन साध्यस्य हेतुभाव प्रदर्श्यत इत्याह (।) **अर्थान्तरस्य** साधनाद् व्यतिरिक्तस्य। **तथा** दृष्टान्तोपदर्शितेन प्रमाणेन प्रसिद्धे **तद्भावहेतुभावे**। स्वभावस्य साध्यस्य तद्भावे। साधनस्वभावत्वे। कारणस्य हेतुभावे **प्रसिद्धे सति**। **दहनाभावे धूमो** न भवती[5]ति प्रकृतेन सम्बन्ध। **स** इत्यनित्यस्वभावो वह्निश्च। तस्येति कृतकत्वस्य धूमस्य च यथाक्रम **स्वभावो हेतुर्वा**(।)वा शब्द समुच्चये। यत एवं **कथ**मसौ कृतको धूमो वा **स्वं स्वभाव**मनित्य **हेतुं चाग्निमन्तरेण** भवेत् (।) नैव **भवेदि**त्येवमनुद्दिष्टरूपे विषये व्यतिरेके

---

[1] T Bam-po gñis-pa = **द्वितीयमाह्निकं**, bam-po = 300 Ślokas.

भवेत्। एवं आश्रयमन्तरेणाऽपि वैधर्म्यदृष्टान्ते व्यतिरेकः प्रसिध्यति॥

येषां तद्भावहेतुभावौ[1] **प्रसिद्धौ, तेषां—**

विदुषां वाच्यो हेतुरेव हि केवलः ॥२९॥

यदर्थं दृष्टान्तवचनं, सोऽर्थः सिद्ध एवेति तदा किं तद्वचनेन। तत्प्रदर्शनेऽपि किं वैधर्म्यदृष्टान्ताश्रयेणेति मन्यमान [2]**आचार्य आश्रयं प्रतिक्षिपति॥**

तेनैव ज्ञातसम्बन्धे द्वयोरन्यतरोक्तितः।
अर्थापत्त्या द्वितीयेपि स्मृतिः समुपजायते ॥३०॥

यदाह 'अर्थापत्त्याऽन्यतरेण वा उभयप्रदर्शनात्' इति[3]**। तत्राऽपि दृष्टान्तेन**

कथ्यमाने **आश्रयमन्तरेणापि वैधर्म्यदृष्टान्ते प्रसिध्यति व्यतिरेकः।**

तेन यदुच्यते[6] भ ट्टो द्यो त क रा भ्या।

"व्यतिरेकोपि लिगस्य विपक्षान्नैव लभ्यते।

अभावे स न गम्येत कृतयत्नैरबोधनादि"ति (।)

तन्निरस्त।

एवन्तावत् (।) तद्भावहेतुभावख्यापनाय तदवेदिन दृष्टान्तो वक्तव्य ।

येषां पुन पूर्व **प्रसिद्धावेव तद्भावहेतुभावौ** यथा स्व प्रमाणेन पक्षधर्ममात्रत्व
ɔa निश्चितन्तेषान्तद्भावहेतुभावप्रति **विदुषां हेतुरेव। यदर्थ**[7]मित्यन्वयव्यतिरेक निश्चयार्थ। प्रतिपाद्यस्य स्वयमेव **सोऽर्थः सिद्ध इति** किन्तद्वचनेन। **तदेति** निश्चितान्वयव्यतिरेककाले।

यदपि मूढ प्रति दृष्टान्तप्रदर्शन क्रियते तदा **तत्प्रदर्शनेपि** दृष्टान्तप्रदर्शनेपि वैधर्म्य। विनाप्याश्रयेण यथोक्तविधिना सिध्यत्येव व्यतिरेक । तत **किम्वैधर्म्यदृष्टान्ताश्रयेणेति मन्यमान** आ चा र्य **आश्रय**[1] **प्रतिक्षिपति** न्या य मु खा दौ। तथा हि तत्रैव चोदित "यदा तह्यकाशादिक नित्यन्ता (वद) भ्युपैति प्रतिवादी (।) तदा कथन्नित्यात् कृतकत्वस्य व्यतिरेक" इति (।) तत्रा **चा र्य** आश्रय प्रतिक्षिपन्नाह। **तदा सन्देह** एव नास्ति तदभावात्तत्रावृत्तेरिति।

एतदुक्तम्भवति। गृहीतप्रतिबन्धस्य तत्राकाशादौ व्यापकाभावाद् व्याप्याभावसिद्धेः। अनित्याभावश्च नित्यस्यास[2]त्वात् सिद्ध इति यावत्। यस्माद दृष्टान्ताभ्या प्रतिबन्ध कथ्यते। **तेन** कारणेन **ज्ञातसम्बन्धे** हेतौ सति **द्वयोः** साधर्म्यवैधर्म्यदृष्टान्तयोरन्यतरोक्तितः। **द्वितीयेपि** ताभ्यामेवान्यतरस्मिन्ननुक्तेपि **स्मृतिः समुपजायतेऽर्थापत्त्या।**

तद्भावहेतुभावप्रदर्शनं मन्यमानोऽर्थापत्त्या एकस्य वचनेन द्वितीयस्य[1] सिद्धिमाह। तथा हि। यत् कृतकं तदनित्यमेवेत्युक्ते अनर्थान्तरे व्यक्तमयमस्य[4] स्वभावः तन्मात्रानुबन्धी प्रमाणदृष्ट इति निश्चितः तद्भावनियमात्।

एतदप्याचार्यवचनेन सस्यन्दयन्नाह। **यदाहेत्यादि** (।) न्या य मु खे चाय ग्रन्थ। वाशब्दस्तत्रैव पूर्वविकल्पापेक्षी।[3] **अन्यतरेणेति** साधर्म्यदृष्टान्तेन **वैधर्म्य**-दृष्टान्तेन वा। **उभयप्रदर्शनाद्** अन्वयव्यतिरेकप्रदर्शनात्। **तत्रापि** ग्रन्थे। **दृष्टान्तेन** स्वभावहेतौ कार्यहेतौ च यथा क्रमन्तद्भावहेतुभावप्रदर्शनं क्रियत इति **मन्यमान** आचार्योर्थापत्त्या **एक**स्यान्वयस्य व्यतिरेकस्य वा **वचनेन** द्वितीयस्य यथाक्रम व्यतिरेकस्यान्वयस्य वा **सिद्धिमाह**। एतदेवा[4]ह। **तथा हीति**। **यत्किञ्चित् कृतक-न्तदनित्यमेवेत्युक्ते व्यक्तमवश्यमयमनित्यत्वाख्यो धर्मोस्य** कृतकस्य **स्वभावस्त-न्मात्रानुबन्धी** कृतकमात्रानुबन्धी **प्रमाणदृष्ट इति** प्रमाणेन नि[5]श्चितः।

ननु कार्येपि कारणमवश्यम्भवति। न च तत्तस्य स्वभाव इत्यत आह। अनर्थान्तर इति। कथन्तन्मात्रानुबन्धीत्याह। **तद्भावनियमादिति**। कृतकभावे[5]-ऽवश्यमनित्यताभावादित्यर्थ.।

ननु न कृतकमात्रानुबन्धी स्वभावो नित्यत्वस्य प्रत्यक्षनिश्चित क्षणिकोय-मित्यनिश्चयात्तत्कथमुच्यते प्रमाणदृष्ट इति। अथ कृतको विनाश प्रत्यनपेक्षत्वा-त्तद्भावनियत इत्यनुमानदृष्ट. (।)

तदयुक्त (।) यतो निर्हेतुकेपि विनाशे यदैव घटादेर्नाश. प्रतीयेत तदैवाहेतुक स्यान्नान्यदा। तत्कथ[6] क्षणिकत्व। अथैकक्षणस्थायित्वेन घटस्योत्पत्ते पूर्वमपि नाश. (।)

ननु यथैकक्षणस्थायित्वेनोत्पत्ति स्वहेतुभ्यस्तथानेकक्षणस्थायित्वेनाप्युत्पत्तिः स्यात्। विचित्रशक्तयो हि सामग्र्यो दृश्यन्ते। न च यदि विनाश क्वचित् कदाचिद् भवेत् (।) तत्कालद्रव्यापेक्षत्वाद् अस्यानपेक्षत्वहानि.। विनाशकहेत्वनपेक्षत्वाद् अन्य[7]था द्वितीयेपि क्षणे विनाशो न स्यात् तत्कालाद्यपेक्षत्वात्। अथ क्रमयौगपद्याभ्या 30b सामर्थ्यलक्षण सत्त्व व्याप्त नित्येषु च क्रमाक्रमनिवृत्तौ सत्त्व निवर्त्तमान क्षणिकेष्वेववातिष्ठत इति सत्त्वयुक्तस्य कृतकस्य गमकत्व।

तदप्ययुक्त। क्षणिकत्वे सति क्रमाप्रतिपत्तेर्येन हि ज्ञानक्षणेन पूर्वकम्वस्तु प्रतिपन्न न तेनोत्तर येनोत्तर न तेन पूर्वकमिति कथ क्रमप्रतीतिः।[1] यो हि पूर्व-

---

[1] Cig-Sog.

वस्तुप्रतिपत्यनन्तरमपरस्य ग्राहक स क्रमग्राही स्यात् तथा वा क्षणिकत्वमस्य स्यात्। यस्य च बौद्धस्य काल एव नास्ति तस्य कथ क्रमग्रह.। भिन्नकालवस्त्वग्रहात्। कालाभावे चानेकवस्तुरूप एव क्रम.। तथा च नित्यस्यापि क्रमकर्तृत्व न विरुध्यते। यथा च नित्यस्य क्रमकर्तृत्वादनेकरूपत्वन्तथा क्षणस्यापि स्यात्। अथ क्षणवद् द्वितीये क्ष[2]णे नित्यस्याप्यभाव. स्यात्। कार्याभावात्।

तदयुक्त कालाभावात्। भवतु वा क्रमग्रहस्तथापि कथ क्रमाक्रमाभ्या सत्त्वस्य व्याप्ति.। क्रमयौगपद्यव्यतिरेकेणान्येन प्रकारेणार्थक्रियासम्भवात्। न च प्रकारान्तरस्य दृश्यानुपलम्भादभावनिश्चय। एव हि विशिष्टदेशादावेवाभावनिश्चय स्यान्न सर्वदा। नाप्यदृश्यानुपलम्भाद् अभावनिश्चय. सन्देहात्[3]। तस्मान्नित्येषु क्रमाक्रमायोगेपि सत्त्वानिवृत्ते· कथ सत्त्वस्य क्षणिकस्वभावत्वमिति श क र प्रभृतय.।

भवतु वा प्रकारान्तराभावात् क्रमयौगपद्याभ्या सत्त्वस्य व्याप्तिस्तथापि नित्येषु न प्रत्यक्षादिना क्रमाक्रमायोग सिद्धो नित्यानामतीन्द्रियत्वात् (।) तदसिद्धौ च न तेषु सत्त्वनिवृत्तिसिद्धिस्तदसिद्धौ च न सत्वस्य क्षणिकस्वभावत्वसिद्धि।

किञ्च[4](।)सत्त्वात् क्रमयौगपद्यानुमान स्यात् तेनैव व्याप्तत्वान्न तु क्षणिकत्वानुमानन्तत्र क्रमकर्तृत्वासम्भवादिति।

अत्रोच्यते। क्रमयौगपद्ये प्रत्यक्षसिद्धे एव। सहभावो हि भावाना यौगपद्य क्रमस्तु पूर्वापरभाव स च क्रमिणामभिन्नस्तत्प्रतिभासश्चैकप्रतिभास। स त्वेकप्रतिभासानन्तरमपरस्य प्रतिभास.। क्रमप्रतिभासो न त्वेकस्यैवातिप्रसङ्गात्।

सत्य[5](।)तत्रापि यदैकस्य प्रतिभासो न तदापरस्य तद्भावे हि यौगपद्यप्रतिभासः स्यात्। तस्मात् क्रमिणो. पूर्वोत्तराभ्या ज्ञानाभ्या ग्रहे क्रमो गृहीत एव ततोऽभेदात्। केवल पूर्वानुभूतवस्त्वाहितसस्कारप्रबोधेनेदमस्मादनन्तरमित्यानुपूर्वीविकल्पोत्पत्त्या क्रमग्रहो व्यवस्थाप्यते। क्रमिणा ग्रहेपि कथचिदानुपूर्वी विकल्पानुत्पत्तौ क्रमाग्रहव्यवस्थापनाद[6]त एव क्रमिणामेकग्रहेपि न क्रमग्रह उच्यते।

कि च कालाभ्युपगमवादिनोपि कथ क्रमग्रह· । एककालत्वात् सर्वकार्याणा। अथ भिन्नकालकारणोपाधिक्रमात् कार्यक्रमस्तदयुक्त कालस्यैकत्वात। अत एव न नित्यस्य भाव· ।

अथ पूर्वापररूपत्वात् क्रमवान् काल ।

ननु तस्यापि क्रमो यद्यपरकालापेक्षस्तदानवस्था स्यात्। अथ तस्य स्वरूपेणा[7]
31a क्रमस्तथा सहायरहितानाम्बहूना कार्याणामपि क्रम. स्यात्। अस्माकन्तु पूर्वादिप्रत्ययविषयो महाभूतविशेषः कालो लोकप्रतीतोस्त्येव। तस्य च भेदात् क्रमादिप्रतीतिर्युज्यत एव। नापि प्रकारान्तरेण नित्यस्य कर्तृत्व सम्भवति। यत.

प्रकारान्तरेणैकदैककार्यकरणेऽनेककरणे वान्यदाऽवस्तुत्व स्यात् कार्याभावात्। पुन पुन का[1]र्यकरणे च क्रम एव न प्रकारान्तरसम्भव । अथ प्रकारान्तरेण नैकदा कार्य करोति पुन. पुनश्च न करोति तदास्यावस्तुत्व स्यात्। सर्वदाऽकर्तृत्वात्।

तस्मात् क्रमाक्रमाभ्या घटादिरर्थक्रियाकारी प्रत्यक्षसिद्ध स एवायमिति ज्ञानादक्षणिकश्च प्रतीयत एव। तस्य च यदैककार्यकरणप्रति सामर्थ्यन्तत्तदैव न पूर्व न पश्चात्तत्कार्या[2]भावात् । सामर्थ्य च तदव्यतिरिक्तमेवमुत्तरोत्तरकार्योत्पत्तावपि द्रष्टव्य। सामर्थ्यभेदेन च पदार्थभेदात् क्षणिक एव क्रमाक्रमयोनियम:। तेन यत्र सत्त्वन्तत्र क्रमाक्रमप्रतीतावपि क्षणिकत्वप्रतीतिरेव। य एव क्षणिके क्रमाक्रमयोनियमोयमेव नित्येषु तयोरयोग । तस्माद् यदेतद् घटादौ नित्यत्व प्रतीत तत् सत्त्वविरुद्धमिति[3] नित्यस्य क्रमयौगपद्याभ्यामर्थक्रियाविरोध सिद्ध उच्यते। यथा च दृष्टे घटादौ सत्त्व क्षणिकत्वव्याप्त तथाऽदृष्टेष्वप्यविशेषादिति व्याप्ति सर्वोपसहारेण प्रतिपद्य यथा यथा तेषु सत्त्व निश्चीयते तथा तथा क्षणिकत्वानुमान। सत्त्वानिश्चये तु शशविषाणवत्तेष्वसत्ताशकया क्षणिकत्वाप्रतीति स्यात्(।) न च तत्रापि बाधकप्रमाणेनैव क्षणि[4]कत्वस्य सिद्धत्वादनुमानस्य वैयर्थ्य। गृहीतव्याप्तिकस्य पुस सत्त्वनिश्चयमात्रेणैव साध्यार्थावगतेर्बाधकोत्थानवैयर्थ्यात्। विस्तरतस्त्वय व्याप्तिग्रहणप्रकारो **नैरात्म्यसिद्धौ**अभिहित इति तत्रैवावधार्य ।

ये तु सत्त्वस्य विपक्षाद् अभावेन सर्वत्र क्षणिकत्वव्याप्ति प्रतिपद्य सत्त्वात्तत्रैव क्षणिकत्वमनुमापयन्ति। तेषामनुमानोत्थानमे[5]व न स्यात्। व्याप्तिग्रहणादेव प्रमाणात् सर्वत्र क्षणिकत्वस्य सिद्धत्वात्। न च धर्मी सिद्ध सर्वस्य त्रैलोक्यस्य प्रत्यक्षत्वाद्धेतुश्चासिद्ध । पक्षीकृते च सर्वस्मिन् धर्मिणि बाधकवशाद् यदि विपक्षाभाव सिद्धस्तदा साध्यस्यापि सिद्धत्वान्नानुमानस्योत्थान स्यात्।

नान्यश्च धर्मी सिद्ध इति कथ बाधकस्य प्रवृत्तिरिति यत्किञ्चिदेतत् (।) तस्मात् स्थितमेतद[6]स्य सत्त्वविशिष्टस्य कृतकत्वस्य क्षणिकत्वाख्यो धर्म स्वभावस्तन्मात्रानुबन्धी अस्य वा क्षणिकत्वस्य स्वभावस्तन्मात्रानुबन्धी कृतकमात्रानुबन्धी प्रमाणदृष्ट इति।

यद्वा सत्त्वविशेषणरहितस्यापि कृतकत्वादे क्षणिकत्वे साध्ये नानैकान्तिकत्व। यतस्तस्य प्रथमे क्षणे य एव स्वभाव स एव चेत् द्वितीये क्षणे तदाऽभूत्वा भवनमेव स्यात् प्रथम[7]क्षणवत्। ततश्च क्षणिकत्व। अथ प्रथमक्षणे कृतकस्य 41b
जन्मैव न स्थितिर्द्वितीये तु क्षणे स्थितिरेव न जन्म। एवमपि क्षणिकत्व स्यात्। जन्मजन्मिनोरभेदात्। स्थितिस्थितिमतोश्च। न च द्वितीये क्षणे जन्म विना स्थिति-

एवं ज्ञाततद्भावस्य ह्यर्थापत्त्याऽनित्यत्वाभावे कृतकत्वाभाव इति भवति। न हि स्वस्याभावे भावो[5] भवति। अभेदात्। अन्यथा तद्भावे भवतीत्येव न स्यात्। तथा हि तदभावेऽभाव इत्युक्तम्। एवं तद्भावतावेदनेऽयमस्य स्वभाव इति तदभावे न भवति। अन्यथा[6]ऽयोगादिति तत्स्वभावताप्रतिपत्त्याऽन्वयस्मृतिर्भवति।

र्युक्ता। जन्म चेन्न तदा स्थितिस्तस्याद्वितीयादिक्षणभावित्वात्। तत्राप्येवमिति सर्वत्रोत्पत्तिरेव न स्थितिरिति क्षणिकत्वमेव। उत्पत्तिश्च हेतुकृतेति तत्रै[1]व कृतकत्व। न स्थितौ। तस्मात् कृतकत्वस्याक्षणिकत्वविरुद्धत्वान्नानैकान्तिकत्व। विस्तरेण चास्य कृतकत्वस्य क्षणिकत्वव्याप्तिर्नै रा त्म्य सि द्धा व[7]भिहितेति तत्रैवावगन्तव्या।

तस्मात् सत्त्वानन्तर्भूतस्यापि कृतकत्वस्य व्याप्ति प्रमाणदृष्टा। तदाहास्य स्वभावस्तन्मात्रानुबन्धी प्रमाणदृष्टस्तद्भावनियमात्। कृतकभावेऽवश्यमनित्यताभावनियमादिति।

एवं ज्ञातत[2]द्भावस्यानित्यस्वभाव कृतक ज्ञातवत. पुसो अर्थापत्त्या साध्यस्या**नित्यत्वस्याभावे कृतकत्व भवती**त्येवनिश्चयो **भवती**ति। यस्मान्**नहि** स्वस्यात्मभूतस्यानित्यत्वस्य**ाभावे भावो भ**वति। तदात्मभूत कृतकत्वम्भवति। कि कारणम्(।) **अभेदात्** साध्यसाधनयो.। **अन्यथे**ति यद्यनित्यत्वाभावे कृतकत्वम्भवेत्। तदा **तद्भावे** कृतकत्वाभावेऽवश्यमनित्यत्वम्**भवती[3]त्येव न स्यात्। तथे**ति यथा साधर्म्यप्रयोगे वैधर्म्यगतिस्तथा वैधर्म्यप्रयोगेऽन्वयस्मृतिर्भवतीति वक्ष्यमाणेन सम्बन्ध। तदभाव इति नित्यत्वाभावे कृतकत्वन्न भवत्यवश्यमित्युक्ते। तत एव वैधर्म्यप्रयोगात् **तद्भावतावेदिनः**। साधनस्य साध्यस्वभावतावेदिन पुस। कथन्तद्भावता वेत्तीति चेदाह। **तथा ही**त्यादि। **अय**मनित्यत्वाख्यो धर्मो**स्य** कृ[4]तकत्वस्य **स्वभा**वो येन **तदभावे** कृतकत्वन्न **भव**ति। **अन्यथे**ति (।) अनित्यत्व यदि कृतकस्य स्वभावो न भवेत्। तदा तदभावे कृतकत्वन्न भवेदित्यस्या**योगात्। इति** हेतोस्**तत्स्वभावताप्रतिपत्त्या** कृतकस्यानित्यस्वभावतोप्रतिपत्त्या**न्वयस्मृतिर्भवति।**

एतदुक्तम्भवति। य एव हेतो साध्य एव भाव स एव विपक्षेऽभाव इत्यन्वयव्यतिरेकयोस्ता[5]दात्म्यमन्योन्यव्याप्तिश्चातो हेतावन्वयप्रतीत्या व्यतिरेकप्रतीतिर्व्यतिरेकप्रतीत्या चान्वयप्रतीतिरनुमानमेव।

तेन यदुच्यते।

---

[1] Pramāṇavārttika 1 : 224.

तथा यत्र धूमः तत्राग्निरित्युक्ते कार्यं धूमो दहनस्य। तेन धूमे सति अवश्य-
मग्निर्भवति। अन्यथाऽर्थान्तरस्य तदनु[7]बन्धनियमाभावात् स्वातन्त्र्यं भावस्य 431a
स्यात्। अतः तदभावेऽपि स्वभावस्य वैकल्यात् नाभावः स्यात्। सति कार्येऽवश्यं
कारणं भवति। इदमेव कारण(स्य) कारणता अर्थान्तर[1]भावे स्वभावोपधानम्।
कार्यस्याऽपि तद्भाव एव भावः। तच्चाऽस्ति धूमे। तस्मात् कार्यं धूम इत्येवम-
न्वयेन विदिततत्कार्यत्वस्य दहनाभावे धूमो न भवतीति अर्थापत्या भवति व्यति-
रेकप्रतिपत्तिः।

तथा असत्यग्नौ धूमो न भवतीत्युक्तेर्धूमेऽवश्य मग्निर्भवतीति अर्थाद्
अन्वयप्रतिपत्तिर्भवति। अन्यथा तदभावे किन्न भवेद्।

ननु च नित्यानित्यार्थकार्य[3]त्वाभावेऽपि तयदभावे श्रवणज्ञानं न

"सामर्थ्यमिच्छत की त्तें र्न ष्ट द्वित्वावधारणमि"ति (न्यायमजरी ?) तदपास्त।

यद्वा नैवैतत् प्रमाण केवल सकेतवशाद् अन्वयमुखेन व्यतिरेकमुखेण (?न) वा प्रयुक्तमेक वाक्यमुभय गमयतीत्यदोष।

स्वभावहेतावन्यतरप्र[6]योगादुभयगतिमुक्त्वा कार्यहेतावाह। **तथेत्यादि। यत्रेति** सर्वनाम्ना सर्वोपसहारस्**तत्राग्नि**रवश्य**मित्युक्ते**ऽस्मादेवान्वयवचनात् **कार्यन्धूमो दहनस्ये**त्येवन्निश्चयो भवति। किङ्कारण(।) येन **धूमेऽवश्यमग्निर्भ**वति। अन्यथा यदि न कारणमग्निर्धूमस्य तदा**र्थान्तर**स्याग्नेस्**तदनुबन्धनियमाभावात्।** धूमे योनुबन्धो व्यापन[7]तन्नियमस्याभावात्। ततश्च **स्वातन्त्र्यम्भावस्य** धूमस्व- 32a
भावस्य **स्यात्। अत** इति स्वातन्त्र्यात् **तदभावेप्य**न्यभावेपि धूमस्**वभावस्य वैक-**
ल्यान्नाभावः स्यान्न चैवन्तस्मात् कार्यो धूम एष्टव्य। यत **कार्ये** तु धूमेभ्यु-
पगतेऽवश्यन्तत्र **कारण**मग्निर्भवति। **इद**मित्यस्यैव समर्थन। **अर्थान्तरभाव** इति कार्याभिमतस्य भावे **स्वभावोपधानं** स्वरूपप्रत्युपस्थान। **कार्यस्या**[1]पि **तद्भाव एव** कारणभाव एव **भाव** कार्यत्व। **तच्च** कारणभाव एव भावित्वम**स्ति धूमे। तस्मात् कार्यं धूम इत्येवमन्वयेन विदिततत्कार्यत्वस्य** पुसो **दहनाभावे धूमो न भव**तीत्यर्थाद् भवति।

अधुना वैधर्म्येणान्वयगतिमाह। **तथेत्यादि। असत्यग्नौ धूमो न भवतीत्युक्ते**-ऽस्माद् व्यतिरेकवचनाद् विदिततत्कार्यत्वस्य **धूमेऽवश्यमग्निर्भवतीत्येवमर्था[2]द् अन्वयप्रतिपत्तिर्भवति। अन्यथा** यदि वैधर्म्यवचनेनाग्ने कार्य धूम इत्येतन्न कथ्यते **तदभावे**ऽन्यभावे **किन्न भवेद्** धूमो भवेदेवेति व्यतिरेकनिश्चय एव न स्यात्। तस्मात् स्थितमेतत् (।) सत्यर्थान्तरत्वे यदभावे यदवश्यन्न भवति तत्तस्य कार्यमतश्च व्यतिरेककथनादन्वयो गम्यत इति।

भवति। न वै न भवति। तयोरेव ततः संशयात्। अन्यथाऽभावेन निश्चितात् कथं तद्भावपरामर्शेन संशयः स्यात्? केवलं भावनि[4]श्चयाभावात् नास्तीत्युच्यते।

अत्र परो व्यभिचारमाह। **ननु** चेत्यादि। **नित्यानित्यार्थयोः[3] कार्य**न्नित्यानित्यार्थकार्यन्तद्भावस्तत्त्व। तस्या**भावे**पि। तथा हि **श्रवणज्ञानं** शब्दस्यैव धर्मत्वादसाधारणन्तत्र न ज्ञायते किन्नित्यस्य सत शब्दस्य कार्य श्रवणज्ञानमुतानित्यस्येति। ततश्च न नित्यार्थकार्यत्व श्रवणज्ञानस्य नाप्यनित्यार्थकार्यत्वन्तथापि **श्रवणज्ञानन्न भवति** तदभावेपि नित्यानित्यार्थाभावे। तद्व्यतिरेके व्यतिरिच्यत इति यावत्। नि[4]त्यार्थाभावे तावन्न भवत्यनित्येषु घटादिष्वभावात्। अनित्याभावेपि न भवति नित्येष्वाकाशादिष्वभावात्। **न वै न भवती**ति सि द्धा न्तवादी। न वै तच्छ्रावणत्वन्नित्यानित्याभावे न भवतीत्येव शक्यम्विज्ञातु। यदि तु तदभावेन भवतीत्येवन्निश्चय स्यात् तदा तत्कार्यत्वन्नियमेन स्यात् किन्तु तदभावे न भवतीत्येव नास्ति। किङ्कारण[5]न्**तयोरेव** नित्यानित्यत्वयो**स्ततः** श्रावणत्वात् **संशयात्। अन्यथा** नित्यानित्ये वस्तुन्य**भावेन निश्चिता**च्छ्रावणत्वात्क**थन्तद्भावपरामर्शेन** शब्दे **संशयः स्यात्**। तस्मान्नित्यानित्याभ्या व्यावृत्तिरेव नास्ति श्रावणत्वस्य।

कथन्तर्ह्यसाधारणत्वाच्छ्रावणत्व नित्यानित्ययोर्नास्तीत्युच्यत इत्याह। **केवल**न्त्विवत्यादि।[6] नित्यानित्येषु श्रावणत्वस्य **भावनिश्चयाभावात्**। श्रावणत्व नित्यानत्ययो**र्नास्तीत्युच्यते**।

नन्वनित्यादिके साध्ये यदि श्रावणत्व सपक्षविपक्षयोर्दृष्ट स्यात्। स्याच्छब्दे श्रावणत्वात् सन्देह। प्रमेयत्वादिव। न चैतत् सपक्षाविपक्षयोर्दृष्टमतो
32b ऽप्रतिपत्तिरिति भ ट्टो द्यो त क रो। अथ शब्दवस्तु कदाचिन्नित्यमनित्यम्वा व[7]स्तु धर्मश्च श्रावणत्वन्तेनात सन्देह उच्यते।

तदयुक्त। एव हि वस्तुधर्मत्वस्यैव सन्देहहेतुत्व स्यान्न श्रावणत्वस्येति। अत्रोच्यते। यदि हि यत्र यत्र श्रावणत्वन्तत्र तत्र नित्यानित्ययोरभाव इति प्रतिपन्न स्यात् ततो नित्यानित्ययोरप्रतिपत्ति स्यात्। न चानित्यादियुक्ते घटादौ श्रावणत्वस्याभाव इति शब्देप्यभावस्तेन श्रावणत्वात् तत्र सन्देह एव।

ननु श्रावणत्व श्रवणज्ञानप्र[1]ति सामर्थ्यन्न च नित्यस्य सामर्थ्यमस्त्यर्थक्रियाविरोधात् (।) तत्कथमत सन्देह (।) अनित्यत्वस्यैव निश्चयादिति।

एवम्मन्यते। यदि सामर्थ्यमात्र हेतुस्तदा सत्त्वमेव तदिति न काचित् क्षति (।) (।) तस्य सपक्षसाधारणत्वादेव प्रमेयत्वादिष्वपि द्रष्टव्य। अथ श्रवणज्ञानप्रति यत्सामर्थ्यन्तद्धेतुस्तच्च न क्वचिदनित्यत्वव्याप्त सिद्धमिति कथमतोऽनित्यत्वसिद्धिरसाधारणत्वादयशब्द एव[2] तदनित्यत्वव्याप्त सिद्ध। तेनैव हि बाधकेन

यदा पुनः दृष्टान्तेन अग्निधूमयोः हेतु फल भावो न दर्शितः, तदा यत्र धूमः तत्राग्निरित्येव न स्यात् प्रतिबन्धाभावात्। अन्यभावे धूमो[5] नास्तीति ग्रर्थाद् व्यतिरेकसिद्धिः। तथा वैधर्म्येण अभावासिद्धेः अन्वयस्मृतिः व्यतिरेकः स्यात्। एकसद्भावेऽन्यप्रसिद्धचर्थं तदभावेऽसम्भवात् दृष्टान्तेन यथोक्त[6]स्वभावप्रतिबन्धोऽयमेव प्रदर्शितः॥

हेतुस्वभावाभा(वो)तः प्रतिषेधे च कस्यचित्।
हेतुः;

तावेव हि निवर्त्तमानौ स्वप्रतिबद्धं निवर्त्तयत इति कस्यचिदर्थस्य प्रतिषेधमपि साधयितु[7]कामेन हेतोः व्यापकस्य स्वभावस्य च निवृत्तिहेंतुत्वेनाऽख्येया 43।
अप्रतिबन्धे हि कथं एकनिवृत्याऽन्यनिवृत्तिसाधनम्।

युक्तोपलम्भस्य तस्य चानुपलम्भनम् ॥३१॥

प्रमाणेनानित्यत्वस्य तत्र सिद्धत्वाच्छ्रावणत्वस्य वैयर्थ्य स्यात्। एव स चासाधारणहेतूनामगमकत्व बोद्धव्य।

तस्मात् स्थितमेतत् (।) कार्यहेतौ दृष्टान्ताभ्या साध्यसाधनयोर्**हेंतुफलभावः** कथनीयो न तु दर्शनादर्शनमात्र। एव ह्यर्थापत्त्याऽन्यतरेण द्वितीयप्रतीतिर्भवेत्। अन्यथा न स्यादित्याह। **यदा पुनरित्या**[5]**दि। तदा यत्र धूमस्तत्राग्निरित्येव न स्या**दित्यन्वय एव न स्यात् **प्रतिबन्धाभावात्**। यदा चान्वय एव न सिद्धस्तदा कुतोऽन्यभावे **धूमो नास्ती**त्यर्थाद् **व्यतिरेकसिद्धि**। **तथा वैधर्म्ये**णादर्शनमात्रस्य ख्यापनात् साध्याभावे हेत्व**भावासिद्धेः** कुतस्तद्वारेणा**न्वयस्मृति**। **यथोक्त** इति तादात्म्यतदुत्पत्तिलक्षण। **एकसद्भावे** कार्यस्वभावलिङ्गस्य सद्भावेऽन्यप्र[4]**सिद्ध्यर्थं** कारणस्य स्वभावस्य च लिङ्गिन प्रसिद्धचर्थ। **तदभावे यथोक्तप्रतिबन्धाभावे** सत्येकसद्भावेऽन्यप्रसिद्धे**रसम्भवात्**॥

हेतुस्वभावाभाव इति हेत्वभावो व्यापकस्वभावाभावश्च। अत इत्यनन्तरोक्तात् कारणात् **कस्यचित्** कार्यस्य व्याप्यस्य **च प्रतिषेधे**। चकारात् प्रतिषेधव्यवहारे च साध्ये। **हेतु**र्लिङ्ग। किङ्कारण (।) यस्मात् **तावेव हि** कारणव्यापको[5]**नि वर्त्तमानौ स्वप्रतिबद्ध** कार्य व्याप्य च स्वभाव **निवर्त्तयत इति कस्यचिदर्थस्य** कार्यस्य व्याप्यस्य वा **प्रतिषेधमपि साधयितुकामेन**। अपिशब्दाद् व्यवहारमपि (।) **हेतोः** कारणस्य **व्यापकस्य** च **स्वभावस्य निवृत्तिहेंतुत्वेनाख्येया**। किङ्कारण। **अप्रतिबन्धे हीत्यादि**। न च ताभ्यामन्य प्रतिबन्धोस्तीति भावः। **युक्तो** न्याय्य **उपलम्भो** यस्य स तथा[6]दृश्यस्येत्यर्थ। **तस्य**

प्रतिषेधहेतुः। प्रतिषेध[1]विषयव्यवहारस्य हेतुरिति तद्धेतुरित्युक्तः। तथाभूतानुपलम्भस्य स्वयं प्रतिषेधरूपत्वात् कारणव्यापकानुपलब्धी इत्युभयं हेतुः॥

इतीयं त्रिवि(धाप्युक्ता)नुपलब्धिरनेकधा।
(तत्तद्विरुद्धाद्यगतिगति)भेदप्रयोगतः॥३२॥

त्रिविध एव प्रतिषेधहेतुः। कारणस्य व्यापकस्यः स्वात्मनश्च उपलभ्यसत्त्वस्यानुपलब्धिः। सोऽयं प्रयोगवशेन तद्विरुद्धाद्यगतिगतिभेदेन त्रिविधः प्रोक्तः। तदगतिः तद्विरुद्धगतिः विरुद्धकार्यगतिश्च एतदेव तद्गतितद्विरुद्धगत्या-

---

चेति स्वभावस्य**ानुपलम्भन प्रतिषेधहेतुः**। न चाय प्रतिषेधस्यैव हेतु किन्तु **प्रतिषेधविषयो व्यवहारस्तस्य हेतुरिति** कृत्वा तद्धेतुः प्रतिषेधहेतुरि**त्युक्त**। किं कारण (।) न प्रतिषेधहेतुस्**तथाभूतानुपलम्भस्य** दृश्यानुपलम्भस्य **स्वयं प्रतिषेध-**
3a **रूपत्वात्**। हेतुर्व्यापकानुपलब्धिरिति **कारण**ानुपलब्धिर्**व्यापका[7]नुपलब्धि**श्च। **उभयस्यापी**ति प्रतिषेधस्य प्रतिषेधव्यवहारस्य च॥

इति एव**मियम**नुपलब्धि। सक्षिप्य **त्रिधाप्युक्ता** सती पुन**रनेकधो**क्ता। यथात्रैवाऽष्टधा प्राग् विभक्ता। केन प्रकारेणेत्याह। **तत्तद्विरुद्धे**त्यादि। तच्छब्देन प्रक्रान्त स्वभावकारणव्यापकत्रयं गृह्यते। तेन स्वभावविरुद्धेन विरुद्धन्त द्विरुद्धन्त्रि[1]विधमेव भवति। स्वभावविरुद्धकारणविरुद्धव्यापकविरुद्धभेदा। तद्विरुद्धमादिर्यस्य **तत्तद्विरुद्धादि**। आदिशब्देन विरुद्धकार्यस्य कारणविरुद्धकार्यस्य च परिग्रह। तच्च तद्विरुद्धादी। तयो**रगतिगती**। तदगतिस्तद्विरुद्धादिगतिश्चेत्यर्थ। तयो**र्भेद**स्तेन **प्रयोगस्तस्मा**त् प्रयोगभेदतोनेकधोक्ता। तत्र तदगत्या तिस्रोनुप[2]लब्धय सगृहीता स्वभावानुपलब्धि कारणानुपलब्धि व्यापकानुपलब्धिश्च। तद्विरुद्धगत्या तिस्र एव। स्वभावविरुद्धोपलब्धि कारणविरुद्धोपलब्धि व्यापकविरुद्धोपलब्धिश्च। आदिशब्दात् विरुद्धकार्योपलब्धि कारणविरुद्धकार्योपलब्धिश्चेति। एवमष्टविधस्य प्रागुक्तस्यानुपलम्भस्य सग्रहो भवति।

त्रिविध एव हीत्यादिना कारि[3]कार्थमाह। **उपलभ्यसत्त्वस्येत्युपलम्भयोग्यस्य हेतो**रनुपलब्धिरिति सम्बन्ध। **व्यापकस्य स्वात्मनश्चोपलभ्यसत्त्वस्ये**ति वर्त्तते। **सोय**न्त्रिविधप्रतिषेधहेतु **प्रयोगवशेना**नेकप्रकार उक्त इति सम्बन्ध। कथ प्रयोग वशेनेत्याह। **तत्तद्विरुद्धाद्यगतिगतिभेदप्रयोगत** इति। **एतदेव तस्यागत्येत्या**दिना विभज्यते।[4] **तस्यागत्ये**ति स्वभावकारणव्यापकानुपलब्ध्या। **तद्विरुद्धगत्ये**ति स्वभावकारणव्यापकविरुद्धोपलब्ध्या। **विरुद्धकार्यगत्ये**ति विरुद्धकार्योपलब्ध्या।

दिभेदप्रयोगैः। यथोक्तं प्राक् ॥

घ अविनाभावनियम

कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्।

इत्यादिभेदप्रयोगैरिति कारणविरुद्धकार्योपलब्ध्यादिभेदप्रयोगै । **यथोक्तं प्राग**नु पल ब्धि प्र भे द चि न्ता या (१।६) ॥

यत एव प्रतिबन्धवशाद् गमकत्वात्तस्मात्। कार्य**कारणभावाद्वा**[5] **नियामकात्** साध्यसाधनयोरव्यभिचारसाधकात् **स्वभावा**द्वा तादात्म्यलक्षणा**न्नियामकात्** । कार्यस्य स्वभावस्य च लिङ्गस्य**ाविनाभावः** साध्यधर्म विना न भाव इत्यर्थ । न चासाधारणस्य साध्याविनाभावोस्ति सन्देहहेतुत्वात्। अविनाभावे तु तन्निश्चायकेनैव प्रमाणेन तत्र धर्मिणि साध्यस्य सिद्धत्वात् कथमस्य गमकत्व।

तेन भ ट्टे न य[6]दुच्यते ॥

"अविनाभावशब्दोप्य सकलार्थभाक्।
नानुमा योग्यसम्बन्धप्रतिपत्ति करोति न ॥
यदि तावद् विनाभावो न स पश्चाद् विशिष्यते।
ततोऽसाधारणेप्यस्ति स इति स्यादकारण ॥
यो ह्यसाधारणो धर्म स तेनैवात्मसात्कृत ।
विना न भवतीत्येव ज्ञातो हेतु प्रसज्यत' इति (।)

तदपास्त।[7] अविनाभाव एव हि नियम । साध्य विना न भवतीति कृत्वा। 33b

यद्येव किमर्थ पुर्ननियमग्रहण(।)सत्त्य(।) परमतनिरासार्थ। स ह्यविनाभावव्यतिरेकेणान्य नियममिच्छति। यदाह भ ट्ट ॥

"एवमन्योक्तसम्बन्धप्रत्याख्याने कृते सति।
नियमो नाम सम्बन्ध स्वमतेनोच्यतेऽधुना ॥
कार्यकारणभावादिसम्बन्धाना द्वयी गति ।[1]
नियमानियमाभ्या स्यान्नियमस्यानुमाङ्गता ॥
सर्वेप्यनियमा ह्येते नानुमोत्पत्तिकारण।
नियमात् केवलादेवन्न किञ्चिन्नानुमीयते ॥
तस्मान्नियम एवैकः सम्बन्धोऽत्रावधार्यते।
गमकस्यैव गम्येन स चेष्ट प्राङ् निरूपित. ॥
नियमस्मरत सम्यग् नियम्यैकाङ्गदर्शनात्।
नियामकाङ्गविज्ञानमनुमानन्तदङ्गिष्वि"ति (।)[1] तदपा[2]स्त ॥

अविनाभावनियमोऽ(दर्श)नान्न न दर्शनात् ॥३३॥
अवश्यंभावनियम(: कः परस्यान्यथा परैः) ।
अर्थान्तरनिमित्ते वा धर्मे वाससि रागवत् ॥३४॥

कायकारणभावादिसम्बन्धाभावे नियम एव न स्यात्। अप्रतिबद्धाना सहभावनियमाभावात्। पाण्डुत्वादिमात्रस्य चाग्न्यकार्यत्वात्। देशकालाद्यपेक्षया च लिङ्गस्य गमकत्वान्नियम एवेति कथ कार्यकारणभावादिसम्बन्धेपि द्वयी गतिरुच्यते। अथ स्यात्(।) कार्यकारणभावादिसम्बन्धमभ्युपगच्छतापि यावत् साधनस्य साध्ये[3]नियमो न निश्चितस्तावन्न साध्यप्रतिपत्त्यङ्गत्वन्तेन कार्यकारणभावे सत्यपि नियम एव सम्बन्धोभ्युपगम्यते। तस्यैव प्रतिपत्त्यङ्गत्वात्तद्वक्तु स एवैकोनुमानाङ्ग शेषास्तद्व्यक्तिहेतव इति। तदयुक्त (।) नियमो हि तदायत्ततैव (।) सा च तादात्म्यतदुत्पत्तिस्वभावैव (।) तेन तादात्म्यतदुत्पत्तिनिश्चय एव नियमनिश्चयो न पुनर्दर्शनाद[4]र्शनाभ्यान्नियमनिश्चयो व्यभिचारात्।

ननु यथा दर्शनादर्शनयोर्नियमनिश्चयप्रति व्यभिचारस्तथा कार्यकारणभावनिश्चयेपि स्यादिति।

तदयुक्त। विशिष्टाभ्यामेव दर्शनादर्शनाभ्या कार्यकारणभावनिश्चयाभ्युपगमात्। एतच्चात्रैव वक्ष्यति।

यदप्यु म्वे के नोच्यते। "शतशो य[5]दग्नौ धूमदर्शनन्तदन्यथानुपपत्त्या नियतोय धूमोग्नाविति यन्नियमज्ञानमुत्पद्यते। तस्यानग्नौ धूमदर्शनम्बाधक (।) न च तदस्तीति धूमस्याग्नौ नियम" इति।

तदयुक्त। अग्निकार्यत्वाभावे ह्यनग्नौ धूमादर्शनस्यानुपलब्धिमात्रत्वेनाप्रमाणस्याबाधकत्वादनग्नौ धूमस्य शक्यमानत्वेन कथमग्नौ नियम. (।) स्तस्मात् स्थितमेतत् (।)

"कार्यका[6]रणभावाद्वा स्वभावाद्वा नियामकाद् (।)

अविनाभावनियम" (।) कार्यकारणभावादिनिश्चयाच्चाविनाभावनियमनिश्चयो"ऽदर्शनान्न दर्शनात्" (।) साध्याभावे हेतोरदर्शनमात्रान्नाविनाभावनियमनिश्चय। न दर्शनात्। नापि साध्यसाधनयो· सहभावदर्शनात्।

34a तस्मात्तदुत्पत्त्यैवार्थान्तरस्यार्था[7]न्तरेणाविनाभाव।

अन्यथेत्यासत्यान्तदुत्पत्तौ **परैः** साध्याभिमतै· परस्यानात्माभूतस्य लिगस्य **कोऽवश्यम्भावनियम**.। **अनर्थान्तरे** तु लिङ्गे तन्मात्रानुबन्धित्व साध्यधर्मस्येष्टव्यमन्यथा कृतकत्वस्य य**न्निमित्तन्तस्मा**द**र्थान्तर**मुद्गरादि**निमित्तं** यस्या नित्य-

अपि च।

अर्थान्तरनिमित्तो हि धर्मः स्यादन्य एव सः।

न हि तस्मिन् निष्पन्नेऽप्यनिष्पन्नो भिन्नहेतुको वा तत्स्वभावो युक्तः।[6] **अयमेव भेदो भावानां कारणभेदो विरुद्धधर्माध्यासकारणभेदौ वा।**

तौ चेद् न भेदकौ तदा न कस्यचित् कुतश्चिदपि भेद इति एकं द्रव्यं विश्वं[7] **स्यात्। ततश्च सहोत्पत्तिविनाशौ सर्वस्य च सर्वत्रोपयोगः स्यात्। अन्यथा एकमित्येव न स्यात्। नामान्तरं**[1] **वा अर्थमभ्युपगम्य तथाभिधाना**[1]**त्।** 432a

---

त्वस्येष्यते। तस्मिन् वा **धर्मे**ऽवश्यम्भावनियम क। किमिव **वाससि रागवत्।** निष्पन्ने वाससि कुसुम्भादि[1]निमित्तो यो राग पश्चाद्भावी॥

तत्र यथा नावश्यम्भावनियमस्तद्वदनित्यत्वस्यार्थान्तरहेतुत्व इष्यमाणे न केवलमयन्दोषोऽयमपरो दोष इत्याह। **अपि** चेत्यादि। **अर्थान्तरनिमित्तो** नित्यत्वाख्यो **धर्मः स्यादन्य एव** (।) तस्मात् स्वभावभूतात् कृतकादेस्तथाहि साध्यधर्मस्यार्थान्तरनिमित्तत्वाभ्युपगमे द्वयमिष्ट साधननिष्पत्तावनिष्पत्तिभि[2]न्नहेतुकत्व च। एतच्च नान्तरेण स्वभावभेद घटते। यस्मा**न्न हि तस्मिन्** साधनस्वभावे **निष्पन्नेऽप्यनिष्पन्नो भिन्नहेतुको वा** साध्यधर्मस्तत्स्वभावो **युक्त**। पूर्वनिष्पन्नस्य भिन्नहेतुकस्य च लिङ्गस्य स्वभावो युक्तो यस्मा**दयमेव** खलु लोकप्रतीतो **भेदो भावानां** यो विरुद्धधर्माध्यासो विरुद्धधर्मयोग। निष्पत्त्यनिष्पत्ती चात्र विरुद्धौ धर्मौ। तथायमेव[3] भेदहेतुर्भेदस्य जनको य कारणभेद सामग्रीभेदश्चात्र **कारणभेदो** द्रष्टव्य। एतेन भेदस्वरूपभेदकारणञ्चोक्त॥

भेदप्रतिभासस्तु भेदग्राहक। **तौ चेद् विरुद्धधर्माध्यासकारणभेदौ** न भेदकाविश्ये(?प्ये)ते। **तदा न कस्यचिद्वस्तुन कुतश्चिदर्थाद् भेद इत्येकन्द्रव्यम्विश्व** समस्तञ्जगत् **स्यात्**। त्रैगुण्यस्याविशेषादैक्य सर्वस्येष्टमेवेति चेदाह। **ततश्चे**[4]त्येकत्वात् **सहोत्पत्तिविनाशौ**। एकस्योत्पादे सर्वस्योत्पादो विनाशे च विनाश स्यादित्यर्थ। **सर्वस्य च सर्वत्र** कार्य **उपयोगः** कारणत्व **स्याद्**। सहोत्पत्याद्यनभ्युपगमे। सर्वम्वस्त्वे**कमित्येव न स्यात्**। अथोपयोगादिभेदेन परस्परभिन्नात्मतेष्यते भेदा(ना) **नामान्तरम्वा** स्यात्। बहूनामेकमिति सज्ञा कृता स्यात्। किङ्कारणम (।) अर्थ परस्परभिन्न[5]**मभ्युपगम्य तथाभिधानात्**। एकमित्यभिधानात्।

---

[1] Mın-tha-dad-par-Sad-do

ननु अनर्थान्तरहेतुत्वेऽपि भावकालेऽनित्यतानिष्पत्तेः तुल्याऽतत्स्वभावता।

(न।) अपूर्वस्वभावलाभो निष्पत्तिरुच्यतेऽनित्यता। स एव हि भावः[2] क्षणस्थितिधर्मा सैवाऽनित्यता। धर्मधर्मितया वचनभेदे निमित्तमुत्तरत्र वक्ष्यामः।

अथ स्यात् प्राक्प्रध्वसाभावान्तर्वर्तिसत्तासम्बन्धोऽनित्यता। सा च कृतक-निष्पत्तिकाले निष्पन्नैव केवल प्रध्वसेन्नोत्तरकालमभिव्यज्यत इति (।)

तदप्ययुक्त। यतो यावत् प्रध्व सो नोत्पद्यते तावत् कथमन्तरालवर्त्यनित्यता। प्रध्वसोत्पत्तावपि कथमन्तरालवर्त्तित्वमस्या (।) कृतकस्वभावत्वम्वा भाव[6]-स्यैवाभावात्।

नन्वित्यादि पर। **अनर्थान्तरहेतुत्वेपि** विनाशकारणानपेक्षत्वेपि त्वन्मतेनानि-त्यताया। **भावकालेऽनित्यतानिष्पत्तेः**। भावस्य सत्ताकाले तस्या अनित्यताया अनिष्पत्ते र्भावादुत्तरकालमनित्यता भवतीति मन्यते। तुल्याऽतत्स्वभावा। यथार्थान्तरहेतुत्वेपि निष्पत्ति. स्यात् (।) तयोर्नानात्वन्तर्थाऽनर्थान्तरहेतुत्वेपीति[7]

34b **तुल्याऽतत्स्वभावता**।

नेत्यादिना प्रतिविधत्ते। **अपूर्वस्वभावलाभो निष्पत्तिरुच्यतेऽनित्यता** च भावनिवृत्तिरूपा ततो निष्पत्तेरेवाभावात् कथ विरुद्धधर्मसर्ग। यदि तर्हि नानि त्यता वस्तु सती कथ साध्यसाधनयोस्तादात्म्यलक्षण सम्बन्ध इत्याह। **स एव हि भाव** इति। क्षणे **स्थिति**र्या **सैव धर्मो** यस्येति। निवृत्तिधर्मा स्वभाव एवा-**नित्यतो**च्यते स एव साध्य।[1] तेन तादात्म्य हेतुसाध्ययोर्व्यतिरिक्तार्थत्वनित्यता नीरूपा(।)तेन भावस्यानित्यता भवतीतीत्येवमादिभिर्वाक्यैर्भावस्य न किचिद्रुप विधीयतेऽपि तु दृष्ट रूप नास्तीत्ययमर्थोभिधीयते धर्मान्तराभिधाने भावनिवृत्त्य-प्रतिपादनप्रसङ्गात्।

यदि भाव एवानित्यता कथन्तर्हि शब्दस्य धर्मिणो नित्यता धर्म इति वचनभेद इत्यत आह। **वचनभेदे**पीत्यादि। **धर्मधर्मि[2]तया** यो **वचनभेदो** वाचकान्यत्व-न्तत्रापि **निमित्तमुत्तरत्र वक्ष्याम**।

एतेन यदप्युच्यते ऽ ध्य य ना वि द्ध क ण र्णो द्यो त क रा दि भि'। यदि तुलान्तयोर्नामोन्नामवत्कार्येत्पत्तिकाल एव कारणविनाश। यदि (?तदा) कार्यका-रणभावो न स्याद् यत कारणस्य विनाश कारणोत्पाद(।)एव भाव एव नाश इति वचनादेवञ्च कारणेन सह कार्यमुत्पन्नमिति प्राप्त। यदि च भा[3]व एव नाश प्रथमेपि क्षणे भावस्य न सत्ता स्यात्। विनाशाद् भावनिवृत्तिश्च विनाशो लोक-

स्वहेतोरेव तथोत्पत्तेः तां क्षणस्थितिधर्मतां तत्स्वभावं पश्यन्नपि मन्दबुद्धिः सत्तोपलम्भेन सर्वदा तथाभावस्य शङ्कया सदृशापरोत्पत्तिविप्रलब्धो वा न व्यवस्यति।

प्रतीतो न भाव एव। सर्वकाल च नाशसद्भावाद् भावस्य सत्व स्यात्। अथ कारणोत्पादात् कारणविनाशो भिन्नस्तदा कृतकस्वभावत्वमनित्यत्वस्य न स्यात्। व्यतिरिक्ते च नाशे जाते तस्य क्षणस्य न निवृत्तिरिति कथ क्षणिकत्वमिति (।)

तदपास्त (।) द्विविधो हि विनाश इष्यते भा[4]वनिवृत्तिरूपो भावश्च (।) तेनोत्पन्नो भाव कार्यङ्करोति कार्यकाले च कारणनिवृत्तिरुपो विनाशो लोकप्रतीत एव(।) नायम्भावस्वभाव इष्यते (।) नापि कारणोत्पादाद् अभिन्नो भिन्नो वा नीरूपत्वात् केवलमस्य भेदाभेदप्रतिषेध एव क्रियते। तथा च वक्ष्यति (।)

"भावे ह्येष विकल्प स्याद् विधेर्वस्त्वनुरोधत" (१।२८१) इति।

तेन व्यतिरिक्ते नाशे जाते क्षणस्य न निवृत्ति[5]रित्यपास्त। यतश्च द्वितीयक्षणोत्पत्तिकाल एव प्रथमक्षणे निवृत्तिस्तेनैकक्षणस्थायी भावो विनाशशब्देनोच्यतेऽय च विनाशो भावरूपत्वात्साधनस्वभाव एव। कार्योत्पत्तिकाले च निवर्त्तत इति कार्यभिन्नकालभावी न चास्य सर्वकालम्भावो भावस्यासत्वात्।

यद्वा विनश्वरोऽय विनाशोऽस्येति द्वाभ्या धर्मधर्मिवाचकाभ्यामविनाशिव्या-वृ[6]त्तस्यैवैकस्य भावस्य भेदान्तरप्रतिक्षेपाप्रतिक्षेपाभ्यामभिधानाद् भाव एव नाश उच्यते इति सर्वं सुस्थ।

यदि तर्हि भाव एवानित्यता तदा भावप्रत्यक्षीकरणे सापि प्रत्यक्षैवेति कस्मान्न तथैव निश्चीयत इत्यत आह। **तामि**त्यादि। **क्षणस्थितिधर्मतां स्वभाव**मनित्यताख्य **पश्यन्नपि** प्रत्यक्षीकुर्वाणोपि **न व्यवस्य**ति। न निश्चिनोतीति सम्ब[7]न्ध। 35a

कस्मात् क्षणस्थितिधर्मतास्वभाव इत्याह। **स्वहेतोरेव** सकाशात्**तथा क्षणस्थित**धर्मतयोत्**पत्तेः**। कि पुन पश्यन्नपि न व्यवस्यतीत्याह। **मन्दबुद्धि**रिति। अनादिससाराभ्यस्तया नित्यादिरूपाविद्यावासनया मन्दा बुद्धिर्यस्य स तथाऽन्यथा दृष्टे वस्तुनि सर्वात्मना किमिति न निश्चय स्याद् (।) अनेन तु योगिना सत्यपि सदृशदर्शने मन्दबुद्धित्वाभावात् क्षणिकत्वनि[1]श्चयो भवतीत्युक्तम्भवति।

यदि तर्ह्यविद्यया नानित्यत्वाध्यवसायो विनश्यत्यपि भावे माभूदनित्यताध्यवसाय इत्याशक्य बाह्यमपि भ्रान्तिबीजमाह। **सत्तोपलम्भे**नेत्यादि। य. सत्ताया एवोपलम्भो नाभावस्य तेन सत्तोपलम्भेन।

एतदुक्तम्भवति (।) उत्तरक्षणोत्पादकाल एव पूर्वक्षणविनाशात् पूर्वोत्तरयो क्षणयोरभावेनाव्यवधानान्नैरन्तर्येणा[2]न्यत्वाग्रहात् **सर्वदा** द्वितीयादिक्षणेष्वपि

सत्ताया एवोपलम्भेन **तथाभावः** पूर्वदृष्टस्य भाव सद्भावस्तस्य या **शङ्का** कदाचित्स एवायमित्येवरूपा भूता भ्रान्तस्यापि स एवायमिति दर्शनाच्छकेत्याह। तया **विप्रलब्धो** वचितो **न व्यवस्यति**।

अग्निधूमयोरपि तर्हि कार्यकारणभावनिश्चयो न स्यादभावाव्यवधानेनान्यत्वाग्रहादित्याह। **सदृशापरोत्पत्ते**रि[3]त्यादि। दृष्ट च सदृशापरदर्शन शुक्तिकादौ सत्यपि भेदभ्रान्तिनिमित्त। एतच्च **नै रा त्म्य सि द्धौ**[1] विभक्तमिति तत्रैवावधार्य।

तेन सर्वात्मना पूर्वक्षणसदृशस्यापरस्योत्पत्तिस्तया विप्रलब्धो न पूर्वक्षणादुत्तरक्षणमन्यत्वेनाध्यवस्यत्यपि तु स एवायमित्यत एव न पूर्वक्षणस्य विनाशप्रतीतिरुत्तरस्य चोत्पत्तिप्रतीति। अग्निधूमयोस्त्वेकान्तेन विस[4]दृशत्वान्नैरन्तर्ये सत्यप्यन्यत्वग्रहाद् भवति कार्यकारणभावनिश्चय। वा शब्दस्त्वनवक्लृप्तिसूचनार्थं।

तेनायमर्थो यदि सत्तोपलम्भे व्यभिचार सदृशापरोत्पत्त्या वा विप्रलम्भ सर्वदास्त्येव विप्रलम्भ इत्येव पर।

अथवा कि पुन पश्यन्नपि न व्यवस्यतीत्याह। सत्तोपलम्भेन। पूर्व य सत्तोपलम्भेन प्रतीयमाने तद्भावशङ्का पूर्वदृष्ट[5]भावारोपस्तेन विप्रलब्ध न व्यवस्यति। एवन्तर्ह्यादिक्षणदर्शन एवाध्यवसाय स्यात्। पूर्व सत्तोपलम्भाभावादित्याशक्याह। **सदृशापरोत्पत्तिविप्रलब्धो** वेति। वा शब्दश्चार्थे। प्रथमक्षणसदृशस्य द्वितीयक्षणस्योत्पत्त्या च विप्रलब्धो न व्यवस्यति। योगिनामपि तर्हि निश्चयो न स्यादित्याह। **मन्दबुद्धिरि**ति। तेन बाह्याध्यात्मिकविप्रलम्भनिमित्तसद्भा[6]वात् पृथग्जनाना निश्चय। योगिनान्तु सत्यपि सदृशदर्शने पटुबुद्धित्वान्निश्चयो भवत्येव।

तस्मात् स्थितमेतत् (।) क्षणस्थितिधर्मतां पश्यन्नपि सदृशापरोत्पत्त्या विप्रलब्धो न व्यवस्यतीति।

ननु भावस्य क्षणिकत्वे सति पूर्वोत्तरक्षणाना विभागेन प्रतिभास स्यात्। अप्रतिभासनाच्च कथम्पश्यन्नपि न व्यवस्यतीत्युच्यते। अथ नीलाद्यव्यतिरिक्त-
35b त्वात् क्ष[7]णिकत्वस्य नीलग्रहे ग्रह।

युक्तमेतत्। किन्त्विदमत्र निरूप्यते (।) किमिद नीलमक्षणिकमुत क्षणरूपमथ सन्तान। तत्र यद्यक्षणिकन्तदा नीलप्रतिभासे कथ क्षणिकत्वप्रतिभास। अथ क्षणरूप। नन्विदमेवासिद्धमिति कथ नीलप्रतिभासे क्षणप्रतिभास उच्यते।

---

[1] Pramānavārtika 1 · 225

क्षणाप्रतिभासनाच्च न सन्तानरूपस्य नीलस्य प्रतिभास । अथ नीलमात्रप्रतिभासे सति क्ष[1]णिकत्वप्रतिभास.। तदयुक्त। प्रतिभासाप्रतिभासाभ्या हि प्रत्यक्षस्य ग्रहणाग्रहणे। नान्यथा। तदाह। तद् यदपि गृह्णाति तत्प्रतिभासेनेति। न च क्षणाना प्रतिभास इत्युक्त।

यदि च नीलाद्यव्यतिरिक्त क्षणिकत्वन्तदा नीलनिश्चये क्षणिकत्वस्य निश्चितत्वादनुमानस्य वैयर्थ्य स्यात्। यस्त्वाह। एकज्ञानविषयत्वमेव क्षणिकत्व पूर्वोत्तरज्ञानविषय[2]त्वव्यावृत्तस्यैव चेदानीन्तनज्ञानविषयत्वस्य प्रतिभासनात्(।) पूर्वापरक्षणविलक्षण एव क्षण. प्रत्यक्षेणानुभूतनिश्चितोनुमानेन तु प्रत्यक्षवृत्तमेव परामृश्यत इति नानुमानस्य वैयर्थ्यमिति।

तदयुक्त। यतो यद्येकज्ञानस्याक्षणिकत्वन्तदार्थस्याप्यक्षणिकत्व स्यात्। अथ तस्य क्षणिकत्वन्तत्कुतोऽवगत। तस्याप्येकज्ञानविषयत्वादिति चे[3]दनवस्थयैव प्रतिपत्ति क्षणिकत्वस्य। अथ ज्ञानक्षणस्य प्रतिभासोऽभ्युपगम्यतेसावर्थक्षणस्य किन्नाभ्युपगम्यते। अन्यथैकस्यापि क्षणस्यानेकज्ञानविषत्वादनेकत्व स्यात्।

भ ट्ट वा सु दे व स्त्वा ह। "पूर्वोत्तरक्षणाना विनाशेनाप्रतिभासनमेवाक्षणिकत्वप्रतिभासनमतोक्षणिकत्वग्राहकमेव सर्वम्प्रत्यक्ष केवल क्षणिकत्वा[4]नुमानेन भ्रान्त साध्यत" इति (।)

एतदप्ययुक्त। प्रतिज्ञाया प्रत्यक्षवाधितत्वेनानुमानस्योत्थानाभावात्। निर्विकल्पकस्यापि प्रत्यक्षस्य भ्रान्तत्वे सम्बन्धग्रहणाच्च। पश्यन्नपीति ग्रन्थविरोधश्च (।) तस्मादयुक्तमुक्त। पश्यन्नपि न व्यवस्यतीति।

अत्रोच्यते। यथा ह्यर्थक्षणाना पौर्वापर्यन्तथा ज्ञानक्षणानामपि तेन पूर्वकेण ज्ञानक्षणेन पूर्वक एवार्थक्षणो गृह्यते[5] नोत्तर । उत्तरेणाप्युत्तर एव न पूर्व इति (।) एकस्मिन् ज्ञाने तयोरप्रतिभासनात् कथम्पूर्वस्मादयमन्य इति विभागेन प्रतिभास स्यादिति चोद्यते। स्वरूपप्रतिभास एव च भावस्यान्यस्माद् विवेकप्रतिभास सुमेरुभिन्नप्रतिभासवत्। स च क्षणस्याप्यस्त्ये वेति कथ न विवेकप्रतिभास । दृष्टो दृश्यत इति प्रतीतेश्च। अन्यो हि दृष्ट स्वभा[6]वोन्यश्च दृश्यमान । तथा हि प्रथमदर्शी दृश्यमानमेव स्वभावम्भावस्य पश्यति न तु दृष्टमित्यनयोर्भेद एव। केवलमेकान्तसदृशयो पूर्वापरक्षणयोरभावेनाव्यवधानाद् घटपटादिवद् विभागप्रतिपत्तिर्न भवति। नापि विभागेनाप्रतिभासादभेदोपि (।) न हि शुक्तिकायान्तदेवेदमस्मदीय रजतमिति प्रवर्त्तमानस्य शुक्तिकारजतयो[7]र्विवेकप्रतिभा- 36a
साभावादभेदोपि। तस्माद् यथात्र निर्विकल्पके ज्ञाने शुक्तिकाया स्वरूपप्रतिभास एवान्यस्माद विवेकप्रतिभास । तथैकस्यापि क्षणस्य स्यात (।) केवल पूर्व क्षण

कस्मान्न विभागेन स्मर्यत इति यदि पर चोद्य स्यात्तत्र चोक्तमेव सदृशापरोत्पत्ति-विप्रलब्धैर्न स्मर्यत इति।

ननु तथापि क्षणो न प्रतिभासते। एकाण्वत्ययकालत्वेनैव भावस्याप्र[1]तीते'। न तु यद्येकस्मिन् क्षणेस्याप्रतिभास कथमक्षणिकस्य प्रतिभास प्रतिक्षणमप्रतिभासनात्। उत्पद्यमानस्य च भावस्य पूर्वापररूपविविक्तस्य प्रत्यक्षेण ग्रहणात् कथ क्षणिकत्वग्रहः। नाप्यक्षणिक प्रतीयते पूर्वापरकालयोरप्रतिभासादेव तत्सम्बन्धितयेदानी प्रत्यक्षेऽप्रतिभासनात् पूर्वकालसम्बन्धिस्वभावस्येदानीमप्रतिभास ए[2]व विनाशोऽन्यस्वभावस्य प्रतिभास एवोत्पाद इति कथमुच्यते पूर्वोत्तरक्षणाना विनाशोत्पादाप्रतिभासनाद् अक्षणिक इति। नाप्यनेकक्षणरूप इदानीन्तन' कालोनेकक्षणसम्भवे गृहीतादिरूपताऽस्य स्यात् न व्यर्थता।

न हि प्रत्यक्षभाविना निश्चयेनेदानीमेवेदमस्तीति निश्चीयते (।) किन्तर्हीदानीमस्तीति। अनुमानेन त्विदानीमेवा[4]स्तीति साध्यते।

तस्मात् स्थितमेतत् (।) पश्यन्नपि न व्यवस्यतीत्यादि।

ननु यदि नित्य सदृश इति प्रत्यक्षेण निश्चय स्यात्स एवायमिति बुद्धिर्भ्रान्तिर्यावता सर्वदा स एवायमिति प्रतीतिर्दृढरूपोत्पद्यत इति कथ भ्रान्तिस्तदाह भट्ट'[1]॥

"नित्य सदृश एवेति यत्र रूढा मतिर्भवेत्।
स इति प्रत्यभिज्ञान भ्रान्तिस्तत्रावकल्पते॥
इह नित्य स एवेति विज्ञा[5]न जायते दृढ।
तदस्तित्वातिरेकाच्च प्रामाण्यन्तस्य युज्यते॥
देशकालादिभेदेन तत्रास्त्यवसरो मित।
इदानीन्तनमस्तित्व न हि पूर्वधियो गत॥"

न च सर्वदानुमानेन सदृशनिश्चय। प्रत्यक्षप्रत्यभिज्ञाबाधितत्वात् प्रत्यभिज्ञाया अनुमानोत्थानाभावात्। न च प्रत्यभिज्ञाया अप्रामाण्यमितरेतराश्रयदोषात्। यतो न यावदप्रामाण्यमस्यास्ता[6]वन्नानुमानस्योत्थान यावच्च नानुमानोत्थानन्तावन्नास्या अप्रामाण्यमन्योन्याश्रयदोष इति।

अत्रोच्यते। स इत्यनेन पूर्वकालसम्बन्धी स्वभावो विषयीक्रियते। अयमित्यनेन च वर्त्तमानकालसम्बन्धी। अनयोश्च भेदो न च कथचिदभेदो वर्त्तमान-

[1] Ślokavārtika: **शब्दनित्यताऽधिकरणे ३७३, ३७४ (तदाऽस्तित्वाऽधिकत्वाच्च साधितं।)**

अन्त्यक्षणदर्शिनां निश्चयात्। पश्चात् तदनुपलम्भेन अनवस्थितिप्रतीतिः तदा नि[4]श्चयकालतयाऽनित्यता व्यवस्थिता। कार्योत्पत्तिसामर्थ्यकारणस्वभा-

---

कालभाविरूपैकस्वभावत्वाद् वस्तुन। तस्माद् भेद एव प्रत्यभिज्ञाने सति भासत इति कथ[7]मनेन क्षणिकत्वानुमानबाधा। 36b

यद्वा वस्तुनः पूर्वकालसम्बन्धित्वमिदानीमसदेव। पूर्वकालाभावात्। सत्त्वे वास्य वर्त्तमानकालसम्बन्धित्वमेव स्यान्न पूर्वकालसम्बन्धित्व विरोधादित्युक्त। तस्मात् पूर्वकालसम्बन्धित्वस्यासतो ग्राहक स इति ज्ञानाशो भ्रान्तोऽन्यथा वस्तुन स्पष्टबालाद्यवस्था ग्राहक स्यान्न च भवति। तस्माद् भ्रान्तात् पूर्वदृष्टरूपा[1]-रोपेण स एवायमिति ज्ञानात् कथमनुमानबाधा। यत्र चाक्षव्यापारस्तद्ग्राहक प्रत्यक्षमुत्पद्यते। न च पूर्वकालास्तित्वेऽधुना क्व व्यापारोऽसन्निहितत्वात्। नापि तदभेदेन तत्कथ पूर्वोत्तरकालास्तित्वयोरैक्यग्राहक ज्ञान प्रत्यक्ष स्यात्। यदा च बालाद्यवस्थाया दृष्ट वृद्धावस्थाया प्रत्यभिज्ञायते। न तत्र वा प्रत्यभिज्ञाने नित्यत्व प्रतिभासते। केव[2]ल स एवायमिति तत्त्वमध्यवसीयते। न च तत्त्वम्बा-लवृद्धावस्थयोर्भेदात्। नापि तत्त्वग्रहणान्यथानुपपत्त्या नित्यत्वादिकल्पना। सदृशापरोत्पत्तिभ्रान्तिनिमित्तादप्युत्पत्तिसम्भवात्। लूनपुनर्जातेष्विव केशेषु। न चात्र केशत्वसामान्याद् भिन्नात् प्रत्यभिज्ञान। तदिहेति बुद्ध्युत्पादप्रसङ्गात्। नाप्यभिन्नादन्यत्रानुगमे वाऽनुगतव्या[3]वृत्तरूपयो। परम्परासश्लेषेणैकान्त-भिन्नत्वात्। ततश्च त एवामी केशा इति प्रत्यभिज्ञा सदृशापरोत्पत्तिनिमित्तैवात एव भ्रान्ति। तथा घटादिष्वस्याभ्रान्तत्वाशकयानुमानस्योत्थान युज्यत एव। नापीतरेतराश्रयत्व यतो नानुमानेन प्रत्यभिज्ञाया अप्रामाण्य क्रियतेऽपि तु ज्ञायते स्वहेतुत एवाप्रमाणरूपाया निष्पत्ते। दृष्टो दृश्यत[4] इति ग्रहात्। दृष्टत्व हि न पूर्वम्भावस्यास्ति। तदा दृश्यमानैकरूपत्वात्। नाप्यधुनाऽत एव। नापि पूर्वकालसम्बन्धित्व दृश्यमानस्येदानी पूर्वमभावात्। तस्माद् दृष्टत्व-मारोप्य ग्राहिका प्रत्यभिज्ञा भ्रान्तत्वादप्रमाणैवोत्पद्यते। नाप्यस्या अप्रामाण्यनि-मित्तमनुमानस्योत्थानमपि तु साध्यप्रतिबन्धनिमित्तमत प्रत्यभिज्ञाया बाधक। विस्तरस्त्व[5]य प्रत्यभिज्ञाभङ्गविचारो नै रा त्म्य सि द्धौ कृत इति तत्रैवावधार्य।

तस्मात् स्थितमेतत् (।) ता पुन क्षणस्थितिधर्मता स्वभावम्पश्यन्नपि सदृशापरोत्पत्तिविप्रलब्ध. पूर्वक्षणविनाशाविनिश्चयान्न व्यवस्यतीति।

कथ पुनर्गम्यते सदृशापरोत्पत्त्या विप्रलब्धो न व्यवस्यतीत्यत आह। **अन्त्ये-**त्यादि। सदृशक्षणान्तराप्रतिसन्धायी क्षणोऽ**न्त्यक्षण**स्त[6]**र्दृशिनां** नष्ट इति **निश्च-**

वत्वमपि। कार्यादर्शने कारणदर्शनेऽपि अनित्येन तत्स्वभावेन कार्यदर्शनात् तथा प्रतीतिः। अन्यथाऽन्यनि[5]मित्तत्त्वे वाऽनिमित्ततैव युक्ता। अनित्यताऽर्थान्तरमेव स्यात्। तथा च भावयोगो न स्यात् तत्रानपेक्षाणां। अथापेक्षते, तर्हि सैव तस्य स्वात्मभूतस्य अनित्यतास्तीति किमपरेण। स्वभा।वतो निश्चलस्य हि अर्थान्तरेण सहापि तत्स्वभावस्य अनौचित्यात्॥

432b अनित्यता धर्मान्तरं वा, तदप्यर्थान्तरसम्भूतं चेत् कारणं वा भवेत् कार्यं वा। कार्यकारणभिन्नस्य प्रतिबन्धाभावात्। तस्याः सत्ताऽनुमानाऽसंभवात्। तत्र।

पश्चाद् भावान्न हेतुत्वं फलेप्येकान्तता कुतः॥३५॥

तद्वस्तुसिद्धेः पश्चादर्थान्तरादुत्पादे कथनं तस्य कारणम्। कार्यस्य च कारणेऽवश्यं भावात् तद् गमकं निमित्तं अनिश्चितमेवास्ति। तस्मात् तदन्यनिमित्तस्य धर्मस्य हि वस्तुनि नाऽवश्यंभावात् नानुमानम्। अथ चेत् दर्शनाऽदर्शने अन्वयव्यतिरेकप्रतीतेः नाश्रयः, कथं तर्हि धूमाद् अग्नेर्व्यभिचारः इति प्रतीतिज्ञानम्॥

एवम्।

कार्यं धूमो हुतभुजः कार्यध(र्म्मानुवृत्तितः)।

तल्लक्षणभूतानुपलम्भात् यदुपलम्भ[3]। तेन एकाभावे च यस्या-

यात्। अवगम्यते प्रागप्ययम्प्रतिक्षणमेव नश्यति केवल यथोक्तादेव विप्रलम्भहेतोर्न निश्चीयते।

नन्वन्त्यक्षणदर्शिनोपि कथन्नश्वरत्वनिश्चयो यावता तदापि सत्तोपलम्भोऽस्ति। न हि सत्तायामेवोपलभमानस्तदभावमवैतीत्याह। **पश्चा**दित्यादि। न ब्रूमोन्त्यक्षणदर्शनमात्रान्निश्चयो भवतीति किन्त्वन्त्य क्षण दृष्ट्वा पश्चाद् वि[7]

× ×

38a [1]भवति (।) तदा नोपलभ्यते **तत्तस्य कार्यं**। न चाग्निकाष्टादिसन्निधाने भवतो धूमस्यापनीतेऽश्वादौ अनुपलम्भोस्ति। अग्न्यादौ त्वनीते भवत्यनुपलम्भ। एवम्परस्परसहितौ प्रत्यक्षानुपलम्भावभिमतेष्वेव कारणेष्वसन्दिग्ध कारणत्व साध्यत इति। **तच्चे**ति यथोक्त कार्यलक्षण **धूमेस्ति** तस्मादग्नेरेव धूमो भवति। सर्वकाल चाग्निसन्निधाने भ[1]वतो धूमस्यानग्निजन्यत्व कदाचित्सदसतोरजन्यत्वा-

---

[1] 37th leaf is missing.

ऽनुपलम्भः। तत् तस्य कार्यम्। तच्च धूमेऽस्ति॥

दहेतुत्वाददृश्यहेतुत्वाद्वोच्यते। तत्र न तावत् प्रथमः पक्ष इति तृतीये परिच्छेदे "अशक्त सर्वमिति चेदि"त्यत्रान्तरे (प्र०वा० ३।४) वक्ष्याम। नाप्यहेतुत्वमिति तत्रैव वक्ष्यति। नाप्यदृश्यहेतुत्व धूमस्य। अग्न्यादिसामग्र्यन्वयव्यतिरेकानुविधानात्।

अथ स्याद् (।) अदृश्यस्याय स्वभावो यदग्न्यादिसन्निधा[2]न एव धूम कर्पूरादिदाहकाले सुगन्धादियुक्त च करोति नान्यदेति। तत्किमग्निमन्तरेण कदाचिद् धूमोत्पत्तिर्दष्टा येनैवमुच्यते। नेति चेत्। तत्कथन्नाग्निकार्यो धूमस्तद्भावे भावात्। धूमोत्पत्तिकाले चाग्नि सर्वदा प्रतीयमानोपि काकतालीयन्यायेनावस्थित इत्यलौकिकोय व्यपदेश।

अथवा स एवादृश्यस्य स्वभावो यद्यग्निना नोप[3]क्रियते तत्किमग्न्यादिसन्निधान एव धूम करोति न पूर्वन्न पश्चात्। तस्मादग्न्यादिसन्निधान एवास्वभावो धूमजनको भवति नान्यदेति तत्रापि पारम्पर्येण धूमस्याग्निजन्यत्वमेव स्यात्।

किञ्च। यथा देशकालादिकमन्तरेण धूमस्यानुत्पत्तेस्तदपेक्षा प्रतीयते तथा सर्वदाग्निमन्तरेणानुत्पत्तिदर्शनादग्न्यपेक्षाऽस्य केन वा[4]र्यते। तदपेक्षा च तत्कार्यतैव। यथा चादृश्यभाव एव धूमस्य भावात्तज्जन्यत्वमिष्यते तथा सर्वकालमग्निभावे भावदर्शनादग्निजन्यत्व किन्नेष्यते। यावता च सन्निधान एवोत्पद्यमानो भावो दृश्यते तावतामेव हेतुत्व सर्वेषा प्राग्भावस्य तुल्यत्वात्। तथा चाग्न्यदृश्यादिसामग्रीजन्यत्व धूमस्येति कुतोग्निव्यभिचार।

अन्यस्त्वाह। भ[5]वत्वग्निधूमयो कार्यकारणभावतस्तथापि न तयोरेकेन ज्ञानेन ग्रहणम्भिन्नकालत्वात्। नाप्यनेन पूर्वकेण हि निर्विकल्पकेन पूर्वकम्वस्तु मात्र गृहीत न तु कारणरूप कार्यस्य भावित्वेनाप्रत्यक्षत्वात्। उत्तरेणाप्युत्तरम्वस्तुमात्र गृह्यते न तु कार्यरूप कारणस्यातीतत्वेनाग्रहात्। नापि सविकल्पकेन तत्राप्यस्य चोद्यस्य तुल्य[6]त्वात्। तेनेदमस्मादुत्पन्नमिति न केनचिद् गृहीतमत एव न स्मरणेनापि गृह्यतेनुभवाभावादिति।

अत्रोच्यते। कार्यस्य तावदनुत्पन्नावस्थायामसत्त्वादेव न कारणसम्बन्धित्व निष्पन्नावस्थायामप्येव। निरपेक्षत्वात् (।) तथा कारणमपि कार्यनिष्पत्त्यनिष्पत्त्यवस्थाया कार्यासम्बन्ध्येव। नाप्यनयो· कार्यकारणभाव सम्बन्धो भिन्न[7]काल- 38b
त्वात्। केवलमस्येद कार्य कारण चेति कल्पितोय व्यपदेश। तेन हेतो. सकाशात् स्वरूपलाभ एव कार्यत्व। कारणस्यापि कार्य प्रति प्राग्भाव एव कारणत्व स चात्मलाभ प्राग्भावश्च भावस्याभिन्नत्वात् प्रत्यक्षगृहीत एव चेति कथ न प्रत्यक्ष-

ग्राह्य· कार्यकारणभाव केवल कार्यदर्शने सतीदमस्य कार्यकारण चेति व्यवह्रियते। यतो नाकार्यकारणयो का[1]र्यकारण भाव. सम्भवति। नापि कार्यकारणभावयोगात्तयो कार्यकारणताऽभिन्ना कर्त्तु शक्यते विरोधात्। नापि भिन्ना तयो स्वरूपेणाकार्यकारणता प्रसङ्गात्। स्वरूपेण कार्यकारणयोरपि कि कार्य कारणभावेनार्थान्तरेण कल्पितेन स्वरूपेणैव कार्यकारणरूपत्वात् (।) तस्मात् पूर्वोत्तरभाव एव तयो कार्यकारणभाव। तेन पूर्वके वस्तुनि गृह्य[2]माणे कार्यप्रत्यानन्तर्यकारणात्मक गृहीतमेव। उत्तरेण च ज्ञानेनोत्तरम्वस्तु कारणानन्तर गृह्यमाण कार्यात्मकमेव गृह्यते(।) तदानन्तर्यस्य तदभिन्नस्वभावत्वात्। अत एवास्मादनन्तरमिदम्भवतीति स्मरणमपि भवत्यानन्तर्यस्यानुभूतत्वादिति।

अ वि द्ध क र्ण स्वाह। "अविनाभावित्व एक दृष्ट्वा द्वितीयादिदर्शने सति सिध्यति (।) न च क्षणिकवादिनो द्रष्टुर[3]र(?)वस्थानमस्ति। न चान्येनानुभूतेर्थेन्यस्याविनाभावित्वस्मरणमस्त्यतिप्रसङ्गादि"ति(।)

तदयुक्त। प्रथमादेरर्थक्षणस्य प्रथमादिज्ञानक्षणेन ग्रहणादेकसन्ततिपतिताना कार्यकारणभावेन स्मरणसम्भवाच्च। यथा च क्षणिकपक्षे कार्यकारणभावस्तथोक्त[1]मेव वक्ष्यतिच।

नन्वेवमपि क्षणानामनिश्चयेन कथ कार्यकारणभावनिश्चयो न च सन्तानेन त[4]न्निश्चयस्तस्य सन्तानिभ्यो भिन्नस्याभावात् केवल सन्तानिन एव पूर्वापरकालभाविनः(।) तत्र च यदैक क्षणो न तदान्य इति एकक्षणावभास एवेति कथ सन्तानावभासः(।) तदभावात् कथ कार्यकारणभाव इति (।)

तदयुक्तम्(।)एकपरमाण्वात्मकस्य वस्तुनो भावात् स्थूलात्मना सन्तानिना नैरन्तर्यप्रतिभास एव सन्तानप्रतिभासस्तत्र च क्षणविवेकानवधारणेन सादृ[5]श्येन चैकत्वाध्यवसायादेकसन्ततिवर्तिना क्षणाना न कार्यकारणभावनिश्चय.। भिन्नसन्तानवर्तिना तु सन्तानप्रवृत्त्या विजातीयत्वाद् भवति तन्निश्चयस्तेनाग्निसन्तानपूर्वकस्य धूमसन्तानस्य प्रतीतेरग्निधूमसन्तानयो. कार्यकारणभावनिश्चय उच्यत इति यत्किञ्चिदेतत्।

अ ध्य य न स्वाह। "स्वलक्षणयो. कार्यकारणभावग्रहणे सति कथ सा[6]मान्ययोर्गम्यगमकभावो भिन्नत्वादि"ति।

तदप्ययुक्तम्(।)अनेकस्वलक्षणात्मकस्य सामान्यस्याभ्युपगमात्। तदुक्तम्(।)

[1] Pramāṇavārtika 1 : 33

स भ(वंस्तद)भावे(पि) हतुमत्तां विलंघयेत् ॥३६॥

सकृदपि तथा दर्शनात् कार्यं सिध्यति। [4] अकारणात् सकृदपि अभावात्।

"अतद्रूपपरावृत्तवस्तुमात्रप्रसाधनात् ।
सामान्यविषय प्रोक्त लिङ्ग भेदाप्रतिष्ठितेरि"ति ॥ (प्र स.)

तेन स्वलक्षणानां सम्बन्धग्रह एव सामान्याना सम्बन्धग्रहो न त्वन्य ।

नन्वनुमानवादिना बौ द्धे न यावन्ति स्वलक्षणानि त्रैलोक्ये। तानि सर्वा[7]ण्यग्नि- 39a
व्याप्तानि गृहीतव्यान्येकस्याप्यग्रहीते नैवानैकान्तिको हेतु स्यात् (।) न चैव प्रत्यक्ष कर्त्तुं शक्नोति सन्निहितविषयत्वात्। न वान्येषा स्वलक्षणानामनुमानत साध्यधर्मेण व्याप्तिग्रहणमनवस्थाप्रसङ्गादिति।

तदयुक्त यत· (।) प्रत्यक्षमग्निभेदसन्निधान एव धूमभेदात् प्रतिपत्। एष्वधूमव्यावृत्त रूप धूममनग्निव्यावृत्ताग्निमात्रकार्यमेवेत्यवधारयति (।) यथात्र तथान्यत्रापि देशा[1] दावेतद् रूपमग्निजन्यमेवेति चावधारयत्यन्यथात्राग्नि-सम्बन्धितया न प्रत्यक्षेण गृह्यते। एवमग्न्यनग्निकार्यत्वेस्योभयसम्बन्धितया प्रतीति स्यान्नाग्निसम्बन्धितयैव। प्रतीयते च(।)तस्मादन्यत्राप्येतद्रूपमग्नेरेव भवतीति निश्चयात् कुतो धूमस्याग्निव्यभिचार·। यश्च तद्रूपम्वाष्पादिविलक्षण-मवधारयितु शक्नोति तस्यैवैतदनुमान नान्यस्य। सामान्यव्याप्ति[2]ग्रहणवादि-नापि गोपालघटिकादावग्निमन्तरेण धूमसामान्यदर्शनाव्यभिचारशकयाग्नि-नियतधूमसामान्यावधारणेनैव तदनुमानम् (।) अग्निनियतधूमसामान्यावधारण-ञ्चाग्निसम्बद्धधूमाव्यक्त्यवधारणपुरस्सरमेव। न च सर्वत्र देशादावाग्निसम्ब-द्धधूमव्यक्तिविशिष्टस्य धूमसामान्यस्य ग्रहणङ्कैनचित् प्रमाणेन सम्भवति। नापि महानसादाव[3]ग्निसम्बद्धधूमव्यक्तिविशिष्ट धूमसामान्य प्रतिपन्नमन्यत्रा-नुयायिव्यक्तेरनन्वयात्। यच्च धूमसामान्यमनुयायि तन्नाग्न्यव्यभिचारि। तस्मात् सामान्यव्याप्तिग्रहणवादिनोपि कथ विशिष्ट धूमसामान्य सर्वत्राग्निना व्याप्त प्रतिपन्नमिति तुल्य चोद्य।

अथ धूमस्यान्यत्राग्निजन्यत्वे न किचिद् बाधकमस्ति तदेवेदमिति च प्रतीतेस्त-त्सामान्यम्प्र[4]तिपन्नमिष्यतेऽस्माकमपि तदेवेदमिति प्रत्ययस्योत्पत्तेस्तत्प्रतिपन्नमिष्यत इत्यावयोः को भेद इति (।)

यत्किञ्चिदेतत्। एतमेवार्थन्दर्शयन्नाह। **स** धूमो भवँस्त**दभावेऽ**ग्न्यभावे **हेतुमत्ताम्बिलंघयेद**हेतुक. स्यात्। यद्वा स धूमोग्निसम्बन्धितया प्रतीतस्त**दभावे-**ग्न्यभावे **भवन् हेतुमत्ता**मग्निसम्बन्धितया न प्रत्यक्षण प्रतीयेत। प्रतीयते च।[5] तस्मात् **सकृदपि** न केवल भूयस्त**थादर्शनादि**त्यनन्तरोक्तात् प्रत्यक्षानुपलम्भात।

कार्यस्य हि स्वकारणाभावे अकारणमेव स्याद्। न हि यद् यदभावे भवति तत् तस्य कारणम्। तद् अग्निमन्तरेणाऽपि धूमस्य भावात् तद्धेतुर्न [5]स्यात्।

अन्यहेतुकत्वात् नाहेतुकत्वमिति चेत्। नैतदेवम्। तत्राऽपि तुल्यत्वात्। तदभावेऽपि अग्नौ भवतीति तदप्यन्यत् स्यात्। अतज्जननस्वभावत्वात् एवं भवन् (एव) भवेत्। अतत्स्वभावस्याजननात् तस्याहेतुता स्यात्।

किङ्कारणम्(।)**अकारणा**दग्ने **सकृदपि** न केवल भूयोऽ**भावात्**। न हि बालुकाभ्य. सकृदपि तैलम्भवति। **कार्यस्ये**त्यादिना कारिकार्थमाह। **न हीत्या**द्यस्यैव समर्थन।

एतेन व्याप्ति कथिता भवति च धूमोग्निमन्तरेण व्यभिचारवादिन.। अनेन च पक्षधर्म कथित। त[6]**दि**ति तस्मा**दग्निमन्तरेण भाव.न्न तद्धेतु**र्नाग्निहेतुस्तथा चाहेतु **स्यादि**ति भाव।

अन्यहेतुकत्वादि वह्नेर्यदन्यच्छक्रमूर्द्धादि। तद्धेतुकत्वाद् धूमस्य **नाहेतुकत्व इति चेत्।**

नैतदेवन्तत्राप्यर्थान्तरे हेतौ कल्प्यमाने **तुल्यत्वात्**। तथा हि (।) **तदभावेप्य**न्यकारणाभावेपि पुनर**ग्नौ भवती**ति **तदप्यन्यत्**कारण न हेतु· **स्यात्**। अपि च योसौ
39b **वह्निर्यच्च** ततो[7]न्यत्कारणन्तत्कि धूमजननस्वभावमाहोस्विन्न। यद्यजनन-स्वभावन्तदा कथन्ततोग्नेरन्यतो वा **शक्रमूर्द्धादिरतज्जननस्वभावत्वात्** अधूमजन-नस्वभावाद्धूमो भवन्नैव **भवेत्**। कि कारणम्(।)**अतत्स्वभावस्य** स्वयमधूमजनन-स्वभावस्याजननात्तस्य धूमस्याहेतुता **स्यात्**।

अथ धूमजननस्वभावोन्यस्तदा द्वयोरपि वह्नित्व धूमजननस्वभावलक्षण-त्वाद् वह्ने·। एत[1]च्चोत्तरत्राभिधास्यते।

न वै स एवेत्यादि व्यभिचारवादी। अथवाग्निजनितो धम स एवान्यतो भवतीत्येव नोच्यते। यदि स एवान्यत स्याद् भवेदहेतुत्वन्तादृशस्य वह्निजनित-धर्मस्वभावतुल्यस्यान्यतो **भावात्**।

अन्यादृशादित्यादि सि द्धा न्त वा दी। तत्कि कार्यसदृश कारणमिष्यते येनैवमुच्यतेन्यादृशाद् **भवन् कथन्तादृश इति**। नान्यार्थत्वात्। यो हि धूम[2]-जनको वह्निर्दृष्टस्ततो विसदृशाद् भवन् धूम कथन्तादृशो भवति **वह्निजनित-धर्मतुल्यस्वभावो** भवति।

एतदुक्तम्भवति। यथा धूमभेदानान्तार्ण्णपर्ण्णादीना परस्परापेक्षया तादृशत्व-न्तथाग्निभेदानामपि तार्ण्णपार्ण्णादीना धूमजनकानान्तादशत्व परस्परापेक्षयैव।

न वै स एव तादृशस्य भावात् इति चेत्। अन्यादृशाद् भवन् कथं तादृश इति। **[7]तादृशाद्धि भवन् तादृशः स्यात्।** अन्यादृशादपि यदि तादृशो भवेत्, **तच्छक्तिनियमाभावात् न हेतुभेदो भेदक इति अकारणं विश्वस्य[1] वैश्वरूप्यं स्यात्।**[1] **सर्वं वा सर्वस्माज्जायेत। तस्मात् कारणस्य भेदाभेदाभ्यां कार्यस्य भेदाभेदौ न स्याताम्। तद् धूमदृष्टाकार विजातीयादर्थादुत्पद्यमाने[2] अहेतुकत्वप्रसङ्गात्॥** 433a

नैतदेवम्।

नित्यं सत्त्वमसत्त्वं वा (हेतो)रन्यानपेक्षणात्।

तेन यादृशो धूमभेद एकस्मादग्निभेदादुत्पद्यमानो दृष्टस्तादृशस्य धूमभेदस्य ता[3]दृशादेवाग्निभेदादुत्पत्ति·। यस्त्वनग्नेरुत्पन्न· सोन्यादृश एव। वाष्पादिवत्।

नन्वग्निजन्येन धूमक्षणेन तादृशो धूमक्षणजन्यो धूमक्षणस्तेनान्यादृशादपि तादृशो भवतीति चेत्(।)न। अग्निजन्यस्य हि धूमक्षणस्याग्निजन्य एवान्यो धूमक्षणस्तादृशो भवति नान्य। न हि वाष्पादीनान्तादृशत्वाध्यवसायेपि तादृशत्वम्भवति। धूमक्षणजन्यस्यापि धू[4]मक्षणस्यान्यो धूमक्षणजन्य एव धूमक्षणस्तादृशो भवति नान्य। तस्मात्तादृशादेव तादृशोत्पत्तिरिति कुतो व्यभिचार·। तेन।

"क्षणिकत्वे कथम्भावा क्वचिदायत्तवृत्तय।
प्रसिद्धकारणाभावे येषाम्भावस्ततोन्यत॥
ततश्चानग्नितो धूमाद् यथा धूमस्य सम्भव।
शक्रमूर्ध्नस्तथा तस्य केन वार्येत सम्भव" इति (॥)

निरस्त। प्रथमस्य ह्यग्निजन्यस्य धू[5]मक्षणस्यापरोग्निजन्य एव धूमक्षणस्तादृशो धूमक्षणजन्यस्य धूमक्षणस्य द्वितीयस्यान्यो धूमक्षणजन्य एव द्वितीयो धूमक्षणस्तादृशो भवति (।) तथा तृतीयादिक्षणेष्वपीति क्षणापेक्षयाप्यव्यभिचारस्तादृशस्य। एतमेवाह। **तादृशाद्धि भवँस्तादृशः स्यात्। अन्यादृशादप्यवह्निसदृशादपि यदि तादृशो भवेद्** वह्निजनितधूमतुल्यस्वभावो भवेत्।[6] **तच्छक्तिनियमाभावात्।** सदशासदृशयो· कारणयोर्या शक्तिस्तस्या यो नियम सदृशी सदृशमेव जनयत्यसदृशी विलक्षणमिति तस्याभावात् कारणान्न **हेतुभेदः** कार्यस्य **भेदक इति** कृत्वाऽ-**कारणम्विश्वस्य वैश्वरूप्यं** स्यात्। यत कुतश्चित्कारणादुत्पत्तेर्नाहेतुकत्वमिति चेदाह। **सर्वं वा सर्वस्मा**दित्यादि। अशक्तादपि चेदुत्पत्ति. **सर्वं सर्वस्मा[7]ज्जायेत**(।) 402
न चैवं। **तस्मा**दित्यादि। तन्न धूम इति। **तद**िति तस्माद् यत उत्पद्यमानो **धूमो दृष्टः स दृष्टाकारो** वह्निः। **तद्विजातीयादवह्ने**रित्यर्थ॥

---

[1] Tham-ḥdag-gi.

अपेक्षातो हि भावानां कादाचित्कत्वसम्भवः ॥३७॥

स हि धूमः कारणमन्तरेण भवेत् चेत्[3], **तर्हि अपेक्षाविरहात् न कदाचिन्न भवेत्। तद्भावे वैकल्याभावात्। इष्टकालवत्। तदापि च न भवेत्। अभावकालाविशेषात्। अपेक्षया हि भावाः कादाचित्का**[4] **भवन्ति। भावाभावकालयोः तद्भावयोग्यतायोग्यताभ्यां योगात्। देशकालयोः तुल्ययोग्यताऽयोग्यतयोर्हि तद्वत्तेतरयोर्नियमायोगात्।**

सा च योग्यता[5] **हेतुभावतोऽन्या चेत्। तस्माद् देशकालयोः क्वचित् परि-**

तथा चेत्यहेतुकत्वे सति नित्यं सत्त्वमसत्त्वम्वा धूमस्य स्यात्। किङ्कारणम्(।) **अहेतोर्भावस्य** स्वनिष्पत्तावन्यानपेक्षणा(त्)। कारणान्तरानपेक्षणात्। कारणान्तरानपेक्षत्वेपि कादाचित्क स्वभावतो भविष्यतीति चेदाह। **अपेक्षातो**[1] हीति।

एतदुक्तम्भवति(।)अनिष्पन्नस्यासत्त्वादेव कथ स्वभावत **कादाचित्कत्वं** निष्पन्नस्य त्वस्ति स्वभावः केवल सैव निष्पत्ति कथ क्वचिद् भवतीति चोद्यते। **स हीत्यादिमैतदेव व्याचष्टे। न कदाचिन्न भवेत्** सर्वकालम्भवेत्। किङ्कारणन्तद्भावे धूमस्वभावस्य भावे। कारणानपेक्षत्वेन **वैकल्याभावात्। इष्टकालवत्। तदापि चेति** दृष्टकालेपि धूमो न भवेत्। धूमाभा[2]**वकालाविशेषात्।**

पश्चादर्द्धम्विभजन्नाह। **अपेक्षया हीति**। योग्यदेशकालापेक्षया। यस्मात् कार्यस्य यौ **भावाभावकालौ तयोर्यथाक्रमन्तद्भावस्य** कार्योत्पादस्य ये **योग्यतायोग्यते** ताभ्यां **योगात्**। कालग्रहणमुपलक्षणपरमेव देशद्रव्ययोरपि वाच्य। अयैव नेष्यते। तदा तुल्ये योग्यतायोग्यते ययो कार्यभावाभाववतोर्**देशकालयोस्तयो**[3]**स्तद्वत्तेतरयोर्नियमायोगात्**। कार्यकालस्यैव तद्वत्ता। कार्यवत्ता। तदन्यस्येतरा। अकार्यवत्तेत्यस्य नियमस्यायोगात्। द्वावपि तौ कार्यभावाभावकालौ कार्यवन्तौ स्याता योग्यतासादृश्यात्। न वा। तुल्यत्वादयोग्यताया.। तस्मात् तद्भावकालस्यैव योग्यता। तां वापेक्षमाण(ा) **भावाः कादाचित्का भवन्ति**।

भवतु नामेष्टस्य देशकालादेर्योग्यता। न ताव[4]ता हेतुभाव इत्यत आह। **सा चेत्यादि**। यत एवमहेतुत्वे नित्य सत्त्वासत्त्व स्यान्न च भवति।

तस्मादित्यादि। **यत्परिहारेण** प्रवर्त्तते तदनपेक्षः। यत्र च वर्त्तते तत्सापेक्ष·। यदि नाम क्वचिद् देशादौ वृत्तस्तथापि कथ**न्तत्सापेक्ष इति** चेदाह। **तथा** हीति। **तथा वृत्तिरित्येकपरिहारेणान्यत्र** वृत्ति.। देशादिकम**पेक्षत एव** भावः(।)तेन तु देशादिना[5] न तस्योपकारः क्रियत इति चेदाह। **तत्कृतोपकारेत्यादि**। तन्निय-

हारेण अन्यत्र देशकालयोः सद्भावेन तत्सापेक्ष इति भवति। तथा हि तथा वृत्तिरपेक्षत एव। तत्कृतो[6]पकारानपेक्षस्य हि तन्नियमायोगात्। तद् देशकालनियमात्। यत्र धूमो दृष्टः सकृद् वैकल्ये च न दृष्टः तस्य हि तज्जन्यः स्वभावः। अन्यथा कदाचिद[1]प्यभावात् स तत्प्रतिनियतोऽन्यत्र कथं भवेत्। भवन् वा न धूमः स्यात्। 433b
तज्जनितः स्वभावविशेषो धूमः। तथा हेतुरपि तथाभूतकार्यजननस्वभावः। यदि तस्याऽन्यतो[2]ऽपि भावः, तदा न स स्वभाव इति सकृदपि न धूमं जनयेत्। न च स धूमः, अधूमजननस्वभावाद् भावाद्। तत्स्वभावत्वे च स एव नेति[3] अव्यभिचारः॥

अग्निस्वभावः शक्रस्य मूर्द्धा यद्यग्निरेव सः।
अथानग्निस्वभावोसौ धूमस्तत्र कथं भवेत् ॥३८॥

यमायोगादिति। तस्मिन्नैव देशादौ तेन न भाव्यमिति नियमायोगात् (।) **तदिति** तस्माद् देशकालग्रहणमुपलक्षण द्रव्यस्यापि परिग्रह·। **यत्रेति** देशादौ **दृष्टः सकृदिति**। यथोक्तेन प्रत्यक्षेण येषा **सन्निधाने** दृष्टस्तेषामेवान्यतर**वैकल्ये च** पुनर्न **दृष्टः**। **अन्यथेति** यदि तज्जन्योस्य स्व[6]भावो न स्यात् **स** इति धूमस्तत्प्रतिनियतोग्न्यादिकसामग्री हि यत·। अग्नेरन्य**त्र कथम्भवेन्नैव** भवेत्। **भवन् वा न धूमः स्यात्**। यस्मात् **तज्जनितो** ह्यग्निजनितो हि **स्वभावविशेषो धूम** इति। **तथा हेतुरपि** वह्निस्त**थाभूतकार्यजननस्वभावो** धूमजननयोग्यतास्वभावो धूमरहितावस्थायामप्यस्त्येव योग्यता कारणभूतेति। तेन नाऽव्यापि लक्षण।[7] एवमग्निधूमयो. 40b
परस्परापेक्षया नियतस्वभावत्वे प्रत्यक्षव्यवस्थापिते।

यदि तस्य धूमस्याग्ने**रन्यतोपि भाव** इष्यते **तदा न स** धूमजनन **स्वभावस्तस्या**वह्ने·। तथा ह्यनग्नेर्यदा धूमस्योत्पत्तिस्तदानग्नेरेव धूमजनन. स्वभावो जात। यश्चानग्ने स्वभाव स कथमग्ने· स्यात्। ततश्चाधूमजननस्वभावत्वादग्ने. **सकृदपि न धूमं जनयेत्**। धूमस्यापि[1] धूमस्वभावता न स्यादित्याह। **न चेत्यादि**। अग्नेरन्यतो भवन्न वा स **धूमः** (।) कि कारणम् (।) **अधूमजननस्वभावादनग्नेर्भावादुत्पत्ते.**। **तत्स्वभावत्वे चानग्नेरपि** धूमजननस्वभावत्वे चाभ्युपगम्यमाने। **स एवाग्निर्धूमजनकरूपत्वादस्य** इत्यनेन द्वारेणा**व्यभिचारो** धूमस्य॥

सुखग्रहणार्थं **अग्निस्वभाव** इत्यादि श्लोकद्वयमाह।

---

[1] Lan-hgah.

धूमहेतुस्वभावो हि वह्निस्तच्छक्तिभेदवान।
अधूमहेतोर्द्धूमस्य भावे स स्यादहेतुकः ॥३९॥

इति संग्रहश्लोकौ।

कथमिदानीं भिन्नात् सहकारिणः कार्यस्योत्पत्तिः। यथा चक्षुषो रूपादेर्विज्ञानम्।

न वै किञ्चित् तत्स्व(भावं) एकैकं जनकम्। किन्तु सा[4]मग्री जनिका तत्स्व-

---

अग्निस्वभाव इति धूमजननस्वभा[2]वो **यदीत्यर्थ.। अग्निरेव स शक्रमूर्द्धा** धूमजननस्वभावत्वात्। **अथानग्निस्वभावोसौ** शक्रमूर्द्धा। **तत्रेति** शक्रमूर्द्धनि। कस्मान्न भवेदित्याह। **धूमेत्यादि। हि** यस्मात्। **धूमहेतुस्वभावो** यस्येति विग्रहः। कुत एतत् तच्छ**क्तिभेदवान्**। तया धूमजनिकया शक्त्या करणभूतया वस्त्वन्तरात् खद्योतादेर्भेदवान् विसदृश·। **अधूमहेतो**रित्यवह्निस्वभावाद् **धू[3]मस्य भावे** उत्पादेऽभ्युपगम्यमाने **स** धूम **स्यादहेतुकः**। यथोक्त प्राक्।

कथमित्यादि पर। **इदानी**मित्येकस्य धूमादेर्विजातीयादुत्पत्त्यनभ्युपगमे। **कथम्भिन्नात्** परस्परविजातीयात्। **सहकारिणः** सकाशादेकस्य **कार्यस्योत्पत्तिः**। कथमित्याह। **यथेत्यादि**। आदिशब्दाद् आलोकमनस्कारादय.। एवञ्च सति चक्षु स्वभावादप्युत्पद्यते **विज्ञानम[4]**चक्षु.स्वभावादपि रूपमनस्कारादेर्न चेदमहेतुक। एव धूमोप्यग्नेरुत्पद्यतामनग्नेश्च शक्रमूर्ध्न·। न चाहेतुको भविष्यतीति चोदको मन्यते।

न वै किंचिदित्यादिना प्रतिविधत्ते। चक्षुरादिषु **तत्स्वभावं** जनकस्वभाव सदे**कैकं** परस्परानपेक्ष न वै **जनकं**(।) यदि हि स्यात् तदा प्रत्येक कारणव्यभिचारादहेतुक स्यात्। **किन्तु सामग्री जनिका। तत्स्वभावा** जन[5]कस्वभावा। सामग्री जनिकेत्येतावतैव तत्स्वभावत्व लब्धमतत्स्वभावस्याजनकत्वात् तत्कि स्वभावेति पृथगुच्यते। सत्य किन्त्ववधारणार्थमुक्त। सामग्र्यवस्थायामेव तत्स्वभावता। न पूर्वन्न पश्चान्न पृथगिति। स्वहेतुसामर्थ्यनियतसन्निधीत्येकस्मिन् कार्ये समस्तावन्ये कारणानि हेतुरिति समुदायार्थः।

केचित्तु वा शब्द पठन्ति (।) सामग्री जनिका तत्स्वभावा[6] वेति। अत्र तु वाशब्दस्य न किंचित् प्रयोजनमित्य(प)पाठ एवाय। यदि सामग्रीत्युक्त्वा सामग्र्यन्तरादपि चक्षुर्विज्ञान स्यात्तदा भिन्नादुत्पादेरहेतुकत्वम्भवेत्। **सैव** सामग्र्यनुमीयते। कार्येण न प्रत्येक कारणादन्यतो नास्ति व्यभिचार इति भावः।

स्यादेतद अग्न्यादिसामग्रया आद्य एव धूमक्षणो जनितो न च तस्य लिङ्ग-

भावा। सैवाऽनुमीयते। सैव च सामग्री स्वभावस्थित्याकार्यस्य आश्रयः। अत एव सहकारिणामपर्यायेण जननम्।

त्वन्तस्यानिश्चयात्। यश्च धूमप्रतिबन्धो गृह्य[7]ते स पूर्वधूमहेतुरेव (।) 41a
कथन्ततोग्न्यादिसामग्र्या अनुमानमित्यत आह। **सैव चेत्यादि कार्यप्रबन्धस्य स्वभावस्थितेः। आश्रय** आद्य कारण। सामग्रीमन्तरेण धूमसन्तानस्यैवाभावात्। ततो धूमसन्तानमग्निकार्यत्वेनैकीकृत्य दहनादिसन्तते कारणभूताया अनुमान। न हि क्षणविभागेनावार्गदर्शनस्य व्यवहार सम्भवतीति।

स्यादेतद् (।) अतीव एव व[1]ह्नि रनुमीयते। न च तेनार्थक्रियार्थिन. किंचित् प्रयोजनमित्येतदपि चोद्यमानेनैव परिहृत। तदा चायमर्थ (।) सैव च सामग्री प्रबन्धेन प्रवर्त्तमाना कार्यस्वभावस्थिते कार्यप्रबन्धवृत्तेर्हेतु पूर्वपूर्वमग्न्यादिक्षण प्रतीत्योत्तरोत्तरस्य धूमक्षणस्योत्पत्ते। न ह्यय नियमो यदेक एव धूमक्षणोग्निना जन्यो नापर इति। यावदिन्धनस्य न सर्वथा भस्मीभवनन्ता[2]वद् धूमक्षणानामुत्पत्तिरविरुद्धा। तस्मादुत्तरोत्तरदहनक्षणजननमर्थेनप्रबन्धप्रवृत्तेनाग्निना यथाभूतो धूमप्रबन्धो जनित. प्रत्यक्षावधारितस्तथाभूतमन्यत्रावधार्यार्थक्रियासमर्थदहनसन्तानस्यानुमानन्तर्थिनो न विरुद्धम् (।) अन्य एव च स्वभावो विच्छिन्नदहनसन्तानस्य धूमस्यान्य एव विच्छिन्नदहनसन्ततेर्वासगृहादिस्थस्य। स्फुटश्च तयो[3]र्भेदमवधारयति लोक इति कुतो व्यभिचार.।

अथवाऽन्यथा व्याख्यायते।

ननु सामग्री समग्रेभ्योन्या। तस्याश्चैकत्वाद् एकमेव कार्यमुत्पद्यतेऽन्यथा समग्राणा प्रत्येक सामर्थ्यात् कार्यबहुत्वम्पर्यायेण चैककार्यजनकत्व स्यान्न च भवति। तस्मात् कथमेकजनकत्वमित्याशक्याह।

सैव चेत्यादि। सैव च **सामग्री**ति समग्रा एव सामग्री शब्देनोच्यन्ते।[4] कि कारण। **स्वभावस्थित्या** स्वरूपसन्निधानेन **कार्यस्याश्रयो** भवति यत.।

एवम्मन्यते। यदि सामग्र्या एव कार्योत्पत्तिस्तदा समग्राणामकारकत्व स्यात्। तथा च प्रतीतिबाधा। समग्राणामपि कारकत्वे सुतरा कार्यबहुत्व स्यात्। पर्यायेण चैककार्यजनकत्व स्यात्। न च सामग्रीबलात्तेषामेकरूपता। सामग्र्या एवाभावप्रसङ्गात्। तस्मात् ते स[5]मग्रा स्वहेतुभ्य एवैककार्यकरणे नियता उत्पन्ना सामग्रीशब्देनोच्यन्ते। न च बहूनामेककार्यकरणे बाधकमस्ति। न चास्माकङ्कारणमेव कार्यो भवतीति मत येनानेकस्यैककार्यत्वम्विरुध्येत। यथा चैककार्यत्येप्रकस्य प्राग्भाव एव कारणत्वन्दृष्टत्वात् तथानेकस्यापि (।) यथा वा त एव समग्राः सयोगलक्षणामेका सामग्रीञ्जनयन्ति। तथै[6]कमपि कार्य किन्न कुर्वन्तीति (।)

यदपि गोमया[5]देर्विजातीयात् शालूकादेरुत्पत्तिर्दृष्टा। तत्राऽपि तथाऽभिधानेऽपि स्वबीजप्रभवात् अस्त्येव स्वभावभेदः। हेतुस्वभावभेदात्। यथा कदल्या[6] बीजकन्दोद्भवायाः। स्फुटं एवैवं लोके भिन्नाकारद्वारेण विभागः। इत्थं सुविवेचिताकारं कार्यं हि कारणाव्यभिचारि।

अन्वयव्यतिरेकाद् यो यस्य दृष्टोनुवर्तकः।
स्वभावस्तस्य तद्धेतुरतो भिन्नान्न सम्भवः ॥४०॥

434a **इति संग्रहश्लोकः।**

तस्मात् सकृदपि दर्शनादर्शनाभ्यां कार्यकारणभावसिद्धेः। ततः तत्प्रतिपत्तिर्नान्यथा अन्वयव्यतिरेकयोर्निःशेषदर्शनादर्शनायत्तत्वात्। निःशेषं क्वचित्

यत्किञ्चिदेतत्। यतश्च सामग्रीजनिकाऽत **एव सहकारिणामपर्यायेण जननं**। परिपाट्या जनन नास्तीत्यर्थ।

यदपीत्यादिना **विजातीया**दुत्पत्तिमाशक्य परिहरति। नान्यादृशात्तादृ(श) न्त-स्यो**त्पत्ति**रिति यदुक्तन्तदेवात्र दर्शयतीत्यर्थ। आदिशब्दाद् गोभृङ्गाच्छरो
41b गोमयाद् वृश्चिक (।) **तत्रापी**[7]ति विजातीयात् कार्योत्पत्तावपि। **तथाभिधानेपी**ति विजातीयोत्पन्नस्य शालूकादे शालूकादिरित्यभिधानेपि **स्वबीजा**च्छालूकादि-लक्षणात् **प्रभव** उत्पत्तिर्य**स्य** तस्मात् स्वबीजप्रभवाच्छालूकादे सकशाद**स्त्येव स्वभावभेदः**। किङ्कारण (।) **हेतुस्वभावभेदात्**। हेतो सामग्रीद्वयलक्षणस्य स्वभावभेदात्। **बीजात् कन्दाच्चोद्भवो** य[1]स्या कदल्या सा तथा। सा च हेतुत्वभेदात् परस्परभिन्ना।

न चायम्भेद· साधनीय इत्याह। **स्फुट**मित्यादि। विवेचयति भेदे वा भावस्येति। **सुविवेचिताकारं** भ्रान्तिर्हेतुभ्य सदृशाकारेभ्यो विभागेन निश्चिताकार ॥

तद्भाव एव भावोऽन्वय·। तदभावे चाभाव एव व्यतिरेक। अन्वयो व्य-तिरेकश्चा**न्वयव्यतिरेकन्तस्मा**त्। य कार्यस्वभावो **यस्या**नु[2]वर्त्तनीयस्य कारणस्या-**नुवर्त्तको दृष्टस्तस्या**नुवर्त्तकस्य **स्वभावस्तद्धेतुः** सोनुवर्त्तनीय कारणात् सा हेतु-र्यस्येति विग्रह। यदा तु कारणापेक्षयोच्यते तदा स्वभावस्तस्यानुवर्त्तनीयस्याग्न्या-देस्तद्धेतुस्तस्य कार्याभिमतस्य धूमादेर्हेतु। यतश्चैव परम्परापेक्षया कार्यकारणयो ( ) स्वभावनियम। **अतः** कारणाद् **भिन्नाद्** विजातीयान्न **सम्भ**[3]**वः**।

तस्मात् सकृदपि दर्शनादर्शनाभ्यामिति यथोक्ताभ्या। प्रत्यक्षानुपलम्भाभ्या **कार्यकारणभावसिद्धे**ः कारणाद् भवति (।) ततः कार्यकारणभावसिद्धित **तत्प्रतिप-त्तिरन्वय** व्यतिरेकप्रतिपत्ति**र्नान्यथेति** कार्यकारणभावनिश्चयन्त्यक्त्वा केवलाभ्यान्द-

नित्यत्वस्य दर्शनेऽपि अन्यत्र अन्य[2]था दृष्टेः, क्वचित् नित्यत्वाभावेप्यदृष्टस्य दृष्टेः।

४—सामान्यचिन्ता

कार्यस्य हि तस्मादुत्पत्तेः हेत्वविनाभावो भवतु नाम[1] स्वभावे कथमविनाभावः ?

स्वभावेप्यविनाभावो भावमात्रानुरोधिनि।
तदभावे स्वयम्भावस्याभावः स्यादभेदतः ॥४१॥

र्शनादर्शनाभ्या नान्वयव्यतिरेकयो प्रतिपत्ति। किङ्कारण (।) **निःशेषिदर्शनादर्श-ना[4]यत्तत्वाद्** दर्शनमात्रप्रतिबद्धाया अन्वयव्यतिरेकप्रतिपत्ते। एव हि दर्शनमन्वय साधयति यदि नि शेषे सपक्षे हेतोर्दर्शन स्यात्। एवमदर्शनमपि व्यतिरेक साधयेत्। यदि **निःशेषे** साध्यव्यतिरेके हेतोरदर्शन स्यात्। यथैकत्र धूमव्यक्तौ सकृदपि कार्यत्वसिद्ध्या सर्वत्र तथाभाव (।) एव क्वचित् सपक्षासपक्षयोर्दर्शनादर्श[5]नात् सर्वत्रान्वयव्यतिरेकनिश्चयो भविष्यतीत्यपि मिथ्या (।) यस्मात् **क्वचिद्** अमूर्तत्वे आकाशादिगते **नित्यत्वस्य दर्शने**। परप्रसिद्ध्या चैतदुच्यते। **अन्यत्र** सुखादौ। **अन्यथेत्य**नित्यत्वे हेतोरमूर्त्तत्वस्य **दृष्टेः** कारणादेकत्र दर्शन न सर्वत्र तथाभाव-साधनमतो दर्शनमन्वये व्यभिचारि। तथा **क्वचिद्** घटादौ **नित्यत्वाभावेप्यदृष्ट-स्यामू[6]र्त्तत्वस्य** पुनर्नित्यत्वाभाव एव सुखादौ **दृष्टे**रतो विपक्षैकदेशादर्शनमसाधन व्यतिरेकनिश्चये तस्माद्धेतुफलभावनिश्चयादेवान्वयव्यतिरेकयोर्निश्चय।

स्वभाव इत्यादि पर। इदानीमिति कार्यहेतावविनाभावे साधिते सप्रति **स्वभाव**हेतौ **कथं** साध्येना**विनाभावः**।

ननु **स्वभावे** भावोपि **भावमात्रानुरोधिनि** हेतुरि[7]त्यादिना प्रागेव स्वभाव- 42a
हेतावविनाभाव साधित।

सत्य। एवन्तु मन्यते (।) यथाभूते स्वभावे तन्मात्रभाविन्यविनाभावो वर्णितस्तत्र प्रतिज्ञार्थैकदेशता प्राप्नोतीति। सिद्धान्तवाद्यप्यनन्तरेणान्यापोह-प्रसाधनेन प्रतिज्ञार्थैकदेशतापरिहारम्मन्यमान तन्मात्रानुरोधिन्येवाविनाभाव पूर्वोक्तमनुवदति। **स्वभावेप्यविनाभा[1]व** इत्यादि। स्वभावेपि स्वभावहेताव-प्यविनाभाव· (।) कस्मिन् साध्ये (।) भावमात्रानुरोधिनि। **यो हीत्याद्यस्यैव** व्याख्यान। **अविनाभावो भावस्ये**ति कृतकत्वादे। यस्मात् **तदभावे भावमात्रा-नुरोधि**साध्यधर्माभावे **भावस्य** हेतुत्वेनोपात्तस्या**भावः स्यात्**:। कि कारण (।)

---

[1] Yin-la-rag-na.

योहि भावमात्रानुरोधिस्वभावेऽपि अविनाभावं भावस्य वाञ्छति। तदभावे हि स्वभावस्य अभावः स्यात् अभेदतः। य एव भावः भावमात्रानुरोधी स्वभाव इत्युच्यते। स एव स्वयं वस्तुतोः भावः। स च आत्मानं परित्यज्य कथं भवेत्॥

य एव तर्हि भेदाभावात् कृतकः स एवाऽनित्य इति प्रतिज्ञार्थैकदेशः हेतुः[5] स्यात्।

नैष दोषः।

स(र्वे) भावाः स्वभावेन स्वस्वभावव्यवस्थितेः।
स्वभावपरभावाभ्यां यस्माद् व्यावृत्तिभागिनः॥४२॥

साध्यसाधनयो**रभेदतः**। अभेदमेव य एवेत्यादिना व्याचष्टे। **य एवा**नित्यादिको **भावः** कृतक**भावमात्रानु**[2]**रोधी स्वभाव इत्युच्यते स एव स्व**यमन्यनिमित्तानपेक्षतया **वस्तुतः** परमार्थतो भावः कृतकत्व स च भाव **आत्मानं** स्वभावभूतमनित्यत्व**म्परित्यज्य कथम्भवेत्।**

य एव तर्हीति पर। "पक्षनिर्देश. प्रतिज्ञा"[1]। तस्या **अर्थो** धर्मधर्मिसमुदायस्तस्य**ैकदेशः** साध्यधर्मात्मको **हेतुः स्यात्**। तथा हि यावदुक्तमनित्य शब्दोऽनित्यत्वादिति तावद् अनित्यः कृतकत्वादिति त[3]था चासिद्धो हेतुरिति भाव।

नैष दोष इति सि द्धा न्त वा दी। **यस्मात् सर्वे भावा** इत्यादि। अत्र प्रथमया कारिकया धर्मकल्पनाबीज। द्वितीयया धर्मकल्पना। तृतीयया प्रतिज्ञार्थैकदेशतापरिहारश्च कथ्यते इति समुदायार्थ। **सर्वे भावाः स्वभावपरभावाभ्यां व्यावृत्ति**म्भजन्त इति घिनुण्। सर्वभावा **स्वभावेन** स्वरूपेण न पररूपेण सजाती[4]याद् विजातीयाच्च व्यावृत्ता.। **स्वस्वभावव्यवस्थितेः**। स्वस्मिन् स्वभावेऽवस्थानात्।

नन्वश्वादिभ्यो गौर्जात्या भिन्न·। विषाणी गौर्द्रव्येण गोव्यक्त्यन्तराद् भिन्न। शुक्लो गौर्गुणेन विषाणिनो गोव्यक्त्यन्तराद् भिन्न इति। एवमादिपरमाण्वन्तो भेदो जात्यादिविशेषणकृत सर्वभावाना न स्वभा[5]वेनेति।

अत्रोच्यते (।) न जात्यादिना तावद् भावानामभिन्नानाम्भेद· क्रियते। भिन्नाभिन्नभेदकरणे तत्र तस्याकिञ्चित्करत्वात्। नापि भिन्नानाम्वैयर्थ्यात्। नाप्येषाम्भेदव्यवहार. क्रियते स्वरूपभिन्नानाम्प्रत्यक्षेऽवभासादेव भेदव्यवहारसिद्धे.।

किञ्च। जात्यादीनामन्योन्यन्तद्वतश्च सकाशाद् भेदो नान्यतो जात्यादे-

---

[1] Nyāyasūtra. 1 : 1 : 33.

रनवस्थाप्रसङ्गात्। स्वरूपेण च भे[6]दे भावानामेवासौ किन्नाभ्युपगम्यते कि जात्यादिकल्पनया।

योपि दि ग म्ब रो मन्यते (।) "सर्वात्मकमेक स्यादन्यापोहव्यतिक्रमे"। तस्माद् भेद एवान्यथा न स्याद् अन्योन्याभावो भावाना यदि न भवेदिति।

सोप्यनेन निरस्त.। अभावेन भावभेदस्य कर्त्तुमशक्यत्वात्। नाप्यभिन्नाना हेतुतो निष्पन्नानामन्योन्याभाव. सम्भवति। भिन्नाश्चेत् निष्पन्ना कथमन्योन्या-
[7]भाव सम्भवति। भिन्नाश्चेन् निष्पन्ना. कथमन्योन्याभावकल्पनेत्युक्तं। 42b

ननु सर्वे भावा भिन्ना इति यद्येतदनुमानवृत्तन्तदाश्रयासिद्धो हेतु· सर्वभावाना प्रत्यक्षाविषयत्वाद् (।) अत एव नैतत् प्रत्यक्षवृत्त परामृश्यते।

अन्यस्त्वाह। यद्यपि भावा स्वभावेन भिन्नास्तेषान्तु जात्यादयो धर्मास्सन्त्येव प्रतीयमानत्वात्। तथापि निर्विकल्पकन्तु विज्ञानङ्गवादिषु सत्तामात्र[1] गृह्णाति न भेद। अन्यस्माद् विशेषग्रहणमेव हि भेदग्रहणम्विशेषश्च नाविकल्प्य गृह्यत इति सविकल्पकस्य विषयो न निर्विकल्पस्य। तदुक्त॥

"विशेषास्तु प्रतीयन्ते सविकल्पकबुद्धिभि।
ते च केचित् प्रतिद्रव्य केचिद् वहुषु सस्थिता:॥
तानकल्पयदुत्पन्न व्यावृत्तानुगमात्मना।
गवाश्वे चोपजातन्तु प्रत्यक्षन्न विशिष्यत" इति।

तस्मान्न निर्विकल्पके प्रत्य[2]क्षभेदावभास इति।

योप्याह (।) सविकल्पकेनापि भेदो न गृह्यतेऽन्योन्याभावग्रहणनिमित्तको हि भावाना भेदग्रहोन्योन्याभावश्च भेदो न चाभाव·। प्रत्यक्षग्राह्यो। न हि गव्यश्वोस्तीति प्रत्यक्ष परिच्छिनत्त्यत. सत्तामात्रस्यैव ग्राहक प्रत्यक्षमिति।

तदुक्त म ण्ड ने न॥

"आहुर्विधातृ प्रत्यक्ष न निषेद्धृ विपश्चित·।
नैकत्व आगमस्तेन प्रत्यक्षेण विरुध्यत" इ[3]ति।

तदेतदुभयमप्ययुक्त। सत्तामात्रस्याप्रतिभासनात्। गवाश्वादीना स्वस्वरूपेणैव प्रतिभासनात्। तदुक्त॥

"तत्त्वयुक्तम्प्रतिद्रव्यं भिन्नरूपोपलम्भनात्।
न ह्याख्यातुमशक्यत्वाद् भेदो नास्तीति गम्यत" इति।

योप्याह (।) भावानाम्भेद एव नास्ति। तथा हि गोरश्वानुत्पादे यादृश स्वरूपमश्वोत्पादेपि तादृशमेव नापरमधिक किञ्चिज्जातमिति कथमतो[4] भेद।

भवतु वा भेदो नासौ प्रत्यक्षग्राह्योऽस्मादयम्भिन्न इति। एवरूपस्य व्यापारस्य प्रत्यक्षेऽभावात्। यदाह। न हीदमियतो व्यापारान् कर्त्तु समर्थमिति (।)

सोपि निरस्तः। गवाश्वादीना स्वस्वरूपेणोत्पत्तिरेव भेद । ते च स्वस्वरूपेण प्रत्यक्षेवभासन्ते। तथावभासश्च लोके भेदावभास इति यत्किञ्चिदेतत्। तस्मात् पुरोवस्थितेषु स्वस्वभावव्यवस्थि[5]तेरित्यस्य हेतो (।) प्रत्यक्षेण भेद प्रतिपद्यमान सर्वोपसहारेण प्रतिपद्यतेऽतः सर्वभावा व्यावृत्तिभागिन इति व्याप्तिग्रहणप्रमाणफलमिति। यतश्च जात्यादयोर्थान्तरभूता न सन्तीति प्रतिपादयिष्यते (।) अत पारमार्थिको धर्मधर्मिभावो नास्तीत्युक्तम्भवति।

ननु सामान्ययोगात् सजातीया उच्यन्ते। यदि च सामान्यन्नास्ति कथ सजातीयाद् व्यावृत्तिरित्यु[6]च्यते।

नैतदस्ति। न समानानामुत्पन्नानाम्भावाना सामान्ययोगात् समानरूपता स्वहेतुभ्य एव तथानिष्पन्नत्वात्।

तेन यदु द्यो त क रे णो च्यते। "न गवि गोत्व येन गोत्वयोगात् प्राग् गौरेवासाविति व्यर्थ गोत्व स्याद् (।) अपि तु यदैव वस्तु तदैव गोत्वेनाभिसम्बध्यते। गोत्वयोगात्तु प्राग् वस्तु न विद्यते। न चाविद्यमानञ्च गौरिति वाऽगौरिति वा शक्य
43a व्य[7]पदेष्टुमि"ति (।)

तन्निरस्त। यदैव वस्तु तदैव तस्य गोरूपतया निष्पन्नत्वात् कि गोत्वयोगेन। नाप्यसमानाना सामान्ययोगात् समानरूपता। तेषा सामान्यस्यैवाभावात्। समानाना च भाव. सामान्यमित्यभ्युपगम्यते। सामान्याच्च समानरूपत्वे भावानामभ्युपगम्यमाने यावन्न सामान्ययोगस्तावन्न समाना भावा । यावच्च न समानास्तावन्न सामान्य[1]योग इत्यन्योन्याश्रयत्व स्यात्। तस्मात् स्वहेतुभ्य एव समाना उत्पन्ना· (।) तेन।

"शावलेयाच्च भिन्नत्व बाहुलेयाश्वयोस्सम।

सामान्य नान्यदिष्ट चेत् क्वागोपोह प्रकल्प्यताम"ि(।)

निरस्त। सामान्येष्वेवागोपोहप्रकल्पनात्। असमानाना चापोह्यात्मतया प्रकल्पनात्।

यदप्युच्चते (।) समाना इति प्रतिभासादेव निर्विकल्पके ज्ञाने सामान्यप्रतिभासोन्य[2]था बाहुलेयाश्ववत्। शावलेयबाहुलेययोरपि वैलक्षण्यप्रतीति स्यात् सर्वात्मना भेदाद् (।) भवति च समाना इति प्रतीतिस्तस्मादस्यैव सामान्यमिति।

तदुक्त (।) निर्विकल्पकबोधेन द्वयात्मकस्य वस्तुनो ग्रहणमिति। यद्वा सविकल्पके न चेत् सामान्य गृह्यते। निर्विकल्पकेनापि गृहीतमेव। सविकल्पा-

भिन्नप्रतिभासत्वात्। तथा हि (।) य एव शावलेयादयो[3] गौरिति ज्ञानेन गृह्यन्ते। त एव निर्विकल्पके ज्ञाने प्रतिभासन्ते केवलमेकन्तानविकल्प्य गृह्णात्यन्यद् विकल्प्येति तयो स्वरूपभेदो न प्रतिभासभेद। तस्मान्निर्विकल्पकेपि ज्ञाने सामान्य प्रतिभासत इति (।)

तदपि निरस्त। स्वहेतुभ्य एव केषाञ्चित् समानाना प्रतिभासनात्। सामान्यस्य च व्यक्तिपरतन्त्र स्वरूप न च निर्विकल्पक ज्ञान पारतन्त्र्य[4] म्वस्तुनो गृह्णाति। स्वातन्त्र्येण वस्तुग्राहित्वात् तत्कथ सामान्यग्राहकमुच्यते। अनुगतस्य च रूपस्य प्रत्येकवद् युगपद् बहुष्वप्रतिभासनात्। अत एव विकल्प समानेष्वेकान्तभिन्नेषु निर्विकल्पकप्रत्यक्षबाधितमनुगताकार गृह्णन् भ्रान्तो भवति। निर्विकल्पकगृहीतसामान्यग्राही वाऽप्रमाण स्याद् गृहीतग्राहित्वात्। अथ विकल्प्य ग्राहित्वाद् अगृ[5]हीतग्राहित्व स्मृत्यादेरपि (तर्हि) स्मर्यमाणविषयता गृहीतग्राहित्वन्न स्यात्। अथ जात्यादिविशिष्टवस्तुग्राहितया विकल्पस्यागृहीतग्राहित्वमेवमपि यदि जात्यादिविशिष्टत्वम्वस्तुन पारमार्थिको धर्मस्तदा निर्विकल्पकेनापि गृहीतमेवेति कथमगृहीतग्राहित्वम् (।) अथ कल्पिकस्तदा तद्ग्राहकस्य कथ प्रामाण्यमारोपितार्थत्वात्। तस्मान्ना[6]स्त्येव जात्यादिरिति स्थित।

कथन्तर्हि भावा व्यावृत्तिभागिन इत्युच्यन्ते (।) कल्पितधर्मद्वारेणाय व्यपदेश इत्यदोष। अत (।)

"अगोनिवृत्ति सामान्य वाच्य यै परिकल्प्यते।
गोत्ववस्त्वेव तैरुक्तमगोपोहगिरा स्फुटमिति"(।)[1]

निरस्त। पारमार्थिकस्य गोत्वस्य निषेध. क्रियते न तु कल्पितस्येति वक्ष्यति।

यदि परमार्थिको धर्मधर्मिभावो नास्ति कथन्त[7]र्हि कृतक शब्दो नित्य इति 43b
बुद्धीनाम्भेद शब्दैकस्वरूपविषयत्वात्।

"अथ निर्विषया एता वासनावीजमात्रत।
प्रतिपत्ति प्रवृत्तिश्च बाह्येर्थेषु कथम्भवेत्"।

अथ बाह्याध्यवसायात् प्रवृत्तिरेवमपि कृतकत्वस्य योवसाय स एवानित्यस्याभेदादिति कथम्बुद्धिभेद। कृतकानित्ययोरभेदादेव तदनुभवाहितवासनाभेदस्याभावान्न तत्त्वतो बुद्धिभेद इत्यत्राह।

यस्मादित्या[1]दि। यस्मात् सर्वस्मात् सर्वभावा व्यावृत्तास्त**स्माद् यतो यतो** नित्याकृतकादे शब्दादीना**मर्थानां व्यावृत्तिस्तन्निबन्धना**। व्यावृत्त्यावधिव्या-

[1] Ślokavārtika. Apohavāda.

तस्माद् (यतो यतोऽर्थानां व्यावृत्तिस्तन्निबन्धनाः)।
जातिभेदाः प्रकल्प्यन्ते तद्विशेषावगाहिनः ॥४३॥

वृत्तिनिबन्धना **धर्मभेदा** अनित्यकृतकादय **कल्प्यन्ते** विकल्पैरारोप्यन्ते। किम्वि शिष्टास्तद्विशेषावगाहिनः। **तस्य** स्वलक्षणस्य ये **विशेषा** अकृतकादिव्यावृत्ति रूपलक्षणास्तदवगाहिनः। तदवगाहनशीला[2]स्तदभेदावभासनशीला इत्यर्थ.।

एतदुक्तम्भवति(।)अकृतको न भवतीत्यनेन द्वारेण प्रबोधिताया एव कृतव विकल्पवासनाया एषा प्रकृतिर्यतस्ततो विकल्प उत्पद्यमानः कृतक इति स्वाकार भिन्न. स कृतकव्यावृत्तमेव शब्दस्वलक्षण प्रतिपद्यते न त्वनित्य इति(।) तथा नित्य न भवतीत्यनेनापि द्वारेण प्रबोधिताया एवानित्यवासनाया साम[3]र्थ्यं यत्ततो विकल्प उत्पद्यमानोऽनित्य इति स्वाकाराभिन्न नित्यव्यावृत्तमेव शब्दस्वलक्षणं प्रतिपद्य न तु कृतक इति (।) तेन बुद्धिभेदो भवति। यतश्च बाध्यमानत्वाद् विकल्पप्रति भास्यर्थो बाह्यो न भवत्यतो वासनावशादेव बाह्यावभासो विकल्पस्तेन विकल्पस बाह्यरूप एव प्रतिभासमानोर्थ स्वाकार उच्यते। न तु स्वाकारे बाह्यारोप सादृश्यात्। यदाह। नामनिमित्तप्रकरणे[1] (।)

"सारूप्याद् भ्रान्तितो वृत्तिरर्थे चेत् स्यान्न सर्वदा।
देशभ्रान्तिश्च न ज्ञाने तुल्यमुत्पत्तितो धिय.।

तथाविधाया बाह्यार्थप्रतिभासाया इति।

एतेन यदुच्यते (।) "यद्वाह्यात्यन्तविसदृशस्य स्वाकारस्य तादूप्यग्रहणन्तत न्यनिवृत्तिकृतसादृश्यपर। यथा घटविसदृशोपि पटो वृक्षाभावविशिष्टोऽवधार्यमाण य[5]मप्यवृक्ष इति घटसदृशोवधार्यते। वृक्षव्यावृत्तेर्घटपटयोस्तुल्यत्वात्। तथ विकल्पविषयोऽत्यन्त वामे विसदृशोपि वामेऽवधार्यतेऽन्यनिवृत्तिकृतसारूप ग्रहणादि"ति (।)

तदपास्त। स्वहेतुत एव बाह्याभासाया विकल्पबुद्धेरुत्पत्ते। न चासदृशानाम न्यनिवृत्त्या सादृश्य क्रियते(।) तत्र तस्या भेदाभेदसादृश्यकरणेऽकिञ्चित्करत्वात् न चा[6]न्यनिवृत्ति सदृशी विद्यते। सदृशानामपि कथमन्यनिवृत्त्या सादृश्य क्रिय स्वरूपेणैव सादृश्यात्। नापि पूर्वं स्वाकारप्रतिभास. पश्चात् तत्रान्यनिवृत्तिकृत सादृश्यग्रहणपरो बाह्यारोपः प्रतिभासते। न हि मरीचिकाया पूर्व स्वरूपाप्रतिभा

---

[1] Pramāṇavārtika 3 : 12.

सति सादृश्यग्रहणहेतुको जलारोपः सम्भवति (।) बाह्यारोपाच्च पूर्वं न स्वाका[7]रो 44a
ग्राह्यारोपोस्ति। विकल्पस्यैवाभावात्। भावे बोधैकरूप एवासाविति न बाह्यसदृशः। ततश्चान्यनिवृत्तिकृतसादृश्याभावात् कथम्बाह्यरूप प्रतीयते। अनुमानस्य तु नान्यनिवृत्तिग्रहणपूर्विका प्रवृत्तिर्लिङ्गस्य तया सह सम्बन्धात् सिद्धे। यदा च तद्विशेषावगाहित्वम्विकल्पाना प्रतीयते तदा विधिरूपेणैव प्रवृत्तिर्वस्तुस्वरूपस्य विधीयमानत्वेनाध्यव[1]सायादर्थादन्यनिवृत्ति प्रतीयते। तेन विधिरेव शब्दार्थोस्माकमपि। बाह्यतयाऽरोपितस्य च विधिप्रतिषेधाभ्या सम्बन्ध।

ननु नियतरूपग्राही विकल्प प्रतिभासते। तेनेतररूपशून्यमेव विकल्पयन्नियतमर्थं विकल्पयति। तस्माद्यन्नियतरूपावधारणन्तदन्यनिवृत्तिविषयन्तत्कथमुच्यते विधिरेव शब्दार्थ इति।

तदयुक्त। अन्यनिवृत्तिमह् विकल्प[2]यामीत्यप्रतीते। न च स विकल्पविषयो यो न विकल्प्य प्रतिभासते। यदि चेतररूपनिवृत्तिमेव विकल्पयन्नियतमर्थम्विकल्पयति तदेतरेतराश्रयदोषः स्यात्। इतररूपस्यापि नियतरूपत्वेनान्यनिवृत्तिद्वारेण प्रतिपत्तिप्रसङ्गात्। अथ विधिरूपेणेतररूप विकल्पयति न तर्हि तदन्यनिवृत्त्यवधारणपूर्वकन्नियतरूपावधारण।

न च य[3]था सामान्यवन्तमर्थम्पश्यामीति नास्ति जातितद्वतोर्विशेष्यविशेषणभावे प्रतिभास (।) अथ च विशिष्टप्रत्ययानुरोधात् सामान्यविशिष्टव्यक्तिदर्शनन्नैया यि का दय कल्पितवन्तस्तथाऽन्ये(?न्यैर्)निवृत्तिमहम्विकल्पयामीत्यप्रतीतावपि बाह्यसदृशारोपान्यथानुपपत्त्यान्यनिवृत्तिपर विकल्पाकारे बाह्यरूपमारोप्यत इति युक्त। सादृश्यमन्तरेण[4] वासनाबलादेवाध्यवसितबाह्यरूपस्य विकल्पस्योत्पत्तेः। यदाह। तदनुभवाहितवासनाप्रभवप्रकृतेरध्यवसिततद्भावस्वरूप। तथा विकल्पवासनायाश्च तादृशी प्रकृतिर्यदेवमेषा प्रतिभातीति।

नापि बाह्यरूपारोपकस्य ज्ञानस्यान्यवित्तिकृतसारूप्यनिमित्तत्वेप्यन्यनिवृत्तिविषयत्व। न हि मरीचिकाया जलज्ञानस्य सादृश्यविषयत्वमारोपि[5]तजलविषयत्वात्। न च नियत रूप भावानामन्यनिवृत्त्या क्रियते। तस्या अवस्तुत्वेनाकारकत्वात्। स्वहेतुभ्य एव च ततो (?तत उ)त्पत्ते।

नापि नियतरूपावधारणन्तदन्यनिवृत्तिविषय नियतरूपविषयत्वादस्य (।) अत एव न तदन्यनिवृत्तिपुरस्सरमेव धार्यते प्रत्यक्षेणैव।

न च तदन्यनिवृत्तिरर्थान्तरभूता युज्यत[6] इति वक्ष्यति। नापि स(त्) तत्त्वान्यत्वाभ्यामवाच्या युज्यते(।) एव ह्यभाव एवास्या स्याच्छशविषाणवत्। न च स्यात प्रत्यक्षगम्या नीरूपत्वात्। नाप्यनुमानगम्या। सम्बन्धाभावेन लिङ्गस्यासिद्धे।

तस्माद् विशेषो यो येन धर्म्मेण संप्रतीयते ।
न स शक्यस्ततोन्येन, तेन भिन्ना व्यवस्थितिः ॥४४॥

नापि नियतरूपान्यथानुपपत्त्या तत्कल्पना । अनियतरूपाणामन्यनिवृत्तेरभावात् ।
44b नियतरूपाणा च कथमन्यनिवृत्त्या नियतरूपत्वं स्वहेतुभ्य एव नियतरू[7]पाणामुत्पत्तेः । तस्मान्नियतरूपावधारणपरस्सरैर्वान्यनिवृत्तिः प्रतीयते । तथा हि घट इत्युक्तेऽघटो न भवतीति सामर्थ्यात् प्रतीयतेऽतो विकल्पकल्पितैवेषा न परमार्थतोस्ति ।

तस्मात् स्थितमेतच्छब्दलिङ्गाभ्यामिधिरूपेण वस्तु प्रतिपाद्यतेर्थादन्यनिषेधः । तथा च वक्ष्यति "तद्गतावेव शब्देभ्यो गम्यतेऽन्यनिवर्त्तनमि"त्यादि (१।१२८)।

तेन यदुच्यते कु मा रि ले न ॥

"न त्वन्यापो[1]हकृच्छब्दो युष्मत्पक्षेनुवर्णित. ।
निषेधमात्रन्नैवेह प्रतिभासेव गम्यते ॥
किन्तु गौर्गवयो हस्ती वृक्ष इत्यादि शब्दत. ।
विधिरूपावसायेन मति· शाब्दी प्रवर्त्तते ॥
तस्माद्येष्वेव शब्देषु नञ्योगस्तेषु केवल ।
भवेदन्यनिवृत्त्यङ्ग. स्वात्मेवान्यत्र गम्यत"[1] इति (।)

एतत्सिद्ध साध्यते । विधिरूपस्यापि शब्दार्थस्येष्टत्वात् (।) कथन्तर्हि परमताद् बौ द्ध मतस्य भेद. (।) कथ वा शब्दलिगयो[2]रपोहो विषय उच्यते ॥

नन्वस्त्येव महान् भेद परै· पारमार्थिकार्थविषयत्वेनेष्टस्य विकल्पस्य बौ द्धै. कल्पितविषयत्वेनेष्टत्वात् । कल्पितश्चाकारोऽपोहाश्रितत्वादपोह उच्यते । अपोह्यतेऽनेनेति वा । अन्यनिवृत्तिमात्र त्वर्थादाक्षिप्तमपोहनमपोह इत्युच्यते (।) स्वलक्षण त्वपोह्यतेस्मिन्नित्यपोह उच्यते ।

तस्मादन्यान्यव्यावर्त्त्यवस्तुव्यपेक्षया धर्मा. कल्पितभे[3]दा विकल्पैर्विषयीक्रियन्ते (।) अतो भिन्नविषया विकल्पास्तत्समानविषयाश्च शब्दा अप्यपर्याया इति दर्शयितुमाह । **तस्मा**दित्यादि । यतश्चैव धर्मभेदा कल्प्यन्ते **तस्माद्यः** स्वलक्षणवि**शेषो** व्यावर्त्तनीयनित्यव्यपेक्षया व्यवस्थापितोऽनित्यलक्षणः । **येन धर्मेण** येन शब्देन । यथाऽनित्यशब्देन । शब्दोपि धर्मवाचकत्वाद् धर्म उच्यते । न **स शक्यस्ततोन्येन** । अनि[4]त्यशब्दादन्येन कृतकादिशब्देन । व्यावर्त्तनीयान्तरवस्त्वधिकेन प्रत्येतु । **तेन भिन्ना व्यवस्थितिः** । तेन कारणेन विकल्पाना नैक-

---

[1] Ślokavārtika.

सर्व एव हि भावाः स्वरूप[7]स्थितयो नात्मानं परेण मिश्रयन्ति, तस्यापरत्वप्रस- 434b
ङ्गात्। तेषामभिन्नं स्वात्मभूतं यद् रूपं न तत् तेषाम्। तदानीं तेषामभावात्।
तदेव हि स्यात्[1], अभिन्नस्य भावात्। तस्मादप्रतिपन्नस्य भिन्नस्याभावात्।
तस्यैव च पुनर्भेदविरोधात्। तच्च स्वात्मनि व्यवस्थितममिश्रमेव।

विषयत्व। शब्दाना च न पर्यायत्व।

तेन यदुच्यते (।) ययोस्तादात्म्यन्न तयोर्गम्यगमकभावो ययोश्च विकल्पित-रूपयोर्गम्यगमकभावो न तयो· सम्बन्ध इति (।)

तदपास्त। अकृतकव्यावृत्तस्यैव स्वलक्षणस्य ज्ञापकहेत्वधिकारात्। कृतक[5] इति ज्ञातस्य गमकत्वात् तस्य च नित्यव्यावृत्तवस्तुरूपत्वात् तादात्म्य।

सर्व एव हीत्यादिनाऽद्वै त वा द निराकुर्वन् कारिकार्थमाह। स्वरूपे स्वात्मनि स्थितिर्येषान्ते तथा। **सर्व एव हि भावाः स्वरूपस्थितयो नात्मानं परेण मिश्रयन्ति।** एकीकुर्वन्ति। किङ्कारण (।) **तस्य** मिश्रीक्रियमाणस्य परस्यापरत्वप्रसङ्गात्। आत्मतापत्ते.।

स्यान्मत (।)

"सर्ववस्तुषु बुद्धिश्च व्यावृत्तानुगमा[6]त्मिका।
जायते द्वयात्मकत्वेन विना सा च न युज्यते" (॥)

अत. सामान्यात्मका विशेषा विशेषात्मकञ्च सामान्यमित्युभयरूपम्वस्त्वित्यत्राप्येकस्य वा रूपस्य भिन्नेभ्योऽभेदो भिन्नस्य चैकस्मादभेदः(।)तत्र प्रथम पक्ष निराकर्त्तुमाह। **तेषामिति** भावानाम**भिन्नमित्येकात्मभूतमित्यव्यतिरिक्त यद्रूपं** स्वभावो **न तत्तेषाम्**भावानामिति शक्यम्वक्तु। कस्मात्त**दानीन्तस्येत्यपे[7]क्ष्यते।** 45a
तस्याभिन्नस्य रूपस्य **तेषामभावाद**भेदादेव।

अथ पुनरेकस्माद् भिन्नस्याभेदस्तत्राप्याह। **तदेव हि स्यादभिन्नस्य भावात्।** एक चेद्रूप प्रतिपन्नाभावस्तदेवाभिन्न रूपन्तेषा स्यान्न भिन्न। कुत एतत्। तस्यैवाभिन्नस्य रूपस्य भावात्।

अथ स्यात् (।) तेषाम्भेदोपीष्यत एवेत्यत्राह। तस्मादभिन्नात्मनोर्थान्तिरस्य **भिन्नस्य** नानारूपस्या**भावात्।**

अथ स्याद् (।) विशेषस्य यो भेद[1]स्स एव सामान्यस्याभेदाद्। यदाह (।) सामान्यस्य तु यो भेद ब्रूते तस्य विशेषतो दर्शयित्वाभ्युपेतव्य इत्यत्राप्याह। **तस्यैव च पुनर्भेदविरोधात्।** तस्यैवैकस्यानेकत्वायोगात्।

अथ स्याद् (।) विशेषद्वारेण सामान्यस्य भेदो न स्वरूपस्तदानुगतव्यावृत्त-

अर्थान्तरमपि तद् अनेकसमवेतत्वात् न तेषां सामान्यंम्, अतद्रूपत्वात्। द्वित्वादिकार्यद्रव्येष्वपि प्रसङ्गात्। सम्बन्धिनाऽन्येनाऽन्येऽसमानाः तद्वन्त एव

रूपयोः परस्परासंश्लेषादेकान्तेन भेद· स्यात्। तदाह (।) **तच्चैकरूपं स्वात्मनि** स्वस्वभावे **व्यवस्थितममिश्रमेव**[2] व्यक्तिरूपेण। अमिश्रे च मिश्ररूपतयाप्रतीतेर्मिथ्यात्वमेव।

अथ कथचित् सामान्यस्य व्यक्त्यभिन्नत्वान्नैतन्मिथ्यात्वं। तदाह।

"नैतदश्वादिबुद्धीनामध्यारोपाद्यसम्भवात्।
स्थितं नैव हि जात्यादेर्भिन्नत्व व्यक्तितो हि न" इति।

तदयुक्तम् (।) एकत्वेन येनैव रूपेण भिन्नन्तेनैवास्याभेदो विरोधान्न चैकस्मिन् प्रमाणे भेदाभेद प्रतिभासते। एकेन च भेदग्रहणे सति यद्य[3]न्येनाभेदो गृह्यते कथन्तद्ग्राहक प्रमाणं भ्रान्त न स्याद् (।) अन्यथा ग्रहणात्तस्य चैकरूपत्वात्।

यद्वाऽमिश्रणादेवैकस्य रूपस्य सामान्यरूपता न स्यादर्थान्तरत्वाद् घटवत्।

उ द्यो त क (र)स्त्वाह। "गवादिष्वनुवृत्तिप्रत्यय पिण्डादिव्यतिरिक्तनिमित्तभावी। विशेषत्त्वान्नीलादिप्रत्ययवत्। तच्च निमित्त समानव्यक्तिकरणात सामान्यमित्युच्यते"[1] (।)

अत्रापि न तावत्समानाना[4]मर्थान्तरेण समानरूपता क्रियते तथैव निष्पन्नत्वा(द)प्यसमानानामिति दर्शयन्नाह। **अर्थान्तरमिति सत्ता** गोत्वादिक **न तेषां** व्यक्तिभेदाना **सामान्यमतद्रूपत्वात्**। तेषा भेदानामसमानरूपत्वात्। समानाना च भावः सामान्यमिष्यते।

अथवाऽतद्रूपत्वाद् व्यक्तिभ्योर्थान्तरत्वादेकत्ववत्। अथार्थान्तरमपि बहुषु समवेतमिति यदि तत्तेषा सामा[5]न्य। तदा **द्वित्वादिकार्यद्रव्येष्वपि प्रसंगो** द्वित्वमपि ह्यनेकद्रव्यसमवेतम्(।)आदिग्रहणाद् बहुत्वादि। तथा सयोगोनेकद्रव्यसमवेत.। कार्यद्रव्य चावयविसज्ञितमारम्भकद्रव्येषु समवेतमतो द्वित्वादिषु सामान्यरूपताप्रसगः। यस्मिन् नार्थान्तरे सति समाना भेदा भवन्ति तदेव सामान्य न सर्वमित्यत्राह। **न हि**। यस्मात् **सम्बन्धिनान्येना**र्थान्त[6]रेणैकत्वलक्षणेनान्येऽसमाना भिन्ना न समाना नैकीक्रियन्ते भिन्नाभिन्नसमानभावकरणे तदनुपयोगात्। भिन्नदेशादीनां प्रतिभासनाच्च कथ समाना एव भवन्ति। केवल **तद्वन्त** एक धर्मवन्तः **स्युर्भेदाः**। **भूतानि** ग्रहनक्षत्राणि तेषां **कण्ठे** दीर्घा **गुणो-**

---

[1] Cf. Nyāyavārtika 2 : 2 : 65.

स्युः[1]।[3] **भूतानां कण्ठगुणवत्। नाभिन्नप्रत्ययविषयाः। भूतवत्। तदात्मानमेव संसृजन्ती बुद्धिः सामान्यविषया प्रतिभासते। नैकसम्बन्धिनाविति भूतवत्।**

र्च्चनार्थं निबध्यते। तेनैकेन कण्ठे गुणेन यथा भूतानि तद्वन्ति न त्वेकीभवन्ति तद्वद्वचक्तयोपि।

ननु गु[7]णस्य मूर्त्तत्वाद् तद्वत्ता प्रतीतिर्युक्ता। न व्यक्तिषु सामान्यस्यामूर्त्त- 45b
त्वादिति चेत् (।) न। तत्समवेतत्वस्येष्टत्वादर्थान्तरभावस्य च। यतश्चैकसम्बन्धेपि न समाना व्यक्तयस्तत एव **नाभिन्नप्रत्ययविषयाः** एकाकारज्ञानस्याभ्रान्तस्य न विषया·। **भूतवत्**। यथा भूतान्यगुणस्वभावानि नैकगुणाकारप्रत्ययविषयः। तद्वत्। एवन्तावदनेकसम्बन्धेप्यर्थान्तर न तेषा सामान्य[1]द्वित्वादिष प्रसङ्गदिति स्थित (।) प्रतीयन्ते च समाना इति (।) तस्मात् **तदात्मानमेव** हि तयोर्भेदयोरात्मानमेव। **एकरूपमिदं द्वय**मित्येकाशेन स्वगतेन **संसृजन्ती बुद्धिः सामान्यविषया प्रतिभासते**। **नैकसम्बन्धिनाविति्येकेन** सामान्येन सम्बन्धिनावेताविति नैवम्बुद्धि प्रतिभासते येन सामान्यमर्थान्तरम्प्रमाणसिद्ध स्यात्। **भूत**वदिति वैधर्म्यदृष्टान्त ।[2] यथा बुद्धिर्भूतान्येकेन गु[3]णेन सम्बद्धानि गृह्णाति नैवमित्यर्थः।

यद्वा यथा भूतान्येकसम्बन्धीनि तथा भिन्नावेकसम्बन्धिनाविति सामान्यविषया बुद्धि. प्रतिभासत इति नैव।

अथ स्यात् (।) सामान्य हि व्यक्तीनाम्विशेषण। विशेषण च विशेषे स्वानुरक्ता बुद्धि जनयत्यतो नास्य व्यक्तिभ्योर्थान्तरभावेन प्रतिभास ।

ननु विशेषणत्वेपि तस्य न विशेष्येण स[3]हैक्य दण्डस्येव दण्डिना तत्कथमभेदप्रतिभास । अभेदाशेनाप्येकत्वान्न विशेषणविशेष्यभाव.। तस्मात् सामान्यस्य व्यक्त्यभेदप्रतीतिर्भ्रान्तिरेव।

अथ सर्वदैव प्रतीतेरभ्रान्ति.। तदाह।

"यो ह्यन्यरूपसवेद्य. सम्वेद्येतान्यथा पुन·।
स मिथ्या न तु तेनैव यो नित्यमवगम्यत" इति (।)

तदयुक्त। तस्य व्यक्त्यभिन्नत्वमेव स्यात्। गोर्गोत्वमिति प्रतीतिभे[4]दाभ्युपगमाच्च। न च लाक्षास्फटिकयोरिव जातितद्वतोः संसर्गावगतिरभ्रान्ति.। अलाक्षारूपस्य स्फटिकस्य लाक्षारूपेण गतेर्भ्रान्तित्वात्। एव जातितद्वतोरेकत्व-

---

[1]De-dan-ldan-pa-dag-tu-ni-hgyur-te.

तद्दर्शिन्याः सा[4] **भ्रान्तिरिति चेत्। तद्दर्शिनीति कुतः। निर्बीजभ्रान्तेरयोगादिति चेत्। त एव तदेककार्या बीजं भ्रान्तेः। संख्यासंयोगकार्यद्रव्यादिवस्तुभूतादिष्वप्यभावात्। तत् तथा सामान्ये निवेशाभावात् न सामान्यमन्यत्। सति वा तस्यापि स्वात्मनि अवस्थानाद् अभिश्रमणमन्येन। तस्माद् इमे भावाः सजातीय-**

ग्रहो भ्रान्ति.। सामान्यं केवल पश्यत्येव बुद्धि । तस्यास्तु **तद्दर्शिन्याः** समवायस्य सूक्ष्मत्वात् **सा भ्रान्तिर्यदेतद्** व्यक्तीनां सामान्याभेदेन ग्रहणमिति **चेत्। तद्दर्शिनीति कुतः** (।) पारमार्थिक[5]सामान्यदर्शिनी सा बुद्धिरिति कुतो निश्चयः सर्वदास्या व्यक्त्यभेदविषयत्वात्। **नास्या बीजमस्तीति निर्बीजा** तथा चासौ **भ्रान्तिश्च** तस्या **अयोगात्**। न हि भ्रान्तिरुत्पद्यमाना निर्निमित्ता घटते। जलादिभ्रान्तिवत्। भ्रान्तिश्चेयमससृष्टानपि भावान् ससृजन्ती बुद्धिरतोस्या निमित्तेन भवितव्य (।) यत्तन्निमित्तन्तत् सामान्यमित्यत्राह। **त एव** भेदास्तत्सामान्यज्ञा[6]नाद्येकङ्कार्य येषान्ते **तदेककार्या बीजं भ्रान्तेः**। एतच्च प्रतिपादयिष्यते।

न च सामान्यं दृष्टातदारोपेण व्यक्तिष्वेकाकारा भ्रान्तिर्युज्यते। तथा हि (।) सादृश्यं भ्रान्तिकारणमत्यन्तविलक्षणं च सामान्य व्यक्तिभ्यस्तस्यावर्णसंस्थानाकारत्वाद् व्यक्तीनां च वर्णसंस्थानाकारत्वात्।

अथ स्यात् (।) न सामान्यस्य सादृश्यनिमित्तो भेदेष्वारोपोपि त्वेकान्तेन
46a भिन्नेषु स एवायमित्ये[7]कत्वावसायविभ्रमो नैकरूपमन्तरेणेति ब्रूमः। यद्येवमेकेन सम्बन्धिन इत्येव कृत्वा विनापि भ्रान्तिनिमित्तेन यद्येकाकारभ्रान्तिविषया भवन्ति। तदा **संख्या च संयोगश्च कार्यद्रव्यं** चादिशब्दाद् विभागादि चैकम्**वस्तु** विद्यते येषान्ते तद्वन्तस्तेषु **भूतेषु** चैकगुणेन युक्तेषु स्यादेकाकारा भ्रान्ति· (।) न च भवति (।) अतो व्यक्तीनामपि नैकत्वनिमित्ता भ्रान्तिरिति। **तदिति** त[1]स्माद् यथा व्यक्तिभ्यो भेदेनेष्टं सामान्यं **तथा सामान्यबुद्धौ निवेशाभावात्** प्रतिभासाभावान्न **सामान्यमन्यत्**। **सति वा** सामान्ये **तस्यापि** सामान्यस्य **स्वात्मनि** स्वस्मिन् **स्वभावेऽवस्थानादभिश्रणमन्येन** व्यक्तिरूपेण। व्यक्तिष्वनवस्थानान्न धर्मरूपत्वन्तस्येत्यर्थ.। **तस्मादिति** स्वस्वभावव्यवस्थानाद् **इमे भावा** घटादय. **सजातीयाभिमतात्** तुल्याकारत्वेना[2]भिमताद् **अन्यस्माच्चेति** विजातीयादि**व्यतिरिक्ताः** पृथग्भूताः **स्वभावेन** प्रकृत्यैकरूपत्वात्। **स्वस्वभावव्यवस्थितेरिति** यावत्॥

द्वितीयकारिकार्थमाह। **यतो यतो भिन्नास्ते** भावास्तस्माद् भेदस्तद्भेदः। तस्माद् भिन्नाः स्वभावास्तस्य **प्रत्यायनाय** प्रतिभिन्नस्वभाव **कृतसन्निवेशैः शब्दैः**

याभिमतात् अन्यस्माच्च व्यतिरिक्ताः स्वभावेनैकरूपत्वात् ॥

यतो यतो भिन्नाः तद्भेदप्रत्यायनाय कृतसन्निवेशैः[1] शब्दै[2]: ततस्ततो भेदमुपादाय अनेकधर्माणः अभेदे[3]ऽप्यर्थाः प्रतीयन्ते। तेऽपि शब्दाः सर्वभेदानाक्षेपेऽपि एकभेदचोदनात् स्वलक्षणनिष्ठा एव भवन्ति। तदेकस्मादपि तस्य भेदोऽस्तीति ॥ 435a

तस्मात्[1] एकस्य भावस्य यावन्ति पररूपाणि तावत्यः (व्यावृत्तयः) तदपेक्षया। तदसम्भविकार्यकारणस्तस्य तद्भेदात्। यावत्यश्च व्यावृत्तयस्तावत्यः श्रुतयोऽतत्कार्य-

---

कृतसंकेतै शब्दै करणभूतैरनेकधर्माण कृतकत्वादिधर्म्मव[3]न्त **प्रतीयन्ते** स्वभावा भेदेपि। न ह्येकस्य स्वलक्षणस्य स्वभावनानात्वमस्ति। कथन्तर्ह्यनेकधर्मत्वमित्याह। **ततस्ततो भेदमुपादाय**इति (।) यतो यतो व्यावृत्तास्ततस्ततो भेदमुपादायाश्रित्य तेपि शब्दा ये तस्य तस्य भेदस्य भिन्नस्वभावस्य ख्यापनाय **कृतसंकेतास्**तेष्वस्मिन भिन्ने स्वभावे वाचकत्वेन नियता (।) ततो नैक शब्द. सर्वान् भिन्नस्व[4]भावानाक्षिपत्यतस्**तेपि शब्दा**: प्रत्येकन्तै· **सर्वभेदानाक्षेपेपि**। **एकभेदचोदना**देकैकस्य भिन्नस्य स्वभावस्य चोदनात्**तत्स्वलक्षणनिष्ठा एव भवन्ति**। यस्य स्वलक्षणस्य स स्वभावोन्यस्माद् भिन्नो य शब्देनाध्यवसीयते। तच्च तत्स्वलक्षण च। तन्निष्ठा एव तद्विषया एव भवन्ति।

ननु बाह्यतयाध्यवसितोर्थ. शब्दप्रतिभासी साधा[5]रणोन्य एवान्यच्च साधारण स्वलक्षणन्तत्कथन्तन्निष्ठा इत्यत्राह। **तदेकस्मादपि** यतो यतो व्यावृत्तोर्थः शब्दैर्विषयीक्रियते तस्मात्तस्मादतत्कारणादतत्कार्याच्चैकस्मादपि **तस्य** स्वलक्षणस्यानकव्यावृत्तस्य **भेदोस्तीति** कृत्वा तद्विषया उच्यन्ते न तु तद्विषया एव। यद्वा तस्य व्यावृत्त्याश्रयस्य धर्मस्य यत् स्वलक्षणन्तन्निष्ठा एव त[6]त्प्राप्तिपर्यवसाना एव भवन्ति। कि कारणं (।) तदेकस्मादपि तस्य भेदोस्तीति व्याख्यातमेव।

उपसहरन्नाह। **तस्मा**दिति। यस्मात् सजातीयविजातीयाद् व्यावृत्तिस्त-**स्मादेकस्य भावस्य यावन्ति पररूपाणि तावत्यस्तदपेक्षया**। पररूपापेक्षया। पररूपेभ्यो व्यावृत्तय क[7]ल्पिता धर्मभेदा। व्यावर्त्तते विजातीयमेभिरिति कृत्वा (।) 46b कि कारण (।) तस्मिन् व्यावर्त्त्येऽधिभूते धर्मिण्यसम्भवि कार्यं कारण च यस्य विवक्षितस्य धर्मिण· स **तदसम्भविकार्यकारणस्तस्य तद्भेदात्**। तस्मादतत्कार्यादतत्कारणाच्च भेदाद् व्यावृत्तत्वात्। **यावत्यश्च व्यावृत्तयस्तावत्यः श्रुतयो** निवे-

---

[1] Tha-sñad-du-byas-pa- [2] Thahi-dan-kyis.

कारणपरिहारेण व्यवहारार्थाः। यथा शब्दः प्रयत्नानन्तरीयकः श्रावणोऽतत्कार्यकारणपरिहार्थः।

तस्मात् स्वभावाऽभेदेऽपि[1] यो विशेषो भेदो धर्मिणा नाम्ना[3] प्रतीयते न स शक्यस्ततोऽन्येनेति न सर्वे शब्दा एकार्थाः। तस्मान्न प्रतिज्ञार्थैकदेशो हेतुरेवम्।

कथं स एव व्यवच्छेदः शब्दालिङ्गाभ्यां विधिना प्रतिपाद्यते न वस्तुनो रूपमिति

शिता **अतत्कार्यकारणपरिहारेण व्यवहारार्था** । तद्विवक्षित कार्य कारण[1] च यस्य स तत्कार्यकारणः। **यथा** श्रोत्रविज्ञानकार्य **शब्दः** प्रयत्नकारणश्च स तथा यो न भवति सोऽतत्कार्यकारणस्तस्य परिहारेण व्यवहारार्था. प्रवृत्तिनिवृत्तिलक्षणो व्यवहारोर्थ· फल यासामिति विग्रह.।

विषयमाह। प्रयत्न. कारण यस्य स प्रयत्नानन्तरीयक उच्यते। तेनाऽतत्कारणस्याऽप्रयत्नकारणस्य विद्युदादे. परिहारार्थ. **प्र[2]यत्नानन्तरीयक**ध्वनि.। श्रोत्रज्ञान कार्य यस्य **तच्छ्रावणन्तेन श्रावण**ध्वनि**रतत्कार्यपरिहारार्थः**। सर्वव्यवहाराणा चार्थक्रियानिमित्तत्वात्। हेतुफलभावलक्षणत्वाच्चार्थक्रियाया घटादिशब्देष्वपि तदतत्कार्यकारणपरिहार्थत्व योज्य ॥

तस्मादित्यादिना तृतीयश्लोक व्याचष्टे। यस्माद् भिन्ना व्यावृत्तिभेदा श्रुतयश्च यथास्वम्भेदे नियतास्तस्मा[3]देकस्य **धर्मिणः स्वभावाऽभेदेपि। धर्मिणे**त्यस्य विवरण **नाम्ने**ति शब्देनेत्यर्थ । **यो विशेष** इत्यस्यार्थो **भेदः** कृतकादिलक्षणो धर्म कल्पित· **प्रतीयते। न स शक्यस्ततोन्येन**। तस्माद् विवक्षितात् कृतकादिशब्दादन्येनानित्यादिशब्देन प्रत्याययितुन्त**स्मान्न प्रतिज्ञार्थैकदेशो** हेतुरनित्यकृतक**शब्दयोर्भिन्नार्थ**त्वात् ॥

कथमित्यादि परः।[4] **शब्दश्च लिङ्गश्च ताभ्यां**। यद्यपीह लिङ्ग प्रकृतन्तथापि शब्दस्योपादान लिङ्गवत् निर्विषयत्वख्यापनार्थन्तेन वे द स्य प्रामाण्य निराकृतम्भवति।

ननु विधिरूपेण शब्दलिंगे अर्थ. प्रतिपाद्यत इत्युक्तन्ततकथमिदमाशकित **व्यवच्छेदः** प्रतिपाद्यत इति कथ गम्यत इति।

नैतदस्ति। व्यवच्छिद्यतेनेनेति व्यवच्छेदो बाह्यरूपतयारोपित ए[5]वाकार उच्यते। तेन स एव शब्दलिङ्गाभ्या विधिना प्रतिपाद्यते न वस्तुरूपमिति कुतो गम्यते। यद्वा व्यवच्छिद्यतेस्मिन्निति व्यवच्छेद.। स्वलक्षणमुच्यते। **स एव**

---

[1] Thaḥi-daṅ-kyıs.

गम्यते। प्रमाणान्तरस्य प्रवृत्तेः। तथा हि—

एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम्।
कोऽन्यो न दृष्टो भागः स्याद् (यः) प्रमाणैः परीक्ष्यते ॥४५॥

एको ह्यर्थात्मा स तावत् प्रत्यक्षः। असिद्धे धर्मिणि साधनासम्भवात्। यथाऽनित्ये साध्ये शब्दः। तस्य प्रत्यक्षेणैव सिद्धेः सर्वाकारसिद्धिः। तदन्यस्या[6]ऽसिद्धस्याभावात्। भावे वाऽतत्स्वभावत्वम्।

न हि यो येन एकयोगक्षेमी भवति स तत्स्वभावो न युक्तः। तन्मात्रनिबन्ध-

---

शब्दलिंगाभ्यां विधिना विधिरूपेण **प्रतिपाद्यतेऽध्यवसीयते न पुनर्वस्तुनो रूपं** पारमार्थिकधर्मधर्मिभावलक्षण प्रतिपाद्यत **इति** कुतो **गम्यते**।

प्रमाणान्तरस्येत्यादि प्र[6]तिवचन। तेनायमर्थो यदि तावत् पारमार्थिको **धर्मधर्मिभावः** सर्वात्मनाऽभिन्नस्तदैकेन प्रमाणेन शब्देन वाधिगतेर्थे सर्वात्मना परिच्छेदादन्यस्य **प्रमाणान्तरस्य** शब्दान्तरस्य वा प्रवृत्ति स्याद् गृहीतग्राहित्वेनाप्रामाण्यात्। भवति च शब्दान्तरादे. **प्रवृत्तिरतः** कल्पित एव धर्मधर्मिभाव ।

यद्यपि पूर्वसामान्यनिराकरणा[7]देव कल्पितो धर्मधर्मिभाव. प्रसाधितस्तथापि 47a
प्रकारान्तरेणानेनापि प्रसाध्यत इत्यदोष । एतमेव प्रतिपादयन्नाह। **तथा ह्रीत्यादि**। **एकस्येति**। धर्मधर्मिविभागरहिततत्वान्निरशस्यार्थस्वभावस्यार्थात्मन **स्वय** स्वरूपेण **प्रत्यक्षस्य सतः कोन्यो न दृष्टो भागः स्यात्** प्रत्यक्षदृष्टात् स्वभावात् कोन्य स्वभावो न दृष्ट स्याद् **यः प्रमाणैरनुमानस[1]ज्ञकै परीक्ष्यते** (।) व्यक्तिभेदाद् बहुवचन। सर्व एव दृष्टो निरशत्वाद् भावस्य तस्मान्न प्रमाणान्तरपरीक्ष्य. स्यादिति। **एक** इत्यादि विवरण। **एको ह्यर्थात्मा** निरश. **स तावत् प्रत्यक्षो**भ्युपगन्तव्य यत्रानुमान प्रवर्त्तते। कि कारण(।)**प्रमाणेन** प्रागसिद्धे **धर्मिणि साधनासम्भवात्**। आश्रयासिद्धत्वेन लिगस्यासम्भवात् तस्मात् प्रसिद्धेन धर्मिणा भा[2]व्य ॥

एतदुक्तम्भवति। लिङ्गस्यैव प्रवृत्तिर्न स्यात् कि पुर्नलिगिनिश्चिता प्रमाणान्तरस्य प्रवृत्तिर्भविष्यति। **यथाऽनित्ये साध्ये शब्दः** प्रत्यक्षसिद्धस्तस्य **प्रत्यक्षेणैव** प्रमाणेन स्वरूपसिद्धेः कारणात् **सर्वाकारसिद्धिः**। कस्मात् **तदन्यस्यासिद्धस्य** शब्दस्वभावादन्यस्य स्वभावस्यासिद्धस्याभावात्। **भावे** वाऽसिद्धस्य स्वभावस्य **अतत्स्वभावत्वम**शब्दस्वभावत्व।[3] सिद्धासिद्धयोरेकस्वभावत्वविरोधात्।

तदेवाह। **न ह्रीत्यादि**। अलब्धधर्मानुवृत्तिर्योग । लब्धधर्मानुवृत्ति· क्षेम·। एको योग. क्षेमश्च यस्य स तथा। तुल्यधर्मेति यावत्। **यः** स्वभावो **येन** सदैक**कयोगक्षेमी न भवति स** भिन्नयोगक्षेम.। तत्स्वभावो यतो भिन्नयोगक्षेमस्**तस्य**

435b **नत्वाद् भेदव्यवहारस्य। अन्यथा[7]ऽभावप्रसङ्गादित्युक्तम्। तस्मात् प्रत्यक्षे धर्मिणि तत्स्वभावसाकल्यपरिच्छेदात् अनवकाशा प्रमाणान्तरस्य वृत्तिः॥**

नो चेद् भ्रान्तिनिमित्तेन संयोज्येत गुणान्तरम्।
शुक्तौ वा रजताकारो रूपसाधर्म्यदर्शनात् ॥४६॥

स्वभावो न युक्तः। तन्मात्रनिबन्धनत्वाद् भेदव्यवहारस्य नानात्व व्यवस्थाया।

अन्यथेति यद्येतद् भेदकारण नेष्यते तदाभेदव्यवहारस्या**भावप्रसङ्गादित्युक्तं।** एष हि भेदाभेदहेतुर्वेत्यत्र प्रस्तावे। यत एवन्त**स्मात् प्रत्यक्षे धर्मिणि** शब्दादौ। **तत्स्वभावसाकल्यपरिच्छेदात्**। धर्मिस्वभावस्य साकल्येनावगमात् **तत्र** धर्मिणि। **अनवकाशा** निर्विषयी **प्रमाणान्तरस्या**नुमानस्य **वृत्तिः**॥

तवापि तुल्यो दोष इति चेदाह[5] (।) नो **चेत्या**दि। **भ्रान्तिनिमित्तेन** सदृशापरोत्पत्त्यादिना कारणभूतेन विकल्पबुद्धया **संयोज्येत** समारोप्येत **गुणान्तर**। **स्थिर**त्वादि। वा शब्द इवार्थे। **शुक्ताविव रजताकार**ः सयोज्येत। कथ। रजतरूपेण शुक्तिका**रूपस्य यत्साधर्म्य** चैकचिक्यादि। तस्य **दर्शनात्**। अनवधारितविशेष शुक्तिकारूपमेव सदृशप्रत्ययनिबन्धनत्वाद् रूपसाधर्म्यमुक्त[6] न तु साधर्म्य नाम द्वयो साधारणमस्ति।

एतदुक्तम्भवति। **यदि भ्रान्तिनिमित्तेन गुणान्तरन्न संयोज्येत** भवेत् ममापि दोष. किन्तु समारोप्येत। तत समारोपव्यवच्छेदार्थम्प्रमाणान्तर प्रवर्त्तते। तेनायमर्थानुभूतनिश्चिते प्रमाणान्तरस्य गृहीतग्राहित्वेनाप्रवृत्ति. स्यात्। समारोपेण
47b त्वनुभूतानिश्चिते तत्समारोपव्यवच्छेदा[7]र्थ प्रमाणान्तरमनुमान प्रवर्त्तत इत्येके।

तदयुक्त। लिङ्गस्य व्यवच्छेदेन सह सम्बन्धासिद्धे। नापि यावद्धेतुना पूर्वं पक्षव्यवच्छेदो न क्रियते तावत् सन्दिग्धा साध्यप्रतीति स्याद्धेतो साध्येन सम्बन्धात्। यत्र च न साध्य न तत्र तद्विपक्षो विरोधात्। तस्माल्लिङ्ग स्वव्यापक विधिरूपेण निश्चिन्वदर्थादन्यसमारोप निषेधति॥

नन्वेवमपि कथन्तन्निषेध क्षणिकत्वानुमाने[1]पि प्रवृत्तेऽक्षणिकारोपात्।

सत्य (।) केवलमनुमानेनाक्षणिकार्थनिषेधे कृते नायमक्षणिकाकारः प्रत्ययस्तज्जन्योपि तु सदृशापरोत्पत्तिजन्यत्वेनारोपित इति प्रतिपाद्यते। तस्मात् तस्यैवानुभूतानिश्चितस्य क्षणिकत्वादेर्निश्चयानुमान प्रवर्त्तते। यत्रापि विपरीत समारोपो नास्त्यभ्यासादेरभावाच्च नानुभवो निश्चयजननसमर्थो न तत्रापि निश्चया[2]र्था प्रमाणान्तरवृत्तिरेकाशनिश्चयेन सर्वात्मना निश्चितत्वात्। न च तद्वस्तु प्रतिभासते यस्य न कश्चिदपि स्वभावो निश्चितः। तस्मात् तत्राप्ये-

यदि दृष्टसर्वतत्त्वस्वरूपे शुक्तावपि शुक्तौ रजताकार इव निश्चयप्रतिरोधिना[1] भ्रान्तिनि[2]मित्तेन गुण(न्तरं) न संयोज्येत। न हि शुक्तौ समानं विशिष्टं च द्वे रूपे सम्भवतः। तथा सर्वदा प्रसङ्गात्। अप्रतिपत्तौ वा विवेकेन द्वित्वकल्पनायोगात् अतिप्र[3]सङ्गाच्च।

पश्यन् शुक्तिरूपं विशिष्टमेव पश्यति। निश्चयप्रत्ययसामान्यात् अनिश्चि-

---

कप्रमाणप्रवृत्तावपरस्याप्रवृत्ति स्यादेवेति।

यदीत्यादिना विवरण। **दृष्टं सर्वन्तत्त्वं** स्वरूप यस्येति विग्रह। तथा **निश्चयप्रतिरोधिना** यथादृष्टनिश्चयविबन्धकेन **भ्रान्तिनिमित्तेन** सदृशापरोत्पत्तिलक्षणेन। **गुणा[3]न्तर**स्थिरत्वादि। **न संयोज्येत**। नारोप्येत। यथा शुक्तौ विशिष्टरूपेण गृहीतायामपि शुक्लसाधर्म्याद् रजताकार सयोज्येत। तदा स्यादनवकाशा प्रमाणान्तरवृत्ति (।)

स्यान्मत (।) न शुक्तौ विशिष्टरूपग्रहे रजतसमारोप किन्तु यद्रजतरूपसामान्यन्तद्दृष्टेरेवमध्यवसाय इत्यत्राह। **न ही**ति। न हि **शुक्तौ द्वे रूपे सम्भवतः**। एक रजतेन **समानं** रूप अप[4]रम्वि**शिष्ट**मवधारण **च**। कि कारण। **तथा** सामान्यविशेषरूपेण शवलाभासाया प्रतिपत्ते **सर्वदा प्रसङ्गात्**। **अप्रतिपत्तौ वा विवेकेने**ति। इद सामान्यमय विशेष इत्येवम्विवेकेन विभागेनाप्रतिपतौ **द्वित्वविकल्पायोगात्**। शुक्तौ द्वे रूपे इति कल्पनाया अयोगात्। प्रतिभासभेदमन्तरेण द्वित्वकल्पनाया-**मतिप्रसङ्गात्**। अन्यत्राप्येक[5]त्वाभिमते द्वित्वकल्पना स्यात्। नेद रजतमिति बाधकस्यानुत्पादप्रसगाच्च। तस्माच्छुक्तौ रूपद्वयायोगात।

पश्यन् शुक्तिरूपं पुरुषो **विशिष्टमेव** स्वलक्षणमेव **पश्यति** न सामान्य। अभ्यासादयो **निश्चयप्रत्यया**स्तेषाम्वैफल्यात् त्वनिश्चिन्वन् द्विविशिष्ट शुक्तिकारूप**न्तत्सामान्यं** रजतरूपसामान्यम्**पश्यामीति मन्यते**। तत इति रजतरूपसामान्यग्रहणाभिमाना[6] दस्य द्रष्टु शुक्तौ रजतसमारोप.। यद्वा शुक्तिकारजतयोर्यत्सामान्यं तुल्य रूपन्तत्पश्यामीति मन्यते(।) **ततो** रूपदर्शना**दस्य** द्रष्टू **रजतसमारोपः**। तथा हि यादृशमेव मया रजतस्य रूप प्रतिपन्नन्तादृशमेवास्यापि रूपन्तस्मात्तदेवेद रजतमिति प्रतीति.। यथा शुक्तौ रजतसमारोपस्तथा दृष्टे शब्दादौ धर्मिणि **सदृशापरापरोत्पत्त्या** स[7]दृशस्य द्वितीयस्य क्षणस्योत्पत्त्या भ्रान्ति- 48a
निमित्तेन पूर्वोत्तरक्षणयो**रलक्षितनानात्वस्य** पुस**स्तद्भावसमारोपात्** सत्तासमारो-

---

[1] Nes-paḥi-gnas-su-gyur-pa. [2] Gtan-la-ma-phebs-pas.

न्वन् तत्सामान्यं पश्यामीति मन्यते।[1] **ततोऽस्य रजतसमारोपः सदृशापरोत्पत्त्या**[4] **अलक्षितनानात्वस्य तद्भावसमारोपात् स्थितिभ्रान्तिः। यावन्तोऽस्य परभावाः तावन्त एव यथा स्वनिमित्तभाविनः समारोपा इति तद्व्यवच्छेदकानि भवन्ति प्रमाणानि**[5] **सफलानि स्युः। तेषान्तु व्यवच्छेदफलानां नाप्रतीतस्य वस्त्वंशस्य प्रत्यायने प्रवृत्तिः। अनंशस्य एकदेशेन दर्शनायोगात्। तस्य दृष्टत्वात्॥**[6]

तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः।
(भ्रान्तेर्निश्चीयते नेति) साधनं संप्रवर्त्तते॥४७॥

इति संग्रहश्लोकः।

436a **तस्मान्न दृष्टग्रहणार्था दृष्टे प्रमाणान्तर**[7]**स्य प्रवृत्तिः॥**

वस्तुग्रहेनुमानाच्च धर्मस्यैकस्य निश्चये।
सर्व(धर्म)ग्रहोऽपोहे नायं दोषः प्रसज्यते॥४८॥

पात् **स्थितिभ्रान्तिः**। तस्माद् **यावन्तोस्य** शब्दादे क्षणिकानात्मादिस्वभावस्य **परभा**वा नित्यादयस्**तावन्त एव यथास्वनिमित्तभाविनः** यस्य यदनुरूपं निमित्तन्तद्भाविन· **समारोपा**[1] **इति**। **तद्व्यवच्छेदकानि** तस्य समारोपस्यार्थाद् व्यवच्छेदकानि **भवन्ती**त्युत्पद्यमानानि **प्रमाणा**न्यनुमानसञ्जितानि। व्यक्तिभेदाद् बहुवचन। **सफलानि स्युः** सार्थकानि स्यु। **तेषान्तु व्यवच्छेदफलानां** समारोपप्रतिषेधफलाना प्रमाणाना। **नाप्रतीतस्य वस्त्वङशस्य** वस्तुभागस्य **प्रत्यायने** प्रकाशने **प्रवृत्तिः**। तस्य वस्त्वशस्य **निरंशे** धर्मिणि दृश्य[2]माने दृष्टत्वात्। कि कारणम् (।) **अनंशस्यैकदेशेन दर्शनायोगात्**॥

यत एवन्त**स्मात्** प्रत्यक्षेण **दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः** समस्त. स्वभावस्तथापि **भ्रान्तेः** सद्भावा**न्निश्चीयते नेति** कृत्वा तन्निश्चयार्थं **साधन**मनुमान विधिरूपेणैव **प्रवर्त्तत** इति स्पष्टमेवोक्त।

तस्मान्नादृष्टग्रहणार्था दृष्टे प्रत्यक्षेण **प्रमाणान्तरस्य** (।) किन्तर्हि दृष्टनिश्चया[3] चैव **प्रवृत्ति**रित्यनेनापि विध्यर्थं। स्पष्ट एवोक्तोन्यनिषेधस्त्वर्थात्॥

वस्तुग्रह इत्यादि। चकार प्रत्यक्षापेक्षया समुच्चयार्थः। अनुमानेन च **वस्तुग्रहे**ङ्गीक्रियमाणे। शब्दादिधर्मिणो **धर्मस्यैकस्य** कृतकत्वादिलक्षणस्य **निश्चय**येन निरशत्वाद् धर्मिणः **सर्वधर्म**निश्चयस्तदा नित्यत्वाद्यनुमानान्तरवैफल्यमित्याकूत।

---

[1] Sñam-du-rlog-par-byed-do.

न केवलं प्रत्यक्षदृष्टे प्रमाणान्तरावृत्तिः। यदानुमानमपि वस्तु विधिना प्रत्यायक इष्यते न व्यवच्छेदकृत्। तदा एकधर्मनिश्चये तदव्यतिरेकात् सर्वधर्मनिश्चय इति प्रमाणन्तरावृत्तिः।

न हि तस्मिन् निश्चिते निश्चितो तदात्मेति युक्तः।

यदा पुनरनुमानेन समारोपव्यवच्छदः क्रियते। तदैकेन समारोपस्य व्यवच्छेदात् अन्यस्य व्यवच्छेदः कृतो न भवतीति तदर्थमन्यत् प्रवर्त्तते।

ननु विपर्यासपूर्वक एवाप्रतीतस्य निश्चयो भवतीति नायं नियमः। यथा-

---

अपोहो बाह्यतया आरोपित आकारो[4]पोह्यतेऽनेनेति कृत्वा। तस्मिन्ननुमानेन प्रतिपाद्येङ्गीक्रियमाणे यद्वापोह्यतेस्मिन्नित्यपोह स्वलक्षण (।) तस्मिन् स्वाकाराभिन्नतयाऽनुमानग्राह्येऽभ्युपगम्यमाने **नायम**नन्तरोक्तो **दोषः प्रसज्यते**।

न केवलमित्यादि विवरणं। **क्वचित्** प्रत्यक्षदृष्टे धर्मिणीति सम्बन्ध.। कस्मिँश्चित् **प्रत्यक्षदृष्टे** धर्मिणीत्यर्थ । न सर्वो धर्मी प्रत्यक्षो भवतीति क्वचिद् ग्र[5]हण। अनन्तरोक्तेन न्यायेन **प्रमाणान्तरावृत्तिः**।

तदानुमानमपि वस्तु शब्दादिक **विधिना प्रत्यायतीष्यते** वस्त्वध्यवसायेनार्थान्न समारोपव्यवच्छेदकृत्। **तदे**ति विधिरूपेण वस्तुस्वरूपग्रहणे। **एकधर्मनिश्चये** सति **तदव्यतिरेका**न्निश्चितधर्माव्यतिरेकात् **सर्वधर्मनिश्चय इति प्रमाणान्तरावृत्ति**रनुमानान्तराप्रवृत्ति । सत्यप्यव्यतिरेके। न सर्व[6]धर्मनिश्चय इति चेदाह। **न ही**त्यादि। **तस्मि**न्निति प्रथमानुमान**निश्चिते** धर्मे। **तदात्मे**ति। निश्चितधर्मात्मा सन्न**निश्चितो** न हि युक्तः।

अपोहे नायन्दोष. प्रसज्यत इत्येतद्विवृण्वन्नाह। **यदा पुन**रित्यादि। यदा पुन**रनुमानेन** वस्त्वध्यवसाय कुर्वताऽर्थात् **समारोपव्यवच्छेदः क्रियते** न तु साक्षाज्ज्ञापकत्वादस्य। तेनैतन्निरस्तं समारोपव्यवच्छेद[7] एव व्यवहारादन्यार्थ- 48b
प्रवृत्तिर्न स्यादनुमानेनानिश्चितत्वादिति। **तदै**केन कृतकानुमानेनैकस्याकृतक-**समारोपस्य व्यवच्छेदादन्यस्य** नित्यसमारोपस्य **व्यवच्छेदः कृतो न भवती**ति कृत्वा। **तदर्थ**मन्यसमारोपव्यवच्छेदार्थ**मन्य**दित्यनित्यत्वाद्यनुमान **प्रवर्त्तते**। तस्मान्न विकल्पाना स्वरूपेण बाह्यो ग्राह्योऽपि तु स्वाकारेण सहैकीकृत एव बाह्यो विषय (।) स चास[1]त्योऽपोह्यतेऽन्यदनेनेति अपोह उच्यते ॥

स्थिते चैवम्परोनवगताभिप्रायः प्राह। **नन्वि**त्यादि। **पूर्वन्त**द्विपरीताकारसमारोपी विपर्यास· प्रवर्त्तते। ततस्त**द्विपर्यासपूर्वकोप्रतीतस्यार्थस्य** लिङ्गान्नि**श्चयो भवतीति नायन्नियमो** विपर्यासरहितेप्यनुमानसम्भवात्। तदाह। **यथे-**

ऽकस्मादग्निप्रतिपत्तिः। न हि तत्रानग्निसमारोपः सम्भाव्यते। तत् न सर्वत्र व्यवच्छेदः क्रियत इति चेत्।

अत्र धर्मिप्रतिपत्तौ अभेदात् सर्वप्रतिपत्तेः। ततो भेदेऽसम्बद्धस्याप्रतिपत्तिरित्युक्तम्। तस्मात् तत्राऽपि तद्दर्शिनः[5] तत्स्वभावानिश्चयौ हि कुत इति। विपर्यासादेव।

स च तद्विविक्तेन तं प्रदेशं अग्निसत्ताभावनाविमुक्तया बुद्धया तद्विविक्तेन

त्यादि। **अकस्मात्**इत्यतर्कितोपस्थितात्। सहसैव क्वचित्प्रदेशे धूमा[2]द**ग्निप्रतिपत्तिः। न हि तत्रेत्यकस्मादग्निप्रतिपत्ता**व**नग्निसमारोपः सम्भाव्यते। तदि**ति तस्मान्न **सर्वत्र व्यवच्छेदः क्रियते**ऽर्था**दित्य**नुमानेन।

उक्तमित्या चार्य। **अत्र** हि वस्तुस्वरूपग्राहकत्वेनानुमानस्य प्रवृत्तावुक्तमुत्तर। प्रत्यक्षेण **धर्मिप्रतिपत्तौ** तद्धर्माणा धर्मिण सकाशाद**भेदात् सर्वप्रतिपत्तेर**नुमानवैफल्यमिति। धर्मिण. सकाशाद् ध[3]र्मस्य भेदे वाभ्युपगम्यमाने धर्मिणा सह न तादात्म्यलक्षण सम्बन्धो भेदाभ्युपगमात्। न चानित्यत्वादीना धर्मिस्वरूपादुत्पत्तिर्न चानित्यत्वादिभ्यो धर्मिण उत्पत्ति। **ततश्चासम्बद्धस्य** धर्मस्य तत्र मिण्य**प्रतिपत्तिरि**त्येत**दप्युक्त**। अहेतुफलभूतस्य तत्रानुमानासम्भवादित्यत्रान्तरे। यत एवन्त**स्मात् तत्रा**प्यकस्माद् धूमदर्शनादग्निप्रतिपत्तौ। **तद्द[4]र्शिनः** प्रदेशदर्शिन पसस्त**त्स्वभावानिश्चयो**ग्निमत्त्वस्वभावानिश्चयोस्त्येव। स चानियत **कृतो विपर्यासादेवा**नग्निमता प्रदेशेन तुल्यत्वग्रहणादेव।

एतदेवाह (।) **स** चेत्यादि।

यद्वा तत्स्वभावानिश्चय कुत. (।) किन्तु निश्चय एव स्यादविपर्यासात्। भवति चानिश्चय. (।) तस्मान्न धर्मिप्रतिपत्तिर्वस्तुस्वरूपग्राहिणीत्यपोहविषया।

किञ्च। **स चे**त्यादि। **स चे**[5]ति पुरुष**स्तद्विविक्ते**नेति वह्निविवेकेन **तं प्रदेश**मग्निमन्तमपि **तद्विविक्तेन रूपेण निश्चिन्वन् बुद्धया**। किम्भूतया। **अग्निसत्ताभावनाविमुक्तया**। अग्निसत्तासम्भावनारहितया (।) **कथमविपर्यस्तो** नामविपर्यस्त एवात्तस्मिँस्तद्ग्रहात् (।) तथा हि (।) यावत्तत्र प्रदेशे धूमन्न पश्यति तावदन्येनाग्निरहितेन प्रदेशेन सदृशन्तमप्यध्यवस्यति। यदि नाम क्वचिदनु[6]भव योगे सति यदीह निश्चयेस्तथापि तत्र सशयेन भाव्य सशयश्चोभयाशावलम्बी। स च पक्षे तद्विपरीत सस्पृशत्येवात सशयव्युदासेप्यन्यव्यवच्छेद कुतो भवत्येव लिङ्गेन। अवश्य च लिङ्गादेवानुमेय प्रतिपद्यमानस्तत्रानुमेये विपर्याससशयाभ्या युक्तो भवति। यस्मात् **तदाकारसमारोपसंशयरहितश्च**। अनग्न्याकारसमारोपे[7]ण

रूपेण निश्चिन्वन् कथमविपर्यस्तो नाम । तदाकारसमारोपसंशयरहितश्च तत्प्रतिपत्तौ न लिङ्गमनुसरेत् । न तस्यान्वयव्यतिरेकयोराद्रियेत् ॥

तस्मादपोहविषय(मिति) लिङ्गं प्रकीर्तितम् ।
अन्यथा धर्मिणः सिद्धा(वसिद्धं किमतः) परम् ॥४९॥

इति संग्रहश्लोकः ।

सशयेन च रहितश्च पुरुषस्तत्प्रतिपत्तौ अग्निप्रतिपत्तौ **न लिङ्गमनुसरेत्** । न पक्षधर्म 49
समाश्रयेत् । तथा **न तस्य** लिङ्गस्यान्वयव्यतिरेकयोराद्रियेत । । यावतानुसरेदाद्रियते च । तस्मात्तदाकारसमारोपसशयवान् प्रतिपत्ता लिङ्गबलेन समारोपमपनयति क्वचित्सशयमत सर्वत्र स्वव्यापकप्रतिपत्तिद्वारेण समारोपव्यवच्छेद क्रियते ।

तस्मा[1]दपोहविषयमन्यव्यवच्छेदविषय । इत्युक्तेन प्रकारेण न तु साक्षात् । **अन्यथे**ति यदि समारोपमन्तरेणानुमानस्य प्रतिपत्तिरिष्यते । तदा केनचित् प्रमाणेन **धर्मिणः सिद्धौ किमसिद्धन्तस्य** धर्मिणो **रूपमतः** सिद्धात् स्वभावात् **परम**न्यदस्ति यस्य प्रत्यायनाय लिङ्ग प्रवर्त्तेत ॥

ननु सशयविपर्ययोत्पादे सति भाग स्यात् । यदाह (।) **न** चेमा कल्प[1]ना अप्रतिसम्विदिता एवोदयन्ते व्ययन्ते चेति । नापि तत्प्रतिपत्तौ लिङ्गानुसरणेन तदाकारसमारोपसशय शक्यते कल्पयितुन्निश्चयानुत्पत्तिपक्षेपि (।) साध्यनिश्चयार्थं लिङ्गानुसरणस्य सम्भवात् ।

"अन्यथा धर्मिण सिद्धावसिद्ध किमत· परम्" (।)

इत्यनेनापि धर्मिविषयस्य ज्ञानस्य कल्पितविषयत्व स्यात् । न तु धर्मिणि समारोप सिध्यतीति कथ[3]न्तदनुमानस्यार्थात् समारोपव्यवच्छेद इति ।

सत्य (।) किन्त्वयमभिप्राय (।) न यावत् पक्षधर्मत्वनिश्चयो न तावदनुमानस्योत्थानमस्ति हेतोरसिद्धत्वात् । अग्निमति च प्रदेशे प्रदेशमात्रसम्बन्धितया यो धूमस्य निश्चयोऽयमेव विपर्यासोऽन्यथावधारणात् । न ह्यत्राग्निर्नास्तीत्येव रूप एव विपर्यास साग्ने प्रदेशादयमन्य इत्येव रूपस्यापि[4]षि(?)प्रत्ययस्य विपर्यासात्तेनात्राप्यनुमाने साग्निरय प्रदेशो न प्रदेशमात्रमिति समारोपनिषेधोस्त्येव ।

भवतु तावत् समारोपे तद्व्यवच्छेदाय स्वविषये प्रवर्त्तमान लिङ्गमन्यापोहकृत् । यत्पुनरिद प्रत्यक्षपृष्ठभावि विकल्पविज्ञानन्तदसति समारोपे भवत् कथमन्यापोहकृत् । अवश्य च तदन्यापोहविषयमेष्टव्य सामान्यविषयत्वादन्यापो[5]हलक्षणत्वाच्च सामान्यस्य भवतान्दर्शनेनेति (।)

(क्वचित् दृष्टेपि यज्ज्ञानं सामान्यार्थविकल्पकम्।
436b **असमारोपितान्यांशे तन्मात्रापोहगोचरम्) ॥५०॥**

अत आह। **क्वचिदित्यादि**। कस्मिँश्चिद्रूपादौ **दृष्टेपि** प्रत्यक्षेण। तत्पृष्ठभावि यज्ज्ञानं **सामान्यार्थं सामान्यविषयमत** एव विकल्पक। **असमारोपितः** अन्याङ्शः प्रतियोग्याकारो यस्मिन् विषये स तथा तत्र प्रवर्त्तमानन्तदपि **तन्मात्रापोहगोचरं**। तेनायमर्थो भवति (।) समारोपरहित स्वलक्ष[0]ण स्वाकारभेदेन गृह्णन् विकल्पक ज्ञानम्भ्रान्तत्वात् तत्समारोपरहितबाह्याध्यवासायकमेव न तु बाह्यस्वरूपग्राहकम् (।) अतस्तन्मात्रमेव नियतबाह्यावसाय एवान्यस्य समारोपस्यापोहगोचरम्विकल्पक ज्ञान।

यद्वा असमारोपितश्चासावन्याशश्च तस्मिन् सति विकल्पक ज्ञान प्रवर्त्तमान-
49b न्तन्मात्रापोहगोचर। योसावसमारोपितोन्याऽशस्तन्मात्रव्यव[7]च्छेदविषयम्भवति।

एतदुक्तम्भवति। यत्रापि समारोप प्रवृत्तो न तत्रापि समारोपनिषेध· शब्दलिङ्गाभ्या प्रतिपाद्यते सम्बन्धाभावादत एवाय न क्रियतेऽहेतुत्वाच्च नाशस्य। केवल पूर्वकस्य समारोपस्य स्वरसनिरोधात्। शब्दलिङ्गाभ्यामनित्यादिनिश्चये सत्यन्यस्य समारोपस्यानुत्पादे सति समारोपनिषेध. कृतो भवति। तथा प्रत्यक्षदृष्टेप्यन्यविक[1]ल्पस्य समारोपव्यवच्छेद· केन वार्यते। तेन न पूर्वत्रान्यादृश एव समारोपव्यवच्छेद उक्तोऽधुनान्यादृश एवोच्यत इति भिन्नवाक्यता।

तेनेद च निरस्त (।)

"प्रागगौरिति विज्ञान गोशब्दश्राविणो भवेद् (।)
येनागोव्यवच्छेदाय प्रवृत्तो गौरिति ध्वनिरि"[1]ति।

यदा शब्दलिगयो, स्वविषये, निश्चयजननेनान्यनिषेधे व्यापारः कल्प्यते। तदा विधिरूपेणैव प्रवृत्ति[2]रिति सिद्ध। तेन (।)

"यदि गौरित्यय शब्द. समर्थोन्यनिवर्त्तने।
जनको गवि गोबुद्धेर्मृग्यतामपरो ध्वनिरि"ति (॥)

निरस्तं।

तथा यदप्युच्यते।

"यद्यप्योह विनिर्मुक्ते न वृत्तिः शब्दलिगयो।
युक्ता तथापि बोधस्तु ज्ञातुर्वस्त्ववलम्बत" [1]इति (॥)

---

[1] Ślokavārtika, Apohavāda 92.

यद् अलिङ्गरूपादिकमेतत् दृष्टिप्रवृत्तौ[1] निश्चयज्ञानं जायते। तत् कथं व्यवच्छेदविषयं भवतीति चेत्। समारोपविषयेऽभावात्। यत्रास्य समारोपो न तत्र भेदे स्थिरः[2] सात्मक इति वा निश्चयो भवति॥

तदिष्टमेवास्माक। शब्दलिगप्रतिपादितस्य चार्थस्यान्यनिषेधे व्यापारो न शब्दलिङ्गयो.।

तेन यदुच्यते कु मा [3] रि ले न (।) निषेधस्य निरूपत्वाद् भेदाभावाच्च न लिङ्गलिङ्गिभाव. नापि शब्दवाच्यत्व।

"न गम्यगमकत्व स्यादवस्तुत्वादपोह्यो.।
भवत्पक्षे यथा लोके खपुष्पशशशृङ्गयो ।
निषेधमात्ररूप च शब्दार्थो यदि कल्प्यते।
अभावशब्दवाच्या स्याच्छून्यतान्यप्रकारिका। (३६)
भिन्नसामान्यवचना विशेषवचनाश्रये।
सर्वे भवेयु. पर्याया यद्यपोह[4]स्य वाच्यता॥ (४२)"[२]

तथा यदि चापोह्यभेदेनापोहस्य भेदस्तदौपचारिक स्यात्। यस्य चापोहस्य नीरूपत्वे धर्मिभेदेन न भेद । कथन्तस्य बहिर्भूतैरपोहैर्भेद क्रियते। तदाह[२]।

"नन् चापोहभेदेन भेदोपोहस्य सेत्स्यति।
न विशेष स्वतस्तस्य परतश्चौपचारिक ॥ (४७)
संसर्गिणोपि चाधारा यन्न भिन्दन्ति भावत ।
अपोह्यै स वहि[5]सस्थैभिद्येतेत्यतिकल्पनेति" (॥५२॥)
निरस्त। व्यवच्छेदमात्रस्य शब्दाद्यविषयत्वात् ।

यदित्यादिना श्लोक व्याचष्टे। आदिशब्दाच्छब्दादिपरिग्रह । नास्य लिगमस्तीत्यिलिङ्गरूपादिकमेतदिति **निश्चयज्ञानं। असति समारोपे** भवति। **न हि** प्रत्यक्षदृष्टे **रूपादौ** तदानीम्विपरीताकारसमारोपोस्ति। **तत्कथं व्यवच्छेदविषयम्भवति।**

इयता श्लोक[6]स्य पूर्वार्द्धो व्याख्यात.। उत्तरार्द्ध व्याख्यातुमाह। **समारोपविषये तस्य** निश्चयज्ञानस्याभावात्। तद्व्यवच्छेदविषयम्भवतीति प्रकृतेन सम्बन्ध.। एतदेवाह। **यत्र** भेदेस्य पुस **समारोपो न तत्र** भेदे समारोपविषये **निश्चयो भवत्यस्थिरो** निरात्मक इति वा॥

---

[1] Mthon-baḥi-mjug-thogs-su. [2] Ślokavārtika. Apohavāda

निश्चयारोपमनसोर्बाध्यबाधकभावतः।

न हि सर्वतो भिन्नो दृष्टोऽपि भावस्तथैवेति प्रत्यभिज्ञायते। क्वचित् भेदे[3] व्यवधानसम्भवात्। यथा शुक्तेः शुक्लत्वम्। यत्र भ्रान्तिनिमित्तं तत्रैवास्य प्रतिपत्तुः स्मार्तो निश्चयो भवति तद्दर्शनाविशेषेऽपि। भ्रान्तिनिश्चययोर्बा[4](ध्य-बा)धकभावात्।

समारोपविवेकेऽस्य प्रवृत्तिरिति गम्यते ॥५१॥

तद्विवेक एवान्यापोहः। तस्मात् तदपि तन्मात्रापोहगाचरं न वस्तुस्वभाव-निश्चायकं[5] स्वरूपेण। तथा हि निश्चयेऽपि अप्रतिपत्तिदर्शनात्। तस्य स्वभाव-

---

५०a किं कारण (।) **निश्चयारोपमनसोर्बाध्यबाधकभावः**। निश्चयज्ञा[7]नस्य तद्विपरीतसमारोपज्ञानस्य च बाध्यबाधकभावतः। बाध्यबाधकभावमेव साधयन्नाह। **न हीति सर्वतः** सजातीयाद्विजातीयाच्च **भिन्नो दृष्टोपि भावस्तथैवेति** यथादृष्टेन सर्वेणाकारेण **प्रत्यभिज्ञायते**। निश्चीयते न हीति सम्बन्ध। किं कारण (।) **क्वचिद् भेदे** क्षणिकत्वादिके **व्यवधानसम्भवात्**। भ्रान्तिनिमित्तगतः **यथा शुक्तेः** सर्वतो व्यावृत्ताया दर्शनेपि शु[1]क्तिकादित्वे रजतसाधर्म्यस्य भ्रान्तिनिमित्तस्य सम्भवान्न निश्चय। **यत्र** त्वाकारे **भ्रान्तिनिमित्त** नास्ति **तत्रैवास्य प्रतिपत्तु**रनुभवो त्तरकालभावी **स्मार्त्तो निश्चयो भवति**। तद्दर्शनाविशेषेपि सर्वस्वाकारेषु प्रत्यक्ष-स्याविशेषेपि स्मार्त्त इति स्मृतिरूपः।

ननु तदित्युल्लेखेनानुत्पत्तेः कथ स्मृतिरूपः (।)

सत्य (।) निर्विकल्पकविषयस्य स्वाका[2]रेणैकीकृत्य विषयीकरणात् स्मृति-रूप उच्यते। यतश्च प्रत्यक्षाविशेषेपि समारोपरहित एव विषये निश्चयो भवति - तस्मात् समारोपनिश्चययोर्बाध्यबाधकभावो गम्यते। ततो **बाध्यबाधकभावात्** कारणात् **समारोपविवेके** समारोपविरहनिश्चयस्यास्य **प्रवृत्तिरिति गम्यते**।

भवतु नाम समारोपविवेके प्रवृत्तिस्तथापि नान्या[3]पोहविषयत्वम्विधिरूपेण प्रवृत्तेरित्याह। **तद्विवेक एवान्यापोहः** समारोपविवेक एव चान्यापोहः। **तस्मात्** समारोपरहिते वृत्तिवशात् **तदपीति** न केवलमनित्य शब्द इति निश्चयज्ञानं पूर्वोक्तेन न्यायेन **तन्मात्रापोहगोचरन्तदपि** प्रत्यक्षपृष्ठभाविनिश्चियज्ञानमपि **तन्मात्रापोहगोचरं न वस्तुस्वभावनिश्चायकं स्वरूपे[4]ण** (।) किङ्कारण (।) **तथा हि** कस्यचिदाकारस्य रूपत्वादेर्**निश्चयेप्यन्यस्य** क्षणिकत्वाद्याकारस्या**प्रतिपत्ति-दर्शनात्**।

निश्चये च अयोगात् ॥

(यावन्तोऽशसमारोपास्तन्निरासे विनिश्चयाः ।
तावन्त एव शब्दाश्च तेन ते भिन्नगोचराः) ॥५२॥

(अन्यथैकेन शब्देन व्याप्त एकत्र वस्तुनि ।
बुद्ध्या वा नान्यविषय इति पर्यायता भवेत्) ॥५३॥

इत्यन्तरश्लोकः ।

यदि तु प्रत्यक्षपृष्ठभाविना निष्चयेन वस्तुस्वभावस्य निश्चय क्रियते तदा **तत्स्वभावनिश्चये च** निरशत्वाद् वस्तुनस्**तस्यायो**गादन्यस्याकारान्तरस्यानिश्च**या-योगात् ॥**

यतश्च वस्त्वध्यवसायेनैव निश्चयस्य प्रवृत्ति शब्द[5]स्य वा न वस्तु-स्वरूपग्राहकत्वेन। तस्माद् **यावन्त** एक**स्यांशसमारोपा** रूपान्तरसमारोपा प्रवृत्ता अप्रवृत्ताश्च **तन्निरासे** समारोपनिरासार्थ**न्तावन्त एव निश्चयाः शब्दाश्च** तावन्त एव स्वविषये प्रवर्त्तन्ते। **तेन** कारणेन **ते** निश्चया शब्दाश्च **भिन्नगोचरा** भिन्नविषया'। स्वस्वहेतुतोध्यवसितस्वस्वाकाराभिन्नबाह्यविषयत्वात्तेनैतद् (।)

"बुद्ध्यारोपितबुद्धिस्थो ना[6]र्थबुद्ध्यन्तरानुग ।
नाभिप्रेतार्थकारी च सोपि वाच्यो न तत्त्वत ।
प्रतिभापि च शब्दार्थो बाह्यार्थविषया यदि।
एकात्मनियते बाह्ये विचित्रा प्रतिभा कथ।
अथ निर्विषया एता वासनामात्रभावत.।
प्रतिपत्ति' प्रवृत्तिश्च बाह्यार्थेषु कथम्भवेत्।
स्वाशे बाह्याधिमोक्षेण प्रवृत्तिश्चेत्सदा मता।
शब्दार्थोऽतात्त्विक प्राप्तस्तथा भ्रान्त्या प्रवर्त्तनादिति"[7](।)[1] 508

निरस्त। कल्पितविषयत्वेनेष्टत्वाद् विकल्पस्य ॥

अन्यथेति बुद्धिशब्दाभ्यामस्तुस्वरूपग्रहणे। **एकेन शब्देन व्याप्ते** सर्वा-कारेण **विषयीकृते**। **एकत्रै**कस्मिन् **बुद्ध्या** वा निश्चयात्मिकया व्याप्तेनान्य-विषय'। **अन्य**श्चासावाकारो **विषय**श्चेत्यन्यविषय । तस्य वस्तुनो नापर आकारो विषयभूतो विद्यते प्रत्याय्य । अथवा तद्वस्तुप्रत्यायकस्यान्यस्य शब्दस्य ज्ञानस्य

---

[1] Ślokavārtika.

यस्यापि नानोपाधेर्द्धीर्ग्राहिकार्थस्य भेदिनः ।
नानोपाध्युपकाराङ्गशक्त्यभिन्नात्मनो ग्रहे ॥५४॥
सर्वात्मनोपकार्यस्य को भेदः स्यादनिश्चितः ।

437a **योऽ[7]पि मन्यते ।[1] उपाधयः परस्परं आश्रयाच्च भिन्ना एव तन्निबन्धनाः श्रुतयोऽपि तदाधारे तत्रैव वर्त्तन्ते । तद् अयमप्रसङ्गः इति । तस्याऽपि नानोपाधीनामुप[1]काराङ्गशक्तिभ्योऽभिन्नात्मनः सर्वात्मना ग्रहे कृते उपकार्यस्य को भेदः स्यादनिश्चितः ॥**

वा न विषयः ।[1] **इति** हेतो. शब्दाना प्रतीते विषये पश्चात् प्रवर्त्तमानाना **पर्यायता स्यात्** । वृक्षपादपादिशब्दवत् । । मधुरो रस स्निग्धो गुरु शीत इत्येवमादि-भिन्नविषयानुपातिन्याश्च बुद्धे· प्रवृत्तिर्न स्यादित्येकविषयत्वप्रसग· ॥

भिन्नं धर्मधर्मिभाव पारमार्थिकन्दूषयितुमुपन्यस्यन्नाह । **यस्यापी**त्यादि । यस्यापि वै शे षि क स्य **परस्परमाश्रयाच्च** भिन्नत्वान्नाना **उपाधयो** विशे[2]षणानि द्रव्यत्वादयो यस्यार्थस्य घटादे स नानोपाधिस्तस्य तत एवोपाधिभेदाद् **भेदि-नोर्थस्य** विधिनैव बुद्धिग्राहिका निश्चयात्मिका **धीः** सा च प्रत्युपाधि भिन्ना ॥ धियश्च विषयभेदन्दर्शयता शब्दानामप्यर्थतो दर्शित एव ।

तद्व्याचष्टे **योपी**त्यादिना (।) **उपाधयो** द्रव्यत्वादय **परस्परमन्योन्यभिन्ना आश्रयाच्चे**त्युपाधिमतो भिन्ना । **तन्निबन्धना** भिन्नोपाधिनिबन्धना[3] श्रुति-ग्रहणमुपलक्षणमेव बुद्धयोपि । **तदाधारे** स्थित्युपाधीनामाधारेषु । **तत्रैव** चेत्युपा-धिष्वेव । **वर्त्तन्ते** वाचकतया प्रवर्त्तन्ते । **तदि**ति तस्माद् । **अय**मिति शब्दज्ञाना-न्तराणां पर्यायतालक्षणोऽप्रसंगः ।

उत्तरमाह । **तस्यापी**त्यादि । **नाना**प्रकाराणामुपाधीनामुपकारस्याङ्गं कारण या· **शक्तय**ः । ताभ्योऽभिन्नात्मन उपाधिमत **एकेन** निश्चयज्ञानेन **ग्रहे** निश्चये[4] **सर्वात्मना** कृते सति । **उपकार्य**स्योपाधिकलापस्य **को भेदः** क उपाधिविशेष **स्यादनिश्चितः** (।) सर्व एव निश्चित स्यात् ।

नन्वग्निधूमयो. सत्यपि सम्बन्धे नाग्निनिश्चये धूमस्य निश्चयो दृश्यते तथा धर्मिनिश्चये धर्मानिश्चयो भविष्यति ।

नन्विदमेवादर्शनन्न स्यात् । निश्चयप्रत्ययेन सर्वात्मनाऽग्निस्वरूपग्रहे सति

---

[1] Sñams-sems-pa.

यद्यपि भिन्ना एवोपाधयः शब्दज्ञानान्तराणामर्थनिमित्तम्। तथाऽपि स तु तद्वान् एव तैरुपलीयते। तस्य नानोपाध्युपकाराश्रयशक्तिस्वभावस्य स्वात्मनि भेदाभावात् सर्वात्मना ग्रहे क एवोपाधिभेदोऽनिश्चितः स्यात् सर्वो-

---

धूमादिकारणत्वेनैव निश्चयात्। धूमा[6]दीनामपि निश्चितत्वात्। तस्मान्न निश्चयेन तत्स्वरूपग्रहण। निर्विकल्पकेनापि तर्हि सर्वात्मना ग्रहो न स्याद् धूमाप्रतिभासादेव तत्कार्यत्वाग्रहात्।

नैतदस्ति (।) अग्नेर्हि धूमजननप्रति कारणत्व पूर्वभाव एवोच्यते। स च प्रत्यक्षे प्रतिभासत इति कथ नाग्नेस्तत्कार्यत्वग्रह। तेनायमर्थ. (।) नाग्निधूमयो परमार्थत परस्परापेक्षिता विद्यते। निष्पन्ना[6]निष्पन्नावस्थाया सम्बन्धाभावात् (।) केवलमग्नौ सत्येव धूमो भवतीति तौ कार्यकारणे उच्येते। धर्मधर्मिणोस्तु परस्परापेक्षित्वाद्धर्मिण· सर्वात्मना निश्चये सर्वधर्माणा साक्षान्निश्चय· स्यान्नार्थादाक्षेप·। यदा तु बाह्याध्यवसायको विकल्पो भवति न तु ग्राहकस्तदाध्यवसितस्यार्थस्यान्यव्यावृत्तिसम्भवेनार्थादन्यधर्माक्षेपो युज्यते (।) परस्परापेक्षत्वे च[7] यावन्न धर्मनिश्चयो न तावद्धर्मिनिश्चयो (।) यावच्च न धर्मिनिश्चयस्तावन्न 51a
धर्मनिश्चय इत्यन्योन्याश्रयत्वञ्च स्यात्।

ननु चोपाध्युपाधिमद्भाव आश्रयाश्रयिभाव एवोच्यते। स च समानकालभाविनोरेव (।) न च तयोरुपकार्योपकारकभावो भिन्नकालत्वादस्य (।) तत्कथमुच्यते। एकोपाधिविशिष्टग्रहे सर्वग्रह इति।

सत्य (।) किन्तु परैरन्य एव जन्यजनकभावोन्यश्चोपका[1]र्योपकारकभाव इष्यते। तथा हि (।) वदरद्रव्य स्वहेतुजन्यमपि कुण्डेनोपक्रियतेऽत एव समानकालभाविनोरयमुपकार्योपकारकभाव इष्यत इति तदभिप्रायादिदमुक्त। यद्वा धर्मो निश्चीयमान· धर्म्याश्रितत्वादेवाश्रयस्य प्रतीतिमाक्षिपति स चाश्रिताना धर्माणामिति सर्वनिश्चय.। तस्माच्छब्दप्रमाणान्तरवृत्ते कल्पित एव धर्मधर्मिभाव.[2] (।) न चास्मिन् पक्षे धर्मभेदाभेदकल्पनाया प्रमाणान्तरवैयर्थ्यमवस्तुत्वेन तेषा भेदाभेदस्य परमार्थतोऽभावात्। प्रमाणान्तरैरेव च धर्मान्तराणा कल्पनीयत्वात् तदभावे कथ धर्मभेदाभेदकल्पनेति यत्किञ्चिदेतत्॥

यद्यपीत्यादिना कारिकार्थं व्याचष्टे। शब्दान्तराणा ज्ञानान्तराणामर्थं उपाधिमति प्रतिपत्तौ प्रतिनिमित्तं भिन्ना एवोपाधयो यद्यप्यभ्यु[3]पगम्यन्ते (।) **स तु तद्वानुपाधिमानर्थः शब्दज्ञानैरुपलीयते** विषयीक्रियते। **तस्य** तद्वतो **नानोपाधीनामुपकाराश्रया याः शक्तयस्तत्स्वभावस्य स्वात्मनि** स्वरूपे **भेदो नास्ति**। ततश्चैकोपा-

पाध्युपकारकत्वेन[3] ग्रहणात्। न हि तस्य स्वेन रूपेण गृह्यमाणस्य उपकारकत्व-मन्यदेवागृहीतम्। अतोऽस्य यदेव स्वभावेन ग्रहणं तदेवोपकारकत्वेनाऽपि॥

तयोरात्मनि सम्बन्धादेकज्ञाने द्वयग्रहः ॥५५॥

आत्मभूतस्य उपाधितद्वतोरुपकार्योपकारकभावस्य ग्रहणादेकज्ञाने द्वयो-रपि उपाधिमतोर्ग्रग्रहणमिति एकोपाधिविशिष्टेऽपि गृह्यमाणे सर्वोपाधीनां ग्रहणं[5] तद्ग्रहणनान्तरीयकत्वात्। अन्यथा तथापि न गृह्येत। न ह्यन्य

धिद्वारेणापि **ग्रहे सर्वात्मना** ग्रहणन्तस्मिन्सति **क एवोपाधिभेद**स्तस्यानिश्चित किन्तु सर्व एव निश्चित स्यात्। कि कारण (।) **सर्वोपाध्युपकारकत्वे[4]न ग्रहणात्।**

एकोपाधिद्वारेणोपाधिमत. स्वरूपमेव ग्रहीत न तूपाध्युपकारकत्वमिति चेदाह। **न हीत्यादि**। न ह्युपाध्युपकारकत्वमन्यदेवागृहीतमित्यनेन सम्बन्ध। **तस्येत्युपाधिमत स्वेन रूपेण गृह्यमाणस्य** स्वरूपा**दुपकारकत्वस्याभेदात्।** यत एवमतः कारणा**दस्येत्युपाधिमत। यदेव स्वभावेन** स्वरूपेण **ग्रह[6]णन्तदेवोप-कारकत्वेनापि** ग्रहणमिति।

भवत्वेकोपाधिद्वारेणोपाधिमत सर्वोपाध्युपकारकत्वस्य स्वभावभूतस्य ग्रह। उपाधीनान्तु तस्माद् व्यतिरिक्ताना कथ ग्रहणमित्यत आह। **तयोरि**त्यादि। उपाधिकलापस्योपाधिमतश्च उपकार्योपकारकभूतयो**रात्मनि** स्वभावेन्योन्य**सम्बन्धो** सम्बन्धादुपकार्योपकारकसम्बन्धस्यात्म[6]भूतत्वादिति यावत्। ततश्चोपकारक स्वभावस्य**ैकस्य ज्ञाने सति** सम्बन्धाद् **द्वयग्रहः**। उपाध्युपाधिमतोर्ग्रह।

स्तद्द्वयाचष्टे। **आत्मभूतस्ये**त्यादि। तथा ह्युपाधिमति गृहीते तस्यात्म भूत उपकारकभावस्तावद् गृहीतस्तस्मिन् गृहीते उपाधीनामप्यु**कार्य**भाव आत्म
51b भूतो गृहीतस्तद्ग्रहणनान्तरीयकत्वा**दुपकारकभाव**ग्रहणस्य [7](।)**अतः** कारणा **देकज्ञाने द्वयो**रप्युपाध्युपाधिमतो**र्ग्रहण**मिति कृत्वा **एकोपाधिविशिष्टेपि** तस्मिन्नुपा धिमति **गृह्यमाणे सर्वोपाधीनां ग्रहणं। तद्ग्रहणनान्तरीय**कत्वादित्युपाधिग्रहण नान्तरीयकत्वात्। **अन्यथे**त्युपाधीनामग्रहे **तथापि न गृह्येत**। उपाधीनामुप कारक उपाधिमानित्येवमपि न गृह्येत।

य एव तदानी ज्ञानशब्दप्रवृत्तिनिमित्त[1]मुपाधिस्तं प्रत्येवोपकारकत्वमुपाधिमतो गृहीत न तूपाध्यन्तरोपकारकत्वमिति चेदाह। **न ह्यन्य** एवेत्यादि। **अन्योपकारक इत्यन्यस्योपाधेरुपकारक स्वभावो यो न गृहीतः** किन्तु सर्व एव गृहीतो निरशत्वाद **वस्तुनः**।

एवान्योपकारकः कश्चिद् गृहीतः। न चाऽपि तथा उपकारके गृहीते[1] उपकारकार्यस्याऽग्रहणम्।[6] तस्याप्यग्रहणप्रसङ्गात्। स्वस्वामित्ववदिति। तस्मादर्थान्तरोपाधिवादेऽपि समानः प्रसंगः॥

अथाऽपि मन्यते। याभिः उपाधीनुपकरोति ताः शक्तयो भिन्ना एव। ततो[7] 437b
नायं प्रसङ्गः।

धर्मोपकारशक्तीनां भेदे तास्तस्य किं यदि।
नोपकारस्ततः तासां तथा स्यादनवस्थितिः॥५६॥

स्यान्मतम्(।) उपाधिमतोनपेक्षितसम्बन्धिन उपकारक इत्येव ग्रहण न त्वस्योपकारक इति ततो नोपाधीना ग्रहणमित्यत आ[2]ह। **न चापीत्यादि। तथा गृहीत** इत्युपकारक इत्येव गृहीते **उपकारकार्यस्य**ोपाधेर**ग्रहणं**। कि कारण (।) **तस्याप्युकारकस्य** उपकारक इत्ये**वमग्रहणप्रसंगात्**। एतत् कथयति (।) सम्बन्धित्वादुपकारकस्यान्तरेण द्वितीयसम्बन्धिग्रहणमुपकारक इत्यपि ग्रहण नास्तीति। तथाभूतञ्च दृष्टान्तमाह। **स्वस्वामित्वव**दिति। न हि स्वग्रहणमन्तरेणा[3]स्ति स्वामित्वस्य ग्रहण। यत एवमेकोपाधिद्वारेण प्रवृत्तेप्येकस्मिन् ज्ञाने शब्दे च सर्वोपाधीना ग्रहणमुपाधिमतश्च सर्वात्मना। **तस्मादर्थान्तरोपाधिवादेपि** अर्थान्तरभूता उपाधय इत्येववादेपि **समानः प्रसङ्गः**। शब्दज्ञानान्तराणां पर्यायता प्राप्नोतीति।

अथापीत्यादिना परमाशङ्कते। **याभिः** शक्तिभि शक्तिमा**नुपाधीनुपकरोति ताः[4] शक्तयः** शक्तिमत. सकाशाद् **भिन्नाः**। **तत** इति भेदात्। **नायं प्रसंग** इति। एकोपाध्युपकारकशक्त्यभेदग्रहे सर्वशक्तीना ग्रहण। तद्ग्रहणाच्च सर्वोपाधीनामित्यय प्रसङ्गो नास्ति।

उत्तरमाह। **धर्मोपकारे**त्यादि। धर्मा उपाधयस्तेषामुपकारस्य या **शक्तयस्तासां** शक्तिमत सकाशाद् **भेदेऽभ्युपगम्यमाने ताः** शक्तय**स्तस्य** शक्तिमत **किम्भव[5]न्ति**। न किचिद् भवन्ति न तत्सम्बन्धिन्य इत्यर्थ.। यदा **यदि नोपकारस्ततः**। शक्तिम**तस्तासां** शक्तीना। अथ सम्बन्धसिद्ध्यर्थमुपकार इष्यते। तदा शक्त्युपकारिण्यो परा व्यतिरिक्ता शक्तयोऽङ्गीकर्त्तव्या। याभि शक्तीरुपकरोति (।) **तासा** च सम्बन्धत्वसिद्ध्यर्थमुपकार. कल्पनीय। तत्रापरा शक्तिकल्पनेति **तथा स्यादनवस्थितिः**।

---

[1] Gsu-gs? = gsuṅ-ba.

यदि प्रत्युपाधि उपकारकत्वानि तस्य नैव स्वात्मभूतानि[1] **नाऽपि तत उपकारमनुभवन्ति। किं तस्य ता इति**[1]**। अथ यदि स्वात्मभूताभिः शक्तिभिरयमेकः शक्तीरुपकुर्वन् एकोपाधिग्रहणे च सर्वा**[2]**त्मनैव ग्रहणम्। तथा हि उपाधिग्रहणे तदुपकारिण्यः शक्तेर्ग्रहणम्। तद्ग्रहणे तदुपकारी स्वात्मभूतसकलशक्तत्युपकारो भावो गृहीतः सर्वा शक्ती**[3]**र्ग्राहयति। ताश्चोपाधीन् ग्राहयन्तीति तदवस्थः प्रसंगः।**

अथ ता अपि शक्त्युपकारिण्यः शक्तयो भिन्ना एव भावाद्। तदा च उपाधीनांतच्छक्तीनां चापरापरास्वेव शक्तिषु[4] **अपर्यवसानेनोद्घटनात्**[1] **स एकः ताभिः**

तद्व्याचष्टे (।) **यदी**[6]त्यादि। उपाधिमुपाधिम्प्रति **प्रत्युपाधि। उपकारकत्वानि** शक्तयस्तस्योपाधिमत **न स्वात्मभूतानि**। न स्वभावभूतानि। किन्तु व्यतिरिक्तानि। **नापि** तत उपाधिमत **उपकारमनुभवन्ति**। आत्मसात्कुर्वन्ति। **किन्तस्य ता उच्यन्ते**। उपाधिमत शक्तय इति कस्मादुच्यन्ते। सम्बन्धाभावात्। सम्बन्धसिद्ध्यर्थमुपाधि-
5 2a मतः सकाशात् तासामुपाध्युपकारिणी[7]ना शक्तीनामुपकारेवाङ्गीक्रियमाणे याभि शक्तिभिरुपाध्युपकारिणी शक्तीरुपकरोत्ययमुपाधिमान्। **यदि** तास्तस्यात्मभूता इष्यन्ते तदा **स्वात्मभूताभिः शक्तिभिरयमु**पाधिमान् **एक** इत्यनश। उपाध्युपकारिणी. शक्**तीरुपकुर्वन्**।

तथा हीत्यादिना **सर्वात्मना ग्रहण** साधयति। एको**पाधिग्रहणे तदुपकारिण्यो** उपाध्युपकारिण्यो व्यतिरिक्तायाः. **शक्तेर्ग्रहणं**। **तद्ग्रहण** इति।[1] उपाध्युपकारिशक्तिग्रहे। **तदुपकारी** उपाध्युपकारिशक्त्युपकारी। किंभूत **स्वात्मभूतसकलशक्त्यपकारः** स्वात्मभूता सकला उपाध्युपकारिणीना शक्तीनामुपकारा. शक्तयो यस्य स तथाभूतो **भावो गृहीतः सर्वा** उपाध्युपकारिका शक्**तीर्ग्राहयति**। **ताश्चे**मा शक्तयो गृहीता स्वोपकार्यानुपाधीन् **ग्राहयन्तीति तदवस्थः प्रसंगः** को भेद. स्यादनिश्चित इति य उक्त ॥

अथ माभूदेष दोष इति **ता अपि शक्त्युपकारिण्यः शक्तयो भिन्ना एवो**पाधिमतो **भावा**दिष्यन्ते। तदा तदुपकारिण्योपि शक्तयो व्यतिरिक्ता. कल्पनीयास्तथा तदुपकारिण्य इत्येवमनवस्थानात्। **उपाधीनां तच्छक्तीनां** च। **उपाध्युपकारशक्तीनां चापरापरास्वेव शक्तिष्वपर्यवसानेनानिष्ठया** यद् घटनन्तस्योद्घटनात् सम्बन्धनात्। तथा ह्युपाधयो व्यतिरिक्तासु शक्तिषु सम्बद्धास्ता अपि व्यति[3]रिक्तास्वेव। एवमुत्तरोत्तरा शक्ति· पूर्वपूर्वासु शक्तिषु व्यतिरिक्तास्वेवानवस्थानेन सम्बद्धा। न तूपाधिमति। ततश्च **स एक** उपाधिमान्। **ताभि**रुपाध्युपकारि-

---

[1] Śes-par-byas-pas-mchon-paḥi-phyir.

कदाचिदप्यगृहीतस्तदुपकारात्मा तद्रूपत्वेन तदग्रहाद्।

यदि पुनः केवलान्[1] **उपाधीन् शब्दज्ञानान्युपलीयेरन्।**

तदाऽपि असम्बन्धात् तत्प्रतिपादनद्वारेण सर्वप्रतिपत्तिर्न स्यादिति चेत्। तदाऽपि शब्दैरनाक्षेपात्। तत्र शब्दाप्रवृत्तिशब्दयोगो व्यर्थः स्यात्। अर्थक्रियाश्रयः सर्वो व्यवहारो[6] **विधिप्रतिषेधाभ्याम्। उपाधयश्च तत्राऽसमर्थाः, समर्थश्च नैवोच्यत इति किं शब्दप्रयोगैः। ततश्च उपाधय उपाधयोऽपि न स्युः। क्वचित्**

काभि शक्तिभिस्सह **कदाचिदप्यगृहीतस्तदुपकारात्मा**। शक्त्युपकारात्मा। उपाध्युपकारिकाणा शक्तीना या शक्तयस्तदात्मेति यावत्। शक्तीनान्ततो व्यतिरेकात्। **तद्रूपत्वेन** उपाध्युपकारशक्तिमत्त्वेन। **तदग्र**[4]**हा**दुपाधिमत्त्वेनाप्यतो व्यर्थवोपाधिकल्पनेति भाव.।

एवन्तावद् यदोपाधिमति ज्ञानशब्दयोर्वृत्तिस्तदोक्तो दोषः। यदोपाधिष्वेव तदान्यो दोषो वक्तव्यः। तदभिधानायोपाधिपक्षमुपन्यस्यति। **यदि पुन**रित्यादि। **केवला**नित्याश्रयरहितान् **उपाधीन्** विशेषणभेदान् **शब्दज्ञानान्युपलीयेरन्**। प्रत्यायकत्वेन समाश्रयेयु। तस्योपाधिमत. शब्दज्ञानैरस[5]मावेशादविषयीकरणात्। **तत्प्रतिपत्ति**मुखेनोपाधिमत्प्रतिपत्तिमुखेन। एकेनापि शब्दज्ञानेन सर्वस्योपाधे प्रतिपत्ति (।)

अत्रापि दोषमाह। **तदापीत्या**दि। तस्योपाधिमतः। **अनाक्षेपा**दित्यप्रतिपादनात्। **तत्रेत्यु**पाधिमति (।) कथ व्यर्थ इत्याह। **अर्थक्रिये**त्यादि। अर्थक्रिया पुरोधाय प्रवृत्तेरर्थक्रिया **आश्रय** आलम्बन यस्य व्यवहारस्य स तथा। **सर्वो** यावान् कश्चित् प्रेक्षा[6]पूर्वकारिणा **व्यवहारो** हिताहितविषयः। स च द्वाभ्यां प्रकाराभ्या **विधिप्रतिषेधाभ्यां** तृतीयप्रकाराभावात्। इत्थभूतलक्षणा (पाणिनि) चेय तृतीया। **उपाध्यो**(?धय)श्च गोत्वादयस्**तत्रार्थ**क्रियायाम**समर्थाः**। **समर्थश्च** व्यक्तिभेद शब्देनै**वोच्यत इति किमफलै· शब्दप्रयोगैः**। यतश्चैवमर्थक्रियासमर्थो व्यक्तिभेदो न चोच्यते शब्दै। **ततश्चा**भिमता **उपाधयो** गोत्वादय **उपाधयो न**[7] 32b स्युर्न विशेषणानि स्यु। यस्मात् **क्वचि**दुपाधिमत्युपाधिद्वारेण शब्दस्य ज्ञानस्य वा **प्रवृत्तौ** सत्या। **कस्य**चिदुपाधिमत। **प्रधानस्ये**ति विशेष्यस्याङ्गाभावाद् विशेषणभावात् **तदपेक्षया** प्रधानापेक्षया। **तथोच्यन्ते**। उपाधय इत्युच्यन्ते। इय न्यायोपाधिव्यवस्था। यदा तूपाधय एव शब्देनोच्यन्ते। तदा तस्योपाधिमत.

---

[1] Ñi-che-la.

438a प्रवृत्तौ कस्यचित् प्रधानस्य अङ्गभावात् तदपेक्षया तथोच्यन्ते। शब्देनाभाक्षेपान्न ते कस्यचित् अङ्गभूता इति कथमुपाधयः।

यदि लक्षितज्ञानलक्षणात्[1] अदोष इति चेत् समानः प्रसङ्गः। स तावत् नान्तरीयकतया तैरुपाधिभिरुपलक्ष्यमाण एकेनाऽप्युपाधिना सर्वात्मनोपलक्षित इति तदवस्थः[2] प्रसंगः।

को ह्यत्र विशेषः। शब्दा[1] एव एनमुपलक्षयेयुः तल्लक्षिता वा उपाधयो उप-(लक्षा)येयुः। स तावत् तदानीं सर्वोपकारक इति न किञ्चित्[2] ॥५६॥

तस्मात्।

एकोपकारके ग्राह्ये (नोपकारास्ततोऽपरे।
दृष्टे तस्मिन्नदृष्टा ये तद्ग्रहे सकलग्रहः) ॥५७॥

—इति संग्रहश्लोकः।

शब्देनाऽनाक्षेपादप्रतिपादनान्न ते उपाधय कस्यचित् प्रधा[1]नस्याङ्गभूता इति किमुपाधयो नैवेति यावत्। यद्युपाधिमात्र चोद्यते तथापि शब्दैर्लक्षिता ये उपाधयस्तैरुपाधिमतो लक्षणात् परिच्छेदाददोषः। शब्दप्रयोगवैयर्थ्यदोषो नेति चेत्। स समानः सर्वोपाधिग्रहणप्रसङ्ग। तमेवाह। स तावदित्यादि। स इत्युपाधिमान्। नान्तरीयकतयेत्युपाध्युपाधिमतोरव्यभिचारेण उपलक्ष्यमाण एकेनाप्युपा-धि[2]ना निरङ्कुशत्वात् सर्वात्मनोपलक्षित इति तदवस्थः सर्वोपाधिग्रहप्रसंगः।

स्यान्मत (।) यत्र शब्देन साक्षादुपाधिमतश्चोदनन्तत्राय प्रसग। न तु यत्रार्थवशादित्यत आह। को ह्यत्र विशेष इति। शब्दा वा एनमुपाधिमन्त साक्षात् प्रतिपादयेयु.। तल्लक्षिता वा शब्दलक्षिता वोपाधय उपाधिमन्त लक्षयेयुरिति को विशेषो न कश्चित् (।) तथा हि (।) स तावदुपाधि[3]मान् तदानीमुपाधिबलेन लक्षणकाले निश्चीयते। सर्वोपकारकः सर्वेषामुपाधीनामुपकारक इति। तथा च पूर्ववत् सर्वोपाधिग्रहणप्रसगोऽतो लक्षितलक्षणादिति यदुक्तमेतन्न किञ्चित् पूर्वोक्तदोषदुष्टत्वात्। यस्मादुपाध्युपकारिकाणा शक्तीनाम्व्यतिरेकेऽनवस्था स्यादतो न व्यतिरिक्ता शक्तयः॥

तस्मादेकस्योपाधेरुपकारके तस्मिन्नुपाधिम[4]ति ग्राह्योभ्युपगम्यमाने उपाध्यन्तराणामुपकारकाः शक्तिभेदा। तत एकोपाध्युपकारकस्वभावादपरेऽन्ये न भवन्ति

---

[1] Hdi-dag-legs-goms-pa.

[2] Skabs-Ses-bya-ba.

क. *न्यायमीमांसामतनिरासः*

(क) व्यावृत्तस्वभावा भावा.

यदि भ्रान्तिनि(वृत्यर्थं)[1] गृहीतेप्यन्यदिष्यते ।

स्यादेतत्[4]। निर्भागस्य वस्तुनो ग्रहणे कोऽन्यस्तदा[2] न ग्रहीतः। स तु भ्रान्त्या नावधार्यत इति प्रमाणान्तरं प्रवर्त्तते। यद्येवम्।

तद्व्यवच्छेदविषयं सिद्धं (तद्वत्ततोऽपरम् ॥५८॥
असमारोपविषये प्रवृत्तेरपि;

असमारोपविषये किं च वृत्तेः। भ्रान्तिनिवृत्यर्थं प्रवृत्तस्य प्रमाणम्। तत्

ये दृष्टे **तस्मिन्**नुपाधिमत्य**दृष्टा** भवन्ति। किन्त्वनन्ये। अत कारणात्तद्ग्राह्ये। तस्योपाधिमतो ग्रहे **सक**लोपाध्युपकारक स्वभावस्य **ग्रहः**।

योपि भ ट्टो मन्यते(।) भिन्ना भिन्ना एव धर्मास्तेनैकधर्मेण धर्मिण्यवधार्यमाणेन स[5]र्वधर्मावधारण भेदात्। तदाह।

"आविर्भावतिरोभावधर्मकेष्वनुयायि यत्।
तद्धर्मि यत्र वा ज्ञान प्राग्धर्मग्रहणाद् भवेत्॥ (१५२)
अनन्तधर्मके धर्मिण्येकधर्मावधारणे।
शब्दोभ्युपायमात्र स्यान्न तु सर्वावधारण" (१७८) इति।[3]

सोप्युभयपक्षभाविदोषप्रसगादेव निरस्त ॥

यदीत्यादिना पराभिप्रायमाशकते। एकेन निश्चयज्ञानेन सर्वात्मना **गृहीतेपि**[6] वस्तुनि **भ्रान्तिनिवृत्त्यर्थं**। **अन्यदि**ति प्रमाणान्तर।

स्यादेतदित्यादिनैतदेव व्याचष्टे। **निर्भागस्य** निरशस्य वस्तुनो **ग्रहणे** सति **कोन्यो** भाग **तदा** निर्भागवस्तुग्रहणकाले। **न गृहीतो** नाम सर्व एव गृहीत (।) **स तु** गृहीतोपि **भ्रान्त्या नावधार्यत इति प्रमाणान्तरं प्रवर्त्तते।**

यद्येवमित्यादिना सिद्धान्तवादी। यत्तद् **भ्रान्ति**निवृत्त्यर्थमुत्तरम्प्रमाण[7]**मिष्यते** 53a
तद्व्यवच्छेदविषयमन्यापोहविषय **सिद्धं** पूर्वोक्तेन न्यायेन। **तद्व**त्तरप्रमाणवत्। **तत** उत्तरकालभावि प्रमाणाद**परम**पि पूर्वकालभाविनिश्चयज्ञानन्तदपि व्यवच्छेदविषय। किं कारणम् (।) **असमारोपविषये वृत्तेः**।

---

[1] Ḥdog-pa. [2] De-ni-gyi-naho.
[3] Ślokavārtika **प्रत्यक्षपरि०**

तर्हि अन्यसमारोपव्यवच्छेदफलमिति अन्यापोहविषये सिद्धं, तद्वदन्यदपि अविद्यमानसमारोप[6]विषयवृत्तेः। यत्रास्य समारोपः तत्र निश्चयाभाव इति समारोपाभावे वर्त्तमानोऽन्यापोहविषयः सिद्धः॥

अपि च।

निश्चयैः।

138b **यत्र निश्चीयते रूपन्तत्तेषां विषयः कथम्) ॥५९॥**

इयमेव निश्चयानां स्वार्थप्रतिपत्तिः(।) तच्चेदाकारान्तरवदनिश्चितम्। कथं इदानीं अनिश्चीयमानं प्रत्यक्षेणाऽपि गृहीतमिति चेत्।

न(।) प्रत्यक्षं[1] हि यस्या[1]ऽपि निश्चायकं, तद् यमपि गह्णाति तत् च न निश्चयेन। किन्तर्हि। प्रतिभासेन। तत् न निश्चयानिश्चयवशाद् प्रत्यक्षस्य ग्रहणाग्रहणे।

तत्तर्हीत्यादिना श्लोक व्याचष्टे। अन्यस्याकारस्य यः **समारोपस्तद्वद्व्यवच्छेदफलमिति** कृत्वा **सिद्धमन्यापोहविषय**मुत्पित्सुस[1]मारोपनिषेधद्वारेण। **तद्वदन्यदपि** पूर्वमपि निश्चयज्ञानमन्यापोहविषय (।) कि कारणम् (।) **अविद्यमानसमारोपे विषये वृत्तेः**। एतदेवाह। **यत्राकारेस्य प्रतिपत्तेः**। **इति** हेतो **समारोपाभावे वर्त्तमानः** पौरस्त्यो निश्चयोन्यापोहविषयः **सिद्धः**॥

किञ्च (।) निश्चयगृहीतेप्यर्थे भ्रान्तिनिवृत्त्यर्थं प्रमाणान्तरमिच्छता निश्चयविषयश्च न च निश्चित इ[2]त्यभ्युपगत स्याद् (।) अन्यथा भ्रान्तेरयोगात्(।)तच्चायुक्तमित्याह। **अपि चे**त्यादि। **यद्रूपं निश्चयैर्न निश्चीयते** तद्रूपन्तेषा निश्चयानां **विषयः कथन्नैव** (।) कि कारण। यस्मा**दियमेव निश्चयानां स्वार्थप्रतिपत्तिर्यत्तस्यार्थस्य** निश्चयनं। **तच्चे**न्निश्चयविषयाभिमतमा**कारान्तरवदनिश्चितं**। यन्निश्चयविषयत्वेनानभिमतन्तद्वत्तैर्निश्चये गृहीत॥

कथमित्या[3]दि परः (।) प्रत्यक्षगृहीते समारोपव्यवच्छेदार्थं प्रमाणान्तरमिच्छताऽन्यापोहवादिनाप्यनिश्चीयमान आकार. प्रत्यक्षगृहीतत्वेनेष्टो यदि वा निश्चयवशादेव ग्रहणं। **कथमिदानीमनिश्चीयमानं** रूप **प्रत्यक्षेणापि गृहीत**मिति तुल्यः प्रसंगः।

नेत्यादिना परिहरति। कल्पनाविविक्तत्वादित्यभिप्राय.। **तदि**ति प्रत्यक्ष (।) **यमपि** नीला[4]द्याकारङगृह्णातीत्युच्यते (।) **तद्** ग्रहण **न निश्चयेन** (।) **किन्तर्हि** (।) **प्रतिभासेन**। निरङशस्य वस्तुन. सर्वथा प्रतिभासनमिति सर्वथा

---

[1] Mṅon-sum-ni gan-gi ṅes-par-byed-pa-ma-yin. te.

नैवं निश्चयानाम्[2]। **किञ्चिद्** निश्चित्वतोऽप्यन्यत्रानिश्चयेन **प्रवृत्तिभेदाद् ग्रहणाग्रहणे। तस्माद् यो निश्चयः स एव तद्ग्रहणम्। अन्यथा एकाकारेऽपि तन्न स्यात्॥**

किं पुनः सर्वतो[3] **भिन्नवस्तुस्वभावेऽनुभवोत्पादेऽपि तथैव न स्मार्तो निश्चयो भवतीति।- सहकारिवैकल्यात्। ततश्च—**

प्रत्यक्षेण गृहीतेऽपि विशेषेंऽशविवर्जिते।
यद्विशेषावसायेऽस्ति प्रत्ययः स प्रतीयते॥६०॥

ग्रहण(।) **तदिति** तस्मान्न **निश्चयानिश्चयवशाद्** यथाक्रम **प्रत्यक्षस्य ग्रहणाग्रहणे** किंतु प्रतिभासनाप्रतिभासनवशात्। तस्मादनिश्चये सति प्रतिभासनमात्रेण प्रत्यक्षगृहीतव्यवस्थापनन्न विरुध्यते। **नैवं निश्चया**[5]**नां** प्रत्यक्षवदनिश्चितस्याप्याकारस्य प्रतिभासनमात्रेण ग्रहणमप्रतिभासमात्रेणाग्रहणमिति सम्बन्ध. । कस्मादिति चेदाह। **किञ्चिदि**त्यादि। यथा पुरुष दृष्ट्वा पुरुषत्व**निश्चित्वतोप्यन्यत्र** तस्करादाव**निश्चयेन प्रवृत्तिभेदाद्** व्यवहारभेदात्। तथा हि पुरुषत्वनिश्चयेन पुरुषोनुरूपो विश्वासादिव्यवहारो दृश्यते। चौरत्वानि[6]श्चयाच्च तदनुरूपो भयादिव्यवहारो न दृश्यते। ततश्च यन्निश्चयानुरूप प्रवृत्तिभेदस्तस्य निश्चयेन ग्रहण। यदनिश्चयानुरूपश्चाप्रवृत्तिभेदस्तस्याग्रहणमिति। **यत एवन्तस्मा**दित्यादि। **अस्ये**त्याकारस्य (।) **अन्यथे**ति यदि निश्चयवशात्तस्य ग्रहण न व्यवस्थाप्यते। **तदेका**कारेपि। निश्चितत्वेनाभिमतेप्याकारे। **तदि**ति निश्चयेन ग्रहणं[7] **न स्यात्**। 53b

किं पुनः कारणमिति पर। **सर्वतो भिन्न** इति सजातीयविजातीयाद्व्यावृत्ते। **तथैवे**ति यथानुभव सर्वेष्वेव भेदेषु **न स्मार्त्तो निश्चयो भवति**। यतो भेदान्तरेन्याकारव्यवच्छेदार्थमन्यापोहवादिना प्रमाणान्तरवृत्तिरिष्यते।

सहकारिवैकल्यादिति सिद्धान्तवादी। न ह्यनुभवमात्रनिश्चयहेतु किन्त्वभ्यासादयोपि सहकारिण. (।) ते यत्रैव सन्ति तत्रैवाकारे[1] निश्चयो नान्यत्र।

ननु क्षणिकाकारेपि सर्वदा दर्शनादभ्यासोस्त्येवेति निश्चय. स्यात्। नानुभूतनिश्चितविषयोत्राभ्यासोभिप्रेतो न च क्षणिक भ्रान्तिनिमित्तसम्भवादनुभूतनिश्चितमिति कथन्तत्राभ्यासः। तस्मात् स्थितमेतत् यत्रैवाकारेऽभ्यासस्तत्रैव निश्चय इति॥

तदेवाह। **ततश्चे**त्यादि। **विशेषे** सर्वतो व्यावृत्ते नीलादिलक्षणे। **अङ्शविवर्जिते** निर्विभा[8]गे सर्वात्मना **प्रत्यक्षेण गृहीतेपि** सति **यस्य विशेषस्यावसाये** निश्चयेस्ति **सहकारिप्रत्ययः स प्रतीयते** निश्चीयते।

यद्यपि सर्वतो भिन्नांशरहितभावे हि[1] अनुभवः। अथाऽपि तावता सर्वभेदेषु निश्चयो न स्यात्। कारणान्तरापेक्षत्वात्। अनुभवो हि[5] यथाविकल्पाभ्यासं निश्चयज्ञानं जनयति। यथा रूपदर्शनाऽविशेषेऽपि कुणपकामिनीभक्ष्यविकल्पाः। तत्राऽपि बुद्धेः पाटवं तद्रागाभ्यासकषाये त्यादयोऽपि अनुभ[6]वाद् भेदनिश्च-
439a **योत्पत्तौ सहकारिणः। तेषामेव च प्रत्यासत्त्यादिभेदात् पौर्वापर्यम्। यथा[7] जनकत्वाध्यापकत्वाविशेषेऽपि पितरमायान्तं दृष्ट्वा पिता मे आगच्छतीति निश्चिनोति नोपाध्याय इति। सोऽपि निश्चयोऽसति भ्रान्तिकारणे भवति। तस्मात्[1] नानुभूते सर्वाकारनिश्चयः॥**

यद्यपीत्यादिना व्याचष्टे। **सर्वभेदेषु** क्षणिकत्वादिषु **तावतेत्यनुभवमात्रेण**। निश्चयोत्पादनप्रत्यनुभवज्ञानस्य **कारणन्तरापेक्षत्वात्**। तदेवाह **अनुभवो हीत्यादि**। **यथाविकल्पाभ्यासमिति** यस्य यादृशो विकल्पाभ्या[5]सस्तेन सहकारिणा **जनयतीत्यर्थ**। उदाहरणमाह। **यथेत्यादि**। मृतस्त्री**रूपदर्शनाविशेषेपि** परिव्राट्कामुकशुना यथाक्रम **कुणपकामिनीभक्ष्यविकल्पा** यथाविकल्पाभ्यास-ञ्जायन्ते। न च विकल्पाभ्यास एव सहकारी। किन्त्वन्योप्यस्तीत्याह। **तत्रेत्यादि**। तत्रापि रूपदर्शनाविशेषेपि। **बुद्धेः पाट**वन्तीक्षणता। यथा योगिना बुद्धि-पाट[4]वाद् दर्शनमात्रेण क्षणिकत्वादिनिश्चय। आदिशब्दादर्थित्वसामर्थ्यादिपरिग्रह। **इत्यादय** इत्येवमादय। **अनुभवात्** प्रत्यक्षादुपादानकारणात्सकाशाद् **भेदनिश्चयस्योत्पत्तौ सहकारिण**। यदा तर्हि बहुषु निश्चयेषु यथोक्तानि कारणानि न भवन्ति तदा तेषा निश्चयाना कथ क्रमभाव इत्याह। **तेषामेव** चेत्यादि (।) तेषामिति निश्चयकारणाना[6] **प्रत्यासत्ति**तारतम्यभेदात्। यस्य निश्चयस्य प्रत्यासन्नतमन्निश्चयकारणन्तत्तावदादावुत्पद्यते। **आदि**शब्दादधिमात्रतारतम्यस्य भेदा न्निश्चयाना **पौर्वापर्यं। यथे**त्यादिनोदाहरणमाह। पितेव यदोपाध्यायो भवति। तदैकस्य पुरुषस्य **जनकत्वाध्यापकत्वाविशेषेपि। पितरमायान्तं दृष्ट्वा पिता मे आगच्छ-**
54a **तीति निश्चिनोति[7] नोपाध्याय इति**। पितृत्वनिश्चये कारणस्य प्रत्यासन्नतमत्वात्॥

ननु सत्यपि क्षणिकत्वनैरात्म्यविकल्पाभ्यासे सहकारिणी तत्त्वादर्शिना न प्रत्यक्षात् क्षणिकत्वादिनिश्चयो भवतीत्यत आह। **सोपीत्यादि**। **असति भ्रान्तिकारणे भवति** न तु निश्चयप्रत्ययमात्रात्। यत एवमसति भ्रान्तिकारणे सहकारिप्रत्यसाकल्ये च सति प्रत्यक्षान्निश्चय उत्पद्य[1]ते न केवलात्। **तस्मान्नानुभूत** इत्यादि।

---

[1] Thams-cad-las tha-dad-pa cha-śas-dan-bral.bahi-no.bo-ñid. ñams-su-myon.

(तत्रापि चान्यव्यावृत्तिरन्यव्यावृत्त इत्यपि।
शब्दाश्च निश्चयाश्चैव संकेतमनुरुन्धते) ॥६१॥

तत्रान्यापोहे सत्ताव्यावृत्तिरपि (अन्या) अन्य [2]एव व्यावृत्तो धर्मीति नास्ति। तद्व्यावृत्तेर्निवर्त्तमानस्य तद्भावप्रसङ्गात्। तथा च व्यावृत्तेरप्यभावः।

ततश्च स्थितमेतद् (।) अन्यव्यवच्छेद शब्दलिङ्गाभ्या प्रतिपाद्यत इति।

ननु व्यवच्छेदोपि यदि पदार्थादभिन्नस्तदैकेन प्रमाणेन शब्देन वास्य विषयीकरणेन्यस्य वैयर्थ्य स्यात् सर्वात्मना निश्चितत्वात्। अथ भिन्नस्तदापि तस्याश्रितत्वादेकव्यवच्छेदोपाधिके पदार्थे प्रमाणेनैकेन निश्चीयमाने पूर्वोक्तेन न्या[2]येन सर्वेषा व्यवच्छेदाना निश्चितत्वादन्येषा प्रमाणादीनामप्रवृत्तिः स्याद् (।) अत. समान प्रसग इति।

तन्न। यतो न भावानामन्योन्यव्यवच्छेदोऽभिन्नो भिन्नो वाऽस्ति। केवल स्वहेतुभ्य एव भिन्ना समुत्पन्ना इत्युक्तम्वक्ष्यति च॥

कथन्तर्ह्यन्यव्यावृत्तिरित्यादि व्यपदेशो बुद्धिश्च प्रवर्त्तत इत्यत्राह। **तत्रापीत्यादि। तत्रापि** चन्यापोहे शब्दार्थे।[3] **अन्यस्माद् व्यावृत्तिरन्यस्माद् व्यावृत्तोयमित्यपि**(।) ये **शब्दा** धर्मधर्मिवचना **निश्चया**श्चोभयविषयास्ते **संकेतमनुरुन्धते।** सकेतानुविधाननैषा धर्मधर्मिविषयविभाग कल्पित. परमार्थतस्तु व्यावृत्तिरेव नास्तीत्यर्थ।

तद्व्याचष्टे। **तत्रान्यापोह** इत्यादिना गोरश्वाद् **व्यावृत्तिरन्या** धर्मभूता **अन्य** एवाश्वाद् **व्यावृत्तो धर्मी।** व्यावृत्या[4] विशिष्टो गौरित्येत**न्नास्ति**। किन्तु **यैव** व्यावृत्ति स एव व्यावृत्त इति वक्ष्यति।

यदि चाश्वाद् व्यावृत्तिरनश्वता गोद्रव्यस्यान्या स्यात् तदाश्वव्यावृत्तेरपि गोद्रव्येण निर्वात्तितव्यम्भेदात्। ततश्च **तद्व्यावृत्तेरन**श्वताया· सकाशा**न्निवर्त्तमान**स्य गोस्तद्**भावप्रसङ्गात्**। अश्वभावप्रसङ्गादश्ववत्। एव ह्यश्वव्यावृत्तेरनश्वत्वलक्षणाया[5] गौर्व्यावृत्तो भवति यद्यस्याश्वत्व स्यात्। **तथा** च गोरश्वभावापत्ते। अश्वाद् गो**र्व्यावृत्ति**स्तस्या **अभाव**ः। गवाश्वयोरेकत्वात्।

तेन यदुक्तञ्जैनजैमिनीयै (।)

"सर्वात्मकमेक स्यादन्यापोहव्यतिक्रम" इति।[1]

तान्प्रतीदमुक्तं। यद्यन्यव्यावृत्तिरर्थान्तर स्याद् गवाश्वादीनाभेकत्वं स्यादिति।

---

[1] श्लो० वा०

तस्माद् यैव व्यावृत्तिः स एव व्यावृत्तः।

नापि गोरभिन्नाश्वव्यावृत्तिरश्वव्यावृत्तौ गौरि[6]त्यप्रतीतिप्रसगात्। गोविनाशे चाश्वस्योत्पत्तिप्रसङ्गादश्वनिवृत्तेर्विनष्टत्वात्। तस्मान्नास्त्येव व्यावृत्तिः।

तेन यदुच्यते भ ट्टो द्यो त क रा भ्या। "योयमगोपोह. स कि गवि भिन्नेऽर्थो भिन्न.। यदि भिन्न किमाश्रितोऽथानाश्रित. (।) यद्याश्रितस्तदाश्रितत्वाद् गुण
54b इति गोशब्देन तदा गुण्यभिधीयते न गोद्रव्यमिति। गौस्ति[7]ष्ठतीति सामानाधिकरण्य स्यात्। अथानाश्रितः केनार्थेन षष्ठचर्थः। गोरपोह इति। अथाभिन्नो गौरेव स्यादिति न किञ्चिदनिष्ठं। अय चापोह प्रतिवस्तु यद्येकोनेकसम्बन्धी च तदेव गोत्वमि"ति (।)

तन्निरस्त। अन्यव्यावृत्तेरेवाभावात् केवल स्वहेतुतः स्वकीयेन रूपेणोत्पन्नो भावोन्यस्माद् व्यावृत्तस्तस्य चान्यस्माद् व्यावृत्ति. कल्प्यते। यतश्च न परमा-[1]र्थतो व्यावृत्तिरस्ति। **तस्माद् यैव व्यावृत्तिः स एव व्यावृत्तः**। द्वाभ्यामैकस्यैव विषयीकरणात्। तस्यैव चान्यव्यावृत्तस्य लिङ्गत्वं लिङ्गित्वं सम्बन्धो विकल्पविषयत्वञ्च (।) विकल्पो ह्यन्यव्यावृत्त स्वाकाराभिन्नमध्यस्य पुरुषन्तत्र प्रवर्त्तयतीत्यत्यर्थकारित्वाद् (।) अतः स एव बाह्यः शब्दार्थोन्यव्यावृत्त.।

यदप्युच्यते कु मा रि ले न (।) कदाचिदेकस्मादेव भावस्यापो[2]ह. स्यात्। सर्वास्माद्वा। यद्येकस्मादेव तदा यथाश्वापोहद्वारेण गोद्रव्यस्य गौरित्यभिधानन्तथा सिहादेरपि स्याद् अश्वापोहस्य गोशब्दप्रवृत्तिनिमित्तस्य भावात्। तदाह।

"ततोश्वापोहरूपत्वात् सिहादिः सर्व एव ते।
तन्निमित्तमगोपोह विभ्रदुच्येत गौरिती"ति।[1]

अथ सर्वस्मादपोहो गोद्रव्यस्य। तत्रापि यदि प्रत्येकमपोह्यं अश्वादयस्तदा[3]-पोह्यानामानन्त्यादपोह एव न सिध्येत्। अपोह्याना च भिन्नत्वादपोहभेद. प्रसज्यते। तथा चैकस्मिन्नपि पिण्डे जातिबहुत्वाज्जात्यन्तरबुद्धिः स्यात्। जात्यन्तरेष्विवाश्वादिषु।

"ततो गौरिति सामान्य वाच्यमेक न सिध्यति।"[2]

नापि ते समुदायरूपेण सर्वेऽपोह्याः सम्भवन्ति। समुदायो ह्येकदेशत्वेन वा स्यान्न चापोह्यानामेकदेशादित्व स[4]म्भवति। नापि तेषा समुदायो व्यतिरिक्तोऽस्त्यव्यतिरेके चानन्त्य तदवस्थ। न चापि सामान्यरूपेण तेऽपोह्याः सामान्य-

---

[1] Ślokavārtika. 57
[2] Ibid, 60

शब्दप्रतिपत्तिभेदो हि सङ्केतभेदात्[3]। न वाच्यभेदोऽस्ति॥

ननु च संकेतभेदो न युक्तः। द्वयोरेकस्याभिधानात्। तथा च व्यतिरेकिण्या

स्यावस्तुत्वात्। अपोह्यत्वे च वस्तुत्व स्यादिति।

तदयुक्त यत. (।) सर्वभावाना स्वेनैव स्वेनैव रूपेणोत्पद्यमानाना सर्वस्मादपोहः स्वहेतुभ्यः सिद्ध एव।

अथ कथमसौ ज्ञायत इति चोद्यते। तत्किङ्गौरतीतानागर्[5]तवर्त्तमानाऽश्वादिस्वभाव प्रत्यक्षे प्रतिभासते। नेति चेत्। कथ न तत्र सर्वापोह. प्रत्यक्षसिद्ध.। न हि प्रमाण हस्ताभ्याऽगृहीत्वान्यदपोहत्यपि तु नियतरूपार्थप्रकाशनमेवास्यान्यापोह। तस्मान्नियतरूपार्थप्रतिभास एव प्रत्यक्षस्य सर्वस्मादपोहग्रह। तच्च स्वविषयन्निश्चाययद् यदेव न भवति तत्सर्वमन्यत्वेन नि[6]श्चाययत्यतो युगपत्सर्वस्यान्यस्य सामान्येनाविशेषेण निषेध क्रियते। सामान्यस्यानिर्द्धारितविशेषरूपत्वात्। तदुक्तम् (।)

"अतद्रूपपरावृत्तवस्तुमात्रप्रसाधनात् (।)
सामान्यविषय प्रोक्त लिङ्गभेदाप्रतिष्ठितेरि"ति (।प्र०स०)

तेनापोह्यस्य कस्यचिद् वस्तुत्वमिष्यत एव।

न चापोह्यत्वाद् वस्तुत्वमित्यत्र किञ्चिद् प्रमाणमस्त्यभावस्याप्यपोह्यत्वान्न चास्य[7] वस्तुत्वमित्युक्त। तस्माद् युगपत् सर्वापोहलक्षणेनागोपोहेनैकस्मिन्नपि ११a
पिण्डे गोत्व। प्रत्येकाश्वाद्यपोहेनानश्वत्वासिहत्वामहिषत्वादयो जातिभेदा कल्पितास्तद्द्वारेण च तदभिधायका प्रवर्त्तन्त इति यत्किञ्चिदेतत्।

यदि व्यावृत्तिव्यावृत्ताऽभिधेयार्थस्य न भेद। कथ व्यावृत्तिव्यावृत्त इति शब्दज्ञानभेद। तथा हि व्यावृत्तिरित्यन्य शब्दो व्यावृत्त इत्यन्य एव श[1]ब्द। तथा ज्ञानभेदोपि (।) व्यावृत्तिरित्युक्ते धर्ममात्रम्प्रतीयते। व्यावृत्त इति धर्मीति। तत आह(।) **शब्देत्यादि**। शब्दाद् धर्मधर्मिवाचिनो या प्रतीति सा शब्दप्रतिपत्ति। शब्दश्च **शब्दप्रतिपत्तिश्चेति** विरूपैकशेष। **शब्दभेदः** शब्दाच्च या प्रतिपत्तिस्तस्याभेद इत्यर्थ सज्ञासज्ञिसम्बन्धिकरण **संकेतस्तस्य भेदात्**। सकेतभेद चानन्तरमेव (१।६३) **भेदान्तरप्रतिक्षे[2]**पेत्यादिना प्रतिपादयिष्यते। **न वाच्यभेदोस्ति** धर्मधर्मिशब्दयोर्वस्तुत इत्यध्याहार॥

ननु चेत्यादि पर। कि पुनर्वाच्याविशेषे **संकेतभेदो न युक्त** इति चेदाह। **द्वयोरित्यादि**। कर्त्तरि चेय षष्ठी। कर्त्तृ कर्मणोः कृतीति उभयप्राप्तौ कर्मणीति

विभक्तेरप्ययोगः स्यात्। तस्या हि भेदा[4]श्रयत्वादिति चेत्।

(द्वयोरेकाभिधानेऽपि) विभक्तिर्व्यतिरेकिणी।
भिन्नमर्थमिवान्वेति वाच्ये लेशविशेषतः ॥६२॥

न वै शब्दानां प्रवृत्तिः क्वाऽपि विषयस्वभावायत्ता[5]। इच्छातो वृत्त्यभाव-प्रसङ्गात्। ते भेदाभेदयोर्यथा नियोगेच्छा तथा नियुक्तास्तं अर्थं अप्रतिबंधेन प्रकाशयन्ति। तस्मात् गौः गोत्वं[6] चेति (आभ्यां) एकार्थाभिधानेऽपि कस्यचिद् विशेषस्य प्रत्यायनार्थं कृते संकेते भेदे अनर्थान्तरेऽपि व्यतिरिक्तार्था विभक्ति-
439b **रर्थान्तरमिवादर्शयन्ती प्रतिभाति। तथा प्रयोगदर्शना[7]भ्यासात्।**

नियमस्य शेषे विभाषेति[1] विकल्पनात्। द्वाभ्या धर्मधर्मिशब्दाभ्या**मेक**स्यार्थस्या-**भिधाना**दित्यर्थ। एक चेद् द्वाभ्यामभिधेयन्त[3]तो व्यर्थ. सकेत। **तथा चे**ति धर्म-धर्मिणोरभेदे **व्यतिरेकिण्या** इति व्यतिरेकाभिधायिन्या गोर्गोत्वमिति षष्ठ्या। **तस्या** इति व्यतिरेकविभक्ते**र्भेदाश्रयत्वाद् वस्तुभेदमाश्रित्य** प्रवृत्तेः। यथा देवदत्तस्य कमण्डलुरिति। एव सकेताभावे व्यतिरेकविभक्त्यभावे च चोदिते।

विभक्त्यभावदोषन्तावत्परिहरन्नाह। **द्वयो**रित्यादि। धर्मधर्मिवाचिनो शब्द[4]-**यो रेकस्यार्थस्याभिधानेपि विभक्तिर्व्यतिरेकिणी**। व्यतिरेकस्य वाचिका षष्ठी। इव शब्दो भिन्नक्रम। **भिन्नमिवार्थमन्वेति** दर्शयति। **वाच्ये** सकेतभेदकृतेन लेशेन मात्रया यो **विशेषस्त**त कारणान्न तु परमार्थतो वस्तुभेदात्।

यद्वचाचष्टे। **न वै शब्दानामि**त्यादिना। **विषयस्वभावायत्ते**ति बाह्यस्वलक्ष-णायत्ता (।) कि कारणम् (।) **इच्छातः** पुरुषे[5]च्छावशाद**भावेष्वपि** वृत्त्यभाव**प्रस-ङ्गात्। त** इति। इच्छाप्रतिबद्धवृत्तय शब्दा **यथा** येन प्रकारेण भेदप्रतिपादनेन व्यतिरिक्ते यथा राज्ञ पुरुष इति। अव्यतिरिक्ते यथात्मैव ह्यात्मनो द्रष्टेति। **तथा नियुक्ता** इत्यभिन्नेप्यर्थे भेदमिवोपादाय प्रयुक्ता**स्तमर्थम**प्रतिबन्धेन **भिन्नमिव प्रका-शयन्ति**। वस्तुत. स्वलक्षणस्याभेदेपि यत एवन्तेन कारणेन। **गौ[6]रिति** धर्मि-वाचिनमाह। **गोत्व**मिति धर्मवाचिन। आभ्यामे**काभिधाने**प्यगोव्यावृत्तस्य गोरभिधानेपि **कस्यचिद्** विषयस्य **प्रत्यायनार्थ**मिति। अगोव्यावृत्तिनिमित्तस्य गोत्वस्य प्रकाशनार्थ। अगोव्यावृत्तिमात्र गोत्वशब्देन प्रतिपाद्यमित्येवकृते सकेते भेदे। व्यतिरिक्तार्था न विभक्तिरस्य गोत्वमिति भवति षष्ठी। व्यतिरिक्तोऽर्थोस्या
55b इति विग्रह.। धर्मिणस्स[7]काशाद् **धर्मम र्थान्तरमिवादर्शयन्ती प्रतिभाति। अन-**

---

[1] Panini. 2: 3· 65.

तावता सर्वत्र न भेदः। अन्यत्राऽपि पुरुषेच्छावशात् प्रवृत्तस्य प्रतिबन्धाभावात्। यथा एकं क्वचिद् एकवचनेन ख्याप्यते तद् अविशेषेऽपि आदरा[1]द्यभिधाना बहुवचनेन ख्याप्यते ॥

प्रयोजनाभावात् तु न संकेतभेदः स्यादिति चेत्। तदप्यस्त्येव। एवम्—

भेदान्तरप्रतिक्षेपाप्रतिक्षेपौ तयोर्द्वयोः।
(सङ्केतभेदस्य पदं) ज्ञातृवाञ्छानुरोधिनः ॥६३॥

थान्तरेपीत्यव्यतिरिक्तेपि धर्मे (।) कि कारण (।) **तथा प्रयोगदर्शनाभ्यासात्।** वस्तुभेदे सति षष्ठ्या प्रयोगदर्शनाभ्यासाद् देवदत्तस्य कमण्डलुरित्यादौ ।

एतदुक्तम्भवति। वस्तुभिन्नम्भवतु मा वा भूत् सर्वथा व्यतिरेकविभक्ति-रिच्छामात्रानुरोधिनी केवल प्रयोगदर्शनाभ्यासाच्छब्दार्थम्भिन्नमिव दर्शयतीति। **तावते**ति विभक्तिप्रयो[1]गमात्रात्। **सर्वत्रे**त्यर्थाभेदेपि। गौर्गोत्वमित्यादौ न धर्म-धर्मिणो. परमार्थतो **भेदः**। तस्मा**दन्यत्रा**प्यर्थाभेदेपि **पुरुषेच्छावशात् प्रवृत्तस्य** व्यतिरेकाभिधायिन शब्दस्य **प्रतिबन्धाभावात्**। दृष्टा च पुरुषेच्छावशाच्छ-ब्दाना प्रवृत्तिरसत्यपि तथाभूते वाह्ये वाच्य इत्याह। **यथेत्यादि**। **एकम्**वस्तु **क्वचित्** प्रकरणे **एकवचनेन ख्याप्यते**। यथा त्वमिति। **तदविशेषे[2]**पि एकत्वा-विशेषेपि तदेव वस्तु **बहुवचनेन** यूयमिति। अतश्चैकस्मिन्नपि बहुवचनदर्शनान्न यथावस्तु शब्दानाम्प्रवृत्तिरिति गम्यते। युष्मदि गुरावेकेषा[1]मित्यतिदेशवाक्याद् एकस्मिन्नपि बहुवचनमिति चेत्। चिन्त्यमेतत्। किमतिदेशवाक्येनैकस्य बहुत्व क्रियते किम्वा बहुवचनमात्रमप्राप्त विधीयत इति (।) न तावदाद्य पक्षो वचन-मात्रेण[3] वस्तूनाम्विधानासम्भवात्। द्वितीयेपि पक्षे सिद्धैवेच्छामात्रेण शब्दाना प्रवृत्तिरिति। एवन्तावद्विभक्त्यभावदोष परिहृत (।)

सकेताभावदोषन्तु परिहर्त्तुन्तमेवोपन्यस्यति (।) **प्रयोजनाभावात्** त्वित्यादि। धर्मिधर्मशब्दाभ्यामेकस्याभिधानात् प्रयोजनाभाव। **तदपि** प्रयोजनमस्त्येव। गोत्वापेक्षया **भेदान्त**राणि द्रव्यत्वपार्थिवत्वादीनि। **तेषां** प्रति[4]क्षेपोऽस्वीकार। तौ **प्रतिक्षेपाप्रतिक्षेपौ** यथाक्रमन्तयोर्द्वयोर्द्धर्मधर्मिवाचिनो शब्दयोर्य **संकेतभेद**-स्तस्य (।) किम्विशिष्टस्य **ज्ञातृवाञ्छानुरोधिनः** प्रतिपत्त्रिच्छानुविधायिन पद प्रयोजन ॥

एतदुक्तम्भवति। यदान्यव्यावत्तरूपनिराकाङ्क्ष प्रतिपत्ताश्वादेवैकस्माद्

---

[1] Pāṇini 1. 2: 58.

यदाऽयं प्रतिपत्ता तदन्यव्यवच्छेदभावानपेक्ष पिण्डविशेषेऽश्वव्यवच्छेदमात्रं जिज्ञासते तथाभूतज्ञापनार्थम्। तथाकृतसंकेतेन शब्देन प्रबोध्यतेऽत्र[3] नैवाश्व-इति। यदा व्यवच्छेदान्तरानिराकांक्षः तं जिज्ञासते, तदा तथा प्रकाशनाय अप्रति-

---

व्यावृत्त गोपिण्ड जिज्ञासते तदा यावदश्वाद् व्या[5]वृत्तिमर्थान्तरभूतामारोप्य तथैव सकेतपूर्वक लौकिकेन धर्मवाचकेन शब्देन न कथयति (।) तावन्न परस्य जिज्ञासितोर्थ प्रतिपादयितु शक्यते (।) अतस्त प्रत्यनश्वत्वमस्येत्युच्यते। एव हि धर्मिणोऽप्राधान्यादन्यव्यावृत्तरूपानाक्षेप कृतो भवत्यश्वादेवैकस्माद् व्यावृत्तिश्च। न तदैवमुच्यतेऽनश्व इत्यनेन ह्यन्यव्यावृत्तस्यापि रूपस्याक्षेप[6] कृत. स्यात् (।) न चैवम्परेण जिज्ञासितमजिज्ञासित च कथयन् कथन्नोन्मत्त स्यात्।

यदा पुनरन्यव्यावृत्तरूपसाकाक्षेऽश्वाद् व्यावृत्तं गोपिण्ड जिज्ञासते। तदापि यावदश्वव्यावृत्तिविशिष्ट पिण्डं धर्मिस्वभावतयाऽरोप्य तथैव सकेतपूर्वक लौकिकेन धर्मिवाचकेन न कथयति तावन्न परस्य जिज्ञासितोर्थ प्रतिपादयितु शक्यतेऽ-
56a तस्त प्रत्यनश्वो[7]यमित्युच्यते। एव हि धर्मिण प्राधान्यादन्यव्यावृत्तरूपाक्षेप कृतो भवत्यश्वव्यावृत्तश्च गोपिण्ड कथितो भवति। न तदैव ख्याप्यतेऽनश्वत्वमस्येति परजिज्ञासितान्यव्यावृत्तरूपानाक्षेपप्रसङ्गात्। अजिज्ञासित चार्थ कथयन् कथन्नोन्मत्त'। सर्वश्च शाब्दो व्यवहार सकेतपूर्वक सकेतश्च विकल्पकल्पितार्थपूर्वक एवेति विकल्पैर[1]प्यनेनैव द्वारेण धर्मधर्मिभावप्रतीतिर्युक्ता।

तेन यदुच्यते (।) भवतु धर्मधर्मिवाचकाना भेदान्तरप्रतिक्षेपाप्रतिक्षेपार्थ-प्रवृत्ति.। धर्मिधर्मविकल्पानान्तु कथ प्रतिपत्तिरित्यपास्त।

एतदेव वृत्त्या स्पष्टयन्नाह। **यदाय**मित्यादि। **प्रतिपत्ते**ति श्रोता। तस्माद् अश्वाद्योऽ**न्यो** महिषादिस्तस्माद् **व्यवच्छे**दो महिषादिव्यावृत्त स्वभावस्तस्य **भावानपेक्षः** स[2]त्तानपेक्षः। **पिण्डविशेषे** गवि। **अश्वव्यवच्छेदमात्रं जिज्ञासते**। किमस्याश्वाद् व्यावृत्त रूपमस्तीति। **तथाभूतज्ञापनार्थ**मिति यथा प्रतिपत्त्रा ज्ञातुमिष्टन्तदनुरोधेन तथाभूतस्याश्वाद् भेदमात्रस्य ज्ञापनार्थन्त**थाकृतसंके**तेनेत्यश्वव्यवच्छेदमात्रे प्रतिक्षिप्तभेदान्तरे कृतसकेतेनानश्वत्व **शब्देन प्रबोध्यते** प्रकाश्यतेऽनश्वत्वमस्य पिण्डस्यास्तीति। अश्वा[3]द्यो व्यवच्छेदस्तदपेक्षया महिषादिभ्यो व्यावृत्तयो(र्)**व्यवच्छेदान्त**राणि। तेष्वनि**राकांक्ष** प्रतिपत्ता। **तमि**ति पिण्ड। अप्रतिक्षिप्तभेदान्तरेणाश्वव्यवच्छेदेन युक्तङ् गोद्रव्य ज्ञातुमिच्छतीति यावत्। अपरित्यक्तानि महिषादिव्यवच्छेदान्तराणि येन। तस्मिन्न**परित्यक्तभेदान्तरे**। तत्रैव वाश्वव्यवच्छेदे। धर्मिवाचिन शब्द **प्रयुञ्जते** वक्तारोऽ**नश्वोयमि[4]ति**। कथ प्रयुञ्जत इत्याह। **तथा प्रकाशनाये**ति। अप्रतिक्षिप्तभेदान्तरस्याश्वव्यव-

क्षिप्तभेदान्तस्यानश्वोय[4]मिति प्रयुंजते। अत एव पूर्वत्र प्रतिक्षिप्तभेदान्तरेण शब्दवृत्तेः सामानाधिकरण्यं[1], न विशेष्यविशेषणभावः। गोत्वमस्य शुक्लमितिवत्। तन्मात्रविशेषेण बुद्धेस्तदा[5]श्रयभूताया एकत्वेनाऽप्रतिभासनात्

वच्छेदस्य प्रकाशनाय। **अप्रतिक्षिप्तभेदान्तर**मेवाश्वव्यवच्छेदन्तथा प्रकाशनायेत्यन्ये पठन्ति। तदाप्ययमर्थ। अप्रतिक्षिप्तभेदान्तरन्तमेवाश्वव्यवच्छेदमश्वव्यावृत्तिरूप प्रयुञ्जते अभिदधत्यनश्वोयमित्यनेन धर्मिवचनेन शब्देन। किमर्थम्(।)तथाप्रकाश[5]नायाप्रतिक्षिप्तभेदान्तरस्य प्रकाशनायेति। येनैव धर्मवाची शब्द· प्रतिक्षिप्तभेदान्तर। **अत एव पूर्व**त्रेति धर्मवाचिनि शब्दे **प्रतिक्षिप्तभेदान्तरं** येनेति। सामान्येनान्यपदार्थं कृत्वा भावप्रत्यय कर्त्तव्य। पश्चा**च्छब्दवृत्तेरित्य**नेन सम्बन्ध। अन्यथा प्रतिक्षिप्त भेदान्तरत्वादिति स्यात्। एवमन्यत्राप्येवजातीयेषु शब्देषु व्युत्पत्तिर्द्र[6]ष्टव्या।

भिन्ननिमित्तयो शब्दयोरेकस्मिन्नधिकरणे वृत्ति· **सामानाधिकरण्यं। विशेष्यविशेषणभावो** व्यवच्छेद्यव्यवच्छेदकभाव। उदाहरण**ङ् गोत्वमस्य शुक्लमिति।** गुणशब्दस्याभिधेयवल्लिङ्गवत्त्वेन नपुसकत्व (।) शुक्ल इत्यन्ये पठन्ति। एव चाचक्षते (।) गुणशब्दो हि प्रतिक्षिप्तभेदान्तरेण गुणमात्रे वर्त्तमान उपात्तो गु[7]णमात्रवृत्तीना शुक्लादिशब्दाना पुल्लिङ्गत्व। तद्वति तु वर्त्तमानानामभिधेय- 56b
वल्लिङ्गता। एव चानयोर्द्धर्ममात्रवृत्त्योर्न सामानाधिकरण्य नापि विशेषणविशेष्यभाव इति।

कस्मान्न सामानाधिकरण्यमित्याह। **तन्मात्रे**त्यादि। एतत्कथयति बुद्धिप्रतिभासिन्येवार्थसामानाधिकरण्यादि। न बाह्ये स्वलक्षणे तस्यावाच्यत्वात् (।) केवलमध्यवसा[1]याद् बाह्येप्युच्यते। यदि च धर्मद्वययुक्तैकधर्मिप्रतिभासिनी शब्दद्वयजनिता बुद्धिरेकार्थोत्पद्येत भवेत्सामानाधिकरण्य। इह तु **तन्मात्रविशेषेण** प्रतिक्षिप्तभेदान्तरेण गोत्वमात्रविशेषणोपरक्तायां **बुद्धेस्तदाश्रयभूताया** इति विशेषणविशेष्यभाव सामानाधिकरण्याश्रयभूताया **एकत्वेन** धर्म्यभेदेना**प्रतिभासनात्**। गो[2]त्वशुक्लत्वाभ्या युक्तमेकन्धर्मिण गृहीत्वा बुद्धेरप्रतिभासनादित्यर्थ।

यद्वा तदाश्रयभूताया इति तदेव गोत्वमाश्रयभूत यस्यास्तस्या बुद्धेस्तन्मात्रविशेषेण प्रतिक्षिप्तधर्मान्तरेण गोत्वमात्रेण विषे(?शे)षेण सह गोपिण्डस्यैकत्वेनाप्रतिभासनात्। तथा ह्यस्य गोत्वमिति प्रयोगे निष्कृष्टरूप धर्म प्रतियती

---

[1] Gzi-mthun-pa-ñid-dam.

निराकांक्षत्वाच्च।

द्वितीये तु भवति। तथा संकेतानुसारेण संहृतसकलव्यवच्छेदधर्मैः विभागवत एकस्येव संदर्शनेन प्रतिभासनात्[6] व्यवच्छेदान्तरापेक्षत्वाच्च।

भेदोयऽमेव सर्व्वत्र द्रव्यभावाभिधायिनोः।
शब्दयोर्न तयोर्वाच्ये विशेषस्तेन कश्चन ॥६४॥

44oa **तस्मात् सर्वत्र धर्मिधर्माभिधायि[7]शब्दे वाच्येऽर्थे निश्चयप्रत्ययविषयत्वेन न**

बुद्धिरुत्पद्यते। ततो न सामा[3]नाधिकरण्यमिति। धर्मान्तरप्रतिक्षेपादेव तदन्येषु भेदेषु **निराकांक्षत्वाच्च** बुद्धेर्न विशेषणविशेष्यभावः।

द्वितीये तु धर्मिवाचिशब्दपक्षे **भवति** सामानाधिकरण्यम्विशेषणविशेष्यभावो वा शुक्लो गौरिति। सामानाधिकरण्ये कारणमाह। **तथे**त्यादि। **तथा संकेतानुसारेणे**त्यप्रतिक्षिप्तभेदान्तरे वस्तुनि धर्मिशब्दस्य सके[4]तानुसारेण हेतुना। एकस्मिन् धर्मिणि योजन सहार। व्यवच्छेदहेतुका धर्मा व्यवच्छेदधर्मा सहृताश्च ते **सकलव्यवच्छेदधर्माश्चे**ति कर्मधारय। **तैर्धर्मै** करणभूतै**र्विभागवतः**। विभक्तानेकधर्मवतो धर्मि**ण एकस्येव** शब्द**सन्दर्शनेन** प्रदर्शनेन बुद्धे **प्रतिभासनात्**। अनेकधर्मवन्तन्धर्मिणमेकमिव सन्दर्शयन्ती बुद्धि [5] प्रतिभासत इति यावत्। न तु बुद्धिप्रतिभाससन्दर्शितो धर्मी वस्तुत एक (।) विकल्पनिर्मितस्य धर्मधर्मिविभागस्यालीकत्वात्। **एकस्यैवे**त्यपि पठन्ति। तत्रापि प्रतिपत्त्रध्यवसायवशादेव युक्तमिति बोद्धव्य। तत सिद्धं सामानाधिकरण्य (।) यच्चश्च भेदान्तराप्रतिक्षेपेण धर्म्मिशब्द प्रवृत्तस्तत एव तज्जनिताया बुद्धेरप्रतिक्षिप्त[6]भेदा**न्तरापेक्षत्वाद्** भवति विशेषणविशेष्यभावो यद् गौ शुक्लो नीलो वेति। चशब्दश्च पूर्ववदतीतहेत्वपेक्ष ॥

इदमेव व्यापक सर्वव्यवहारस्य नापरस्परपरिकल्पित सामान्यगुणादिकान्तस्य प्रमाणबाधितत्वादित्याह। **भेदोयमेवे**त्यादि। **द्रव्यभावाभिधायिनोः शब्दयोर-**
57a **यमेव भेदो** धर्मान्तरप्र[7]तिक्षेपाप्रतिक्षेपलक्षण'। **सर्व**त्रेति। सामान्यसामान्यवति। गुणगुणवति। क्रियाक्रियावति। सर्वस्मिन् विषये धर्मिवचनो द्रव्याभिधार्या। धर्मवचनो भावाभिधायी। यत एवन्**तेन** कारणेन न **तयोर्द्रव्यभाव**शब्दयोर्वाच्ये **विशेषः** परमार्थतः **कश्चना**स्ति।

तद्व्याचष्टे। **तस्मा**दित्यादि। **निश्चयप्रत्ययविषयत्वेन** करणेन। **न कश्चिद्विशेषः**। तथा हि[1] यथा गोत्वमित्युक्ते तत्रैवागोव्यवच्छेदे निश्चयस्तथा गौरित्युक्ते यद्यप्यप्रतिक्षिप्तभेदान्तरस्यागोव्यवच्छिन्नस्याभिधानन्तथाप्यगोव्यवच्छे-

कश्चिद् विशेषः। एकस्तमेव ज्ञापयति[1] प्रतिक्षिप्तभेदान्तरः, अन्योऽप्रतिक्षेपेण गमय[1]तीति अयमेव भेदः॥

जिज्ञापयिषुरर्थन्तं तद्धितेन कृतापि वा।
अन्येन वा यदि ब्रूयाद्भेदो नास्ति ततोऽपरः॥६५॥

एतावन्तं दर्शयेत् तथाभूतज्ञाप[1]नाय। पाक इति[2] तद्धितेनापि दर्शयितुं योग्यं पचेदप[2] इति कृद्वता ऽपि, स्वकृतसमयान्तरेणा[3]ऽपि। तथाभिधा नमात्रेण

दमात्रे निश्चयोन्येषान्तु भेदानामप्रतिक्षेपमात्र। स एव च शब्दार्थो यत्र शाब्दो निश्चयो भवतीति नास्ति भावद्रव्याभिधायिनो शब्दयोर्वाच्ये विशेषो भेदान्तर-प्रतिक्षेपाप्रतिक्षेपमात्रन्तु भिद्यते। तदेवा[2]ह। **एकस्तमे**वेत्यादि। एक इति धर्मशब्दस्तमित्यगोव्यवच्छिन्न। **प्रतिक्षिप्तं भेदान्तरं** येन धर्मशब्देन स तथोक्त। **अन्य** इति धर्मिशब्दोऽ**प्रतिक्षेपेण** तमेव पिण्ड सामानाधिकरण्येन **गमयतीति** नास्ति द्रव्यनिश्चयम्प्रति **भेदः** प्रतिक्षेपाप्रतिक्षेपमात्रन्तु भिद्यते। एव गमनन्देवदत्तस्य गच्छति देवदत्त इति न कश्चन भेद इत्यन्यत्राप्येव[3] योज्यं॥

यापि जातिगुणक्रियासम्बन्धभेदेन चतुष्ठयी शब्दाना वृत्ति. साप्यनेनैव वस्तुगतधर्मभेदेन सगृहीतेत्याह। **जिज्ञापयिषु**रित्यादि। ज्ञापयितुमिच्छुर**र्थन्तम्**भेदान्तरप्रतिक्षेपाप्रतिक्षेपलक्षण। **तद्धितेन** तद्धितप्रत्ययान्तेन। **कृतापि वा**। कृत्सज्ञकप्रत्ययान्तेन वा। **अन्येन वा** कृत्तद्धितव्यतिरिक्तेन तिङन्तेनाऽव्युत्प[4]न्नेन वा शब्देन शुक्लादिना **यदि ब्रूयात्**। **ततो** भेदान्तरप्रतिक्षेपाप्रतिक्षेपलक्षणाद् विशेषा-**दपरो भेदो नास्ति।**

तद्वाचष्टे। **एतावन्तमि**त्यादिना। एतावन्तमिति प्रतिक्षिप्तभेदान्तरलक्षण। कृतापि वा। **दर्शये**दिति सम्बन्ध.।

यदा वाधिश्रयणादिक्रियाया कर्तृस्थायाम्पचिर्वर्त्तते। तत्रैव च घञ् प्रत्ययस्तदा पाचकत्वशब्देन क्रियाकारकयो. स[5]म्बन्ध समवायोभिधीयत इति पाचकत्वशब्देन समानार्थ पाकशब्द·। द्वावप्येतौ प्रतिक्षिप्तभेदान्तरमपाचकव्यवच्छिन्नमर्थ प्रतिपादयत.। यदा तु कर्मस्थैव क्रिया विक्लृत्ति पचेरर्थस्तदा पाचकत्वशब्दस्य कथ सम्बन्धाभिधायित्व। पाचकत्वपाकयोर्भिन्नार्थत्वात्। अन्येन वा कृत्तद्धितव्यतिरिक्तेन तिङादिना। **तथाभूतज्ञापनाय**। प्रतिक्षिप्त-

---

[1] Śes-pa-byod-pa-la.

[2] Bcod-pa-ñid-ces.

[3] Ran-gis-byas-pahi-gśuṅ-legs-gzan-gyi.

अर्थान्तरमेव स्यात्। तथाभूतज्ञापनाय[3] शब्दस्य कृतसंकेतत्वात्।

ननु च पाचकस्य पाकक्रियाया न संबंधः। यथोक्तम्।[1] न वै पाकेनान्य एव पाचकः कश्चिद् अभिधीयते। यत् पुनरस्याभिधेयं[4] तदेवाभिधेयम्[2]। तदेव पाचक(त्वे)नाप्यभिधीयते अप्रतिष्ठितैर्मिथ्याविकल्पा ध[1]र्माः॥

भेदान्तरज्ञापनाय स्व[6]य कृतेन समयेन दर्शयेदिति सम्बन्ध.। यथा देवदत्तेन शय्यते पटस्य शुक्लत्वमिति। अत्रापि शायकशब्दस्य य एवार्थ. स एव प्रतिक्षिप्तभेदान्तर.। शय्यत इत्यस्यापि। तथा शुक्ल पट इति य एवाशुक्लव्यवच्छिन्नो प्रतिक्षिप्तभेदान्तरोर्थ. स एव प्रतिक्षिप्तभेदान्तर. पटस्य शुक्ल इत्यस्यापि। **तथाभिधान-**
57b **मात्रेणेति** प्रतिक्षिप्ताप्र[7]तिक्षिप्तभेदान्तरस्यैकधर्मिगतस्य व्यवच्छेदस्याभिधान मात्रेण तदेव वस्त्व**र्थान्तरमेव** परमार्थतो धर्मधर्मिरूपेण विभक्तमेव। न पुन र्भवतीति सम्बन्ध। किङ्कारण (।) तथाभूतस्यैव प्रतिक्षिप्ताप्रतिक्षिप्तभेदान्तर स्यैवैकस्य ज्ञापनाय धर्मधर्मिशब्दस्य कृतसकेतत्वात्।

यद्वा **तथाभिधानमात्रेणेति**। अर्थान्तरभूतधर्माभिधानमात्रेण तद्धर्मस्व[1] रूपम्परमार्थतो**र्थान्तरमेव भवति। तथाभूतस्यैव** भेदान्तरनिरपेक्षस्यैव तस्यैक व्यावृत्तस्य **ज्ञापनाय धर्मशब्दस्य कृतसंकेतत्वात्॥**

ननु चेत्यादि पर.। **सम्बन्ध** उच्यत इति पाकक्रियाया. पाचकस्य च कर्त्तु सम्बन्ध. समवायलक्षण.। तथा हि कृदन्ताद् भावप्रत्यय. सम्बन्धस्याभिधायके दृष्टो यथाह। समासकृत्तद्धितेषु सम्बन्धाभिधानमि[2]ति। कृदन्तश्च पाचक शब्द (।) न पाक एव क्रियात्मक. पाचकत्वशब्देनोच्यते।

एतदुक्तम्भवति (।) अन्यैव कर्त्तृव्यतिरिक्ता क्रियान्यश्च तयोश्च सम्बन्धो न्य एव। ततश्च कर्त्तृस्थक्रियाभिधाने सत्यपि पचतेर्न पाकपाचकत्वशब्दयो स्तुल्यार्थ इति। **न वै पाकेनेत्यादिना** परिहरति। **पाकेन** कर्तृस्थे न वस्तुभूतेन व्यापारेण युक्तो**न्य एव** पाकक्रिया व्यतिरिक्त **पा[3]चक**को नाम कर्त्ता**भिधीयते** पाचकशब्देन (।) यादृशो वर्ण्यते वै शे षि का दिभि क्रिया व्यतिरिक्त स्वतन्त्र कर्ता यत्र क्रियाकारकसम्बन्धो वस्तुभूत स्यात्। तस्य स्वतन्त्रस्य कर्त्तु. क्रिया व्यतिरिक्तस्य निषेत्स्यमानत्वात्। न चेद् व्यतिरिक्ता क्रिया कर्त्ता वा कुतस्स म्बन्धः यस्य भावप्रत्ययेनाभिधानमिति भाव। **यत्पुनरस्ये**ति पाचकशब्दस्या[4] स्याभिधेयमपाचके व्यवच्छिन्नमप्रतिक्षिप्तभेदान्तर वस्तुमात्र**न्तदेव** पाचक

---

[1] Ji-skad-du-brdod-pa-sta-bu.

[2] Bstan-zin.

यथा ज्ञायते क्रिया व्यतिरिक्ता न तत्समवायो वेति।

तेनाऽन्यापोहविषये तद्वत्पक्षोपवर्णनम्।
प्रत्याख्यातं पृथक्त्वे हि स्याद्दोषो जातितद्वतोः ॥६६॥

तद्विशिष्टस्यार्थस्य शब्दैरभिधानादन्यापोहेऽपि तद्वत्पक्षोदितः सर्वः प्रसंगः[6]तुल्यः स्यात् इति यदुक्तं, तदपि अनेन प्रतिव्यूढम्। तत्र हि

शब्दाभिधेयं **पाचकत्वेनाप्यभिधीयत** इत्यध्याहार्यः। तस्यैव प्रतिक्षिप्तभेदान्तरस्याभिधानात्। न तु सम्बन्धोभिधीयते। तस्यासत्त्वात्। तदेव यथोक्तं पाचकशब्दाभिधेय पाकशब्देनापीत्यपिशब्दात्।

अपर व्याख्यान। **न वै पाकेने**ति पाकशब्देनान्यापोहवादिप[5]क्षे **अन्य एव** व्यतिरिक्त. क्रियाश्रयभूतः **पाचको**भिधीयते। यादृशो वर्ण्यते परेण(।)य क्रियाकारकसम्बन्धस्याश्रय. स्यात्। तस्यासिद्धत्वात्(।)किन्त्वपाचकव्यावृत्तिर्भेदान्तरप्रतिक्षेपेणाभिधीयते। तदेवाह। **यत्पुनरि**त्यादि। यदित्यपाचकव्यावृत्तिलक्षण प्रतिक्षिप्तभेदान्तरमभिधेय। **अस्ये**ति पाकशब्दस्यानन्तरमेव दर्शित तदेव पाक[6]शब्दाभिधेयम्पाचकत्वशब्देनाप्यभिधीयते (।) न सम्बन्ध। तस्यासिद्धत्वात्। **अप्रतिष्ठितैरवस्तुबलायातैरत एव मिथ्याविकल्पा**॥

कथम्पुनर्गम्यते क्रिया व्यतिरिक्ता नास्ति तत्समवायो वेत्यत आह। **यथे**त्यादि। **तत्समवायो** वेति क्रियाकारकसमवाय.। यतश्च व्यावृत्तिव्यावृत्तिमतोरभेदस्**तेन** कारणेना**न्यापोहविषयो** जातिमान् शब्दै[7]रभिधीयत इति (।) तद्व- 58a
त्पक्षस्तत्र यो दोष. सोन्यापोहेपि स्यादिति **तद्वत्पक्षोपवर्ण्णनं प्रत्याख्यात**। यस्मात् **पृथक्त्वे हि जातितद्वतो**रभ्युपगम्यमाने **स्यात्** तद्वत्पक्षोदितो **दोषः**।

तद्विशिष्टस्येत्यन्यापोहविशिष्टस्य**र्थस्य शब्दैर**भिधानात् **तद्वत्पक्षोदित** इति तद्वत्पक्षे य उक्त'। यथा किल सामान्यमभिधाय तद्वति वर्त्तमान शब्दोऽस्वतन्त्र स्यात्[1]तश्च शब्दप्रवृत्तिनिमित्तभूतेन सामान्येन वशीकृतस्य शब्दस्य व्यक्तिगतपरस्परभेदानाक्षेपात्तै' सामानाधिकरण्य न स्यात्। उपचरिता च तद्वति शब्दप्रवृत्तिरित्यादिको दोष इत्येव व्यावृत्तिमभिधाय तद्वति वर्त्तमानोस्वतन्त्रो ध्वनिरिति **सर्वः प्रसंगः स्यात्। तदपि** तद्वत्पक्षोपवर्ण्णन्। **अनेने**ति व्यावृत्तिव्यावृत्तिमतोरनन्यत्वेन[2] **प्रतिव्यूढं** प्रत्याख्यात। यस्मात् **तत्र हि** तद्वत्पक्षे। **अर्थान्तरमुपादाये**ति वस्तुभूत सामान्यमुपादायान्यत्रार्थान्तरे तद्वति। साक्षात् सामान्यवतोऽनभिधानादस्वातन्त्र्यं। आदिशब्दादसमानाधिकरण्योपचारदोषपरिग्रहः।

अन्यापोहपक्षे तु व्यावृत्तिव्यावृत्तिमतोरैक्यान्नार्थान्तरमुपादायार्थान्तरे शब्दप्र-

अर्थान्तरमुपादाय प्रवृत्तस्य शब्दस्य स्वातंत्र्याभावादिदोषेण बाधा स्यात
440b **अन्यस्माद् व्यावृत्तिर्हि व्यावृत्तात् नान्या**[7] **द्वयोरेकाभिधानाद्वित्युक्तम्।**

कथमिदानीं एकस्य व्यावृत्तस्य अन्याननुगमात् अन्यव्यावृत्तिः सामान्यम्। तद्बुद्धौ तथा प्रतिभासनात्। न वै किञ्चित् सामान्यम्। शब्दाश्रया बुद्धिरनादिवासनासामर्थ्यात् धर्मानसंसृष्टानपि संसृजन्ती जायते। असदर्थाकारप्रतिभासवशेन सामान्यं सामानाधिकरणं[1] **च व्यवस्थाप्यते। अर्थानां एकस्य भेदाभावात्।**

वृत्तिस्ततो नास्त्यस्वातन्त्र्या (?न्त्र्या) दिदोष इत्याह।[3] **न चेत्यादि। अन्यस्माद्** वस्तुनोर्या व्यावृत्तिः सा **व्यावृत्तान्नान्या।** द्वयोर्धर्मधर्मिवाचिनोः शब्दयोरेकस्य व्यावृत्तिभेदस्याभिधानाद्वित्युक्तमनन्तरमेव।

कथमित्यादि पर.। **इदानीमिति** व्यावृत्तितद्वतोरैक्ये। **एकस्य व्यावृत्तस्य** स्वलक्षणस्याननुगमात्। अर्थान्तरासंसर्गात्। कथन्तस्य स्वलक्षणस्यात्मभूता **व्यावृत्तिः** स्वलक्षणवदनन्वयिनी **सामान्यं** स्यात्।[4] नैव। दृष्टा च सामान्य।

तद्बुद्धावित्यादिना सिद्धान्तवादी। सामान्यबुद्धौ विकल्पिकाया **तथै**काकारेण **प्रतिभासनाद्ये**काकार एव व्यावर्त्यतेनेनेति व्यावृत्ति·। सामान्यमुच्यते। एतदाह (।) न व्यावृत्तेषु स्वलक्षणेष्वात्मभूता व्यावृत्तिरेका सामान्य केवल व्यावृत्तस्वलक्षणानुभवोत्तरकालभावी विकल्प. प्रकृत्या। एककार्येषु भावेष्वेकमाकारमादर्शयन्निवो[5]त्पद्यते। तद्विकल्पवशात् सामान्यमास्थीयते (।) निःसामान्येष्वप्यनेन च साक्षाच्छब्दादिविषयो दर्शितः।

एतदेव स्फुटयन्नाह। **न वै किंचि**दित्यादि। वस्तुभूतमित्यभिप्रायः। कथन्तर्हि सामान्यसामानाधिकरण्यादिव्यवहार इत्याह। **शब्देत्यादि। शब्द आश्रयः** सहकारिकारणत्वेन यस्या. सा विकल्पिका **बुद्धिरनादिवासनासामर्थ्यात्। धर्मानसंसृ**[6]**ष्टानपि संसृजन्ती** एकाकारानिव कुर्वाणा **जायते**। तस्या बुद्धेरेका**कारप्रतिभास**वशेन **सामान्यं**। धर्मद्वययुक्तैकधर्मिप्रतिभासवशेन **सामानाधिकरण्यं च व्यवस्थाप्यते**। अय च सामान्यादिव्यवहारोऽसद्व्यापि व्यवस्थाप्यते। कथमसदर्थ-
58b इत्याह। **अर्थानामित्यादि**। स्वलक्षणाना ससर्गाभावात् सामान्यव्यवहारोऽसदर्थः।[7] **एकस्य च स्वलक्षणस्य भेदाभावात्** सामानाधिकरण्यव्यवहारोसदर्थः।

ननु विरूपतयाऽयं सर्वव्यवहारः प्रवृत्त इति कथमन्यापोहविषय इत्यत आह। **तस्य सर्वस्य** सामान्यादिव्यवहारस्यार्थी· **समाश्रय** इत्यनेन सम्बन्धः। **तत्कार्यन्तच्च-**

---

[1] Czi-mthun-pa-ñid.

तस्य[2] सर्वस्य च समाश्रयः। तत्कार्यकारणतयाऽन्येभ्यो भिद्यमाना अर्था भवन्ति समाश्रयः। शब्दोऽपि अनिष्टाद् व्यावृत्ते प्रवर्त्तयत्यतोऽन्यापोहविषय उक्तः।

तत्र अनपेक्षितबाह्यार्थतत्त्वो बुद्धिप्रतिभास[3]वशाद् एकोऽनेकव्यावृत्तः। शब्दतदनुभवाहितवासनाप्रबोधजन्मभिर्विकल्पैः अध्यवसिततद्भावार्थैः विषयी-

---

कारणमनुरूप येषान्तेषाम्भाव**स्तया**। करणभूतया। **अन्येभ्य** इत्यतत्कार्यकारणेभ्यो **भिद्यमाना अर्थाः** सर्वस्य सामान्या[1]दिव्यवहारस्या**श्रयो भवन्त्यत**: कारणाद् अन्यापोहविषय उक्त· (।) न त्वन्यापोहस्तत्र प्रतिभासते बाह्यस्यैवैकाकारस्य विधिरूपतया प्रतिभासनात्। यस्माच्च निश्चयप्रयुक्त पुरुषमनिष्टपरिहारेणा**निष्टाद् व्यावृत्ते** स्वलक्षणे **प्रवर्त्त**यत्य**तोपि** कारणाद् **अन्यापोहविषय उक्तो** न तु प्रतिभासापेक्षो विधेः प्रतिभासनात्।

तेन यदुच्यते भ ट्टो द्यो त का राभ्या (।)[1] गोशब्दस्यार्थ[2] किम्भावोथाभाव·। यदि भावो कि गौरथागौ·। यदि गौर्नास्ति विवाद। अथागौर्गोशब्दस्यागौरर्थ इति अतिशब्दकौशल। अथाभावस्तदयुक्त। न हि गोशब्दश्रवणादभावे प्रेष्यसप्रतिपत्तिः। शब्दार्थश्च प्रतिपत्त्या प्रतीयते न च गोशब्दादभावं कश्चित्प्रतिपद्यते तथाऽगौर्न भवतीत्ययमपोह· कि गोविषयोथाऽगोविषयः। यदि गोविषय कथं[3] गोर्गव्येवाभाव.। अथागोविषय (।) कथमन्यविषयाद् अपोहाद् अन्यत्र प्रतिपत्ति.। न हि खदिरेच्छिद्यमाने पलाशेच्छिदा भवति। अथा गौर्गवि प्रतिषेधोऽगौर्न भवतीति। केन गोरगोत्वं प्रसक्त यत्प्रतिषिध्यत इति (।)

अपास्त (।) गोविषयत्वाद् गोशब्दस्य केवल कल्पितविषयत्वाद् विवाद। यथा वा गोप्रतिषेधोऽसत्यपि समारोपे तथोक्त प्रागिति यत्किञ्चिदेतत्।[4]

तस्मात् स्थितमेतद्विधिरेव शब्दार्थ इति॥

एतदेव दर्शयन्नाह। **तत्रे**त्यादि। **अनपेक्षित** स्वरूपेण **बाह्यतत्त्वं** येन विकल्पबुद्धिप्रतिभासिना धर्मिणा स तथोक्त। **बुद्धिप्रतिभासवशादेकोनेकव्यावृत्त** इति। अनेकस्माद् व्यावृत्तस्यैकस्य धर्मिण सन्दर्शनेन बुद्धे. प्रतिभासनात्। तद्वशेनैको धर्मी अनेकव्यावृत्तो व्यवस्थाप्यते। यश्चानेकस्माद् व्यावृत्तस्तस्मात् तत्र व्यावृ[5]त्तयो धर्मभेदा. कल्प्यन्त इति भाव। स एव भूतो धर्मी शब्दैर्विषयीक्रियते। तथाभूतविकल्पप्रतिभासजनन्ाय वक्तृभि शब्दस्योच्चारणात्। यतश्चान्यव्यावृत्तो विकल्पप्रतिभास. शब्दैर्विषयीक्रियते। ततो विधिविषयत्व **सिद्ध**मिति भावः।

---

[1] Cf. Ślokavārtika. Apoha Nyāyavārtika 2: 2: 71.

क्रियते। तत्रैव च धर्मधर्मिणावेव व्यवहारः परस्परं तत्त्वान्यत्वा[4]भ्यामवाच्यत्वा-दिति प्रतन्यते।

न हि धर्मिणो धर्मोऽन्यः। अनर्थान्तराभिधानात्। नापि स एव। तद्वा-चिनामिव धर्मवाचिनामपि व्यवच्छेदान्तराक्षेप[5]प्रसंगात्। तथा चेष्टाऽप्रत्या-यनात् संकेतभेदाकरणम्। अवाच्यत्वं धर्मधर्मिणोः शब्दार्थे। वस्तुनि स्वलक्षणे सामान्य[6]लक्षणं अवाच्यं, अविद्यमानत्वात्।

न केवल शब्दैर्विकल्पैरपि विषयीक्रियत इत्याह। **तदनुभवेत्यादि**। तस्य तस्य स्वलक्षणस्यानुभवस्तद[6]नुभवस्तेनाहिता **वासना** शक्तिस्तस्याः **प्रबोधः** कार्योत्पादानुगण्यन्ततो जन्म येषा विकल्पानान्तै**विषयीक्रियत** इति सम्बन्ध.। कि विशिष्टै**रध्यवसिततद्भावार्थै**। अध्यवसितस्तद्भावो बाह्यभावो यस्मिन् विकल्पप्रतिभासे सोध्यसवितत्तद्भाव एव भूतोर्थो विषयो येषाम्विकल्पानान्ते तथा। दृश्यविकल्पावेकीकृत्य प्रवृत्तेरिति यावत्।

59a अध्यवसित[7]तद्भावार्थ इति पाठान्तरन्तुदाध्यवसिततद्भावश्चासावर्थ-श्चेति कर्मधारयः। एकोप्यनेकव्यावृत्तोध्यवसिततद्भावार्थ इति सम्बन्ध.। तस्माद् बुद्धिप्रतिभासवशात्। सामान्यादिव्यवहार। **तत्रैव च** बुद्धिप्रतिभासे-ऽयमिति भेदान्तरप्रतिक्षेपाप्रतिक्षेपलक्षणे। व्यवह्रियत इति व्यवहार. कर्म-साधनः। **धर्मधर्मिणावेव व्यवहारः**।

एतदुक्तम्भवति (।) बुद्धिप्र[1]तिभासे यौ धर्मधर्मिणो व्यवस्थाप्येते। तौ **परस्परन्तत्त्वान्यत्वाभ्यामवाच्यादिति प्रतन्यते** (।) परमार्थतस्तेन पारमार्थिक-धर्मधर्मितत्त्वान्यत्वपक्षे यो दोष· प्रमाणान्तरादिवैयर्थ्य स्वातन्त्र्यादिलक्षण उक्त. स इह न भवतीत्युक्तम्भवति।

तत्त्वान्यत्वपक्षयोर्दोषान्तरमप्याह। **न हीत्यादि**। **धर्मिणः** सकाशान्नान्यो-**धर्मः**। किङ्कारणम् (।) **अनर्थान्तराभिधा[2]नात्**। धर्मधर्मिशब्दाभ्यामेकस्मादेव व्यवच्छिन्नस्याभिधानात्। **नापि** य एव धर्मी **स एव** धर्म.। कस्मात्। **तद्वाचिना-मिव**। धर्मिवाचिनामिव शब्दाना। **धर्मवाचिनामपि व्यवच्छेदान्तराक्षेपप्रसं-गात्। तथा चेष्टाप्रत्यायनात्**। धर्मशब्देनेष्टस्य प्रतिक्षिप्तभेदान्तरस्य भेदस्या-प्रत्यायनात्। **संकेतभेदाकरणं**। प्रतिक्षिप्तभेदान्तर व्यवच्छेद प्रत्याय[3]यति धर्मशब्द इत्यस्य सकेतभेदस्याकरण। एतदनन्तरोक्तन्तत्त्वान्यत्त्वाभ्या**मवाच्यत्वं धर्मधर्मिणोः शब्दार्थे** बुद्धिप्रतिभासिन्यर्थे उक्तं। **वस्तुनीति** बाह्यस्वलक्षणे। **अविद्यमानत्वादेव** तत्त्वान्यत्त्वाभ्या**मवाच्यं** यथाप्रतिभासन्तु शब्दादिविषयो व्यव-स्थाप्यते।

ननु च धर्मधर्मिणोरभेदे भेदे च षष्ठ्यादिर्विभक्तिर्दृष्टा तत्र बहुषु धर्मेषु दृष्टो वचनभेद एकस्मिन् धर्मिणि[7] न युक्तः। 441a

उक्तमत्र। न वै शब्दानां स्वभावायत्ततेति।

अपि च।

येषां वस्तुवशा वाचो न विवक्षापराश्रयाः।
षष्ठीवचनभेदादि चोद्यं तान प्रति युक्तिमत् ॥६७॥

यदि एते क्वचिद् प्रणिनीषिता वस्तुप्रतिबन्धात् धूमादिवत् न हि पुरुषैर्नियोक्तुं पार्यते। तदा कथं षष्ठ्यादय इत्युपालम्भः स्यात्॥

यदा पुनः।[2]

यद्यथा वाचकत्वेन वक्तृभिर्विनियम्यते।
अनपेक्षितबाह्यार्थन्तत्तथा वाचकं वचः ॥६८॥

ननु चेत्यादि परः। दृष्टा प्रयोगेषूपलब्धा। गोर्गोत्वमिति **षष्ठी**। **आदि**शब्दाद् गवि व्यवस्थि[4]त गोत्व। गोत्वेन निमित्तेन गवि गोशब्दो वर्त्तत इत्यादि विभक्तिपरिग्रह.। गोत्वद्रव्यत्वादीना च धर्माणा बहुत्वात्। **तत्र बहुषु धर्मेषु**। गोत्वद्रव्यत्वपार्थिवत्वानीति **दृष्टो** यो **वचनभेदः** स न स्याद् (।) **धर्मधर्मिणोरभेदे** पारमार्थिकभेदाभावे धर्माणा च परस्पररम्(।)

उक्तमत्रेति सिद्धान्तवादी। **न वै श ब्दानां** काचिद् विषयस्वभावायत्ता वृत्तिरित्यादिनोक्तत्वात्[5]॥

भूयश्चाधिकार्थविधानेन प्रतिपादयितुमाह। **अपि चेत्यादि**। **येषां** वादिना **वस्तुवशा वाचो** वस्त्वायत्ताः। **न विवक्षापराश्रयाः**। विवक्षैव परः प्रधानमाश्रयो यासा वाचान्ता विवक्षापराश्रया षष्ठी न स्याद् वचनभेदादयश्च न स्युरित्येव षष्ठीवचनभेदादिषु चोद्य **षष्ठीवचनभेदादि चोद्यं**। आदिशब्दात्। गोर्भावो गोत्वमित्यादि। त[6]द्धितप्रत्ययाभावचोद्य। **तान्** वस्तुवादिन **प्रति**। **युक्तिमत्**। **एते** शब्दा. षष्ठ्यादय **क्वचिदिति** वस्त्वभेदेपि **प्रणिनीषिताः** प्रणेतुमिष्टा.। **वस्तुप्रतिबन्धात्**। वस्त्वायत्तत्वात्। **धूमादिवत्**। **न ह्यग्निप्रतिबद्धो धूमो** वह्निप्रत्यायनसमर्थस्तद्वैपरीत्येन जलप्रत्यायने **नियोक्तुं पार्यते**। **तदा** वस्तुप्रतिबद्धत्वे शब्दानामयमुपालम्भः स्यादसति[7]व्यतिरेके **कथं षष्ठ्यादय इति** ॥ 59b

एतदेव नास्तीत्याह। **यदा पुनरित्यादि**। **यद्** वचो **यथा** येन प्रकारेण भेदस्याभेदस्य वा प्रतिपादनाय। कि विशिष्टमनपेक्षितबाह्यार्थं **वाचकत्वेन** रूपेण **वक्तृ**-

न हि 'व्यतिरेके षष्ठी' 'बाहुल्ये कर्त्रा दि' रित्येवमादि। एतदपि पुरुषाभिप्राय-निरपेक्षं[3] वस्तुसन्निधिमात्रेण न स्वयं प्रवृत्तम्। ते तु तत्र तथा प्रयुञ्जत इति ततः तथा प्रतीतिर्भवति। एवमन्यत्रापि तैः कथंचिद् प्रयुक्तास्तथैव प्रतीतिहेतवो भवन्ति। [4]तत्र पुरुषायत्तवृत्तीनां अवस्तुसंदर्शिनां विकल्पप्रबोधहेतूभूतानां शब्दानां यथाभ्यासं वाच्येषु प्रवृत्तिचिन्ता। तद्वशाद् वस्तुव्यवस्थानं[5] जाड्यख्यापनमेव केवलम्।

धर्मधर्म्यादिषु व्यावृत्तिदेन तथाकृतव्यवस्याः शब्दा न पुनर्वास्तवादैवति

भिर्विनियम्यते। तत्तथेति तद्वचनं यथायोगं **वाचकं।**

तद्व्याचष्टे। (।) **न हीत्यादि। व्यतिरेके** वस्तुभेदे सति **षष्ठी**विभक्ति**र्बाहुल्ये** जसादयो बहुवचनप्रत्य[1]या भवन्तीति वै या क र णा नां व्यवस्थान**मेतदपि पुरुषाभिप्रायनिरपेक्षम्वस्तुसन्निधिमात्रेण न स्वयं प्रवृत्तं।** सकेतबलेनैव प्रवृत्तमिति यावत्। एतदेवाह। **ते तु तत्रेत्यादि।** ते तु वैयाकरणादयस्तत्र व्यतिरेके बाहुल्ये च **तथेति।** षष्ठी बहुवचनं च यथासंकेत **प्रयुञ्जत इति** कृत्वा **ततः** षष्ठ्यादेस्**तथा प्रतीतिर्भ**वति। व्यतिरेकादिप्रतीतिर[2]न्येषामपि भवति। तथाभूतव्यवहारोपलम्भात्। न तु तावता वस्तुबलेन व्यतिरेकबाहुल्ये च षष्ठ्यादीनां नियम·। **एवमन्यत्रापीति।** धर्मधर्मिणोरव्यतिरेकेपि एकत्वे च वस्तुनः कृत कत्वानित्यत्वादीनां **कथंचि**दिति भेदान्तरप्रतिक्षेपाप्रतिक्षेपलक्षण धर्मधर्मिणोर्भेदमुपादाय। कृतकत्वादिषु व्यावृत्ति-भेदोपलक्षितनानात्वमुपा[3]दाय। यथाक्रम षष्ठी बहुवचनादयस्ते प्रयोक्तृभि· **प्रयुक्तास्तथैव** यथायोगं **प्रतीतिहेतवो भवन्ति।** तत्रैवमिच्छामात्रनिबन्धनत्वे शब्दानां स्थिते सति। **पुरुषायत्तवृत्तीना**न्तदिच्छावशेन प्रवृत्तेरवस्तुसन्दर्शिनां **शब्देभ्यः** स्वलक्षणस्याप्रतिभासनात्। **यथाभ्यासं** यस्य यथा संकेताभ्यासस्तथा **विकल्प-प्रबोधो** विकल्पोदयस्त[4]स्य **हेतू**ना। सकेतानुरूपस्य श्रोतृसन्ताने विकल्पस्य कारणा-नामित्यर्थ·। एवं **भूतानां शब्दानां वाच्येष्व**र्थेषु येय**म्प्रवृत्तिचिन्ता** व्यतिरेके षष्ठ्यादय इत्यादिका। नै या यि का दीनान्तद्वशादिति शब्दवशाद् **वस्तुव्यवस्थानं।** व्यति-रिक्तस्य वस्तुनोऽङ्गीकरणं। गोर्गोत्वमिति यस्मात् षष्ठी तस्मात् सामान्य व्यति-रिक्तमित्यादि। **जाड्यख्यापनं**[5] शब्दार्थव्यवस्थाऽनभिज्ञत्वख्यापनमेव **केवलं।**

तथेत्यादि पर। **तथाकृतव्यवस्था धर्मधर्म्यादिष्विति** धर्मे धर्मिणि च भेदा-न्तरप्रतिक्षेपाप्रतिक्षेपाभ्यां धर्मधर्मिशब्दा कृतव्यवस्था·। आदिशब्दाद् द्रव्यत्व-पार्थिवत्वानीत्यादिबहुवचनशब्दा **व्यावृत्तिभेदेन** कृतव्यवस्थाः। **न पुनर्वास्तवा-देव** धर्मधर्मिणोर्व्यतिरेकात् षष्ठीवस्तुभेदा[6]द् द्रव्यत्वादीना धर्माणा परमार्थत-एव भेदाद्बहुवचनमिति। **कुत एतत्** (।) **तथेत्यादि** प्रतिवचनं। **तथा व्यवहारा-**

कृत एतत्। तथा व्यवहारायोगात्॥

न हि धर्मधर्मिणोः भेदे तद् रूपत्वे च शब्दानां यथावस्तु प्रवृत्तौ सामान्य-तत्सम्बन्धसामानाधिकरण्य[1] विशेषविशेष्यभावा युज्यन्त इति वक्ष्यामः।[7] यस्य शब्दप्रवृत्तिभेदः सर्वत्र वस्तुकृत एवेष्टः। तस्य— 441b

दाराः षण्णगरीत्यादौ भेदाभेदव्यवस्थितेः।
खस्य स्वभावः खत्वं चेत्यत्र वा किं निबन्धनं॥६९॥

यदा[1] एकस्या अपि स्त्रिय दारा एकस्या अपि बालुकायाः सिकता इति व्यव-

---

योगादिति। व्यवहारविषययोर्धर्मधर्मिणोर्वास्तवे व्यतिरेके। धर्माणा च परस्पर परपरमार्थतो भेदे सामान्यादिव्यवहारायोगात्।

एतदेवग्रहणकवाक्य **न हीत्यादिना** व्याचष्टे। व्यवहारविषययोर्धर्मधर्मिणो-र्वस्तुत्वे परस्पर[7] तत्त्वमन्यत्व वाभ्युपगन्तव्य वस्तुन. प्रकारान्तराभावादिति 60a
द्वयमुपन्यस्त। **भेदे तत्त्वरूपत्वे चेति** पक्षद्वयेपि दोषोद्भावनार्थमन्यथा परेण व्यति-रेकवस्तुभेदादिति भेदपक्षेऽवलम्बिते तत्त्वपक्षोपन्यासो न प्रकरणानुरूप स्यात्। तत्सम्बद्ध इति सामान्यतद्वतो सम्बन्ध। **शब्दानाम्वा यथावस्तु प्रवृत्तावभ्यु-गम्यमानाया सामान्यादयो यु[1]ज्यन्ते। एतच्चान्तरमेव वक्ष्यामः। वस्तुकृत-**मिति वस्तूनामेकानेकत्वादिक **शब्दप्रवृत्तिभेदमेकवचनबहुवचनादीना** प्रवृत्ति-भेदं। दाराः शब्दो नित्यबहुवचनान्त, पुल्लिङ्गश्चेष्यते। यत्र यदैकस्त्रीविषयो **दारा** इति शब्दस्तदा भेदव्यवस्थिते। **षण्णगरीति** बहूनान्नगराणामेकवचनेना-**भिधानादभेदव्यवस्थितेः** किन्निबन्धन (।) बाह्य[2] नैव किंचित्। **आदिशब्दात्मिकता** प्रासादमालेत्यादौ भेदाभेदव्यवस्थिते। **खस्य स्वभावः खत्वं चेति** खस्य स्वभाव **इत्यत्र** व्यतिरेकषष्ठ्याः **किन्निबन्धनं**। अथ तत्त्वमित्यनेनोक्तेन किं यदि खस्य स्वभाव इत्यस्य वाक्यस्य खत्वमितीयन्तद्धितवृत्तिर्भवतीत्येतत्कथ्यते तन्नास्ति। न हि स्वभाव इत्यस्मिन्नर्थे भावप्रत्यय· किन्तर्हि भावार्थ[3]। न च तद्धितवृत्तिप्रदर्शनेन किञ्चित् प्रयोजनमस्त्यन्यतरेण व्यतिरेकप्रदर्शनात्।

अत्रैके वृत्तिवाक्याभ्यां सर्वो व्यवहारो व्याप्त इति तद्द्वयाप्तिप्रदर्शनार्थं द्वय-मुक्तमिति।

अन्येऽन्यथा व्याचक्षते। खस्य स्वभाव इति व्यतिरेके किन्निबन्धन। तथा खत्वमिति व्यतिरेकाभिधायिनो भावप्रत्ययस्य किन्निबन्धनमिति।

---

[1] Gzi-mthun-pa-ñid.

हारनिबन्धनं[1] **येन एवंभूतस्य बहुत्वं कथं भवति, शक्तिभेदादिति चेत्। सर्वत्र एकवचनविलोपः**[2] **नानाशक्तित्वात्। (एवं) यत्नश्च व्यर्थः स्यात्। वस्त्वभेदाद् अन्यत्र एकवचनमिति चेत्। इ**[2]**हापि स्यात्। तस्माद् अयं नियमो निर्वस्तुकः क्रियमाणः शब्दप्रयोगे**[3] **इच्छास्वातंत्र्यं ख्यापयति। षण्णगरीति कथं**[4] **बहुषु एकवचनं स्यात्। न हि नगराण्येव किंचित्। कुतस्तेषां समाहार एव। प्रासादपुरुषादीनां विजातीया**[4]**नां अनारम्भात्। तेषां समस्तानां विश्लिष्टानां द्रव्यं**[4] **असंयोगाच्च।**

यदेत्यादिना व्याचष्टे[4]। यदा यस्मिन् काले। यच्छब्दमन्ये पठन्ति यस्मादित्यर्थं। **येनैवम्भवतीति** दारा इत्यादि बहुवचनम्भवति। एकत्वादेकवचनमेव प्राप्नोतीति भाव। **एकस्या अपि स्त्रियः सिकतानां च** बहव्य. शक्तयस्तत. **शक्तिभेदो** बहुवचनकारणमिति। **सर्वत्रेति** यत्राप्येकवचनमिष्टम्वृक्ष इत्यादौ। एकशक्तेरर्थस्याभावात्। सर्वस्य ना[5]**ना शक्तित्वात्। एवं** सत्येक**स्मिन्नेकवचन**[5]मित्ययं **यत्नश्च व्यर्थः स्यात्।** सत्यपि शक्तिभेदे **वस्त्वभेदात्।** शक्त्याश्रयस्याभेदात्। अन्यत्रैकवचनविषयेर्थे वृक्ष. पट इत्यादावे**कवचनमिति चेत्। इहापि** दारादावेकवचनमेकस्या स्त्रिया वस्त्वभेदात्। यत एव न वस्त्वशक्त्याश्रयो वा शब्दप्रवृत्तिभेद। **तस्मादय** श[6]ब्दप्रवृत्ति**नियमो निर्वस्तुको** बाह्यवस्त्वनाश्रय **क्रियमाणः** पुरुषे**च्छायाः स्वातन्त्र्यं शब्दप्रयोगे ख्यापयति।**

षण्णा नगराणा समाहार क्रियात्मको गुणात्मको वा। एकोस्ति तत एकवचनमिति चेदाह। **न हि नगराण्येव किंचिदिति** नगरावयविद्रव्यस्यानभ्युपगमात्
60b **कुतस्तेषान्नगराणा समाहारः** क्रियात्मको गुणात्मको वा[7] यत एवमभिधीयेत क्रियागुणयोर्द्रव्याश्रितत्वात्। कि पुनर्द्रव्यमित्याह। **प्रासादेत्यादि।** गृहादिसमुदायो नगर। **विजातीयाना** च प्रासादीदाना द्रव्या**रम्भानभ्युपगमात्** कुतस्तत्समुदाय प्रासादादिसमुदायो नगर द्रव्य स्यात्। यावता प्रासादतोरणपुरुषादीना समुदायो नगरमिष्यते। **तेषां** प्रासादादीना समस्ताना**मसंयोगाच्च** कारणान्न[1]गरन्**द्रव्यं**। सयोगसहायाना द्रव्याणा द्रव्यारम्भकत्वमिष्यते। **न** प्रासादपुरुषकुड्यादीना विश्लिष्टाना **संयोगोस्ति।** येन प्रासादादिजन्य नगरन्द्रव्य स्यात्।

स्यान्मत (।) यद्यपि साकल्येन प्रासादादीना नास्ति सयोगस्तथापि येषा तावत् प्रासादपुरुषादीना परस्पर सयोगस्तत्सयोगात्मक नगरम्भविष्यत्येवमपि

---

[1] Ḥdogs-par. 2. Ñams-pa-yin-te. [3] Jı-ltar.
[4] Spyı-lta-zıg-rjas. pa. la. yin. te.
[5] Pāninı 1: 4: 22.

न संयोगः। प्रासादः स्वयमेव संयोगस्वभावः परेणासंयोगाच्च। तत एव संख्या-[5]**भावः, तत्संयोगेन पुरुषैश्च विशिष्टा सत्ता हि नगरमिति चेत्, किमस्या निरतिशयाया**[1] **विशेषणम्। सत्तायाश्चैकत्वात्। नगरबहुत्वेऽपि नगराणीति बहुवचनं**[6] **न स्यात्। द्वयस्य परस्परसहिततेति चेत्। अनुपकार्योपकारयोः**[2]**क**

वस्तुत्वं नगरस्यासिद्ध सयो[2]गस्य गुणपदार्थत्वादित्यत आह। **न संयोग** इत्यादि। न संयोगस्वभावन्नगर। तथा काष्ठेष्टकादीनाम्विजातीयाना कार्यद्रव्यानारम्भात् प्रासादोपि न द्रव्यात्मक· किन्तु **संयोगस्वभाव** इष्यते (।) संयोगश्च गुणो निर्गुणाश्च गुणा इति कुत· प्रासादस्य सयोगो येन तत्संयोगात्मक नगर स्यात्।

एतदेवाह। **प्रासादस्येत्यादि। परेणे**[3]**त्यर्थान्तिरेणासंयोगाच्च** न सयोगो नगर। **च**कारेणानन्तरनिर्दिष्टात् प्रासादादीना विश्लिष्टानामसयोगाच्च न संयोगो नगरमित्येतत् समुच्चीयते। तदेव प्रासादादीनामुभयथा सयोगाभावेन। नगरस्य सयोगस्वभावता निरस्ता।

प्रासादादीना या सख्या तदात्मक नगरम्भविष्यतीति चेदाह। **तत एव संख्याभाव** इति। यस्मात् स[4]योगात्मकप्रासादस्तत एव कारणात् प्रासादस्य सख्याया अभावो निर्गुणत्वाद् गुणाना। सख्यापि हि गुणस्वभावा। स चासौ सयोगश्च तत्सयोग। प्रासादात्मकः सयोग इत्यर्थ.। **तत्संयोगेन पुरुषैश्च** विशिष्टा या **सत्ता** सा **नगरमिति चेत्। किमस्याः सत्तायाः एकत्वान्नित्यत्वाच्च निरति-शयाया विशेषणं**। न हि प्रासादपुरुषादय[5]स्सत्ता विशिषन्ति। अनाधेयातिशय-त्वात्। तस्मात् सत्ता निर्विशेषणा। तस्या नगरत्वे सर्वत्र नगरत्व स्यादित्यभि-प्राय·। **सत्तायाश्चैकत्वा**दिति। द्रव्यगुणकर्मस्वेकैव सत्ता व्यापिनी। **नगरबहुत्वेपि** नगरव्यवस्थाश्रयाणा प्रासादादिसमुदायाना बहुत्वेपीत्यर्थ.। अन्यथा सत्तात्मके नगरे प्रकृते नगरबहुत्व कथ स्यात्। **द्वय**[6]**स्येति** प्रासादपुरुषादेः सत्तायाश्च या **परस्परसहितता** सा **नगरमिति चेत्**। एवं हि सति न सर्वत्र नगरबुद्धि.। प्रासादादीना सर्वत्राभावात्। प्रासादादिबहुत्वाद् बहुवचन च सिद्धमिति परो मन्यते।

उत्तरमाह। **अनुपकार्येत्यादि। अनुपकार्योपकारकयोः** सत्ताप्रासादयोः **कस्सहायीभावः**(।) तथा हि द्विविधः स[7]हकारार्थ· परस्परातिशयाधानेन सन्ताने 61a विशिष्टक्षणोत्पादनलक्षण.। पूर्वस्वहेतोरेव समर्थानामुत्पन्नानामेककार्यक्रिया-

---

[1] Bogs-dbyan-du-med-pa. [2] Phan-par-bya-ba-dan-phan-par-byed-pa-po ma-yin-pa.dag-la.=**उपकार्यानुपकारकयोः**

442a **सहायीभावः। पुरुषसंयोगसत्तानां बहुत्वात् कथं नगरमिति[7] एकवचनं स्यात्। तथाभूतानां क्वचिदर्थे ऽभिन्ना शक्तिः सा निमित्तमिति चेत्। न। शक्तेर्वस्तुस्वरूपाव्यतिरेकात्[1]।**

अथ[1] व्यतिरिक्ताया अपि अनुपकारोऽपारतंत्र्यात्। शक्तेरुपकारे वा शक्त्युपकारिण्याः शक्तेरपि व्यतिरेकेऽनवस्थानात् अप्रतिपत्तिः[2]। तदव्यतिरेके वा आद्यायां प्रसंग इति यत्किञ्चिदेतत्[3]। खस्य स्वभावः खत्वमिति व्यतिरेकाश्रया

लक्षणश्च। न तावत्पूर्व. सत्ताया अनाधेयातिशयत्वात्। नापि द्वितीयो यस्माद् यथा सत्ता केवला नगरबुद्धिजनन प्रत्यसमर्था तथा प्रासादादिसहितापि सामर्थ्ये वा केवलापि जनयेत्। यदि च द्वयस्य परस्पर[1]सहितता नगर। तदैकमपि नगरमनेकात्मक प्रासादाद्यात्मकत्वात्। तत. **पुरुषसंयोगसत्तानाम्बहुत्वात्। नगरमित्येकवचनं स्यात्**। सयोगशब्देन प्रासादात्मक सयोग उक्तः। **तथाभूतानामिति** परस्परसहितानां पुरुषसयोगसत्तानां **क्वचिदर्थ** इति नगरमिति विज्ञाने। शब्दे च निष्पाद्ये। **अभिन्नैका शक्तिरस्ति**।[2] **सेत्यभिन्ना शक्तिर्निमित्तमेकवचनस्येति चेत्। न**। किं कारण (।) **शक्तेर्वस्तु स्वरूपाव्यतिरेकात्**। पुरुषादिभ्यो वस्तुरूपेभ्योऽव्यतिरेकात्। तद्वदेवानेकत्वमिति कुतस्तदाश्रयमेकवचन। वस्तुस्वरूपाद् व्यतिरेके वा शक्तेरभ्युपम्यमगाने पुरुषसयोगसत्ताभिरनुपकार्यस्य शक्तिरूपस्य पुरुषादिपारतन्त्र्यन्न स्यात्। ततश्च पुरुषादी[3]ना शक्तिरिति सम्बन्धो न स्यादिति भाव·।

अथ व्यतिरिक्ताया अपि शक्ते पुरुषादिपारतन्त्र्यसिद्धचर्थ पुरुषादिकृत **उपकार** इष्यते। **तदा शक्तेरुपकारे** वा पुरुषादिकृते इष्यमाणे। यया शक्त्या पुरुषादय· प्रथम शक्तिमुपकुर्वते। तस्या प्रथमशक्त्युपकारिण्या अपि शक्ते **शक्तेर्व्यतिरेकेनवस्था** स्यादव्यतिरेके **वा। आद्यायाम[4]प्येकवचननिबन्धनत्वेनेष्टाया** शक्तावव्यतिरेक**प्रसंगः**। अव्यतिरेके च वस्तुवदेव बाहुल्यमिति **तदवस्थो बहुषु बहुवचन[4]** प्रसग इति **यत्किञ्चिदेतत्**(।)शक्तिपरिकल्पने **खस्य स्वभाव** इति **व्यतिरेकाश्रया षष्ठी** न स्यात्। षष्ठीकारणत्वाद् भावप्रत्ययोप्युपचारात् षष्ठीशब्देनोक्त.। तेनायमपरोर्थ **खत्वमिति** व्यतिरेका[5]श्रया तद्धितोत्पत्तिर्न **स्यादिति** खस्य स्वभावः खत्वमित्यनया व्युत्पत्त्या भावप्रत्ययस्योत्पत्तेर्व्यतिरेकाश्रयत्व।

अथवा यथायोग सम्बन्धो ग्रन्थच्छेदश्च कार्य. (।) **खत्वमिति व्यतिरेकाश्रया**

---

[1] Bam-po-gsum-pa.=**तृतीयमाह्निकम्**
[2] Rtogs-pa-med.
[3] De-ni-gyi-ro.
[4] Pāṇini 1: 4: 21.

षष्ठी च न स्यात्, न तत्र सामान्यम्। नापि विभुत्वादयो गुणाः तथोच्यते। अर्थान्तरस्य तत्स्वभाव[3]त्वायोगात्। तेषां च निःस्वभावत्व-प्रसंगात्। तस्यापि अर्थान्तरस्वभावत्वतिमि चेत् अतिप्रसंगः स्यात्। तथाऽपि अप्रतिपत्तिः।

एवं षण्णां पदार्थानां षट्पदार्थवर्गादिष्व[4]पि वाच्याः। न हि तत्र सामान्यं

न स्यात् तद्धितोत्पत्तिरित्यध्याहार। खस्य स्वभाव इति षष्ठी न स्यादिति। न हि खशब्दवाच्याद् अर्थादन्य स्वभावोस्ति भावो वा। यो यथाक्र[6]म व्यतिरेक-षष्ठ्यास्तद्धितस्य वा निबन्धन स्यात्। खत्व नाम सामान्यमस्ति तद्व्यतिरेक-निबन्धनमिति चेदाह। **न तत्रेत्यादि**। एकात्मकत्वात् खस्य नास्मिन् खत्व**सामान्यं** (।) यद्यपि सत्त्वं द्रव्यत्व चाकाशेस्ति। तथापि न तत् खस्य स्वभाव। घटादि-साधारणत्वात्। नापि सत्त्वद्रव्यत्वे खत्वमित्यत्र भावप्रत्ययस्य निबन्धन। तयो
श (?) शब्द[7]प्रत्ययाकारणत्वात्। स्वानुरूपज्ञानाभिधाननिबन्धनस्वभावप्रत्ययस्य 61b
कारणमिष्ट। **नापि विभुत्वादयो गुणा** इति। आदिशब्दादेकत्वपरत्वादिपरिग्रह.। तथोच्यत इति खस्य स्वभाव इति। द्रव्या**दर्थान्तरस्य** विभुत्वादेर्गुणस्य **तत्स्वभाव-त्वायोगाद्** आकाशस्वभावत्वायोगात्। न ह्यर्थान्तरमर्थान्तरस्य स्वभावो युक्त। यदि च विभुत्वादय आकाश[1]स्वभावा·। तदा **तेषां च** विभुत्वादीनामाकाशस्वभावत्वे **निःस्वभावत्वप्रसंगात्**। तथा हि यस्तेषा गुणस्वभावः सत्याकाशमेव जात न **चा**परस्वभावोस्तीति नि स्वभावता स्यात्। तेषा च नि स्वभावत्वे आकाशस्य व्यतिरिक्त. स्वभावो न स्यादिति भाव। विभुत्वादे**रप्यर्थान्तरस्वभावत्वमिति चेदाह। तस्यापीत्यादि। तस्ये**ति विभुत्वादे**रर्थान्तरं स्वभा**[2]वोऽस्येति विग्रह। **अतिप्रसंग** इति यत्तदर्थान्तर विभत्वादे स्वभावत्वेनेष्टन्तस्याप्यर्थान्तरस्व-भावत्वेन भाव्य। अन्यथा तस्यापि विभुत्वाव्यतिरेकात् तद्वदेव नि स्वभावता स्यात्। **तथा** चापरापरस्वभावपरिमार्गणेनानवस्थानादेकस्यापि प्रतिष्ठितस्व-भावस्याभावात्। आद्यस्याकाशस्वभावस्या**प्रतिपत्ति**स्ततश्च स एव व्यतिरेकाभा[3]व इत्यभिप्राय।

एवं "द्रव्यगुणकर्मसामान्यविशेषसमवायाना"[1] **षण्णां पदार्थानां वर्गः। आदि-**शब्दात् प्रासादमालेत्यादयो **वाच्याः**।

कथमसति व्यतिरेके षष्ठीति। **न हि तत्र** षट्पदार्थेषु **सामान्यं सम्भवति**।

---

[1] Vaiśesikasūtra 1: 4.

संख्या संयोगो वा सम्भवति।

कथमिदानीं भेदाभावे खस्य स्वभाव इति न पुनः खमित्येव। खस्य अर्थान्तर-साधारणरूपापरामर्शेन खमिति[5] **शब्दप्रवृत्तिनिबन्धनं रूपं, तथा जिज्ञासाया एव-मुच्यते। न तु सर्वव्यावृत्तरूपानाभिधानात्।**

न तदेव रूपं बुद्धौ समर्प्यते। अतीन्द्रियत्वप्रसंगात्। केवलं अयमेवमभिप्रायः शब्देन श्रोतरि विकल्पप्रतिबिम्बाध्यस्तं असंसृष्टतत्स्वभावं अर्पयति।

यद्वर्गशब्देनोच्यते। द्रव्यगुणकर्मस्वेव सामान्याभ्युपगमात्। तथा **संख्या संयोगो वा न सम्भवति** तयोर्गुणपदार्थत्वेन द्र[4]व्य एव भावात्।

कथमित्यादि परः। **इदानी**मित्यर्थान्तरस्वभावानभ्युपगमे खशब्दवाच्यस्य भावशब्दवाच्यस्य चार्थस्यासत्यनिश्चये कथ **स्वभाव इति** भेदेन निर्देशः। **न पुनः खमित्येव**। भेदनिबन्धाभावादभेदेनैव निर्देशो न्याय्य इत्यर्थ·।

खस्येत्यादिना परिहरति। खस्येति खशब्दवाच्यस्यार्थस्य**ार्थान्तर**स्येति पृथि-[5]व्यादेर्यत्**साधारण रूपम**नुपात्तविशेषान्तरस्य**ापरामर्शेन**। त्यागेन। खशब्द-**प्रवृत्तिनिबन्धनं रूपम**न्यद्व्यासाधारण **तथा जिज्ञासाया** अत्रार्थान्तरासर्ग ····**मेवमुच्यते** खस्य स्वभाव इति। तथा खत्वमिति। यथा गम्येत खस्यायं स्वभावो नान्यस्येति।

अनेन भेदान्तरप्रतिक्षेपेणै**कव्यावृत्तरूपानभिधाना**दन्यदेव व्यतिरेकाभिधाननि-मित्त[6]मुक्तं। तेन घटस्याभाव इत्यादिव्यपदेश. सिद्धो भवति।

अन्ये पुनराहुः। खस्य स्वभाव प्रतिपादयन् स्वभावशब्दो स्वभावव्यावृत्ति-मात्रेण प्रतिपादयति न तु स्वभावान्तराप्रतिक्षेपेण। खशब्दस्तु तमेव रूपान्तरा-प्रतिक्षेपेण। तत· स्वभावान्तरप्रतिक्षेपाप्रतिक्षेपलक्षणेन भेदलेशेन खस्यायं स्वभावः
62a ख(त्व)मि[7]ति भेदेन निर्द्दिश्यत इति तदेतन्नातिश्लिष्ट भेदान्तरप्रतिक्षेपाप्रतिपत्तेः।

अर्थान्तरसाधारणरूपापरामर्शेन खशब्दप्रवृत्तिनिबन्धन रूपमे**वमुच्यत** इति ब्रुवता स्वलक्षणमेव वाच्यमुक्तमिति मत्वा परो ब्रूते इत्यादि। न **तु सर्व** इत्यादि।

नेत्यादि सिद्धान्तवादी। यत् **सर्व**स्माद् **व्यावृत्तं** स्वलक्षणात्मकन्त**देव रूपं शब्दोत्थायां बुद्धौ** शब्दै**: समर्प्यते। ने**ति सम्बन्धः। कस्मा[1]त् तस्य स्वलक्षणस्येन्द्रिय-बुद्धाविव। शाब्दे विज्ञाने प्रत्यवभासने सत्य**मतीन्द्रियत्वप्रसङ्गा**त्। प्रत्यक्षत्वप्रस-ङ्गात्। किन्तर्हि शब्देन क्रियत इति चेदाह। **केवल**मित्यादि। **अय**मिति प्रतिपादकः। दृश्यविकल्पयोरेकत्वाध्यवसायविप्रलब्धस्तथाभूतमसाधारणमर्थं प्रत्याययिष्यामीत्ये-**वमभिप्रायः शब्देन** करणभूतेन **श्रोत**रि यो **विकल्पस्तस्य प्रतिविम्बबाह्य**[2]तयाऽध्य-

यदाह (।) **"अदृष्टार्थे हि**[7] **अर्थविकल्पमात्रं" इति।** 442b

नैवं प्रतिपाद्यप्रतिपादकाभ्यां स्वलक्षणं प्रतिपन्नं प्रतिपादितं वा भवति। स्वर्गादिश्रवणेऽपि तदनुभविनामिव[1] **प्रतिभासाभेदः। तस्मादयं अप्रतिपद्यमानोऽपि भावस्वभावस्तथाभूत एव विकल्पप्रतिबिम्बे तदध्यवसायी सन्तुष्यति। तथाभूतत्वादेव शब्दार्थप्रतीतेः,**[2] **तेनैतदेवमुच्यते (शब्दः।) स्वरूपमाहेति। न पुनः स्वरूपप्रतिभासस्यैव विज्ञानस्य जननात्।**

कथमिदानीं एकान्तव्यावृत्तानां भावानां सामान्यमिति; तेषां असंसर्गाद् अन्यस्य चाभावाद् इति चेत्।

उक्तं कथं सामान्यमिति। असंसृष्टानां एकेनासंसर्गः। स एव तद्व्यतिरेकिणां

स्तमाकारमर्पयति (।) किं भूत**मसंसृष्टतत्स्वभाव**। अगृहीतवस्तुरूप। आचार्यदि ङ् ना ग स्याप्येतदभिमतमित्याह। **यदाहे**त्यादि। अदृष्टार्थे स्वर्गादिशब्दे उच्चरि**तेर्थविकल्पमात्रं** श्रोतुर्भवत्यध्यवसितबाह्यार्थस्वभावो विकल्पो भवति न तु बाह्यस्वरूपग्राहक।

अनेन चा चा र्यै णा पि विध्यर्थ शब्दार्थोऽभिप्रेत इति दर्शयति। **नैवं** विकल्पप्रति[3]**बिम्बे** शब्देन श्रोतरि जनिते **प्रतिपाद्यप्रतिपादकाभ्यां** यथासख्य **स्वलक्षण प्रतिपन्नं प्रतिपादितं वा भवति।**

यदि हि शब्देन स्वलक्षण प्रतिपाद्यते। तदा **स्वर्गादिशब्दश्रवणेपि। तदनुभविनामिव।** स्वर्गादिप्रत्यक्षवेदिनामिव **प्रतिभासाभेदः** स्यात्। श्रोतुरपि स्वर्गादिस्वलक्षणाकारप्रतिपत्ति. स्यात्। यतश्च न शब्दात् स्वलक्षणप्रतिपत्ति**स्त**[4]**स्मादयं** श्रोता शब्दाद**प्रतिपद्यमानोपि भावस्वभावस्तथाभूत** एवासंसृष्टवस्तुस्वभाव एव **विकल्पप्रतिबिम्बे तदध्यवसायी** स्वलक्षणाध्यवसायी स्वलक्षणमेव मया प्रतिपन्नमिति **सन्तुष्यति** (।) कि कारणं (।) **तथा भूतत्वादेव।** स्वलक्षणस्याग्रहेप्यध्यवसितस्वलक्षणरूपत्वादेव शब्दार्थप्रतिपत्ते। यतश्च स्वलक्षणाध्यवसायेन **शब्दार्थस्य प्रतीतिस्ते**[5]**नैतदेवमुच्यते** शब्द· **स्वरूपमाहेति**। अर्थान्तरसाधारणरूपापरामर्शेन खशब्दप्रवृत्तिनिबन्धमसाधारणं रूपमुच्यत इति वचनात्। **न पुनः स्वरूपप्रतिभासस्यैव विज्ञानस्य जननात्।**

तस्मात् स्थितमेतद् विध्यर्थः शब्दार्थोलीकत्वात् परमताद् भेद इति।

कथमित्यादि परः। **एकान्तव्यावृत्तं** रूप येषामिति विग्रह.। **तेषाम्भावानामसंसर्गाद**[6]**न्यस्य चे**ति भावेभ्यो व्यतिरिक्तस्य सामान्यस्य।

उक्तमिति सिद्धान्तवादी। कीदृशमुक्तमित्याह। **असंसृष्टानां** परस्परव्यावृत्ता-

समानतेत्युक्तम् ॥

अपि च।

(पररूपं स्वरूपेण यया संव्रियते धिया।
एकार्थप्रतिभासिन्या भावानाश्रित्य भेदिनः) ॥७०॥

तया संवृतनानार्थाः संवृत्या भेदिनः स्वयम्।
अभेदिन इवाभान्ति भावा रूपेण केनचित् ॥७१॥

तस्या अभिप्रायवशात् सामान्यं सत् प्रकीर्त्तितम्।
(तदसत्परमार्थेन यथा संकल्पितं तथा) ॥७२॥

नामे**केन** विजातीयेना**संसर्गः**। यथा गोव्यक्तीनामेकेनागोस्वभावेनाससर्ग **स एवा**ससर्ग। **तद्व्यतिरेकिणान्तस्मादगोस्वभावाद्** व्यावृत्ताना गोभेदानां **समानता**
62b गोत्व। एवमन्यदपि सामान्यं बोद्धव्यं।[7]

एतदुक्तम्भवति। समानामिति कर्त्तरि षष्ठी तेन समानानाम्भाव सामान्यमिति विजातीयव्यावृत्ता. समानाकारोत्पन्ना भावा सामान्यमित्यर्थं। अस्यैव च सामान्यस्य लिङ्गत्व लिङ्गित्वन्तत्सम्बन्धश्च वस्तुत्वात्। अर्थक्रियाकारित्वाच्च प्रवृत्तिविषयत्वं विकल्पविषयत्व च यथाऽध्यवसाय न तु ज्ञानाकारस्य। एतद्विपरीतत्वात् ॥[1]

तदेव समारोपपक्षे परोक्ष दूषणम्परिहृत्यान्यव्यावृत्तिपक्षे परोक्ष दूषणमन्यव्यावृत्त्यनभ्युपगमादेव निरस्यान्यव्यावृत्ता एव भावा एकत्वेनाध्यवसीयमाना. सामान्यमिति च प्रतिपाद्य बुद्धयाकारेपि सामान्ये परोक्त दूषणमपनेतुमाह। **अपि चेत्यादि। भावान्नाश्रित्य भेदिन** इति व्यावृत्तानि स्वलक्षणम्वाश्रित्य धीरे**कार्थप्रतिभासि**[2]**न्युत्पद्यते**। **यया स्वरूपेण** स्वाकारेणैकेन रूपेण। **पररूपं**। परस्परव्यावृत्त वलक्षण **सम्व्रियते** प्रच्छाद्यते। दिति ।धि। किम्विशिष्टया या (।) **संवृत्या**। सव्रियतेऽनया स्वलक्षणमिति कृत्वा। **सम्वृतनानार्था**(·) स्थगितनानार्था **स्वयम्भेदिनोपि केनचिद् रूपेण** विजातीयव्यावृत्त्युपकल्पितेन गोत्वादिरूपेणा**भेदिन इवाभान्ति** ससृष्ट इव। तेन (।)

"बुद्ध्या[3]कारश्च बुद्धिस्थो नार्थबुद्ध्यन्तरानुग।
नाभिप्रेतार्थकारी च सोपि वाच्यो न तत्वत" इत्यादि निरस्त ॥

तस्माद् बुद्धेरभिप्राय**व**शात्। एकाकाराध्यारोपवशात् **सामान्यंस** केस्न**प्रकीर्तितं**। बुद्ध्यारोपित एवाकार. सामान्यमुक्तमिति यावत्। **यथा** तया **संक-**

बुद्धिविकल्पिका तदन्यव्यतिरेकिणो भावानाश्रित्य उत्पन्ना[6] स्ववासना-

---

ल्पितमारोपितं तथा तत् सामान्यमसत् **परमार्थेन**।

ननु यद्यभिन्न प्रतिभासोऽभ्युपगम्य[4]ते कथ सामान्यमसदित्युच्यते। न (।) व्यक्तिभ्यो भिन्नस्याभिमतस्याभेदेन प्रतिभासनात्। सर्वात्मना चाभेदे व्यक्तिवदनन्वयादनुगतस्य प्रतीतिर्भ्रान्तिरेव। भेदाभेदे च तथैवोभयरूपतया प्रतिभास स्यात् (।) न च यत्र प्रत्यये यदैव गौरिति प्रतिभास तदैव तत्र गोत्वमस्येति प्रतिभासः।

अथ स्याद् (।) यदननुगमे यस्यानुगमस्तत्ततो भिन्न य[5]था नीलादनील। शावलेयाननुगमे च गोत्वस्यानुगमो व्यक्त्यन्तरे (।) तस्मात् ततो भिन्न शावलेयाभिन्नगोत्वग्राहकन्तर्हि प्रत्यक्ष भ्रान्त स्याद् भिन्नस्यान्यप्रमाणगृहीतस्याभेदेन ग्रहणात्। न चैकस्य येनैव रूपेण भेदस्तेनैवाभेदो विरोधात्। नापि वस्तूना विशेषरूपतया भेद। सामान्यरूपतयाऽभेद.। एव हि विशेषाणामेकदेशा[6]दित्व स्यान्न च स्यात्। सामान्यविशेषयोश्च प्रतिभासभेदो न स्यात् सर्वात्मनाऽभिन्नत्वाद्। भेदे वानुगतव्यावृत्तरूपयो परस्परासश्लेषेणैकान्तभिन्नत्वप्रसङ्गात्।

यदि च प्रतिव्यक्ति तदभिन्नन्तदैक सामान्यमस्तीति कुत। न च तत्र प्रथम-
व्यक्तिदर्शनेऽगृहीतमपि द्वितीयादिव्यक्तौ स एवायमिति प्रतीतेरेक[7] सामान्य- 63a
मस्तीति युक्त (।) स इति स्मरणाशस्यानुभूतसामान्यविषयाभावेनोत्पत्त्यसम्भवात्। ततश्च यथा प्रथमव्यक्तौ न गृहीतन्तथा द्वितीयादिव्यक्तावपि प्रत्येक गृहीतमिति कथ स एवायमिति ज्ञानस्योत्पत्ति स्यात्। न च स इति स्मरणान्यथानुपपत्त्या प्रथमव्यक्तौ निर्विकल्पकेनान्येन वा ज्ञानेन सामान्यग्रहणकल्पना युक्ताऽनुगत[1]रूपप्रतिभासाभावात्। नापि धर्मरूपतया तत्रास्य ग्रहण युक्तमनुगतैकरूपत्वात् सामान्यस्य। नापि पूर्वापरव्यक्तिसम्बन्धितयास्य प्रत्यभिज्ञाप्रत्यक्षेण ग्रहणमिति शक्यते वक्तु। इदमेवेत्येव प्रत्यक्षस्योत्पत्तिप्रसगात्। पूर्वव्यक्तेरसन्निहितत्वाच्च सन्निहितार्थनिश्चयलक्षण च प्रत्यक्षमिष्यते।

तस्मादगोव्यावृत्तैकविशेषानुभवपूर्वक[2]मन्यस्मिन्नगोव्यावृत्तेऽनुभूयमाने सति स एवायमित्येकाकारस्य भ्रान्तस्य प्रत्ययस्य वासनासामर्थ्येनोत्पत्तेस्तदेवास्य निमित्त कल्पयितु युक्तन्नान्यद् (।) भ्रान्तत्वाच्च बुद्धेरय सामान्याकारो व्यवस्थाप्यते न वाह्यस्य (।) यथाप्रतिभास तु बाह्यानामेवार्थाना सामान्यमुच्यते।

बुद्धिरित्यादिना कारिकार्थ व्याचष्टे। **बुद्धिविकल्पिकेत्यनेन** सम्बन्धः। तेभ्य.[3] सजातीयेभ्योन्यस्तस्माद् व्यतिरेकः स येषामस्ति। ते **तदन्यव्यतिरेकिणः**। विजातीयव्यावृत्तानित्यर्थ। **स्ववासनाप्रकृति** विकल्प**वासनास्वभावम्भिन्नेष्वभि-**

स्वभावमनुविदधती। एषां भावानामभेदमध्यस्य[1] स्वयमेवाभिन्नाकारं तान् सृजन्ती मिश्रयन्ती संदर्शयति।

443a **सा च एकसाध्यसाधनतयैव[7] अन्येभ्यो विवेकिनां भावानां विकल्पस्य वासना तस्याः। प्रकृतिः तदुद्भवा। सा चेयं एवंप्रतिभासमाना संवृतिः। अनया स्वरूपेण पररूपस्य संवरणात्। ते च संवृतभेदा भिन्नात्मानो[2]ऽपि केन चिद् रूपेणाभिन्ना इव प्रतिभान्ति।**

न्नप्रत्ययजननसामर्थ्यन्तदनुविदधती। अनुकुर्वती। एव हि तया स्वकारणमनुकृतम्भवति (।) यदि भिन्नेष्वप्येकाकारोत्पद्यते। **एषा**मिति पदार्थानां। **अध्यस्ये**ति पदार्थेष्वारोप्य[4] भावानामेवैक रूपमिति। **तान्** भावान् **सृजन्ती**। **अभिन्नानिव** कुर्वाणा **सन्दर्शयति**। एकरूपानिव दर्शयतीति यावद्।

ननु विकल्पस्यानुभूतार्थाहितवासनाबलोत्पत्ताविष्यमाणाया कथ सामान्याकारस्य विकल्पस्योत्पत्ति· सामान्यस्याननुभूतत्वादित्यत आह। **सा चेत्या**दि। एक सदृश साध्य साधनञ्च येषाम्भावानां। य[5]था घटादीनामेकमुदकादिधारणादि साध्य। साधन च मृत्पिण्डादि। ते **एकसाध्यसाधना**स्तद्भाव**स्तया**। करणभूतया। **अन्येभ्योतत्साध्यसाधनेभ्यो विवेकिनां भावानां** सा प्रकृति· स्वभावः भिन्नानामपि प्रकृत्या एकाकारविकल्पजननलैक्षण। तथाभूतस्य **विकल्पस्य** हेतुर्या **वासना**। तस्याश्च सा तादृशी **प्रकृति**र्यदेव स्वरूप पर[6]त्रारोपयन्ती। एषा बुद्धि· प्रतिभाति। व्यक्त्यभिन्नसामान्यग्राहिणी प्रतिभासत इति यावत्।

तेन यदुच्यते।

"स्मार्त्तमेतदभेदेन विज्ञानमिति यो वदेत्।
नूनम्बन्ध्यासुतेप्यस्ति तस्य स्मरणशक्यता (॥)"[3]

इति निरस्त। भिन्नानामेवानुभूतानामेककार्यकर्त्तृत्वेन स्वविषयाभिन्नाकार-
63b प्रत्ययजनने सामर्थ्या[7]दनुभूतस्पष्टाकारस्यार्थस्य स्वविषयोस्पष्टस्मरणजननसामर्थ्यवत्। **तदुद्भवे**ति वर्णविकल्पवासनाया विवेकिभ्य. स्वभावेभ्यो यथासख्य साक्षात् पारम्पर्येण चोद्भवो यस्या सा तथा। **सा चेय**मिति बुद्धि. **संवृति**रित्युच्यते। सम्व्रियतेऽनया बुद्ध्या **स्वरूपेण** स्वप्रतिभासेन **पररूपम्**वस्तुरूपमिति करण[1]साधन क्तिन विधाय। **ते च** भावास्त**ये**ति बुद्ध्या। **संवृतभेदाः** प्रच्छादितनानात्वा। **केनचिद् रूपेणे**ति विकल्पबुद्ध्यारोपितेन। **प्रतिभान्ति** विकल्पबुद्धौ।

---

[1] Mi-snan-bar-byas-nas. [2] Bdag-ñid-kyis-tha-dad-kyan.
[3] Ślokavārtika, **अनुमानपरि०** 160.

तदेषां बुद्धिपरिवर्त्तिनां भावानां आकारविशेषपरिग्रहाद् बहिरिव[1] परिस्फुरतां बुद्धिप्रतिभासं अनुसन्धानैः तेषामेव रूपं सामान्यमुच्यते ॥

कथमिवानीं अन्यापोहः सामान्यं इति चेत्। स एवान्यापोहः। तमेव गृह्णती

तदेषामित्यादि। **बुद्धिप्रतिभासं** विकल्पबुद्ध्याकारं। **अनुरुन्धानैः** पुरुषैस्तद्-**बुद्ध्युपस्थापितमेक रूपं सामान्यमुच्यत** इत्यनेन सम्बन्धः। केषां सामान्यमुच्यते। **बुद्धिपरिव[2]र्त्तिनामेव। एषां** बुद्धिपरिवर्त्तिनामिति सम्बन्धः। स्वलक्षणान्यनुभूय यथानुभवमसौ शुक्लो घट कृष्णोन्यो वेत्येव विकल्पबुद्धिष्वस्पष्टाः घटाकारास्ते बुद्धिपरिवर्त्तिनो भावा ये **तेषा**मेव सामान्य सम्बन्धि। न स्वलक्षणाना सामान्यबुद्धाव-प्रतिभासनादसम्बन्धित्वाच्च। बुद्धिपरिवर्त्तिनामेव विशेषण **बहिरिव परिस्फुरता-मि[3]**ति बहिरिव प्रतिभासमानानामित्यर्थः। बहि.स्फुरणे च कारणमाह। **आकार-विशेषपरिग्रहा**दिति (।)

बाह्यार्थविकल्पसस्थानस्य स्पष्टस्यानुकाराद् बाह्याध्यवसाय इत्येके।

एतच्चायुक्त। न हि सादृश्यनिमित्तो बाह्यत्वारोप इति निवेदितमेतत्। तस्मादाकारविशेषो घटाद्याकारस्तस्य परिग्रहोनुभवस्तस्माद् बहिरिव परिस्फु[4]रणं।

एतदुक्तम्भवति। घटाद्यनुभवाहितवासनासामर्थ्येन विकल्प उत्पद्यमानः स्वाकार बाह्यघटाद्यभेदेनाध्यवस्यति न तु गृह्णाति (।) तेन शब्दविहितेर्थे क्वचित् संशयो भवत्यग्रहणात्। तत्र तु विकल्प स्वहेतुत एव बाह्याभिन्न स्वाकारम(ध्य)वस्यति। न तु सादृश्यात् सदृशस्यार्थस्याभावादग्रहणाच्च।

ननु बुद्धिपरिवर्त्तिनामपि स्वरूपे[5] व्यतिरेकेण कोन्य एव आकार. प्रतिभासते यत्सामान्यं स्यात्।

सत्य। तत्र तावत् केचिदाहुरेकज्ञानाव्यतिरेकादेकत्वन्तेषामिति। अन्ये त्वाहुः प्रत्येकन्तेषा स्वव्यक्त्यपेक्षया सामान्यरूपेति (।) तदेतदुभयमप्ययुक्त-मेकप्रतिभासाभावात्। केवलमेकरूपतया तेषामध्यवसायात् परै. सामान्यमिष्ट-मिति तदभिप्रायादेव[6]मुच्यते। आ चा र्य स्य तु समाना इति प्रतिभासोभिप्रेतो नैक इति तथा च वक्ष्यति।

अथवा(।) अस्तु "प्रतिभासो धियाम्भिन्न समाना इति तद्ग्रहणादि"-(१।१०९)ति। यदि बुद्धिपरिवर्त्तिनामेव विकल्पबुद्धिसन्दर्शितं रूपं सामान्यन्तस्य च विधिरूपत्वात् **कथमिदानीमन्यापोहः सामान्य**मित्युच्यते।

विकल्पानां प्रकृतिविभ्रमात् वस्तुग्राहिणीव प्रतिभाति। सा हि तद[3]न्यविवेकिषु भावेष्वेव भवन्ती विवेकविषयेति गम्यते।

ननु बाह्या विवेकिनः। न च तेषु विकल्पप्रवृत्तिः। कथं तेषु भवतीति। व्याख्यातार[4] एवं विवेचयन्ति न तु व्यवहर्त्तारः। ते तु स्वालम्बनमेव अर्थक्रिया-योग्यं मन्यमानाः विकल्प्यार्थविवेकीकृत्य प्रवर्त्तन्ते। तदभिप्राय[5]वशाद् एवमुच्यते।

---

642 **स एवेति** सिद्धान्तवादी। स एव विकल्पबुद्धि[7]व्यवस्थापितः प्रतिभासमानोऽन्यापोह उच्यते। अन्यविविक्तपदार्थदर्शनद्वारायातत्वात्।

यदि विकल्पाकारः सामान्यं कथं बाह्याना समानरूपतया प्रतीतिः। यदाह(।)

"अथ निर्विषया एता धासनामात्रभावत·।
प्रतिपत्तिः प्रवृत्तिश्च बाह्यार्थेषु कथम्भवेद्" (।)

इत्यत आह। **तमे**वेत्यादि। तमिति विकल्पबुद्धिप्रतिभास **गृह्णती** सा विकल्पिका बु[1]द्धि**र्वस्तुग्राहिणीव प्रतिभाति**। कस्माद् **विकल्पानां प्रकृतिविभ्रमात्** स्वभावेनैव स्वाकाराभेदेनार्थग्रहणविभ्रमात्।

कथन्तर्ह्यपोहविषयेत्युच्यत इत्याह। **सा हि** विकल्पिका बुद्धिरध्यवसायवशात् **तदन्यविवेकिषु भावेषु** स्वलक्षणेषु **भवन्ती विवेकविषयेति गम्यते**। कार्यतो न तु विवेकस्वभावविषयीकरणात्।

परस्त्वविदिताभि[2]प्राय. प्राह। **नन्वित्यादि**। सामान्याद् **बाह्याः** स्वलक्षणानीत्यर्थः। एव हि बाह्याध्यात्मिकाना सग्रह कृतो भवति। **विवेकिनः** परस्परविलक्षणा (।) **न च तेष्ठि**वति स्वलक्षेणेषु (।) **कथन्तेषु विकल्पबुद्धिर्भव**तीत्युच्यते। **व्याख्यातार** इत्यादिना परिहरति। ते हि यथावस्थितम्वस्तु व्यवस्थापयन्त एव**म्विवेचयन्ति**। अन्यो विकल्पबुद्धिप्रतिभासो न्यत्स्व[3]लक्षणमिति। **न व्यवहर्त्तार** एव विवेचयन्ति। **ते तु** व्यवहर्त्तार. **स्वालम्बनमेवे**ति विकल्पप्रतिभासमे**वार्थक्रियायोग्यं** बाह्यस्वलक्षणरूपम्**मन्यमानाः**। एतदेव स्पष्टयति (।) दृश्योर्थ स्वलक्षण**म्विकल्प्योर्थः** सामान्यप्रतिभासस्ता**वेकीकृत्य** स्वलक्षणमेवेदम्विकल्पबुद्ध्या विषयीक्रियते शब्देन चोद्यत इत्येवमधिमुच्यार्थक्रि[4]याकारिण्यर्थे **प्रवर्त्तन्ते**। **तदभिप्रायवशाद्** व्यवहर्त्तृणामभिप्रायवशा**देवमुच्यते** विवेकिषु भावेषु विकल्पबुद्धिर्भवतीति दृश्यविकल्प्यावेकीकृत्य प्रवृत्तेरिति वदता (।) न स्वाकारे बाह्यारोप इत्युक्तम्भवत्यन्यथा स्वाकार एव प्रवृत्तिप्रसङ्गात्। मरीचिकायां जलारोपादिव। नापि बाह्ये स्वाकारारोप.। आरोप्यमाणफलार्थित्वेनैव-प्र[5]वृत्तिप्रसंगात्। जलार्थिन इव जलभ्रान्तौ।

तथा तत्कारितयाऽतत्कारिभ्यो भिन्नान् शब्देन प्रतिपादयन्तीत्युच्यते। तत्त्वचिन्तकास्तु प्रतिभासभेदादिभ्यो नाभेद[6]मनुसन्धत्ते।

यदि प्रतिपत्त्रभिप्रायोऽनुविधीयते, तदाऽन्यापोहोऽपि सामान्यं (मा) भूत्।

ननु दृश्यविल्पयोरेकीकरण किमुच्यते। यदि दृश्यस्य विकल्प्यादभेदः बाह्येर्थे प्रवृत्तिर्न स्यात्। विकल्प्यस्य दृश्यादभेदः स्वलक्षण शब्दार्थः स्यात्। न च दृश्यविकल्प्ययोरेकीकरण प्रत्यक्षेण तस्य विकल्प्याविषयत्वात् (।) नापि विकल्पेन तस्य दृश्याविषयत्वात्। अतीतादौ च दृश्याभा[6]वात् कथन्तयोरेकीकरणं।

अत्रोच्यते। अर्थानुभवे सति तत्सस्कारप्रबोधेन तदाकार उत्पद्यमानो विकल्प· स्वाकारम्बाह्याभिन्नमध्यवस्यति न त्वभिन्न करोति। तेन विकल्पविषयस्य दृश्यात्मतयाध्यवसायाद् दृश्यविकल्पयोरेकीकरणमुच्यते (।) दर्शनार्हो दृश्य शक्यते **वा** द्रष्टुमिति विकल्पकदर्शनस्यापि[7] यो विषयः स दृश्यस्तेनानागतस्याप्यर्थस्या- 64b
गमोपदर्शितस्य दृश्यत्वं सिद्धन्तथाऽभावस्यापि। अत एवाभाव प्रत्यय स्वाकारम्भावरूपमपि पदार्थाभावाव्यतिरेकेणाध्यस्य प्रत्येतीत्यभावविषय उच्यते न त्वभाव गृह्णाति (।) सर्वविकल्पाना निर्विषयत्वात्।

तत्कारितयेत्यादि। न केवलन्तदभिप्रायवशाद् विकल्पबुद्धि स्वलक्षणेषु विवेकेषु भवतीत्युच्यते। **तथा तत्कारितया** करणेना**तत्कारिभ्यो भिन्नानर्थान् शब्देन** वक्तार **प्रतिपादयन्तीत्युच्यते**। व्याख्यातारोपि दृश्यविकल्पयोरैक्य किमिति न प्रतिपद्यन्त इति चेदाह। **प्रतिभासभेदादिभ्य** इति दृश्यस्य हि स्पष्ट प्रतिभासो न विकल्पस्य। विकल्पानुबद्धस्य स्पष्टत्वायोगात्। आदिशब्दान्निरुद्धेपि दृश्ये विकल्पस्यानिरोधात्।[2] अर्थक्रियाया. करणादकरणाच्च। **तत्त्वचिन्तका** न्यायानुसारिण. व्याख्यातार (।) शेषषष्ठी चेयन्तत्त्वस्य चिन्तका इति। तत्त्वस्य ते चिन्तका नातत्त्वस्येति सम्बन्ध्यन्तरव्यवच्छेदमात्रापेक्षाया क्रियाकारकभावस्याविवक्षितत्वात्। (।) चिन्तयतेर्वा पचाद्यजन्तस्य तत्त्वशब्देन षष्ठीसमास कृत्वा स्वार्थिक. कन्प्रत्यय कृत·। ततोत्र **तृजकाभ्या**[1]मित्यादिना षष्ठी[3]समासप्रतिषेधो नाशक्यः। **नाभेदमनुसन्धत्ते**। दृश्यविकल्पयोरिति प्रकृते।

यदीत्यादि चोदकः। **प्रतिपत्त्रभिप्रायोनुविधीयते** बाह्येषु सामान्यव्यवस्थान। **तदाऽन्यापोहोपि सामान्यं मा भूत**। कि कारण (।) **न ह्येव**मिति। अन्यापोह· शब्देन चोद्यत इत्येव व्यवहर्त्तृणा नास्ति **प्रतिपत्तिः**। आ चा र्यो पि तुल्यता

---

[1] Pāṇini. 2: 2: 15.

न ह्येवं प्रतिपत्तिरिति चेत्। न वै केवलं एवमप्रतिपत्तिः व्यक्तिव्यतिरिक्ताव्यति-
443b **रिक्तैक[7]त्वव्यापित्वादि[1]भिराकारैरपि नैव प्रतिपत्तिः। केवलं अभिन्नाकाराया बुद्धेर्य आश्रयः सोऽन्यापोह उच्यते। तस्य वस्तुषु सम्भवात्, अविरोधात्[1] शब्दाश्रयिव्यवहारस्य तथा दर्शनाच्च। यथेयं बुद्धिः प्रतिभाति, ततः न किंचिदपि वस्तुभूतं सामान्यम्॥**

ख्यापयन्नाह। **न वै केव[4]लमि**त्यादि। **एवमप्रतिपत्ति**रित्यन्यापोहरूपेण। त्वया यथा **व्यक्तिव्यतिरिक्तादिभिराकारै**रिष्ट सामान्यन्तथापि **नैव प्रतिपत्तिः**। आश्रयाद् व्यतिरिक्त वै शे षि का दीनामव्यतिरिक्त सा ख्या दी ना मादिशब्दात् प्रत्येकपरिसमाप्तत्वादिपरिग्रहः। तत्र भेदस्तावत्सामान्यस्य न प्रतिभासत एव। इह सामान्यमिति बुद्ध्यनुत्पत्ते:[5] अभेदेपि व्यक्तीनामेव प्रतिभास. स्यान्न सामान्यस्य। भेदाभेदे चोभयपक्षभावी दोष स्यात्। नापि तत्प्रत्येकपरिसमाप्त युज्यते। यत एकव्यक्तावेकसम्बन्ध्येव तत् स्यान्नानेकसम्बन्धि। न चैव सामान्यमनेकसम्बन्धित्वादस्य समानानाम्भाव· सामान्यमिति वचनात्।

अथ व्यक्त्यन्तरेषु तस्य प्रत्यभिज्ञानात् तत्सम्बन्धित्वमेवमपि भू[6]तगुणवदेकमनेकसम्बन्धि स्यान्न प्रत्येकपरिसमाप्त। एकैकस्या व्यक्तावनेकसम्बन्धित्वेनाप्रतीते:। प्रतीतौ वा तत्रानेकव्यक्तिप्रतिभास. स्यात्। अथ व्यक्त्यन्तरालेऽप्रतिभासनात् प्रत्येकपरिसमाप्तन्तदुच्यते। तत्किमेतावता तस्यानेकसम्बन्धित्वमेकत्र सिध्यति। न च सामान्ये प्रत्यभिज्ञान युज्यत इत्यप्युक्त। तस्मान्न तस्य
65a प्र[7]त्येकपरिसमाप्तिर्नापि नित्यत्वमेकत्व व्यापित्व च प्रतिभासत इति स्थित।

यदि वस्तुभूतस्य सामान्यस्यापोहस्य च तुल्य: प्रतिपत्त्यभावो व्यवहारे। कस्तर्ह्यस्या **श्राश्रय** इत्यत आह। **केवल**मित्यादि। स्वलक्षणाना विजातीयरहितत्व**मन्यापोहः** सोऽ**भिन्नाकाराया** बुद्धेर्निमित्तत्वेनो**च्यते**। कि कारण(।)**तस्य** विजातीयविरहलक्षणस्या[1]न्यापोहस्य भिन्नेष्वपि सर्वत्र **वस्तुषु भावात्** तथाभूतस्य चान्यापोहस्य सामान्यबुद्धिहेतुत्वम्प्रत्य**विरोधात्**। तथा हि यथैकम्वृक्षमवृक्षाद् व्यावृत्त पश्यत्येवमन्यमप्यतस्तत्रैकाकारा बुद्धिरुत्पद्यते। न चात्र बाधक प्रमाणमस्ति।

तृतीयकारणमाह। **व्यवहारस्य चे**त्यादि। **तथा दर्शना**दिति। अन्यापोहनिबन्धनत्वेन दर्शनात्। एतच्च तद[2]न्यपरिहारेण प्रवर्त्तते (?त इ)ति च ध्वनिरुच्यत इत्यादिना प्रतिपादयिष्यते। **यथे**त्येकाकारा **इयं** विकल्प**बुद्धिः प्रतिभाति** (।)

---

[1] Gcig-pa-daṅ-khyab-pa-ñid.

यस्माद्—

व्यक्तयो (नानु)यन्त्यन्यदनुयायि न भासते।

न हि व्यक्तयस्ताः परस्परं अन्वा[2]विशन्ति। भेदाभावेन सामान्यस्यैवाभाव-प्रसंगात्। अन्यच्च ताभ्योऽन्यच्च व्यतिरिक्तं, तथा न किंचित् बुद्धौ प्रतिभासते। अप्रतिभासमानं च कथमात्मनाऽन्यं ग्राहयेद् व्यपदेशयेद् वा।

न च एकसम्बन्धत्वात् अपि सामान्यं स्याद् अतिप्रसंगादिति तैरुक्तम्। अभि-

---

तथा बाह्यन्तत्सामान्यन्नास्तीति वाक्यार्थ'। **ततो न वस्तुभूतं सामान्यं** विकल्प-दर्शनाश्रय इत्यभिप्राय.॥

सामान्याभावे च कारणमाह। **यस्मा**दित्यादि। **व्यक्तयः** स्वलक्षणानि। **नानुयन्ति** न मिश्रीभवन्ति। एतेनाव्य[3]तिरिक्तसामान्याभ्युपगमो निरस्तः।

व्यतिरिक्तनिराकरणार्थमाह। **अन्यदनुयायी**ति। अनुयायि यदिष्ट भेदे-भ्योन्यत् सामान्यरूपन्तत्प्रत्यक्षबुद्धौ **न भासते**।

ननु विकल्पप्रतिभासेपि सामान्ये भेदाभेदपक्षयोरयमनन्वयादिदोषस्तुल्य एवेति कथ सामान्यमिष्यते। समानाकारस्तावत् प्रतिभासत एव। यावदसौ न बुध्यते भेदाभेदरहित इति तावदस्याल[4]ङ्कार एवावस्तुत्वप्रतिपादनाद् (।) अत एव यथाप्रतिभास त्वसावस्तीत्युच्यते।

अन्वाविशन्ति मिश्रीभवन्ति। यदि **परस्परम**न्वावेश स्यात्तदैकरूपापत्ते**र्भेदा-भावः**। तेन कारणेन **सामान्यस्यैवाभावप्रसङ्गात्**। तेन भेदाना समानानामेका-कारप्रत्ययनिबन्धनत्व धर्मः **सामान्य**। तद्भेदाभावेन भवेदित्यर्थ.। **अन्यच्चे**ति व्यक्तिभ्य. अन्य[5]दित्यस्य विवरण **व्यतिरिक्त**मिति। **तथा** तेन रूपेण **सामान्यबुद्धौ-**(।)अनेनोपलब्धिलक्षणप्राप्तस्य सामान्यस्याभावव्यवहारे साध्ये स्वभावानुपलम्भ उक्त.। न चानुपलब्धिलक्षणप्राप्त सामान्यमभ्युपेय। यस्मा**दप्रतिभासमान च** सामान्य **कथमात्मना** स्वेन सामान्यरूपेण। **अन्य**मिति सामान्यवन्त **ग्राहयेत्। व्यपदेशयेद्वा**। स्वेन[6] रूपेण। कथमन्यमिति प्रकृतेन सम्बन्धः। सामान्यबलाद् व्यक्तिष्वभिन्नाभिधानज्ञानवृत्तिरिष्टा। तस्मात् सामान्यमुपलब्धिलक्षणप्राप्त-मेवेष्टमिति समुदायार्थः। एवन्तावद् ग्राह्यलक्षणप्राप्तस्यानुपलम्भान्नास्त्येकमने-कसम्बन्धि (।)

भवतु नामैकमनेकसम्बद्धन्तथापि सामान्यरूपता न युक्तेत्याह। **न चे**त्यादि। **तै**रिति व्यक्तिभेदैः **उक्त**[7]मिति द्वित्वादि। सयोगकार्यद्रव्येष्वपि सामान्यस्वभावत्व 65b
प्राप्नोतीत्यप्रसगस्योक्तत्वात्। एकमनेकसम्बद्धमित्येव कृत्वा न सामान्य किन्त्व-

ज्ञाभिधानप्रत्ययनिमित्तभूतमेकं सामान्यं न तु सर्वमिति चेत्। कथमन्यतो[4]ऽन्यत्र प्रत्ययवृत्तिः? तत्संबंधादिति चेत्। संख्याकार्यद्रव्यादौ सत्यपि प्रसज्येत। असामान्यात्मकत्वादिति चेत्। कोऽयं सामान्यात्मेति तदेव न विचारितम्[1]। तत्र[5] सति सम्बन्धे प्रत्ययवृत्तिः। ततः सामान्यमिति उक्तम्। तत्र निमित्तसम्भवात अनेकसम्बन्धिद्रव्यादिभ्योऽपि प्रत्ययवृत्तिः। ततः सामान्यात्मता।

अन्यथाऽन्यत्रापि मा भूत्[6]। विशेषाभावात्। तथा च द्रव्यगुणसामान्यानां रूप-

---

भिन्नाभिधानप्रत्ययनिमित्तमेकसामान्यं न सर्वं द्वित्वाद्यपि। तस्य यथोक्तशब्दज्ञानानिमित्तत्वादिति चेत्। **कथमन्यतः** सामान्यादन्यत्र व्यक्तिभेदे सामान्येनैकरूपतामनापादिते। **प्रत्ययवृ[1]त्तिरे**काकारज्ञानवृत्तिः।

तत्सम्बन्धादिति परः। ताभिर्व्यक्तिभिः सम्बन्धादन्यतोपि सामान्यादन्यत्र प्रत्ययवृत्तिः।

संख्येत्या चा र्यैः। भावलक्षणा चेयं सप्तमी। संख्यायां सत्यां **कार्यद्रव्ये**ऽवयविनि **सति। आदि**शब्दात् संयोगादिषु सन्नप्रत्ययवृत्तेस्तेपि सामान्यं प्राप्नुवन्तीति समुदायार्थः। **असामान्यात्मकत्वात्** सख्यादीनान्त[2]द्वलेन द्रव्ये नैकाकारप्रत्ययवृत्तिरिति **चेत्।**

ननु स एवायं सामान्यात्मा विचार्यते (।) **कोयं सामान्यात्मे**ति। संख्यादिभ्यो विवेकेन सामान्यलक्षणस्यैवाप्रतीतत्वात्। नैतद् व्यक्तमिति यावत्। तदेवाह। **तत्रे**त्यादि। **तत्र** कोयं सामान्यात्मेति पृष्टे त्वयोक्तमेकस्यानेकेन **सति सम्बन्धे** व्यक्तिष्वभिन्न**प्रत्ययवृत्तिः**। **तत** इति प्र[3]त्ययवृत्तेः कारणादनेकसम्बद्धमेक **सामान्यमिति** सामान्यलक्षणं।

अत्र सामान्यलक्षणेऽस्माभिरुच्यते। **अनेकसम्बन्धिनो** विद्यन्ते येषां कार्यद्रव्यादीना। आदिशब्दात् द्वित्वादिपरिग्रहः। तेभ्योपि तदाश्रयद्रव्येष्वेकाकारप्रत्ययोत्पत्तिः स्यात्। किङ्कारणम् (।) **निमित्तसम्भवात्।** तथा ह्यनेकसम्बन्धादेव निमित्ता[4]त् सामान्यादेकप्रत्ययोत्पत्तिरिष्यते (।) अस्ति चानेकसम्बन्धित्वमेकप्रत्ययनिमित्तन्द्रव्यादिष्वपि। **ततश्चे**त्येकप्रत्ययप्रवृत्तेः संख्यादीनां **सामान्यात्मता। अन्यथे**ति। यथोक्तसामान्यलक्षणयोगेपि सख्यादिषु सामान्यात्मता यदि नेष्यते। **अन्यत्रापि** सामान्याभिमते **मा भूत्।** कि कारणं। **विशेषाभावात्। तथा च** द्रव्यादी[5]नामपि सामान्यरूपतापत्तौ **द्रव्यगुणादीनां रूपसंकरः। बुद्धेरेव प्रतिभास**

---

[1] Dbyod-pa.

संकरः। तथा च तर्हि बुद्धेरेव प्रतिभासो अर्थज्ञानरूपत्वात् सत्तया सामान्यमिति चेत् (।) तन्न। एवम्।

ज्ञानादव्यतिरिक्तञ्च कथमर्थान्तरं व्रजेत् ॥७३॥ 444a

ज्ञानस्य[1] **रूपं कथं अथान्तराणां सामान्यं, तस्य तेष्वभावात्। तद्भावाध्यवसायादिति। तथा भ्रान्त्या व्यवहार इति चेत्। तत्र तत्प्रतिभासो**[1]**त्पत्तेः किन्निबन्धनम्। अनाश्रयस्योत्पत्तौ सर्वत्र स्यात्।**

(अथवा) एकाकारे एकज्ञानं अव्यतिरिक्तं कथं अन्यस्य पुनर्ज्ञानस्य व्यक्त्य-

---

इति विकल्पबुद्धेरेकाकारप्रतिभास. **सामान्य**मिति सम्बन्धः। स च ज्ञानरूपत्वात्। ज्ञानवत् सन्नेव। तदुक्त (।)

"सामान्यं वस्तु रूपं हि बुद्धयाकारो भविष्यति।
वस्तुरूपा च सा बुद्धि. शब्दार्थेषूपजायते।
तेन वस्त्वेव कल्प्येत वाच्यं बुद्धयनपोहकमि"ति।[6]

तन्नेत्यादिना प्रतिषेधति। यत्तज्ज्ञानरूप सामान्यमिष्यते। तज्ज्ञानाव**व्यतिरिक्तं** ज्ञानस्वलक्षणवत् **कथमयन्तरम्बाह्य व्रजेत्**। न तेषा सामान्यमिति यावत् (।)

तद् व्याचष्टे (।) **ज्ञानस्ये**त्यादि। **तस्य** ज्ञानरूपस्य **तेष्वर्थेष्वभावात्**।

सत्यं (।) न ज्ञानरूपस्य व्यक्तिष्वन्वयः किन्तु तस्मिन् बुद्धिप्रतिभासे **तद्भावाध्यवसायात्**। बाह्यभा[7]वाध्यवसायात्। **तथा भ्रान्त्या** समानव्यवहार 66a इति चेत्।

एतच्चेष्टमेव सि द्धा न्त वा दि न । केवल प्रकृत्यैककार्या व्यक्तयोऽतत्कार्याद् व्यावृत्ताः। तथाभूताया विकल्पबुद्धेर्निमित्तमित्यन्यापोहाश्रया सा बुद्धिरित्यभिमत शास्त्रकारस्य।

परस्त्वेवभूत निमित्त नेच्छति। अत एव सिद्धान्तवादी निमित्तमेव पर्यनुयुक्ते[1](।) **तत्रे**त्यादि। **तत्र** व्यक्तिभेदेष्ववस्तुभूतेषु व्यक्तीना च प्रकृत्या विजातीयव्यावृत्तानामेककार्यत्वानिच्छतचो(?तो)ज्ञानो**त्पत्तेः किन्निबन्धनं**। नैव किञ्चित्। तथा हि परो विजातीयव्यावृत्ताना भेदानामेकप्रत्ययहेतुत्वन्नेच्छति। न चास्ति वस्तुभूत सामान्य। **अनाश्रयस्ये**त्यनिमित्तिस्य सामान्यज्ञानस्य**ोत्पत्तौ सर्वत्र स्या**दिति गौरित्येकाकारः प्रत्ययो वृक्षेष्वपि[2] स्यात्।

ज्ञानादव्यतिरिक्तमित्यादेरपरमर्थमाह। **अथवे**त्यादि। पूर्वमर्थान्तरशब्देन

---

[1] Log-paḥi-phyir. [2] Ses-pa-poḥi.

न्तरभाविनो रूपम्। ततश्च ज्ञानान्तरात् व्यक्त्यन्तर[2]मविशेषकं कथं सामान्यं भवेत्?

तस्मान्मिथ्याविकल्पोयमर्थेष्वेकात्मताग्रहः।

न हि अर्थानां भेदेनाभेदेन वापि योग्यात्मनाऽपि केनचिद् तुल्यमित्रि तथैषां[3] ग्रहणविकल्पोऽपि मिथ्या॥

इतरेतरभेदोस्य बीजं संज्ञा यदर्थिका ॥७४॥

यस्येतरेतरभेदस्य प्रत्यायनार्थं अतत्साध्येभ्यो भिन्नसाध्यान् भावान् ज्ञात्वा तत्परिहारेण[4] प्रवर्त्तेतेति संकेतः क्रियते, सोऽयं तस्यैकात्मताप्रतिभासिनो मिथ्या-

---

बाह्यमुक्तमधुना ज्ञानान्तर निर्दिश्यते। अत एवाह (।) **कथमन्यस्य पुनर्ज्ञानस्येति**। किम्विशिष्टस्य ज्ञानस्य (।) **व्यक्त्यन्तरभाविन**.। एकस्यां गोव्यक्तौ यद्विकल्प-विज्ञानन्ततोन्यत्र गोव्यक्त्यन्तरेण समुत्पन्नस्य विकल्पज्ञानस्येत्यर्थः। तथा ह्यनेक-ज्ञानव्यापनाद्वा सामान्यम्भवेत्। बाह्यव्यक्तिव्या[3]पनाद्वा। ज्ञानप्रतिभासस्य तु द्वयमप्यसत्। तदाह। **ततश्चेत्यादि**। **व्यक्त्यन्तर**मिति बाह्य॥

तस्मादित्युपसहार।

न हीत्यादिना व्याचष्टे। **केनचि**दिति सामान्यरूपेण। **तथैषां ग्रहण**मित्यर्थाना समाना इति ग्रहण॥

ननु सिद्धान्तवादिना प्यस्य विकल्पस्य निबन्धन वाच्यमनाश्रयस्योत्पत्तौ सर्वत्र प्रसगादित्याह। **इतरेतरभेद** इत्यादि। **संज्ञा** सकेतक्रिया **यद[4]र्थिका** (।) य इतरेतरभेद। अर्थः फल प्रत्याय्यत्वेन यस्य इति कृत्वा स एवम्भूत इतरेतरभेदो भावानामन्योन्यव्यावृत्तिलक्षणोस्य मिथ्याविकल्पस्य **बीजं संज्ञा** सकेतक्रिया। **यदर्थिका**। यस्येतरेतरभेदस्य प्रत्यायनफला।

यस्येत्यादिना व्याचष्टे। यस्येतरेतरभेदस्य **प्रत्यायनार्थं संकेतः क्रियते**। **अतत्साध्येभ्य** इत्यतत्कार्येभ्यो **भिन्नासाध्यान्भावान्भेदेन[5] ज्ञात्वा** तत्परिहारेणे-त्येतेत् कार्यपरिहारेण तत्कार्येषु **प्रवर्त्तेतेति** कृत्वा **संकेतः क्रियते**। **सोयं** यथोक्त इतरेतरभेदस्तस्यैकात्मताप्रतिभासिन एकाकारस्य **मिथ्याविकल्पस्य बीजं** कारण। **तमेव गृह्णन्निति** भेद भिन्नमित्यर्थ.। एतच्चाध्यवसायवशादुच्यते। न पुनर्विकल्पस्य वस्तुगृहणमस्ति (।) **एष विकल्प** इति सामान्याकारो विकल्पः **स्ववासना[6]प्रकृतेरिति** विकल्पवासनास्वभावात्। **एवमित्येकाकारतया प्रतिभाति**। (।७४॥)

कथं पुनर्भिन्नानां स्वलक्षणानाम**भिन्नं कार्यमेकाकारविकल्पात्मकं**।

विकल्पस्य बीजम्। तमेव गृह्णन् एष विकल्पः स्ववासनाप्रकृतेरे[5]वं प्रतिभाति॥

(ख) भिन्नानामभिन्नं कार्यम्

कथं पुनर्भिन्नानामभिन्नं कार्यं, येन तदन्येभ्यो भेदात्[1] अभेद इत्युच्यते। प्रकृतिरेव तादृशी भावानाम्।

एकप्रत्यवमर्शार्थज्ञानाद्येकार्थसाधने।
भेदेपि नियताः केचित् स्वभावेनेन्द्रियादिवत् ॥७५॥

यथेन्द्रियालोकमनस्कारा आत्मेन्द्रियमनस्कारा रूपविज्ञानमेकं जनयन्ति आत्मेन्द्रियमनोर्थतत्सन्निकर्षात्[7] वा, असत्यपि तद्भावनियते सामान्ये। शिंश- 444l

---

येनेत्येककार्यत्वेन। तदन्येभ्योऽतत्कार्येभ्यो **भेदाद्धेतोर्व्यक्तीनाम् अभेद इत्युच्यते।** एकासंसर्गस्तद्व्यतिरेकिणा समानतेति वचनात्।

प्रकृतिरित्यादिना परिहरति। प्रकृति स्वभाव एकाकार[7] प्रत्यभिज्ञान- 66b
मेकप्रत्यवमर्शः। अनुभवज्ञानमर्थज्ञान। **एकप्रत्यवमर्शश्चार्थज्ञान** चेति द्वन्द्व। पूर्वनिपातलक्षणस्य व्यभिचारित्वात्। अल्पाज्तरत्वे[2]प्यर्थज्ञानशब्दस्य न पूर्वनिपात कृत। ते **आदी** यस्येति विग्रह। आदिशब्दाद् दहनगृहादिकार्यग्रहण। एकप्रत्यवमर्शादिरेवैकोर्थ इति कर्मधारय.। **तस्य साधने** सिद्धौ **भेदेपि** नानात्वेपि **नियताः**[1] केचित्। **स्वभावेन** प्रकृत्या। **इन्द्रियादिवत्**। अथवैकान्तेन **भेदे**पि स्वहेतुभ्यः **केचित्** समाना उत्पन्ना केचिदसमाना इत्येतच्चोक्तन्तत्र ये समाना उत्पन्नास्ते तेन स्वभावेनैकाकार प्रत्ययञ्जनयन्ति विनापि **सामान्येनेन्द्रियादिवत्**। तत्रैकप्रत्यवमर्शज्ञानसाधने **नियता** इत्येतद् दार्ष्टान्तिकत्वेनोपन्यस्तमर्थज्ञानाद्येकार्थसाधन इत्येतत्तु दृष्टान्तत्वेनोभयसि[2]द्धत्वात्।

अत एवादौ विभज्यते। **यथेन्द्रिये**त्यादि। **यथेन्द्रियालोकमनस्कारा रूपविज्ञानमेकं जनयन्तीति** सम्बन्ध। एतद्वस्तुबलसिद्धमुदाहरति। **आत्मे**त्यादि परसिद्धान्ताश्रयेण। नित्यमणु मन शीघ्र चेत्यणुस्वरूपम्मन.। **तत्सन्निकर्षा**इत्यात्मेन्द्रियमनोर्थसन्निकर्षा'। "आत्मा मनसा सयुज्यते मन इन्द्रियेणेन्द्रियमर्थेने"ति वचनात्[3]। आत्मे[3]न्द्रियमनोर्थाश्च तत्सन्निकर्षाश्चेति द्वन्द्व'। आत्मेन्द्रियमनोर्थाः। यथास्व सन्निकर्षसहाया विज्ञान जनयन्तीति पराभ्युपगमः। **असत्यपि तद्भावनियत** इत्येककार्यत्वनियते। न हि चक्षुरादीना चक्षुर्विज्ञानजनकत्व नाम सामान्यम्परेणेष्ट।

---

[1] Rıms. [2] Pānını 2: 2: 34. [3] Nyāya-bhāsya 1: 1: 4.

पादयो भिन्नाश्च परस्परानन्वयेऽपि प्रकृत्या एकाकारं प्रत्यभिज्ञानं जनयन्ति, अन्या वा दहन[1]गृहादिका काष्ठसाध्यामर्थक्रियां यथाप्रत्ययम्। न तु भेदाविशेषेऽपि जलादयः। श्रोत्रादिवद् रूपादिविज्ञाने॥

ज्वरादिशमने काश्चित् सह प्रत्येकमेव वा।
दृष्टा यथा चौषधयो नानार्थेऽपि न चापराः॥७६॥

यथा वा गुडूचीव्यक्त्यादीनां सह प्रत्येकं वा ज्वरादि[1]शमनादि[3]लक्षणानां एककार्यक्रियावत्। न तत्र सामान्यं अपेक्ष्यते। भेदेऽपि तत्प्रकृतित्वात्। न तदविशेषेऽपि दधित्रपुसादयः॥

तासु तथाभूतासु[2] (?) सामान्यमपि किंचित् अस्तीति चेत्। तत एव[4] तदेकं

अधुना दार्ष्टान्तिकम्व्याचष्टे। **शिंशपादय** इति शिशपाखदिरन्यग्रोधादय. **परस्परानन्वयेपि**। वृ[4]क्षत्वसामान्यविरहेपि वृक्ष इत्येकाकारं **प्रत्यभिज्ञानं जनयन्ति**। प्रत्यभिज्ञानादन्याम्वा **दहनगृहादिका काष्ठसाध्यामर्थक्रिया** शिशपादयो **जनयन्तीति** प्रकृत। **यथाप्रत्यय**मिति यावद् (।) अग्निसहकारिप्रत्ययलाभस्तदा दहन जनयन्ति। गृहानुकूलप्रत्ययसपाते गृह। आदिशब्दाद् रथादिकार्यपरिग्रह। **न तु भेदाविशेषेपि जलादयः**[5] काष्ठसाध्यार्थक्रियासमर्था प्रकृत्या तेषामतत्कार्यत्वात्। अत्रापि दृष्टान्तमाह। **श्रोत्रादिवद् रूपज्ञान** इति। यथा श्रोत्रशब्दादयो रूपविज्ञाने कर्त्तव्ये न समर्था। आदिशब्दाद् रसादिविज्ञाने॥

स्यादेतद् (।) बहूना प्रत्येकमेककार्यकर्तृत्व सामान्यमन्तरेण न सिध्यतीत्यत आह। **ज्वरादित्यादि**। **सहे**ति व्यक्त्यन्तरसहिता। **प्रत्येक**मित्येकैकरूपा[6] ज्वरादिशमने एकस्मिन् कार्ये दृष्टा **यथौषधय**। **वा** शब्द पूर्वदृष्टान्तापेक्षया। **न चापरा** दधित्रपुसा(?षा)दय।

यथेत्यादिना व्याचष्टे। **न तत्र** ज्वरादिशमने कर्त्तव्ये **सामान्यमोषधित्व नामापेक्षन्ते(?)**। किङ्कारण (।) **भेदेपि तत्प्रकृतिकत्वात्**। ज्वरादिशमनकार्यस्वभावत्वात्। यदि भेदानामसामर्थ्य स्यात्। भवेत्सामान्यापेक्षा। **न तदवि-**
67a **शेषेपि**[7] भेदाविशेषेपि **दधित्रपुसादयः**। दध्येव मन्दजातन्दधित्रपुस। दधि च त्रपुसश्चेति द्वन्द्वमन्ये व्याचक्षते॥

तासु गुडूचीव्यक्त्यादिषु **तथाभूतास्वेक**कार्यकारिणीषु। **किंचिदिति** व्यतिरिक्तमव्यतिरिक्त च। तदुक्त (।)

---

[1] Rıms. [2] Ḥdı-sñam-du.

कार्यं स्याद् (इति) मतं चेत्।[1]

तदयुक्तं, अविशेषात् सामान्यं न तत्कार्यकृद्॥

अविशेषान्न सामान्यमविशेषप्रसङ्गतः।
तासां क्षेत्रादिभेदेऽपि ध्रौव्याच्चानुपकारतः॥७७॥

सामान्यात् ज्वरादिशमनकार्यं[5] **स्यात् चेत्, तस्य विशेषाभावात् व्यक्तीनां क्षेत्रादिभेदेऽपि शीघ्रप्रशमनघटादेः विशेषो गुणस्य तारतम्यं च न स्यात्। अथ सामान्ये विशषोऽस्ति चेत्, स्वभावभेदा**[6]**द् स्वरूपहानम्। ध्रौव्याच्चानुपकारतः सामान्यं (न कार्यकृद्)। यदि हि तद् उपकुर्यात्, अनाधेयविशेषस्य**[2] **अन्यानपेक्षणत्वात् स्वकार्यं सर्वं सकृज्जनयेत्**[7] **तज्जननस्वभावं वा न भवति। व्यक्तयस्तु** 445a

---

"निर्वर्त्यमान यत्कर्म जातिस्तत्रापि साधन।
स्वाश्रयस्याभिनिष्पत्त्यै सा क्रियाया प्रयोजिके"ति।

तत एव सामान्यात् **तदेकं** ज्वरादिशम[1]नलक्षण **कार्यन्ततश्चासिद्धो** दृष्टान्त इति भावः।

तदयुक्तमिति सि द्धा न्त वा दी। **अविशेषात् सामान्यस्येति**। एकत्वान्नित्यत्वाच्च अविशिष्टं **सामान्यन्(न)तत्कार्यकृदिति** शमनकार्यकृत्। अन्यथा सामान्यस्याविशेषात्**तासां** गूडूच्यादिव्यक्तीना **क्षेत्रादिभेदेपि** तस्यापि ज्वरादिशमनकार्य**स्याविशेषप्रसंगतः। चिरशीघ्रेत्यादि**। विशिष्टक्षेत्रो[2]त्पन्नाना शीघ्रप्रशमन विपरीताना चिरप्रशमनं। **आदि**शब्दाच्चिरतरशीघ्रतरादिपरिग्रह। क्षेत्रसस्कारादिभिन्नाना गूडूच्यादीनामुपयोगाद्देहे आरोग्यादिलक्षणस्य **गुणस्य तारतम्य च न स्यात्**। सामान्यस्यैक्यात्। अथ क्षेत्रादिभेदेन **सामान्यस्य विशेष** इष्यते। तदा विशेषे वा सामान्यस्येष्यमाणे **स्वभावभेदः** स्याद् विशेषलक्ष[3]णत्वाद् भेदस्य। **ततश्च स्वरूपहानं**। सामान्यस्वरूपमेक हीयते। **ध्रौव्याच्च** कारणात् **सामान्यस्य** व्यक्तिभ्योनुपकारतो न सामान्य कार्यकृदिति वर्त्तते। **यदि हि सामान्यमुपकुर्यात्** तदा नित्यत्वात् सहकारिभिरनाधेयविशेषस्यान्यानपेक्षणत्वात् सहकार्यनपेक्षणात् तत् सामान्य **स्वकार्यं सकृज्जनयेत्**। अथ न जनयेत् तदा **तज्जननस्वभावं न भ**[4]**वति**। अजननावस्थाया अविशेषात् कार्यकालेपि न जनयेदिति यावत्। व्यक्तीना त्वनित्याना कार्यकृत्त्वे नाय दोष इत्याह। **व्यक्तयस्त्वित्यादि** (।) **संस्कारो** जलावसेकादि। **विशिष्टा उत्पत्तिर्यासान्तास्तथा**। विशेषोस्यास्तीति

---

[1] Ḥgyur-ro-sñam-du-Sem-pas-na. [2] Dogs-dbyuṅ-du-med-pa.

देशकालसंस्कारक्रियासामर्थ्यात् विशिष्टोत्पत्तिका विशेषवत् कार्यकारीति न विरोधः। तद्वत् तत्र केचित् च (स्व)भाव[1]भेदेऽपि एकप्रत्यभिज्ञानादिकं अर्थक्रियाकरणे तदकारिभ्यो भेदाद् वा एकेन वा नानोत्पादेऽतज्जन्येभ्यो भेदाद् अभिन्ना इति।

किं पुनर् [2]भेद लक्षणेन सामान्येन स्वलक्षणं समानमिति प्रत्येयं, अथान्यदेवेति चेत्। किंचातः। यदि स्वलक्षणं कथं विकल्पविषयः अन्यतो वा कथ[3]मर्थक्रिया।

विशेषवत् कार्यं ज्वरादिशमनलक्षणं। न च तासु व्यक्तिषु यच्छीघ्रकारित्वादिलक्षणमवान्तरसामान्यमवस्थि[5]न्तदेव विशेषवत् कार्यकारीति युक्तम्वक्तु। ओषध्यनुपयोगेपि पुसः तत्कार्योदयप्रसङ्गात्। **तद्वदिति** विशिष्टव्यक्तिवत्। **केचिदिति** सजातीया **एकप्रत्यभिज्ञानादिकं। आदिशब्दाद्** एकोदकाद्याहरणादि। **तदकारिभ्य** इति। प्रत्यभिज्ञानाद्यकारिभ्यो **भेदादभिन्ना** इत्युच्यन्ते। न त्वेकसामान्ययोगात्।

कार्यद्वारेणाभेदं प्रतिपाद्य का[6]रणद्वारेणाह। **एकेन वेत्यादि**। यथा प्रयत्नेन घटभेदा **अतज्जन्येभ्य** इत्यप्रयत्नजन्येभ्यो **भेदादभिन्ना** इत्युच्यन्ते। यद्यपि प्रतिघट प्रयत्नस्य भेदस्तथाप्येकप्रत्यभिज्ञानहेतुत्वेन तस्याप्येकत्वं। एतच्चोत्तरत्र निश्चायियिष्यते।

किम्पुनरित्यादि परः। **भेदो** व्यावृत्तिर्**लक्षणं** निमित्तं यस्य **तेन** सामान्येना-
67b तत्कार्ये[7]भ्योऽतत्कारणेभ्यश्च व्यावृत्त **स्वलक्षणं समानमिति प्रत्येय। अन्यथान्यदेवेति** स्वलक्षणादन्यद् विकल्पबुद्धिपरिवर्त्तिरूपमनर्थक्रियाकारि। **तेन** भेदलक्षणेन सामान्येन समानमिति प्रत्येय।

ननु तदेषा बुद्धिप्रतिभासमनुरुन्धानैर्बुद्धिविपरिवर्त्तिनामेव भावानामाकारविशेषपरिग्रहाद् बहिरिव परिस्फुरतां सामान्यमुच्यत इति पूर्वमु[1]क्तत्वात् सन्देहानुवृत्तिरेव।

सत्यं। किन्त्वधिकस्य दोषस्य विधानार्थं उपन्यासः। दोषविज्ञानार्थमाह। **किंचात इति**। इतरो **यदीत्यादिना** प्रश्नाभिप्रायमाह। **यदि स्वलक्षण** प्रत्येयं **कथं विकल्पविषयः**। तथा हि विकल्पबुद्ध्यभिप्रायवशाद् भेदलक्षण सामान्यं व्यवस्थाप्यते तस्या अभिप्रायवशात्। **सामान्यं सत्प्रकीर्ति**तमिति वच[2]नात्। तथाभूतेन चेत् सामान्येन स्वलक्षण समान प्रत्येय। तदा विकल्पस्य विषयः स्यात्। न चैतद् युक्तमथान्यदेव बुद्धिपरिवर्त्ति रूपं समानमिति प्रत्येयं। अत्रापि दोषमाह। **अन्यतो वा कथमर्थक्रिया** (।) न हि बुद्धिप्रतिभासिरूपाद् अर्थक्रिया सम्भवति।

स्वलक्षणे चानित्यत्वाद्यप्रतीतेरतादूप्यं तेषां चावस्तुधर्मता चेत्।

नैष दोषः[1]। **ज्ञानप्रतिभासिन्यर्थे सामान्यसामानाधिकरण्यधर्मधर्मि**[4]**व्यवहाराशंका**[2]। **वस्तुस्वभावग्रहणेन अनुभवाहितवासनां आश्रित्य यदेतत् विकल्पज्ञानं उत्पन्नं तच्च अतद्विषयमपि तद्विषयमिव तदनुभवा**[5]**हितवासनाप्रभवप्रकृतेः अध्यवसिततद्भावं स्वभाववत्। अभिन्नकार्यपदार्थेभ्यः प्रसूतेरभिन्नार्थग्राहीव। परमार्थतस्तु तदन्यभेदसमाकारम्। तदन्यभेदस्य समानाकारः।**

तत्र अर्थाकारश्च व्यवहारिणां तथाऽध्यवसाय प्रवृत्तेः, बाह्यत्वेनैकत्वेनार्थ-

---

ततश्चातत्कारिभ्यो भेदादभिन्ना इत्युच्यन्त इति कार्यद्वारेण सामान्यव्यवस्था न[3] घटते। यतश्च बुद्धिपरिवर्त्ति रूप समानन्तत **स्वलक्षणे चानित्यत्वादि**सामान्यस्याप्रतीतेरतादूप्यमनित्यादिरूपत्वं स्वलक्षणस्य न भवेत्। स्वलक्षणे चानित्यत्वादीनामप्रतीतेस्तेषां चानित्यत्वादीनाम**वस्तुधर्मता**।

नेत्यादिना परिहरति। बुद्धिप्रतिभासिन्येव रूपे सामान्यादिव्यवहार इत्यय पक्षो गृहीतः। तदाह। **ज्ञानप्रतिभासि**[4]**न्यर्थ** इत्यादि।

एतच्च ग्रहणकवाक्य। अस्यैव व्याख्यान। **यदेतज्ज्ञानं विकल्पक**मित्यनेन सम्बन्धः। **अतद्विषयमपि** वस्तुस्वभावविषयमपि **तद्विषयमिव** स्वलक्षणविषयमिव। **अध्यवसिततद्भावमारोपितबाह्यभाव** स्वरूप यस्य तत्तथा। यतश्चाध्यवसिततद्भावमत स्वलक्षणविषयमेवेति मन्यते। **अध्यवसिततद्भावस्वरूपत्व**मे[5]व कथमिति चेदाह। **तदनुभवाहितवासनाप्रभवप्रकृतेरिति**(।)तस्य स्वलक्षणस्य योनुभवस्तेनाहिता वासना तत प्रभव उत्पादस्तस्य सामान्यस्य सा प्रकृति स्वभावो येनाध्यवसितभावस्वरूपम्भवतीत्यर्थ। **अभिन्नकार्या** ये **पदार्था** घटादय। एकाकारप्रत्ययज्ञानहेतव**स्तेभ्यः** परम्परया **प्रसूतेरभिन्नार्थग्राहीव** प्रतिभाति। न तु सामान्यवस्तु[6]भूत किचिद् व्यतिरिक्तमव्यतिरिक्तम्वाऽस्ति यत् तद् गृह्णीयात्। **परमार्थतस्तु तदन्यभेदसमाकारं** तेभ्य. सजातीयाभिमतेभ्योऽन्ये विजातीयास्तेभ्यो भेदः भिन्नः स्वभाव. स एव परमार्थेन समान आकारो यस्येति विग्रह.। तत एव तस्योत्पत्तेस्तन्निवर्त्तनत्वाच्च **तदन्यभेदस्तस्य समान आकार** इत्युच्यते।

तत्रानन्तरोक्ते ज्ञा[7]**ने एक इवेति** सर्वव्यक्त्यनुगत इव। **तत्कारीवेत्यर्थ-** 68a
क्रियाकारीव। किं पुनस्तथा प्रतिभातीति चेदाह। **व्यवहारिणामित्यादि**। **तथाध्यवसायेति** विकल्पाशमेव **बाह्यत्वेनैकत्वेनार्थक्रियाकारित्वेनाध्यवसाय-**

---

[1] Ñes-pa. [2] Ḥdogs-te.

45b **कारित्वेनेति तत्कारित्वेन प्रतिभाति। अन्यथा प्रवृत्तिर्न युक्ता [7]स्यात्। तच्चार्थ-क्रियाकारितया प्रतिभासते। तदतत्कारिभ्यो भिन्नमिव। न हि तस्याऽपि तत्त्वमिति वाच्यं परीक्षानङ्गत्वात्। बुद्धिस्थास्तेऽर्थास्तेन समाना इति गृह्यन्ते। कुत[1]श्चित् व्यावृत्त (इव) प्रतिभासनात्। न च स्वलक्षणं, तत्राऽप्रतिभासनात्।**

त एव कुतश्चित् व्यावृत्ता अभिन्ना अपि व्यावृत्तिमन्तः प्रतिभान्ति। स्वयम-

---

व्यवहारिणा **प्रवृत्तेः**। **व्यवहारिभिरित्यन्ये** पठन्ति। व्यवहारिभिरित्यध्यवसायेत्यनेन पूर्वसम्बन्धात् तृतीयैव कृता। न तु षष्ठी। **न लोकाव्ययनिष्ठेति**[19]-षष्ठी प्रतिषेधात्। **अन्यथेति** यदि विकल्पाशे बाह्याध्यवसायो न भवेत्तदा तथाभूते विकल्पे जातेप्यर्थक्रियाकारिणी **प्रवृत्तिर्न स्यात्**। तदपि विकल्पप्रतिबिम्बकं व्यवहर्तृपुरुषाध्यवसायवशा**दर्थक्रियाकारितया प्रतिभासते**। ततश्च **तदतत्कारिभ्यो भिन्नमिव**। विकल्पप्रतिविम्बकमेव तत्त्व कस्मान्नेति चेदाह। **न चे**त्यादि। तद्विकल्पप्र[2]तिविम्बकन्न **तत्त्वं** न वस्तु। किङ्कारण (।) अनर्थक्रियाकारित्वेन **परीक्षाया** व्यभिचारस्या**नङ्गत्वात्**। एतच्चानन्तरमेव प्रतिपादयिष्यामः।

तत्र ये स्वलक्ष(ण)द्वारा याता अर्थाकारा विकल्पबुद्धौ प्रतिभान्ति **तेऽर्था** विकल्पबुद्धिप्रतिभासिनस्**तेन** भेदलक्षणेन सामान्येन **समाना इति गृह्यन्ते**। **कुतश्चिद् व्यावृत्ता**(इ)ति विजातीयव्यावृत्त्या। तथा हि (।) विक[3]ल्पप्रतिभासिनोपि वृक्षभेदा अध्यवसितबाह्यरूपत्वाद् अवृक्षेभ्यो व्यावृत्ता इव भासन्ते। तथान्येति। **न स्वलक्षणन्तेन** समानमिति गृह्यत इति लिङ्गवचन(वि)परिणामेन सम्बन्ध.। किङ्कारण (।) **तत्र** सामान्यप्रतिभासिनि विकल्पे स्वलक्षणा**प्रतिभासनात्**।

एवन्तावद् बुद्धिप्रतिभासिन्यर्थे सामान्यव्यवहार उक्त। सप्रति सामानाधिकरण्यव्यवहा[4]रमाह। **त एवेत्यादि। त्र एव** विकल्पप्रतिभासिनोर्था। **कुतश्चिद् व्यावृत्ता** इव सन्तो यथानुत्पलाद् व्यावृत्ता उत्पलभेदास्त एव पुन**रन्यतोप्यनीलाद् व्यावृत्तिमन्तः प्रतिभान्ति** (।) ततश्च व्यावृत्तिद्वयानुगतस्यैकस्यैव धर्मिण. प्रतिभासनात् सामानाधिकरण्य।

अय चानन्तरानुक्रान्तो बुद्धिप्रतिभासिष्वर्थेषु सामान्यसामानाधिकरण्यव्यवहा[5]रो मिथ्यार्थ एव क्रियते। कि कारण (।) **स्वयमसतामपि** विकल्पाकाराणान्तथा एकाकारानुगतत्वेन। व्यावृत्तिद्वयानुगतेन धर्म्मस्वरूपेण। विकल्प**बुद्धयोप-**

---

[1] Pāṇini 2: 3: 69.

सतामपि बुद्धया उपदर्शनात्। मिथ्या[2]र्थ एव सामान्यसामानाधिकरण्यव्यवहारः। सर्वश्चायं स्वलक्षणानामेव दर्शनाहितवासनाकृतायातत्वात्। तत्प्रतिबद्धजन्मनां विकल्पानामतत्प्रतिभासित्वेऽपि[3] वस्तुनि प्रवृत्तिः, मणिप्रभायामिव मणिभ्रान्तेः, नान्येषाम्। तद्भेदप्रभवे सत्यपि यथादृष्टविशेषानुसरणं परित्यज्य किंचित्साम्यग्रहणेनाऽन्यसमारोपात्[4]। दीपप्रभायामिव मणिबुद्धेः। तेन न विकल्पविषयेष्वर्थक्रियाकारित्वम्।

दर्शनात् । एकाकारेण प्रतिभासनात् **सामान्यव्यवहारः** । अनेकाकारेण चैकस्य प्रतिभासनात् **सामानाधिकरण्यव्यवहार**.।

यदि मिथ्यार्थ एव सर्वो विकल्पः कस्मात् कृतकत्वादि[6]द्वारायाता अनित्यानात्मादिविकल्पाः प्रमाण नित्या विकल्पास्तु नेत्यत आह। **सर्वश्चायमित्यादि**। **सर्वो विप्लव** इति सम्बन्धः। **विप्लवो** भ्रान्ति । **अयमिति** सामान्यादिरूपः। **स्वलक्षणानामेव** यद्दर्शनन्तेनाहिता या वासना तत्कृत.। परम्परया सर्वविकल्पानाम्वस्तुदर्शनद्वारायातत्वात्। तथा हि नित्यादिविकल्पा अपि[7] वस्तुदर्शनेनैवो- 68b
त्पन्ना सदृशापरापरोत्पत्तिदर्शनायातत्वात्। तत्र तुल्ये सर्वविकल्पानाम्वस्तुदर्शनद्वारायातत्वे। **तत्प्रतिबद्धजन्मनाम**नित्यादि**विकल्पानामतत्प्रतिभासित्वेपि** स्वलक्षणाप्रतिभासित्वेपि **वस्तुन्य**विसम्वादः। अध्यस्तस्यानित्यादिरूपस्य वस्तुनि विद्यमानत्वात् केवल स्वलक्षणरूपेण न प्रतिभासत इति विकल्पो[1] विभ्रम उच्यते। **मणिप्रभायामिव मणिभ्रान्तेर्**मणिस्वरूपाग्रहेप्यविसम्वादो मणिप्रभाया मणौ प्रतिबद्धत्वात्। प्रभाश्रयेण च मणिभ्रान्तेरुत्पत्ते.।

न त्वेवन्नित्यादिविकल्पास्तेषाम्वस्तुदर्शनद्वारायातत्वेपि वस्तुन्यविद्यमानस्यैवाकारस्य समारोपात्। तदाह। **नान्येषा**मित्यादि। अन्येषा नित्यादिविकल्पाना वस्तुनि सम्वाद इत्यने[2]न सम्बन्ध.। **तद्भेदप्रभवे सत्यपी**ति। अर्थाभेदाद् उत्पादेपि सतीत्यर्थ.। **यथा दृष्टो** यो **विशेषः** क्षणिकत्वादिलक्षणस्तस्या**नुसरणं** निश्चय **परित्यज्य किञ्चित्सामान्य**मिति व्यतिरिक्तस्याव्यतिरिक्तस्य वा सामान्यस्य **ग्रहणेन** विशेषात्तस्य स्थिरत्वादे **समारोपात्। दीपप्रभायामिव**[3] भासुरत्वादिसाम्यात् प्रवृत्ताया **मणिबुद्धे**र्न मणिवस्तुसम्वादः। पारम्पर्येणाप्यध्यवसिते मणावप्रतिबद्धत्वात्। यतश्च मिथ्यार्था एव विकल्पास्**तेन न विकल्पविषयेष्वर्थेष्वर्थक्रियाकारित्वं** (।) ततश्च यदुक्तमन्यतो वा कथमर्थक्रियेति तत्सिद्ध साध्यते।

कथन्तर्ह्यतत्कारिव्यवच्छेदलक्षण सामान्य विकल्पविषयेष्वर्थेषु व्यवस्थाप्यत[4] इति चेत्। न। बहिरिव परिस्फुरतामेकार्थक्रियाकारितया तदकारिभ्यो भिन्ना-

नापि स्वलक्षणस्य अनित्यत्वाद्यभावः। एवं चलाद् वस्तुनो नानित्यत्वन्नाम[5] किंचिदस्ति। क्षणस्थायित्वेन तथाभूतस्य ग्रहणाद् तेषां भवति 'अयं अनित्यः' 'अनित्यत्वमस्य'। तद्धर्मतामेवावतरन्तो विकल्पा नानेक[6]धर्मव्यतिरेकं दर्शयन्ति। न च ते निराश्रयाः। तद्वेदर्शनाश्रयत्वात्। न चावस्तुधर्मता। तत्स्वभावस्यैव

नामिव प्रतिभासनात्। यच्चोक्त (।) स्वलक्षणे चानित्यत्वाद्यप्रतीतेरतादूप्यमिति तत्परिहारार्थमाह। **नापीत्यादि। चलाद् वस्तुनो** यस्मान्नानित्यत्वन्नाम **किञ्चिदस्ति**। येनासम्बद्धात् स्वलक्षणस्यानित्यत्वेनायोगः स्यात्। किन्तु चलमेव वस्तु नित्य स्व[5]लक्षणस्यैवानित्यरूपत्वादेवमनात्माद्यपि द्रष्टव्यं। तेन प्रत्यक्षेण स्वलक्षणे गृह्यमाणेऽनित्यत्व गृहीतमेव केवल भ्रान्तिनिमित्तसद्भावादनिश्चितम् (।) अतस्तन्निश्चयमात्रेऽनुमानव्यापारस्तेन तन्निश्चय एव स्वलक्षणेऽनित्यत्वप्रतीतिरिति सिद्ध।

यदि स्वलक्षणमेवानित्य कथमनित्योयमर्थोऽनित्यत्वमस्येति वा धर्मिधर्मरूपतया[6] प्रतीतिरित्यत आह। **क्षणेत्यादि**। स्वलक्षणस्य **तथाभूतस्येति** चलरूपस्य क्षणाप्रत्युपस्थानतया। एक**क्षणस्थायित्वेन ग्रहणाद्** उत्तरकालमन्त्यक्षणदर्शिनामेतदेवम्भवत्यनित्योयमित्यादि। भेदान्तराप्रतिक्षेपविवक्षायाम**नित्योय**मिति
69a भेदान्तरप्रतिक्षेपविवक्षाया**मनित्यत्वमस्येत्येव** धर्मिधर्मभाव[7]प्रतीतिर्भवति।

विकल्पकल्पितत्वात् कथ बाह्ये धर्मधर्मिभाव इत्यत आह। **तद्धर्मता**मित्यादि। तद्धर्मता स्वलक्षणधर्मतामे**वावतरन्तः** स्वलक्षणमध्यवस्यन्तो **विकल्पा** इत्यर्थ। व्यावृत्तिभेदे कृतसकेतशब्दानुसारेण **नानारूपा एकरूपाश्च धर्मास्ते** च **व्यतिरेकाश्चेति** द्वन्द्वः। नानाधर्मान् अनित्यकृतकत्वादीन्। एकं धर्म बहूना घटादीनामनित्यत्व[1] व्यतिरेकश्च घटादीनामनित्यत्वमिति **दर्शयन्ति**। वस्तुनीत्यध्याहारः। न च विकल्पव्यवस्थापितन्नानैकधर्मादिकन्तत्त्वम्विकल्पस्यावस्तुग्राहित्वाद् (।) अत एवाह (।) **दर्शयन्तीति**।

अवस्तुग्राहित्वात्तर्हि **ते निराश्रयाः** प्राप्नुवन्तीति चेदाह। **न च त** इति। न इति नानाधर्मादिदर्शका विकल्पवस्तुभेदस्यानित्यादिरूपस्य स्वलक्षणस्य यद् **दर्शनमनुभव[2]स्तदाश्रयत्वाद्** विकल्पाना। तथा हि परमार्थतोऽनित्यादिरूपं स्वलक्षणं दृष्ट्वा दर्शनसामर्थ्यभाविनो विकल्पा दृष्टाकाराध्यवसायेन प्रवर्त्तन्ते। यतश्च यथादृष्टस्यैवाभिलपनेन प्रवर्त्तन्ते विकल्पा अनित्याकारा नार्थान्तरन्नित्यत्वादिविकल्पवदनुसरन्ति। ततो यदुक्तं (।) तेषा चावस्तु धर्मतेति परिहृतम्भवतीत्याह। **नेति**। ते[3]षामनित्यत्वादीनां **नावस्तुधर्मता**। किं कारणं। **तत्स्वभावस्यैव तथाऽनित्यादिधर्मतया ख्यातेः प्रतिभासनादध्यवसायादिति** यावत्। यदि

तथा प्रतिभासनात्। वस्तुनस्तु नानैकव्यतिरेक[7]ग्रहो विभ्रमः। एककार्यकारिण- 446a
स्तस्य तथा(भाव)जिज्ञासासु तथाभावख्यापनाय तथा व्यवस्थापितत्वात्।[1]
न वस्तुभेदात्। तस्यैवैकस्य अनेक[1]त्वायोगात् अनेकस्य चैकत्वायोगात्, व्यति-
रिक्तस्य निषेधात्। तेषां प्रकृतेर्भेदात् यथावस्तु शब्दार्थाभ्युपगमे सामानाधिकर-
ण्यायोगात्।

तदुपाधेरेकस्याभिधानात् अदोष इति चेत्। अनुपकारिणि पारतंत्र्यायो-

---

वस्तुधर्म एवानित्यत्वादिकं ख्याति। कस्तर्हि विकल्पकृतो विभ्रम इत्याह। **वस्तुनस्त्वित्यादि**। एकस्य वस्तुनो **नानारूपेण** ग्रह। बहूना **चैकत्वेन**। धर्मधर्मिणोश्च **व्यतिरेकेण[4] ग्रहो विभ्रमो** भ्रान्त इत्यर्थ। कि पुन कारणमेकत्वादिग्रहो विभ्रम इत्याह। **तस्यैकानेकेत्यादि**। एककार्यकारिणो घटादिभेदस्यैकोदकाद्याहरणादिकार्यकारिण·। **तथा भावजिज्ञासासु**। एककार्यकर्तृत्वजिज्ञासासु। **तथाभावख्यापनायै**ककार्यकारित्वख्यापनाय। तथाकृतस्थितित्वात्। घटादिना[5] एकरूपेण व्यवहारलाघवार्थम्व्यवस्थापितत्वात्। तथकस्याप्यनेकार्यकारिण। यथा घटस्य चक्षुर्विज्ञानोदकधारणकादाचित्कज्ञानादिकार्यकारिणस्तथाभावजिज्ञासासु तथाभावख्यापनाय। अनेककार्यत्वख्यापनाय तथाकृतस्थितत्वात्। चाक्षुषपार्थिवानित्यादिरूपेण **व्यवस्थापितत्वात्**[6]। एवमन्यत्रापि यथायोग वाच्य। **न वस्तुभेदाद्** एकस्मिन् पदार्थेऽनेकधर्मव्यवस्थापन। किङ्कारण (।) **तस्यैवैकस्य** वस्तुनोऽनेक**त्वायोगात्** (।) ततश्चैकस्यानेकत्वग्रहो विभ्रम इत्याख्यात। तथानेकस्याप्येकत्वव्यवस्थापनन्तदकार्यव्यावृत्तिद्वारेणैव न वस्त्वभेदादित्याह। **अनेकस्य चैकत्वा-**
योगादिति[7]। तथा चानेकस्यैकत्वग्रहो विभ्रम। एव धर्मधर्मिणोर्व्यतिरेकग्रहोपि 69b
भ्रान्त एव। किङ्कारण (।) **व्यतिरिक्तस्य** च सामान्यस्य प्रागेव **निषेधात्। व्यक्तयो नानुयन्त्यन्यदित्याविना।**

धर्मिण. सकाशाद् व्यतिरिक्ता एव धर्मास्ततश्च यथावस्तु शब्दार्थो भविष्यतीत्याह। **तेषामित्यादि**। **तेषा**मनित्यत्वादीना धर्माणा **प्रकृतेः** स्वभावस्य **भेदात्** कारणाद् **यथावस्तु शब्दा[1]र्थाभ्युपगमे** नीलोत्पलमनित्य शब्द इत्यादि **सामानाधिकरण्यायोगात्**। नीलादिगुणानामुत्पलादिजातीनाञ्च परस्पर स्वभावभेदात्। तद्वाचिना शब्दानामेकस्मिन्नधिकरणे वृत्तिर्नास्तीति सामानाधिकरण्यायोगः। तस्मान्न यथावस्तु शब्दार्थव्यवस्थेति भाव.।

---

[1] De-ltar-bžag-pahı-phyır.

गात् न विशेषः। पारतंत्र्येऽपि जन्यजनकभावेन सहानवस्थितेः द्वयोरनभिधानम्। बुद्ध्या एकस्या[3]ध्याहारो न वस्तुविषयः शब्द(ार्थः)स्यात्। बुद्धिप्रतिभास-

---

तदुपाधेरित्यादिना पराभिप्रायमाशकते। ते नीलादयो धर्मा उपाधिर्यस्य द्रव्य[2]स्य तस्यै**कस्य** द्वाभ्या गुणजातिभ्यामभि**धानाद् अदोषः**। सामानाधिकरण्याभावदोषो नास्ति। उत्तरमाह (।) **अनुपकारिणी**त्यादि। उपाधित्वेनाभिमतानां नीलादीना धर्माणामनुपकारकन्द्रव्य। न हि नीलगुणस्योत्पलत्वजातेर्वा द्रव्येणोपकार. कश्चिद् क्रियते (।) ततश्चा**नुपकारिणि** द्रव्ये तदनाधेयवृत्तीना नीलादीना **पारतन्त्र्यायोगात्**। नीलादयो[3] धर्मा अनुपाधि'। पारतन्त्र्याभावात्। अन्यथाऽस्यायमुपाधिरित्येव न स्यात्। अथेष्यते द्रव्यविषय पारतन्त्र्य धर्माणान्तदा **पारतन्त्र्येपि** द्रव्य**जन्यत्व**मङ्गीकर्त्तव्यमन्यथा द्रव्यपारतन्त्र्यायोगात्। **जनकं** च क्षणिकमेष्टव्यमक्षणिकस्यार्थक्रियायोगात्। ततश्च कार्याभिमतानामुपाधीना कारणाभिमतस्य च द्रव्यस्य **सहानवस्थिते:**[4] कारणात्। **द्वयो**र्विशेषणविशेष्ययोर्वस्तुरूपयोर्युगप**दनभिधानं** (।) कारणाभिमतस्य विशेषस्य तदानी निरोधात्। **एकस्ये**ति विशिष्टस्याप्युपाधिमत। **अध्याहार** उपदर्शनन्तदा **न वस्तुविषयः शब्दार्थः स्यात्**। बुद्ध्यारोपितस्यैव विशेषस्य शब्देनाभिधानात्।

स्यान्मतं (।) यद्विनष्ट विशेष्यन्तद्विषयस्य शब्दस्य भवतु बुद्धिप्रति[5]भासविषयत्व (।) य. पुन सन्नेवोपाधिस्तद्वाचिन. शब्दस्य वस्तुविषयत्वमेवास्त्विति चेदाह। **बुद्धिप्रतिभासे**त्यादि। बुद्धिप्रतिभासो विषयो यस्याभिधानस्य तत्तथा (।) तद्भावस्तस्मिन् सति **सर्वं** विशेषणविषयाभिमतमप्यभिधानन्**तथैव** विकल्पबुद्धिप्रतिभासविषयमेवा**स्तु**। कि कारण (।) **तथा भिन्नोपाधिमतो** नानाविशेषणवत **एक[6]स्य ग्रहणे** बुद्धावभा**सनात्**। तथा ह्युपाधिमतो विनष्टस्याध्याहारिका विकल्पबुद्धिरङ्गीकर्त्तव्या (।) तदा चोपाधिमतोऽभावे उपाधेरप्यभाव पारतन्त्र्याभावात् (।) **भिन्नोपाधिमत एकस्याप्रतिभासने** कुत' सामानाधिकरण्य।

यदा तु विशेषणविशेष्ययोर्द्वयोरपि विकल्पबुद्धिप्रतिभासित्वमिष्टन्तदा
702a कल्पित धर्मद्वयगृहीतैकध[7]र्मिप्रतिभासिन्येकैव बुद्धिर्जायत इत्यविरुद्धं सामानाधिकरण्य।

उपकार्येत्यादिना पराभिप्रायमाशकते। **अदोषो** योयमेकस्य बुद्ध्याध्याहार इत्यादिनोक्त.। **उपाधिमता समकालस्य** निष्पन्नरूपस्योपाधे: **पारतन्त्र्याभावा**वनुपाधित्वं। प्राक् पारतन्त्र्यन्तदेवोपाधित्वमिति चेदाह। **नेत्यादि**। न ह्य-

विषयत्वस्य एकत्वे सर्वं तथैवास्तु। ग्रहणे तथा भिन्नोपाधिमत एकस्याभासनात्।

उपकार्योपकारकयोरुपाधि[4]**तद्वतोरपि सहस्थितिकत्वादद्वोष इति चेत्। न। निष्पत्तौ पारतन्त्र्याभावात् अनुपाधित्वम्। न चानिष्पत्तिः, स्वभावानिश्चयात्**[6]**। सर्वथा पारतंत्र्याभावात् कल्पनयाऽऽरोप्य सर्वत्र व्यवहारे च सैव बुद्धिः किन्न अनुविधीयते ? वस्तुन एकेन शब्देन प्रमाणेन च विषयीकरणे वस्तुबलात् अशेषविशेषाक्षेपात्**[6]**, तदन्यवैयर्थ्यं च न स्यात्। बुद्धिप्रतिभासस्य निर्वस्तुकत्वात् वस्तुसामर्थ्यभाविनामप्रसंगः। तदभिन्नं एकाकारस्य विषयीकरणेऽपि आकारान्तरेऽनिश्चयात्**[7]**, आकारान्तरे साकांक्षया बुद्ध्या ग्रह्याम्। भिन्नस्य शब्दार्थस्य** 446b

---

निष्पन्नस्य शशविषा[1]णतुल्यस्य पारतन्त्र्यमुपाधित्वम्वा (।) सर्वथा सतोऽसतश्चासत्पारतन्त्र्यमिति हेतो कल्पनारोपितमुपाधीनाम्पारतन्त्र्य कृत्वा पारतन्त्र्यव्यवहारे। **सर्वथेति** सर्वेण प्रकारेण यथा पारतन्त्र्य**व्यवहारे** बुद्धिरनुविधीयते तथा विशेषणविशेष्यव्यवहारे **सैवा**रोपिका **बुद्धिः किन्नानुविधीयते**। तदनुविधान हि न्याय्य बुद्धिसन्दर्शितार्थप्रतिभास[2]मनाश्रित्य व्यवहर्त्तुमशक्यत्वात्। **वस्तुन एकेन शब्देन प्रमाणेन च विषयीकरणे वस्तुबलाद्वस्तुस्वभावभूताशेषधर्माक्षेपात् तदन्यस्य** शब्दादेर्वै**यर्थ्यं च** यत्प्रागुक्तमेकस्यार्थस्वभावस्य प्रत्यक्षस्येत्यादि।

व स्तु वा दि पक्षे तद्बुद्धिप्रतिभासानुरोधेन स्यात्। कि कारण (।) **बुद्धिप्रतिभासस्य निर्वस्तुकत्वाद् वस्तुसामर्थ्यभाविनान्दोषाणामप्रस**[3]**ङ्गः**। बहुवचनेनैतदाह। न केवल तदन्यवैयर्थ्यदोषस्याप्रस ङ्गस्तथा व्यतिरिक्तस्य सामान्यस्याभाव उपाधीनां च पारतन्त्र्यायोगात्।

विशेषणविशेष्यत्वाभाव भिन्नोपाधिमत एकस्य बुद्धावप्रतिभासनात् (।) सामानाधिकरण्याभावश्च य उक्तस्तेषामप्यत्र सम्भवो नास्तीति तदेवाह। **तदभिन्नमित्यादि**। तथा हि तद्बुद्धिप्रतिभासि रू[4]पमभिन्नम्प्रतिभाति। तस्मात् सामान्य यथा प्रतीतिर्न विरुध्यत इति वचनपरिणाम कृत्वा वक्ष्यमाणेन सम्बन्ध। नीलमित्युक्तेऽनीलव्यावृत्त्या नीलत्वस्यै**कस्याकारस्य विषयीकरणेपि** विकल्पबुद्धया तत्रैव नीलाकारे सशयव्यावृत्ति**र्नाकारान्तरे** (।) ततस्तद्बुद्धिप्रतिभासि रूपमनिश्चिताद्याकारमनुत्पलव्यावृत्तोत्पलाकारस्या**निश्चयात्**[5]। यस्मिन्नाकारे निश्चयो नोत्पन्नस्त**दाकारान्तर**न्तत्र **साकांक्षयोत्पलशब्दप्रयोगाद्** उत्पन्नया **बुद्ध्या ग्राह्यं** प्रतिभातीति सम्बन्धः।

एतेन विशेषणविशेष्यभावस्य निमित्तमुक्तं (।) सामानाधिकरणस्याह। **भिन्नेत्यादि**। **भिन्नस्य शब्दार्थस्य** नीलोत्पललक्षणस्योपसहारे **प्रतिपादनेपि**।

प्रतिपादनेऽपि अभिन्नबुद्धौ प्रतिभातीति सामान्यविशेषणविशेष्यभावसामानाधिकरण्यानि यथाप्रतीति न विरुध्यन्ते। [1]**धर्मधर्मिभेदोऽप्यस्य अनेकस्मादर्थाद् भेदे (ऽपि) तस्य एकस्माद् भेदस्य विधिप्रतिषेधजिज्ञासायां तदेव वस्तु। प्रतीक्षिप्तभेदान्तरे धर्मशब्देन संचोद्य**[2] **तथा बुद्धेः**[1] **प्रतिभासनात्। व्यतिरिक्तधर्मिमिव अविशेषेणा**[3]**स्यापरं स्वभावं धर्मितया व्यवस्थाप्य प्रदर्श्यते। तन्मात्रेण**

धर्मद्वयोपगृहीत**मभिन्नमेक**धर्मितया बुद्धिप्रतिभासरू[6]प विकल्प**बुद्धौ प्रतिभातीति** कृत्वा **सामान्या**दीनि **यथाप्रतीति न विरुध्यन्ते।**

तेन यदुच्यते भ ट्टे न (।) "अन्यनिवृत्तिमात्रमपोह गृहीत्वा अनीलादिव्यावृत्तावनुत्पलादिव्यावृत्तेरभावादनुत्पलादिव्यावृत्तौ चानीलादिव्यावृत्तेरभावाच्च न विशेषणविशेष्यभावस्तयोर्धर्मयोस्तदभावाच्च न तदाभिधायकयो शब्दयो.
70b शब्दयोरपि विशेषणविशेष्य[7]भाव । नापि सामानाधिकरण्य शब्दवाच्ययोर्भिन्नत्वात्(।) नापि यत्रार्थेऽपोहयोर्भावस्तद्द्वारक सामानाधिकरण्यमवस्तुत्वेनापोह्स्याधेयत्वाभावात्(।) न च स्वलक्षण शब्दविषयोन्यच्चाधिकरण नेष्यते। न च स्वलक्षणेपोह्योर्भावेपि शब्दयो. सामानाधिकरण्यमेकविषयत्वस्याप्रतीतेरि"त्यपास्तं।

बाह्यभिन्नस्य स्वाकारस्य शब्दादिविषयत्वेनेष्टत्वा[1]त् तेन नीलोत्पलादिशब्देषु शब्दार्थाभिधायित्वमिष्यत एवेति सर्वं सुस्थ।

धर्मधर्मिभेदोप्यस्य बुद्धिप्रतिभासस्य यथा प्रतीतिर्न विरुध्यत इति वचनपरिणामेन सम्बन्ध। तमेवा**नेकेत्या**दिनाह। **अनेकस्मादर्थाद्** बुद्धिप्रतिभासस्यास्त्रीकत्वात्। कुतोनेकार्थभेद केवल पुरुषाध्यवसायवशादेवमुच्यते। **तस्य** बुद्धिप्रतिभास**स्यैकस्मा**[2]**दर्थाद्** यो **भेदस्तस्य विधिप्रतिषेधजिज्ञासायां**। किमनित्य· शब्दो भवति चाक्षुषो न भवतीति **तदेव** बुद्धिप्रतिभासभूत**म्वस्तु** प्रदर्श्यत इति सम्बन्धः (।) केन प्रकारेणेत्याह। **प्रतिक्षिप्तेत्या**दि।

यद्वा धर्मधर्मिभेदोप्यस्य वस्तुनो न विरुध्यत इति सम्बन्ध.। कुत इत्याह। अनेकस्मादर्थाद् बाह्यस्य भेदसम्भवे सति तस्यैकस्माद् यो भेदस्तस्य वि[3]धिप्रतिषेधजिज्ञासाया किमनित्य शब्दो भवति चाक्षुषो न भवतीति तदेव बाह्यम्वस्तु प्रदर्श्यत इति सम्बन्ध। केन प्रदर्श्यत इत्याह। **प्रतिक्षिप्तेत्या**दि। **धर्मशब्देन संचोद्य** व्यतिरिक्तं **धर्मिमिव व्यवस्थाप्येति** सम्बन्ध। तथा ह्यनित्यत्वन्न चाक्षुषत्वमिति धर्मशब्देन चोदने कृते व्यतिरिक्त इवानित्यत्वादिको धर्मो व्यवस्थापितो भव[4]ति। किङ्कारणमित्याह। **तथा बुद्धेः प्रतिभासनात्**। धर्म-

---

[1] Blo-la. [2] Bye-brag-tu-ma-phye-bar.

धर्मधर्मिणोर्भेदात् भेदवतीव बुद्धिः प्रतिभाति, न वस्तुभेदाद्। तथाभूतानां भेदानां बाहुल्यचोदनया साध्यसाधनभेदश्च।

(ग) अपोहस्य विजातीयव्यावर्त्तकत्वम्

तत्स्वभावसमाश्रयैर्धर्मप्रतिभासभेदैः तत्स्वभावप्रतिपत्तये क्रियते॥

तत्स्वभाव(ग्रहाद्वा) धीस्तदर्थेवाप्यनर्थिका।
विकल्पिकाऽतत्कार्यार्थभेदनिष्ठा प्रजायते॥७८॥
तस्यां यद्रूपमाभाति बाह्यमेकमिवान्यतः।

शब्देन चोदने व्यतिरिक्तस्यैव धर्मस्य ग्राहिण्या बुद्धे प्रतिभासनात्। **अविशेषेणेति** सर्वभेदाप्रतिक्षेपेण **परमस्य** बाह्यस्याप्रतिक्षिप्तभेदान्तर **स्वभावं धर्मितया व्यवस्थाप्य** शब्देन **प्रदर्श्यते।**

एतदुक्तम्भवति। **धर्मशब्देन संचोद्य व्यतिरिक्तं धर्ममिव** प्रदर्श्य[5] पुनर्द्धर्मिशब्देन संचोद्यापरं **स्वभावं धर्मितया व्यवस्थाप्य** तदेव बाह्य वस्तु प्रदर्श्यते। अनित्यत्वं शब्दस्य न चाक्षुषत्वम् (।) अनित्यो न चाक्षुष शब्द इति। भावभावाऽङ्शेनेति। भेदान्तरप्रतिक्षेपाप्रतिक्षेपेण **धर्मधर्मिणोर्भेदाद् भेदवतीव बुद्धिर्विकल्पिका प्रतिभाति** भिन्नाकारेव। न तु वस्तुनो भेद। **न वस्तुभेदाद्** भेद[6]वती **बुद्धिः** (।) कुत (।) **युथोक्तदोषाद्** अनुपकारिणि धर्मिणि धर्माणा पारतन्त्र्यायोगात्।

तथा साध्यमनित्यत्वं साधन कृतकत्वमिति (।) साध्यसाधनभेदश्चेत्यत आह। **तथाभूतेत्यादि। तथाभूतानाम्प्रतिक्षिप्तभेदान्तराणा धर्मभेदानाम्बाहुल्यचोदनया वचनभेदः साध्यसाधनभेदश्च** क्रियत इति सम्ब[7]न्ध। 71a

तस्य ततस्ततो व्यावृत्तस्य वस्तुन **स्वभाव समाश्रयो** येषान्तैर्द्धर्मप्रतिभासभेदैर्विकल्पबुद्धिप्रति(वि)म्बैर्द्धर्मात्मकै प्रतिभासभेदैरित्यर्थः। किमर्थं क्रियत इत्याह। **तत्स्वभावेत्यादि।** तस्यैव व्यावृत्तस्य वस्तु**स्वभावस्य प्रतिपत्तये** प्राप्तये वा॥

प्रणालिकया तेषाम्वस्तुप्रतिबन्धात् प्रकृतस्यैवार्थस्य सुखग्रहणार्थं संग्रहश्लोकमाह। **तत्स्वभावेत्यादि**[1]। तस्य वस्तुस्वभावस्यानुभवादूर्द्ध्वं या **धीः** प्रज्ञायते **विकल्पिका।** अपिशब्दो भिन्नक्रम। **अनर्थिकापि तदर्थेव।** वस्तुविषयेव। अध्यवसायवशादतत्कार्येभ्यो यो **भेदस्तन्निष्ठा।** तदनुभवबलोत्पत्तेर्व्यावृत्तस्य च वस्तुन सम्वादात्तन्निष्ठेत्युच्यते॥

तस्यामित्थ भूतायाम्बुद्धौ योर्थाकार दृश्यविकल्पयोरेकीकरणाद् **बाह्यमिव।** सजातीयासु[2] व्यक्तिषु समम्प्रतिभासमानमे**कमिवान्यतो** विजातीयाद् **व्यावृत्तमिवाभाति।** तत्तु **व्यावृत्तमेव** बुद्धिरूपस्यालीकत्वात्। तद्बुद्धिरूप **निस्तत्त्वं**

व्यावृत्तमिव निस्तत्वं परीक्षानङ्गभावतः ॥७९॥
अर्था ज्ञाननिविष्टास्ते यतो व्या(वृत्तरूपिणः) ।
(तेन भिन्ना इवाभान्ति) व्यावृत्ताः पुनरन्यतः ॥८०॥
त एव; तेषां सामान्यसमानाधारगोचरैः ।
447a **ज्ञानाभिधानै(र्मिथ्यार्थो व्यवहारः) प्रतन्यते ॥८१॥**
स च (सर्वः) पदार्थानामन्योन्याभावसंश्रयः ।
तेनान्यापोहविष(यो वस्तुना तस्य चाश्रयः ॥८२॥

निःस्वभाव। **किङ्कारणं** (।) **परीक्षानङ्गभावतः**। अर्थक्रियासमर्थमेव परीक्षाङ्गमत **परीक्षानङ्गभावेनार्थक्रिया** प्रत्यसमर्थत्वादित्युक्तम्भवति। यतश्च बुद्धिप्रतिभासि रूपन्निस्तत्त्वमतस्तद्विष[3]यो व्यवहारो मिथ्यार्थ एव प्रवर्त्तते इत्याह ॥

अर्था इत्यादि। **ज्ञानविशिष्टा** इति विकल्पबुद्ध्यारूढास्ते **ज्ञानविशिष्टा**स्सन्तः यतो विजातीयाद् **व्यावृत्तिरूपिणो** व्यावृत्तिरूपवन्त·। यथानुत्पलाद् **व्यावृत्तिरूपिण** उत्पलार्था । **तेनेत्यन्ततो** व्यावृत्तिरूपेणोत्पलत्वेना**भिन्ना इवाभान्ति** न परमार्थतो बुद्धिरूपस्यालीकत्वात् । एतेन सा[4]मान्यव्यवहारस्य निमित्तमुक्त। **व्यावृत्ताः पुनरन्यतस्त एवेति** (।) त एव ज्ञानविशिष्टा अर्था अन्यतो व्यावृत्तिरूपिण. सन्त· पुनरन्यत. सजातीयादपि व्यावृत्ता भान्ति। यथा त एव नीलभेदा अनीलात्। अतश्च व्यावृत्तिद्वयोपगृहीतस्यैकस्यार्थस्य भासनात् ॥

सामानाधिकरण्यबीजमुक्त। तदेवाह। **तेषामित्यादि**। **तें[5]षामिति** बुद्धिप्रतिभासिनामर्थाना **व्यवहारः प्रतन्यत** इति सम्बन्ध । तेपामिति व्यवहारापेक्षा कर्मणि षष्ठी। किविशिष्टो **मिथ्यार्थ** । कै करणभूतैरित्याह। **सामान्येत्यादि**। समानाधारत्व स**मानाधार** । भावप्रधानत्वान्निर्देशस्य। सामान्यविषयै. सामानाधिकरण्यविषयैश्च ज्ञानाभिधानै **सामान्यगोचरै** सामा[6]न्यव्यवहारः प्रतन्यते। इतरै· सामानाधिकरण्यव्यवहार ॥

यद्यपि शब्दज्ञानात्मक एवेह व्यवहारस्तथापि सव्यापारतामुपादाय ज्ञानशब्दयो करणरूपता। तयोरेवार्थप्रकाशलक्षणा क्रिया व्यवहारत्वेन विवक्षितेत्यदोषः। यथा ज्ञानस्य प्रमाणत्वं फलत्व वेति। **स च सर्वः** ज्ञानाभिधानलक्षणो व्यवहारः
71b **पदा[7]र्थानां** स्वलक्षणानां **योन्योन्याभावः** परस्परव्यच्छेदस्तत्संश्रयः। व्यावृत्तपदार्थानुभवद्वारेणोत्पत्ते । **तेनेत्यन्योन्याभावसश्रयत्वेन** स व्यवहारो**न्यापोहविषय** उच्यते न त्वन्यव्यावृत्तिविषयत्वात्। विधिविषयत्वादस्य व्यवहारस्य ॥

यत्रास्ति वस्तुसम्बन्धा) यथोक्तानुमितौ यथा ।
नान्यत्र भ्रान्तिसाम्येपि दीपतेजो मणौ यथा ॥८३॥
(तत्रैककार्योऽनेकोऽपि तदकार्यान्यताश्रयैः) ।
एकत्वेनाभिधाज्ञानैर्व्यवहारं प्रतार्यते ॥८४॥
तथानेककृदेकोपि तद्भावपरिदीपने ।
अतत्कार्यार्थभेदेन (नानाधर्मा) प्रतीयते ॥८५॥
यथाप्रतीतिकथितः शब्दार्थोसावसन्नपि ।
सामान्याधिकरण्यञ्च वस्तुन्यस्य न संभवः ॥८६॥

वस्तुलाभस्य च वस्तुप्राप्तेश्चाश्रयो न भवति व्यवहार । न च सर्वं किन्तु **यत्र** व्यवहारेऽस्ति पारम्पर्येण तथा[1]भूत**वस्तुसम्बन्धः**। उदाहरणमाह। **यथोक्तानुमितौ यथे**ति। **यथोक्तानुमिति** पूर्वोक्तानुमानविकल्प । **नान्यत्र** स्थिरादिविकल्पे तत्र पारम्पर्येणापि वस्तुसम्बन्धाभावात्। वस्तुनोऽस्थिरादिरूपत्वात्। अनुमानविकल्पस्येतरस्य च स्वप्रतिभासेनर्थेऽर्थाध्यवसायद् **भ्रान्तिसाम्येपि**। **दीपतेजो मणौ यथे**ति। यथा मणितेजसि म[2]णिबुद्धिर्भ्रान्ता। तथा दीपतेजस्यपितुल्येपि भ्रान्तत्वे मणिप्रभा मणित्वेन गृहीता मणावधिगन्तव्ये सम्वादिका। न तु दीपतेजः। तद्वत् स्थिरादिविकल्पो सम्वादक इत्यर्थ ॥

यदि ज्ञाननिविष्टानामेवार्थाना सामान्यादिव्यवहार बाह्येष्वर्थेषु तर्हि सामान्यादिव्यवहाराभावात् प्रवृत्तिर्न स्यादित्यत आह। **तत्रे**त्यादि। **तत्र** शब्दो वाक्योपन्या[3]से। निर्द्धारणे वा। तत्र व्यक्तिष्वेककार्या व्यक्तयो निर्द्धार्यन्ते। **अनेकोप्येककार्यो** यथा घटभेदा एवोदकाहरणादिकार्यास्तदकार्याय तथाभूतकार्यनुकुर्वते। तेभ्योन्यताव्यावृत्ति सा आश्रयो येषा **ज्ञानाभिधानात्तैरनेकोपि** पदार्थ **एकत्वेन व्यवहारम्प्रतार्यते**। सामान्यव्यवहारं प्राप्यत इति यावत् ॥

तथेत्यनन्तरसा[4]मान्यव्यपेक्षया। **एकोप्यनेककार्यकृत्**। यथा घटश्च चक्षुर्विज्ञानोदकाहरणादिकार्यकृत्। **तद्भावदीपने**। अनेककार्यकर्त्तृत्वप्रकाशने। **अतत्कार्येभ्यो भेदेन** हेतुना। **नानाधर्मा** घटश्चाक्षुष पार्थिव इत्यादि। तेन सामानाधिकरण्यविशेषणविशेष्यभावव्यवहारश्च बाह्येष्वेव दर्शितः ॥

यदि बाह्येषु सामान्यादि[5]व्यवहारः पारमार्थिकस्तर्हि प्राप्त इत्याह। **यथाप्रतीतिकथितः** इति। विकल्पबुद्ध्यनुरोधेन **शब्दार्थः** सामान्यलक्षणः परमार्थ**तोसावसन्न**पि यथाप्रतीतिकथित.। **सामानाधिकरण्यं** च यथाप्रतीतिकथित। यस्माद् **वस्तुन्यस्य** शब्दार्थस्य सामानाधिकरण्यस्य च **न सम्भवः** ॥

धर्म्मधर्म्मिव्यवस्थानं (भेदोऽभेदश्च) यादृशः।
असमीक्षिततत्त्वार्थो यथा लोके प्रतीयते ॥८७॥

तन्तथैव समाश्रित्य साध्यसाधनसंस्थितिः।
परमार्थावताराय विद्वद्भिरवकल्प्यते ॥८८॥

संसृज्यन्ते न भिद्यन्ते स्वतोर्थाः पारमार्थिकाः।
रूपमेकमनेकञ्च तेषु बुद्धेरुपप्लवः ॥८९॥

भेदस्ततोऽयं बौद्धेऽर्थे (सामान्यं) भेद इत्यपि।
तस्यैव चान्यव्यावृत्या धर्मभेदः प्रकल्प्यते ॥९०॥

साध्यसाधनसंकल्पे वस्तुदर्शनहानितः।

धर्मधर्मिव्यवहारश्च ज्ञानप्रतिभासि[6]न्यर्थ इति यत् प्रकृतन्तत्सग्रहार्थमाह। **धर्मे**त्यादि। अय **धर्मो**ऽय **धर्मी**ति **व्यवस्थानन्तयोश्च भेदो**ऽस्यायं धर्म कृतकत्वादिलक्षण। अ**भेदः** कृतकोयमिति **यादृशः**। अयं च विकल्पारोपितत्वात्। **असमीक्षिततत्त्वार्थः**। अनपेक्षितस्तत्त्वार्थो वस्त्वर्थो येनेति विग्रह.। **यथा लोके**
72a **बुद्ध्यारूढोप्यध्यवसिततद्भावतया प्रतीयते**[7] ॥

तं धर्मादिविभागन्तर्थेवेति यथालोकप्रतीति साध्यसाधनसंस्थितिर्विद्वद्भिरवकल्प्यत इति सम्बन्ध·। किमर्थं। **परमार्थावताराय**। अनित्यादिवस्तुस्वभावस्यावगाहनाय ॥

कि पुन कारणमेकत्वादिव्यवहारस्य वस्तुन्यसम्भव इत्याह। **संसृज्यन्त** इत्यादि। **पारमार्थिका अर्थाः स्वतो न संसृज्यन्ते**। ततो न सामान्यव्यवहारो वस्तुनि। **न भि**[1]**द्यन्ते** कृतकत्वादिधर्मे प्रत्येक तस्य वस्तुनोनेकत्वायोगात्। अतश्च **तेष्वर्थेषु** बहुषु **रूपमेक**मेकस्मिन्नर्थेऽ**नेकं रूपं** यदध्यवसीयते तद्बुद्धेर्विकल्पिकाया **उपप्लवो** भ्रान्तिः। यतश्च न ससृज्यन्ते न भिद्यन्ते पारमार्थिका अर्था. ॥

तत कारणात् **सामान्य**मिद बहूना। तथा धर्माणा धर्मिणा च **भेद इत्यपि** योयम्**भेदो** नानात्वव्यवहार· स **बौ**[2]**द्धेर्थे**। न बाह्ये स्वलक्षणे। बुद्धिप्रतिभासस्यालीकत्वात् (।) कथन्तर्हि तत्र स्वलक्षणे कृतकत्वादिधर्मभेद इति चेदाह। **तस्यैव** चेत्यादि। **तस्यैव** स्वलक्षणस्यान्यव्यावृत्त्या **धर्मभेदः प्रकल्प्यते** ॥

कस्मात् कल्पितधर्मभेदद्वारेण गम्यगमकभावो न वस्तुदर्शनमात्रेणेत्यत आह। **साध्ये**त्यादि। इद **साध्यमिदं साधन**मित्यस्मिन् **संकल्पे वस्तुद**[3]**र्शनहानितः**। यद्वा प्रत्यक्षवदनुमानेन सामान्यविशिष्टं स्वलक्षणमेव कस्मान्न गृह्यत इत्यत आह।

भेदः सामान्यसंसृष्टा ग्राह्या नात्र स्वलक्षणम् ॥९१॥
समानभिन्नाद्याकारैर्न तद् ग्राह्य कथञ्चन।
भेदानां बहुभेदानां तत्रैकस्मिन्नयोगतः ॥९२॥
तद् रूपं सर्वता भिन्नं तथा तत्प्रतिपादिका।
न श्रुतिः कल्पना वास्ति सामान्येनैव वृत्तितः ॥९३॥

इति सग्रहश्लोका.।

किं पुनः स्वलक्षणे शब्दा नियुज्यन्त इति चेत्।

साध्येत्यादि। साध्यसाधनसकल्पे वस्तुदर्शनहानित । कुत स्वलक्षणस्य सामान्यविशिष्टस्य ग्रहण। **भेदः सामान्यसंसृष्टो ग्राह्य** इत्याचार्य दि ग्ना ग प्रभृतिभि सामान्यससृष्टस्य स्वलक्षणस्य ग्रहण प्रतिज्ञातमित्या[4]शङ्कामपनयन्नाह। **भेद** इत्यादि। **भेदः सामान्यसंसृष्टः प्रतीयत** इत्यत्रापि वचने ग्राह्य न **स्वलक्षणमेव** निर्दिष्टमिति नैवम्बोद्धव्यमित्यर्थ । किन्तु बाह्या एव भेदास्तेनान्यापोहलक्षणेन सामान्येन ससृष्टा अध्यवसीयन्ते न तु गृह्यन्त इति तत्रापि बोद्धव्य।

अन्ये तु **भेदः सामान्यसंसृष्टो ग्राह्य** इति पुल्लिङ्ग्रे[5]न पठन्ति । तत्रायमर्थो भेदः। **सामान्यसंसृष्टो** ग्राह्य इत्यत्रापि वचने। न स्वलक्षण बोद्धव्य ॥

किम्पुन कारणन्तत्रैव बोद्धव्यमिति चेदाह। **समानेत्यादि**। अनेकस्मिन्नेकाकार **समाना**कार । एकस्मिन्ननेकधर्मत्वम्**भिन्ना**कार । **आदि**शब्दाद् धर्मधर्म्याकारपरिग्रह । **न तत्** स्वलक्षण **ग्राह्यं कथंचन**। कि कारण (।) तत्रैकस्मिन् स्वलक्षणे[6] कृतकत्वानित्यत्वादिरूपेण **बहुभेदा**नान्धर्माणा किम्विशिष्टानाम्**भेदा**नाम्**वस्तुरूपाणान्तत्रैकस्मिन्** स्वलक्षणेऽ**योगात्**। न ह्येकस्य वस्तुरूपाणि बहूनि युज्यन्ते निरङ्शत्वात् स्वलक्षणस्य ॥

उपसहरन्नाह। **तद्रूप**मित्यादि। **तत्तस्माद् रूपं** स्वलक्षण **सर्वतो भिन्न**मसाधारणन्**तथा** तेनासाधारणेन रूपेण **तस्य** स्वलक्षणस्य न[7] **प्रतिपादिका श्रुतिः** 72b
शब्दो नास्ति।- **कल्पना वास्ति**। नेति प्रकृत। असाधारणेन स्वरूपेण स्वलक्षणस्य ग्राहको नास्तीत्यर्थ । कि कारण (।) **सामान्येनैव** शब्दस्य कल्पनायाश्च **वृत्तितः**॥

तत्प्रतिपादिका न श्रुतिरस्तीति ब्रुवता स्वलक्षणे शब्दा न नियुज्यन्त इत्युक्तमतश्चोदयति।

किम्पुनरित्यादि। सकेतेन विषयीकृता. **संकेतिनः**। तमाहुः शब्दा(.।) व्य[1]**वहाराय** सकेत. **स्मृतः**। **तदा** व्यवहारकाले **तत्स्वलक्षणन्नास्ति** यत्र सकेत. कृतः।

धर्म्मधर्म्मिव्यवस्थानं (भेदोऽभेदश्च) यादृशः।
असमीक्षिततत्त्वार्थो यथा लोके प्रतीयते ॥८७॥

तन्तथैव समाश्रित्य साध्यसाधनसंस्थितिः।
परमार्थावताराय विद्वद्भिरवकल्प्यते ॥८८॥

संसृज्यन्ते न भिद्यन्ते स्वतोर्थाः पारमार्थिकाः।
रूपमेकमनेकञ्च तेषु बुद्धेरुपप्लवः ॥८९॥

भेदस्ततोऽयं बौद्धेऽर्थे (सामान्यं) भेद इत्यपि।
तस्यैव चान्यव्यावृत्या धर्मभेदः प्रकल्प्यते ॥९०॥

साध्यसाधनसंकल्पे वस्तुदर्शनहानितः।

धर्मधर्मिव्यवहारश्च ज्ञानप्रतिभासि[6]न्यर्थ इति यत् प्रकृतन्तत्सग्रहार्थमाह। **धर्मे**त्यादि। अय **धर्मो**ऽय **धर्मी**ति **व्यवस्थानन्तयोश्च भेदो**ऽस्याय धर्म कृतकत्वादिलक्षण। अभेदः कृतकोयमिति **यादृशः**। अय च विकल्पारोपितत्वात्। **असमीक्षिततत्त्वार्थः**। अनपेक्षितस्तत्त्वार्थो वस्त्वर्थो येनेति विग्रह.। **यथा लोके**
72a **बुद्ध्यारूढोप्यध्यवसिततद्भावतया प्रतीयते**[7] ॥

तं धर्मादिविभागन्तथैवेति यथालोकप्रतीति **साध्यसाधनसंस्थितिर्विद्वद्भिरवकल्प्यत** इति सम्बन्ध। किमर्थं। **परमार्थावताराय**। अनित्यादिवस्तुस्वभावस्यावगाहनाय ॥

कि पुन कारणमेकत्वादिव्यवहारस्य वस्तुन्यसम्भव इत्याह। **संसृज्यन्त** इत्यादि। **पारमार्थिका अर्थाः स्वतो न संसृज्यन्ते**। ततो न सामान्यव्यवहारो वस्तुनि। **न भि[1]द्यन्ते** कृतकत्वादिधर्मे प्रत्येक तस्य वस्तुनोनेकत्वायोगात्। अतश्च **तेष्वर्थेषु** बहुषु **रूपमेक**मेकस्मिन्नर्थे**ऽनेकं रूपं** यदध्यवसीयते तद्बुद्धेर्विकल्पिकाया **उपप्लवो** भ्रान्ति'। यतश्च न ससृज्यन्ते न भिद्यन्ते पारमार्थिका अर्था ॥

तत कारणात् **सामान्य**मिद बहूना। तथा धर्माणा धर्मिणा च **भेद इत्यपि** योयम्**भेदो** नानात्वव्यवहार' स **बौ[2]द्धेर्थे**। न बाह्ये स्वलक्षणे। बुद्धिप्रतिभासस्यालीकत्वात् (।) कथन्तर्हि तत्र स्वलक्षणे कृतकत्वादिधर्मभेद इति चेदाह। **तस्यैव** चेत्यादि। **तस्यैव** स्वलक्षणस्यान्यव्यावृत्त्या **धर्मभेदः प्रकल्प्यते** ॥

कस्मात् कल्पितधर्मभेदद्वारेण गम्यगमकभावो न वस्तुदर्शनमात्रेणेत्यत आह। **साध्ये**त्यादि। इद **साध्यमिदं साधन**मित्यस्मिन् **संकल्पे वस्तुद[3]र्शनहानितः**। यद्वा प्रत्यक्षवदनुमानेन सामान्यविशिष्टं स्वलक्षणमेव कस्मान्न गृह्यत इत्यत आह।

भेदः सामान्यसंसृष्टा ग्राह्या नात्र स्वलक्षणम् ॥९१॥
समानभिन्नाद्याकारैर्न तद् ग्राह्य कथञ्चन।
भेदानां बहुभेदानां तत्रैकस्मिन्नयोगतः ॥९२॥
तद् रूपं सर्वता भिन्नं तथा तत्प्रतिपादिका।
न श्रुतिः कल्पना वास्ति सामान्येनैव वृत्तितः ॥९३॥

इति सग्रहश्लोका ।

किं पुनः स्वलक्षणे शब्दा नियुज्यन्त इति चेत्।

साध्येत्यादि। साध्यसाधनसकल्पे वस्तुदर्शनहानित । कुत स्वलक्षणस्य सामान्यविशिष्टस्य ग्रहण। **भेदः सामान्यसंसृष्टो ग्राह्य** इत्याचार्य दि ग्ना ग प्रभृतिभि सामान्यससृष्टस्य स्वलक्षणस्य ग्रहण प्रतिज्ञातमित्या[4]शङ्कामपनयन्नाह। **भेद** इत्यादि। **भेदः सामान्यसंसृष्टः प्रतीयत** इत्यत्रापि वचने ग्राह्य न **स्वलक्षणमेव** निर्दिष्टमिति नैवम्बोद्धव्यमित्यर्थ । किन्तु बाह्या एव भेदास्तेनान्यापोहलक्षणेन सामान्येन ससृष्टा अध्यवसीयन्ते न तु गृह्यन्त इति तत्रापि बोद्धव्य।

अन्ये तु **भेदः सामान्यसंसृष्टो ग्राह्य** इति पुल्लिङ्गे[5]न पठन्ति । तत्रायमर्थो भेद.। **सामान्यसंसृष्टो** ग्राह्य इत्यत्रापि वचने। न स्वलक्षण बोद्धव्य ॥

किम्पुन कारणन्तत्रैव बोद्धव्यमिति चेदाह। **समाने**त्यादि। अनेकस्मिन्नेकाकार **समाना**कार । एकस्मिन्ननेकधर्मत्व**भिन्ना**कार । **आदि**शब्दाद् धर्मधर्म्याकारपरिग्रह । **न तत्** स्वलक्षण **ग्राह्यं कथंचन**। कि कारण (।) तत्रैकस्मिन् स्वलक्षणे[6] कृतकत्वानित्यत्वादिरूपेण **बहुभेदा**नान्धर्माणा किम्विशिष्टानाम्**भेदा**नाम्वस्तुरूपाणान्त**त्रैकस्मिन्** स्वलक्षणेऽ**योगात्**। न ह्येकस्य वस्तुरूपाणि बहूनि युज्यन्ते निरङ्शत्वात् स्वलक्षणस्य ॥

उपसहरन्नाह। **तद्रूप**मित्यादि। **तत्तस्माद रूपं** स्वलक्षण **सर्वतो भिन्न**मसाधारण**न्तथा** तेनासाधारणेन रूपेण **तस्य** स्वलक्षणस्य न[7] **प्रतिपादिका श्रुतिः** 72b
शब्दो नास्ति। **कल्पना वास्ति**। नेति प्रकृत। असाधारणेन स्वरूपेण स्वलक्षणस्य ग्राहको नास्तीत्यर्थ । किं कारण (।) **सामान्येनैव** शब्दस्य कल्पनायाश्च **वृत्तितः**॥

तत्प्रतिपादिका न श्रुतिरस्तीति ब्रुवता स्वलक्षणे शब्दा न नियुज्यन्त इत्युक्तमतश्चोदयति।

किम्पुनरित्यादि। सकेतेन विषयीकृता **संकेतिनः**। तमाहुः शब्दा(.।) व्य[1]**वहाराय** सकेतः **स्मृतः**। **तदा** व्यवहारकाले **तत्स्वलक्षणम्नास्ति** यत्र सकेत. कृतः।

शब्दाः संकेतितं प्राहुर्व्यवहाराय स स्मृतः।
तदा स्वलक्षणन्नास्ति सङ्केतस्तेन तत्र न ॥९४॥

न हि शब्दैः संकेतितार्थप्रदर्शने संकेतः। अपि नाम पश्चात्काले कृतः संकेतः
447b अस्माच्छब्दादेतदर्थप्रतिपत्तिः इति मत्वा व्यवहारार्थं उपयुज्यत[7] इति चेत्। प्राक्
स्वलक्षणे कृतसंकेतः शब्दः पश्चाद् योज्यत इति न युक्तम्। तस्य व्यक्तेर्देशकाल-
भेदेष्वनास्कन्दात्। एवं चेत् स्वलक्षणे नास्ति संकेतकरणम्।

अथ व्यतिरिक्ताव्यतिरिक्तव्यापि शब्दैरुच्यते, तन्न व्यवहारकालाभावदोष इति चेत्। न। एवम्।

अपि प्रवर्तेत पुमान् विज्ञायार्थक्रियाक्षमान्।
तत्साधनायेत्यर्थेषु संयोज्यन्तेऽभिधायकाः ॥९५॥

न खलु लोकोऽसंकेतयन् शब्दानप्रयुञ्जानो वा दुःखितः स्यात् व्यसना (पन्नः।) अथ किमिति चेत्। सर्व एवावधेय आरम्भः फलार्थः। निष्फलारम्भस्य[3] उपेक्षणी-

---

एकस्यापि स्वलक्षणस्य क्षणिकत्वात् कालान्तरे तेनैव रूपेणानुगमो नास्त्यक्षणिकत्वे वा सकेत. ज्ञानाभावादेव तद्विषयत्वस्य कालान्तरेनुगमो नास्ति किमुत देशकाल-भिन्नेषु स्वलक्षणेषु। तेन कारणेन तत्र स्वलक्षणे संकेतो न क्रियत इत्यध्या[2]हार।

न हीत्यादिना व्याचष्टे।

अपि नामेति कथन्नु नाम। प्रागिति सकेतकालकृतसम्बन्धस्य शब्दस्येति सम्बन्ध। एकत्रैकस्मिन् स्वलक्षणे पश्चादिति व्यवहारकाले। किङ्कारण (।) न युक्तमित्याह। तस्येत्यादि। तस्येति सकेतकालदृष्टस्य व्यवहारावस्थानादिषु देशकालभेदेष्वनास्कन्दनात्। अनुगमात्। न ह्येकत्र दृष्टो भेदोन्य[3]त्र सम्भवति॥

व्यतिरिक्तमिति वै शे षि क दर्शनेनाव्यतिरिक्तं सा ख्य दर्शनेन। समानजातीयव्यक्तिव्यापनाद् व्यापि सामान्य। तत्तस्मान्न व्यवहारकालाभावदोषः। व्यवहारकाले शब्दार्थस्याभावदोषो नास्ति। सामान्यस्य शब्दार्थत्वात्तस्यैवैकत्वेन सकेतव्यवहारकालयोर्विद्यमानत्वात्।

कथ नामेत्यस्मिन्नर्थे अपिशब्द[4] (।) व्यवहारकाले शब्दादुच्चरितादर्थक्रियाक्षमान् अर्थान् विज्ञाय तत्साधनायार्थक्रियासाधनाय कथन्नाम प्रवर्त्तत पुमानित्यनेनाभिप्रायेणार्थेषु संयोज्यन्तेऽभिधायकाः शब्दा.।

न खल्वित्यादिना व्याचष्टे। फलनिरपेक्ष क्वचित् तात्पर्यं व्यसन। यदय लोको सकेतयन् सकेतमकुर्वाण. सकेतितेर्थे शब्दान् प्र[5]युञ्जानो वा। सर्व एवेति

यत्वात्। तदयं क्वचित् शब्दं नियुञ्जानः किंचित् फलमेवेहितुं युक्तः। तच्चेत् सर्वमिष्टानिष्टप्राप्तिपरिहारलक्षणम्। तेनायं इष्टा[4]निष्टसाधनासाधनं कृत्वा, तत्र प्रवृत्तिं निवृत्तं वा कुर्यां कारयेयं वेति नियोग आद्रियेत शब्दान् वा नियुंजीत। अन्यथोपेक्षणीयत्वात् तत्र[5] जातिरनर्थक्रियायोग्या।

न हि जातिर्वाहदोहादौ क्वचिदपि प्रत्युपस्थिता। न वा तादृशप्रकरणाभावे लोकव्यवहारेषु शब्दप्रयोगः। व्यक्तेरशक्यचोदनत्वात्[6] लक्षितलक्षणा जातिरुच्यत

शाब्दोन्यो वा**वधेयो** ग्रहणार्ह **आरम्भो** व्यवहार. **फलार्थः**। न तु निष्फल (।) किङ्कारण (।) **निष्फलारम्भस्य** प्रेक्षापूर्वकारिभिरुपेक्षणीयत्वादग्राह्यत्वात्। **तदिति** तस्मात्। **अयं** प्रतिपत्ता **क्वचिदभिमतेर्थे नियुञ्जान** सकेतयन् **फलमेवेहितुं युक्त** इति प्रयोजनमेवापेक्षितुमर्हतीति यावत्[6]। **तच्चेति** फलमिष्टस्याप्तिलक्षणमनिष्टस्य च त्यागलक्षणमिति यथायोग सम्बन्ध। येनेष्टानिष्टप्राप्तिपरिहाररूप एव पुरुषार्थोभिप्रेतस्**तेनायं** पुरुषस्तयोरिष्टयोः फलयो **साधनमसाधनं** चार्थं ज्ञात्वा **तत्रेष्टसाधने प्रवृत्तिमनिष्टसाधने** च **निवृत्तिं कुर्यां कारयेयम्वा** परानित्यनेनाभिप्रायेण शब्दा**न्नियुञ्जीत** प्रयोक्ता[7] श्रोतापि **नियोगे वाद्रियेत**। 73a

युक्तन्तावत् पर व्यवहारयेयमिति शब्दनियोग। शब्दनियोगस्य पराङ्गत्वात्। स्वयन्तु प्रवृत्तिनिवृत्तिकारणे क शब्दस्योपयोग.।

सत्य (।) केवल शब्दप्रयोगाभ्यासात् स्वयमपि प्रतिपद्यमान कदाचिदेव प्रतिपद्यत इत्युपन्यास कृत। **अन्यथोपेक्षणीयत्वादि**ति फलमन्तरेण शब्दनियोगस्योपेक्षणीयत्वात्। **तत्रैव** व्यवस्थिते न्याये **जाति[1]रनर्थक्रियायोग्या**ऽतो न शब्दविषया।

तद्व्याचष्टे **न ह्रीत्यादि। न जातिर्वाहदोहादिकं** कर्त्तुं समर्था (।) ततश्च वाहदोहाद्यर्थिनो जातिचोदना निष्फलेति न तदर्थं **शब्दप्रयोगः।**

यापि स्वप्रतिपत्तिलक्षणार्थक्रिया जातेरुपवर्ण्यते। न तदर्थम्पुरुष प्रवर्त्तते शब्दप्रयोगादेव तस्या सिद्धत्वात्। जातिमात्रप्रतिपत्त्यर्थं शब्दप्रयोगो भविष्यतीति चेदत आह। **न वेत्यादि। तादृशमिति** वाहदोहादि**प्रकरणं** निष्फलस्य **शब्दप्रयोगस्योपेक्षणीयत्वादित्युक्तत्वात्**। जातौ च वाच्याया सत्या। गामानयेत्यत्र वाक्येन वाक्यार्थप्रतीति स्यात्। गोत्वस्य क्रियात्वेन्वयाभावात्। नापि लक्षितलक्षणया वाक्यार्थप्रतीतिरप्रतीतेर्न हि पदेभ्यस्तावत् सामान्याना प्रतीति (।) पुनस्तेभ्यो विशेषाणा विशेषेभ्यश्चान्वयस्येत्येव विलम्बितरूपा वाक्यार्थ[3]प्रतीति।

नन्वपोहेपि वाच्ये कथ बाह्यार्थप्रतीतिर्नीरूपत्वादपोहस्य (।) न च ज्ञानाशे

इति चेत्। अशब्दाचोदिते सम्बन्धे सत्यपि कथं प्रवर्तते ? न हि कश्चित् दण्डं छिन्धी-
448a **त्युक्ते दंडिनं छिनत्ति। नाऽपि असम्भवात् व्यक्तौ[7] प्रवृत्तिः। तथा हि असंबद्धप्रलापी**

शब्दनिवेशो युक्तोऽनर्थक्रियाकारित्वात् (।)

सत्यं (।) केवलमर्थक्रियाकारित्वेनैव प्रतिभासनात्तत्र शब्दनिवेशो युक्त इति प्रतिपादयिष्यते।

न त्वेवमपि तस्य ज्ञानाङ्शस्य स्वलक्षणत्वात् कथ शब्दवाच्यत्व।

अत्रोच्यते। बाह्याभिन्नस्तावत् स्वाङ्शो विकल्पे प्रतिभासत एव (।) न तावदस्य विकल्प[4]ग्राह्यत्वात् प्रतिभास सर्वात्मना निश्चयप्रसङ्गादनभ्युपगमाच्च।

नापि विकल्पेन बाह्यात्मतयाध्यवसाय एवास्य ग्रहण यथावस्थितेन स्वरूपेणाग्रहणादग्रहणे च कथन्तत्र प्रतिभास । ज्ञानस्वलक्षणत्वे तु स्वांशस्य सम्वित्स्वभावत्वात् प्रतिभासो युक्त । तेनाविद्यारूपस्य स्वाशस्य विकल्पस्य च यदि ज्ञानस्वलक्षणत्व नेष्यते तदा प्रतिभास एव न स्यादे[5]वमज्ञानरूपेण च विकल्पेन कथ स्वाङ्शस्य परिच्छेदोस्य ज्ञानधर्मत्वात्। तस्माज्ज्ञानस्वलक्षणत्वादेव स्वांशस्य विकल्पे प्रतिभास स बाह्याभिन्नो विकल्पविषयो व्यवस्थाप्यते। तस्य सम्विदितरूपस्यैव बाह्याभेदेन विकल्पेनाध्यवसीयमानत्वादत एव विकल्प. सामान्यविषय उच्यते न स्वलक्षणविषयोऽर्थस्वाशयोरेकस्यापि स्वरूपेणाग्रहणात्[6]। तेन स्वाशस्य ज्ञानस्वलक्षणस्यापि बाह्यात्मतयाध्यस्तस्य सामान्यरूपत्व। तथा च वक्ष्यति।

"ज्ञानरूपतयार्थत्वे सामान्ये चेत् प्रसज्यते।
तथेष्टत्वादपोह्यर्थरूपत्वेन समानते"ति। (प्र० वा० ३।९)

तस्य च शब्दवाच्यत्व युक्तमेव।

लक्षितलक्षणेत्यादि पर'। सत्य न सामान्यमर्थक्रियाकारि किन्तु व्यक्तिरेव
73b केवल व्य**क्तेरशक्यचोदनत्वात्** कारणात् सामान्ये नियुक्त शब्द[7] सामान्य लक्षयति (।) तेन सामान्येन शब्दलक्षितेन सम्बन्धाद् व्यक्तिरपि लक्ष्यत इति।

तदेतदप्रतीतिक। न हि गोशब्दादुच्चरिताद् गोत्वं प्रतीयते गौरपि तु गौरेवावसीयते। न नामैवन्तथाप्युच्यते। **अशब्दचोदितेत्यादि**।

यदि नाम जातितद्वतोस्सम्बन्धस्तथाप्यशब्दचोदिते व्यक्तिविशेषे **कथं प्रवर्त्तते** (।) नैव। दण्डदण्डिनोस्सत्यपि सम्बन्धे **न हि कश्चित्** प्रे[2]क्षापूर्वकारी **दण्डञ्छिन्धीत्युक्ते दण्डिनञ्छिनत्ति**। अशब्दचोदितत्वात्तथा जातौ चोदितायां **व्यक्तौ प्रवृत्तिर्न** युक्तेत्यर्थ ।

जातौ वाहदोहादीनामसम्भवादशब्दचोदितायामपि व्यक्तौ प्रवृत्तिर्भ-

स्यात्। न पुनस्ततोऽन्यत्र प्रवृत्तिः। वलीवर्ददोहचोदनावत्। न चार्थान्तरचोदने-ऽर्थान्तरं लक्ष्यते। सत्यपि सम्बन्धे[1] शब्देन दण्डिनो न प्रतीतिः। अनियतसम्बधित्वात् तत्र प्रवृत्तिर्न भवतीति चेत्। तत् तुल्यं जातावपि। व्यक्तीनां व्यंजने जातिः केवलं स्थित्यर्था। भ्रात्रादिश[2]ब्दास्तु सम्बन्धिशब्दत्वात् आक्षिपेयुः परम्। न तथा गोत्वादिशब्दाः सम्बन्धवाचिनः। अपेतव्यक्तीनां जातीनामपि तच्छ्रुतिभ्यो[3]

विष्यतीति चेदाह। **नापी**त्यादि। केवलमर्थान्तरसम्भवि कार्यमसम्भवित्यर्थे चोदयन् वक्ता प्रतिपाद्यस्या**सम्बद्धप्रलापी स्यात्**। न पुनस्ततोसमर्थाच्चोदितात् समर्थे[2] प्रवृत्ति**र्बलीवर्ददोहचोदनावत्** (।) म हि केनचिद् वलीवर्दन्दोग्धीत्युक्ते तत्र दोहा**सम्भवात्**। बलीवर्दा**दन्यत्र** सम्भवाया गवि दोग्धु **प्रवर्त्तते** श्रोता (।) केवलन्त**स्यैवम्भवत्य(सं)बद्धप्रलाप्ययं** वक्तेति।

स्यान्मत (।) वलीवर्दचोदने सम्बन्धाभावात् मा भूत् स्त्रीगव्या प्रवृत्ति.। जातौ तु चोदिताया सम्बन्धात् तद्व्यक्तौ प्रवृत्तिर्भविष्यतीत्याह। **न चे**त्यादि। **अर्थान्तरस्य**[3] सामान्यस्य सम्बन्धस्यापि **चोदनेनार्थान्त(र)स्येति व्यक्तेः**।

नन्वशब्दचोदिते सत्यपि सम्बन्ध इत्यादिनोक्त एवायमर्थ।

सत्यम् (।) अधिकविधानार्थन्तु पुनः प्रस्ताव। तदेव पूर्वपक्षयति। **अनियते**त्यादि। **अनियतः सम्बन्धो** यस्य दण्डस्य स तथोक्त। तथा हि दण्डिनमन्तरेणापि दण्डे विद्यते तद्भावस्तस्मात्। **तत्रे**ति दण्डिनि। **नेति चे**दिति दण्डे चो[4]दिते **प्रवृत्तिर्न भवतीत्यर्थ**। जातौ तु चोदिताया नियतसम्बन्धाद् व्यक्तौ प्रतीतिर्भवतीति भाव।

तदित्यादि सि द्धा न्त वा दी। **तदि**त्यनियतसम्बद्धत्व **तुल्यं जातावपि**।

कथमिति चेदाह। **व्यक्तीना**मित्यादि। स्यादेतद् (।) यथा भ्रात्रादिशब्दा. स्वार्थमभिदधाना द्वितीयमाक्षिपन्ति तथा जातिशब्दा इत्यत आह। **भ्रात्रादिशब्दास्त्वि**त्यादि। आदिशब्दात् पुत्रादि[5]शब्दा। **सम्बन्धिशब्द**वाच्य**त्वात्** सम्बन्ध्यन्तरापेक्षैव तेषा व्यवस्थापितत्वादिति यावत्। **आक्षिपेयुः परमि**ति द्वितीय भ्रात्रादिक। आक्षेपश्च द्वितीयसम्बन्धाकारविकल्पजनन। न तूपस्थापनमेव विनष्टेपि सम्बन्धिनि विकल्पोत्पत्ते। **न तथे**ति वैधर्म्यकथन। यदि सम्बन्धिवाचिन्य स्युस्तदायन्दोष स्यादित्याह। **अपेते**त्यादि। **अपेता** विन[6]ष्टा **व्यक्त**यस्सम्बन्धित्वेन यासा पा ण्ड वा दि **जातीनां**तासामपि **तच्छ्रुतिभ्यो** जातिवाचकेभ्य शब्देभ्यो **नित्यम**पेतव्यक्तिसम्बन्धित्वेनाप्य**नुगमप्रसंगः**। एव ह्यपेतव्यक्तिसम्बन्धित्वेन तासामनुगमो यद्यपेतानामपि व्यक्तीनामनुगम स्यात्। यद्वा जातीना सम्बन्धिभ्यो या अपेता व्यक्तयस्तासा तच्छब्देभ्यो नित्यम**नुगमनप्रसङ्गात्**।

नित्यमनुगमप्रसंगात्।

सर्वदा तत्सम्बन्धयोग्यताप्रतीतेरिष्टमेवेति चेत्। अथ सर्वदा गोशब्दादप्रवृत्तिः। सहिता[4]सहितावस्थयोर्विशेषेणानाक्षेपात्। व्यक्तिसम्बन्धिन्या जातेश्चोदनाद् अदोष इति चेत्। अथ सापि तद्विशेषणत्वेन आक्षिप्तैवेति[5] तद्वानभिधेयः स्यात्।

न च जातितद्वतोः सम्बन्धः कश्चित्, अन्योन्यं जंन्यजनकत्वेनानुपकारात्। ततो लक्षणमप्ययुक्तम्।[6] एवं जातौ न शब्दयोगः फलाभावात्। एवं तु—

तद्वानर्थक्रियायोग्या (जातिः) तद्वानलं;

74a **सर्वदेत्या**[7]दि पर। **सर्वदेति** व्यक्त्यपायानपायकालयो**स्तत्सम्बन्धयोग्यता-प्रतीतेरिष्टमेव** व्यक्त्यनुगमन**मिति चेत्**। एतत्कथयति (।) यथा भ्रात्रादिशब्दा स्वार्थमभिदधाना सम्बन्धिनमविशेषणात् क्षिपन्ति तथा जातिशब्दा अपीति।

उत्तरमाह। **सर्वदेति**। **सर्वदेति** व्यक्त्यपायाऽनपायकालयो**र्गोशब्दादप्रवृत्ति-र्वाहदोदादियोग्ये** व्यक्तिविशेषे। किङ्कारणमिति[1] चेदाह। **सहिते**त्यादि। सप्तमीद्विवचनमेतत्। जातेर्व्यक्ति**सहितासहितावस्थयोर्विशेषेणार्थ**क्रियाक्षमस्य विशेषस्या**नाक्षेपात्**।[2] एतदुक्तम्भवति। यथाऽतीतानागतव्यक्ते शब्दार्थरूपतया जातिशब्देनाक्षेपस्तथा वर्त्तमानाया व्यक्तेरुभयत्र शब्दार्थरूपतया प्रतिभासनस्या-विशेषणादिति।

व्यक्तिसम्बन्धिन्या जातेश्चोदनाद् व्यक्तौ प्रतीतिर्न प्राप्नोतीत्यय[2]**मदोष इति चेत्**॥

भवत्वेवं किन्तु **सापि** व्यक्ति**स्तद्विशेषणत्वेन** जातिविशेषणत्वेन जाति-चोदनाया**माक्षिप्तैवेति** न जाति केवलाभिधेया। किन्तु **तद्वानभिधेयः स्या**दिति पक्षान्तरपरिग्रह स्यात्। तत्र चानन्तरमेव दोषम्वक्ष्याम इत्याकूत॥

जातितद्वतोः सम्बन्धमभ्युपगम्यैतदुक्त (।) **सम्बन्ध एव** तु नास्तीत्याह। **न चेत्यादि**। कि कारणम् (।) **अन्योन्य**[3]म्परस्परम**जन्यजनकत्वेनानुपकारात्। तत** इति सम्बन्धाभावाज्जातिचोदनया व्यक्तेर्ल**क्षणमप्युक्तं। फलाभावा**दित्यर्थ-क्रियाया अभावात्।

व्यक्त्यभिन्नसामान्यवादिनोपि प्रत्यक्षवच्छाब्दे ज्ञाने व्यक्तिप्रतिभास स्यात्। भेदाशेन तु तस्यापि लक्षणमयुक्त। **एव**मित्यादिना पक्षान्तरमाशङ्कते। **तद्वानि**ति जातिमान्। **अल**मिति सम[4]र्थ.। **तत्रे**ति तद्वति। **स चे**ति सि द्धा न्त वा दी।

अस्यैव व्याख्यान **स च शब्द** इत्यादि। **तत्रे**ति व्यक्तौ **किमन्येन** सामान्येन

तत्र शब्दयोग इति चेत्—

स च।

साक्षान्न योज्यते कस्माद्;

व्यक्तौ शब्दयोगेन फलवच्चेत्[7], **स च शब्दः कस्माद् व्यक्तिषु साक्षान्न योज्यते।** 448b
तत्र किमन्येन व्यवधिना ?

आनंत्याच्चेदिदं समम् ॥९६॥

स्यादेतत्। तद्वत्यो व्यक्तयो हि आनन्त्यात् शब्दाभिधानेऽसमर्थाः।[1] **एवं चेत् इदमानन्त्यं तद्वत्यपि समम्। जातिविशिष्टा व्यक्तय एव वक्तव्या इति अवश्यं (तत्र) सम्बन्धः करणीयः, अकृतसम्बन्धस्यानभिधानात्।**[2] **स च न शक्यः।**

तत्सम्बन्धिनि करणात् तत्रापि कृत एवेति चेत् उक्तमत्र। सत्यपि सम्बन्धे एकत्र कृताद् अन्यत्राप्रतीतौ हि न च सम्बन्धोऽस्तीति ॥९६॥

अपि[3] **च।**

व्यवधिना व्यवधायकेन कल्पितेन।

"आनन्त्याच्चे"ति पर।

"इदमानन्त्य सम"मित्युत्तर।

एतदेव व्याचष्टे। **स्यादेत**दित्यादिना। **तद्वत्य**पीति जातिमत्यपि। यस्मा-**ज्जात्या**दिविशिष्टाः सत्यो **व्यक्तय एव वक्तव्या इति** हेतोरव[5]**श्यन्त्रे**ति व्यक्तिषु शब्दस्य **सम्बन्धः करणीयः** (।) कस्माद् (।) **अकृतसम्बन्धस्यानभिधानात्**। कर्त्तरि षष्ठी। कृत सम्बन्धो यस्य शब्दस्य। तेनानभिधानादित्यर्थ। कर्मणि वा षष्ठी। अकृतसम्बन्धस्य वार्थस्य शब्देनानभिधानात्। **स चे**ति सम्बन्ध.। तद्वता सह **न शक्यं** कर्त्तुमानन्त्यात्। तस्मादयुक्तोयम्पक्ष।

तत्सम्बन्धिनि। व्यक्तिसम्बन्धिनि सामान्ये[6] शब्दस्य सम्बन्ध**करणाद्धेतो**-स्त**त्रापि** जातिसम्बन्धिभ्या व्यक्तौ सम्बन्ध **कृत एवेति चेत्**।

उक्तमत्रोत्तर (।) सामान्यस्य **सत्यपि सम्बन्धे एकत्र** जातौ **कृतात्** सकेता-**दन्यत्र** व्यक्ता**वप्रतीतिर्न** च जातितद्वतो सम्बन्धोस्तीत्येतच्चोक्त। न हि सत्यपि सम्बन्धे दण्डशब्दाद् दण्डिनि प्रतिपत्ति (।) तथा **न च** जातितद्वतो. कश्चित्**सम्बन्धो**-**स्तीति** सम्प्रत्युक्तत्वात् ॥[7]

एवन्तावत् **सर्वभावा** इत्यादिना वा र्त्ति क का र स्वाभिमत विधिशब्दलिग- 74b
विषयमाख्याय सप्रति येनाभिप्रायेणाचार्य दि ग्ना गे न भेदलक्षण सामान्यमुक्तन्त-

तत्कारिणामतत्कारिभेदसाम्ये न किं कृतः।

यामर्थक्रियामधिकृत्य अर्थेषु शब्दान् नियुंक्ते। तत्कारिणामर्थानामन्येभ्यो भेदात्, तेषां तत्रैवाभेद इति किन्न शब्दः प्रयुज्यते ?[4]

तद्वद्दोषस्य साम्याच्चेदस्तु जातिरलं परा ॥९७॥

स्यादेतत्। अन्यस्माद् व्यावृत्तेऽपि शब्दार्थे न तद्(वत्)पक्षाद् विशेषो व्यावृत्तिविशिष्टस्य तद्वतोऽभिधानात्। को हि व्यावृत्तिजातिव्यावृत्तिजातिमदित्यत्र विशेषः ? तद्वद् दोषोऽपि स्याद्।

अस्तु नाम जातिरन्या। जातिमपि हि अभ्युपगच्छताऽवश्यं वस्तूनि[6] **अभ्युपगन्तव्यानि, तदभावेऽस्या अपि अभावप्रसंगात्। एकस्माद्**

दर्शयितु पृच्छति। **अपि चेत्यादि**। एवम्मन्यते। यथा गोशब्दादप्रतीयमाने गोत्वे गोशब्द सकेत्यते तथा। **तत्कारिणां** विवक्षितार्थक्रियाकारिणाम**तत्कारि**भ्यो ये विवक्षिता[1]र्थक्रियाकारिणो न भवन्ति तेभ्यो यो **भेदस्तेन सामान्य** सर्वेषान्तत्कारिणामतत्कारिभ्यो भिन्नत्वादतस्तस्मिन्**भेदसाम्ये** अन्यापोहलक्षणे **किन्न कृतः** कस्मात् सकेतो न कृत इति पृच्छति पर। एतदेवाह। **यामर्थक्रिया**मित्यादि। दाहपाकादिलक्षणस्यार्थस्य क्रिया निष्पत्ति**मधिकृत्या**भिप्रेत्याय पुरुषो**र्थेष्व**भिप्रेतार्थक्रियाकारिष **शब्दान्नि**[2]**युङ्क्ते** प्रयुङ्क्ते। **तत्कारिणा**मभिप्रेतार्थक्रियाकारिणा**मन्येभ्यो**ऽतत्कारिभ्यो **भेदात्** कारणात् तत्कारिण सर्वविजातीयव्यावृत्ता अभिन्ना भवन्ति। तत **एषा**मर्थानान्त**त्रैवाभेद इति** अन्यव्यावृत्तिलक्षणे **किन्न शब्दः प्रयुज्यते**। व्यावृत्तिविशिष्टस्यापि सकेतवशात् प्रतीति स्यादिति प्रश्नाभिप्राय ।

तद्वदित्यादि। जातिमत्पक्षे यो दोष आचार्य दि ग्ना गे नो क्त[3] "स्तद्वतो नास्वतन्त्रत्वादि"त्यादिना यस्तद्वद्**दोषस्तस्य साम्यात्तस्य** दोषस्यावताराद् भेदेन्यव्यावृत्तिलक्षणे शब्दो न नियुज्यते। **अस्त्वयन्दोष** इत्यभ्युपगच्छति। नैवायन्दोषोस्तीति प्रतिपादितमभ्युगम्य त्वेवमुक्त। **जातिरलम्परा**। जातिस्त्वन्या न युक्तेत्यर्थ ।

स्यादित्यादिना व्याचष्टे। **अन्यस्माद्** अतत्कारिणो **व्यावृत्तेपि** वस्तुनि **शब्दार्थेभ्यु**[4]पगम्यमाने। **तद्वत** इति व्यावृत्तिमतः। न **तद्वत्पक्षादस्य** व्यावृत्तिमत्पक्षस्य **विशेषः**। एतदेवाह। **को हीत्यादि**। त्वया व्यावृत्तिरित्युक्त परेण जातिरित्यादि। **अत्र** वाच्ये **को विशेष** (।) नैव कश्चिदन्यत्र शब्दभेदात् ॥

अस्तु नामेति सि द्धा न्त वा दी। **जातिरन्येति** वस्तुभूता। किम्पुनस्तुल्ये दोषे व्यावृत्तिरङ्गीक्रियते न वस्तुभूता जातिरित्याह। **जाति**[5]**मपि हीत्यादि**। **तदभाव**

भेदस्तदन्येषामभेदः, तद्विशिष्टेष्वर्थेषु प्रतिपत्तिरस्तु। सर्वथा दोषपरिहा[7]रस्य 449a
कर्तुमशक्यत्वात् अर्थान्तराभ्युपगमे हि प्रयोजनाभावात्। तदर्थस्यान्येन सिद्धेः, तदभ्युपगमस्याऽपि अवश्यंभावात्॥

अपि च।

तदन्यपरिहारेण प्रवर्तेतेति च (ध्वनिः)।
(उच्यते) तेन तेभ्यो(स्या) व्यवच्छेदे कथञ्च सः॥९८॥

शब्दं प्रयुंजान एषोऽर्थेषु अनिष्टपरिहारेण (कथं) प्रवर्तेतेत्यभिप्रायेण प्रयुंक्ते। तत्रान्यत्र च[2] प्रवृत्यनुज्ञायां, प्रवृत्तिनिवृत्त्यनुज्ञायां वा अभिधानग्रहणवैयर्थ्य

इति व्यावृत्त्यभावे **अस्या** अपीति वस्तुभूताया जाते। भावाना भेदाभावे सत्यनेकार्थसमवेतरूपाया जातेरभावात्। न च जात्याभेद क्रियत इत्युक्त। तस्मादवश्यम्भेदोभ्युपगन्तव्य (।) स **चैकस्मा**दतत्कार्या(त् ?) **भेदस्तदन्येषान्त**-स्मादतत्कार्यादन्येषान्तत्कार्याणा**मभेदस्तद्विशिष्टेष्व**भेदविशिष्टेषु **प्रति[6]पत्तिरस्तु।** प्रतिपत्त्यालम्बनत्वात् प्रतिपत्तिरित्युक्त'। न पुन स एव प्रतिपत्ति। करणसाधनो वा प्रतिपत्तिशब्द' प्रतिपद्यन्तेऽनया व्यावृत्त्या करणभूतया भावानिति कृत्वा।

सर्वथेति। यदि व्यावृत्तिविशिष्टो जातिविशिष्टो वार्थो वाच्यस्तद्वत्पक्षोदितो यथानन्त्यादि**दोषस्तत्परिहारस्य कर्तुमशक्यत्वात्**। तुल्यश्चेद्दोषो जातिरेव[7] कस्मान्नाभ्युपगम्यत इति चेदाह। **अर्थान्तरे**त्यादि। **अर्थान्तरम्**वस्तुभूता जाति'। 75a
भिन्नेष्वभिन्नप्रत्ययजनन जाते प्रयोजनमिति चेदाह। **तदर्थस्ये**ति जातिसाध्यस्य। **अन्येने**त्यतत्कार्यव्यावृत्तिलक्षणेनाभेदेन (।) जात्यापि हि सोर्थ साध्यत इति कस्मा-ज्जातित्यागे व्यावृत्त्यभ्युपगम इत्यत आह। **त**दित्यादि। **तदभ्युपगमस्ये**ति व्या-वृत्त्यभ्युपगमस्य (।) त[1]दनभ्युपगमे हि जातिकल्पनैव न स्यादित्युक्त॥

अधुना शब्देनावश्यं व्यावृत्तिश्चोदनीयेत्यत आह। **अपि चे**त्यादि। विवक्षि-तादर्था**दन्यस्तस्य परिहारेण** श्रोता **प्रवर्तेतेति** कृत्वा **ध्वनिरुच्यते** प्रतिपादकेन। चकार एवशब्दस्यार्थे भिन्नक्रमश्च तदन्यपरिहारेणेत्यस्यानन्तर द्रष्टव्य। **तेने**ति ध्वनिना। **तेभ्य** इत्यनभिमतेभ्यस्तस्याभिमतस्यार्थस्या[2] **व्यवच्छेदे**ऽव्यवच्छेदेनाभि-धीयमान इत्यर्थ' (।) **कथं** श्रोता **प्रवर्त्ते**तेति।

शब्दमित्यादिनैतदेव व्याचष्टे। **एष** वक्तार्थेष्वभिमतार्थक्रियाकारिष्व**निष्ट-परिहारेणा**नभिमतार्थव्यवच्छेदेन **प्रवर्त्तेत** कथं नाम श्रोतेत्यनेना**भिप्रायेण प्रयुङ्क्ते।**

यदि शब्देनान्यव्यवच्छेदो न चोद्येत तदा **तत्र** प्रत्याय्याभिमतेऽ**न्यत्र चे**त्यनभिमते

(प्रसंगा)त्। अन्यव्यावृत्त्यनभिधाने चैकचोदनानादरात्, अवचनमेव स्यात्।

तस्मादवश्यं [3]व्यवच्छेदोऽभिधेयः। स च तदन्येष्वभिप्रश्चेत्, जातिधर्मोप्यस्ति। तं नियताभ्युपगमं नियतचोदनं जात्यर्थप्रसाधनं परित्यज्य[4] अर्थान्तरकल्पनं केवलमनर्थनिर्बन्ध एव यथा कल्पनमस्यायोगात्।
न वै न क्रियत एव व्यच्छेदः। प्रवृत्तिविषयं कथयद्भिर्जातिरुक्ता।[5]

प्रवृत्तिरनुज्ञा[3]ता भवति। तस्या च सत्यान्तस्याभिमतस्यार्थस्य यन्**नाम अभिधान**न्तस्य **ग्रहणवैयर्थ्यप्रसङ्गात्**। तथा ह्यानयेत्युक्ते वस्तुमात्रमाक्षिप्तन्तत्रानभिमतव्यवच्छेदायाग्निशब्द प्रयुज्यतेऽग्निमानयेति। यदि तु तस्मिन्नपि प्रयुक्तेऽनग्न्यानयन न व्यवच्छिन्नन्तदाग्निशब्देनोच्चारितेन न किंचित् प्रयोजन। आनयेत्यनेनाप्यनानयनस्य[4] प्रतिक्षेपादानयनमनानयन चानुज्ञात स्यादत. प्रवृत्तिनिवृत्त्यानुज्ञाया च सत्यान्तन्**नामग्रहणवैयर्थ्यप्रसंगा**दिति पूर्वेणैव सम्बन्ध। एव एकस्याभिमतस्याग्न्यादे**रेक**स्य चानयनादिलक्षणस्यानुष्ठानस्य या **चोदना** तस्या अ**नादरादवचनमे**व शब्दाना **स्यात्**। **अन्यव्यावृत्त्यनभिधाने** सति।

अथवा **प्रवृत्तिनिवृत्त्यनु[5]ज्ञाया**मिति वक्ष्यमाणेन सम्बन्धनीय। यथोक्तविधिना प्रवृत्तिनिवृत्त्यनुज्ञाया **चैकचोदनाऽनादरात्**। एकस्य प्रवृत्तिलक्षणस्य निवृत्तिलक्षणस्य वा व्यापारस्य चोदनाऽनादरादिति (।) शेष पूर्ववद् व्याख्येय।

एव च शब्दव्यवहारोच्छेद. स्यान्न चैवन्त**स्मादवश्य**मित्यादि। **स चे**त्यन्यव्यवच्छेद·। **तदन्येष्वि**ति तस्मादतत्कार्यादन्ये[6]ष्वेककार्येष्व**भिन्न**.। सर्वेषामतत्कार्याद् व्यावृत्तत्वात्। इति कृत्वानेकार्थव्यावृत्तित्व **जातिधर्मोप्यस्ति** व्यवच्छेदस्य। **तमि**ति व्यवच्छेदडकिम्विशिष्ट **नियत**मभ्युपगमो यस्य स तथा। तदनभ्युपगमे जातेरभावप्रसङ्गात्। **नियतं चोदनम**भिधान यस्य तत्तथा। तदचोदने शब्द-
75b प्रयोगस्य नैष्फल्य स्यात्। व्यक्तिषु बुद्धिशब्दयोर[7]नुगमलक्षणो **जात्यर्थ**स्तस्य **प्रसा-(ध)नं** प्रसाध्यतेऽनेनेति कृत्वा। एवभूत व्यवच्छेद **परित्यज्यार्थान्त**रस्य सामान्यस्य **कल्पन केवलमनर्थनिर्बन्ध** एवाऽवस्त्वभिनिवेश एव केवल नान्यत् किञ्चित कारणमस्तीत्यर्थ। किङ्कारण। (।) **यथा कल्पन** नित्यव्यापिताद्यकारै**रस्य** सामान्यस्य**अयोगा**दित्यन्यव्यावृत्त्यभिधानेऽयमभिप्राय आचार्य दि ग्ना ग स्य॥

नेत्यादि पर। **न वै न क्रियत एव** शब्देन **व्यवच्छेदः** किन्तु क्रियत एव। किमर्थन्तर्हि जातिरुक्तेत्यत आह। **प्रवृत्ती**त्यादि अर्थक्रियार्थिनो हि या **प्रवृत्ति**स्तस्या **विषयो** जाति। त **कथयद्भि**रस्माभिर्जातिरुक्ता।

व्यवच्छेदेत्यादि सि द्धा न्त वा दी। अस्य शब्दस्याभिधेयो **व्यवच्छेदोस्ति चेत्।**

व्यवच्छेदोस्ति चेदस्य नन्वेतावत् प्रयोजनम् ।
शब्दानामिति किं तत्र सामान्येनापरेण वः ॥९९॥

ननु प्रवृत्तिविषयं प्रतिपाद्यते इत्युक्तम् । तद् वचनमुक्त्वाऽपि नोक्ता जातिः । तथा[6] हि सा न प्रवृत्तियोग्येति निवेदितमेतद् । तद्द्वारेण अचोदिते प्रवृत्तिरप्यपोदिता[1] । तद्वच्चोदने हि व्यवधानम् ।

जातितद्वतोः प्रवृत्तिविषयत्वे[7] व्यावृत्तितद्वन्तौ किन्नेष्येते । व्यावृत्तेरवस्तुत्वेनासाधनत्वान्नेति चेत् । तदेतज्जातेरपि तुल्यम् । तद्वतः साधनात् दोषो न 449b

---

अस्य वा जातिमतो व्यवच्छेद शब्दवाच्योस्ति चेत् । **नन्वेतावदन्य**[2]**व्यवच्छेदेनेष्टप्रवर्त्तन प्रयोजनं शब्दानामिति** कृत्वा । **तत्रेति** व्यवच्छेदेनेष्टप्रवर्त्तने कर्त्तव्ये । तत्र वा प्रवृत्तिविषये **किं सामान्येनापरेण वः** प्रयोजन ॥

नन्वित्यादि पर । **उक्तमित्या** चार्य । **तथा** हीत्ययुक्तत्वप्रतिपादन । **सेति** जाति । अर्थक्रिया प्रत्यसामर्थ्यान्न **प्रवृत्तियोग्या** जाति । नापि गोशब्दाज्जाति प्रतीयते । **निवेदितमेत**[3]**दिति** "**तत्रानर्थक्रियायोग्या जातिरि**"(प्र स)त्यादिना । जातिद्वारेण च द्रव्येऽर्थक्रियासमर्थे पुरुषस्य प्रवृत्तिर्भविष्यतीति चेदाह । **तद्द्वारेणेत्यादि** । **अशब्दचोदिते सत्यपि** सम्बन्धे कथ प्रवर्त्तेतेत्यादिना । जातिद्वारेण तद्वानेव चोद्यत इति चेदाह । **तद्वच्चोदन** इत्यादि । व्यवधानमुक्तमिति लिङ्गपरिणामेन सम्बन्ध । सामान्येन तत्र व्यवधानमि[4]त्युक्त । स च साक्षान्न योज्यते कस्मात्(।) किन्तत्रान्येन व्यवधानेत्यादिना ।

स्यान्मत(।) न जाति केवला व्यक्तिर्वा शब्दाश्रया प्रवृत्तेराश्रय केवलाया जातरेर्थक्रियायामसामर्थ्यं । व्यक्तेश्च केवलाया अशक्यचोदनत्वात् । तस्माज्जातितद्वन्तौ सहितौ प्रवृत्तिविषयस्तयोरेव समस्तयो शब्दार्थत्वमित्यत आह । **जातितद्वतो**रित्यादि । **प्रवृत्ति**[5]**विषयत्व** इति शब्दाश्रयाया प्रवृत्तेर्विषयत्वेभ्युपगम्यमाने । **व्यावृत्तितद्वन्तौ किन्नेष्येते** प्रवृत्तिविषयत्वेनेत्यध्याहार । प्रमाणसिद्धौ हि व्यावृत्तितद्वन्ताविति भाव । **व्यावृत्ते**ः शब्दभूताया बुद्धिपरिकल्पितत्वा**दवस्तुत्व**मतो वाहदोहाद्यर्थक्रियाप्रत्य**साधनत्वान्न** प्रवृत्तिविषयत्वमिति चेत् । **तदेतदसाधनत्व जातेस्तुल्यं** सापि[6] वाहदोहादावसमर्था ।

तद्वत इति जातिमतोर्थक्रिया**साधनात्** प्रवृत्त्यभावलक्षणो **दोषो न भवतीति चेत्** ।

---

[1] Gsal-zin-te.

भवतीति चेत्, तुल्यं तद्व्यावृत्तिमतो[1]ऽपि।

व्यावृत्तिवादिनामिव शाब्दप्रत्ययः अवस्तुग्राही। स विभ्रमवशात् अकारकेऽपि कारकाध्यवसायी। वस्तुसंवादो त[2]त्प्रतिबन्धे सति स्यात्, वस्तूत्पत्याऽन्यथा नैव। वस्तूत्पत्तेरभ्रान्तिरिति चेत्। नैतदेवम्। अतत्प्रतिभासिनस्तदध्यवसायाच्च। प्रभायां मणिभ्रान्तिः प्रतिभासात् भ्रान्तेः। यदि[3] भ्रान्तेः संवादो नेति चेत्। न। यथोक्तवदेव[4] व्यभिचाराःस्यात्। वितथप्रतिभासो हि भ्रान्तिलक्षणम्। तन्नान्तरीयकतया हि संवादो न प्रतिभासापेक्षी[4]।

तुल्यमित्यादि सि द्धा न्त वा दी। **तदिति** अर्थक्रियासाधनत्वं।

एवन्तावत्प्रतिबन्धकन्यायेनाविद्यमानाया अपि व्यावृत्ते. सद्भावमभ्युपगम्य शब्दार्थत्वमुक्तमाचार्य दि ग् ना गेनेति व्याख्याय पुनर्विधिमेव शब्दार्थमाह। **अव-**
76a **स्तुग्रा[7]ही** चेत्यादि। यद्यवस्तुविषय· कथमर्थक्रियार्थिन पुरुष प्रवर्त्तयतीति चेदाह। **स विभ्रमे**त्यादि। स इति शाब्दप्रत्यय। **विभ्रमवशात्** पुरुष प्रवर्त्तयति। विभ्रम एव कथमित्याह(।)**अकारकेपि** स्वप्रतिभासेर्थक्रियायोग्यत्वात् **कारको** बाह्योर्थस्**तदध्य-वसायी** यतः। कथन्तर्ह्यनुमानादेर्वस्तुसम्वाद इत्यत आह। **वस्तुसम्वाद** इत्यादि। तस्मिन् साध्ये **प्रतिब[1]न्धे सति**(।)प्रतिबन्ध एव कुतः। **वस्तूत्पत्त्या** साध्यवस्तू-त्पत्त्या हेतुभूतया **अन्यथे**त्यसति प्रतिबन्धे। **नै**वास्ति सम्वाद शब्दादेः प्रत्ययस्य। **वस्तूत्पत्तेरभ्रान्तिरिति चेत्**। स्यादेतद् यदि वस्तुनश्चोत्पद्यते वस्तुसम्वादि शाब्दा-दिज्ञानमिति व्यापकविरुद्धोपलब्धिम्मन्यते। **नैतदेवं**। सत्यपि वस्तूत्पत्तावतत्प्रति-**भासिनो** वस्तुरूपाप्रतिभासिन**स्तदध्यव[2]सायाद्** वस्त्वध्यवसायाद् भ्रान्तित्व। ततो वस्तुरूपोत्पत्तिभ्रान्त्योर्विरोधाभावात् सन्दिग्धव्यतिरेकिता हेतोरिति भाव.। मणि**प्रभायाम्मणि**भ्रान्तिर्मणि सम्वादयत्येव। व्यभिचारमेव समर्थयन्नाह। **वितथे**त्यादि। एतदाह(।) **यदि भ्रान्ते**. सम्वादस्य च विरोधः स्यात् तदा भ्रान्तेर-वस्तुसम्वादन साध्य प्रत्यव्यभिचार. स्यात्। स च नास्ति।[4] यस्माद् **वितथ-प्रतिभासो भ्रान्तिलक्षण** न विसम्वादने। **तन्नान्तरीयक**तयेति वस्तुनान्तरीयकतया तत उत्पत्तेरिति यावत्। अयं **सम्वादो न प्रतिभासापेक्षी**। न वस्तुगतम्प्रति-भासमपेक्षते। वस्तुप्रतिबद्धत्वेनैवातत्प्रतिभासस्यापि सम्वादात्।

तस्मात् स्थितमेतद् वितथप्रतिभास्यपि शाब्द. प्रत्यय सति वस्तुप्रतिबन्धे तस्य सम्वा[5]दक इति।

---

[1] Ji-skad-bśad-pa-lta-bu-kho-nas.

वस्तुनि यथाभावं अर्पितचेतसः प्रवृत्तौ ग्राह्यस्य सामान्यस्यानर्थक्रियायोग्यत्वात् अप्रवृत्तिः तस्मिन्। अन्यत्रापि प्रवृत्तौ अतिप्रसंगः। तद्वद्ग्रहणे[5] च सामान्यवैयर्थ्यादयः प्रोक्ताः। जातिग्रहणेऽपि सम्बन्धात् श्लिष्टाभासा बुद्धिः प्रवर्त्तयतीति चेत्। तस्यैकस्यापि स्वभावस्थित्यग्रहणात् न जातिर्न[6] तद्वानिति परवाद एवाधीयते ॥९९॥

(घ) सामान्याभावे प्रत्यभिज्ञासगतिः

एवं हि अन्वयिनोऽप्यभावात् स्वभावेन भिन्नार्थेषु सैवैषेति प्रत्यभिज्ञाऽपि न स्यादिति चेत्।

नैष दोष[7] एवं— 450a

अथ पुनर्यथावस्त्वेव शाब्दः प्रत्यय इष्यते। तदा **वस्तुनि** बाह्ये। **यथाभाव** यथावस्तु **अर्पितचेतसः** आरोपितज्ञानस्य शब्दबलाद्यन्यथा वस्तूत्पन्नज्ञानस्येति यावत्। एव **प्रवृत्ता**वभ्युपगम्यमानायान्तस्य शाब्दस्य ज्ञानस्य सामान्य **ग्राह्य**मेष्टव्य स्वलक्षणे शब्देन चोदनाभावात् (।) तस्य च ग्राह्यस्य **सामान्यस्यानर्थक्रियायोग्यत्वाद्धेतोरप्र[6]वृत्तिस्तस्मिन्** विकल्पविज्ञानविषये सामान्ये। **अन्यत्रे**ति सामान्यादन्यत्र व्यक्तावशब्दचोदितायामपि प्रवृत्ता**वतिप्रसङ्गः**। गोशब्दादश्वव्यक्तावपि प्रवृत्ति स्याद् गोत्वसामान्यस्याश्वव्यक्तेश्च सम्बन्धाभावान्नैवमिति चेन्नाशब्दचोदिते सत्यपि सम्बन्धे प्रवृत्त्ययोगादित्याद्युक्तं।

अथ न केवला जातिः शब्देन चोदितेति किन्तु तद्वानिति (।) तदा **तद्[7]**- 76b
द्ग्रहणे चाभ्युपगम्यमाने **सामान्यवैयर्थ्यादयः प्रोक्ता**। व्यक्तिष्वेव साक्षाच्छब्दो नियुज्यता कि सामान्येनेति सामान्यवैयर्थ्यमुक्त। आदिशब्दाद् आनन्त्यादिदोषपरिग्रह'। जातिरेव शब्देन चोद्यते। सा तु जातिर्व्यक्तिसमवेतत्वान्न शक्यते केवला गृहीतुमतो व्यक्तिरूपेणैकीभूता गृह्यते (।) तदेवाशङ्कते। **जातीत्यादि**। **श्लिष्टाभासेति** स्वसामान्यलक्षणा[1]भ्या सम्भिन्नाभासा **बुद्धिरर्थक्रियाकारिण्या** व्यक्तौ **प्रवर्त्तयतीति चेत्**। तदा **न जातिर्न तद्वान्**। स्वेन रूपेण गृह्यत इत्यध्याहार। किङ्कारणम्(।)**एकस्यापि** सामान्यस्य तद्वतो वा या **स्वभावस्थि**तिरससृष्टं रूप तस्य श्लिष्टाभासया भ्रान्तया बुद्धया। **अग्रहणात्**। ततश्च भ्रान्ताया बुद्धेः प्रवृत्त्यभ्युपमगात् **परवाद एवा**न्यापोहवादिदर्शनमेव॥

एवमि[2]त्यादि परः। **अन्वयिन** इत्यनेकव्यक्तिगम्यस्य सामान्यस्य।

नैष दोष इति सि द्धा न्त वा दी। आदिशब्दादुदकाहरणान्तान्ताम्**भेदेपि** परस्परव्यावृत्तत्वेपि वस्तुधर्मतया **तां तां ज्ञानादिका** सदृशीमर्थ**क्रियां कुर्वतो** दृष्ट्वा तदन्येभ्योतत्कार्येभ्यो **यो विश्लेषो** विच्छिन्नः स्वभाव. स **विषयो** येषां ध्वनीनान्तैर्ध्वनि-

ज्ञानाद्यर्थक्रियान्स्तांस्तां दृष्ट्वा भेदेपि कुर्वतः ।
(अर्थान् तद)न्यविश्लेषविषयैर्ध्वनिभिः सह ॥१००॥

उक्तमेतद्[1] । **वस्तुभेदेऽपि सदृशार्थक्रियया चक्षुरादिवदिति चेत् । ज्ञानाद्यर्थक्रियामेकां तेषु पश्यतोऽन्येभ्यो भिन्ना वस्तुधर्मतयैव तदे**[2]**वेदमिति प्रत्ययं तद्व्यावृत्तिविषयध्वनिसंसृष्टं स्वानुभववासनाप्रबोधात् जनयन्ति । अन्यथा न भेदसंसर्गवती बुद्धिः स्यात् । यथा दण्डिषु**[3] **दण्डः । तत्र एकेन दण्डेन युक्ता अपि अन्यत्र स एवेति न (भवति) प्रतीतिः, अपि तु तद्विहेति । नैवं प्रत्यभि-**

भिरन्तर्जल्परूपै. **सह संयोज्यार्थान्** स [3] एवायमिति कुर्यादपि पुमान् । **अपि** शब्दो भिन्नक्रमोन्यदर्शनेपीत्यर्थ । पूर्वदृष्टादर्थादन्यस्य विलक्षणस्य दर्शनेपि सदृशार्थक्रियाकारित्वेन विप्रलम्भादेकत्वमारोप्य **प्रत्यभिज्ञानं** कुर्यादिति समुदायार्थ ।

कथ पुनर्भिन्ना अभिन्नामर्थक्रिया कुर्वन्तीत्यत आह । **उक्तमेत**दित्यादि ।

"एकप्रत्यवमर्शार्थज्ञानाद्येकार्थसाधने" (१।७५)

इत्यादिना[4] प्रागुक्तत्वात् । **एक**मिति सदृशी**न्तेष्वि**ति भिन्नेष्वन्येषु प**श्यत** पुस । अन्येभ्य इत्यतत्कारिभ्यो व्यावर्त्तमाना भावा **वस्तुधर्मतयैव** वस्तुस्वभावे-**नैव । तदे**वेदमित्येवमाकार मिथ्या**प्रत्ययं जनयन्ती**ति सम्बन्ध । किम्विशिष्ट-मित्याह । **त**दित्यादि । **तेभ्योऽतत्कार्येभ्यो** या **व्यावृत्ति**रेकार्थक्रियाकारिणाम-र्थाना सा **विषयो** यस्य **ध्व**नेस्तेन **संसृष्ट** सस[5]क्त **साभिलाप**मिति यावत् ।

यदि वस्तुधर्म्मतया **जनयन्ति** किन्न सर्वदेत्याह । **स्वानुभवे**त्यादि । तेषा-म्भावाना य स्वोनुभव पूर्वमुत्पन्नस्तेन या प्रत्यभिज्ञानोत्पत्तये **वासना** शक्ति-लक्षणादिता । तस्या **प्रबोधः** कार्योत्पादनप्रत्याभिमुख्यन्तस्याश्च प्रबोध पुनस्त-ज्जातीयपदार्थानुभवात् । एवलक्षणश्च प्रबोधो न सर्वकालमतो न सदा प्रत्यभि[6]-ज्ञानसम्भव इति । **संसृष्टभेद**मिति पूर्वपश्चाद्दृष्टयोर्व्यक्त्योर्भेद ससृष्ट एकीकृतो येन स तथा । **अन्यथे**ति यद्येककार्यत्वेन सादृश्यैनैकत्वमारोप्य भिन्नेष्वपि भ्रान्त प्रत्यभिज्ञान नेष्यते (।) अपि त्वेकसामान्ययोगात् तदा **न भेदसंसर्गवती** । भेदाना
77a ससर्ग एकरूपतापादनन्तद्वती बुद्धिर्न स्यात् । बहुष्वेकरूपा **बुद्धिर्न** स्यादित्यर्थ ।[7]

न ह्येकेन दण्डेन युक्ता अपि दण्डिन एकत्वेन गृह्यन्ते । तदेवाह (।) **यथा दण्डिष्वि**ति । न हीत्येतदेव व्यनक्ति । **तत्रे**ति दण्डिषु । **अन्यत्रे**ति एकस्माद् दण्डिनोन्यस्मिन् दण्डिनि । तद्दण्डद्रव्य यदेकदण्डिनि दृष्टन्तदिह द्वितीये दण्डिनीत्येव स्यात् । न तु तद्द्वारेण **स एवायन्दण्डी**ति । यद्वा यथा बहुष्वेकदण्डयोगात् । प्रत्येकमयमपि दण्डस्तथा स एवायन्द[1]ण्ड इति **न** भवति **प्रतीति**स्तद्वत् । व्यक्ती-

ज्ञानम्। तदेवेदमित्यथ कथम्? अन्यदस्ति। ततः एकं अनेकत्र पश्यतो[1]ऽपि भेदसंसर्गवत् न युक्तम्। विभ्रमवशात् तथा प्रतिभासने हि अविरोधः। [4]निमित्ताभावात् विभ्रमो न युक्त इति चेत्। त एव तदेकार्थकारिणो भावा अनुभवद्वारेण [5]प्रकृत्या विभ्रमफलाया विकल्पवासनाहेतुत्वात् निमित्तम्। मरीचिकादिषु जलादिभ्रान्तेर् भिन्नावपि अभिन्नाकारस्य परामर्शप्रत्ययस्य

नामप्येकसामान्ययोगान्न स एवायमिति प्रतीति स्यादपि तु तदिहेति।

भवत्वेवमिति चेदाह। नैवमित्यादि। तदित्यादिनोपसहार.। एकमिति समानमनेकत्र व्यक्तिपु पश्यतोऽपि पुसो भेदसंसर्गवत्। भेदाना ससर्ग एकाकारता तद्वज्ज्ञान न युक्तं। अन्यापोहवादिनस्त्वयमदो[2]प इत्याह। विभ्रमेत्यादि। भ्रान्तिसामर्थ्यादित्यर्थ । तथेत्येकरूपतया वस्तुभूतमेक सामान्य प्रत्यभिज्ञानस्य निमित्तन्तस्याभावाद् विभ्रमो न युक्तमिति चेत्। त एवेति व्यावृत्ता भावास्तस्य ज्ञानादेरेकस्यार्थस्य कारिण करणशीला। अनुभव एव द्वारं हेतुस्तेन प्रकृत्या स्वभावेन विभ्रमफलाया भ्रान्तिफलाया हेतुत्वान्निमित्तं।

ननु मरीचि[3]कादिषु जलादिभ्रांतेः सादृश्यमन्तरेणोत्पत्तावतिप्रसग·। सादृश्य चेदिष्यते सामान्यमपि कस्मान्नेष्यत इत्याह। मरीचिकादिष्वित्यादि। प्रथमेनादिशब्देन रज्वादिपरिग्रह। द्वितीयेन सर्पादिभ्रान्ते। तावेवेति जल-मरीचिकारूपौ भावो अभिन्नाकारस्य तदेवेद जलमित्येव रूपम्परामर्शप्रत्ययस्य निमित्तभूतो यो[4]नुभवस्तस्य जनकौ कारणं भिन्नावपि।

एतदुक्तम्भवत्यसदृशानान्तावन्न सादृश्यमस्ति। सदृशानामपि सदृशमेव स्वरूप भ्रान्तिनिमित्त। न तु सादृश्य। तथा हि जलानुभवज्ञानन्ताव(त्)जलाकार-परामर्शवासनामाधत्ते। सा च वासना यथा पुनर्जलस्वलक्षणानुभवेन प्रबोध्यते। तथा मरीचिकाख्यपदार्थानुभवेनापि[5] प्रकृत्या। तस्य तत्स्वभावत्वात्। ततो यथा जलानुभवाज्जलाकारपरामर्शप्रत्यय उच्यते। तथा मरीचिकानुभवादपि। अतश्च तौ जलमरीचिकाख्यौ भावानुभवद्वारेण जलभ्रान्तेर्निमित्त भवत। न चातिप्रसङ्ग·। तुल्येप्यजलरूपत्वे मरीचिकास्वरूपस्य स्वहेतुभ्य एव सादृश्योत्पन्नत्वान्न तु सादृश्ययोगात् सदृशो भव[6]तीति सामान्यप्रस्तावे न्यायस्योक्तत्वात्।

एवन्तावद् उ द्यो त क रा दिमत निराकृत्य मी मा स क मत निराकर्त्तुमाह। न हीत्यादि। तथा हि जलज्ञाने द्वय प्रतिभासते जलसामान्यन्तस्य च देशादिस-

---

[1] Sñam-pahi-śes-pa.

निमित्ता[6]नुभवजनको कारणम्। न तत्रान्यदेव किंचित् सामान्यं तथा प्रत्यय भूतम्। सत्त्वे वा सदर्थग्राहिणी बुद्धिः भ्रान्तिर्न स्यात्।

450b **अभूताकारसमारोपा[7]द् भ्रान्तिरिति चेत्। न। तत्सामान्यग्राहिणी स भवति। यमेव चाकारमियं आरोपयति, स एव तस्य विषयः। अविषयीकृतस्य समारोपो ऽसामर्थ्यात्। आकारान्तरवत्। स च तत्र नास्त्यत[1]: सामान्यं न विद्यते**

म्बन्धित्वन्ततो नेति बाधके प्रत्यये न देशादिसम्बन्धित्व बाध्यते न जलसामान्यमत

77b जलज्ञान सामान्यालम्बनमेवेत्यत उच्यते[7]। **न तत्र मरीचिकासु अन्यदेवेति भि किंचित् सामान्यं** जलसामान्यन्तथेति जलरूपेण। **सत्त्वे वा** जलसामान्यस्याभ्यु पगम्यमाने वस्तुभूतसामान्यग्राहित्वेन **सदर्थग्राहिणी बुद्धिः।**

अथ स्याद्(।)अन्यदेशाद्यवस्थितजलसामान्यालम्बिकैव जलबुद्धिर्न भ्रान्तिस्त दुक्त (।)

"सर्वत्रालम्बन बाह्य देशकालान्यथात्मकमि"ति।[9]

कथन्तर्हि मरीचिकाया[1] जलप्रतीतिर्भ्रान्तिरन्यदेशाद्यवस्थितस्य जलसामान्यस्य तत्र समारोपादिति चेत्। एतदेवाह। **अभूतेत्यादि।** मरीचिकास्वविद्यमानस्य जला**कारस्य समारोपाद् भ्रान्तिः।**

नेत्यादि सि द्धा न्त वा दी। **तत्सामान्यग्राहिणी** अन्यदेशावस्थितजल**सामान्य ग्राहिणी सा** जलबुद्धिर्न **भवति।** कस्मादित्याह। **यमेव चेत्यादि। यमेवाकार** मित्यभूत[2]जलाकार**मियं** जलबुद्धिस्तत्र मरीचिकास्वा**रोपयति।** आरोप्यमाण स्यापि कस्माद् विषयत्वमित्यत आह। **अविषयीकृतस्येत्यादि।** एतदाह (। विकल्पोत्पत्तिकाले यत्सामान्य न विषयीकृतन्तेन न तस्य समारोप.। आकारा **न्तरवत्।** न ह्याकारान्तरमग्न्यादि तत्र समारोप्यते तस्य तदानीमविषयत्वात् यश्चाकारो बाह्याभेदेनारोप्य[3]ते तस्यैव विषयत्वेन प्रतिभासन। **स चेत्यारोप्यमाण** जलाकारस्**तत्र** मरीचिकासु **नास्ति** बाध्यमानत्वा**ददतो सामान्य जलज्ञानन्न** विद्य सामान्यमस्येति कृत्वा। **तथा** मरीचिकावत् सत्यजलेष्वपि जलाकाराध्यारोपव जलज्ञानमसामान्य।

सतीत्यादि परः। अन्यदेव जल**सामान्य** सति तस्य **ग्रहे तदारोपो** जलारोप **नान्यथा[4]**(।) यदि जलसामान्यमन्तरेण सत्यजले जलारोपः स्यात् तदाऽतिप्रसंगः अग्न्यादावपि जलारोपः स्यात्।

---

[1] Ślokavārtika. **निरालम्बन०** 108

सति सामान्यग्रहे तदारोपो नान्यथा, अतिप्रसंगःस्यादिति। सति एककार्यकारिणां ग्रहे किन्नेष्यते। दृष्टे सामान्येऽवश्यं च व्यक्तीनां स्वार्थ[2]जननशक्तिरभ्युपेया।

ततस्त एवान्येभ्यो भिन्ना तादृशं ज्ञानं जनयन्तीति चेत्, तत्र सामान्येन किं करणीयम्? यथाभावं असंसृष्टभेद एव किन्न प्रत्येति अविद्याप्रभवात् वि[3]कल्पानां न च बाह्यार्थमनपेक्ष्य विभ्रमो भवति, अपि तु आन्तरं विप्लवम्[1]। यथा केशादि-

---

सतीति सि द्धा न्त वा दी। **एकं कार्यं** पानावगाहनादि तत्करणशीलाना सत्त्यजलाना **ग्रहे सति किन्नेष्यते** जलारोप। सामान्यमन्तरेण भिन्नानामेककार्यकरणशक्तिरेव नास्तीति चेदाह। **अवश्यं चेत्यादि**। प्रतिपादि[5]तं चैतद् (।)

"एकप्रत्यवमर्शार्थज्ञानाद्येकार्थसाधन" (३।७२)

इत्यत्रान्तरे।

अन्ये तु **न हि तत्रान्य**देव किंचित् सामान्यमस्तीत्यादिक ग्रन्थ सामान्यशब्द सादृश्यार्थ कृत्वा व्याचक्षते। तत्तेषा व्याख्यानन्नातिश्लिष्ट यत्तथा प्रतीयत इत्यादेरवाचकत्वात्। न हि सादृश्य जलरूपतया प्रतीयत इति।

तत इत्येककारणशक्ते·। **त एवे**ति यथोक्त[6]शक्तिषु युक्ता व्यक्तय एव न तु सामान्य। **अन्येभ्य** इत्यतत्कार्येभ्य.। **तादृश**मित्येकाकार। **यथाभाव**मिति पदार्थानतिवृत्तावन्वयीभाव.। यथा स्वलक्षण सामान्यविरहि स्थित। तदतिवृत्त्या **किन्न प्रत्येति विकल्प**प्रत्यय (।) कस्मात्तत्राभूत सामान्यमारोपयति। **यथाभाव**मित्यस्यैवार्थो**संसृष्टे**त्यादि। असंसृष्ट एकरूपतामना[7]- 78a
पन्न·। **भेदः** परस्पर विशेषो यस्य भावस्य स तथा। अशक्तिरेषा। यथावस्थितग्रहणप्रति **विकल्पाना**। कस्मात् **अविद्याप्रभवात्**। भूतार्थग्रहण विद्या। तद्विरोधाद् विकल्प एवाविद्या। प्रभाव एव प्रभवशब्देनोक्तः। विकल्पसामर्थ्यादित्यर्थ। यथास्थितवस्त्वग्रहण हि विकल्पस्य स्वभाव. प्रकृत्या भ्रान्तत्वात् तस्य[1] वस्तुभूत सामान्य विनाश एव विकल्पस्य विभ्रमो न युक्त इति चेदाह। **न चेत्यादि**। विकल्पस्वरूपमेवात्रान्तरो विप्लव उक्त। विकल्पस्यैव तत्स्वरूप येनासौ **बाह्यसाधर्म्यमनपेक्ष्य विभ्रमो भवती**त्यर्थ। केशाद्याकारा भ्रान्ति· **केशादिविभ्रमः** (।) स यथा बाह्यार्थानपेक्षः सन्नभूताकारोपग्रहणमान्तर**म्विप्लव**माश्रित्य भ्रान्तो भ[2]वति। तद्वद् विकल्पोप्यभूतसामान्याकारग्रहणादित्ययमत्रार्थोभिप्रेत.। भ्रान्तिबीजमान्तरो विप्लवस्तस्मादुत्पत्तेरित्यय-

---

[1] Lhun-ba-la brgyus-pa-dug.

बन्धा[1]नियमात् न हि विकल्पा उत्पद्यन्ते। सति मरीचिकादर्शने तदु-द्भवा जल-भ्रान्तिरिति अजलविवेकिनार्थेन स्वभावा[2]नुकारार्पणेन जननात् न यथा-स्वभावम्। तु सा विशेषलक्षणापाटवात् प्रत्ययापेक्षिणा वा स्ववासनाप्रबोधेन जन्यते। तस्माद् भिन्नभावजन्मा विकल्पविभ्रमो भ्रान्त्या[3] स एवायमिति प्रत्यभिज्ञानम्, न व्यतिरिक्तस्य सामान्यस्य दर्शनात्, न व्यतिरिक्तोस्य, व्यक्ति-वदनन्वयात् ॥१००॥

अपि च।

स्तथा सत्यजलादपि जलत्वशून्याज्ञातो जलविकल्पस्तस्याप्यतस्मिस्तद्ग्रह-प्रवृत्तत्वाद् भ्रान्तत्वं। तत्कुत एतदेकस्यार्थसम्वादो परस्य नेत्याह। **मरीचि-केत्यादि। अन्यस्य चेति** सत्यजले जलज्ञानस्य जलत्वसामान्यस्याभावान्मरीचयो जल च **भिन्नो भावस्तत उत्पत्तिस्तस्या अविशेषेपीति** सम्बन्धः। **वि[6]भ्रस्मय चाविशेषेपीति** जलरहिते मरीचिद्रव्ये यथा जलसामान्याध्यारोपाज्जलविकल्पो विभ्रमस्तथा सत्यजलेपि तस्याप्यतस्मिँस्तद्ग्रहरूपत्वादन**भिप्रेतार्थक्रिया पानादि**। तस्या **योग्यं** जलस्य स्वलक्षण**मयोग्य** मरीचिकाना। तत **उत्पत्ते**र्हेतो.
79a सत्यजले मरीचिकासु च जलविकल्पस्य। **यथाक्रमं सम्वादेतरौ[7]** इतर इत्यसम्वादः। **अयोग्य**मरीचिकास्वलक्षण**त्**। न ह्यजलरूप जलाकारस्य योग्यमिति मन्येत।

विकल्पेत्यादिना परिहार। **अर्थप्रतिबद्धो**र्थाकारानुविधानेनोत्पत्तिः। तदेव व्याचष्टे। **न ही**त्यादि। **यथार्थ**मिति पदार्थानतिवृत्तावव्ययीभाव। एव-कारश्च भिन्नक्रम.। नैव हि पदार्थानुरूप ग्राहकमुत्पद्यत इत्यर्थ.॥

कथन्तर्हि जलज्ञान[1]स्य मरीचिकाभ्य उत्पत्तिरुक्तेति चेदाह। **सती**त्यादि। मरीचिकासु चक्षुर्विज्ञानादौ भ्रान्तमुपजायते तस्मिन् सत्यनुभूताकार।ध्यारोपिणी **जलभ्रान्ति**रिति पारम्पर्येण **तदुद्भवा** मरीचिकोद्भवेत्युच्यते। **यथास्वभा**वमिति पूर्ववदव्ययीभाव। जलभ्रान्तिजननासमर्थ घटा**द्यजल**मित्युक्त। ततो **विवेकिना** जलभ्रान्तिजनन**समर्थेने**ति याव[2]त्। एवभूतेन मरीचिकाख्येनार्थेन। **न यथा-स्वभावं जननात्** तदुद्भवेत्युच्यते इति सम्बन्ध·। यथा स्वभावमित्यस्यैवार्थ. (।) **स्वभावानुकारे**त्यादि। स्वभाव**म**नुकरोतीति स्वभावानुकार.। स्वलक्षणानुरूप प्रतिविम्बकन्तस्य**ार्पणेन** ज्ञाने समारोपणेन। सा पुन. केन साक्षाज्जन्यत इत्याह। **सा त्वि**त्यादि। **से**ति जलभ्रान्तिर्जलात् मरीचिकाया यो **वि[3]शेष**स्तस्य लक्षणभेदेनावधारणन्तत्र**ापाटवा**द्धेतो.। **स्ववासना**। जलभ्रान्तिबीजन्तस्याः **प्रबो**ध आनुगुण्य तेन **जन्यते**। किम्विशिष्टेन **प्रत्ययापेक्षिणा** प्रत्ययो मरीचिका-दर्शन जलसाधर्म्यस्मरण च। **तस्मा**दित्युपसहारः। विजातीयाद् **भिन्नो भावः**

संयोज्य प्रत्यभिज्ञानं (कुर्यादप्य)न्यदर्शने ।
परस्यापि न सा बुद्धिः सामान्यादेव केवलात् ॥१०१॥

न हि परस्यापि सा बुद्धिः केवलात् सामान्यात् जन्यत इति कथनं युक्तम् ।

नित्यं तन्मात्रविज्ञाने व्यक्त्यज्ञानप्रसङ्गतः ।

यद्यनया बुद्धया नित्यं सामान्यं गृह्यते, अनेन ज्ञानेन व्यक्तिरनित्यैव स्यात् ।५

(ङ) तद्वत्तानिश्चयः

तदा कदाचित्संबद्धस्यागृहीतस्य तद्वतः ॥१०२॥
तद्वत्तानिश्चयो न स्याद् व्यवहारस्ततः कथम् ।

यदा सामान्याग्राहि विज्ञानं न भेदोपलब्धावुपयुक्तं, तदा न तौ कदाचिदपि सम्बन्धाप्रतिपत्तौ[6] इदमस्य सामान्यम् । न चेदं तद्वत् इति । तथा च तत्प्रतिपत्त्या तद्वति न प्रवृत्तिः, अर्थान्तरवद् ।

स्वलक्षणमात्रन्ततो **जन्म** यस्य विकल्पविभ्रमस्य स तथा विकल्प एव विभ्रम इति विग्र[4]हः । **न व्यतिरिक्तस्य सामान्यस्य दर्शनात्** । **इहेति** प्रतीतिप्रसङ्गात् । नाव्यतिरिक्तस्य सामान्यस्य दर्शनात् । **प्रत्यभिज्ञानमिति** प्रकृतेन सम्बन्ध· । **व्यक्तिवदनन्वयादिति** । व्यक्त्यात्मके तद्वदेव तस्यानन्वयात् सामान्यरूपमेव नास्तीति ॥

परस्येति सामान्यवादिन । **सेति** सामान्याकारा । **केवलादिति** व्यक्तिनिरपेक्षत्वात् । (।१०१॥)

न हीत्यादि विव[5]रण ।

कस्मान्नाहेतीत्याह । **नित्यमित्यादि** । **तन्मात्रविज्ञान** इति सामान्यमात्रग्रहे ।

यदीत्यादिना व्याचष्टे । **अनयेति** सामान्याकारया । **अनेन ज्ञानेनेति** सामान्यालम्बिना ।

तदेति व्यक्तेरग्रहे । **सम्बद्धस्य** सामान्ययुक्तस्य **तद्वत**· सामान्यवत ॥

तद्वत्ता सामान्यवत्ता । यदि सामान्यन्तदाश्रयश्च तेन ज्ञानेन गृह्येत तदोभयग्रहण[6]पूर्वकस्तद्वत्तानिश्चयो (न) भवेत् । **ततः** सामान्यग्रहाद् **व्यवहारो** व्यक्तौ प्रवृत्तिः **कथन्नैव** ।

यदेत्यादिना व्याचष्टे । **न ताविति** सामान्यतद्वन्तौ । **इदमस्य** भेदस्य **सामान्यं** । **तथा चेति** सामान्यतद्वतोः सम्बन्धाप्रतिपत्तौ । **तत्प्रतिपत्त्या** सामान्यप्रतिपत्त्या । **तद्वति** सामान्यवति । **अर्थान्तरवदिति** न ह्यश्वप्रतिपत्तिकाले तद्रूपेणा-

स्यादेतद्।

एकवस्तुस(हायाश्चेद् व्यक्तयोर्ज्ञानकारणम्) ॥१०३॥

451b **स्यादेतद्। व्यक्तयस्तदुपलम्भवस्तुकारणं, न केवलाः, यदा तस्य एकं सहकार्यस्ति तदा तत्सहितग्रहणात्।**

तदेकं वस्तु किं तासां नानात्वं समपोहति।
नानात्वाच्चैकविज्ञानहेतुता तासु नेष्यते ॥१०४॥

तदेकं तासां व्यवहारसमय इति। किमिति नानात्वं तदेकविज्ञानानुत्पादेकारणमुच्यते।

अनेकमपि यद्येकमपेक्ष्याभिन्नबुद्धिकृत्।

न च भेदात् अनेका जनयत्येवैकं विज्ञानमिति उक्तं। न भेदाजननविरोधीः। किं पुनः? सम्बन्धात्[1] विरोधः। तेनैकमेव सहकारीति चेत्। एवं तु—

79b गृहीते गोद्रव्ये[7]ऽश्वप्रतिपत्त्या प्रतिपत्तिरस्ति। एकवस्तुसहाया इति सामान्यसहायाः।

स्यादेतदित्येतस्यैव व्याख्यानं। तस्येति ज्ञानस्य। एकं सहकार्यस्तीति सामान्य सहकारि भवतीत्यर्थः। **तदा तत्सहिताः** सामान्यसहिताः। एव च सामान्यतद्वतोर्द्वयोर्ग्रहणात् सामान्यप्रतिपत्त्या तद्वति प्रतिपत्तिः सिद्धेति भावः॥

तदित्या चार्यः। **एकम्वस्तु** सामान्यन्तासां व्यक्तीनां **नानात्वं समपोहत्य**पनयति। किं पुनस्तासा नानात्वापोह इष्यत इत्याह। **नानात्वाच्चेत्यादि।** ह्यर्थः च शब्दः। **तास्विति** व्यक्तिषु। **किमित्यादिना** व्याचष्टे। **तेनैकेन** सामान्येन। भेदेषु **यन्नानात्वन्तदेकविज्ञानाकारणत्वे** भेदाना **कारणमुच्यते**। नानात्वाद्वचक्तयो नैक विज्ञानं जनयन्तीति। एकसामान्यसम्बन्धेपि यदि भेदानान्नानात्वादप्रच्युतिर्न तेष्वेकाका[2]र **विज्ञानमिति** पूर्ववद्वचक्तीनामग्रहण॥

अनेकमपि व्यक्तिरूपं। **एक**मिति सामान्य। **नेत्यादिना** व्याचष्टे। यदि **भेदाजननविरोधी** स्यात् तदा सत्यपि सामान्ये **भेदान्न जनयंत्येवैकं विज्ञानं।**

ताभिरिति व्यक्तिभिः (।) कि पुन. समस्ताभिरेव **विना**। नेत्याह। **प्रत्येकमिति**। तथा हि शावलेयाभावे बाहुलेये गोबुद्धिस्तथा तदभावेन्यत्राप्येवम्प्रत्येक सर्वा[3]सां व्यक्तीनामभावेपि। **तेनैकेन** सामान्येन **क्रियमाणां** धिय

---

[1] Bral-bas,

ताभिर्विनापि प्रत्येकं क्रियमाणां धियं प्रति ॥१०५॥
तेनैकेनापि सामर्थ्यन्तासां नेत्यग्रहो (धिया ।[1]

कथं तत्र तद्व्यक्तीनां सामर्थ्यं प्रतीयते। तदभावाद् ताभिः प्रत्येकं विनाऽपि-असति सामान्येऽभावात् इतरथा च भावात्।

नैष दोषः[4]। यथा नीलादीनामेकैकापायेऽपि चक्षुर्विज्ञानमुत्पद्यते तेषां समूहेऽपि नासामर्थ्यं, तथेहापि एकैकापायेऽपि जननात् न सर्वदा ऽसामार्थ्यमिति चेत्।

विषम उपन्यासः[5]। एवम्—

नीलादेर्नेत्रविज्ञाने पृथक्) सामर्थ्यदर्शनात् ॥१०६॥
शक्तिसिद्धिः समूहेपि नैवं व्यक्तेः कथञ्चन ।

प्रत्यभिज्ञानात्मिका प्रति **सामर्थ्यन्तासां** व्यक्तीना नास्ति। **इति** हेतोरग्रहो **धिया** सामान्यज्ञानेन **तासां** व्यक्तीना।

तदेवाह (।) **कथ**मित्यादि। **तत्र** ज्ञाने सामान्याकारे। **तद्भावादि**ति सामान्यप्रत्ययस्य भावात्। एतेन व्यतिरेकाभाव उक्त'। प्रयोगस्तु यो यदभावेपि भवति न तत्तन्निमि[4]त्त यथा शालिबीजाभावेपि भवन् यवाङ्कुरः। भवति च प्रत्येक शावलेयाद्यभावेपि बाहुलेयादौ गोबुद्धिरिति व्यापकविरुद्ध.। तन्निमित्तताया स्तदभावेन व्याप्तत्वात्। सामान्यस्य तु तत्र शक्तिरित्याह। **असती**त्यादि। असति **सामान्ये** सामान्यबुद्धेरभावात्। अनेन व्यतिरेक उक्तः। **इतरथा चे**ति सति सामान्ये सामा[5]न्यबुद्धेर्भावात्। अनेनान्वय उक्तः॥

यदि सामान्यसहितानामेव व्यक्तीना सामान्यबुद्धि प्रति सामर्थ्यमिष्यते। तदा तथोक्तन्यायेन सामान्यस्यैव शक्तिर्न व्यक्तीनामिति।

नैष दोष इत्याह पर.। **एकापायेपी**त्येकैकस्यापायेपीत्यर्थः। तथा हि यथा नीलादिसमुदायालम्बन **चक्षुर्विज्ञान**मुत्पद्यते। तत्र चैकैकस्मिन् नीलादावपनीते भव[6]त्येव परिशिष्टे च वर्ण्णस**समूहे** चक्षुर्बुद्धिर्न चेयता नीलादीना**मसामर्थ्य** समूहे किन्तु सामर्थ्यमेव। प्रत्येक नीलादीना समूहज्ञाने। **तथेहापि** व्यक्तिष्वेकैकापायेपि भवति सामान्यविज्ञानमिति। नेयता प्रत्येक **सर्वदा** व्यक्तीनामसामर्थ्यमिति सम्बन्धः। ततश्च यो यदभावेपि भवतीत्यादि प्रयोगेऽनेकान्त इति।

विषम इ त्या चा र्य[7]। उपन्यस्यत इत्युपन्यासो नीलादिदृष्टान्तस्तस्य प्रक्रान्तेन साम्यन्नास्तीत्यर्थः। नैव व्यक्तेः कथचनेति। न प्रत्येकं समस्तानां व्यक्तीना सामर्थ्यमित्यर्थः। 80a

इन्द्रिया (?नीला) दीनां चक्षुर्विज्ञानस्य प्रत्येकं सामर्थ्यं दृष्टमिति समूहे[6]ऽपि शक्तिरविरुद्धा। तथा व्यक्तयो सामान्यमनपेक्ष्य न कदाचित् अन्वयिज्ञानजनिकाः। तस्मादसमर्था एव व्यक्तयस्तत्रेति तेन न गृह्णेरन्।

4522a **तासामन्यतमापेक्षं तच्चेच्छक्तं न केवलम् ॥१०७॥**

अथ कुविन्दस्य वेमाभावे पटाकरणम्। कुविन्दः प्रत्येकं वेमाभावे तत एव कुविन्दाद् न पटोत्पत्तिः।

तथा च व्य[1]क्तीनां प्रत्येकं व्यक्तिविज्ञानजननेऽपि न सामान्यं केवलं तद्। स्यादेतत्। अथ किम्। व्यक्तीनाम्मध्ये कामप्येकामपेक्ष्य विज्ञानं जन्यत इति।

एवं सति।

तद्व्याचष्टे। **नीलादीनामित्यादि। प्रत्येकमपि सामर्थ्यं दृष्टमिति।** नीलादयो हि यथा स्वेन स्वेन रूपेण भिन्नास्तद्वच्चक्षुर्विज्ञानान्यपि। स्वाकारभेदात्। तत्र नीलसहिते[1]न समूहेन यज्जन्यते चक्षुर्विज्ञानन्न तत्तद्विकलेन यच्च तद्विकलेन न जन्यते तदन्यदेव। तस्मात् समूहाकारोपरक्तस्य विज्ञानस्य **प्रत्येक**न्न नीलादीन्प्रत्यन्वयव्यतिरेकानुविधानाद् गम्यते तेषा प्रत्येक सामर्थ्यमिति **समूहेपि शक्तिरविरुद्धा। तथे**ति नीलादिवत्। **न कदाचि**दिति प्रत्येक सहता वा।

एतदाह। यदि शावलेयसहितसामान्यजन्य गोज्ञानमन्यद[2]न्यच्च बाहुलेयसहायजन्य स्यात्(।)तदा व्यक्तीना प्रत्येक स्वाश्रयद्वारभाविज्ञाने शक्तिर्गम्येत। किन्त्वेकमेव सर्वासु व्यक्तिषु प्रत्यभिज्ञानन्तस्य सर्वत्रैकाकारत्वात्। प्रत्येक व्यक्तीना चाभावेपि सामान्यादेवास्योत्पत्ते। **तस्मादसमर्था एव व्यक्तयस्तत्र** सामान्यज्ञाने। **इति** हेतोस्तेन सामान्यज्ञानेन **न गृह्णेरन्**॥

तासाम्व्यक्तीनाम्मध्येऽन्यतमापेक्षमि[3]ति काचिद्व्यक्तिमपेक्ष्येत्यर्थ.। **तदि**ति सामान्य **केवलं** व्यक्तिनिरपेक्ष।

अथेत्यादिना व्याचष्टे। **कुविन्दस्तन्तुवाय.**। बहूना वेमानाम्मध्ये **प्रत्येकं वेमाभावेप्येकेनान्यतमेन पटं क**रोतीति (।) यद्यपि सर्वेषा व्यभिचारस्तथापि **न तत** एव **कुविन्दादेव** वेमरहितात् **पटोत्पत्ति**: शक्या वक्तु। यस्मान्न वेमरहित कुविन्द: पट करोति[4] केवलस्य पटकरणाशक्ते:। **तथा च न सामान्यं केवलन्तद्धेतुर्विज्ञानहेतु:।**

एवमित्या चार्य:। **तासामन्यतमापेक्षं** सामान्य शक्तमिति ब्रुवता व्यक्त्युपकार्यं सामान्यमिष्टमनुपकारिण्यपेक्षायोगात्॥

तदेकमुपकुर्युस्ताः कथमेकां धियञ्च न।

भिन्नार्थानां एकार्थयोगविरोधात् सर्वोयं आरम्भः चेत्[1]। यदि ता व्यक्तयोपि एकं सामान्यं उपकुर्यः, आसां विज्ञानेन कोऽपराधः[3] कृतः? तत्र किमन्तर्गडुना सामान्येन कार्यम्।

यथा भिन्नानामपि तासामेकसामान्योपकारशक्तिरस्ति, एवन्तदेकमेव विज्ञानं कुर्वन्तु[2]।

अपि च।

कार्यश्च तासां प्राप्तोसौ जननं यदुपक्रिया ॥१०८॥

न हि पूर्ववद् अनतिशयात्मानं विभ्रतोऽस्य कश्चिदुपकारकः, अतिप्रसङ्गात्।

एव चेत्तदेकं सामान्यमुपकुर्युस्ता व्यक्तय कथमेकां धियं च न। एवशब्दार्थे चशब्द। एका प्रत्यभिज्ञानात्मिकान्धियमेव कथ नोप[5]कुर्यस्तामेवोपकुर्युरिति यावत्।

भिन्नेत्यादिना व्याचष्टे। भिन्नाना विलक्षणानामेकार्थोपक्रिया। प्रत्यभिज्ञाद्येकार्थक्रियाविरोधिन्यसति सामान्य इति **सर्वोयं** सामान्यसिद्ध्यर्थं **आरम्भः। आसामिति** व्यक्तीना **विज्ञानेन** प्रत्यभिज्ञानाख्येनापराध कृतो यत् तद्विज्ञानन्न कुर्वन्ति (।) न कश्चित्कृतस्तस्मात्तदेव कुर्वन्तीति भाव.। तथा च **किम[6]न्तर्गडुना।** घटामस्तकयोरन्तरालवर्त्ती मासपिण्डोन्तर्गडुस्तेन तुल्यस्तथोक्त। तद्वन्निष्फलेनेत्यर्थ ॥

स्यान्मत (।) **भिन्नानामेकसामान्योपकारशक्तिरस्त्यतस्ते** सामान्यमेव साक्षादुपकुर्वते न तु विज्ञानमित्यत आह। **यथेत्यादि। एवन्तदेकमिति** सामान्यजन्य यद्विज्ञानन्तदेव कुर्वन्तु। कि सामान्योपकारेण निष्फलेन। एवम्म[7]न्यते (।) विज्ञाने 80b व्यक्तयो न स्वाकारोपधानेन व्याप्रियन्ते (।) सामान्यज्ञाने स्वलक्षणस्याप्रतिभासनात्। कित्वाधिपत्यमात्रेण (।) तच्च यथा सामान्ये तथा तद्विज्ञानेपि तुल्यमिति।

कि च यदि व्यक्तय सामान्यमुपकुर्वते तदा **तासा** व्यक्तीना **कार्यश्चासौ** सामान्यात्मा प्राप्त। यस्माज्**जननमेवोपक्रिया ॥**

तदेव स्फुटयन्नाह। **न हीत्यादि।** अतिशयो विशेषस्तदभावादन[1]तिशयमात्मान स्वभावमस्य। सामान्यस्योपकारकासन्निधे पूर्ववदुपकारकसन्निधाने-

---

[1] Btsams-pa-yin-la. [2] Rag-mod

अर्थान्तरेण जनने हि तस्य किं तेन क्रियते। तस्य तदाश्रयत्वेऽनुपकारिणः क आश्रया[5]श्रयिभावः अतिप्रसङ्गो वा। उपकारेऽपि तत्रैव तत्प्रतिबन्ध इति तत्करणात् तस्योपकारी किमन्योऽपेक्ष्यते? तदपेक्षस्याश्रयस्य। तदुपयोगेऽनुपकार्यत्वे केयं अपेक्षा[6] नाम? तदुत्पत्तिधर्मभावप्रतिबन्धत्वादपेक्षते नाम। अनाधेयातिशयत्वेऽपि अपेक्षते च परानिति व्याहतमेतत्।

पि विभ्रत कश्चिदुपकारको न हीति सम्बन्ध। **अतिप्रसङ्गात्**। एव हि सर्व सर्वस्योपकारक स्यात्। तस्मादुपकारकेणैवोपकार्यस्यातिशयो जन्यत इत्यभ्युपेय। स चातिशय उपकार्यस्यात्मभूत इति जननमेवोपक्रिया। सामान्यादर्थान्तरभूत एवातिशयो[2] व्यक्तिभिर्नान्यित इत्याह। **अर्थान्तर** इत्यादि। तस्योपकार्यस्य सामान्यस्य **किन्तेनार्थान्तरेणोपकारेण क्रियते**। तस्य चोपकारस्यार्थान्तरस्य किन्तेन सामान्येन येन तस्य सामान्यस्यासावुपकारसम्बन्धी स्यात्। सामान्यस्य सम्बन्धिन उपकारस्य करणाद् व्यक्तयोप्युपकारिण्य स्यु। उपकारस्य सामान्यमाश्रयस्तत आश्रयाश्रयिभावलक्षण स[3]म्बन्धस्तयोरित्यत आह। **तस्येत्यादि**। तस्योपकारस्य **तदाश्रयत्वे**। तत्सामान्यमाश्रयो यस्येति कृत्वा। तस्य वा सामान्यस्य तदाश्रयत्वे। तस्योपकारस्याश्रय इति कृत्वा। उपकरोतीत्युपकारी तदभावादनुपकारि सामान्यमुपकार सामान्यकृतोऽस्त्यस्योपकारस्येत्युपकारी। तत्प्रतिषेधादनुपकारी। अनुपकार्य इत्यर्थ। अर्थद्वय चैतत्त[4]न्त्रेणोपात्तम् (।)तेनायमर्थ (।)अनुपकारकस्य सामान्यस्यानुपकार्यस्य चोपकारस्य यथाक्रम **क आश्रयाश्रयिभाव** इति। **अतिप्रसङ्गो वे**ति। अनुपकारिण आश्रयाश्रयिभावे सर्वत्र तत्प्रसङ्गात्। **उपकारे वा** सामान्यकृते उपकारस्याभ्युपगम्यमाने। **तत्रैव** सामान्ये तस्योपकारस्य **प्रतिबन्ध इति किमन्यो** व्यक्तिभेदस्त**स्य**ोपकारस्य **करणात् तस्य** सामा[5]न्यस्य**ोपकारी** नैवेति चेत्। **तदपेक्षस्येति** व्यक्त्यपेक्षस्य**ाश्रयस्येति** सामान्यस्य। उपकार प्रत्याश्रयत्वात्। **तदुपयोगे** तस्मिन्नुपकारे। उपयोगे कल्प्यमाने नित्यत्वादनुप**कार्यत्वे** सामान्यस्य **केयं** व्यक्तिं प्रत्य**पेक्षा नाम**। नैव। कस्तर्ह्यपेक्षत इत्यत आह। **तदुत्पत्ती**त्यादि। तस्मादपेक्षणीयादुत्पत्ति सा धर्म स्वभावो यस्य स **तदुत्पत्तिध[6]र्म्म**भाव। स्वभावस्य **प्रतिबन्धादा**यत्तत्वा**दपेक्षते नाम** उपकारिण(।)नामशब्द. प्रसिद्धेद्योतक.। अनुत्पत्तिधर्मकमपि सामान्यमपेक्षत इति चेदाह। **अनाधेयेत्या**दि। यत्तैरुपकारकैरनाधेयोनुत्पाद्य आत्मा**तिशयो** यस्य स तथा। एवंभूत आत्मीयस्येति पुनर्बहुव्रीहिरेवम्भूत**त्वे** (?) सामान्यपदार्थ[7]

---

[1] Illigible

तस्माद् यः कश्चि[7]त् क्वचित् प्रतिबन्धः स सर्वो जन्यतायामेवोद्भवति। परभावजनने हि तदनुपकारात्, अकिञ्चित्करस्यानुपकारात्। तस्माद् उपकारक-सामान्यविज्ञानजनने व्यक्त[1]स्य तत्कार्यता। 452b

केवलस्य हि सामर्थ्ये क्वचिदपि य(?अ)त्र सामर्थ्यासिद्धेरग्राह्यत्वं व्यक्तीनाम्। विज्ञाने प्रतिभासनात् व्यक्तयः समर्था इति चेत्। असिद्धोपकाराणां[2] कथं प्रतिभासः ? स एव सामान्याभ्युपगमे चिन्यते[1]।

यस्माद् अनुपकारकस्याविषयत्वं, अतिप्रसङ्गात्। नाविषयस्य विज्ञाने

अपेक्षते च परानिति व्याहतमेतत्। व्यापकविरुद्धोपलब्ध्या। तथा ह्यपेक्षाधेया- 81a
तिशयत्वेन व्याप्ता। तद्विरुद्धमनाधेयातिशत्वमिति।

यः कश्चिद् भाव प्रतिबन्ध कस्यचिद् वस्तुन **क्वचिदाश्रये स सर्वो जन्यताया** कार्यतायामे**वोद्भवति**। आश्रयेणाश्रितस्यानात्मभूत एवोपकार क्रियत इति चेदाह। **परभावेत्यादि। तदनुपकारात्तस्योपकार्यस्या[1]नुपकारात्**। न ह्यन्यस्मिन्नुपकृतेन्य उपकृतो नाम। तस्य तदाश्रयत्वेऽनुपकारिण. कोयमाश्रयाश्रयिभाव इति सर्वम्वाच्यं।

न च पौनरुक्त्यदोष। पूर्व सामान्यतद्वतोरुपकार्योपकारकभावद्वारेणोक्तमधुना सर्वविषय वास्तव सम्बन्धमुपादायेति। तस्मादर्थान्तरकरणादाश्रयाभिमतोकिचित्कर (।) तथाभूतोप्युपकारक इति चेदाह[2]। **अकिञ्चित्करस्येत्यादि**। यत एव**न्तस्माद् विज्ञानजनन** इत्यन्वयिविज्ञानजनने। **व्यक्त**--मवश्य**मस्य** सामान्यस्य। **तत्कार्यता** व्यक्तिकार्यता (।)

यथोक्तदोषभयात् **केवलस्य** व्यक्त्यनपेक्षस्यान्वयिविज्ञानजनन प्रति **सामर्थ्ये**भ्युपगम्यमाने **व्यक्तीना क्वचिद**पि काले। **अत्रेत्यन्वयिविज्ञाने सामर्थ्यासिद्धे**-कारणाद**ग्राह्यत्वं व्यक्तोनां**। अकारणस्य विषयत्वायो[3]गात्। **विज्ञाने प्रतिभासनादिति**। न ह्यसमर्थस्य शशविषाणादेरन्वयिविज्ञाने प्रतिभासनमस्ति। **व्यक्तयस्तु** प्रतिभास·ते (।) तस्मात् सामान्यवत्ता अपि **समर्था** इति। असिद्ध सामान्यविज्ञाने उपकारो यासा व्यक्तीनान्ता **असिद्धोपकारास्तासां कथं** सामान्यविज्ञाने **प्रतिभासः** (।) नैव। उपकार एव कथमसिद्ध **इति चेदाह। स एवेत्यादि**। **स** इ[4]त्युपकारः **सामान्याभ्युपगमे** हि तस्यैव तत्र सामर्थ्यन्न व्यक्तीना। यथोक्त।

"ताभिर्विनापि प्रत्येक क्रियमाणा धिय प्रती"त्यादि (१।१०५)।

माभूद् व्यक्तीनामुपकारः सामान्यविज्ञाने प्रतिभासस्तु कस्मान्न भवतीत्याह। **यस्मादित्यादि। अतिप्रसंगादिति। अनुपकारकस्य विषयत्वे** सर्वस्य विज्ञानस्य

---

[1] Bsam-par-bya-ba.

प्रतिभासनम्। अनुपकारकस्याविषयत्वे[3]ऽतीतादीनामविषयता, असतां अनुपकारित्वादिति इति चेत्। भवन्तु तद्विषयाणि निर्विषयाणि। निर्विषयत्वेऽपि तद्रूपानुभवाहितवासनाया उत्पद्यमानत्वात्,[4] स आकारो विज्ञानस्यात्मभूत एव।

भावाभावानुविधानात् सामर्थ्यं न तु प्रतिभासनात्। अप्रतिभासिनोऽपि सामान्यप्रतिभासिनां विप्लवाः केशादयः, तेषां निष्क्रियत्वात्।

सर्वो विषयः स्यात्। माभूद् विषय प्रति[5]भा(स)स्तुकस्मान्नेति **चेदाह**। **नाविषयस्येत्यादि**। **अनुपकारकस्येत्यादि**। अनुपकारस्येति पाठान्तर। तत्र न विद्यते विज्ञानकार्यस्योपकारो यस्मादर्थात् सोनुपकार इति व्याख्येय। तस्या**विषयत्वेऽ**तीतानागतादीना। आदिशब्दात् प्रधानेश्वरादीना यथागमक कल्पिताना ग्रहण। **असता**मित्यसामान्यहेतु·। **भवन्त्वित्यादिना** सि[6]द्धसाध्यतामाह। **तद्विषयाणी**त्यतीतविषयाणि (।) **निर्विषयत्वे** कथन्तेष्वन्तर्भविष्यति चेत्येवमाद्यर्थानुकारी प्रतिभास इत्यत आह। **निर्विषयत्वेपीत्यादि**। **तदनुपकारी**ति योसावर्थोनुभूतोऽतीतश्च तदनु(प)कारी। अस्पष्टेन रूपेणातीतस्यैवार्थस्यानुकारान्नातीता-
81b दिकन्नाम किञ्चिदस्ति यस्य रूपमनुकुर्यात्। स च प्रतिभासो[7] **विज्ञानस्यात्मभूत एवास्पष्टरूपस्य** बहिरविद्यमानत्वात्। तद्रूपानुकारित्वे कारणमाह। **तद्रूपानुभवेत्यादि**। यद्रूपो वर्त्तमानार्थानुभवो जातस्तेन या **वासना आहि**ता तत **उत्पद्यमानं** ज्ञानमनुभूतार्थाकारेणोत्पद्यत इत्यर्थ। युक्तमतीते तद्रूपार्थानुभवोत्पत्तिर्वर्तमानावस्थायामर्थस्यानुभूतत्वाद् अनागतादौ कथ। न हि तत्रानुभवो[1]स्ति। तत्राप्येवम्भूतोर्थो भविष्यतीत्येवभूताच्छब्दाद् योभिलापससृष्टो विकल्प स एव स्वसविदितत्वात् तद्रूपोनुभवस्तेनाहितवासनोत्पत्तेरदोष·।

एव प्रधानादिविकल्पेष्वपि यथागम शब्दार्थाकारविकल्पानुभववासनोत्पत्तिर्व्याख्येया। एवमतीतादीनामविषयत्वे प्रसङ्गादनुपकारको विषय इति यदुक्तन्तदैकान्तिकमेव। तथा व्यक्ती[2]नामसिद्धोपकाराणामविषयत्वान्नास्ति सामान्यज्ञाने प्रतिभासः। ततश्च यदुक्त(।) समर्था व्यक्तयो विज्ञाने प्रतिभासनादिति (।) तस्यासिद्धत्वमुक्त।

अधुना प्रतिभासमङ्गीकृत्यानैकान्तिकत्वमाह। **भावाभावेत्यादि**। अर्थभावे भावस्तदभावे चाभावो विज्ञानस्य **भावाभावानुविधानं**। **तस्माद्धेतोरर्थस्य** विज्ञाने **सामर्थ्यं** गम्यते। **न तु[3] प्रतिभासनात्**। यस्माद् वस्तुस्थित्या सामान्यस्यासत्यपि प्रतिभासने विकल्पविज्ञाने सामर्थ्याभ्युपगमात्। तदेवाह (।) **अप्रतिभासिनोपीत्यादि**। **न हि व्यक्तिव्यतिरेकेण सामान्यं प्रतिभासते**। यदपि सामान्य-

अभिन्नप्रतिभासा धीर्न भिन्नेष्विति चेन्मतम्।

नानेकस्मात् एककार्यकरणमिति वाच्यम्। अथ चेत् भिन्नेषु अर्थेषु तद्व्यवस्थानं, धीरभिन्नप्रतिभासिनी च न हि स्यात्। न सामान्यप्रतिभासिनीषु स्वलक्षणप्रतिभासः।

तदभावेऽपि तासां भावात्, आकारान्तरेण स्वविज्ञाने प्रतिभासनात्, एक-

---

प्रतिभासि विकल्पविज्ञानन्तदपि वर्ण्णसस्थानाद्याकारमेव। न हि तत्रापि वर्ण्णाद्याकारविविक्तोन्य· सामान्याकारो लक्ष्यते।[4] न च वर्ण्णसस्थानाद्यात्मक सामान्य। तस्मान्न वस्तुस्थित्या सामान्य प्रतिभासते (।) तथापि तस्याप्रतिभासिनो भवन्मतेन भावात्। विज्ञाने सामर्थ्यात्। भाव्यते जन्यते कार्यमनेनेति भाव सामर्थ्यमुच्यते। सत्यपि च प्रतिभासने नास्ति सामर्थ्यमिति दर्शयन्नाह। **प्रतिभासिना**मित्यादि। विप्लवन्ते वस्तुत्वादपगच्छन्तीति **विप्लवाः केशादय** एव[5](।) विप्लवा इति विग्रह·। ते हि तैमिरिकादिदर्शने प्रतिभासन्ते तथापि ते**षामभावात्**। पूर्ववद् भावशब्दव्युत्पत्तेरसामर्थ्यमभावशब्देनोच्यते। विज्ञानजनन प्रत्यसामर्थ्यमित्यर्थ। तदेव सामर्थ्येपि प्रतिभासदर्शनात् प्रतिभासनात् सामर्थ्यमित्यस्यानेकान्त उक्तो भवति।

"तदैकमुपकुर्युस्ता कथमेकान्धिय च ने"ति (१।१०७)

यदुक्तन्तत्र[6] परस्योत्तरमाशकते। **अभिन्ने**त्यादिना। **अभिन्नप्रतिभासा** एकाकारा। **भिन्नेषु** स्वलक्षणेषु। तेषा स्वलक्षणानामाकारस्तदाकार सोपित आहितो यस्याम्बुद्धौ सा तथा (।) एवंभूता चासा**वभिन्नप्रतिभासिनी च न हि स्याद्** यदि विलक्षणेभ्य एवोत्पद्येत। भवति चाभिन्नप्रतिभासिनी। तस्मान्न विलक्षणेभ्य एवोत्पद्यते किन्तु सामा[7]न्यपदार्थादिति। 82a

नेत्यादिना प्रतिविधत्ते। एतत्कथयति (।) यदि स्वलक्षणानि स्वाकारा वा (?)तेन सामान्याकाराणा बुद्धीना जनकानीष्यन्ते तदेतद् युज्यते। **भिन्नेषु** कथमभिन्नप्रतिभासा बुद्धिरिति। तच्च नास्ति यतो **न सामान्यप्रतिभासिनीषु** बुद्धिषु **स्वलक्षणप्रतिभासः**। यस्मात् **सामान्यग्राहिणीषु** बुद्धिषु स्वलक्षणप्रतिभासाभ्युपगमे तिस्र. कल्प[1]ना.। (१)येन रूपेण चक्षुरादिबुद्धिषु व्यक्तयो भासन्ते तेनैव सामान्यबुद्धिष्वपि। (२) सामान्यबुद्धौ वा यद्रूपमाभाति तदेव स्वलक्षणाना। (३) रूपद्वयं वा एकस्य भेदस्याभ्युपगन्तव्य। येन केन चक्षुरादिबुद्धिषु भासतेऽन्येन विकल्पबुद्धिष्विति।

(१) तत्राद्ये पक्षे चक्षुरादिबुद्धिवत् स्वलक्षणाभावे सामान्युबुद्धीनामप्यभाव· स्यान्न चैव। **तदभावेपि** तस्य[2] स्वलक्षणस्याभावेपि **तासां** सामान्यबुद्धीना

स्मिन्ननेकाकारायोगा(दतिप्रसंगा)च्च।

453a **तस्मान्नेयं[7] तदुद्भवा भिन्नार्थग्राहिणी अभिन्ना भाति।**

अतत्प्रतिभासिन्यपि अध्यवसायविभ्रमात् व्यवहारयति लोकम्। स तु तस्यां प्रतिभासमान आकारो नार्थेष्वस्ति, अन्यत्र भेदाभेदिनः[1]। स चारूप एव। तमेवाकारं गृहीत्वा तथा विप्लवत इत्युक्तं प्राक्।

भावात्। (२) द्वितीयस्य पक्षस्याभावमाह। **आकारान्तरेत्यादि**। सामान्याकार**दाकारान्तरेण**सासाधारणेन **स्वज्ञाने** चक्षुरादिज्ञाने **प्रतिभासनान्न** सामान्याकार एव रूप व्यक्तीना। (३) तृतीयम्पक्ष निराकर्त्तुमाह। **अनेकाकारायोगादिति**। एकस्यानेकत्वमयुक्तमेकानेकत्वयोर्विरोधात्। **अतिप्रसङ्गा[3]च्चेत्येकस्यानेकत्वकल्पनाया न क्वचिदेकत्व स्यादित्यर्थ**। स्वलक्षण च सामान्यबुद्धौ न प्रतिभासते।

यत एवन्त**स्मान्नेयं** सामान्याकारा बुद्धि। **भिन्नार्थग्राहिणी** (।) आहितस्वलक्षणाकारा सत्य**भिन्नाकारा भाति। तदुद्भवा** भिन्नपदार्थोद्भवा। किन्तु स्वल[4]क्षणग्राहिणोनुभवेनाहिता वासनामाश्रित्य प्रकृत्या भ्रान्तैवेयमुत्पद्यते। पारम्पर्ये[4]-च व्यक्तयस्तस्या कारण कथ्यन्ते।

यदि सामान्यबुद्धिर्न स्वलक्षणप्रतिभासिनी कथ स्वलक्षणे लोक प्रवर्त्तयतीति चेदाह। **अतत्प्रतिभासिन्यपीत्यादि**। अस्वलक्षणप्रतिभासिन्यपि स्वप्रतिभासेऽनर्थेऽर्थाध्य**वसायविभ्रमाद्धेतोर्व्यवहारयति लोकं** दृश्यविकल्प्यावेकीकृत्य प्रवर्त्तयतीति यावत्। यदि सामान्यबुद्धि सामान्याकारा स एव पारमार्थिकन्तर्हि सामान्यम्भविष्यतीत्याह। **स तु तस्या**मित्यादि। **स प्रतिभासमानः** सामान्या**कारो नार्थेष्वस्ति**। तस्य व्यतिरिक्तस्य व्यतिरेकेणानुपलम्भनात्। अव्यतिरिक्तस्य च व्यक्तिवदनन्वयात्।

कथन्तर्हि व्यक्तिष्वभिन्नाकारप्रतिभास इत्याह। **अन्यत्र भेदादभेदिन** इति। भेदोन्यापोह· स एव प्रतिव्यक्त्यभेदी। तथा हि यथैका गोव्यक्तिरगोव्यावृत्ता तथान्यापि[6]। तदनेन प्रकारेण स्वलक्षणान्येव विजातीयव्यावृत्तान्यभेदीनि भेदइत्युच्यन्ते। अन्यत्र शब्दश्चायम्विभक्त्यन्तप्रतिरूपको निपात। अन्यशब्दसमानार्थ। न त्वयन्त्रल्प्रत्ययान्त सप्तम्यर्थस्याविवक्षितत्वात्। तेनायमर्थो यथोक्तेन प्रकारेण स्वलक्षणात्मकाद् भेदादभेदिनोन्य. प्रतिभासमान आकारो-
82b र्थेषु नास्ति किन्तु स्वलक्षणात्मक एव भेदो[7] विजातीयव्यावृत्तेरभेदी सर्वत्र विद्यतेऽभेदाध्यवसायात्। अभेदाध्यवसायस्य च स एव भेद पारम्पर्येण निमित्त।

ननु बुद्धावभिन्नाकार प्रतिभासते कथमर्थेषु नास्तीत्युच्यत इत्याह। **स चारूप** इति (।) ह्यर्थे च शब्दः। स हि विकल्पप्रतिभस्याकारो निःस्वभावस्तत्त्वा-

अपि च सामान्यवस्तुवादिवदपि व्यक्तीनां भेद एव कथं तत्र बुद्ध्याकारभेद[2] इति तुल्यं चोद्यम्। न तुल्यं, तत्र सामान्याभेदादिति चेत्। ननु तत्र तस्य सतोऽपि आभासो न लक्ष्यते, सा हि बुद्धिर्वर्णसंस्थानवती विभाव्यते। न चेदृशं सामान्यम्।[1] न च ततोऽन्यत्र[3] अभेदाकारोऽपि क्वचित्।

आकृतिसामान्यवादिनोऽपि स तथा विशेषवत् तस्य अव्यतिरेकात् अर्थावृत्तिरिति भेदात् नाभिन्नः प्रतिभासो युज्यते।

न्यत्वेन परमार्थतो व्यवस्थापयितुमशक्यत्वादिति सप्रत्येवोक्तत्वात्।[1] **तमेवाकारङ्गृहीत**बुद्धिस्तदाकारोत्पत्तिरेवास्या ग्रहणन्तथेत्यरूपस्याकारस्य ग्रहणाद् **विप्लवते** भ्रान्ता भवती**त्युक्तम्प्राक्**। अशक्तिरेषा विकल्पानामविद्याप्रभवत्वादिनोक्तत्वात्।

दोषस्य परिहारमुक्त्वाऽधुना तुल्यदोषतामापादयन्नाह। **अपि** चेत्यादि। **न तुल्यमिति** पर.। **तत्रेति भिन्नासु** व्यक्तिषु तत एव सामान्यात्तुल्याकाराद् बुद्धिरिति **न तु[2]ल्यं चोद्यं**।

नन्वित्यादि सि द्धा न्त वा दी। **तत्र** व्यक्तिषु **तस्य** सामान्यस्य **सतोष्या** (?प्या) **भास** आकारो **न लक्ष्यते**। यद्वा **तत्रेति** विकल्पिकाविकल्पिकाया बुद्धौ। स्यादेतद् (।) विकल्पिकायान्तस्याभासोस्तीत्याह। **सा हीत्यादि**। **सा हि** विकल्पिका बुद्धि**र्वर्णसंस्थानवती विभाव्यते**ऽनुभूयते। वर्णाद्याकारमेव सामान्यमिति चेदाह। **न चेत्यादि**। **ई[3]दृशमिति** वर्णसस्थानाकार गुणत्वाद् वर्णसस्थानादे सामान्यस्य च गुणव्यतिरेकात्। **न च तत** इति वर्णसस्थानादे·।

एव तावद् भिन्न सामान्य निराकृत्याभिन्न निराचिकीर्षन्नाह। **आकृती**त्यादि। स्वलक्षणानामात्मभूतमेव सादृश्यमाकृतिस्तदेव सामान्यन्तस्य वाद· स यस्यास्ति। तद्वा वदितु शील यस्य सा ख्य स्य **स तथा**। **विशेषव[4]त्** स्वलक्षणवत् **तस्य** सामान्यस्य स्वलक्षणा**दव्यतिरेकाद्धेतो**रर्थान्तरे द्वितीयादिव्यक्तिष्व**वृत्ति**। **इति** हेतोस्तदपि सामान्य स्वलक्षणमेव जातन्ततो **भेदाद्धेतो**र्विद्यमानस्य **नाभिन्नः प्रतिभासो युज्यते** व्यक्तिष्वित्यध्याहार।

तदेवमु द्यो त क रा द्यभिहितमभिन्नप्रतिभासमभ्युपगम्य व्यतिरिक्तस्याव्यतिरिक्तस्य च सामान्यस्यायो[5]गाद् भ्रान्तिरेवाय व्यक्तिष्वेकाकारप्रतिभास इत्युक्त।

---

[1] Bām-po bži-pa = **चतुर्थमाह्निकम्**

अथवा। अस्तु बुद्धेः प्रतिभासः—

"अभिन्नप्रतिभासाधीर्न भिन्नेष्विति"

प्रतिभासो धियां भिन्नः समाना इति तद्ग्रहात् ॥१०९॥

अस्तु प्रतिभासो धियां भिन्नाः समाना इति[4] तासां ग्रहणात्। नैव तासु अभिन्नः प्रतिभासः समाना इति ग्रहणात्। न हि एकप्रतिभासे समाना इति युज्यते। किन्तर्हि? तदेवेदमिति।

द्वयस्य[5] सम्बन्धादिति चेत्। न अप्रतिबद्धस्य सम्बन्धायोगात्, अतिप्रसङ्गाच्च। ताः समाना इति चेत्, कथमन्योन्यस्य साम्यम्? तत्सम्बन्धादिति चेत्। न।[6]

अधुनास्त्येकप्रतिभासो व्यक्तिष्वित्याह। **अथवास्त्वित्यादि**। यदुक्तम् (।) **अभिन्नप्रतिभासा धीर्न भिन्नेष्वित्येतदस्तु**। इष्टमेवैतदित्यर्थः। यत **प्रतिभासो धियां** सामान्यबुद्धीना **भिन्नः**। किङ्कारण (।) **समाना इति** तासा व्यक्तीना **ग्रहणात्**।

नैवेत्यादिना व्याचष्टे। **तास्विति** सामान्यबुद्धिषु[6] **अभिन्न** इत्येक(·)**प्रतिभासोस्ति** (।) कि कारण (।) **तासां** व्यक्तीना **समाना इति ग्रहणात्**।

ननु **समाना** इति ग्रहे सत्येक**प्रतिभास** कस्मान्न **युज्यत** एवेत्यत आह। **न हीत्यादि**। **किन्तर्हि तदेवेति** यत्पूर्वदृष्टन्तदे**वेदन्दृश्यत** इत्येव स्यान्न तु पूर्वेणेद समानमिति भेदाधिष्ठानत्वात् समानव्यवहारस्य। **द्वयस्येत्यादि**। **यदि** सामान्यमेव
83a केवलन्ता[7]भिर्बुद्धिभिर्गृह्यते तदा भवेदय दोष। किन्तु सामान्य विशेषश्च द्वयमपि सामान्यबुद्ध्या गृह्यते। ततो द्वयस्य ग्रहणाददोष। यतस्तेनैव सामान्येन युक्ता विशेषा समाना इति गृह्यन्त इति।

तथापीत्या चार्य। द्वयस्य ग्रहणेपि कल्प्यमाने **तदिहेति स्यात्**। तत् सामान्य यत्पूर्व व्यक्तौ दृष्टन्तदिह व्यक्त्यन्तरे दृश्यत इत्येव स्यान्न तु समान इति व्यक्तिभ्य ए[1]कान्तभिन्नत्वात् सामान्यस्य। **तदेवेत्यर्थान्तरभूत** गोत्वादिक **तासां** व्यक्तीना साम्य येन **तास्समाना इति चेत्। अन्यः** सामान्यात् **साऽन्यस्य** स्वलक्षणस्य **कथं** केन प्रकारेण **साम्य**। न केनचिदित्यभिप्राय। तथा हि व्यक्तिरूपानुकारात् सामान्य व्यक्तीना साम्य कल्प्येत (।) तच्च नास्ति व्यक्तिभ्योऽत्यन्तविलक्षणत्वात् सामान्यस्य। नाप्यनेनान्ये समाना येन तत्साम्य स्यात्[2]। न हि व्यक्तिरूपानुकारादिना साम्य किन्तु **तत्सम्बन्धात्**। व्यक्तिभिः सम्बन्धात्। सामान्य व्यक्तीना सामान्य**मिति चेन्नैतदेवं**। किङ्कारणम् (।) **अप्रतिबद्धस्य** व्यक्ताव-

कथन्ता भिन्नधीग्राह्याः समाश्चेदेककार्यता ।
सादृश्यं ननु धीः कार्यं तासां सा च विभिद्यते ॥११०॥

ग्रहणदर्शनात्। आसु अभिन्नप्रतिभासः।

ननु आस्वभिन्नप्रतिभास, न तद्[7]दर्शने भेदाभेदप्रतिभासात् न समानाः 453b

---

नायत्तस्य ताभिरनुपकृतस्येत्यर्थ । समवायलक्षणेन सम्बन्धेन सम्बन्धात् सामान्यस्य **साम्ये**भ्युपगम्यमानेऽतिप्रसंगः सख्यासयोगकार्यद्रव्याणामपि सामान्यरूपता स्यात् ।[3] ततश्च तत्सम्बन्धात् सख्येयादिषु समानप्रतिभास स्यात् ।

कथमित्यादि पर । समाना इति ग्रहणाद् व्यक्तिषु प्रतिभासभेद साध्यते (।) तच्चैतद् **विरुद्धं**। यस्मात् **समाश्चेता** व्यक्तय क**थम्भिन्नधीग्राह्या** एवेति सावधारण । अभिन्नधीग्राह्या अपि प्राप्नुवन्तीत्यर्थ । तथा हि यत्र किञ्चित् सामान्य कश्चिच्च विशेषस्तत्र समाना इति ग्रहण युक्तमन्यथा[4] घटपटादिवदभेदप्रतिभासः स्यान्न समाना इति।

तद्व्याचष्टे। **नन्वि**त्यादि। **आसु व्यक्ति**ष्वित्यनेन विशेषरूपमाह। **अभिन्नः प्रतिभास** सिद्ध इत्यध्याहार्य ।

अनेन च सामान्यस्य रूपमुक्त।

तदेव साधारणाऽसाधारणरूपग्रहणाद् व्यक्तय समाना गृह्यन्त इति समुदायार्थ । तत्कि समानेष्वेकानेकप्रतिभासो विद्यते येनैवमुच्यते।[5] यदि स्यादिहेति बुद्धि· स्यादित्युक्त। सामान्यात्मकत्वाद् विशेषाणा **समाना इति प्रतिभास इति चेत्।** नन्वनुगतप्रतिभासाभावे सामान्यमस्तीति कुत । न च समानरूपान्यथानुपपत्त्या सामान्यकल्पना युक्ता। स्वहेतुभ्य एव केषाचित् समानामेवोत्पत्ते केषाचिदसमाना। न च सामान्यात् तेषा समानरूपता युज्यत इत्युक्त।[6]

तेन यदुच्यते भ ट्टे न ॥

"न चाप्रसिद्धसारूप्यानपोहविषयात्मना ।
शक्त कश्चिदपि ज्ञातु गवादीनविशेषत ॥
अथासत्यपि सारूप्ये स्यादपोहस्य कल्पना।
गवाश्वयोरय कस्मादगोपोहो न कल्प्यते ॥
शावलेयाच्च भिन्नत्व बाहुलेयाश्वयोस्सम।
सामान्य नान्यदिष्ट च क्वागोपोहप्रवर्त्तन ॥
अपोह्यानपि चाश्वादीनेकधर्मान्वयाद्[7]ते।

प्रतीयन्ते इति चेत् न हि एककार्य(ता)सादृश्येनैव । अर्थज्ञाने द्वावाकारौ दृष्टौ। अदृष्टे यथा अर्थद्वयकल्पनेन स्वयमेव [1]एककार्या व्यक्तयः कल्पनाविषयतां उपगताः। तस्मादनया व्यभिचारेण तथा ऽऽरोप्यत इति न दोषः।

धीः कार्यं तासां सा च विभिद्यते।

तद्वत् प्रतिद्रव्यं तत्प्रतिभासिनोपि ज्ञानस्य (व्यक्ति)[2]भेदात् कथं

83b न निरूपयितु शक्यस्तदपोहो न सिध्यती[2]ति" (।)[1]

अपास्त । सामान्यमन्तरेणापि स्वहेतुभ्य एव गवादीना समानामुत्पत्तेर्यदि नाम सारूप्यमर्थान्तरभूत नेष्यते सरूपास्त्विष्यन्त एव ते। एवरूपाश्च येन भवन्त्यश्वादयस्ते सर्वेऽविशेषेणागोरूपतया निषिध्यन्त इति न काचित् क्षति'।

आ चार्यस्तु "न नाम स्वहेतुभ्य समाना उत्पन्नास्तथापि न सा[1]मान्यबलात् समाना इति प्रतीतिरि' ति दर्शयन्नाह। **नेत्यादि। तद्दर्शन** इति व्यक्तिग्राहिणि ज्ञाने। सामान्यज्ञाने वा। **भिन्नाभिन्नयो**रिति विशेषसामान्ययो । **एककार्यतासादृश्य**मिति। एककार्यतैव सादृश्य साम्य **तेनैव** समाना व्यक्तय **प्रतीयन्त** इत्यर्थः। न तु पारमार्थिकेन सामान्येन। तेनैककार्यता सादृश्य येषान्त एवापोह[2]विषया येषा त्वेककार्यता नास्ति तेऽपोह्या इति सिद्ध। यथा चैकान्तभिन्ना अप्येककार्यं कुर्वन्ति तथोक्त प्राक्।

कस्मान्न सामान्येन समाना प्रतीयन्त इत्याह। **न हीत्यादि। अर्थज्ञान इत्य**नुभवज्ञाने **द्वावाकारौ** भिन्नौ। **अर्थद्वयकल्पनेन** समानासमानकल्पनेन। **कल्पनाविषयता**मित्येकत्वारोपविकल्पविषयता। **तथे**ति समान[3]रूपतया। **अनया** विकल्पबुद्धया।

नन्वित्यादि पर ।

तासां व्यक्तीना **धीः कार्यं सा च विभिद्यत** इत्येतावान् कारिकाभागः। **प्रतिभाव**मित्येतदपेक्ष्य पठित। एवम्भावं प्रति। **तद्वदित्यादि** विवरण। **तत्प्रतिभासिनोपि** व्यक्तिप्रतिभासिनोपि **ज्ञानस्य। तद्वद्व्यक्तिभेदात्। कथमेककार्या व्यक्तयो** नैव। (।११०।।)

स्यादेतत् (।) नानुभवज्ञानेनैककार्या' व्य[4]क्तय' किन्तु यत्तद्विकल्पकमेक-

---

[1] Ślokavārtika.

एककार्याः? तद्धि तासां कार्यं भिद्यते। घटादेः उदकाहरणादि यदेककार्यं तदपि प्रतिद्रव्यं भेदात् भिद्यत एवेति। भिन्नानां[3] नैककार्यता इति चेत्। नायं दोषः। एवम्—

एकप्रत्यवमर्शस्य हेतुत्वाद् धीरभेदिनी।
एकधीहेतुभावेन व्यक्तीनामप्यभिन्नता ॥१११॥

निवेदितमिदं यथा वस्तूनां न स्वभावसंबन्धः[4]। तत्र एकाकारा बुद्धिर्भ्रान्तिरेव। तां क्रमेण भेदिनो विकल्पहेतवो भवन्तः पदार्था न

रूपाध्यारोपेण तदपेक्षयेत्यत आह। **तद्धीत्यादि**। तद्वचनुभवज्ञानन्त**तासां** व्यक्तीना **कार्यं** न विकल्पविज्ञानन्तस्य व्यक्त्यभावेपि भावात्। तस्यैव च विकल्पस्य समाना इत्येवमुत्पद्यमानस्य व्यक्तिषु कि साम्य। पटादीना शीतापनयनमित्येवमादिपरिग्रहः। **प्रतिद्रव्य**मित्यव्ययीभावात् षष्ठ्या अभ्भाव।[6] द्रव्यस्य द्रव्यस्य यो भेदस्तस्माद् **भेदात्** कारणभेदाद् **भिद्यत** इति यावत्।

नेत्या चा र्थः। **एकप्रत्यवमर्शस्येति** स्वविषयस्यैकाकारप्रत्ययस्य **हेतुत्वाद् धीर्निर्विकल्पिका सविकल्पिका वाऽभेदिनी** भाति। **एकधीहेतुभावेनेत्यध्यवसितैकरूपाया बुद्धेर्हेतुत्वेन व्यक्तीनामभिन्नता** भाति।

एतदुक्तम्भवति। प्रत्येक यद्यपि व्यक्तिस्वरूप[7]ग्राहिण्यो धियो भिन्नास्तथापि प्रत्यभिज्ञया तासामेकत्वमध्यवसीयते। अनेन चैककार्यतासादृश्येन व्यक्तीनामेकत्व। न त्वेकपरामर्शहेतुत्वेनानुभवज्ञानानामेकत्वमुपचर्यते। नापि तथाभूतानुभवज्ञानहेतुत्वेन व्यक्तीनामेकत्वमुपचर्यते। स्खलितप्रत्ययविषयत्वाभावादुपचरितोपचाराभावाच्च। वृत्त्यर्थानुरूपश्च कारिकार्थो न व्याख्यात स्या[1]त्। (।१११॥) 84a

ननु यद्येककार्यतासादृश्येन व्यक्तीनामेकत्वाध्यवसाय कथन्तर्हि बुद्धीनामेकत्वाध्यवसाय.। एककार्यत्वाभावात्। अथ ता स्वभावत एकत्वावसाय जनयन्ति व्यक्तयोप्येवम्भविष्यन्तीति किमेककार्यतासादृश्येन।

सत्यम् (।) आचार्य दि ग्ना गा भिप्रायेणैवमुक्तमित्यदोष। तस्मादेकत्वाध्यवसादेकत्वमिष्यते। न परमार्थत इत्यत आह[2]। **निवेदित**मित्यादि। **"सर्वभावाः स्वभावेन व्यावृत्तिभागिन"** (प्र० वा० १।४२) इत्यत्रोक्तत्वात्। **तत्रेत्यसर्गिषु** भेदेषु। **एकाकारा बुद्धिरतस्मिंस्तद्ग्रहाद् भ्रान्तिरेव।**

अथ स्यात्(।)सामान्यमन्तरेण भ्रान्तरेवायोग इत्यत आह। **तान्त्वित्यादि**। ताम्भ्रान्तिम्भेदिनः **पुनरर्था व्यावृत्तानि** स्वलक्षणानि **क्रमेण** जनयन्ति न साक्षात्।

जनयन्तीति निवेदितम्। स त्वेषामभिन्नोऽतत्कारिस्वभावविवेकः,[5] **इति ज्ञानादेः कस्यचिदेकस्य करणात्।**

तदपि प्रतिव्रव्यं अभिन्नम् प्रकृत्या अभेदावस्कन्दिनो हेतुत्वात् अभिन्नं ख्याति। तथाभूतहेत्वभेदाध्यवसायस्य ज्ञानाद्यर्थस्य हेतुत्वात्, व्यक्तयोपि। प्रकृत्या
45३a5 **एकं प्रत्ययं संसृष्टाकारं स्वभावभेदपरमार्थानुपचरितं जनयन्तीति असकृन्निवेदितम्।**

एवं चेत् एककार्यवस्तुभेदः।

स्वभाव(त) इति प्रकृत्या। चकारो निवेदितमित्यस्या[3]नुकर्षणार्थं। **एतदपि** तत्रैव प्रस्तावे **निवेदितं। क्रमेणे**ति यदुक्तन्तस्य व्याख्यान **विकल्पहेतवो भवन्त** इति। विकल्पकारणत्वादनुभवज्ञानम्विकल्प। विकल्पहेतोरनुभवज्ञानस्य हेतवो भवन्त इत्यर्थं। व्यक्तयोनुभवज्ञान जनयन्ति तच्चैकाकारा भ्रान्तिमित्यय क्रमार्थ.।

स त्वेषामित्यादिना का रि का र्थमाह। सर्वेषाम्भावानाम्भेदोन्या[4]पोह। कि स्वभावोऽतत्कारिविवेकः स एषामभिन्न इत्युच्यते। कस्माद् (।) **ज्ञानादेरर्थ-स्येन्द्रियस्योदकाहरणादेश्च कस्यचिदित्यात्मानुरूपस्यैकस्य करणात्।**

यद्वा (।) ननु बुद्धेरेवायमभिन्नाकार· कथ व्यक्तीनामित्यत आह। **स** त्वाकार **एषां** बाह्यानाम**भिन्नस्तथैव प्रतीतेः** (।) प्रतीतिरेव कुत। ज्ञानादे कस्यचिदेकस्य करणात् (।) स चाका[5]रो भेदोन्यापोह इत्युच्यते न सामान्य। किङ्कारणम् (।) **अतत्कारिस्वभावविवेको** यतः।

एतदुक्तम्भवति। प्रतिव्यक्तिर्गौर्गौरिति प्रत्ययेनातत्कारिस्वभावविवेको-तत्कारिस्वभावविविक्त एव स्वभावो विषयीक्रियते। न त्वर्थान्तरभूत सामान्यन्तेन भेद इत्युच्यते। एतत्पश्चार्द्धस्य व्याख्यान ॥१११॥

ननु कथ ज्ञानादेरेकत्वमित्याह। **तदपी**त्यादि।[6] पूर्वार्द्धस्यैतद् व्याख्यानं। **तदपि** ज्ञानादिकार्य**मभिन्नं ख्यातीति** सम्बन्ध। **प्रकृत्ये**ति स्वभावेन। **अभेदावस्कन्दिन** इत्यभेदाध्यवसायिन। **तथाभूते**त्यादिना व्यक्तीनामपि विकल्पं प्रति पारम्पर्येण कारणत्वमाह। **अभेदावसायो** विद्यते यस्मिन्तस्य ज्ञानादे-
84b **रित्यनुभवज्ञानस्योदकाद्याहरणादेश्चार्थस्य हेतुत्वात्** कारणा[7]त् क्रमेण व्यक्त-योप्येक प्रत्यय जनयन्तीति सम्बन्ध·। किम्विशिष्टमित्याह। **संसृष्टाकार**मित्या-दि। ससृष्टो व्यक्तिष्वारोपित एक आकारो येन स तथा। **स्वभावभेदोन्य-व्यावृत्त** रूप स एव **परमार्थोनुपचरितो**ऽस्येति विग्रहः। पारम्पर्येण व्यावृत्तस्वलक्षण-द्वारायातत्वाद् विकल्पस्य।

ननु च तान्तु भेदिनः पदार्था इत्यादिनाऽयम[1]र्थोऽनन्तरमेवोक्तः।

सा चातत्कार्यविश्लेषः,

एव।

तदन्यस्यानुवर्त्तिनः।

अदृष्टेः प्रतिवेधाच्च;

न हि दृश्यं विभागेन न प्रतिभासत इति[1]। सति वा क्वचिद् अनाश्रितं कथं ज्ञानहेतुरित्येतदप्युक्तम्। संकेतोपि न युक्तः। तस्मात्—

संकेतस्तद्विदर्थिकः ॥११२॥

एव युक्तः। योयं अन्योन्यं विवेकः भावानां तत्प्रतीतये संकेतोऽपि

सत्त्य (।) किन्तु क्रमेण विकल्पहेतवो भवन्त इत्याद्यस्यैवार्थोऽनेन स्फुटीकृत। एककार्यभेदवस्तुभूत सामान्यम्भविष्यतीत्यत आह। **सा चे**त्यादि। सा चैककार्यता। **अतत्कार्येभ्यो विश्लेषो** व्यावृत्त एव स्वभावो न वस्तुभूत सामान्य। कि कारणन्त-**दन्यस्य** स्वलक्षणादन्यस्यानुवर्त्तिनोन्वयिनो वस्तुनो व्यक्तिव्यतिरेकेणा[2]**दृष्टे प्रतिषेधाच्च** पूर्वोक्तात्।

न हीत्यादिना व्याचष्टे। **दृश्यमु**पलब्धिलक्षणप्राप्त **विभागेन** व्यक्तिभ्यो भेदेन। सति वा सामान्ये नित्यत्वादनाधेयातिष(?श)यत्वेन **क्वचिद्** व्यक्तयन्तरे **अनाश्रितं कथं ज्ञानहेतुः**। नैव। आश्रयव्यग्यस्य तस्य **ज्ञानहेतु**त्वमिष्टमित्य-भिप्राय। एतदप्युक्तमित्यनेन सम्बन्धनीय। अस्यापि प्रागुक्तत्वात्।

यत[3] एवम्भूत सामान्य नास्ति। तस्मात् **संकेतोपी**त्यादि। **तदि**त्यन्यापोह सम्बध्यते। तस्यास्यापोहस्य विकल्पेन स्वाकाराभेदेनाध्यस्तस्य **वित्** ज्ञान। तत्पूर्वको लाभश्च। तद्वित्। सैवार्थ फलमिति विशेषणसमास। (स)मय-स्यास्ति सकेतस्येति मत्वर्थीयष्ठन्। विकल्पाध्यवसितबाह्यार्थप्रतिपत्त्यर्थमिति समुदायार्थ.। सर्वश्चारम्भ फलार्थ इ[4]ति विदिर्लाभार्थोप्याक्षिप्त एवान्यथा सकेतकरणस्य वैयर्थ्यात्।

ननु तद्विदर्थो यस्येति बहुव्रीहिणा भवितव्य लाघवात्। बहुव्रीहिणोक्तत्वान्म-त्वर्थस्य तद्विभा(गा)नुत्पत्तिर्लाघवत्व। तथा च भाष्य[1] उक्त "कर्मधारयाद् बहुव्रीहिर्भवतीत्यादि"।

नैष दोषः। इदमपि तत्रोक्त[1] "क्वचित्कर्मधारय एव सर्वसाधनाद्यर्थ" इति। आकृतिगणत्वाच्च स[5]र्वसाधनादेस्तत्रायन्तद्विदर्थिकशब्दो द्रष्टव्य.। (।११२॥)

---

[1] Vyākarana-mahābhāṣya. [2] Ibid.

क्रियमाणोऽतत्कारिविवेकेन प्रवृत्या एव शोभते।

अतत्कारिविवेकेन प्रवृत्त्यर्थतया श्रुतिः।

यदि तत्प्रतीत्यर्थो न संकेतः, तस्य व्यवहारकालेऽपि असंस्पर्शान्नान्य-परिहारेण प्रवर्त्तेत[3]। न हि तेषां तेभ्यः स विवेकः शब्देन चोद्येत।

सा च श्रुतिः—

अकार्यकृतितत्कारतुल्यरूपावभासिनी ॥११३॥

धियं वस्तु(पृथग्भावमात्रबीजामनथिकाम्)।

योयमित्यादि विवरण। **अन्योन्यं विवेकोन्यव्यावृत्त** स्वभावो **भावानान्त त्प्रतीतये** तन्निश्चयार्थ स्वप्रतिभासेऽध्यवसितबाह्यरूपे **संकेतोपि क्रियमाण· शोभेत** युक्तियुक्तत्वात् (।) किमर्थ क्रियत इत्यत आह। **अतत्कारी**त्यादि। विवक्षितार्थ-क्रियाकारिणो ये न भवन्ति तेषा **विवेके[0]न** परिहारेण **प्रवृत्त्यर्थतया**। अतत्कारिषु-प्रवृत्तिर्माभूदित्यर्थं.।

अमुमेवार्थ व्यतिरेकमुखेण(?न) द्रढयन्नाह। **यदी**त्यादि। **तस्यान्य-परिहारस्य प्रतीत्यर्थो** यदि **न संके**तस्तत्कारिणी तदन्यपरिहारस्य व्यवहारकाले-प्यसस्पर्शात्। यद्वा यदि न तत्प्रतीत्यर्थ सकेत इति विजातीयव्यावृत्तस्वभाव-
85a प्रतीत्यर्थं सकेत.(।)**तदा** तस्यान्य[7]व्यावृत्तस्य स्वभावस्य **व्यवहारकालेपि** न केवल **सकेतकालेऽसंस्पर्शाच्छब्देनाविषयीकरणान्नान्यपरिहारेण प्रवर्त्तेत।**

एतदुक्तम्भवति। यदा विधिरूपेणान्यव्यावृतोर्थो विषयीकृतस्तदान्यव्यव-च्छेदः प्रतीयेत। एतदेवाह। **न ही**त्यादि। **विवेक** इति विविक्त स्वभाव.। **तेषान्त**त्कारिणान्तेभ्य इत्यतत्कार्येभ्य। यदि हि तस्य विविक्त[1]स्य स्वभावस्य प्रतीतये सकेत कृत स्यादेव व्यवहारेपि **शब्देन चोद्येत** (।) तथा चान्यपरिहारेण प्रवर्त्तेतेति संकेतोपि तद्विदर्थिक एव युक्त।

ननु च शब्दजनिता बुद्धि स्वाकारमेव बाह्यतयाध्यस्य ग्रहणादलीका। ततश्च तज्जनकस्य शब्दस्य कथम्वस्तुसम्वाद कथ चान्यापोहविषयत्वमित्यत आह।

सा चेत्यादि। अन्यापोहप्रति[2]पत्त्यर्थं या सकेतिका। **सा च श्रुतिः। धियं जनयन्त्य**पीति सम्बन्ध। किम्विशिष्टाम् (।) **अकार्यकृति**। अवाह्यरूपे स्वाकारे। **तत्कारि तुल्यरूपेणार्थक्रियाकारि** बाह्यैकरूपेणावभासोध्यवसाय इति तृतीया-समास· स यस्या विद्यत इति पश्चात् मत्वर्थीय।

जनयन्त्यप्यतत्कारिपरिहाराङ्गभाव[4]तः ॥११४॥

वस्तुभेदाश्रयाच्चार्थे न विसंवादिका मता ।
ततोऽन्यापोहविषया तत्कर्त्राश्रितभावतः ॥११५॥

एकं तमाकारमारोप्यार्थेष्वुत्पद्यमानां मिथ्यावभासित्वात् अकार्यकारिणमपि[5] कार्यकारिणमिवाध्यवसन्तीं वस्तुपृथग्भावमात्रबीजां समानाध्यवसायां मिथ्यां जनयन्त्यपि श्रुतिः तदन्यपरिहाराङ्गभावात्, परमार्थतः तद्व्यतिरे-

---

एतदुक्तम्भवति। स्वाकारमबाह्य बाह्यमिवाध्यवस्यन्तीमिति यावत्।

एतेन प्रवृ[3]त्त्य(र्थ)त्व श्रुतेराख्यात।

वस्तुभूतसामान्यमन्तरेण कुतस्तस्या उत्पत्तिरिति चेदाह। **वस्त्वित्यादि**। **वस्तूनाम्पृथग्भाव** इतरेतरभेदस्तन्मात्रं **बीज**ञ्कारण पारम्पर्येण यस्या सा तथोक्ता। यतश्चानुगत रूप व्यावृत्त चैकीकृत्य गृह्णात्यतोनर्थिकां जनयन्त्यपि श्रुतिरर्थे न विसम्वादिका। कस्माद् (।) **अतत्कारिपरिहाराङ्गभावतः**। विजाती[4]याव्यवच्छेदहेतुभावत ।

एतदुक्तम्भवति। यद्यन्यव्यावृत्तवस्त्वध्यवसायिनी बुद्धि जनयेच्छुतिस्तदा तदन्यव्यावृत्त एव स्वलक्षणे पुरुष प्रवर्त्तयतीति सम्वादिका स्यात्। सकेतकाले च श्रुतेरितरेतरभिन्न एव स्वभाव आश्रयस्तत्रास्या सकेतितत्वात्। तदेवम्पारम्पर्येण **वस्तुभेदाश्रयाच्च** कारणा**दर्थे**। **न विसम्वादिका मता**। व्यवहा[5]रकालेप्यन्यव्यावृत्तस्यैव वस्तुन प्रापणात्।

ननु विधिरूपेण वस्त्वध्यवसायात्कथ श्रुतेरन्यापोहविषयत्वमित्यत आह। **तत** इत्यादि। यतश्चा**तत्कारिपरिहारांगभाव**त श्रुतेर्वस्तुभेदाश्रयत्व च **ततः** कारणादन्यापोहविषया। एतदेव द्वयमाह। **तत्कर्त्राश्रितभावत** इति। तस्मिन्नपोहे कर्त्तृभावत.। आश्रितभावश्च[6] स्वार्थाभिधानद्वारेणार्थादतत्कारिपरिहाराङ्गभावतस्तस्मिन्नपोहे कर्त्तृभाव श्रुते.। व्यवहारकाले सकेतकाले च वस्तुभेदाश्रयद्वारेण प्रवृत्तेस्तस्मिन्नपोहे श्रुतेराश्रितभाव.।

एकेत्यादिना कारिकार्थमाह। **तमित्येकमाकारं** स्वप्रतिभासिन**मारोप्यार्थे**ष्वध्यस्योत्पद्यमानां। स च स्वप्रतिभासो[7] **मिथ्यावभासित्वादकार्यकारी**। तमे- 85b
वभूतम**पि कार्यकारिणमिवाध्यवस्यन्ती**। अनेना**कार्यकृ**तेत्यादि व्याख्यात। **वस्तुपृथग्भावमात्र**मन्यव्यवच्छेदमात्र यस्या बुद्धेरिति विग्रह.। **मिथ्याबुद्धि जनयन्त्यपि श्रुति**. (।)कस्मान्मिथ्याबुद्धिरित्यत आह। **समानाध्यवसाया**मेकाकारा-

किषु अर्थेषु[6] **न विसंवादिकेति।**

तथा हि तेषु स व्यतिरेको भूतः, सर्वथाऽभ्युपगमनीयत्वात्। व्यतिरि-
454b **क्तस्याव्यतिरिक्तस्य च सर्वथाऽयोगात्। तस्य वस्तुनि निवेशने शब्दज्ञानाभ्यां**[7] **दूरोत्सृष्टमेव वस्तु स्यात् तद्विषयाभिमतस्य तत्स्वभावात्, अन्यस्य वस्तु-धर्मस्यापि क्वचिदसंस्पर्शात्। तत एव सा श्रुतिरन्यापोहविषयेत्युच्यते।**

अन्यव्यावृत्तेष्वर्थेषु व्यावृत्तिभेदं[1] **विशेषेणोपादाय निवेशनात्, व्यवहा-**

ध्यवसाया। **तदन्यपरिहाराङ्गभावात्**। विवक्षितादर्था[1]दन्यस्य परिहारागभावतया व्यवच्छेदाश्रयभावत । **परमार्थतो** वस्तुत । **तद्व्यतिरेकिष्व**ततत्कार्यव्यतिरेकिषु **न विसम्वादिकेत्युच्यते**। तथा ह्यनित्यकृतकादिश्रुतयो यथाभूतस्य नित्यादि-व्यावृत्तस्य वस्तुनो व्यावृत्तिमुपादाय सकेतितत्वाद् व्यवहारेपि तथा भूतस्या-न्यपरिहाराङ्गभावेन प्राप्तिहेतवो भवन्ति । तेन यथार्थदर्शना[2]न्यायातत्वा-च्छ्रुतेरपि सम्वादः।

यद्वा यथाभूते व्यवच्छेदे सा श्रुति सकेतिता तस्य परमार्थतोस्ति वस्तुषु सद्भाव इतीयता लेशेनाविसम्वादित्व न तु धूमादिवच्छब्दानामावश्यको वस्तुनि प्रतिबन्धस्तेषामिच्छामात्रप्रतिबद्धत्वात्।

अविसम्वादित्वमेव समर्थयन्नाह। **तथा ही**त्यादि। **तेषु** भावेषु **स व्यतिरेको** व्यवच्छेदो **भूतः** सत्य·[3] (।) कुत (।) **सर्वथा** सामान्याभ्युपगमेप्यवश्यं व्यवच्छे-दस्या**भ्युपगमनीयत्वा**दन्यथा व्यवच्छिन्नस्वभावाभावे सामान्यस्यैवाभावप्रसङ्गा-दित्युक्त। सामान्योक्तापि तत्र भूत इति चेदाह। **नैक** इत्यादि। **एकः** सामा-न्यपदार्थो व्यक्तेर्व्यतिरिक्तो वै शे षि का दीनामव्यतिरिक्त सा ख्या ना न तेषु भूत इति सम्बन्ध । कस्मात् (।) **सर्व**[4]**था व्यतिरिक्तस्याव्यतिरिक्तस्य** च प्रमाण-बाधितत्वेना**योगा**दसम्भवात्। बाधकम्प्रमाणं प्रागुक्त वक्ष्यते च।

यदि पुनर्यथा प्रतिभासमपि सामान्य शब्देन चोद्येत तदा तस्य सामान्यस्य वस्तुन्यविद्यमानस्य समावेशने शब्देन विषयीकरणे। **तस्य** वा सामान्यस्य प्रमाण-बाधितस्य **वस्तुनि** बाह्ये **निवेशने**ऽभ्युपगम्यमाने[5] **दूरोत्सृष्टमेव**ात्यन्तविप्रकृष्ट-मेव **वस्तु स्यात्**। कुत (।) **शब्दज्ञानाभ्या** शब्दात् तदुक्ताच्च ज्ञानादित्यर्थ । यद्वा शब्दज्ञानाभ्या दूरमुत्सृष्ट त्यक्तं स्यात्। कुत (।) **तद्विषयाभिमतस्य** शब्दादि-विषयाभिमतस्य। **तस्ये**ति सामान्यस्य वस्तुस्वभावात्। **अन्यस्य** सामान्यव्यतिरिक्त-स्य **वस्तुधर्मस्य** वस्तुस्वभावस्य स्वलक्षणस्यासंस्प[6]र्शादग्रहणात्। यतश्च स्वलक्षणन्न गृ ह्णात्यथ च स्वाकाराभिन्नमध्यवस्यति। **तत एव सा श्रुतिरन्यापोहविषयेत्युच्यते।**

रेऽप्यन्यपरिहारेण प्रवर्त्तनाच्च।

अवृक्षव्यतिरेकेण वृक्षार्थग्रहणे द्वयम्।
अन्योन्याश्रयमित्येकग्रहाभावे द्वयाग्रहः ॥११६॥
संकेतासंभवस्तस्मादिति[2] केचित् प्रचक्षते।
यदि एको वृक्षोऽवृक्षेभ्यो भिन्नः तस्य अवृक्षाग्रहणे तथा ग्रहणासामर्थ्यात्,

---

ननु विधिरूपेण बाह्यस्यैवाध्यवसायात् कथमन्यापोहविषयेत्युच्यत इत्याह। **अन्ये**त्यादि। विजातीयव्या**वृत्तेष्वर्थेषु व्यावृत्तिभे**दम्विजातीयव्यच्छिन्नस्वभाव-म**विशेषे[7]णोपादाय** विजातीयव्यावृत्तमात्र रूपमाश्रित्य सजातीयव्यक्तिषु शब्द-स्य **निवेशनात्** सकेतकरणादित्यर्थ। अनेनान्यापोहाश्रितत्व श्रुतेराख्यात। **अन्य-** 86a
परिहारेण प्रवर्त्तनादित्यन्यापोह प्रति कर्त्तृभाव श्रुतेरुक्त।(।११५॥)

अवृक्षेत्यादिना परस्य चोद्यमाशकते (।)अन्यापोहवादिन· किल न विधिरू-पेण वृक्षार्थस्य ग्रहण नाप्य[1]वृक्षार्थस्य। किन्त्वन्योन्यव्यवच्छेदेन (।) तत्र (।)**अवृ-क्षव्यतिरेकेण वृक्षार्थग्रहणे** वृक्षशब्दस्य योर्थस्तस्य ग्रहणेऽभ्युपगम्यमाने। **द्वयं** वृक्षावृक्षग्रहण**मन्योन्याश्रयं**। तथा ह्यवृक्षार्थव्यवच्छेदेन वृक्षार्थग्रहणे सत्यवृक्ष-ग्रहणपूर्वक वृक्षग्रहणमगीकृत। अगृहीतस्यावृक्षस्य व्यवच्छेतुमशक्यत्वात्। अवृ-क्षस्यापि ग्रहण वृक्षार्थव्यवच्छेदेनेति तत्रापि वृक्षग्रह[2]णपूर्वकमवृक्षग्रहणमापतित। वृक्षमगृहीत्वा तद्व्यवच्छेदेनावृक्षार्थस्य व्यस्थापयितुमशक्यत्वात्। एव वृक्षावृक्ष-योर्मध्ये **एक**स्य वृक्षस्यावृक्षस्य वा **ग्रहाभावे द्वयाग्रहः**।

यतश्च द्वयोरप्यग्रहस्त**स्मात्** कारणादन्यव्यवच्छिन्नेर्थे शब्दस्य य **संकेत** उक्तस्तस्या**सम्भव इति केचिदाचक्षते**। तथा चाहो द्यो त क र। "स यावच्चा-गान्न प्रतिपद्य[3]ते तावदगवि प्रतिपत्तिर्न युक्ता। यावच्च गान्न प्रतिपद्यते तावद्-गवीत्युभयप्रतिपत्त्यभाव" इति।

एतमेवार्थ म्भ ट्टो प्याह।

"सिद्धश्चागौरपोह्येत गोनिषेधात्मकश्च स।
तत्र गौरेव वक्तव्योनन्यो य· प्रतिषिध्यते।
स चेदगोनिवृत्त्यात्मा भवेदन्योन्यसश्रय।
सिद्धश्चेद् गौरपोह्यार्थं वृथापोहप्रवर्त्तन।
गव्यसिद्धे त्वगौर्नास्ति तदभा[4]वेपि गौ कुत"[1] इति।

तस्माद् वस्तुभूत सामान्यमेष्टव्यं। तत्र विधिरूपेणैव सकेत इति ते मन्यन्ते।

---

[1] **"प्रकल्पनाम"** also

अविज्ञातवृक्षेण तद्व्यवच्छेदरूपस्य अवृक्ष(स्य) अपि अपरिज्ञानाच्च बुद्धावनारूढेऽर्थे संकेतो न समर्थ इति ये(चोदयन्ति),

तेषामवृत्तास्संकेते व्यवच्छिन्ना न वा यदि ॥११७॥

अथ।

व्यवच्छिन्नाः कथं ज्ञाताः प्राग् वृत्तग्रहणादृते।

न हि तदा प्रतिपत्ता वृक्षमपि न वेत्ति अवृक्ष[5]मपि न वेत्ति, तज्ज्ञानायैव तदर्थितया उपगमात्। स च तदजानानः कथं संकेतेऽवृक्षव्य-

---

यदीत्यादिना व्याचष्टे। **तस्ये**त्यवृक्षभेदलक्षणस्य वृक्षस्य। एवन्तावन्न वृक्षस्य ग्रहण नाप्यवृक्षस्येत्याह[1] (।) **अविज्ञाते**त्यादि। **अविज्ञातो वृक्षो** यस्य पुसस्तेन **तद्व्यवच्छेदरूपस्ये**ति वृक्षव्यवच्छेदरूपस्य **बुद्धावनारूढेर्थ** इति (।) यदि वृक्षावृक्षौ बुद्धावारूढौ स्याता तदाऽवृक्षपरिहारेण वृक्षे सकेत स्यात्। अनारूढे च वृक्षेऽवृक्षे चार्थे कथ सकेत. (।)

तेषामित्यादिना परस्याप्ययन्दोषस्तुल्य इत्याह। ततश्च यस्तस्य परिहारो ममापि स एवेति भाव.। (।११६॥)

य एकमित्यादिना व्याचष्टे। अन्यव्यवच्छेदेन सकेते क्रियमाणे ये वादिन **एकम्वस्तु सामान्यमभ्युगम्येतरेतराश्रयदोषं[6] चोदयन्ति। तेषान्तत्रापि** वस्तुभूते सामान्ये वृक्षत्वलक्षणे **संकेते क्रियमाणे** द्वयी कल्पना अवृक्षा **व्यवच्छिन्ना न वेति।** (११७॥)

यदि **व्यवच्छिन्नास्तदा** ते **ज्ञाता** अङ्गीकर्त्तव्या। अज्ञाताना व्यवच्छेदाभावात्। तच्च ज्ञानन्तेषु न युज्यते। तदाह। **कथमि**त्यादि। **कथं ज्ञाता वृक्षार्थग्रहणाद् ऋते।**
86b इत्येतावान् **कारिका**भाग। **प्राक्**छब्दस्तु मिश्रकव्याख्याननेनोपात्तः। वृ[7]क्षार्थग्रहणम्विना प्राग् वृक्षार्थग्रहणादवृक्षा। **कथं ज्ञाता** इत्यर्थ·। ये तु प्राक्शब्दं का रि का या पठन्ति तैरर्थशब्दो न पठितव्य.। न ह्यवृक्षनिश्चयकाले वृक्षार्थग्रहणमस्त्यवृक्षग्रहणपूर्वकत्वात् वृक्षग्रहणस्य (।) न च वृक्षनिश्चयमन्तरेण वृक्षार्थग्रहो युक्तस्तस्यापि वृक्षग्रहणपूर्वकत्वात्। एतदेवाह। **न ही**त्यादि। **तदे**ति सकेतकाले **प्रतिपत्ता**। यस्मै सके[1]त· क्रियते। कस्मान्न **वेत्ती**त्याह। **तदि**त्यादि। **तस्य** वृक्षावृक्षस्य **ज्ञानायैव तदर्थितया** सकेतार्थितयोपगमादुपस्थितत्वात्। कथ नाम सकेतोत्तरकालं वृक्षावृक्षौ ज्ञास्यामीति। यद्वा तदर्थितयोपगमादिति संकेतार्थितया प्रवृते। अतो नास्ति सकेतकाले वृक्षावृक्षज्ञानं प्रतिपत्तुः। **स च** वृक्षावृक्ष-

वच्छेदं प्रतिपद्येत। अप्रतिपत्तौ च परिहृततदन्यनिवेशशब्दात्।

अनिराकरणे तेषां सङ्केते व्यवहारिणाम् ॥११८॥

न स्यात् तत्परिहारेण प्रवृत्तिर्वृक्षभेदवत्।

न हि संकेतकालः परार्थव्यवच्छेदेन निवेशिताच्छब्दात् व्यवहारकाले अवृक्षपरिहारे[7]ण प्रवृत्तिर्न युक्ता, शिंशपादिभेदवत्। अथ। 455a

अविधाय निषिध्यान्यत् प्रदर्श्यैकं पुरः स्थितम् ॥११९॥

मजानानः **कथमवृक्षव्यवच्छेदं प्रतिपद्ये[2]त संकेते**। नैव प्रतिपद्येत। अवृक्षव्यवच्छेदाप्रतिपत्तौ च सत्यामपरिहृतो न व्यवच्छिन्नस्तदन्यस्तस्माद् वृक्षादन्यो यस्मिन् वृक्षार्थे सो **परिहृततदन्यस्तस्मिन्निवेशस्स**केत। सप्तमीति योगविभागात् समासः। स यस्मिन् शब्देस्तीति मत्वर्थीय इति। अपरिहृततदन्यन्निर्देष्टु शीलमस्येति णिनिर्वा। अवृक्षादव्यवच्छिन्नेर्थे सप्रमुग्धरूपे सकेतितादिति या[3]वत्।

अपरः प्रकार'। वृक्षादन्यस्तदन्यस्तस्मिन्निवेश' सकेत। अपरिहृतश्चासौ तदन्यनिवेशश्चेति कर्मधारय.। स यस्यास्ति वृक्षशब्दस्येति पूर्ववत्। अवृक्षादव्यवच्छिन्नत्वाद् वृक्षार्थस्य। तत्र सकेत्यमानस्य शब्दस्यावृक्षेपि निवेश' प्रसक्त'। वृक्षभेदेष्विवेति समुदायार्थ.। (।११८॥)

तस्मादेवभूताद् वृक्षशब्दाद् **व्यवहारिणा** पुसा व्यवहारका[4]ले **तत्परिहारेणा**वृक्षपरिहारेण नियते शाखादिमति **प्रवृत्तिर्न स्यात्**। किन्त्वविशेषेण वृक्षावृक्षयो प्रवृत्तिर्भवेत्। किम्वत्। **वृक्षभेदवत्**। न हि वृक्षशब्दात् प्रकरणादिरहिताद् वृक्षविशेषे खदिरादौ तदन्यवृक्षपरिहारेण प्रवृत्तिर्भवति। **संकेतकाले** तेषा**मव्यवच्छेदात्**।

न हीत्यादिना व्याचष्टे। **संकेत**काल' सकेतशब्देनोक्त.[5] **परार्थव्यवच्छेदेनेति** परस्मादवृक्षाद् वृक्षाद् वृक्षार्थस्याव्यवच्छेदेन। द्वितीये तु व्याख्याने (।) परस्मिन्नवृक्षे वृक्षशब्दस्य सकेताव्यवच्छेदेनेति व्याख्येय। **निवेशिता**दिति सकेतितात्। **तत्परिहारेणा**वृक्षपरिहारेण **वृक्षव**दित्यस्य व्याख्यानं **शिंशपादिभेदवदिति**। शिशपादय एव भेदा इति विशेषणसमास. वति सप्तम्यर्थे। सूत्रे तु वृक्षभेदा इति षष्ठीसमास। शिशपादयो हि भेदा वृक्षस्य भेदा भवन्तीत्यनुरूपैव वृत्तिः तेषु च यथा वृक्षशब्दान्न परस्परव्यवच्छेदेन प्रवृत्तिस्तथा सूत्रविभाग एव व्याख्यात।

अथेत्यादिना पराभिप्रायमाशकते। **अविधायानिषिध्यान्यदिति** प्रतिषेधद्वयं

वृक्षोऽयमिति संकेतः कृतः तत् प्रतिपद्यते ।
व्यवहारेऽपि, तेनायमदोष[1] इति चेत् ;

न हि वस्तुसामान्यवादिना किंचिद् विधीयते। अथ किञ्चित् पुरःस्थित वस्त्वेकं प्रदर्श्य वृक्षो[2]यमिति संकेतः क्रियते। तेन संकेतकाले तथादृष्टमेवार्थं तत्संबन्धिनं वा व्यवहारकालेऽपि प्रतिपद्यत इति तुल्यः प्रसंगः स्यादिति चेत्। न हि तुल्यः। एवं तत्रापि—

तरुः ॥१२०॥

अयमप्य[3]यमेवेति प्रसंगो न निवर्त्तते ।

एकं प्रदर्श्य अयमपि वृक्षोऽयमेव वृक्ष इति वाद्यपि अयमपीति वा अयमेवेति प्रकारद्वयेन, तयोश्च स एव दोषः। दृष्ट[4]विपरीतस्य सुज्ञा-

---

केचित् पठन्ति। सकेते विषयमभिधायातोन्यच्चानिषिध्येति। तच्चायुक्तमिव दृश्यते विधिप्रतिषेधौ मुक्त्वा शब्दप्रवृत्त्यसम्भवात्। एकस्य हि प्रदर्शनमभिदधता विधेरङ्गीकृतः। ततश्चाविधाय प्रदर्श्येतिपदद्वयं व्याहत स्यात्। तस्मादविधायेत्यत्रैव नञ् द्रष्टव्यः। **अविधाय निषिध्यान्यदि**ति पाठ.। निषिध्यान्यत् पूर्वन्तद्वच्चछेदेनापर सकेतवि[1]षयमविधाय। प्रतिषेधपूर्वक विधिमकृत्वा विधिमात्रमेव केवल कृत्वेत्यर्थ अत। एव **प्रदर्श्यैक**मिति वृत्तावपि न कस्यचिद् व्यवच्छेदेन किंचिद् विधीयत इत्यन्यनिषेधपूर्वकमेव विधान प्रतिषेधति। केवलस्तु विधिरगीकृत एव। **एक**मिति सामान्य। एतेन सामान्ये सकेतकरणात् सर्वव्यक्तिषु कृत इत्याचष्टे (।११९॥)

वृक्षोयमिति सं[2]केतस्वरूपन्दर्शयति। यद्वस्तु प्रदर्श्य सकेत **कृतस्तत् प्रतिपद्यते व्यवहारेपि** (।) **तेन** कारणेना**यमनन्तरोक्तो वस्तुसामान्यवादिनोऽदोषः। तथा दृष्टमेवार्थ**मिति सामान्य यत्र **संकेतः कृतः। तत्सम्बन्धिनं वे**ति सामान्यसम्बन्धिनमाश्रय। **तत्रापी**ति विधिना केवलेनापि सकेते क्रियमाणे द्वौ विकल्पौ वृक्षोयमिति सकेत कुर्वाणः **तरुर[3]यम**पीति विदधीत। तरुरयमेवेति वा। आद्ये पक्षे तरुत्वमन्यस्याप्यनिषिद्धमिति व्यवहारे नियमेन प्रवृत्तिर्न स्यादिति स एव प्रसङ्ग। अथ तरुरयमेवेति तदा स एवातरुरव्यवच्छेदोङ्गीकृतः। ततश्च सकेतकाले प्रतिपद्यमानेन कथं वृक्षावृक्षौ ज्ञाताविति तदवस्थः प्रसङ्ग.। तदाह (।) **प्रसंगो न निवर्त्तत** इति।

एकमित्यादि[4]ना व्याचष्टे। **अयमपि वृक्षोऽयमेव वृक्ष** इति। **गति**मिति प्रकारं। **तयोश्चे**ति द्वयोरपि प्रकारयोः। **न दोष** इत्यादि परः। दृष्टोपटाकारोनुभूतस्तद्विपरीतस्य ततो विलक्षणस्य **सुज्ञानत्वात्**।

नत्वावद्योषः। एकं(हि)किंचिद् पश्यतोऽन्यत्र तदाकारविवेकिनीं बुद्धिमनुभवतः यथानुभवं ततोऽन्यो वैधर्म्यनिश्चयः। तद्[5]विवेचने ततः स अयमेव वृक्ष इति प्रदर्श्य व्युत्पादितः। यत्रैव तं न पश्यति तमेवावृक्षं स्वयं प्रतिपद्यते।

नेदं संभवति व्यवच्छेदवादे। एकत्र दृष्टस्य[6] रूपस्य क्वचिद् अनन्वयात्।

दृष्टप्रतिपत्तौ अन्यस्मिन्न स्यात् तथा प्रतीतिरिति चेत्।

एवं तर्हि तत्रापि तुल्यमेतद्। यस्माद्—

एतदेव ग्रहणकवाक्य**मेकं हीत्यादिना** व्याचष्टे। एक हि **किंचित्** सामान्य वृक्षत्वादिक**म्पश्यतोन्यत्र** तत्सामान्यरहिते विलक्षणे वस्तुनि[5] **तदाकारविवेकिनी** यथा परिदृष्टाकारविलक्षणाकारा**म्बुद्धिमनुभवतः** पुसो **यथानुभवन्ततो** यथा परिदृष्टा**दन्यदित्येवरूपो वैधर्म्यनिश्चयो** वैलक्षण्यनिश्चयः।

एतेन वैधर्म्यनिश्चयस्य स्वभाव उक्त ।(।१२०।।)

तद्विवेचन इति व्यापार (पूर्वदृष्टादृष्टार्थविवेचन) पृथग्भावस्य व्यवस्थापयति। **ततोन्यदित्यनेनैव** तद्वि[6]वेचने सिद्धे यत्पुनस्तद्विवेचनग्रहणन्तत्स्पष्टार्थं । **तत्रैतस्मिन्** क्रमे सति यथानुभवम्वैधर्म्यनिश्चयवान् **स** प्रतिपत्ता। **यं** शाखादिमन्तमर्थम्विशिष्टसामान्यवन्तमाकारान्तराद् **विवेचयति**। त पुरोधाय**मेव वृक्ष इति प्रदर्श्य व्युत्पादित** सकेत ग्राहितो। **यत्रैव त** सकेतानुरूपं सामान्यात्मान**न्न पश्यति। तमेवावृक्षं स्व[7]यमेव** शब्दव्यापारम्विना **प्रतिपद्यते** । तदेवमाकारान्त- 87b
रात् स्वयमेव विवेकेनावधारित सामान्यात्मानमुपादाय सकेते कृते सर्वासु सजातीयव्यक्तिषु कृतो भवति। सामान्यस्य सर्वत्रान्वयात्। **अयमे**वेति चावधारणात् सकेते कृते दृष्टविपरीतस्य सुज्ञानत्वात्। ततोन्यत्रावृक्ष इति निश्चयो भवतीति न यथोक्तदोष ।

अन्यापोहवादिनोप्ये[1]वमिति चेदाह। **नेद**मित्यादि। **एकत्र** सकेतकाले **दृष्ट**स्यासाधारणस्य **रूपस्य क्वचिद्** व्यक्त्यन्तरेऽनन्वयादननुगमात्। ततश्च सकेतकाले यो वृक्ष इत्येव गृहीतो भेदस्तस्यान्यत्र दर्शनन्नास्ति। तत्र सकेतकाले दृष्टे पश्चाद् **दृश्यमाने** च स्वलक्षणे यद् भिन्नप्रतिभासि दर्शनमुत्पन्नन्तेन हेतुना। वृक्षावृक्षयोः **प्रतिपत्तौ** क्रियमाणाया व्यक्त्यन्तरे[2]प्यन्यस्मिन् वृक्षभेदेपि **न स्यात्तथा** वृक्ष इति **प्रतीति**। तथा हि यो वृक्षभेद सकेतकाले दृष्टस्तस्माद् घटादयो विलक्षणास्तथान्योपि वृक्षभेदः। तत्र यथा घटादिषु वृक्ष इति प्रतिपत्तिर्न भवति तथा वृक्षभेदेपि न स्यात् किन्त्ववृक्ष इत्येव प्रतिपत्तिर्भवेदित्यर्थः।

एवन्तर्हीत्या चार्यः **तत्रापी**ति विकल्पाकारोपि सामान्ये संके[3]ते क्रियमाणे

455b **एकप्रत्यवमर्शश्चेज्ज्ञान एकत्र हि स्थितः ॥१२१॥**[7]
प्रपत्ता तदतद्धेतूनर्थान् विभजते स्वयम् ।

तुल्यमेतदितीतरेतराश्रयप्रतिविधान ।

एतदुक्तम्भवति । सर्वभावा स्वहेतुतो भिन्ना इति पूर्वमेव प्रतिपादित । तेन वृक्षा अवृक्षाश्च भिन्ना एव निर्विकल्पके ज्ञाने प्रतिभासन्ते (।) वृक्षेषु च विधिरूपेणैव वृक्षविकल्प उच्यते । तथाऽवृक्षेषु वृक्षनिषेधेनावृक्षविकल्प उत्पद्यत इति कुत इतरेतराश्रयत्वं ।

ननु य[4]द्यपि विधिरूपेण वृक्षविकल्पस्य प्रतिपत्तिस्तथाप्यवृक्षादिव्यावृत्तिद्वारेणोत्पद्यमानत्वादवृक्षादिप्रतिपत्त्यपेक्षत्वन्ततश्च स एवेतरेतराश्रयदोष ।

नैतदस्ति । यतोऽवृक्षादिव्यावृत्तिर्वृक्षादिस्वरूपमेव तदनुभवद्वारेणैव वृक्षादिविकल्प उत्पद्यते न त्ववृक्षादिप्रतिपत्त्यपेक्ष इति कुत इतरेतराश्रयत्व । तत्र[5] वृक्षविकल्पे प्रत्येक शिशपाद्यभेदेन वृक्षाकारोऽभिन्न प्रतिभासते । स च सकेतात् पूर्व स्वसम्वेदनप्रत्यक्षसिद्ध ज्ञानरूपत्वादतस्तत्रैव शब्द संकेत्यते ।

तेन यदुच्यते भ ट्टे न ॥

"सकेतात् पूर्वमिन्द्रियैरन्यापोहो न गम्यते ।
नान्यत्र शब्दसकेत. किन्दृष्ट्वा स प्रयुज्यता ॥
अन्वयेन विमुक्तत्वान्नानुमाप्यत्र विद्यते ।
सम्बन्धानुभवो[6]प्यस्य तेन नैवोपद्यत" इति[1]

निरस्त ।

कस्मादितरेतराश्रयप्रतिविधानन्तुल्यमित्याह । **यस्मा**दित्यादि । सजातीयव्यक्तिष्वेकाकारम्प्रत्यभिज्ञानमे**कप्रत्यवमर्श**स्तथाऽ**ख्या** सज्ञा यस्य **ज्ञा**नस्य तत्तथा । अनेन भिन्नास्वपि व्यक्तिष्वेकाकार प्रत्यभिज्ञानमेकत्वमारोपयतीत्युक्त । ततश्च
88a विकल्पविज्ञानारोपितैकत्वासु व्यक्तिषु[7] यत्र क्वचित् सकेत कृत सर्वत्र कृतो भवतीत्यस्य बीजमाख्यात । **एकत्र** हीत्यनेन विजातीयपदार्थपरामर्शशून्याकारन्तेन परामर्शस्य प्रतिनियताकारत्वमाह । विजातीयपदार्थाकारव्यावृत्त्या सजातीयेषु **सर्वे**षु यदेकप्रत्यवमर्शज्ञानन्**तत्र स्थित** इत्यर्थ । एतेनापि सजातीयाऽसजातीयावस्तुविभागबीजमुक्त । अत एवाह । तदित्यनेनैक[1] परामर्शो गृह्यतेऽतच्छब्देन तद्विपरीत । स चासश्च तदतौ । तयोर्हेतवस्त**दतद्धेतव**. । तान् **विभजते** । एक-

---

[1] Ślokavārtika.

प्रागपि निवेदितमेतत् भावाः प्रकृतिभेदिनः केचिदेव ज्ञानादिक फलं कुर्वन्ति नान्ये। तान्[1] स्वयमेव विभज्य तदतद्धेतूंश्च प्रत्येति। तस्य—

तद्बुद्धिवर्त्तिनो भावान् भातो हेतुतया धियः ॥१२२॥
अहेतुरूपविकलानेकरूपानिव स्वयम् ।
भेदेन प्रतिपद्येतेत्युक्तिर्भेदे[2] नियुज्यते ॥१२३॥
(तं तस्याः प्रतियतो धीर्भ्रान्त्यैकं वस्त्विवेक्षते ।

शाखादिमदाकारपरामर्शहेतून् तद्विपरीताश्च पृथक् करोति **स्वयमेव** सकेतात् (।) **प्रागपि** निवेदितमेतद् (।) "एकप्रत्यवमर्शार्थज्ञानाद्येकार्थसाधन" (१।७५) इत्यत्रान्तरे। व्यतिरिक्तस्याव्यतिरिक्तस्य च सामान्यस्य निषेधान्निषेत्स्यमानत्वाच्च।[2] **भावाः प्रकृतिभेदिनः** स्वभावेनैव विलक्षणा (।) **ज्ञानादिक**मित्यादिशब्दाद् उदकाद्याहरणादिक **केचिदेव कुर्वन्ति नान्ये** (॥१२१॥)

प्रकृत्या तदतज्जननस्वभावत्वात्तेषा। **तान्भावान्यं** प्रतिपत्ता **स्वयमेव** शब्दव्यापार विना **विभज्य** विभाग कृत्वा **तद्धेतूनतद्धेतूंश्च प्रत्येति**। तेन कुत इतरेतराश्रयत्वदोष । यो हि तद्धेतूनतद्धेतूंश्च भावात्स्व[3]यमेव प्रतिपद्यते। **तस्य** प्रतिपत्तुस्तद्बुद्धिपरिवर्तिन इत्यादि कर्मपद प्रतिपद्येतेत्येतत् क्रियापदापेक्ष। अतद्धेतुभ्यस्तद्धेतून् विभज्य स्थापयति या **बुद्धि**. सा (।) **तद्बुद्धिस्तत्परिवर्त्ति**नस्तदारूढान्। विकल्पिकाया **धियो हेतुत**या **भातो** भासमानात्।

इव शब्दस्य वक्ष्यमाणस्य सम्बन्धाद्धेतुतयेवेति द्रष्टव्य न तु ते विकल्पप्रतिभासि[4]नो हेतवस्तेषां बहिरसत्वात्। केवलम्प्रतिपत्तुस्तथाध्यवसायादेवमुच्यते। **अहेतुरूपविकलान् भात** इत्यत्राभिसम्बन्ध । **इव** शब्दयोगश्च पूर्ववत्। एकाकारपरामर्शबुद्धेर्ये न हेतवस्तेषा रूपेण विकलानिव। दृश्यविकल्पयोरेकीकरणाद् बाह्येन स**हैकरूपानि**व भात इत्यत्राभिसम्बन्ध । **स्वय** सकेतादुत्तरकालमपि[5]। अतत्कारिभ्यो **भेदेन** तान् भावान् **प्रतिपद्येतेति** कृत्वा। **उक्ति**: शब्दो **भेदे** विज़ातीयव्यावृत्ते स्वभावे विकल्पेन स्वाकाराभेदेनाध्यस्ते **नियुज्यते** सकेत्यते। **तम्भेद** यथोक्त। **तस्याः** श्रुते सकाशाद् व्यवहारे **प्रतियती** प्रतिपद्यमाना परि**धीर्भ्रान्त्या एकम्वस्त्विवेक्षते**। सजातीयव्यक्तिषु तम्विजातीयव्यावृत्त स्वभाव स्वाकाराभेदेन प्रतियती[6] धीरेकमिव वस्तु प्रेक्षत इत्यर्थ ।

तत. सर्वेष्वेकपरामर्शहेतुषु वृक्ष इति प्रतिपत्तिरतो यदुक्त दर्शनेन् प्रतिपत्तौ व्यक्त्यन्तरेपि न स्यादिति तदपास्तं।

यच्चाप्युक्तम्भ ट्टे न ॥

तेषां प्रकृत्यैव प्रत्ययवशात् तथाभूतस्य विकल्पस्य कारणानामन्वयात्, तद्द्रष्टुर्बुद्धौ विपरिवर्त्तमानान् तज्ज्ञानहेतु[3]तया तदन्यव्यावृत्या च अतथाभूतानपि तथाध्यवसितान्, अविभक्तबाह्याध्यात्मिकभेदान् विकल्पध्यवस्थया

"गोशब्दानभिधेयत्वमश्वादीना हि ते कथ।
न दृष्टस्तत्र गोशब्द· सकेतसमये यदि।
एकस्मात्तर्हि ते पिण्डाद्यदन्यत् सर्वमेव तत्।
88b भवेदपो[7]ह्यमित्येव नहि सामान्यवाच्यते"ति (।)[1]

तदपि निरस्तं। एकव्यक्तौ गोशब्दस्य सकेते विषयस्य व्यक्त्यंतरेनुगमात् स एवाय गौरिति प्रतीतेरिति। तथापि (।)

तेषामित्यादिना का रि कार्थमाह। **तेषां** विजातीयवस्तुविवेकिनामर्थाना **प्रकृत्या** तथाभूतविकल्पकारणानामन्वयादिति सम्बन्ध.। **प्रकृत्या** स्वभावेन न पुनरेकसामान्ययोगात्। सर्वे[1] तर्हि परामर्शं कस्मान्न जनयन्तीत्याह। **प्रत्ययवशा**दिति। अनुभवज्ञान प्रत्ययस्तद्द्वारेण तेषा विकल्पजननात्। **तथाभूतस्यै**कप्रत्यवमर्शात्मकस्य **विकल्पस्य कारणानामन्वयात्** सद्भावाद् (।) यथैको वृक्षभेद. प्रकृत्या तथाभूतविकल्पहेतुभूतस्तथा द्वितीयादिरपीत्यनेनाकारेणान्वयो न पुनरेकम्वस्तु सामान्यात्मकमस्ति। तस्मादन्व[2]याद्धेतोरेककार्यवत्त्वेनैकाध्यवसाययोग्या**निति** वाक्यशेष·।

तद्द्रष्टुरिति व्यक्तिष्वेककार्यकरणस्य **द्रष्टुर्बुद्धौ विपरिवर्त्तमा**नानारूढान्। तस्माद् द्रष्टुरिति भवितव्य। "कर्तरि चे"ति षष्ठीसमासप्रतिषेधादिति चेन्न। शेषषष्ठ्या विवक्षितत्वात्। द्रष्टृशब्दस्य चातृन्प्रत्ययान्तत्वात्। तत्र तृन्निति षष्ठी प्रतिषेधात्। तच्छब्दस्य द्वितीया[3]न्तस्य **साधनं कृते**ति समास। अन्ये तु **तत्प्रयोजक** इत्यादिनिर्देशात् प्रतिषेधसूत्रस्यानित्यत्व ज्ञापयन्ति। एवमन्येष्वपि निर्देशेष्वेवजातीयेष्वेवरूपा परिहारा वक्तव्या। **तज्ज्ञानहेतुतया** तस्य विकल्पज्ञानस्य हेतुतया। **तदन्यव्यावृत्त्या चे**त्येकाकारप्रत्यभिज्ञानहेतुभ्यो येऽन्ये तथाभूतविकल्पाऽहेतव। तेभ्यो व्या[4]वृत्या च। **अतथाभूतानपि** न हि ते विकल्पारूढास्तद्धेतवो बहिरविद्यमानत्वात्। अत एवाहेतुरूपविकल्पत्वमप्यसत्तेषामवस्तुसत्त्वात्। त**थाध्यवसितान्**। तज्ज्ञानहेतुतया तदन्यव्यावृत्त्या चारोपितान्। अनेन **भातो-हेतुतया धियः**। अहेतुरूपविकलानिवेति व्याख्यातं।

---

[1] Ślokavārtika.

प्रतिपत्तिमनुसृत्य एते वृक्षा इति स्वपर[4]विकल्पेषु एकप्रतिभासान् आदर्श्य तद्विज्ञानहेतून् भेदेन प्रतिपद्येतेत्यभिप्रायेण[1] अतद्धतुभ्योऽभिन्ने नियुङ्क्ते। ततः तमध्यस्य प्रतिपद्यमाना बुद्धिः व्यभिचारवशादेव[5] एकवस्तुग्राहिणीव प्रतिभाति। तेषां भिन्नानां दर्शनेऽपि यस्य दर्शनादर्शनाभ्यां वृक्षावृक्षविभागं कुर्वीतेति

अविभक्तबाह्याध्यात्मिकभेदानित्यननेनैकरू[5]पानित्येतद् व्याचष्टे। अविभक्तो बाह्याध्यात्मिकभेदो येष्विति विग्रह। दृश्यविकल्पयोरेकीकरणेन गृहीतानित्यर्थ। यस्मै सकेत क्रियते स **प्रतिपत्ता**। **प्रतिपत्तिमनुसृत्य**। सकेतकाले यादृशी तस्य प्रतिपत्ति। अहेतुरूपविकला **एक**कार्या भावा एकरूपा येष्वय वृक्षशब्द सकेतितस्त एवामी (।) तस्माद् वृक्षा इत्येवमाकारा।[6] तामनुसृत्य। ता स्मृत्वा। विकल्पविज्ञाने स्थितस्सन्। तान् यथोक्तान् भावान् **तद्विज्ञानहेतून**तद्विपरीतेभ्यो भेदेन। **एते वृक्षा इति** व्यवहारकालेपि वृक्षशब्दश्रवणात् कथन्नाम **प्रतिपद्येतेत्यनेनाभिप्रायेणाक्तमतद्धतुभ्यो भेद**व्यवच्छिन्ने स्वभावे **विकल्पेन** विषयीकृते **नियुङ्क्ते** सकेतस्य कर्त्ता। (।१२३॥)

ननु व्यावृत्तस्य स्वलक्षणस्य व्यवहा[7]रकालेनुगमो नास्ति (।) नापि विकल्प- 89a
प्रतिभासिन सामान्याकारस्य स्वज्ञानाभिन्नत्वाद् विकल्पान्तरेन्वयोस्ति। नापि वक्तृसम्बन्धिनस्तस्य श्रोतु श्रोतृसम्बन्धिनो वा वक्तु प्रतीतिरन्यचेतोधर्मत्वेनातीन्द्रियत्वात्। न चाप्रतिपन्ने सम प्रतिपाद्यप्रतिपादकाभ्या सकेत. सम्भवतीत्याह। **स्वपरे**त्यादि। स्वस्य प्रतिपादकस्य परस्य च प्रति[1]पाद्यस्य **विकल्पेष्वेककार्यकरण**लक्षणेन भ्रान्तिनिमित्ते**नैकप्रतिभासान्** भावान् सकेतविषयान**ादर्श्य**।

एतदुक्तम्भवति। यथैकस्तैमिरिको द्विचन्द्रन्दृष्ट्वान्यतैमिरिकायोपदिशन् स्वदृष्टमे[1]वोपदिशति न परदृष्टमप्रत्यक्षत्वात्। अथ च तस्यैवम्भवत्ययमेव मया परस्मै प्रतिपादित इति। परोपि च स्वसन्तानभाविनमेव द्विचन्द्रा[2]कारम्प्रतियन् य एव प्रतिपादकेन मम प्रतिपादितस्स एव मया प्रतिपन्न इति मन्यते। तद्वत् प्रतिपाद्यप्रतिपादकयोर्बुद्धचाकारस्याध्यवसितबाह्यरूपस्य भेदेप्येकत्वाध्यवसायात् सकेतकरण व्यवहारकाले च तस्यैव प्रतीतिरेकत्वाध्यवसात्। तमित्यन्यव्यवच्छिन्न स्वभाव स्वाकारेणाभिन्नमध्यस्य **प्रतिपद्यमाना**[3] **बुद्धि**। **तस्या** इति श्रुते.। **एकवस्तुग्राहिणीव प्रतिभाति**।

तेन यदुच्यते भ ट्टे न॥

"न चान्वयविनिर्मुक्ता प्रवृत्ति· शब्दलिङ्गयो ।

---

[1] Tha-dad-par-hgyur-ba.

न युज्यते। तस्य व्यतिरिक्तस्य शाखादिप्रतिभासस्य[6] दण्डवद् दण्डिनि ग्रग्रह-णात्। ग्रपरस्मात् प्रविभागेनागृहीतस्य ग्रनुपलक्षणात्।

456a **ग्राकृतेरेकत्र दृष्टाया ग्रप्यन्यत्र द्रष्टुमशक्यत्वात्, तवतद्वतो वृक्षावृक्षत्वे[7] व्यक्तिरेकैव वृक्षः स्यात्।**

"भवतु नाम घटादिशब्दे ग्रर्थान्तरव्यवच्छेदः। न ह्यज्ञेयमित्यादिवाक्ये तथा।

ताभ्या न विनापोहे धीर्न चासाधारणेन्वयः।
अपोहश्चाप्यप्रसिद्धोऽव्यभिचार क्व कथ्यता।
तस्मिन्नविद्यमाने च न तयो स्यात्प्रमाणते"ति (।)[1]

अपास्त। यत एकस्मिन्नन्यव्यावृत्ते स्वलक्षणे शब्दलिङ्गाभ्या स[4]म्बन्धम्प्रति-पद्यमानोप्यन्यत्राप्येवरूपेषु सम्बन्ध प्रतिपद्यत एवैकत्वाध्यवसायादिति कुतोन्वयर-हितत्वादिदोष इति। वस्तुभूतन्तु सामान्यमाश्रित्य वृक्षावृक्षविभागो न घटते। तदाह (।) **न पुनरित्यादि। एकम्वस्तु** सामान्य दृश्यमुपलब्धिलक्षणप्राप्तन्तत्र स्वलक्षणेष्वस्ति। यथा वृक्षभेदेभ्यो घटादयो भिन्नास्तथा धवादयोपि[5] (।) परस्परन्तेषाम्भिन्नानान्दर्शनेपि **यस्य** सामान्यस्य **दर्शनादर्शनाभ्यां वृक्षावृक्षविभागं कुर्वीत** यत्रेद सामान्य दृश्यते स वृक्षो यत्र न दृश्यते सोऽवृक्ष इति।

कस्मान्नास्तीत्याह। **तस्येत्यादि**। सामान्यस्य **व्यतिरिक्तस्य शाखादिप्रति-भासाद्** विभागेनाग्रहणात्। न हि वृक्षादिषु द्वौ प्रतिभासावुपलभ्येते। एक शाखा[6]-द्याकारोऽपरश्चाशाखाद्याकार। न च शाखाद्याकार एव सामान्य प्रतिभासत इति शक्यम्वक्तुन्तस्य शाखाद्याकारत्वात्। **दण्डवद्दण्डिनीति** वैधर्म्यदृष्टान्त। यथा **दण्डिनि दण्डस्य** भेदेन ग्रहण। नैव सामान्यस्य। **अपरस्माच्छाखादिमत. प्रविभा-**
89b **गेनागृहीतस्य** च सामान्यस्य व्यक्तिष्वनुपलक्षणात्। स्वरूपेण परस्योपल[7]म्भन-मुपलक्षणन्तच्च स्वयमगृहीतस्य कथम्भवेत्। अनर्थान्तरसामान्यवादिनस्त्वाकृतेरे-कत्र व्यक्तौ **दृष्टायाः** स्वलक्षणादव्यतिरेकात्तद्वदेवान्यत्र व्यक्त्यन्तरे **द्रष्टुमशक्य-त्वात्**। ततश्च **तवतद्वतो**रिति सकेतकालपरिदृष्टैकवृक्षाकृतिर्यस्यास्ति स तद्वान्। पश्चाद् व्यवहारकाले दृश्यमानो वृक्षभेद. पूर्वदृष्टवृक्षाकृतिरहितोऽतद्वान्। तयो-र्यथा[1]क्रम **वृक्षावृक्षत्वे** न्यायप्राप्तत्वे सति **व्यक्तिरेकैवेति** सकेतकाले दृष्टैव **वृक्षः स्यान्न** तु व्यवहारकाले दृश्यमाना। सकेतकाले दृष्टाया आकृतेरन्यत्रादर्शनात्।

अन्यापोहे शब्दार्थपरैरव्यापित्व चोदित तत्परिजिहीर्षवान् पूर्वपक्षदिग्मात्र-

---

[1] Ślokavārtika.

यतो न व्यवच्छेद्यते ज्ञेयत्वं हि किञ्चि[1]द् । **ततो भेदविषयीकरणं तस्य ज्ञेयत्वादि**"ति चेत्। **नैष दोषः**। एवं—

क्वचिन्निवेशनायार्थे विनिवर्त्ये कुतश्चन ॥१२४॥
बुद्धेः प्रयुज्यते शब्दस्तदर्थस्यावधारणात् ।
व्यर्थोऽ[2]न्यथा प्रयोगः स्यात् तज्ज्ञेयादिपदेष्वपि ॥१२५॥
व्यवहारोपनीतेषु व्यवच्छेदो[2]ऽस्ति कश्चन ।

न्तावत् करोति । **भवतु** नामेत्यादि। कस्मात्तत्रार्थान्तरव्यवच्छेदो नास्तीत्याह। **न ह्यज्ञेयमि**त्यादि। **यत** इ[2]त्यज्ञेयात्। अज्ञेय कस्मान्नास्तीति चेदाह। **तत** इत्यादि। अज्ञेयाद् विज्ञेयस्य **भेदेन विषयीकरणम**ङ्गीकर्त्तव्यमन्यव्यवच्छेदवादिनाऽन्यथा कथमज्ञेयात् ज्ञेयस्य व्यवच्छेद । **ततश्चाज्ञेयात् ज्ञेयस्य** भेदेन विषयीकरणे सत्येव तस्याज्ञेयाभिमतस्य ज्ञेयत्वात्। न ह्यविषयीकृताद् व्यवच्छेद शक्यो दर्शयितु। आदिशब्दात् स[3]र्वसमुदायद्व्यादिशब्दाना ग्रहण ।

तदुक्तम्भ ट्टो द्यो त क रा भ्या। अन्यापोहश्च शब्दार्थ इत्ययुक्तमव्यापकत्वात्। यत्र द्वैराश्यम्भवति तत्रेतरप्रतिषेधादितर प्रतीयते यथा गौरिति पदेऽगो प्रतिषेधेन गौ प्रतीयते।

न पुन सर्वपद एतदस्ति। न ह्यसर्वन्नाम किचिदस्ति यत्सर्वशब्देन विनिवर्त्येत। अथ मन्यसे एकाद्यसर्व[4] तत् सर्वशब्देन निवर्त्यते। तत्र स्वार्थापवाददोषप्रसङ्गात्। एव हि सत्येकादिव्युदासेन प्रवर्त्तमान शब्द । अङ्गप्रतिषेधादङ्गव्यतिरिक्तस्य चाङ्गिनोनभ्युपगमादनर्थक स्यात्। एव सर्वसमुदायशब्दा एकदेशप्रतिषेधरूपेण प्रवर्त्तमाना समुदायिव्यतिरिक्तसमुदायानभ्युपगमादनर्थका प्राप्नुवन्ति। द्व्या[5]दिशब्दाना च समुच्चयविषयत्वादेकादिप्रतिषेधे प्रतिषिध्यमानानामसमुच्चयत्वात्। द्व्यादिशब्दानामनर्थकत्वमिति।

नैष दोष इत्याचार्य । यस्मादाकाक्षावती **बुद्धि कुतश्चिन्निवर्त्य** तस्या **बुद्धे क्वचि**द्विनियतेऽर्थे **निवेशनाया**काङ्क्षावत पुस कश्चि**च्छब्दः प्रयुज्यते** प्रतिपादयित्रा। **क्वचिन्निवेशना**येत्यनेनान्वय उक्त ।[6] कुतश्चिद्विनिवर्त्येत्यनेन व्यतिरेक ।

किङ्कारण कुतश्चिन्निवर्त्य क्वचिन्निवेश्यते शब्द इत्यत आह। **तदर्थस्येत्यादि**। शब्दार्थस्य**वधारणात्**। **अन्यथा** यदि तेन शब्देन न कश्चिदर्थो व्यवच्छिद्येत **व्यर्थः** शब्द**प्रयोगः स्यात्** । यत एवन्त**स्माज्ज्ञेयादिपदेषि**त्यादिशब्दात् सर्वविश्वादिप-

---

[1] Cun-zad-kyan. [2] P.V. **व्यवच्छेद्यो०** ।

शब्दं हि सर्वः अन्वयव्यतिरेकाभ्यां नातिवर्त्तते। तस्य प्रवृत्ति[3]-निवृत्तिफलत्वात्। यदि अयं कस्यचिद् कुतश्चिद् बुद्धिं न निवर्त्तयेत्, अनिवर्त्य च यथाऽनुज्ञानात् सर्वव्यवहारेषु न किञ्चिद् व्यवहरेत्, व्यवहारस्यावधारण[4]नान्तरीयकत्वात्। यथा घटेनोदकमानये इति। यदि घटेन सह उदकस्य कथमपि अवश्यं आनयनमिच्छेत्। उदकमानयत्येव वाच्यं स्यात्। न घटेनेति[5]। तथाऽञ्जलिनाऽन्येनापि कथञ्चिदानयनमभिप्रेतं स्यात्। आनयेत्यनाक्षिप्तकरणकर्मकमेव वाच्यं स्यात्।

90a देषु। किम्विशिष्टेषु (।) **व्यवहारोपनीतेषु**। विधिप्र[7]तिषेधलक्षण शाब्दो व्यवहारस्तदर्थमुपनीतेषु। लौकिकप्रयोगस्थेष्विति यावत्। तेषु व्यवहाराङ्गेषु यथाकथचिद् **व्यवच्छेद्योस्ति कश्चित्**।

एतदुक्तम्भवति। यत्परश्च शब्द स शब्दार्थ इति विधायकस्यापि वाक्यस्य व्यवच्छेदपरत्वाद् व्यवच्छेदोपि शब्दार्थ उच्यते इति न काचित् क्षति ।

शब्दं हीत्यादिना व्याचष्टे। **सर्वः** पुमान् लौकिक परीक्ष[1]को वा कस्मान्नातिवर्त्तत इत्याह। **तस्येत्यादि**। **तस्य** शब्दस्य **प्रवृत्तिनिवृत्तिफलत्वादिति** कुतश्चिन्निवर्त्त्य क्वचित् प्रवृत्त्यर्थत्वादित्यर्थ.। इतरथा शब्दप्रयोगो विफल स्यात्। तदाह। **यदीत्यादि**। **अयम्वक्ता कस्यचित्** प्रतिपाद्यस्य[1] **कुतश्चिदनभिमतान्न निवर्त्तयेद् बुद्धिमनिवर्त्त्यभिमते** च क्वचिन्न प्रवर्त्तयेत् तदा **यथाभूतानुज्ञानादिति** शब्दप्र[2]योगात् पूर्वं प्रतिपत्तुर्यथा सप्रमुग्धरूपोर्थस्तथाभूतस्य शब्देनाननुज्ञानात्। यथाकथचिद् यादृशस्य तादृशस्यानुज्ञानादित्यर्थं । **सर्वव्यवहारेषु न किंचिद्वचन व्यवहरेदुच्चारयेत्**। किङ्कारण (।) शब्दव्यवहारस्यावधारणनान्तरीयकत्वात्।

एतदेव साधयन्नाह। **यथेत्यादि**। "अत्र ह्युदकमानये" त्युक्ते श्रोतु करण[1]-विशेषेऽवश्यमाकां[3]क्षा भवति तत्र च नियमार्थं "घटेने"त्युच्यते। सोयं घटो नेति शब्द. स्वार्थाभिधानपुरस्सरमेव करणान्तरव्यवच्छेदाक्षेपात् फलवान् भवत्यन्यथा सत्यपि घटशब्दप्रयोगे यदि **नाञ्जलिना तथान्येना**पि करणेनोदकानयन **यथाकथंचिदिति**। अल्पप्रमाण बहुप्रमाण वा जलानयनमभिप्रेतमित्यर्थं । उदकशब्दोपि कर्मान्त[4]-रव्यवच्छेदेन यदि विशिष्टे कर्मणि न प्रवर्त्तकस्तदा तस्यापि प्रयोगोनर्थक इत्याह। **तथेत्यादि**। **आनयेत्येव केवलम्वचनं स्यात्** (।) किभूतमनाक्षिप्तकरणकर्मकं। अनाक्षिप्तविशेषणानाश्रित करण घटाख्य कर्म चोदनाख्य यस्मिन्नानयेत्येतावति वचने तत्तथोक्त। तथानयेत्यस्मिन् व्यापारेभिमुखीभूत पुमान्। आनयेत्यने[5]न यद्यानयनादन्यस्माद् व्यापारान्न व्यवच्छिद्येत तदाऽनयेत्यपि न वाच्यं स्यात्।

एवं ग्रानयनं ग्रन्यद् वा[6] ऽनुष्ठाननानुष्ठानं किञ्चिद् यद्यभिमतं स्यात्। तदा ग्रानयेत्यपि न ब्रूयात् शब्दार्थाभावात्। तथा ज्ञेयादिशब्दानां व्यवहारोपनीतानामपि केनचिद् व्यवच्छेद्येन[7] भाव्यम्। ग्रनन्याशंकायां प्रयोगायोगात्। 456b तत्र हि यदेव मूढ़मतेराशंकास्थानं तदेव निवर्त्यम्। ग्रनाशंकमानो वा श्रोता किमुपदेशमपेक्षते। ग्रभूतं च[1] वचनं कुर्वाणः वक्ता कथं नोन्मत्तः स्यात्।

एतदेवाह। **एवमानयनमित्यादि। ग्रन्यद्वा किञ्चिदनुष्ठानमिति।** ग्रानयनादन्यत्। किम्(।) भोजनाद्यनुष्ठान। **ग्रननुष्ठानं** चेति व्यापाराकरणमनानयन च **यद्यभिमतं स्यात्तदा** क्रियापदमानयेत्यपि **न ब्रूयात्।** नयनमन्यद्वेति क्वचित् पुस्तके पा[6]ठ· **स त्त्व**(?त्व) युक्त । ग्रानयनशब्दस्य प्रक्रान्तत्वात् । तस्माद् व्यवहारोपनीताना घटादिशब्दानामस्ति **व्यवच्छेद्यो** यथा तेपान्त**था व्यवहारोपनीतानां ज्ञेयादिशब्दाना** केनचिद् व्यवच्छेद्येनाज्ञेयादिना।

ग्रनन्याशङ्कायामित्यज्ञेयत्वादेराशङ्काऽन्याशङ्का। तदभावोनन्या शका। असत्यामज्ञेयत्वाद्याशङ्कायामित्यर्थ । तथा ह्यनित्यादि[7]रूपेणाज्ञेय शब्द इत्या- 90b शकायामिद प्रयुज्यतेऽनित्यादिनाकारेण ज्ञेय इति। तत्रानित्याद्याकारेण यदज्ञेयत्वमाशकित तदेव व्यवच्छिद्यते। एव ज्ञेयास्सर्वपदार्थास्सर्व (ज्ञ) ज्ञानस्येत्यत्रापि स र्व ज्ञ ज्ञानापेक्षया यदज्ञेयत्वमाशकितन्तदेव व्यवच्छेद्य। तथा कश्चिदाह। निरुपाख्यानामभावात्तत्र ज्ञानस्य वृत्तिर्नास्ति तस्मादज्ञेयास्त इति।[1] ग्रत्राप्यज्ञेयत्वमारोपितन्तदेव व्यवच्छेद्य। सर्वाभावो न भवतीत्येवमभावस्यापि विषयीकरणात्। एवमन्यत्रापि ज्ञेयशब्दप्रयोगे वाच्य। तथा प्रमेयशब्दे। तथा **"क्षणिकास्सर्वे संस्कारा"** इत्यत्रापि सर्वस्य दीपादेरेव क्षणिकत्व कैश्चित् कल्पितन्न सर्वस्य (।) तद्व्यवच्छेदेन सर्वसस्काराणामनित्यत्व। एव कश्चिदागत किम्वा स[2]र्व एवेत्याशङ्काया सर्वो ग्राम आगत । इति कस्यचिदेव यदागमनमाशकितन्तदेव व्यवच्छेद्य। तथा समुदायालम्बना· पञ्च विज्ञानकाया इति चैकदेशालम्बना इत्येकदेशालम्बनत्व निषिध्यते। एवमन्येष्वपि द्व्यादिशब्देषु व्यवहारोपनीतेषु प्रकरणवशाद् यथायोग व्यवच्छेदो वक्तव्य·।

अयमत्र समुदायार्थ (।) न वस्तुभूत प्रति[3]योगिनम्भिन्नबुद्धिग्राह्य राशिद्वयेऽवस्थाप्याऽन्यापोह· शब्देन चोद्यत इत्युच्यते। किन्तु य श्रोत्रा तथाभूतेप्यतथाभूत आकार आरोप्यते सोपि व्यवच्छेद्य एव शब्देनेति।

एतदेव स्फुटयन्नाह। **तत्र हीत्यादि। यदेव मूढमते·** प्रतिपाद्यस्याशंकास्थानमाशंकाविषय.। **तदेव** ज्ञेयादिशब्दाना **निवर्त्त्यं**। श्रोत्रा नैव कश्चिदाशङ्कि[4]त इति चेदाह। **ग्रनाशङ्कमानो वेत्यादि।** यद्यसौ न किञ्चिदाशङ्कते। यथाभूत-

तत्संस्कारायैव शब्दानां कृतसंकेतत्वात्। ज्ञेयादिशब्दाश्चाव्यवहारानुपनीता न किञ्चिद्। वाक्यगतस्य तदर्थप्रतिपादकत्वात्। क्व[2] तत्प्रयोग इति चेत् प्रयोगविषयचिन्तायां अन्यापोह इत्युच्यतेः। अनिर्दिष्टप्रयोगमित्यादिज्ञेयशब्दस्य कोर्थ (इति) प्रश्नस्य न कश्चिदर्थः। ततः क्वचिदपि न प्रतिपत्तः। तथा

निश्चयवान् तदा परस्माद् वक्तु· **किमुपदेशमपेक्षते**। नैवेत्यभिप्राय । आकाक्षापनयन **श्रोतृसंस्कार**स्तद् यत्र वचने नास्ति तदा श्रोतृसस्कार तथा**भूतं च वचनं कुर्वाणो वक्ता कथं नोन्मतः स्या**त्। **तस्माद्** वक्ता श्रोतुराकाक्षावत सस्कारमेवाधित्स[5]मान शब्द प्रयुक्ते। कि कारण (।) **तत्संस्कारायै**व श्रोतृसस्कारायैव **शब्दानां कृतसंकेत**त्वात्।

भवतु नाम वाक्यस्थाना व्यवहारार्थमुपनीताना ज्ञेयादि ब्दाना यथोक्त व्यवच्छेद्य। ये त्वव्यवहारोपनीता केवला एव ज्ञेयादिशब्दास्तेषु कथ। न हि तत्र प्रतिपत्तुराशङ्कास्थानमस्तीत्यत आह। **अव्यवहारोपनीताश्चे**त्यादि। वा[6] क्येष्वनन्तर्भूतो वाचक· शब्दो नास्तीत्यर्थ । यतो वक्ता फलार्थी प्रथमन्तावदिममर्थम्विशिष्टक्रियासम्बद्धमनेन शब्देनास्मै प्रतिपादयामीत्यभिप्रायेण "देवदत्त गामानये"त्येव प्रयुक्ते। तेन क्रियान्वितानामेव पदार्थानामभिधान। न त्व-
91a भिहितानाम्पदार्थानाम्पश्चादन्वय । गामित्यादौ कर्मादिविभक्तेरनुत्पादप्र[7]सगात्। तस्माद् वाक्यस्थानामेव प्रयोग । तदेवाह। **वाक्यगतस्येत्यादि**। तस्यै**वार्थ**प्रतिपादकत्वादिति भाव ।

ये तु वै या क र णै सर्वविश्वेत्यादिगणेषु पठ्यन्ते। प्रकृतिप्रत्ययविभागेन वा सस्क्रियन्ते। तथा नि रु क्त कारै (।)तेपि रेखागवयस्थानीया वाक्यस्थानामेव प्रतिपत्त्युपाया द्रष्टव्या न तु तेषा लौकिक कश्चिदर्थोस्ति। तस्मात् वाक्यस्थानामेव पदानामर्थवत्ता। तत्रैव चावस्थितानामर्थचिन्ता क्रियते। तदाह। **क्व पुनरि**त्यादि। **एत** इति ये वाक्यस्था **प्रयोगविषयचिन्तायां** प्रवर्त्तमानाया**मन्यापो**ह शब्दार्थ **उच्यते**। अन्योऽपोह्यतेऽनेनेति कृत्वा। ये त्वप्रयोगस्था ज्ञेयादिशब्दास्तेषामर्थासम्भवाच्चिन्तैव नास्तीत्याह। **अनिर्दिष्टप्रयो**गमित्यादि। निर्दिष्ट उपात्तस्तथा[2] चासौ प्रयोगश्चेति कर्मधारय । पश्चान्नञा सहाभावार्थेऽव्यय विभक्तीत्यादिनाऽव्ययीभाव । ततश्च सप्तम्या**स्तृतीया सप्तम्योर्बहुल**[1]**मि**त्यम्भाव ।[2] उपात्तप्रयोगाभावे सति वाक्येनुपनीतस्य केवलस्य **ज्ञेयशब्दस्य कोर्थ** इति **प्रश्न** इत्यर्थ·।

---

[1] Pāṇini.

घटादिशब्दा[3]नाम[3]पि न किंचिद् । प्रकरणे श्रवणादेव यापि प्रतिपत्तिः साऽपरिसमाप्ततदर्था दृष्टप्रयोगविषयानुसारेण साकांक्षत्वात्। तदर्थविप्लवः घटादिपदग्रहात्[4]। तादृशो ज्ञेयादिशब्देष्वपि यथादर्शनं अस्त्येव। तस्मात् सर्व-

---

क्रियाविशेषणमेतदित्यपरे। प्रश्नक्रिया हि विशेष्या। क्रियाविशेषणानाञ्च कर्मत्वमिति।[3] अत्र च यदि कर्म्मधारयसमासस्तस्य स्वपदार्थवृत्तित्वात्कथन्तेन प्रश्नक्रियाविशेषितेति वक्तव्य।

अथानिर्दिष्ट प्रयोगो यस्मिन् ज्ञेयशब्द इति बहुव्रीहिस्तदापि शब्दो विशेषितो न क्रिया। यदा त्वेवम्विग्रहोऽनिर्दिष्ट प्रयोगो यस्मिन् प्रश्न इति तदा भवति क्रियाविशेषात् तदापि प्रश्नशब्दसामानाधिकरण्यात् सप्तम्येव युक्ता[4]ऽनिर्दिष्टप्रयोगे प्रश्न इति। किङ्कारण केवलस्य ज्ञेयशब्दस्यार्थो नेति चेदाह। **तत** इति (।) ततो ज्ञेयशब्दात् **क्वचिद्(अपि न) वस्तुप्रतिपत्तेः**। विधिप्रतिषेधफले व्यवहारे च केवलस्य ज्ञेयशब्दस्य प्रयोगाभावात् कुतोर्थप्रतिपत्ति। यदादिशब्दोऽनित्यादिरूपेण कि ज्ञेयो भवत्यथाज्ञेय इत्येव प्रक्रान्ते ज्ञेय इति केवल प्रयुज्यते। तदापि यार्थप्रति[5]पत्ति सा प्रकृत शब्दादपदमपेक्ष्य भवन्ती वाक्यादेव जायते। पदान्तरसहितस्य पदस्य वाक्यत्वात्। तस्मान्नास्ति पदान्तरनिरपेक्षात् पदार्थप्रतिपत्ति। यथा ज्ञेयादिपदाना केवलाना न किचिद्वाच्य तथा घटादिशब्दानामपि केवलाना।

ननु च कि घटेनोदकमानयाम्यथाञ्जलिनेति प्रस्तावे। घटेनेति प्रयुक्ते। तत्र च य प्रकरण[6] न ज्ञातवान् तस्यापि प्रतिपत्तुर्घटेनेति केवलशब्दश्रवणाद् घटाकारा प्रतिपत्तिरुत्पद्यत एवेति कथमुच्यते केवलाच्छब्दात् न प्रतिपत्तिरित्याह। **यापी**त्यादि। अपरिसमाप्त स जिज्ञासितोर्थो यस्या प्रतिपत्तौ **साऽपरिसमाप्ततदर्था**। कथमपरिसमाप्ततदर्थतेत्याह। **दृष्टप्रयोगानुसारेणे**ति। यावत्सु नयनानयनादिक्रियाचोदना[1]प्रवृत्तेषु। तेन घटशब्दस्य **प्रयोगो दृष्टस्तदनुसारेण** तावत्सु पूर्ववाक्येष्वाकाक्षावती प्रतीतिर्भवति किमयमर्थो विवक्षित किम्वार्यमित्येव **साकांक्षत्वा**दुपप्लवमान रूपत्वेनासमाप्तार्था विप्लवभ्रान्तिरेव। एतत्कथयति (।) नैव केवलशब्दमात्रश्रवणादर्थप्रतिपत्तिरस्ति किन्तु वाक्येषूपलब्धस्यार्थवत पदस्य सादृश्येनो[2]पहूतबुद्धे केवलशब्दश्रवणादर्थप्रतिपत्त्यभिमान इति। यथा दृष्टप्रयोगानुसारेण केवल**घटादिपदश्रवणादर्थ**प्रतिपत्ति**विप्लवस्तादृशो ज्ञेयादिशब्देष्वपि** (।) **यथादर्शनं**। यथाप्रयोगोपलम्भं। यावत्सु वाक्येषु ज्ञेयशब्द प्रयुज्यमानो दृष्टस्तदनुसारेण केवलज्ञेयशब्दश्रवणाद**स्त्येवा**र्थप्रतिपत्तिविप्लव। अनेन स[3]र्वथा घटादि**शब्दैर्ज्ञे**यादिशब्दानान्तुल्यतामाह।

यच्चाप्युक्तम् (।) "एकादिव्युदासेन प्रवर्त्तमान. सर्वशब्दाङ्गे प्रतिषेधादङ्गव्य-

शब्दप्रयोग कुतश्चित् निवर्त्य कुत्रचित् निवेशनात् अर्थवत्ता, तत्साफल्यात्[5]।

निवेशनं च यो यस्माद् भिद्यते विनिवर्त्य तम् ॥१२६॥
तद्भेदे भिद्यमानानां समानाकारभासिनि ।
स चायमन्यव्यावृत्या गम्यते तस्य वस्तुनः ॥१२७॥

तिरिक्तस्य चाङ्गिनोनभ्युपगमादनर्थक स्यादि"ति।

तदयुक्त। यतोन्य एवैकादिबुद्धिविषयाभावा अन्ये च समुदायादिबुद्धिविषया प्रतिभासन्ते। ये च विशिष्टावस्था समुदायादिबुद्धिविषयास्त[4] एवाङ्गिन उच्यन्तेन्यस्याङ्गिनो निषेधात्। यादृग्भूताश्च ते परेण समुदायादिधर्मारम्भका इष्यन्ते तादृग्भूता एवास्माभि. समुदायबुद्धिजनकत्वेन तदालम्बना इष्यन्ते विरोधाभावात्। तेन सर्वसमुदायद्वित्वादिशब्दानामेकादिनिषेधो घटत एव।

तस्मादित्यादि। यत. सर्व वाक्य सावधारणम्वाक्यस्थानामेव पदाना[5]मर्थवत्ता। **तस्मात् सर्वशब्दप्रय**ोग इत्युपसहार.। **तत्साफल्यात्** तस्य शब्दप्रयोगस्य साफल्यात्। एव सर्वशब्दाना यथोक्तविधिनाऽन्यापोहे वाच्ये।

यदुक्तम्भ[1]ट्टो द्यो त क रा भ्या।

"अन्यापोहश्च किम्वाच्य. किम्वाऽवाच्योयमिष्यते।
वाच्योपि विधिरूपेण यदि वान्यनिषेधतः॥
92a विध्यात्मनास्य वाच्यत्वे त्याज्यमेकान्तदर्शन।[6]
सर्वत्रान्यनिषेधोय शब्दार्थ इति वर्णित॥
अनपोहव्युदासेन यद्यपोहोभिधीयते।
तत्र तत्रैवमिच्छायामनवस्था भवेत्तव॥
अथाप्यवाच्य एवायमन्यापोहस्त्वयेष्यते।
तेनान्यापोहकृच्छब्द इति बाध्येत ते वच॥
यस्माद् येष्वेव शब्देषु नञ्योगस्तेषु केवल।
भवेदन्यनिवृत्त्यशस्स्वात्मैवान्यत्र गम्यत" इति॥

तदयुक्त।[1] विधे शब्दार्थस्यार्थादन्यनिषेधस्याभ्युपगमात्।

यदि तर्हि विधिरेव शब्दार्थोर्थादन्यनिषेध. (।) कथन्तह्याचार्य दि ङ्ना गे न "शब्दोर्थान्तरव्यावृत्तिविशिष्टानेव भावानाहे"त्याद्युक्त (।)

न विरुध्यत इत्यत आह। **निवेशनं चे**त्यादि। अनेन चैतद्दर्शयति(।) सकेतेपि तावद् विधिरूपेण शब्द· प्रवर्त्तते कि पुनर्व्यवहार इति। **यो** वृक्षा[2]र्थो **यस्मा**-

---

[1] Ślokavārtika.

कश्चिद् भाग इति प्रोक्तं रूपं नास्याऽपि[6] किञ्चन ।
तद्भावेव शब्देभ्यो गम्यतेऽन्यनिवर्त्तनम् ॥१२८॥
न तत्र गम्यते कश्चित् विशिष्टः केनचित् परः ।

दवृक्षाद् घटादेर्भिद्यते **विनिवर्त्त्येत** स वृक्षन्त्यक्त्वेत्यर्थ । **निवेशनं** सकेतकरण वक्षशब्दस्य द्रष्टव्य। **तस्मिन्निवृत्त्येत्यनेनावृक्षे** वृक्षशब्दो न सकेत्यत इत्युक्तम्भवति। क्व पुनस्तन्निवेशनमित्याह। **भेदे भिद्यमानानां** वृक्षाणा यस्तद्भेदस्तस्मादवृक्षाद् भेद । अवृक्षाद् भिन्न स्वभाव । यथैव ह्येको वृक्षविशेषस्त[9]स्माद् वृक्षाद् भिन्नस्तथा सर्वे वृक्षभेदा ।

ततस्तेष्वसौ तद्भेदो विकल्पबुद्धचा सर्वेष्वेकत्वेनारोप्यत इति समानाकारभासी भवति। तस्मिन् **समानाकारभासिनि** तद्भेदे भिन्नस्वभावे निवेशन शब्दस्य । स **चायमिति** चशब्दोवधारणार्थ । स एवायम्विकल्पप्रतिभास्याकारो बाह्याभिन्न ।

यद्वा स एव तद्भेदोऽवृक्षाद् भिन्नस्वभावलक्ष[4]ण प्रोक्त आचार्य दि ङ् ना गे न । कथ **प्रोक्त** इत्याह। **अन्यव्यावृत्त्या गम्यते तस्य वस्तुन कश्चिद् भाग** इत्यनेन। अस्य चार्थम्वृत्तौ व्यक्तीकरिष्याम ।

नन्वन्यव्यावृत्त्या विशिष्टो वस्तुभाग परमार्थत एव कस्मान्न गृह्यत इत्याह। **रूपं स्वभावो नास्यापि** भेदस्य **किञ्चन** निवृत्तिरूपस्य भेदस्यासत्त्वात्। विकल्पप्रतिभासिनश्च बुद्धिवि[5]भ्रमात्।

यदि भेदस्य न रूप किञ्चन कथन्तर्हि शब्दोन्यव्यावृत्तिविशिष्टानेव भावानाहेत्युच्यत इत्यत आह। **तद्गताविति**यादि। तस्य यथोक्तस्य भेदस्य विजातीयव्यावृत्तस्य स्वभावस्य विधिरूपेण गतावेव **शब्देभ्यो गम्यतेन्यनिवर्त्तन**। (।१२७।)

तथा हि वृक्ष इत्युक्तेऽर्थादवृक्षनिवर्त्तन प्रतीयते । एतावन्मात्रेण चान्यव्यावृ[6]त्तिविशिष्टत्वमुक्त। न तु परमार्थतो विशेषणविशेष्यभाव । तदाह। **नेत्यादि**। **तत्रेत्यन्यापोहे** शब्दार्थे आ चा र्य ग्रन्थे वा। **कश्चित् पर** इत्यन्यस्माद् व्यावृत्तोर्थ । **केनचिदन्यव्यावृत्तिलक्षणेन विशिष्टो न गम्यत** इति।

तेन यदुच्यते भ ट्टे न ।

"न चासाधारणम्वस्तु गम्यतेऽपोहवत्तया।
कथ वा परिकल्प्येत सम्बन्धो[7] वस्त्ववस्तुनो ॥ 92b
स्वरूपसत्त्वमात्रेण न स्यात् किञ्चिद्विशेषण।

न चापि शब्दो द्वयकृदन्योन्याभाव इत्यसौ ॥१२९॥

457a **अरूपो रूप[7]वत्त्वेन दर्शनं बुद्धिविप्लवः।**

निवेश्यमानः शब्द आक्षिप्ततदन्यव्यावृत्तिरसावपि यस्माद् भिद्यते तन्निवर्त्य भिद्यमानानां समानरूपप्रतिभासी भेदो निर्दिष्टः। अर्थान्तर[1]व्यावृत्यात्तस्य

स्वबुद्धया रज्यते येन विशेष्यन्तद्विशेषण ॥
न चाप्यश्वादिशब्देभ्यो जायतेऽपोहबोधन।
विशेष्यबुद्धिरिष्टेह न चाज्ञातविशेषणा ॥
न चान्यरूपमन्यादृक् कुर्याज्ज्ञानविशेषण।
कथ चान्यादृशे ज्ञाने तदुच्येत विशेषण।
अभावगम्यरूपे च न विशेष्येस्ति वस्तुता।
विशेषितमपो[1]हेन वस्तु वाच्य न तेस्त्यत(·॥)"[1]

इत्यपास्त।

नन्वेकस्य शब्दस्य कथ विधिप्रतिषेधलक्षण व्यापारद्वयम् (।) आह।

न चापि शब्दो द्वयकृत्। स्वार्थाभिधानमन्यव्यावर्त्तन च द्वय करोति (।) किञ्कारणम् (।) **अन्योन्याभाव इति**। **इ**तिशब्दो हेतौ। यस्मादवृक्षभेदाभावो वृक्षार्थस्तदभावश्चावृक्षार्थ इतरेतराभावत्वेन। तस्माद् वृक्षशब्दाद् वृक्षार्थप्रतिपत्त्यैवार्था[2]द् अवृक्षनिवृत्तिप्रतिपत्तिरपि भवतीति न द्वौ व्यापारौ साक्षाच्छब्दस्य। तेन।

"यदि गौरित्यय शब्द समर्थोन्यनिवर्त्तने।
जनको गवि गोबुद्धेर्मृग्यतामपरो ध्वनि ॥
न च ज्ञानफला शब्दा न चैकस्य फलद्वय।
अपवादविधिज्ञान फलमेकस्य व कथम् (।)"

इति निरस्त।

यदि शब्दवाच्यो भेदस्सर्वत्रानुयायी तदेव तर्हि पारमार्थिक सामा[3]न्यम्भविष्यतीत्यत आह। **असाविति** शब्दविषयोनुयायी भेद **अरूपो** नि स्वभावः। तस्मिन्नरूपे दृश्यविकल्पयोरेकीकृत्य वक्तृश्रोत्रोर्य**द्रूपवत्त्वेन दर्शनन्तद्बुद्धिविप्लवो** भ्रान्तिरित्यर्थः।

निवेश्यमान इत्यादिना व्याचष्टे। यस्माद् भिद्यते वृक्षादिकोर्थस्तन्निवर्त्य

---

[1] Ślokavārtika [2] Ibid.

वस्तुनो भागः कश्चिद् गम्यत इति शब्दोर्थान्तरनिवृत्तिविशिष्टानेव भावानाहेत्यादिना निर्दिष्टः। स हि तं भेदं कथयन् अर्थान्तरव्यव[2]च्छेदमाक्षिपन्नेव वर्त्तते। एकगतभेदचोदनाया हि तदन्यव्यावृत्तिनान्तरीयकत्वात्। स एव भेदः तद्व्यावृत्या गतो भागः। तद्गतेः तदुपाधित्वात्। स विशिष्टो[3]

तत्त्यक्त्वा निवेश्यत इति सम्बन्ध । कुत्रेत्याह । **भिद्यमानानामित्यादि** । एतच्च कारिका व्याख्याने विभक्तार्थ। **आक्षिप्ता तदन्यव्यावृत्तिर्येन** शब्देनेति विग्रह । स एव चाय **समानरूपप्रतिभासी भेदो निर्दिष्ट** आचार्य दिङ्नागेन । कथमित्याह। **अर्थान्तरव्यावृत्त्या तस्य वस्तुन कश्चिद् भागो गम्यत इति। तथा शब्दोर्थान्तरनिवृत्तिविशिष्टानेव भावानाहेत्यादिना**। आदिग्रहणाच्छब्दार्थान्तरापोह कुर्वती श्रुतिरभिध[5]त्त इत्यादि परिग्रह ।

स हीत्याद्यस्यैव समर्थन । **स हि** वृक्षशब्दस्तम्भेदमवृक्षव्यावृत्त स्वभाव **कथयन्नार्थान्तरस्यावृक्षार्थस्य व्यवच्छेदमाक्षिपन्नेव वर्त्तते**। कि कारणम् (।) **एकगतभेदस्येत्यादि**। यथा हि वृक्षभेदा एव खदिरादय स्वभावेनैवावृक्षेभ्यो भिन्ना एवमवृक्षा अपि वृक्षेभ्य भेदस्य द्विष्ठत्वात्। तत्र वृक्षशब्देनैकगतस्य वृक्षा[6]र्थगतस्य **भेदस्य** भिन्नस्य स्वभावस्यैकाकारप्रतिभासिनो या **चोदना तस्यास्तदन्यव्यावृत्तिनान्तरीयकत्वात्**। तस्माद् वृक्षार्थादन्यस्यावृक्षस्य या व्यावृत्तिस्तन्नान्तरीयकत्वात्। एव ह्यवृक्षाद् व्यावृत्तरूपो वृक्षार्थोऽभिहित स्याद् यद्यवृक्षार्थस्य तत्र निवृत्तिर्गम्येत। **स एवान्यस्माद्** भिद्यमानस्य विकल्पबुद्धिप्रतिभासी **भेदो** भि[7]न्न स्वभाव । **तद्व्यावृत्त्या**ऽर्थान्तरव्यावृत्त्या यथोक्तन्यायेनार्थाद् गम्यमा- 93a
नया। **गतो च** बुद्धो **भागो** वस्तुन इत्युक्त इत्यध्याहार । व्यावृत्तवस्तुदर्शनद्वारायातत्वाद् वस्तुरूपत्वेनाध्यवसायाच्च वस्तुभागो गत इत्युच्यत इत्यभिप्राय ।

एतदुक्तम्भवति (।) अतत्परामर्शजननेभ्यो व्यावृत्तरूपन्तत्परामर्शजननेष्वारोपितैकत्व विकल्पबुद्धिप्र[1]तिभासनमेवाकारमविभक्तबाह्याध्यात्मिकभेद शब्द प्रतिपादयति शाब्दे ज्ञाने तस्यैव प्रतिभासनात्। तञ्च प्रतिपादयन्नन्यव्यावृत्तिमर्थादाक्षिपति (।) अतोनेनाभिप्रायेणोक्तमाचार्येणान्यव्यावृत्त्या गम्यते तस्य वस्तुन. कश्चिद् भाग इति। न पुनरन्यव्यावृत्त्या शब्दार्थभूतया विशेषणरूपया बाह्यस्य वस्तुन कश्चिद् भागो गृह्यतेऽन्यव्या[2]वृत्तेरेवाभावादिति। एवन्तावदन्यव्यावृत्त्या गम्यते तस्य वस्तुन. कश्चिद् भाग इत्येतत्समर्थित।

अधुना शब्दार्थान्तरनिवृत्तिविशिष्टानेव भावानाहेत्येतत्समर्थयन्नाह । **तद्गतेरित्यादि**। **तद्गतेरन्यनिवृत्तिगतेस्तदुपाधित्वादस्ति** भेदोपाधित्वात् (।) **स** एव

गत इत्यर्थे कस्मिंश्चिद् नार्थान्तरव्यावृत्तिः यया विशिष्टा ये शब्दैश्चोद्यन्ते दण्डिवत् निमित्तभूता । भिद्यमानयोर्द्वयोर्भेदस्य उभयगतत्वात्, एकगतभेदाभिधानेऽपि नान्तरीयकस्तदन्याक्षेपो भवति। तस्मात् न तयोर्विशेषणविशेष्यभावः। एकभेदाभिधानेऽपि अन्यव्यावृत्तिगतिः[5]। अन्वयव्यतिरेकचोदनया

भेदस्तद्विशिष्टो गत इत्युच्यते। आ चा र्ये णेति।

यद्वा (।) **तस्य** यथोक्तस्य वस्तुभेदस्य शब्दाद् **गते** प्रतिपत्ते सावधारणत्वेन **तदुपा**[3]**धित्वात्**। सा तदन्यनिवृत्तिरुपाधिरर्थाक्षेपाद् यस्यास्तद्गते सा तथोक्ता। तदन्यनिवृत्तिनान्तरीयकत्वमेव तदुपाधित्व ।

एतदुक्तम्भवति। यार्थान्तरव्यावृत्तिरर्थाद् गम्यते तन्नान्तरीयकत्वात्स एव भेद शब्दाद् गम्यमानोन्यव्यावृत्त्या विशिष्टो गत इत्युच्यत आ चा र्ये णेति।

नन्वर्थान्तरव्यावृत्ति. शब्दप्रवृत्तिनिमित्तभूता। **यया विशिष्टा** बाह्या **अर्था**[4] गवादि**शब्दैश्चोद्यन्ते** अप्रतीते । **दण्डिव**दिति वैधर्म्यदृष्टान्त । यथा दण्डद्वारेण तद्वान् दण्डीत्युच्यते। नैव व्यावृत्तिद्वारेण व्यावृत्तिमानिति। कस्माद् व्यावृत्तिरर्थान्तरभूता नेत्याह। **द्वयोर्ही**त्यादि। यस्माद् **द्वयो**र्वृक्षावृक्षयो परस्पर**म्भिद्यमानयो**र्यो **भेद**स्तस्य**ोभयगतत्वात्**। वृक्षावृक्षगतत्वाद् वृक्षावृक्षभिन्नस्वभावत्वादित्यर्थ । ते**नैकग**[5]**तभेदाभिधानेपि**। अवृक्षापेक्षया वृक्षगतो यो भेद । भिन्न स्वभावस्तस्य शब्देनाभिधानेपि **नान्तरीयकस्तदन्याक्षेपो भवति**। अवृक्षापेक्षया वृक्षगतस्य भेदस्यावृक्षनिवृत्तिलक्षणस्य वृक्षापक्षयाप्यवृक्षगतस्य वृक्षनिवृत्तिलक्षणस्याक्षेपो भवति। **इति**शब्दो हेतौ। अस्माद्धेतोस्तदुपाधित्वात् तद्विशिष्टो गत इत्युक्तमित्यध्याहा[6]र । **न तयो**रित्येकगतस्य भेदस्य 'तदन्यव्यावृत्तेश्च **न विशेषणविशेष्यभावः।**

क पुनरयमेकगतो भेद का च तदन्यव्यावृत्तिर्येनान्यव्यावृत्तिनान्तरीयकस्यैकगतभेदस्य शब्दात् प्रत्ययो भवतीति चेत्।

उच्यते। वृक्षशब्दवाच्यस्तावद् विकल्पबुद्धिप्रतिभासी शाखादिमदाकार सर्व-
93b वृक्षेष्वभिन्नरूप इवातद्रूपेभ्यो भिन्न इव भा[7]समान एव गतो भेदो भिन्न स्वभाव इत्यर्थ'। एव घटादिशब्दवाच्योप्येकगतो भेदो द्रष्टव्य । तम्भेद च प्रतिपादयन् शब्दो विजातीयनिवृत्ति प्रसज्यप्रतिषेधलक्षणामर्थाद् गमयति सा तदन्यव्यावृत्ति ।

ननु यद्यन्यव्यावृत्तिविशिष्टो वस्तुभागो न गम्यते किमर्थन्तर्ह्यन्यव्यावृत्तिविशिष्ट इत्याद्युक्तमित्याह। **एकभेदाभिधान** इत्यादि। यश्चाय यथा विभक्त एकग[1]तो भेद. स एव शब्देन चोद्यते (।) तत्प्रतीतिरेवान्वयगति' (।) या त्वर्थाद

व्यवहाराङ्गतां शब्दानां दर्शयन् "तद्व्यावृत्त्या गम्यते। "इत्यतोऽपि व्यतिरेक उक्तः। अत एव शब्दे तदन्यव्यावृत्तिः स्वार्थाभिधानं[6] च न व्यापारद्वयम्। स्वार्थस्याभिधानादेव तदन्यव्यावृत्तिगतिः स्वार्थस्य भेदरूपत्वात्। न ह्यन्वयोऽव्यावृत्तिमतो नाप्यनन्वयिनो व्यावृत्तिः।[7] एकान्वयस्य परिहार्याभावे, तथैक- 457b

---

अन्यव्यावृत्तिगतिः सा व्यतिरेकगति (।) एवमन्वयव्यतिरेकाभ्या शब्दोर्थवान् भवति (।) तेना**न्वयव्यतिरेकचोदनया**न्वयस्य साक्षादर्थात्तु व्यतिरेकस्य चोदना द्रष्टव्या। तया चोदनया **व्यवहाराङ्गतां शब्दानां दर्शयन्**नाचार्य दि ङ् ना ग आह "**तद्व्यावृत्त्या गम्यते वस्तुभाग**" इति। **तथा तद्विशिष्टो वे**त्याह।[2] व्यावृत्तिशब्देन **व्यतिरेक उक्तः**। वस्तुभागशब्देनान्वय । अनेनैतदपि व्याख्यात शब्दान्तरापोह कुर्वन्ती श्रुति स्वार्थमभिधत्त इत्यर्थ । तत्र योसावेकगतो भेदो विकल्पबुद्धिप्रतिभासी व्याख्यात स एव स्वार्थस्तत्रार्थान्तरव्यावृत्तिरर्थान्तरापोह प्रसज्यप्रतिषेधलक्षणस्त कुर्वतीत्यर्थाद् गमयन्तीत्यर्थ ।

यदि चान्यनिवृत्तिपुरस्सरैव वृक्षादिशब्दप्रवृत्ति[3]स्तदान्वयव्यतिरेकचोदनयेत्यादिव्याख्यान व्यर्थ स्यात्।

तस्माद्विधिरेव शब्दार्थ ।

यत एवैकभेदाभिधानेऽर्थादन्यव्यावृत्तिगति**रत एवे**त्यादि। **स्वार्थस्य भेदरूपत्वादिति**। यो वृक्षशब्दस्यार्थ शाखादिमदाकार । विकल्पप्रतिभासी स भेदरूप । भिन्नस्वभावोऽभेदाकारव्यावृत्तत्वात् स्वय । अतो भेदरूपस्य **स्वार्थस्याभिधानादेवार्थादन्यव्यावृत्ति[4]गति**रेव ह्यवृक्षाद् भेदरूपस्यैव वृक्षार्थस्य गतिर्भवेत्।

यद्यर्थात् तत्र वृक्षनिवृत्तिर्भवतीति। **तस्मात् स्वार्थाभिधानमेव** शब्दस्य व्यापारो**न्यव्यावर्त्तनत्वर्थादिति न शब्दस्य** व्यापारद्वय।

ननु विधायकेन वाक्येनान्वयमात्रम्प्रतिपाद्यते नान्यस्य विधान प्रतिषेधो वा। निषेधकेनापि निषेधमात्रमेव केवल प्रतीयते नान्यस्य विधान प्रतिषेधो वेत्यत आ[5]ह।

न ह्यन्वय इत्यादि। प्रतिनियतस्यार्थस्य विधानमन्वयो यथा वृक्षच्छिन्धीति। तत्रावृक्षस्यार्थान्निवृत्तिर्व्यतिरेक.। स यत्र न विद्यते सो**व्यतिरेक** एव भूतो**न्वयो न मे स्ति**। किन्तु सर्व एव स व्यतिरेक ।

तेन यदुच्यते भ ट्टो द्यो त क रा भ्या (।)

"विधिरूपश्च शब्दार्थो येन नाभ्युपगम्यते।
न भवेद् व्यतिरेकोपि तस्य तत्पूर्वको ह्यसावि"ति[1]

---

[1] Ślokavārtika.

परिहारस्यापि क्वचित् स्थित्यभावे निष्फलचोदनत्वात्।

स चायं भेदोऽरूपः। रूपवत्त्वेन केवलं दर्शनं बुद्धिविप्लवः।

निरस्तमिष्टत्वात्। अ[6]नन्वयो वान्वयरहितो वा व्यतिरेको न हीति सम्बन्ध। तत्र विशेषस्य प्रतिषेधो व्यतिरेक। तत्रार्थाच्छेषगतिरन्वय। **एकान्वय** इत्यादि-नैतदेव समर्थ्यते। **एकान्वय**स्येत्येकस्य विधानस्य **परिहार्याभावे** व्यवच्छेद्याभावे निष्फलचोदनत्वात्।

यदि वृक्षञ्छिन्धीत्युक्तेर्थादवृक्षस्य न तत्र व्यवच्छेदस्तदा वृक्षशब्दप्रयोगो
94a निष्फल स्यात्।[7] यद्वा किम्वृक्षञ्छिनद्मि उतान्यमिति श्रोतुर्जिज्ञासाया सत्या वृक्षञ्छिन्धीत्युक्तेन्यनिषेध प्रतीयत एवान्यथा परिहार्याभावे निष्फलमभिधान स्यात्। तथा यदाप्याकाक्षारहित श्रोता वृक्षञ्छिन्धीति शब्देन चोद्यते तदापि वृक्ष एव प्रवर्त्तते नान्यत्र (।) वक्ता हि वृक्ष एवाय प्रवर्त्तते नान्यत्रेत्यनेनाभिप्रायेण शब्द प्रयुङ्क्ते। विवक्षानुगमन च ध्वने। तस्मान्ना[1]स्ति व्यतिरेकरहितोन्वयस्**तथैक-परिहारस्ये**त्येकप्रतिषेधस्य प्रतिषेधस्यैवैकस्येत्यर्थ। **क्वचिदिति** प्रतिषेधेन विषयीकृते वस्तुनि **स्थित्यभावे निष्फलचोदनत्वात्**। तथा हि सुराविषयस्य पानस्य प्रतिषेधे। यदि सुराया अन्यत्रापि पानस्य नावस्थान स्यात्। तदा सर्वस्मिन् विषये निषिद्धस्य पानस्य विशेषे प्रतिषेधोनर्थक। तत्र सुरा(ऽ)पेयेति[2] सुरापानमात्रस्य प्रतिषेधे चरितार्थत्वाद् वाक्यस्य यद्यप्युदकादिपान शब्देन न विधीयते। तथापि सुराया अन्यत्र पानस्यावस्थानन्न निवार्यत इत्यर्थादन्वयगतिरन्यथा सुराग्रहणमनर्थक स्यात्। यद्वा किमुदकादिवत् सुरा पातव्या किम्वा नेति प्रश्ने सुरा न पातव्येत्युक्ते सुरैवेति प्रतीतेर्नोदकादिपानविधान प्रकृतन्निषेध्यते (।) तेन सर्वत्र विधि[3]प्रतिषेधरूपस्यैव शब्दार्थत्व।

कस्तर्हि विधिप्रतिषेधपर्युदासवाक्यानाम्भेद। महान्भेद। विधायक हि वाक्यम्विधि प्राधान्येनाभिधायान्यनिषेधकमर्थात्। निषेधक च निषेध प्राधान्येनाभिधायार्थादन्यविधानमाह। पर्युदासप्रतिपादकन्तु वाक्य प्रतिषेधपूर्वकमन्यविधान प्राधान्येनाहेत्यस्त्येव विशेष इति।

ननु यद्यन्यनिवृत्तिर[4]र्थात् प्रतीयते सैव तर्हि पारमार्थिकी भावानामस्ति यया विशिष्टा गृह्यन्त इत्येव कस्मान्नेष्यते (।) कि पुनरेवन्तद्गतेस्तदुपाधित्वात् तद्विशिष्टो गत इति व्याख्यायत इत्यत आह। **स चाय**मित्यादि (।) यो **भेदो** व्यावृत्तिलक्षण आचार्य दि ङ् ना गे न विशेषणत्वेनाभिमत· स **चायमरूपो** नि·स्व-

तेनैवापरमार्थोसावन्यथा न हि वस्तुनः ॥१३०॥
व्यावृत्तिर्वस्तु भवति; भेदोस्यास्मादितीरणात्।

रूपं हि परमार्थः स भेदो यदि रूप स्यात् तद्रूप अतद्रूपं वा। तद्रूप्य नान्यस्ततो भिद्यते। न च तस्य रूप अन्यस्य स्यात्।

भाव। नास्य व्यतिरिक्तमव्यतिरिक्तम्वा रूपमस्तीति कृत्वा। कथ[6]न्तर्हि भावाना विजातीयाद् भेद इति प्रतीतिरिति चेदाह। **रूपवत्त्वेन** भावसम्बन्धित्वेन तस्य भेदस्य **केवलन्दर्शनम्**प्रतीति**र्विप्लवो** भ्रान्ति (।) केवलमिति तथाभूतबाह्यनिरपेक्ष (।) का रि का या मप्येव व्याख्यान द्रष्टव्य।

ननु यदि रूपवत्त्वेन दर्शन कथ बुद्धिविप्लव इत्यत आह। **तेनैवे**त्यादि। रूपवत्त्वेन भावसम्बन्धित्वेन यद्दर्शनम्भेदस्य तेनैव**ाप[6]रमार्थो** न वस्तुभूतोऽसत्त्वात्। **असा**विति भेद प्रसज्यरूप। **अन्यथे**त्येवमनिष्यमाणे। **न हि वस्तुनः** स्वलक्षणस्य सम्बन्धिनी **व्यावृत्तिर्वस्तु भवति**। कि कारण (।) **भेदोस्यास्मादितीरणात्**।

एतदुक्तम्भवति। यदि हि सा वस्तुभूता स्यात् तदा वृक्षेभ्योऽवृक्षव्यावृत्तिरभिन्ना भिन्ना वा स्यात्। यद्यभिन्ना। अस्मादवृक्षाद् वृक्षस्य भेद इति व्यतिरेक[7]- 94b
प्रतीतिर्न स्यात्। पलाशाच्चैकस्मादवृक्षव्यावृत्तेरभिन्नत्वात्। धवादीनामवृक्षव्यावृत्तिर्न स्यात्। पलाशवत् तत्स्वभावाया व्यावृत्तेस्तेष्वननुगमात्। अथ पलाशाद् भिन्ना सा। तत्राप्यवृक्षव्यावृत्ते सकाशात् पलाशस्य व्यावृत्ति स्यादवृक्षव्यावृत्तेश्च व्यावर्त्तमानस्य पलाशस्यावृक्षरूपता स्यादवृक्षवत्। ततश्चास्मादवृक्षादस्य वृक्षस्य भेद इति प्रतीतिर्न स्यादिष्यते[1] च। तस्मात्तद्व्यावृत्तिर्न वस्तु। **भेदोस्यास्मादितीरणा**दुच्चारणादित्यर्थ। उपलक्षण चैतत् प्रतीतेरपि ग्रहण।

रूपं हीत्यादिना व्याचष्टे। हि यस्मात्। रूप किमुच्यते **परमार्थ**। वस्तुस्वभाव.। भेदोन्यव्यावृत्ति**र्यदि रूपं स्याद्** यदि स्वभावो भवेत्। तदित्यवृक्षाद् व्यावृत्तिरूप। **तद्रूपमि**ति यत्तद्व्यावृत्त पलाशस्वलक्षण तदात्मक। **अतद्रूपं** वेति ततोन्यदित्य[2]र्थ। वस्तुनस्तत्त्वान्यत्त्वानतिक्रमादित्यर्थ।

ताद्रूप्य इत्यादिना प्रथमपक्षे दोषमाह। **ताद्रूप्ये** पलाशादन्यत्त्वे यया व्यावृत्त्या सामान्यभूतया सर्वे वृक्षभेदा· व्यावृत्ता दृष्टास्तस्यास्ताद्रूप्ये पलाशादनन्यत्वेभ्युपगम्यमाने तदेव पलाशस्वलक्षणमेव व्यावृत्तिरिति कृत्वा पलाश एवावृक्षाद् भिन्न· प्राप्नोति **नान्यो** धवादि। **तत** इत्यवृक्षाद् **भिद्येत**। किञ्कारणमित्याह। **न ही**त्यादि। अवृक्षाद्धि व्यावृत्ति पलाशस्यैव रूप। **न च तस्य रूप[3]मन्यस्य** धवादे.

न तदेव भेदस्य रूपं चेत्। अन्यदेव रूपं स्यात्। ततश्च भावस्तस्माद् व्यावर्त्तेत। ततः तस्य भेदो न स्यात्। यो यद्भेदाद् व्यावर्त्तते तत् तदेव भवतीति सोस्य भेद इति च न स्यात्। न ह्यन्योन्यस्य भेदो भवति सम्बन्धी। सति वा सम्बन्धित्वे कार्यकारणभावात् तज्जनितं रूपं भेद इति अविशेषात् स्वकारणानां कार्याणि सर्वाणि व्यावृत्तयः स्युः। भेदस्यार्थान्तरत्वे च ततोऽप्यस्य भेदोस्ती[5]ति भेदोपाधित्वात् द्रव्यान्तरवत् न भेदः स्यात्।

स्यात्।

न तदेवेत्यादिना द्वितीयपक्षोपन्यास। **न तदेव** पलाशस्वलक्षणमेव **तस्य भेदस्य रूपं** (।) **रूपं च** स्वभावश्चासौ **भेद इष्यते। ततोन्यदेव** पलाशाद् व्यावृत्ति-**रूपं स्यात्।** यद्वा रूप चान्यदेव भेदस्य स्यात्। **ततश्चान्यत्त्वात्** कारणात्। **भावः** पलाशात्मकस्**तस्माद**वृक्षव्यावृत्तिरूपाद् **व्यावर्त्तेत। ततः** कारणात्। **ऊष्मा[4]दित्य**वृक्षात् **तस्य** पलाशस्य **भेद इति न स्यात्।** यस्माद् **यत्** खलु वस्तु। **यतो भेदो** यद्भेदस्तस्माद् **व्यावर्त्तते। तत्तदेव भवति।** अवृक्षव्यावृत्तेर्भवति। अवृक्षव्यावृत्तेरवृक्षनिवृत्तिरूपाया निवर्त्तमानम्पलाशस्वलक्षणमवृक्षमिव स्यादवृक्ष-वत्। मा वा भूद् वृक्षावृक्षयोरेकत्वन्तथापि **सोस्य भेद इति च न स्यात्।**

यदि चायमवृक्षाद् भेद पलाशादन्य स्यात्तदयम[5]वृक्षाद् **भेदो**स्य पलाशस्य **सम्बन्धीति न स्यात्। न ह्री**त्याद्यस्येव समर्थन। **अन्यः** स्वतन्त्रोन्यस्य **सम्बन्धी भेदो** धर्मरूपो **भवति। सति वे**ति **सम्बन्धित्वे**भ्युपगम्यमाने वा। **सम्बन्ध. कार्य-कारणभावो**ङ्गीकर्त्तव्य। भिन्नयो कार्यकारणमन्तरेण सम्बन्धायोगात्। तत्र व्यावृत्तिमान् कारण व्यावृत्ति कार्य। **इति** हेतो **रूपं** वस्त्वन्तरमेव **त[6]ज्जनित**न्तेन व्यावृत्तिमता स्वलक्षणेन जनित **भेद इति। पादा**(? पदा)र्थान्तरस्य नाम कृत-न्तस्मात् कार्यत्वेनाभिमताद् भेदाख्यात् पदार्थाद् **अविशेषा**दन्यत्रापि **कारणाना** यानि **कार्याणि** तानि **सर्वाणि व्यावृत्तयो** भेदा **स्युः**। न चैव। तदान्यत्रापि भेदाभिमते भेद इति व्यपदेशो मा भूत्।

95a अथ कार्य भेद इति नोच्यते किन्तु भेद· कार्य इत्युच्यते। तदाप्याह। **अर्थान्त-रत्वे च** भेदस्याभ्युपगम्यमाने। **ततोपि** व्यावृत्तिमतोप्यस्य भेदस्य **भेदोस्ति**। अन्यथा भेदस्यार्थान्तरत्वमेव न स्यात्। **ततश्च** पलाशस्यावृक्षाद् यो भेदस्तस्य भेदस्य पलाशाद भेद इति कृत्वा **स भेदो भेदोपाधि** स पलाशाद् भेद। उपाधिविशेषण यस्य भेदस्य स **भेदोपाधिस्तद्**भावस्त**त्त्वन्तस्मा**वसाववृक्षाद् भेद पलाशस्य **न भेदः स्या[1]त्। द्रव्यान्तरवत्**। यथा हि द्रव्यान्तर घटादिक-

न हि भेदोपाधिवदेव भेदः अयमत इति विशेषनिर्देशात्। ततश्चोपाध्यभावे भेदस्यैवाभावः स्यात्। ततो नान्यत्त्वम्। नाप्यन्यथाऽभावात् भावे

मप्यघटापेक्षया यो **भेदस्तदुपाधित्वान्न** पलाशस्य भेदस्तद्वत्। स्वतन्त्रत्वादित्यभिप्राय।

ननु यदि नाम भेदोपाधिर्भेदस्तथापि किमिति पलाशस्य भेदो न भवतीत्यत आह। **न हीत्यादि। अयमत इति विशेषनिर्देशात्।** अयमवृक्षाद् भेद। **अत** इत्यवृक्षात्। अस्येत्येतदपेक्षणीय। अस्य[2] पलाशस्याय भेदोऽस्मादवृक्षादित्येव विशेषनिर्देशात् पारतन्त्र्येण निर्देशात् पलाशस्य सम्बन्धी भेदो धर्म सिध्यति। पारतन्त्र्येण च निर्देशो भेदस्याभेदे सति सिध्यति भेदान्तरप्रतिक्षेपेण। न त्वर्थान्तरत्वे भेदस्य। अर्थान्तरत्वे हि भेदोपाधित्वाद् घटवन्न पलाशस्य भेद स्यात्। ततश्चास्मादस्य भेद इति विशेषनिर्देशो न स्यात्। तदेव[3] व्यतिरेकपक्षेऽवृक्षाद् भेदस्यापि पलाशाद् यो भेद सोपि रूपवानिति तस्यापि स्वाश्रयाद् भेदेन भवितव्य। तथा च सर्वभेदाना भिन्नस्वभावतया भेदोपाधित्वेन स्वयन्न रूपभेदतेति न कश्चिद् भेद स्यात्।

एतदेवाह। **ततश्चेत्यादि। उपाध्यभाव** इति व्यावृत्तिलक्षणस्य धर्मभूतस्योपाधेरभावे सर्वस्य स्वभावान्तरत्वेन धर्मित्वाद् **भेदस्यै[4]वाभावः स्यात्** तस्य धर्मिरूपत्वात्।

योपि मन्यते (।) यदि रूपवती व्यावृत्ति स्यात् स्यात् तत्त्वान्यत्वपक्षभावी दोषो यावता नीरूपा सास्ति तया च भावा विशिष्टा गृह्यन्त इति।

तदयुक्त।

"तद्गतावेव शब्देभ्यो गम्यतेऽन्यनिवर्त्तन।

न तत्र गम्यते कश्चिद्विशिष्ट केनचित्पर("॥ प्र. वा. १।१२८)

इति ग्रन्थविरोधात्। नीरूपस्य चास्तित्वविरोधाच्छशविषाणवत्। नीरूपत्वा[5]देव च न तस्या प्रत्यक्ष ग्राहक नाप्यनुमान। सम्बन्धाभावात्।

नापि नियतरूपान्यथानुपपत्त्या तत्कल्पना सम्बन्धाभावादेव। स्वहेतुभ्य एव च नियतरूपाणामुत्पन्नत्वादिति "**सर्वभावा स्वभावेन** व्यावृत्तिभागिन" (१।४२) इत्यत्रान्तरेऽभिहितत्वात्।

नापि च साऽप्रतिपन्ना विशेषणम्भवितुमर्हति। न हि दण्डाप्रतीतौ दण्डीति प्रतीतिर्भवति।[6] नापि सा क्वचिदाश्रिता नीरूपत्वात्। न चासम्बद्धम्विशेषणम्भवति। नाप्यन्यनिवृत्तिग्रहणपुरस्सर वृक्षादिषु वृक्षशब्द प्रवर्त्ततेऽप्रतीतिरित्युक्तत्वात्। निवृत्तेर्नीरूपतयाऽप्रतिपन्नत्वेन सकेतस्याप्रवृत्तेश्च। कथ शब्दविषयत्वन्तस्मा-

परमार्थः। कथन्तर्हि अभिन्नस्य वस्तुनः शब्देन चोदने तस्यैवान्यतो भेदात्,
458a **अनंशस्य एकस्य भेदस्य[7] चोदने सर्वभेदगतेः, तत्र कथं शब्दप्रमाणान्तरणि व्यर्थानि न स्युरिति चेत्। नैष दोषः। यस्मात्—**

एकार्थश्लेषविच्छेद एको व्याप्रियते ध्वनिः ॥१३१॥
लिङ्गं वा तत्र विच्छिन्नं[1] वाह्यं वस्तु न किञ्चन।
यस्याभिधानतो वस्तुसामर्थ्यादखिले गतिः ॥१३२॥

दनुभवद्वारेण वृक्षोऽय नावृक्ष इत्येव निश्चय उत्पद्यते। तेनान्यनिवृत्ति प्रतिषेध-
95b विक[7]ल्पेन कल्पिता। यथासकेत च वृक्षादौ शब्द. प्रवर्त्तमानोर्थादन्यनिवृत्तिमाक्षि-
ति। अन्यनिवृत्तिविकल्पमाक्षिपतीत्यर्थ। स्तेनान्यनिवृत्त्या विशिष्टो। वस्तुभागो गम्यत इत्युच्यत इति।

यदि व्यावृत्तय सामान्यभूता बहिर्वस्तुत्वेन नेष्यन्ते। नापि परपरिकल्पित सामान्यमेव सति बाह्यम्वस्त्वेव वाच्यमापतित। तत्र च दोष इत्याह। **कथन्तर्हीति**। **अ[1]भिन्नस्य** निरशस्य **वस्तुनः शब्देन चोदने** उपलक्षण चैतत् लिगेन प्रतिपादने। **तस्यैवाभिन्नस्य** वस्तुन एकस्माद् भिन्नस्य पुन**रन्यतोपि भेदात्**। तथा हि येन स्वभावेन न शब्दोऽकृतकाद् भिन्नस्तेनैव मूर्त्तानित्यत्वाच्च। तस्यानशत्वात्। **अनंशस्य** च वस्तुन कृतकशब्देन**ैकस्या**कृतकाद् **भेदस्य** भिन्नस्य स्वभावस्य **चोदने**। तथा लिगेन प्रतिपादने **सर्वभे[2]दगतेस्**सर्वेभ्यो भिन्नस्य स्वभावस्य प्रतिपत्ते.। **तत्रा**नशे वस्तुनि **कथं शब्दप्रमाणान्तराणि व्यर्थानि न स्यु**। एकेन शब्देन चोदने शब्दान्तराणा वैयर्थ्य स्यात्। एकेन लिङ्गेन प्रतिपादने प्रमाणान्तराणा वैयर्थ्य स्यात्।

यस्मादित्यादिना परिहरति। तस्माद् **यो येन धर्मेण** विशेष. सप्रतीयत (१।४४) इत्यादिना प्रागेवेद चोद्यम्परिहृतम[3]धिकविधानार्थन्तु पुनरुपन्यास:। अर्थेष्वाकारान्तरसमारोपो**र्थश्लेषः** (।) स च प्रतिपत्तिभेदेनानेक.। **तत्रेति** बुद्धि-प्रतिभासिनि धर्मिणि बाह्यभिन्नतयाऽभ्येयास्ते। बाह्यतयाध्यस्तस्यैव बुद्धयाकारस्य शब्दवाच्यत्वात्। न पुनर्बाह्यम्बुद्धयाकारो वा केवल शब्दवाच्य: स्वलक्षणत्वात्। **तत्र** धर्मिणि **विधिरूपतया** स्वार्थप्रतिपत्तिद्वारेण**कार्थ[4]श्लेषविच्छेदे**ऽपनयन **एको ध्वनिर्व्याप्रियते**। (।१३०॥)

लिङ्गं चैकार्थश्लेषविच्छेदे व्याप्रियते। **तत्र** स्वार्थाभिधानद्वारेण समारोप-व्यवच्छेदे शब्दप्रमाणान्तराणा साफल्यमिति यावत्। **न** पुनर्ज्ञानाद् व्यतिरिक्त-**म्बाह्यम्वस्तु** स्वलक्षण (।) स्वलक्षणाद् वा व्यतिरिक्तम्बाह्यम्वस्तु सामान्यलक्षण-म्वाच्य **किञ्चन**ास्ति। **यस्य** वस्तुनोऽ**भिधान**तोऽखिले वस्तुस्व[5]भावे **गतिर्भवेत्**।

कुर्वन्नानाफलः शब्द एकाधारो भवत्यतः।

यथा बाह्यान्तर्भेदसंसृष्टया बुद्धया स्वस्यैव अर्थ[2]क्रियायोग्यमध्यवसाय शब्दार्थं उपयुज्यतं इति पूर्वोक्तवत्। तैस्तैर्भ्रान्तिकारणैः संसृष्टरूप इव प्रतिभासमाने यथासंकेत व्यवच्छेदार्थं तत्रैव ते व्याप्रियन्ते। न ह्येकसाध्यमपि व्यवच्छेदमन्यः करोति संकेतप्रतिनियमात्। नैव विच्छिन्न किञ्चिद् वस्तु आक्षिप्यते। यस्याभिधानात् वस्तुबलेन सर्वथा गतिः स्यात् शब्दानां। बुद्धि-विषयत्वात्[4]।

तत्र च अवस्तुनि वस्तुसामर्थ्याभावात्। तथाभूतेनायं व्यवहारः सम्यग्-

---

वस्तुसामर्थ्याद् वस्तुवशात्। यतश्च शब्द स्वाभिधानद्वारेण व्यवच्छेद करोति **तत** कारणात् त त व्यवच्छेद कुर्वन्नानाफल **शब्दो** भवत्**येकाधारश्च**। कथ। **अर्थक्रियायोग्यमध्यवसाय**। अनर्थक्रियाकारिणापि स्वाभासमर्थक्रियाकारित्वेन स्वलक्षणरूपत्त्वेनाध्यस्येत्यर्थ। **तत्रैव**ेति बुद्धिप्रतिभासे बाह्य[7]तयाध्यस्ते। किभूते। 96.1
तैस्तैर्भ्रान्तिकारणैः संसृष्टरूप इव भाति। (।१३१॥)

सदृशापरोत्पत्त्यादिभि**र्भ्रान्तिहेतु**भिर्नित्याद्याकारेण **संसृष्टरूप इव प्रतिभास-माने**। **तेऽ**नित्यादि**शब्दा यथासंकेत** यस्य यस्य समारोपस्य **व्यवच्छेदार्थं**। स्वप्रतिभासे सकेत. कुत। तस्य तस्य प्रतियोगिनो व्यवच्छेदाय **व्याप्रियन्ते**। सकेतानुरूपमेव प्रतिपाद[1]यन्नाह। **न चेत्या**दि। ह्यर्थे चशब्द। यतो **यथासंकेत व्यापारस्ततो न ह्येकशब्दसाध्य व्यवच्छेदमन्यः** शब्द **करोति**। किङ्कारण(।) **संकेतप्रतिनियमात्**। एकैकव्यवच्छेदार्थम्बुद्ध्याकारोऽविभक्तबाह्यरूपे शब्दनिवेश-नात्। व्यवहारकालेपि स्वार्थाभिधानद्वारेण तन्तमेव व्यवच्छेद प्रत्याययतीत्यर्थ। शब्दग्रहणमुपलक्षणमेव लिङ्ग[2]मपीति द्रष्टव्य।

नन्वध्यवसितबाह्यरूपत्वाच्छब्दार्थस्य ततश्च शब्देनन्यलक्षणस्य सर्वात्मना विषयीकरणात् कथ न शब्दान्तराणाम्वैयर्थ्यमित्याह **न चेत्या**दि। अवधारणश्च शब्द। **नैव विच्छिन्नं** ज्ञानाशाद् भिन्न **किञ्चिद् वस्तु**। स्वलक्षण स्वलक्षणाद् व्यतिरिक्त सामान्यलक्षणमन्यनिवृत्तिलक्षण **वाक्षिप्यते** गृह्यते शब्देन लिङ्गेन वा। **यस्या[3]भिधानाद् वस्तुबलेने**ति वस्तुग्रहे निरशत्वाद् वस्तुन **सर्वथा गतिः स्यात्**। धर्माणान्ततो व्यतिरेकात्। व्यतिरेकेप्युपाधीना नानोपाध्युपकाराङ्गशक्त्यभिन्ना-त्मनो ग्रह (१।५४) इत्यादिना सर्वथाग्रहणस्योक्तत्वात्। कस्माच्छब्दैर्विच्छिन्न-म्वस्तुनाक्षिप्यत इत्यत आह। **शब्दाना**मित्यादि।

एतदुक्तम्भवति। यतो बुद्ध्याकारमबाह्यम्बाह्यमध्यवस्य[4]न्ति शब्दास्ततो

भूतेन नानैकधर्मभेदाभेदाः। प्रतिभास[6]विप्लवानुसारीति तस्य तत्प्रतिबन्धभूते ऽपितथा तदव्यभिचारः। ततो वितथात् प्रवृत्तस्यान्ते तथाभूतएव वस्तुनि ज्ञानसंवादात्। न पुनर्भिन्नाकारग्राहिणां ज्ञानं शब्दा[6]नामेकवस्तुविषयत्वात्। नानाफलः शब्द एकाधारो नास्ति व्याघातात्। यथावर्णिते बुद्धिप्रतिभासाश्रये न दोषः।

विच्छिन्नवस्तुग्राहका इव भवन्तीत्यर्थ। बुद्धेर्विप्लवश्च बुद्ध्याकारस्य बहीरूपतया ग्रह। **तांद्वषयत्वाच्छब्दाना**। बुद्धिविप्लवेपि वाच्य**वस्तुसामर्थ्यादखिले गति**.। किन्नेति चेदाह। **तत्र चेत्यादि**। तत्र बुद्धिविप्लवेऽ**वस्तुनि वस्तुसामर्थ्याभावात्**।

यद्यपि बुद्ध्याकारो ज्ञानस्वलक्षणत्वाद्वस्तु। तथाप्यसौ शब्दैर्विकल्पैर्वा बाह्या[5]-भिन्नतयाध्यस्तोऽवस्त्वेव। तेन शब्दो विकल्पो वा न स्वलक्षणविषयो यथावदेक-स्यापि बाह्यस्य ज्ञानाकारस्य वाऽग्रहणादिति।

यदि बुद्धिविप्लवविषया एव सर्वशब्दा कथ कृतकानित्यादिशब्दानान्तथाभूते वस्तुन्यव्यभिचार इत्यत आह। **तथाभूतेत्यादि**। ततस्ततोऽकृतकनित्यादेर्भिन्नस्या-र्थस्यानुभवद्वारेणेत्यर्थ'। **अयं व्य[6]वहार** इति सम्बन्ध। किम्भूत (।) **नानैकेत्यादि**। नाना एकश्च नानैक। तच्च **धर्मश्चेति** कर्मधारय। ततो **भेदाभे**दशब्दाभ्यान्त्रिपदो द्वन्द्व। नानैकधर्म**भेदाभेदा** एव बुद्धौ **प्रतिभासन्त** इति प्रतिभासास्त एव विप्लवो
96b भ्रान्तत्वात्। **तदनुसारी** तेनाकारेण प्रवृत्त। **इति** हेतो**स्तस्य** व्यवहारस्य **तत्प्रतिबन्धे**[7] तमिँस्तथाभूते स्वलक्षणे पारम्पर्येणोत्पत्तिप्रतिबन्धे सति **तदव्यभिचारः**। वस्त्वव्यभिचार। यथा हि कृतकाद्याकारा शब्दा विप्लवास्तथावस्तूनामपि कृतकादिरूपेण परमार्थतोवस्थानमित्यनेनाकारेणाव्य**भिचारो** द्रष्टव्य।

एतदेवाह। **ततोपीत्यादि**। ततो बुद्धिविप्लवविषयाच्छब्दाद् व्यवहारात् परार्थानुमानलक्षणा[1]द् **वितथादिति** भ्रान्तात्। **प्रवृत्तस्यान्ते** प्रवृत्तिपरिसमाप्तौ **तथाभूत एव** कृतकादिरूप **एव वस्तुनि** नत्वकृतकादिरूपे। अनेनाव्यभिचारस्वरूप-मुक्त। **ज्ञानसम्वादात्** स्वलक्षणग्राहिज्ञानोत्पत्ते शब्दस्य वा ज्ञानस्य सम्वादात्।

अस्मिन्नेवान्यापोहे शब्दार्थे सामानाधिकरण्य सिध्यति न तु वस्तुनीत्याह। **न पुनर्भिन्नेत्यादि**। **भिन्ना आकारा** जाति[2]गुणादय शब्दप्रवृत्तिनिमित्तभूता.। तद्ग्राहिणां **ज्ञानशब्दानामेकवस्तुविषयत्वात्**। शब्द एकाधार इति सम्बन्ध। यदि हि भिन्नाकार ज्ञानमेकवस्तुविषयम्प्रवर्त्तेत ततस्तदनुसारेण शब्दोपि तथा स्यात्। तथा च **नानाफल शब्द एकाधार** इति भवेत्सामानाधिकरण्य तच्च **नास्ति व्याघातात्**। तथा हि नीलोत्पलशब्दयोरेक वा[3] वस्तुवाच्य स्यादनेकम्वा। आद्ये पक्षे एकेनैव शब्देन निरशस्य वस्तुन सर्वात्मनाभिधानात्'। द्वितीयस्य शब्दस्याप्रवृत्ति' स्यात् प्रवृत्तौ वा पर्यायतेति न नानाफलत्व। द्वितीये पक्ष एकाधारता नास्ति।

विच्छेदं सूचयन्नेकमप्रतिक्षिप्य[7] वर्त्तते ॥१३३॥ 458b

यदान्यं तन स व्याप्त एकत्वेन च भासते।
सामानाधिकरण्यं स्यात् तदा बुद्ध्यनुरोधतः ॥१३४॥
वस्तुधर्मस्य संस्पर्शो विच्छेदकरणे ध्वनेः।

टपटादिशब्दवन्नानाविषयत्वात्।

अथ मत (।) नीलशब्दो नीलगुणविशिष्टन्द्रव्यमाह। उत्पलशब्दोप्युत्पल-
ातिविशि[4]ष्टन्तदेव द्रव्यमाह। अतो विशेषणयोर्भेदान्नानाफल शब्दो विशेष्या-
ेदादेकाधार इति।

तदप्यसत्। यतो नीलगुणेन विशिष्टद्रव्यन्नीलशब्देनाभिधीयमान सर्वात्म-
ाभिधीयते निरशत्वात्। तत कोपरो द्रव्यस्योत्पलजातिविशिष्ट आत्मानभि-
हतोस्ति यदुत्पलशब्देनाभिधीयेतेात (।) तथैव पर्यायता स्यादथ विशेषणभेदाद्
व[5]शेष्यद्रव्यस्य भेदस्तदाप्येकाधारता न स्यात्। अपोहवादिनस्त्वयमदोष इत्याह।
थावर्ण्णित इत्यादि। **बुद्धिप्रतिभास आश्रयो** यस्य शब्दार्थस्य स तथोक्त।

यथा च न दोषस्तथा प्रतिपादयन्नाह। **विच्छेद**मित्यादि। एको नीलशब्द
एकं व्यवच्छेदमनीलव्यवच्छिन्न नीलस्वभाव **सूचयन्नन्य**मनुत्पलव्यवच्छिन्नमुत्पल-
वभाव**मप्रतिक्षिप्य[6] वर्त्तते** न निराकारोतीत्यर्थ। (।१३२॥)

स इत्यनुत्पलव्यवच्छिन्न स्वभाव। **तेन** नीलशब्देन **व्याप्त** आक्रान्त आक्षिप्त
न्नुत्पलशब्दप्रयोगे बुद्धावे**कत्वेन प्रतिभासते**। एकस्यैव धर्मिण व्यवच्छेदद्वया-
ातनीलोत्पलधर्मद्वययुक्तस्य विकल्पबुद्धौ प्रतिभासनात्। यदा चैवन्**तदा सामा-**
ाधिकरण्यं स्याद् बुद्धयनुरोधत।

एतदुक्तम्भव[7]ति (।) नीलशब्दप्रयोगाद् बुद्धिप्रतिभासी धर्मी नीलरूप एव 97a
ातिभासते। तत्रार्थादनील व्यावर्त्यते न त्वनुत्पलव्यवच्छिन्न स्वभाव उत्पल-
ाब्दप्रयोगादप्युत्पलरूपतया प्रतीयमानोनुत्पल व्यावर्त्यते न त्वनीलव्यावृत्त
वभाव। शब्दद्वयप्रयोगे तु नीलोत्पलधर्मद्वययुक्तैकधर्मिप्रतिभासिनी विकल्पबुद्धि-
ुत्पद्यते ततो नानाफल [1] शब्द एकाधारो भवतीति भवेद् बु(द्)ध्यनुरोधेन सामा-
ाधिकरण्यमिति।

तेन यदु द्यो त क रे णोच्यते (।) "यस्य चान्यापोह शब्दार्थस्तेनानीलानुत्पल-
युदासौ कथ समानाधिकरणाविति वक्तव्य। यस्य पुनर्विधीयमान शब्दार्थस्य
ातिगुणविशिष्ट नीलोत्पलशब्दाभ्या द्रव्यमभिधीयते जातिगुणौ च द्रव्ये वर्त्तते।

(स्यात् सत्त्यं स हि तत्रेति) नैकवस्त्वभिधायिनि ॥१३५॥
बुद्धावभासमानस्य दृश्य[1]स्याभावनिश्चयात्।

इति संग्रहश्लोकाः।

तेनान्यापोहविषयाः शब्दाः सामान्यगोचराः ॥१३६॥
शब्दाश्च बुद्धयश्चैव वस्तुन्येषामसम्भवात्।

यदि हि वस्त्वेव विधिरूपेण शब्दविकल्पैः विषयःक्रियेत, सोयमिह सर्वार्थानां सर्वेणाकारेण प्रतीतिप्रसंगः। न च सामान्यादि चिन्तयित्वा न्यायशास्त्रप्रणेत्राऽन्यापोह[3]विषयावेतौ निर्दिष्टौ।

न पुनरनीलानुत्पलव्युदा[2]सौ। तस्मात् समानाधिकरणार्थो नास्ती"ति[1] निरस्त। विधीयमानस्य शब्दार्थस्याभ्युपगमात्। (।१३३॥)

कि च पुन (।) **शब्दस्य** स्वार्थाभिधानद्वारेण समारोपव्य**वच्छेदकरणे**भ्युपगम्यमाने। यद्वा **व्यवच्छेदकरणे** व्यवच्छिन्नस्वभावविषयीकरणे। लेशतो **वस्तुधर्मस्य** वस्तुस्वभावस्य विजातीयव्यावृत्तस्य **संस्पर्शः स्यात्** प्राप्तिलक्षण (।) कि कारण (।) **सत्त्य**[3]मिति विद्यमान **स ह्यध्यवसीयमान** व्यवच्छिन्न स्वभाव। **तत्र** वस्तुनीति कृत्वा **नैकवस्त्वभिधायिनि** शब्देभ्युपगम्यमाने वस्तुधर्मस्य सस्पर्श सामान्यस्यैव वस्तुनोऽभावात्।

कथमिति चेत्। **बुद्धा**वित्यादि। उपलब्धिलक्षणप्राप्तस्यानुपलम्भादसत्त्वमिति यावत्। यत एवम्वस्तुनि शब्दार्थे दोपस्**तेन** कारणे**नान्यापोहविषया** विकल्प[4]-बुद्धिप्रतिभासविषया **शब्दा बुद्धयश्च** प्रोक्ता आचार्य दि ङ ना गे न। किम्भूता बुद्धय **सामान्यगोचरा** विकल्पिका इत्यर्थ। बुद्धीनामेवैतद् विशेषण न तु शब्दानान्तेषा सामान्यविषयव्यभिचारात्। किञ्चकारण। **वस्तुन्येषां** शब्दाना विकल्पाना च **सम्भवात्।**

यदि हीत्यादिना व्याचष्टे। **वस्त्वेव यदि विषयीक्रियेत** गृह्येत न तु विधिरूपे[5]णाध्यवसीयेत। **सोय**मित्यनन्तरोक्त **सर्वार्थाना सर्वेणाकारे**ण वस्तुसामर्थ्यात् **प्रतीतिप्रसंगः। आदि**शब्दाद् अविशेषणविशेष्यभावप्रमाणान्तराप्रवृत्त्यादिपरिग्रह। **प्रणेता** आचार्य दि ङ ना ग। **एतौ**विति बुद्धिशब्दौ। अन्योपोह्यतेनेनेति विकल्पाकार उच्यते तद्विषयौ। तथा भिन्नाकाराभिर्बुद्धिभिरेकम्वस्तु यदि विषयीक्रि[6]येत। तथैव शब्देन चाभिधीयेत। तदा भिन्नफलयो शब्दयोरेकत्र द्रव्ये वृत्तत्वात् स्यात् सामानाधिकरण्यमेतत्तु न सम्भवति। तथा हि तच्छब्दवाच्य सामान्य स्वलक्षणाद-

---

[1] Nyāyavārtika.

एवं चेत्।

एकत्वाद् वस्तुरूपस्य भिन्नरूपा मतिः कुतः ॥१३७॥

अन्वयव्यतिरेकौ वा नैकस्यैकार्थगोचरौ।

तदेकमनंशं वस्तु चेत् कथं बुद्ध्याकार[4]भेदैर्विषयीक्रियते। भिन्नाकारत्वं भेदाश्रयादेव। तदपि अभेदात् सामान्यस्य। तदात्मनोऽपि तदेकयोगक्षेमत्वात्। तद् अयं न अन्योन्यार्थपरिहारे[5]ण एकविषययोर्वृत्यसम्भवात्।

न च सामानाधिकरण्यादि स्यात्। न चैकस्मिन्नेव वस्त्वात्मनि वृत्यवृत्ती युक्ते व्याघातात्। न च अन्यत्र अवृत्तिरपि सामान्यं स्यात्[6]।

भिन्न भिन्नम्वा स्यात्। तत्राद्ये पक्षे। **एकत्वाद् वस्तुरूपस्य भिन्नरूपा** सामान्य-विशेषाकारा भिन्ना **मति कुतः**। (।१३६॥)

स्वलक्षणाच्च सामान्यस्याव्यतिरेके। शावलेयात्मको[7] भेदो यतो बाहुले- 97b
यात्मकाद् भेदाद् व्यावर्त्तते। बाहुलेये शावलेयात्मक गोत्वमन्वेतीत्येकस्यार्थस्यै-काधिकरणावन्वयव्यतिरेकौ प्राप्नुत। तच्चायुक्तमित्याह। **अन्वयव्यतिरेका-**वित्यादि। **एकोर्थो गोच**रो विषयो ययोरन्वयव्यतिरेकयोस्तौ तथोक्तौ।

तदेकमित्यादिना व्याचष्टे। एकत्वादेव**ानंश**मेकस्याशाभावात्। आक्रियत इत्याकारो बुद्धिप्रति[1]भास । तस्य **भेद**स्तद**ाश्रया**द् भेदस्य। वस्तुनानात्वस्य। यदि भिन्नाकाराभिर्बुद्धिभिर्गृह्येत भिन्न स्यात्। न चैवन्तस्य चाभावाद् वस्तुन। सामान्यविशेषोभयात्मकत्वाद् वस्तुन एकस्यापि भिन्नाकारबुद्धिग्राह्यत्वमिति चेदाह। **तदात्मनोपी**त्यादि। स्वलक्षणात्मनस्त**देकयोगक्षेमत्वात्**। स्वलक्षणेनैक-योगक्षेमत्वात् तद्वदेवाभिन्नत्व। **तदि**ति तस्मा**दय**ं[2] सामानाधिकरण्यादिर्न स्यादिति सम्बन्ध। कि कारणम् (।) **अन्योन्यार्थपरिहारेण** परस्परार्थपरि-हारेण भिन्नप्रवृत्तिनिमित्तत्वेनेति यावत्। शब्दयो**रेकविषययो**रेकद्रव्याधारयो-**र्वृत्त्यसम्भवात्**।

अन्वयेत्यादि श्लोकभाग **न चे**त्यादिना व्याचष्टे। य**देक** एव **वस्त्वात्मा** स्वल-क्षण सामान्य च तदा शावलेयस्वलक्षणस्य गोत्वसामान्यात्मक[3]त्वात्। **तत्रै**व बाहु-लेये **वृत्ति**. पुन स्वलक्षणात्मकत्वात् तत्रै**वावृत्ति**स्तस्मिन् काले प्रयुक्ता। सा **चायुक्ता** । **व्याघातात्**। प्रमाणबाधितत्वात्। स्वलक्षणादभिन्नत्वा**च्चैव** सामान्य-**मन्यत्र वर्त्त**ते। ततो नैकस्यैकत्र वृत्यवृत्ती इति चेदाह। **न चे**त्यादि। **सामान्यस्ये**-त्यादि। ततो नैकस्य वृत्यवृत्ती इत्यभिप्राय।

नेत्या चा र्य सामान्यविशेषयो सा **ख्या**[4]दिदर्शनेन **भेदाभावात्**। **तदि**त्याद्य-

न सामान्यस्य वृत्तिर्विशेष इति चेत्। न। भेदाभावात्। तद्धि एकरूपं सामान्यं वा भवेद् विशेषो वा। न ह्यसति रूपभेदेऽयं प्रविभागो युक्तः, सति वा
459a **अव्यतिरेको[7] न स्यादित्युक्तम्। तद् अयमविभागो निरन्वयोऽपि न सान्वयः।**

योपि सामान्यं भिन्नमेवाह तत्रापि—

अभेदव्यवहाराश्च भेदे[1] स्युरनिबन्धनाः।

यथास्वं शब्दानां भिन्नार्थाभिधाने कथं एकार्थबुद्ध्याश्रयाः स्युः! अर्थान्तराभिधायिनश्च निराकांक्षत्वात् आकांक्षाभावे कथं विशेषणविशेष्य[2] भावः?

स्यैव समर्थन। **तद्धि** वस्त्वेकरूपमेकात्मक सत्। **सामान्यम्वा भवेद् विशेषो** वेति। सामान्याद् विशेषस्याव्यतिरेकात् सामान्यमेव स्यात्। विशेष एव वा विशेषादव्यतिरेकात् सामान्यस्य। न त्वेक द्विरूप। यतो **न ह्यसति रूपभेदेऽयं, प्रविभाग** इति सामान्य विशेष इति च। सति वा प्रविभागे सामान्यविशे[5]षयो**रव्यतिरेको न स्यादित्युक्तं प्राक्**। **तदिति** तस्मा**दयम्**वस्त्वात्मा। **अविभाग** इत्यनश।

यदि सामान्यमेव तदान्वियाद् व्यक्त्यन्तरङ्गच्छेत्। अथ विशेषात्मक एव। तदा न वान्वियात्। एकस्य तु विरुद्धधर्मद्वयासम्भव इति यावत्। तदेवाह (।) **न पुन**रित्यादि।

योपीति वै शे षि कादि। द्रव्याद् **भिन्नमेव सामान्य** शब्दवाच्यमाह। व्यक्ते सामान्या[6]**नाम्भे**देऽभ्युपगम्यमानेऽ**भेदव्यवहारा** सामानाधिकरण्यादिव्यवहारा **स्युरनिबन्धनाः। यथास्व**मिति। वीप्सायामव्ययीभाव। तथा हि नीलोत्पलादि**शब्दा यथास्वन्नी**लोत्पलादिम्परस्परभिन्न सामान्यमाहु.। यदापि नीलशब्दो नीलगुणाभि-
98a धायीष्यते तदापि भिन्नार्थाभिधानमस्त्येव। **एको** धर्मी **अर्थो** विषयो यस्या **बुद्धे**स्सा (।) **एकार्था** चासौ **बुद्धि**श्चेति कर्मधारय पुम्वद्भावश्च। अस्या **आश्रया** कारण **कथं स्युः**। ततश्च सामानाधिकरण्य न स्यादिति भाव।

यदि नीलोत्पलादिशब्दा विशेषणद्वययुक्तैकधर्मिविषया बुद्धि जनयेयु। तदैकार्थप्रतिपादनेन स्यात् सामानाधिकरण्यन्तच्च नास्ति। व्यक्तेरर्थान्तर सामान्यन्तदभिधायिनश्चानाक्षेपकास्तद्गताना भेदानान्तदपरि[1]त्यागेन वृत्तिराक्षेप न तथा। कस्मात् (।) **निराकांक्षत्वात्**। यदा वृक्षशब्दो वृक्षत्वमेवाभिधत्ते। तदा तस्य निर्विशेषणत्वात् तावतैवासौ निराकाक्ष इति कथन्धवादीनाक्षिपेत्। अनाक्षिप्ताश्च कथ वृक्षशब्दार्थस्य भेदा धवादयोऽतद्भेदत्वाच्च कथ वृक्ष शिशपेति विशेषणविशेष्यभाव। तदाह। **कथ**मित्यादि। सामान्यविशिष्टस्य द्रव्यस्याभिधा[2]नान्न

सर्वत्र भावाद् व्यावृत्तेनैते दोषाः प्रसंगिनः ॥१३८॥

यथा हि एकः तस्माद् भिन्नः तथाऽन्योपीति भेदस्यासामान्यदोषो नास्ति। परिशिष्टाभावः[3] प्रागेव उक्तः।

अपि च।

एककार्येषु भेदेषु तत्कार्यपरिचोदने ॥१३९॥
गौरवाशक्तिवैफल्याद् भेदाख्यायाः समा श्रुतिः।
कृता बुद्धैरतत्कार्यव्यावृत्तिविनिबन्धना ॥१४०॥[4]

यथोक्तो दोष इति चेन्न। उक्तोत्तरत्वात्। विशेषणविशिष्टस्यापि द्रव्यस्याभिधाने वस्तुसामर्थ्यादेकस्मादपि शब्दादखिलगते शब्दान्तरस्य तत्राप्रवृत्ति प्रवृत्तौ चापर्यायतेति। तदेव वस्तुशब्दार्थवादिनो न कथचित्सामानाधिकरण्यादिसम्भव ।

सामान्यमपि तेषा न सम्भवतीत्युक्त। तथा हि यदा तावत्स्वलक्षणादव्यतिरिक्त सामान्य[3]न्तदा स्वलक्षणवद् व्यक्त्यन्तराननुगमादसामान्य (।) व्यतिरेकेपि कथमन्यस्य समान्यमतिप्रसङ्गादित्यादि प्रागुक्त ।

व्यावृत्तिवादिनस्त्वयमदोष इत्याह। **सर्वत्रे**त्यादि। एते दोषा इति सामान्यसामानाधिकरण्याभावादय । **यथा** हीत्यादि। **एको** गोभेद शावलेयस्त**स्माद**गोस्वभावाद् भिन्नस्त**थान्योपि** बाहुलेयादि (।) अतो विजातीयव्यावृत्त[4] स्वभाव सर्वत्र तुल्य इति **भेदस्य** विजातीयभिन्नस्य स्वभावस्य विकल्पबुद्धया सर्वत्र स्वाकाराभेदेनाध्यस्तस्या**सामान्यदोषो नास्ति। परिशिष्टाभाव** इति सामानाधिकरण्याद्यभाव प्रागेवोक्त । 'विच्छेद सूचयन्नेकमप्रतिक्षिप्य वर्त्तत" (१।१३३) इत्यादिना।

एवन्तावद् विजातीयव्यावृत्त स्वभाव सर्वत्र बुद्धया स्वाकाराभेदेनाध्यस्तमेक शब्दाभिधेय प्रति[5]पाद्याधुनाऽभिन्नाकारमन्तरेणाप्येककार्येषु भावेष्वेक शब्दो नियुज्यत इत्याह। **अपि चे**त्यादि। **तत्कार्यपरिचोदने** एककार्यतापरिचोदनार्थ। यद्वैककार्याणा परिचोदनार्थ। **एककार्येषु भेदे**ष्वेकस्य भावरहितेष्वपि **समा** एका श्रुति । **कृता** सकेतिता। **बुद्धै**र्व्यवहारज्ञै । **तत्कार्या**णाम्भेदानामतत्कार्येभ्यो या यावृत्तिस्त**न्निबन्धना**[6] विजातीयव्यावृत्ततयैककार्येष्वेका श्रुतिर्निबध्यत इत्यर्थ । (।१३८॥)

ननु यदि न सामान्ये शब्दनिवेश स्वलक्षणे तर्हि शब्दनिवेश· स्यादन्यस्याभावात्। न च स्वलक्षण शब्दवाच्य ।

नैतदस्ति। यत प्रतिपादकस्तावत् त्रिकालस्थान् भावान् एककार्यात् सकेतकरणाभिप्रायेण विषयीकृत्य तेष्वेव सकेत करोति व्यवहारकाले परिचोदनार्थ।

न भावे सर्वभावानां स्वस्वभावव्यवस्थितेः ।
यद् रूपं शावलेयस्य बाहुलेयस्य नास्ति तत् ॥१४१॥
अतत्कार्यपरावृत्तिर्द्वयोरपि च विद्यते ।
अर्थाभेदेन च विना शब्दाभेदो न युज्यते ॥१४२॥[5]
तस्मात् तत्कार्यतापीष्टाऽतत्कार्यादेव भिन्नता ।
चक्षुरादौ यथारूपविज्ञानैकफले क्वचित् ॥१४३॥
अविशेषेण तत्कार्यचोदनासंभवे सति ।
सकृत् सर्वप्रतीत्यर्थं कश्चित् साङ्केतिकीं श्रुतिम् ॥१४४॥

98b तेन[7] यद्यपि बुद्धिपरिवर्त्तिनो भावा सामान्यरूपास्तथापि तेष्वेव बहुष् बहिरिव परिस्फुरत्स्वेक शब्दो निवेश्यते (।) न तु तेषु सर्वेषु भिन्नरूपे सामान्ये स्थिते प्रतिव्यक्ति भिन्नेव श्रुति कस्मान्न सकेतितेत्याह। **गौरवे**त्यादि। **गौरवाद्** (सामान्य)[1] **अशक्तेर्वैफल्याच्च भेदाख्याया** भिन्नाया श्रुते.। यद्वा भेदाख्याया भेदकथनस्य। एतच्च वृत्तौ स्पष्टयिष्याम । **न भावे** वस्तुभू[1]ते सामान्ये समा श्रुति कृता। कि कारण सर्वभावाना **स्वभावस्य** स्वरूपस्य **व्यवस्थिते**रसाकार्यात्।

यद्रूपं शावलेयस्येत्यादिना व्यवस्थितस्वभावत्वमाह। ततो नाव्यतिरिक्त सामान्य। व्यतिरिक्तमपि स्वस्मिन् स्वभावेवस्थित तदपि कथ व्यक्तीना समान रूप। न ह्यन्येनान्ये समाना इत्युक्त। सास्नाद्याकारप्रत्ययस्य हेतवोऽतत्कार्या-स्तेभ्यो व्यावृ[2]त्तिर्व्यावृत्त स्वभाव । **द्वयो**रिति शावलेयबाहुलेययो.। तस्माद-तत्कार्यव्यावृत्तिभिन्नानामप्यविरुद्धेति। सैवार्थाभेद शब्दाभेदस्य कारणमेष्टव्य **यतोर्थादभेदेन विना शब्दाभेदो न युज्यते**। कथन्तर्हि बहुष्वेका श्रुतिरर्थाभेद एव प्रवृत्तेरित्यत आह। **तस्मादि**त्यादि। यापीयन्**तत्कार्यतै**ककार्य**तेष्टा** यस्या परिचो-दनार्थम्बहुष्वेका श्रुतिरित्यु[3]क्त साप्यत**त्कार्यादेव भिन्नता** द्रष्टव्या। बहूनामतत्का-र्यादेव भिन्न स्वभावो द्रष्टव्य ।

न तु तत्कार्यता नाम सामान्यमस्ति। विनापि च सामान्ये यथा विलक्षणेष्वेक-शब्दनिवेशो न विरुद्धस्तथा दर्शयन्नाह। **चक्षुरादावि**त्यादि। रूपविज्ञानमेक फल यस्य चक्षुरादेरितिविग्रह । **क्वचि**दिति यस्मिन् काले विज्ञानजननसमर्थास्ते चोदयितु[4]मिष्टा· । अथवा क्वचित् काले साकेतिकी श्रुति कुर्यादिति सम्बन्धः। किमर्थं कुर्यादित्याह। **अविशेषेण** सामान्येन । **तत्कार्यस्य** चक्षुर्विज्ञानैककार्यस्य कारणकलापस्य परेभ्य· प्रकाशन**सम्भवे सति**। यदा तु चक्षुरादीनामसाधारण-

---

[1] In the margin.

कुर्यादृतेऽपि तद् रूपं सामान्याद् व्यतिरेकिणः।

अभिन्नमभन्तरेण यथा बहुषु एका श्रुतिः, तेषां एकवृत्तेरन्यत्र प्रत्ययाजननात्। अप्रत्यासत्ति[7]के च प्रत्ययजननेऽतिप्रसंगात्, तेषु च एक श्रुतिप्रवृत्तौ 459b
अर्थाभाव एकार्थनियोगाभावात्, भिन्नस्वभावानां पृथक् नियोगे यथाचोदितानां विभा[1]गापरिज्ञानात् इति। तस्यापि एकमेवेति लोकेन शब्दो निवेशनीयो।

कार्यत्व चोद्यते। तदा नैका श्रुतिस्तेषु सकेत्यत इत्यर्थ। **सकृदेककाल सर्वस्य** कारणकलापस्य **प्रतीत्य[5]र्थं। ऋतेपी**त्यादि। तेषा चक्षुरादीनान्**तद्रूपसामान्य**स्येत्येककार्यत्वलक्षणस्य सामान्यस्य व्यतिरिक्तस्याभावेपीत्यर्थ। सत्तैव तेषा सामान्यमिति चेन्न तस्या अविशेषात् सर्वदा सर्वत्र चक्षुर्विज्ञानप्रसङ्गात्। **अभिन्नमर्थमन्तरे**णेति सामान्यम्वस्तुभूतम्विना। **बहुषु** शावलेयादिषु। **तेषामिति** शावलेयादिभेदाना। यदि तेषा सामान्य स्या[6]त्तदा तत्र सामान्ये शब्दनिवेशात् सर्वत्र भेदे निवेशित स्यात्। एकन्तु सामान्य विना बहुष्वेकशब्दसन्निवेशो न युक्त। ततश्चासौ शब्द सकेत्यमान एकत्रैव भेदे सकेतित स्यात्। तथा **चैकवृत्तेरे**कत्र भेदे कृतसन्निवेशस्यान्यत्र भेदे विलक्षणे प्रत्**ययाजननात्**। द्वितीया गोव्यक्तिस्तत शब्दाद् गौरित्येव न प्रतीयेत। तत्र प्रत्यासत्तिनि[7]बन्धनस्य सामान्यस्याभावात्। स्वभावानुगमा- 99a
भावेपि शावलेये निवेशितोऽप्रत्यासन्ने बाहुलेये प्रत्यय जनयिष्यतीति चेदाह। **अप्रत्यासत्तिके** चेत्यादि। **अतिप्रसङ्गात्**। गोशब्दादश्वेपि प्रतीति स्यात्। एवन्तावदेक सामान्य विना बहुष्वेकशब्दनिवेशाभाव उक्त।

अभ्युपगम्य वैफल्यमाह। **तेषु चे**त्यादि। तथा हि बहुष्वेका श्रुतिर्निवेश्यतेऽनेकवृत्ति[1]मेकमर्थ प्रतिपादयितु। तानेव वा भेदान् असकरेण। तत्राद्यस्याभावमाह। **एकार्थनियोगाभावा**दिति। यद्येकस्मिन्नर्थे शब्दस्य नियोग स्यात् तदा भवेदेकार्थप्रतिपादन। द्वितीयाभावमाह। **भिन्ने**त्यादि। **भिन्नस्वभावानाम**सकीर्णाना शावलेयादीना प्रतिपत्तय इत्यध्याहार। **पृथ**गित्येकैकस्मिन् भेदे। एकस्य शब्दस्य **नियोगे**। सके[2]ते कृते। पश्चाद् व्यवहारकाले। **यथाचोदितानाम**त्यसकरेण प्रतिपत्त्यर्थ चोदिताना **विभागापरिज्ञानात्** तस्मान्न तेषु शब्दनियोग फलवान्। एव हि स्वलक्षणेषु पृथक् पृथक्छब्दनियोग फलवान्भवति।

यदि तस्माच्छब्दादसकरेण स्वलक्षणानि प्रतीयेरन्निति (।) क्रियते च बहुष्वेकशब्दनियोगस्तस्माद् वस्तुभूतेन सामान्येन भाव्यमित्यभिप्राय।[3]

तस्यापीत्या चार्यः। एकम्वस्तु सामान्यमस्तीत्येव कृत्वान्तरेणापि प्रयोजन। **लोकेन शब्दो निवेशनीय** इत्येको विकल्प। द्वितीयमाह। **तद्वे**त्यादि। तदिति

तद् वा वस्तुशक्त्यैव एकां श्रुतिं उत्थापयतीति चेत्। नास्ति तद्। किं तर्हि केनचित्[2] प्रयोजनेन कञ्चिच्छब्दं निवेशयेत्। तत्र चेद् एकत्रानेकं उपयुज्येत। तद्धि तत्रावश्यमेकेनैव शब्देन चोदयितुं युक्तम्। तस्य पृथक् पृथक् चोदने गौरवं स्यात्। न चास्य अनन्यसाधारणं रूपं चोदयितुं[3] अशक्यं, अत्र च न गौरवं वैफल्यं वा केवलमनेन तत्र तेऽर्थाः चोदनीयाः। त एकेन वा शब्देन चोद्येरन् बहुभिर्वेति स्वातंत्र्यमत्र वक्तुरिति चेत् इयमेका श्रुतिर्वहुषु वक्तुरभिप्राय(वशात्) प्रवर्तमाना नोपालम्भमर्हति। न चेयमशक्यप्रवर्त्तना, इच्छाधीनत्वात्।

सामान्य **वस्तुशक्त्यैवेति**। पुरुषव्यापारमनपेक्ष्य। एका **श्रुतिं** ध्वनयत्युत्थापयति। **नास्त्येव तद्** द्वयमपि। अन्तरेण प्रयोजन पुरुषव्यापारञ्च प्रयोगाभावात्। तदेव **किन्तर्ही**त्या[4]दिनाह। केनचित्प्रयोजननेति। एभ्य शब्देभ्यो व्यवहारे। तदतत्साधनमर्थ ज्ञात्वा प्रतिपद्येतेति। अनेन प्रथमविकल्पाभावमाह।

निर्देश्यन्त इत्यनेन द्वितीयस्य। निर्देश्यन्ते सकेत्यन्ते व्यवहर्त्तुकामैरित्यध्याहार। **तत्रैतस्मिन् न्यायेऽनेकं** कारण**मेकत्र** कार्ये **उपयुज्येत** व्याप्रियेत। **तदि**त्यनेक। कुत कारणकलापात् तदु[5]त्पद्यत इत्येव। **तत्रैतस्मिन्** कार्ये व्यवहर्त्तुकामै**रवश्यन्तच्चानेकङ्कारणमतत्कार्यव्यावृत्तिलक्षणमेककार्यतामाश्रित्यै**केनैव **शब्देन चोदयितु युक्तं**। अनेकेन चोदने दोषमाह। **तस्येत्या**दि। **पृथक् पृथगि**ति भिन्नै. शब्दै। एतच्च स्वलक्षणशब्दनिवेशमभ्युपगम्योक्तम् (।)

एतदेव न सम्भवतीत्याह। **न चे**त्यादि। **अस्य** वस्तुन। **अ[6]नन्यसाधारणं रूप**मिति। नान्यसाधारणमनन्यसाधारण स्वलक्षणमित्यर्थ। **नाप्यस्ये**त्यनेकशब्दनिवेशनस्य।

एतच्च गौरवाशक्तिवैफल्यादित्यस्य यथाक्रम विवरण। कस्माद् वैफल्यमिति चेदाह। **केवल**मित्यादि। **अनेन** प्रयोक्त्रा तत्रैतस्मिन् कार्ये। **तेर्थाः** कारणभूता-
99b **श्चोदनीया** इत्येतावत् प्रयोजन।[7] **ते** तु कारणभूता पदार्था **एकेन वा शब्देन चोद्येरन् बहुभिर्वेति स्वातन्त्र्यमत्र** चोदने **वक्तुः**। यत एवन्तदिति तस्मादि**यमेका श्रुतिर्बहुषु** वाच्येषु **वक्तुरभिप्राय**वशाद् हेतो **प्रवर्त्तमाना नोप(ा)लम्भमर्हति। बहुष्वेका श्रुतिर्न** शक्या प्रवर्त्तयितुमिति चेदाह। **न चेय**मित्यादि। इयमेका श्रुतिः। **अशक्यं प्रवर्त्तनमयस्या** इति विग्रह।[1] कस्मान्नाशक्यप्रवर्त्तनेत्याह। इच्छाधीनत्वाद् इच्छाया। अधीनमशक्यप्रवर्त्तन। **यदि ह्येकत्रापी**त्यादि। तथा हीच्छयैव तत्र परपरिकल्पिते सामान्ये न वस्तुस्थित्यैव एकस्याः श्रुते· प्रवत्तिः (।) किन्तर्हि-

यदि हि एकत्राऽपि प्रयोक्तुरिच्छा न भवेत्, कथं प्रवर्त्तेत[5], इच्छायां वा बहुष्वपि व्याघातात् शक्येत। प्रयोजनाभावात् नात्र निवेशनमिति चेत्। प्रयोजनं हि अतत्प्रयोजनेभ्यो भवेन भिन्नेषु एकस्माद् प्रतीतिः[6] इत्युक्तं प्राक्, न पुनः स्वभावस्यैकत्वात्।

यथास्वं व्यवस्थितस्वभावानां अन्योन्यरूपासंश्लेषात् कथं भिन्नेषु एकस्वभावनिमित्तः शब्दो[7] भवेदिति उक्तं पुरस्तात्। 460a

अतत्प्रयोजनेभ्यो व्यावृतिस्तु भिन्नानामप्यविरुद्धेति प्रयोजनाभेदः शब्दाभेदस्य कारणं भवतु। तेनेमे तत्प्र[1]योजनाः, तथा चेत् अतत्प्रयोजनेभ्यो भिन्ना एवोक्ताः। न पुनरेषामन्या तत्कार्यता, अन्यत्रान्यतो भेदात्। यथा चक्षूरूपप्रति-

---

वक्तुरिच्छावशात्। तथा **न** यदि **प्रयोक्तुरिच्छा भवेत्। कथ**मियमेका श्रुतिरेकत्रापि **प्रवर्त्तेत**। नैवेत्यभिप्राय। तथैक[2]त्रापि प्रवर्त्तयितुमिच्छैव कारण। न वस्तुशक्ति(।) तदा **बहुष्वपि** न कश्चिद् **व्याघात** इत्याह। **इच्छायां** वेत्यादि। एकत्रापि प्रवर्त्तयितुमिच्छाया कारणत्वेन कल्प्यमानाया। एनामेका श्रुति। **प्रयोजनाभावादित्यादि**। न ह्येकम्वस्तुविना **बहुष्वे**कशब्दनिवेशन फलवत्। **उक्तं प्राक्**। किमुक्तमित्याह। **भिन्नेष्वित्यादि**। **भिन्नेषु** शावलेयादिभेदे[3]ष्वे**कस्माद्** गोशब्दात् प्रतीतिर**तत्प्रयोजनेभ्यो भेदेन**। तद्गोभेदसाध्य वाहदोहादिक कार्य प्रयोजन न भवति येषामश्वादीनान्तेभ्यो भेदेनेति। कि पुनर्वस्तुभृतमेवैकत्व न चोद्यत इत्यत आह। **न पुनः स्वभावस्यैकत्वान्न** पुनर्वस्तुभूतस्य सामान्यस्यैकत्वाद् भिन्नेष्वेका श्रुति। तस्यैव सामान्यव्यतिरिक्तस्याव्यतिरिक्तस्य चायो[4]गात्।(।१३९।।)

भवतु नाम सामान्य व्यतिरिक्तन्तदपि तस्मिन् स्वभावे व्यवस्थितमभिश्रमेव। तदेवाह। **यथास्वमित्यादि**। यस्य यल्लक्षणन्तेन **व्यवस्थितस्वभावानामन्योन्यरूपासंश्लेषात् कथमेकनिमित्तः** सामान्यनिबन्धन **शब्दो भिन्नेषु भवेत्**। नैवेत्यभिप्राय। न ह्यन्येनान्ये समाना भवन्ति। एतच्चोक्त प्राक्। **सर्वे भावाः स्वभावेन स्वस्वभावव्यवस्थि**[5]तेरित्यत्र(१।४२) प्रस्तावे।

अन्यापोहवादिनस्त्वयमदोष इत्याह। **अतत्प्रयोजनेत्यादि**। अतत्प्रयोजनेभ्यो **व्यावृत्तिस्तु भिन्नानामप्यविरुद्धेति** कृत्वा स एवातत्प्रयोजनेभ्यो भेदस्तत्प्रयोजनानामभेदस्तद्व्यावृत्ते. सर्वत्र भावात्। **शब्दाभेदस्य कारणम्भवतु**। यतश्च न कथचिद् वस्तुभूत सामान्य घटते। **तेनेमे** गोभेदास्तत्**प्रयोज**[6]**ना** वाहदोहप्रयोजना इति यदुक्तन्तत्। अतत्**प्रयोजनेभ्यो**ऽश्वादिभ्यो **भिन्ना एवोक्ताः**।(।१४०।।)

न पुनरेषामन्या तत्कार्यतान्यत्रान्यतो भेदात्। अन्यव्यावृत्त एव स्वभाव

भासमनोव्यापाराणां[2] वा आत्मेन्द्रियमनोर्थसन्निकर्षेषु रूपविज्ञानैककार्याणा सामान्यकार्यचोदनासम्भवे कुतो रूपविज्ञानमिति व्यवहारलाघ[3]वार्थं गौरवे कश्चित् साङ्केतिको रूपविज्ञानहेतुः सरः शरो वेत्येवं श्रुति निवेशयेत्। अपि नाम तद्धेतूनां सर्वेषां सकृत् यथा प्रतिपत्तिः स्यात्। न[4] चात्रा-नुगामिना रूपेण किंचिदपि। अतदर्थेभ्यस्तेभ्यो भिन्ना एव व्यावृत्तिः। समूहसन्तानावस्थाविशेषशब्दाः समस्ता अपि तथाकाराः[5] किञ्चित् कार्यं तेषां तत्र विशेषाभावात् अपार्थिका विशेषचोदनेति सकृत् सर्वेषां नियोजनार्थं

एषामभेद इति यावत्। एतेन **तत्कार्यता**पीत्यादि का रि का भागो व्याख्यात। (।१४१।।)

यथेत्यादिना चक्षुरादौ यथा रूपविज्ञानैकफल इत्यादि व्याचष्टे। **आत्मेन्द्रिय-**
100a **मनो[7]र्थसन्निकर्ष**ेष्विति परप्रसिद्धचोक्त। **रूपविज्ञानमेकं कार्यं** येषामिति विग्रह। (।१४२।।)तद्रूपविज्ञान कार्य येषान्तानि तत्कार्याणि तेषा **सामान्यम**विशेषेणैक**कार्य**-करणसामर्थ्यन्तस्य **चोदना** प्रकाशना। तस्या **सम्भवे** सति(।)केन पुन प्रस्तावेन चोदनासम्भव इत्याह। **कुतो रूपविज्ञान**मित्यविशेषेण सामग्रीगते प्रश्ने सतीत्यर्थ।[1] **व्यवहारलाघवार्थ**मेकेन शब्देन बहूना प्रतिपादनार्थ **रूपविज्ञानस्य हेतु**श्चक्षुरादि-कलाप सर शरो **वेत्येवं श्रुतिनिवेशये**दिति सम्बन्ध।

अपि नामेत्यादिना व्यवहारलाघवमेव व्याचष्टे। **तद्धेतूनां** चक्षुर्विज्ञान-हेतूना। **न चात्रेति** चक्षुरादौ। येनानुगामिना **रूपेण**ैक चक्षुर्विज्ञान जनयन्ति। तथाभूत सामान्यञ्च[2]क्षुरादीनान्नास्ति (।) सत्ता विद्यत इति चेत्। तस्यास्तर्हि सर्वत्राविशेषात् सर्वत्र चक्षुरादिविज्ञान स्यात्। न च सम्बन्धिभेदात् सत्ताया भेदो नित्यत्वेनानाधेयातिशयत्वात्। केवलन्तदर्थतया रूपविज्ञानैककार्यतया भावाश्चक्षु-रादय। **अतदर्थेभ्यो** रूपविज्ञानाजनकेभ्यो **भिन्ना** इति कृत्वा भेद **एवातत्कार्येभ्यो व्यावृत्तिरेव**। एषा चक्षुरादीनामभेद सर्वेषामतत्कार्यव्यावृत्तेस्तुल्यत्वात्। यथा चक्षुरादीनामभेद सर्वेषामतत्कार्यव्यावृत्तेस्तुल्यत्वात्। यथा चक्षूरूपादिष्वेक सामान्य विनाप्येककार्यत्वख्यापनायैक शब्दो निवेश्यते। एवजातीया सर्व इत्यादि। समूहस्य सन्तानस्यावस्थाविशेषस्य च वाचका शब्दा **समूहसन्ताना-वस्थाविशेषशब्दाः**। तत्र समूहाभिधायिन शब्दमधिकृत्याह। **ये स[4]मस्ता** इत्यादि। **ये** रूपरसगन्धादयस्समस्ता **किञ्चि**देकमुदकाद्याहरणादि **कार्यं। तेषा** रूपादीना। **तत्र** कार्ये कारणतया **विशेषाभावात्**। सर्वेषा ह्येक कार्यमिति कृत्वा तेनैककार्यत्वेन विशेषाभाव उच्यते। न तु स्वलक्षणस्याविशेषात्।

तेषामेककार्यकरणशक्तिख्यापनमात्रे कर्त्तव्येऽ**पार्थिका विशेषचोद[5]ना**। प्रति-

घट इत्येकं शब्दं तेषु प्रयुंक्ते लोकः। तेऽपि सजातीयादन्यतश्च भेदाविशेषेऽपि तत्प्रयोजनाङ्गतया तदन्येभ्यो भिद्यन्त इति भेदात् तस्मात् अविशेषेण प्रतीयन्त[7]। तत्र घटस्य रूपादय इत्यपि घटस्वभावा रूपादयः। उदकाहरण- 460b
**विशेषादिकार्यसमर्था इति। सामान्यकार्यमात्रसाधने प्रसिद्धनात्मना वा रूपा-
विशब्दैः प्रसिद्धा विशिष्टकार्यसाधनभूताख्याविशिष्टाः ते च एवमुच्यन्तेस्य।
न पुनरत्र यथावर्णितलक्षणं द्रव्यं अन्यद् किञ्चिदपि। तस्य तादृशस्या-**

रूपादिभिन्नेन शब्देन चोदनानिष्फलेति कृत्वा **सकृदेककाल सर्वेषां** क्वचित् कार्ये नियोजनार्थं रूपादिविशेषेषूदकधारणादिकार्यसमेषु **घट इत्येकं शब्दं प्रयुंक्तेऽय लोक** इति व्यवहर्त्ता। (।१४३॥)

ननु भिन्ना एव रूपादय कथमेकस्माद् घटशब्दाद् अभेदेन प्रतीयन्त इति चेदाह। **तेपीत्यादि**। सजातीया[6]द् रूपादन्यतश्च रसादेर्भेदावशेषेप। **तत्प्रया-
नाङ्गतया**। विशिष्टोदकाद्याहरणकार्याङ्गतया। **तदन्येभ्य** इति तत्कार्यकरणा-समर्थेभ्य पटादिभ्यो **भिद्यन्त इति** भेद एवैषामभेदस्ततोऽभेदात्। तस्मादभेदाद-**विशेषेणैव** सामान्येनैवैकस्माद् घटशब्दात् सर्वे रूपादय **प्रतीयन्ते**।

यदि रू[7]पादय एव केवला घटो न तु तद्व्यतिरिक्त द्रव्य (।) कथन्तर्हि घटस्य 100b
रूपादय इति व्यतिरेक इति चेदाह। **तत्रेत्यादि**। **घटस्य रूपादय इत्यपि** यो व्यतिरेकस्तस्यायमर्थो **घटस्वभावा रूपादयो** न पटादिस्वभावा इति।

एतदेव व्याचष्टे। **उदकेत्यादि**। **उदकाहारणस्य** विशेषो घटादन्येनासाध्यत्व। आदिशब्दादन्यस्यापि घट[1]साध्यस्य **कार्यस्य** परिग्रह। तस्मिन् **कार्ये समर्थाः** सप्तमीति योगविभागात्समास। अयमत्रार्थ (।) रूपादिशब्दा रूपादीन् रूपसाध्यकार्यमात्रशक्तियुक्तानविशेषेण प्रतिपादयन्ति। घटशब्दस्तु विशिष्टकार्य-शक्तियोगेन पटादिस्वभावेभ्योपि रूपादिभ्यो भेदेन विशिष्टान् रूपादीनाह। अतो घटस्य रूपादय इति शब्दद्वयव्यापा[2]रेण सामान्यविशेषाकारबुद्धयुत्पत्ते सामान्य-विशेषभावो व्यतिरेकविमतिश्च प्रयुज्यत इति। एतमेव **सामान्येत्यादिनाह**। **सामान्यकार्यं** रूपादिमात्रसाध्यन्तस्य सिद्धि साधनन्तास्मिन् **प्रसिद्धेनात्मना** स्वभा-वेन। इत्थभूतलक्षणा तृतीया। हेतौ वा। इत्थभूतेन रूपेण हेतुना वा **रूपादि-शब्दैः** करणभूतै· **प्रसिद्धास्सन्त**[3] **विशिष्टं कार्यं** घटसाध्य घटसाध्यमेवोदकाहर-णादि। तस्य **साधनं** साध्यतेनेनेति कृत्वा। तथाभूता **आख्या** सज्ञा **यस्य** स तथा तेन विशिष्टा·। त इति रूपादय **एवमुच्यन्त** इति।

न पुनरत्र रूपादिसहतौ ह्यत्र वा घट इति व्यवहारे **यथावर्णितलक्षणमिति**

नुपल[2]म्भात्। एकवचनग्रहणं तु एकशक्तिसूचनार्थं संकेतपरतंत्रं वा। तथा हेतुफलविशेषभूताः किंचिद् एकं साधयन्ति साध्यन्ते च तेऽपि सकृत्[3] प्रतीत्यर्थं व्रीह्यादिशब्दैः कृतसंकेताः पूर्ववत् कथ्यन्ते।

यऽपि पृथक् समस्ता वा क्वचित् सकृदेव प्रत्यायनार्थं उपयुज्यन्ते, तेऽव-

---

रूपादिव्यतिरिक्त**तन्द्रव्यं। तस्या**वयविन**स्तादृशस्ये**ति रूपादिव्यतिरि[4]क्तस्य। उपलब्धिलक्षणप्राप्तंश्चावयवी परैरिष्टो दार्शन स्पार्शन द्रव्यमिति वचनात्। तेनोपलब्धिलक्षणप्राप्तत्वेनाभ्युपगतस्य रूपादिव्यतिरेकेण **नुपलम्भादिति** वाक्यार्थ। यथावान्तरेणाप्यवयविन परमाणव एव प्रत्यक्षस्य विषयस्तथा द्वितीये परिच्छेदे प्रतिपादयिष्यते।

यदि रूपादय एव सहता घट. क[5]थन्तर्हि बहुषु घट इत्येकवचनमिति चेदाह। **एकवचनमि**त्यादि। यथा बहुष्वेक शब्द **एकशक्तिसूचना**र्थस्तथैकवचनमपि। तेषा रूपादीना**मेक**स्मिन्नुदकाहरणकार्ये या **शक्ति**स्तस्या **सूचनार्थं**। एककार्यकर्त्तृत्वेन तेष्वेकत्वमारोप्यैकवचनमित्यर्थ। न पुनस्तेष्वेका शक्तिर्विद्यते। अनपेक्षितबाह्यार्थमकवचन **सं[6]केतपरतन्त्रम्वा**। एतच्च "**येषां वस्तुवशा वाच**"(१।६६)इत्यादिना प्रतिपादित। सन्तानाभिधायिन शब्दानधिकृत्याह। **तथे**त्यादि। **हेतु**श्च **फलं** च हेतुफले। तयो**र्विशेष** उपादानोपादेयभावेनैकसन्तान नाश्रयत्व। **तम्भूताः** प्राप्ता प्राप्तिवचनो भवति सकर्मक। साधन कृतेति द्वितीयातत्पुरुष। हेतुफल-
101a **विशेषो**[7] वा भूतो निष्पन्नो येषामिति बहुव्रीहि। आहितादेराकृतिगणत्वाद् भूतशब्दस्य परनिपात। **किंचिदेकं साधयन्तीति**। यथाकुरनाडपत्रादय फलमेक। **साध्यन्ते** चैकेन। यथा त एवोपादानभूतेन बीजेन। तथ्यकुरादयो नैकक्षणात्मका **सकृत्प्रतीत्यर्थः**। तेनैककार्यत्वेनैककारणत्वेन वा साम्येन **व्रीह्यादिशब्दैः** सन्तानाभिधायिभि· कृ**तसंकेताः** स[1]केतकाले। पश्चाद् व्यवहारकाले **कथ्यन्ते** व्यवहारलाघवार्थ। अभेदेन प्रबन्धजिज्ञासाया बीजाकुरादिभेदेनानेकशब्दप्रयोगस्य वैफल्यात्। आदिग्रहणेन मनुष्यादिशब्दग्रहण। तैरपि बालकुमारादिभेदभिन्नस्य प्रबन्धस्याभिधानात।

ननु व्रीह्यादिशब्दा अपि समुदायशब्दा एव रूपादिसमुदायाभिधायित्वात्।

सत्य। किन्तु हेतुफलविशेष[2]फलप्रबन्धाभिधानादेवमुच्यते (।) तथा समुदायशब्दोनेकसमुदायापेक्षया जातिशब्दो भवत्येवमवस्थाशब्दोपि (।) केवल विशिष्टार्थविवक्षया कश्चिच्छब्द इत्युच्यत इत्यदोष। यथा च घटस्य रूपादय घट इति चैकवचन येन निबन्धनेनोक्त। तथा व्रीहे रूपादयो व्रीहिरिति नैकवचन द्रष्टव्यमत एवाह। **पूर्ववद्वा**च्यमिति। अवस्थाशब्दान[3]धिकृत्याह। **येपी**त्यादि। येपि नीला-

स्थाविशेषवाचिनः शब्दाः[4] सनिदर्शनाः सप्रतिघा इति तदन्येभ्यो भेदसामान्येन निर्दिश्यन्ते। यथैककार्याः तत्कार्यचोदनायां तदन्यस्मात् घटादेर्भेदेन शब्दैः कृतसमयाः[5]। तथा कारणापेक्षया अनेकोऽपि एकेन व्यवहारार्थमेव। यथा शवलाया अपत्यानि बहुलायाश्चापत्यानि। शब्दः प्रयत्नानन्तरीयकः कृतको वेति।

दिपरमाणव. **पृथगिति** नीलपीतादय परस्परानपेक्षा **समस्ता** वेति परस्परसहिता.। **क्वचिदिति** चक्षुर्विज्ञाने स्वदेशे परस्योत्पत्तिप्रतिबन्धे वा **सकृदेव प्रत्यायनार्थं**। एकस्माच्छब्दाद् बहूना निश्चयार्थ। तत्र ये चक्षुर्विज्ञाने **उपयुज्यन्ते। तेवस्थाविशेषवाचिनः सनिदर्शना** इत्युच्यन्ते। ये[4] स्वदेशे परस्योत्पत्ति प्रतिघ्नन्ति। ते **सप्रतिघा** इति।

ननु नीलपीतादयोऽत्यन्तभिन्नास्ते कथमेकेन सनिदर्शनादिशब्देनोच्यन्त इत्यत आह।

तदन्येभ्यो भेदसामान्येनेति। तदन्येभ्योऽनिदर्शनाप्रतिघेभ्यो यो भेदस्स एव तेषा सामान्य सर्वेषान्ततो व्यावृत्तत्वात्। तेन हेतुना। सनिदर्शनादिशब्दा अपि परमाणुसमुदया[5]ऽभिधानात् समुदायशब्दा एवेति चेत्(।) न। एकस्यापि परमाणो सप्रतिघादिशब्दैरभिधानात्।

कार्यद्वारेण शब्दप्रवृत्तिमुक्त्वा कारणद्वारेणाह। **यथैककार्या** रूपादयस्तत्कार्यचोदनायां। तदुदकधारणाद्येक कार्य यस्य रूपादिसामर्थ्यस्य तस्य चोदनायामेकशक्तिचोदनायामित्यर्थ। **तदन्यस्मात् घटादेर्भेदेन** घटादिशब्दैः। आदि[6]ग्रहणाद् व्रीह्यादिपरिग्रह। **कृतसमयाः** ख्याप्यन्त इति प्रकृत। **तथा कारणापेक्षयाप्यनेकोर्थ. एकेन** शब्देन कृतसमय ख्याप्यत इति वचनपरिणामेन सम्बन्ध. **व्यवहारार्थमेव**-लाघवेनेत्यर्थाद् द्रष्टव्य। **यथा शवलाया** गोरपत्यानि सर्वाण्येवैककारणत्वेन शावलेयशब्देनोच्यन्ते **बहुलायाश्चापत्यानि** बाहुलेयशब्देन।[7] यावाश्च पुरुषप्रयत्नेन 101b
कारणेन जनित शब्दः सर्व समानकारणजन्यत्वेन **प्रयत्नानन्तरीयकः** कथ्यते। करिष्यामीति चेतना प्रयत्न। तस्यानन्तरमव्यवधानन्तत्र भव इति ग्रहादेराकृतिगणत्वाच्छ। देशग्रहणन्तत्र न स्मर्यते। तस्य स्वार्थिक. कन्। एतच्च कारणविशेषापेक्षयोक्त।

कारणमात्राश्रयेणाह। **कृतको** वेति। कारणा[1]यत्तजन्मन प्रयत्नानन्तरीयकस्यान्यस्य च सर्वस्य कृतक इत्यभिधानात्।

एवन्तावद्विधिमुखेनोक्त।

तथा तत्कार्यप्रतिषेधेनाचाक्षुषः[6] **शब्दः। अनित्योऽनात्म इति च। तत्कारणप्रतिषेधेनास्वामिकः शून्य इति। एवमन्यदपि यथायोगम्। शून्य-**
461b **नित्यादिशब्दानां बुद्धौ**[7] **यथाकथितं समीहिताकारं विकल्प्य तद्व्यवच्छेदेन व्यपदेशः क्रियते। सर्वे हि शब्दार्था बुद्धिसमीहा निर्दिष्टविभक्तित्वात्।**

प्रतिषेधमुखेनाह। **तथे**त्यादि। तस्य चाक्षुषस्य नीलादेर्यत् **कार्यञ्चक्षुर्विज्ञानन्तस्य प्रतिषेधेनाचाक्षुषः शब्दः**। न समर्थञ्चक्षुर्विज्ञान प्रतीत्येवमचाक्षुषशब्देन सामान्येनोच्यते। अनित्यशब्दोपि नित्यव्यवच्छेदेन व्यवस्था[2]प्यमान । तत्कार्यप्रतिषेधेनैव। तथा हि नित्य परैर्वस्त्वेवेष्टन्तच्चासाध्यसाधनभूत व्यवहारपथ नावतरतीति साध्यसाधन चाङ्गीकर्तव्य। नित्यकार्यप्रतिषेधेनानित्य·। आत्मशब्दोपि क्वचित् कार्ये स्वतन्त्रस्य ख्यापनाय कृत इत्यनात्मशब्दोऽतत्कार्यव्यवच्छेदेन स्यात्।

एव कार्यप्रतिषेधेनाभिधाय कारणप्रतिषेधेनाह। **तदि**त्यादि। **त**[3]स्य सस्वामिकस्याशून्यस्य च **यत्कारणन्तस्य प्रतिषेधे**नाय शब्दादिको भावो**स्वामिकः शून्य इति** व्यवहारार्थ ख्याप्यत इति सम्बन्ध । तथा हि स्वतन्त्रेणात्मादिना योधिष्ठितस्स सस्वामिक परैरिष्यते। एवमशून्योपि तथाभूतेनाधिष्ठात्राधिष्ठितत्वादेवाधिष्ठिता चाधिष्ठातव्यस्वी**करणमन्य**थाधिष्ठातृत्वायोगात्। तस्मात् सस्वामिकादि[4]शब्दा कारणद्वारप्रवृत्ता परेषा। न प्रतिक्षणविशरारुषु भावेषु सामग्रीमात्रप्रतिबद्धेषु व्यवस्थितस्वभाव कश्चिदधिष्ठातास्ति यत्प्रतिबद्धास्सस्कारा प्रवर्त्तन्ते। ततोस्वामिका शून्याश्च यथोक्तकारणप्रतिषेधेन व्यवस्थाप्यन्त इति। **एवमन्य**दपीति। दु.खाशून्यानाथाप्रतिशरणादिकमपि। **यथायोग**मिति किचित्कार्यप्रति[5]षेधेन किचित्कारणप्रतिषेधेनेत्यर्थ । दु खाशून्यादिकार्यप्रतिषेधेन सुखशून्यादीनामप्रातिकूल्यकार्यत्वेन व्यवस्थाप्यमानत्वात्। सर्वस्य च सस्कृतस्य विपरिणामधर्मित्वेन प्रतिकूलत्वात्। **अनाथाप्रतिशर**णादि। कार्यप्रतिषेधेन स्वतन्त्रस्य नाथादेरभावात्। तदेवं कार्यकारणयोर्विधिप्रतिषेधमुखेन चतुष्टयी शब्दानाम्प्र[6]वृत्तिराख्याता भवति।

ननु चाशून्यनित्यादेर्व्यवच्छेद्यस्याभावात् कथ शून्यादिशब्देष्वन्यव्यवच्छेदाभिधानमिति चेदाह। **शून्ये**त्यादि। **यथाकथित**मिति यस्य यादृशी सिद्धान्ताश्रयणकल्पना तया **समीहितो** रचितो शून्यनित्यादीना य **आका**रस्त **विकल्प्य** बुद्धावारोप्य
102a **तद्व्यवच्छेदेन** परपरिकल्पिताऽशून्याद्याकारव्यवच्छेदेन शून्यादिव्य[7]**पदेशः क्रियते**। कस्मादित्याह। **बुद्धी**त्यादि। बुद्धेस्समीहा इममर्थमारोपयामीति सकल्प·। तथा स(र्व्वं. ..... .) साकर्य यस्य शब्दस्य स तथा तद्भावस्तस्मात्। सर्वग्रहणादेतदाह। **यत्रापि** वस्तुभूते.... .....ीति।

एतदुक्तम्भवति। न वस्तुस्वलक्षण शब्दै स्वरूपेण विधीयतेऽपनीयते वा (।)

अप्रतिपक्षदोषो[1]पक्षेपादिना दुर्मतीनां विस्पन्दितानीति ते (दोषोपक्षेपा) उपेक्षणीया एव। अथापि।

एकवृत्तेरनेकोऽपि यद्येकश्रुतिमान् भवेत् ॥१४५॥

न केवलं तदन्यस्माद् भेदोऽविशेषादेकशब्देन एककार्या उच्यन्ते। अपि त्वेकवृत्या एकशब्देन अनेकः पदार्थ उच्येत को विरोधः स्यात्। उक्तमिह तस्य उपलभ्यतेऽभिमतं अनुपलब्धेरभावः[3] स्यात्, अनुपलभ्यमानतायां वा तद्दर्शनाश्रया व्यपदेशप्रत्यभिज्ञानादयो न भवेयुरिति।

केवल विकल्पबुद्धिसन्दर्शित एव सर्वो विधिप्रतिषे[1]धव्यवहार। ततश्चानित्यादिशब्देष्वनित्यादिप्रतिपक्षो नित्यादिर्व्यवच्छेद्यो नास्तीत्य**प्रतिपक्षदोषस्तस्योपक्षेप** उद्भावन। आदिशब्दान्नास्त्यात्मेति प्रतिषेधे चाप्रतिषेधदोष इत्येवमाद्युपक्षेपश्च(।) **दुर्मतीनामु** द्यो त क र प्रभृतीना **विस्पन्दितानि** विजृम्भितान्यसम्बद्धानीति यावत्। न हि न्यायानुगतबुद्धिरसम्बद्धमुद्भावयेत्। अतश्च ते दोषो[2]पक्षेपा **उपेक्षणीया** नावधानार्हा इत्यर्थ।

अथेत्यादि पर। अपिशब्दो भिन्नक्रम.। **एकस्य** वस्तुन सामान्यस्य **वृत्तेरपि** कारणादनेको व्यक्तिभेद। एका श्रुति**रेकश्रुतिः**। सा चाधिका अस्या**नेकस्या**स्तीत्य**ेकश्रुतिमान्**। एकशब्दवाच्यो **यदि भवेदित्यर्थः**। एककार्यत्वेनैक शब्दबहुष्वेकेन वा सामान्येनेति न कश्चिद् विशेष इति मन्यते। अत एव व्याचष्टे। न[3] **केवलमित्यादि**। **तदन्यस्मा**दतत्कार्याद्यो भेदस्स एव सर्वेषा तत्कार्याणाम**विशेष**स्तस्**मादेकशब्देनोच्यन्ते**। **अपि त्वेकवृत्या**प्येकस्य सामान्यस्य वर्त्तनेनाप्य**नेकः पदार्थ** एकशब्देनो**च्येत को विरोधः स्यात्**। यथैककार्यत्वेन बहुष्वेकशब्दप्रवृत्तौ नास्ति विरोधस्तथा वस्तुभूतेनापि सामान्येन। तस्माद् वस्तुभूतसामान्यकल्पनापि युक्तैवेति भाव।

उ[4]**क्त**मित्या चा र्य। तस्य वस्तुभूतस्य सामान्यस्य **उपलभ्यते** रूपेणा**भिमत**। अभिमतत्वे उपलभ्यत्व करणत्वेन विवक्षितमिति कर्त्तृकरणे कृतेत्येव समास। उपलब्धिलक्षणप्राप्तस्य व्यक्तिव्यतिरेकेण**ानुपलब्धेरभाव**. सामान्यस्येति वाक्यार्थ। **अनुपलभ्यमानतायाम्वा**ऽङ्गीक्रियमाणायान्त**द्दर्शनाश्रया** इति सामान्यदर्शनाश्रया **व्यपदे[5]शप्रत्यभिज्ञानादयो न भवेयु**रिति। **उक्त**मिति सम्बन्ध·। बहुष्वेकशब्दो व्यपदेशस्तुल्याकारं ज्ञानं प्र त्य भि ज्ञा न। **आदि**शब्दात् सामान्याश्रया व्यक्तौ प्रवृत्तिर्न भवेदित्यादे· परिग्रहः।

न हि स्वयमनुपलभ्यमानमुपलम्भनिबन्धन व्यपदेशप्रत्यभिज्ञानमन्यत्र प्रवर्त्त-

अपि च।

वृत्तिराधेयता व्यक्तिरिति तस्मिन्न युज्यते।

यदेतदेकमनेकत्राश्रये एकां श्रुतिं[4] वर्त्तयति तस्य केयं वृत्तिः? यथा कुण्डे बदराणि वर्त्तन्त इति आश्रय एव स्यात्। तैः प्रकाशनात् व्यक्तिरिति चेत्।

नित्यस्यानुपकार्यत्वान्नाधारः;

न ह्याधारः, अनुपकार्यत्वा[5]त्। नित्यं हि सामान्यमिष्यतेऽनित्यत्वेऽपरापरोत्पत्तेरनेकत्वात्, भेदेष्विवैकप्रत्ययायोगात्। नित्यस्य च किंकुर्वाण आश्रयः स्यात्? तस्य तत्र समवायादाश्रयश्चेत् कोयं समवायो नाम। अपृथक्-

---

यति। न भवेयुरित्यादीन्यनेन चादिशब्देनान्यस्यापि पूर्वोक्तस्य दोषस्य ग्रह[6]ण। **न ह्यन्येनान्ये** समानानामतद्वन्तो नाम स्यु (।)तथा न जातिर्वाहदोहादावुपयुज्यत इत्यादि। अनेनैतदाह (।) जातिकल्पनायाम्बाधक प्रमाणमस्ति। ततो न तन्निबन्धनो व्यपदेशादि । एककार्यत्वे तु विरोधाभावात् तत्कृतमेव व्यपदेशप्रत्यभिज्ञानादिक युक्तमिति। दूषणान्तरमप्याह। **अपि चे**त्यादि। वस्तुभूते सामान्यमिच्छता
102b स्वा[7]श्रये नैकस्मिंस्तस्य प्रवृत्तिरेष्टव्या । न हि तत्रावर्त्तमानमाश्रये व्यपदेशादिकारणं युक्त। सा च सामान्यस्य स्वाश्रये **प्रवृत्तिराधेयता** वा भवेत्। तद्बलेनावस्थानात्। आश्रयबलेनोपलब्धिर्व्यक्तिः सा वा वृत्तिर्भवेत्। एतद् द्वयमपि तस्मिन्सामान्ये न **युज्यते**। (।१४४-४५॥)

यदेतदित्यादिना व्याचष्टे। **यदेतदेकमि**ति वस्तुभूत सामान्यम**नेकत्राश्रये** वर्त्तमानमे**कां श्रुतिं**[1] **वर्त्तयति** (।) तस्य सामान्यस्य स्वाश्रये **केयं वृत्ति**रिति प्रश्नयित्वा स्वयमेव विकल्पद्वयमाह। **आधेयता चे**त्यादि। अथवा किंशब्द प्रतिक्षेपे (।) **केयं वृत्तिर्न** काचिदित्यर्थः। तथा हि वृत्ते. स्वा**श्रये** आधेयता वा **स्यात्**। **यथा कुण्डे** आधारे **बदराणि वर्त्तन्त** इति। व्यक्तिर्वा तस्य सामान्यस्या**श्रये** वृत्तिः स्यात् **तै**राश्रयै**र्व्यक्ते**: प्रकाशनात्। तत्र यद्याधेयता वृत्तिरिष्यते।[2] तदा व्यक्तयस्तदाधारत्वेनैष्टव्या । नित्य च सामान्यमभ्युपगत व्यक्त्युत्पत्ते पूर्व्वन्तदनाधेयन्ततो **नित्यस्याश्रयै**र**नुपकार्यत्वा**द्धेतोराश्रयाभिमता व्यक्तयो **नाधारः**।

नित्यं हीत्यादिना व्याचष्टे। अथ नित्य नेष्यते तदाप्य**नित्यत्वेऽपरापरोत्पत्ते**रन्यस्यान्यस्योत्पत्तेरनेक सामान्य**मनेकत्वात्** कारणाद् **भेदेष्विव** भेदवत् तस्मिन् सामान्ये **एकप्रत्ययायोगा**दे[3]कस्य ज्ञानस्यायोगात् कारणात्। **नित्यं सामान्यमिष्यत** इत्यनेन सम्बन्धः। **नित्यस्य च** सामान्यस्य **किंकुर्वाण आश्रय** आधारः **स्यान्नवे**त्यभिप्रायः।

सिद्धानामाश्रयाश्रयिभावः। तदेवेहाश्रयत्वमनुपकारकस्याश्रयस्य न सम्भावयामः, अतिप्रसंग[7]त्। 461a

तस्मात् समवायी एकार्थसमवायेत्यादिवस्तुसंबंधा वा कार्यकारणभावात् न व्यतिरिच्यन्ते। परस्परमन्यतोऽनुपकारिणा[1]मप्रतिबन्धात्, अप्रतिबन्धस्य

नोपकारकत्वादाधार. किन्तु **तस्य** सामान्यस्य तत्राश्रये **समवायात्।** यदा हो द्यो त क र:। "कथ तर्हि गोत्व गोषु प्रवर्त्तते। आश्रयाश्रयिभावेन (।) **कः** पुनराश्रयाश्रयिभाव· समवायः। तत्र वृत्तिमद् गोत्व।[4] वृत्ति समवाय इह प्रत्ययहेतुत्वादिति।"[1] उपकार्योपकारकत्वाभावे समवायमसम्भावयन्नाह। **कोयमित्यादि।**

अपृथगित्यादि पर:। अभिन्नदेशत्वेन सिद्धा **अपृथक्सिद्धाः**। तेषां योयमाश्रयाश्रयिभावस्समवाय।

तदित्यादि सि द्धा न्त वा दी। **तदेवेदमाश्रयत्वमनुपकारकस्याश्रयस्य न सम्भावयाम।** कस्माद् (।) **अतिप्रसङ्गात्।** यद्यनुपका[5]रकस्याश्रयत्वमिष्यते। तदा सर्व सर्वस्याश्रय स्यात्। न भवति (।) सर्वस्य सर्वासमवेततया प्रतीतेरिति चेत्। ननूपकारकाभावे गोत्ववत् सर्वस्यैव सर्वसमवेतत्वेनैकस्मान्न प्रतीतिर्भवतीतीदमेव चोद्यते।

अथोपकार्योपकारकभावादेरन्य एवाय समवायलक्षणस्सम्बन्धः। स च न सर्वत्रास्तीति कथमतिप्रसग·।

उच्यते। सत्यं (।) केवल क्वचित् स[6]मवेतस्य समवायो भवति। तत्समवेतत्व च तदायत्ततया (।) तदायत्तत्वञ्चार्थान्तरस्य तदुत्पत्तिरेव। तेनोपर्युपरिभावेनोत्पत्तिरेवेह बुद्धेर्निबन्धनन्न समवाय इत्यर्थापत्तिरक्षय। उपर्युपरिभावे(. ि... ....) स्यात्। नाप्यसमवेताना समवायोस्ति येन समवेतत्व स्यात् सर्वेषा सर्वत्र समवेतत्वप्रसङ्गात्।

उपसहरन्नाह। **तस्मा[7]**दित्यादि। अपृथक्सिद्धयो समवायो यथारभ्यारम्भकयोर्द्रव्ययो पृथक्सिद्धाना सयोग.। यथाग्निधूमयोरेकस्मिन्नर्थे समवाय **एकार्थसमवायः**। यथा रूपरसयोरेकस्मिन् द्रव्ये। आदिशब्दात सयुक्तसमवेत(स्य) परिग्रह.। वस्तुभूता: सम्बन्धा अवस्तूना वा सम्बन्धा इति विशेषणसमास षष्ठीसमासो वा। वस्तुग्रहण कल्पनाकृतनिवृत्त्यर्थ। **कार्य[1]कारणभावान्न व्यतिरिच्यन्ते** न वथा 103d

---

[1] Nyāyavārtika.

चासम्बन्धात्। यद्यप्यन्योन्यं नोपकार एकार्थसमवायिनः तस्यैकस्य उपकाराभावे यथोक्तदोष[2]प्रसंगात्। अतः स्वोपकारद्वारेण परमपि संघटय्य ख्याप्यते। तस्मात् तत्रापि कार्यकारणभावकृत एव सम्बन्धः।

तस्मादयमाश्रयः स्वात्मन्यनुपकुर्वाणोऽनपे[3]क्षस्याधार इति याचितकमण्डनमेतत्।

कथमथैवं सति अजनकं कुण्डं बदराणां अधार इति चेत्।

भवन्ति। एतदेव साधयन्नाह। **परस्पर**मित्यादि। **परस्पर**मन्योन्यमुपकारिणामन्यतो वाऽश्रयाभिमता**दनुपकारिणामप्रतिबन्धा**दनायत्तत्वात्। **अप्रतिबधन्नस्य चासम्बन्धात्** कारणात् सर्ववस्तुसम्बन्धा कार्यकारणभावान्न व्यतिरिच्यन्त इति प्रकृतेन संबन्धः।

ननु चाश्रयात् सत्युपकारे आश्रितयो· परस्परमुपकार्यो[2]पकारकभावो नैवास्तीति किमर्थमन्यतो वेत्यस्योपन्यास.।

सत्यमेतत्। किन्तु **यद्यपि** साक्षा**दन्योन्यं नोपका**रस्तथाप्येककारणायत्ततया पारम्पर्येणापि सम्बन्ध कल्पयेदित्युपन्यास। **एकार्थसमवायिनः** परस्परमुपकार्योपकारकभावो नैवेष्यत इति चेदाह। **यद्यपी**त्यादि। तत एकस्मादाश्रयादुपकारस्या**भावे यथोक्तदोषप्रसङ्गात्**। अतिप्रसङ्ग[3]भयादित्युक्तो दोष यतश्च स्वाश्रयादे**कार्थसमवायिनो**रवश्यमुपकारोऽत स्वाश्रयकृत. समवायिनोर्य **स्वोपकार** आत्मोपकारस्तेन **द्वारेण परमपि** द्वितीयमपि समवायिन **संघटय्य** प्रतिपादयित्रा **ख्याप्यते** समवायिनाविह सम्बद्धाविति।

एतदुक्तम्भवति। यथा परस्यैकार्थसमवायिनो परस्परासम्बद्धेप्येकार्थसमवायात् सम्ब[4]न्धस्तथास्माकमेककार्यत्वेन तयो· **सम्बन्धः**। यत एवन्त**स्मात् तत्रा**प्ये**कार्थसमवायिनि कार्यकारणभावकृत एवा**श्रयेण सह य कार्यकारणभावस्तत्कृत **एव** यद्द्वारेणारोपित एव सम्बन्ध। यस्मादुपकारद्वारेणैवाधारादिभाव। **तस्मादयमाश्रयः** शावलेयादि। **स्वात्मनि** सामान्यस्वभावे**नुपकुर्वाणः** सामान्य**स्यानपेक्षस्याधार इति याचितकमण्डनमेतत्।** मण्डनमलंङ्कारो मण्डयतेनेनेति कृत्वा (।) तस्य याचितकशब्देन कर्मधारय। कस्मात् परस्माद् याचितकम्मण्डनन्दरिद्रस्यात्मन्यविद्यमान। तद्वत् सामान्याश्रयस्यापि सामान्य प्रत्याधारत्व। भावसाधनो वा तृतीयासमासश्च। यथा याचितकेनालङ्कारेण मण्डनक्रिया। तथा सामान्याश्रयस्य परस्मात् प्रार्थितेनाधारभावेना[6]धारव्यपदेशो न वस्तुस्थित्या तत उपकाराभावादिति।

१—**कथमि**त्यादिपरः। न हि **कुण्डं बदराणां जनकं**। तेषा स्वहेतोरेव

प्रविसर्प्पतः ॥१४६॥

शक्तिस्तद्देशजननं[4] कुण्डादेर्बदरादिषु ।

प्रकृत्या असमानदेशबदरोत्पादनधर्मस्य गुरुणो द्रव्यस्य समानदेश-कार्योत्पादनभाव आधारकृतः। तस्मात् तस्य पूर्वक्षणसहकारि कुण्डं[5] तत्रैव बदरकार्यं जनयत् आधार इति। अन्यथा कुण्डे बदराणीति व्यापारोऽपि न स्यात्। तदुपकारकृतोयं व्यपदेशोऽपि न स्यात्।

किम्पुनः संयोगकरणेनेति चेत्। तयोरेव संयोगः सोऽपि ताभ्यामेव जननात् समवायः। स एकत्रैव किन्न समवैति तत्रासामर्थ्यात्। तत् पृथगसमर्थं

निष्पत्ते (।) ततश्च यदुक्त "सर्वत्र वस्तुसम्बन्धा कार्यकारणभावान्न व्यतिरिच्यन्त" इति तदनेकान्तिकमिति मन्यते। **प्रविसर्प्पतो** देशान्तरविसर्प्पणशीलस्य बदरादेस्तद्देशजन[7]नमुपादानभूतस्य पूर्वकस्य बदरलक्षणस्य यो देश. कुण्डसम्बद्ध- 103b
स्तस्मिन्नेव **देशे जननमन्यत्रागमनात्**। इय **शक्तिः कुण्डादेराधाराभिमतस्य बदरादिष्वाधेयेषु**।

प्रकृत्येवेत्यादिना व्याचष्टे। **प्रकृत्या** स्वभावेनैवा**समानो देशे** यस्य तत्तथोक्त। प्रकृतिशब्दमपेक्षमाणस्यापि गमकत्वाद् बहुव्रीहि । तथाभूत च तत्कार्य चेति कर्मधारय । कार्य च **बदरादिक**[1]**मेवोत्तरोत्तरक्षणसगृहीत**। तस्योत्**पादन** तदेव धर्मः स्वभावो यस्य **गुरुणो द्रव्यस्य** बदरादे पूर्वक्षणसगृहीतस्य। **समानदेशकार्योत्पादनभा**व **आधारकृतः** । आत्मना तुल्यदेशस्योत्पादकत्वमाधारकृतमित्यर्थ । यत एवन्तस्मात् पाश्चात्यस्य बदरकार्यस्य य **पूर्वक्षण** उपादानभूतस्तस्य **सहकारि कुण्डं**। **तत्रैवोपादानक्षणदेश एव बदर**[2]**कार्यं जनयत्** कुण्ड**माधार** इत्युच्यते।

अनेन चैकसामग्र्यधीनयो कुण्डबदरक्षणयोराधाराधेयभाव इत्युक्तम्भवति। **अन्यथा** यदि **कुण्डेन बदराणा** यथोक्त उपकारो **न क्रियते** तदेह **कुण्डे बदराणीत्येव व्यापदेशो न स्यात्**। नियताधारस्य व्यपदेशस्य निमित्तमन्तरेणायोगात्। **तदुपकारकृत** इत्याधारोपकारकृतोय **व्यापदेश** इह कुण्डे बदरा[3]णीति । किन्तर्हि कुण्डबदरयोर्य सयोगस्तत्कृत ।

किम्पुनरित्यादि सि द्धा न्त वा दी। पृच्छतश्चायमभिप्रायो क्षणिकत्वे सति सयोगादीनाम्भवद्भि कल्पनेष्यते। अक्षणिकत्व चेद् भावानामभ्युपगम्यते सयोगादीनामेवोत्पत्तिर्न स्याद्इत्यर्थ । **तयोरिति** कुण्डबदरयो **संयोग** इत्यपि व्यपदेशनिमित्त नास्त्युपकार्योपकारक[4]त्वाभावादित्यभिप्राय.।

462a **सहितमपि तादृश[7]मेवेत्यनुपकारकत्वात्। संयोगेन न तत्संयोगः स्यात्। तस्मादन्यस्मादुपकारात् विशेषोत्पत्तेः सामर्थ्यम्। को[1]यमुपकारोऽजन्यजनकभूताम् ? स्वरूपसिद्धेरकार्यत्वात्, पररूपक्रियायाः तत्राप्युपकाराभावाच्च। उभयथाऽप्यक्रियस्याकिञ्चित्करत्वेनानुपकारकत्वादेतच्चोक्तप्रायम्[2]।**

ताभ्यामित्यादि परः। ताभ्या कुण्डबदराभ्या सयोगस्य **जननात्तयोः** सयोग इष्यते। द्वाभ्यामेव सयोगस्य जननमुभयत्र समवायः। परेणोक्त इत्य(व)मृश्य सि द्धा न्त वा द्या ह। **स** इत्यादि। **स** सयोग **एकत्रैव** कुण्डे बदरे वा **किञ्च समवैति** जन्यते वा। एकेन कुण्डेन बदरेण वा पृच्छतश्चायं भावो यदि तौ कुण्डबदरा[5]ख्यौ भावौ सयोगजनने। आधारभावोपगमने वा। प्रत्येक समर्थस्वभावौ तदा किमित्यन्योन्यमपेक्षत इति। पृथग[6]र्थन्तदुभय परस्परसहितमेव समर्थमिति चेदाह। **तदि**त्यादि। यत्कुण्डबदरवस्तु**पृथगसमर्थम्** तत्परस्पर**सहितम**पि **तादृशमेवा**समर्थमेवाक्षणिकत्वादिति भाव। क्षणिकास्तु प्रत्येक पृथगसमर्था प[6]श्चात् सहकारिकृतविशेषास्सहितास्समर्था इत्यविरुद्ध। ततश्च सयोग प्रत्य**नुपकारकत्वात्**। कुण्डबदराख्यम्वस्तु। **न संयोगेन** तद्धर्म्यात्।

सहितस्येत्यादि पर। सहितस्य कुण्डस्य बदरस्य च तदन्योपकारात्। **तस्मात्** कुण्डाद् यो **यो** बदरात्मा **तस्मात्** कुण्डस्योपकारात्। तस्माद्वा बदराद् यदन्यत्
104a कुण्डन्तस्माद् बदरस्योपकारात्। **विशेषो[7]त्पत्ते**र्हेतो. कुण्डबदरयो सयोगस्य जनने। आधारभावोपगमने वा **सामर्थ्य** न केवलयोरिति।

कोयमित्या चार्य। बदराणा कुण्डादीना चा**जन्यजनकभूतानां कोयमुपकारः** (।) नैवास्ति। अजन्यजनकत्वमेव कथमिति चेदाह। **स्वरूपे**त्यादि। बदर**स्वरूप**स्यान्यत हेतोरेव **सिद्धेरकार्य**त्वान्न बदराणा जन्यत्व नापि जनकत्व कुण्डस्येति भाव। न[1] हि परो बदरादीना कुण्डादे सकाशात् स्वरूपोत्पत्तिम्वाञ्छति। स्वहेतोरेव तेषान्निष्पत्ते'। न कुण्डेन बदररूपमेव क्रियते किन्तु ततोन्यद्रूपमित्यत आह। **पररूपे**त्यादि। **तत्रे**त्याधेये। न ह्यर्थान्तरे कृतेर्थान्तरमुपकृत स्यात्। **उभयथेति** स्वरूपपररूपक्रियाभ्या। अनन्तरोक्तेन विधिना**नुपकारकस्य कुण्डादेरकिञ्चित्करत्वात्।**

एत**च्चोक्तप्राय**ं। प्रा[2]यशब्दो बाहुल्यवचन.। प्रायेणोक्तमुक्तप्राय। राजदन्तादेराकृतिगणत्वात् प्रायशब्दस्य परनिपात। अय चार्थ "कार्यश्च तासा प्राप्तोसौ जनन यदुपक्रिये"(१।१०८)त्यादि विस्तरेणोक्त। प्रायशब्द सदृशार्थमन्ये प्राहु'। उक्तेन सदृशमुक्तप्राय। प्रागुक्तेनाश्रयकृतेन सामान्यस्य स्वरूपोपकारेणेद

तस्मात् सर्व एव वस्तुसम्बन्धा जनकस्यैव उपकारविशेषबलात् कार्य-कारणभावात् प्रविभागेन व्यवस्थाप्यन्ते।

कुण्डादिकृतमाधेयस्योपकारकरणन्तुल्यमित्यर्थः।[3] **सर्व एवेत्यादिनोपसहारः। सर्व एव वस्तुसम्बन्धाः** कार्यकारणभावाद्धेतोर्व्यवस्थाप्यन्त इति सम्बन्धः। विभागस्तेषा न स्यादिति चेदाह। **जनकस्यैवेत्यादि**। यद्वा **कार्यकारणभावात्** सकाशात् **प्रविभागेन** भेदेन **व्यवस्थाप्यन्ते**। कथम्भेद इत्याह। **जनकस्यैवेत्यादि**। कारणकृतः कार्यस्य य उपकारविशेषस्तस्य बलादित्यर्थ.। तथा हि प्रविसर्प्पणधर्म[4]णो बदरादे. स्वोपादानदेशोत्पादनलक्षणेनोपयोगेनाधाराधेयभाव । प्रदीपकृतेन च विज्ञानजननसमर्थस्वरूपोत्पादेन घटप्रदीपादीना व्यङ्ग्यव्यञ्जकलक्षणः सम्बन्ध इत्येवमन्यस्मिन्नपि सम्बन्धे यथायोग वाच्य।

ननु **सर्व एव वस्तुसम्बन्धा** इत्यादिना न सयोगलक्षणस्य सम्बन्धस्य कार्यकारणभावेन्तर्भाव समानकालभाविनोरेवास्य सत्त्वा[5]त्। अथाक्षणिकपक्षे सयोगोत्पत्तिर्न युज्यते (।) क्षणिके तर्हि भविष्यति सयुक्तासयुक्तावस्थयोश्च कुण्डबदरयोर्न स्वरूपभेद प्रतीयते। तेनाक्षणिकेपि सयोगोस्त्येव प्रतीते ।

यदाहो द्यो त क र.।. "यदि सयोगो न नार्थान्तरम्भवेत्तदा क्षेत्रबीजोदकादयो निर्विशिष्टत्वात् सर्वदैवाकुरादिकार्य कुर्यु र्नचैव। तस्मात् सर्वदा कार्यानारम्भात् क्षेत्रादीन्यङ्कुरोत्पत्तौ[6] कारणान्तरसापेक्षाणि। यथा मृत्पिण्डादिसामग्री घटादिकरणे कुलालादिसापेक्षा। यो सौ क्षेत्रादिनिरपेक्ष. स सयोग इति सिद्ध। किं चासौ सयोगो द्रव्ययोर्विशेषणभावेन प्रतीयमानत्वात्ततोर्थान्तरत्वेन प्रत्यक्षसिद्ध एव। तथा हि कश्चित् केनचित् सयुक्ते द्रव्ये आहरेत्युक्तो ययोरेव द्रव्ययो सयोगमुपलभते ते एवाहरति। न द्रव्यमात्र। किं च[7] दूरतरवर्त्तिन पुस सान्तरेपि वने 104b निरन्तररूपावसायिनी सेय बुद्धिरुदयमासादयति मिथ्याबुद्धिर्मुख्यपदार्थानुभवमन्तरेण न क्वचिदुपजायते। न ह्यननुभूतगोदर्शनस्य गवये गौरिति विभ्रमो भवति तस्मादवश्य सयोगो मुख्योभ्युपगन्तव्य । तथा न चैत्र कुण्डलीत्यनेन प्रतिषेधवाक्येन न कुण्डल प्रतिषिध्यते तस्यान्यत्र देशादौ सत्त्वात्। तस्मा[1]च्चैत्रस्य कुण्डलसयोग प्रतिषिध्यते। तथा चैत्र कुण्डलीत्यनेनापि विधिवाक्येन न चैत्रकुण्डलयोरन्यतरविधानन्तयो सिद्धत्वात्। पारिशेष्यात् सयोगविधान। तस्मादस्त्येव सयोग" इति।[1]

अत्रोच्यते। (१) यथा क्षेत्रादीना विशिष्टावस्थाप्रतिलम्भेन **सयोगारम्भ-**

---

[1] Nyāyavārtika.

तदयं कुण्डादीनां वदरादिषु जननशक्तिरेव आधारोऽस्ती[3]ति चेत्।

न सम्भवति साऽप्यत्र;

न हि सामान्यजननविशेषलक्षणस्याधारभावस्य सामान्याश्रयः, तस्याजन्यत्वात्।

तदभावेऽप्यवस्थितेः ॥१४७॥

न स्थितिः;

अथाधारो हि सामान्यस्थापकः, ततः स्थितिहेतुकत्वात् आधार एव,

कत्वमिष्यते तथा सयोगमतरेण कार्यारम्भकत्वमेव किन्नेष्यते। अन्यथा सर्वदा सयोगारम्भ[2]कत्व स्यात्। (२) नापि निर्विकल्पकेन प्रत्यक्षेण सयुक्ते द्रव्ये स्वरूपेण गृह्यमाणे तृतीय. सयोग प्रतिभासते। (३) नापि सविकल्पके ज्ञाने सयुक्ते द्रव्ये मुक्त्वा सयोगशब्द चापर. सयोगो विशेषणभावेन प्रतिभासते। (४) नापि सयुक्तप्रत्ययान्यथानुपपत्त्या सयोगकल्पना। उत्पन्ननिरन्तरावस्थयोरेव भावयो· सयुक्तप्रत्ययहेतुत्वात्। यावच्च तस्यामवस्था[3]या सयोगजनकत्वेन सयुक्तप्रत्ययविषयौ ताविष्येते तावत् सयोगमन्तरेण सयुक्तप्रत्ययहेतुत्वेन तद्विषयौ कि नेष्येते। किम्पारम्पर्येण। (५) नापि सान्तरे वने निरन्तरावभासिंनी बुद्धिर्मुख्यपदार्थानुभवपूर्विका स्खलत्प्रत्ययविषयत्वेनानुपचरितत्वात्। (६) तथा न चैत्रः कुण्डलीत्यादौ चैत्रसम्बन्धिकुण्डल प्रतिषिध्यते विधीयते वा। न सयोग। त[4]स्मादेकसामग्र्यधीनयोरेव सयुताविति प्रतीति। यथा कुण्डबदरयोस्तस्मात् सयोगस्यापि कार्यकारणभाव एवान्तर्भाव। केवल भेदान्तरप्रतिक्षेपेण सयुक्तावेतौ सयोगस्येति वा प्रतीतिर्न पुनर्वस्तुभूतसयोगबलात्। यतश्च नास्ति कार्यकारणभावमन्तरेण वास्तव सम्बन्धः।

तदयमित्यादि। **बदरादिषु जननश[5]क्तिरेव कुण्डादीनामाधार** इति सम्बन्धः सामान्यस्याश्रयो जननशक्त्यैवाधारोस्त्विति चेदाह। **नेत्यादि**। **सेति** जननशक्तिः। **अत्रेति** सामान्ये।

न हीत्यादिना व्याचष्टे। स्वोपादानदेश एव जनन **जननविशेषः स लक्षण यस्याधारभावस्य** स तथा। **तस्याजन्यत्वादिति** सामान्यस्य नित्यत्वेनाजन्यत्वात्। **तदभावेन्याश्रयाभावेपि** सामान्यस्या**वस्थितेर्हेतो**रा[6]श्रयवशेन **न स्थितिः** सामान्यस्य।

अथेत्यादिना व्याचष्टे। **तस्येति** सामान्यस्य **तदभावेपीति** व्यक्त्यभावेपि व्यक्तिशन्ये देशे सामान्यस्य **स्थानात्**। यदि हि व्यक्तिशून्ये देशे सामान्यं न भवेत्तदा तत्रापूर्वव्यक्त्युत्पादे सामान्यसम्बन्धो न भवेत। न हि तस्यान्यत आगमन निष्क्रिय-

न हि जनकत्वात्।

साऽप्ययुक्तैव;

तस्य तद्भावेऽपि स्थानात्। पतनधर्माणां [5]वस्तूनां पातप्रतिबन्धात्, अजनकस्य हि स्थापकत्वं स्यात्। अत्रापि यदि पातप्रबन्धं न पर्यनुयुंजीत स्थापयित्रा क्रियते पात[6]प्रतिबन्धः ततोऽर्थान्तरम्। अर्थान्तरत्वे तत्रवा स्योपयोग इति कः पततः प्रतिबन्धः? प्रतिबन्धादपातेऽपि तुल्यः पर्यनुयोगोऽनवस्था च।

तस्माद् पाताभाव[7]: कथं केनचित् क्रियते? अभावं करोतीति चेत् 462b

---

त्वात्। न च भिन्नदेशावस्थिता व्यक्तिस्तस्य सामान्यस्याधारो भिन्नदेशत्वात्।[7] 105a
एकत्वात् सामान्यस्य नास्ति भिन्नदेशतेति चेत्। सर्वास्तर्हि व्यक्तय एकजातिमत्य एकदेशा प्राप्नुवन्ति। न च सर्वा जातिमत्य स्यु। एकस्य कथम्भिन्नदेशावस्थितत्वमिति चेदयमपरोस्य दोषोस्तु।

पतनधर्मेत्यादिनोपचयहेतुमाह। **हि** शब्दश्चार्थे। **अपि**शब्दोभ्युपगमसूचनार्थ। अभ्युपगम्याप्यय प्रकार. सामान्ये व्यवस्थापयितुमशक्य। सामान्यस्यापतनधर्म्म[1]त्वादित्येवमर्थमुपन्यास। न त्वजनकस्य **स्थापक**त्व सम्भवति। अत एवाह। **अत्रापी**त्यादि। **अत्रापि** पातप्रतिबन्धात् स्थापकाभ्युपगमे **यदि** न्यायवादी कश्चित् **पातप्रतिबन्धं न पर्यनुयुञ्जीत**। तदा भवेदजनकोपि **स्थापकः**। स्वसमयानुरोधेनेत्याकूत। अत्राप्यय पर्यनुयोग सम्भवति। य. **स्थापयित्रा** क्रियते **पातप्रतिबन्धः** स स्थाप्यस्यात्मभूतो वा स्यात् ततोर्थान्तर वा[2] पाताभावमात्रम्वा। न तावदात्मभूतस्तत्स्वभावस्यान्यतो निष्पत्त्यभ्युपगमात् नाप्यर्थान्तरमित्याह। **अर्थान्तरत्वेभ्युपगम्यमाने तत्रैव** प्रतिबन्धेर्थान्तरभूतेऽस्याधारस्योपयोग **इति कः पततो** बदरादे **प्रतिबन्धो** विघात (।) नैव कश्चित्। ततश्च कुण्डादिस्थमपि बदरादि पतेदेवेति भावः। आधारकृतेनार्थान्तरेण पातप्रतिबन्धेन बदरादेरपात[3] क्रियत इति चेदाह। **प्रतिबन्धादपातेपी**त्यादि। प्रतिबन्धाख्यात् यदार्थाद् बदरादेरपातेभ्युपगम्यमाने **तुल्यः पर्यनुयोगः**। योय प्रतिबन्धाख्येन पदार्थेनापात क्रियते स कि बदरादेरात्मभूतोर्थान्तरम्वा। अर्थान्तरत्वे तत्रैवास्य प्रतिबन्धस्योपयोग इत्यादि। सर्वमनन्तरोक्त तुल्य।

अथ तेनाप्यपाताख्येनार्थेन बदरादेरपातः क्रियते तत्रापि तुल्य:[4] पर्यनुयोग इत्याह। **अनवस्था** चेति।

तस्मादित्यादिना तृतीयपक्षोपन्यास। स **पाताभावः कथं केनचित् क्रियते**।

नाभावो नाम कश्चित् कार्यः। तस्य केनचित् क्रियमाणे भाव एव स्यादिति। अभावस्यायोग्य[1]त्वात्। तस्माद् भावक्रियाप्रतिषेधनिर्देशोऽभावं करोतीत्यर्थः। तथा चायमपि अकार्यत्वात् केनचित् प्रतिबद्धः। तेनायं केनचिदप्रतिबद्ध[2]त्वात् न कदाचिदपि तिष्ठेत्। तस्माद् पातप्रतिबन्ध इत्यसावपि क्षणिकानां भावानां उपादानेन समानदेशस्योत्पादनम्। अस्तु नाम पातिनां तत्प्रतिबन्धो[3] ऽजनकः गतिमतो द्रव्यस्य स्थापकः कश्चिद्। अक्रियस्य किं लक्षणां स्थितिं कुर्वाणः स्थापकः स्यात् ? स्थितिर्हि तस्य स्वरूपाप्रच्युतिरेव। सा च नाश्रयायत्ता[4]

नैव केनचित्। अभावस्याकार्यत्वादिति भाव। कथन्तर्ह्यभाव करोतीति व्यपदेश इति चेदाह। **अभाव**मित्यादि। अभावङ्करोतीति व्यपदेशे **नाभावो नाम कश्चित् कार्य** इष्यते। कस्मादित्याह। **तस्ये**त्यादि। **तस्ये**त्यभावस्य **कार्य**त्वाद् **भाव एव**[5] **स्या**दित्यभिप्रायः।

ननु यथा घटवत् कार्यत्वात् पटस्य न घटरूपता। तथा भाववन्नाभावस्य कार्यत्वादभावरूपता भविष्यतीति चेत् (।) न। घटादेरपि हि भावरूपत्वम्भवनधर्मत्वादेव (।) तच्चाभावेप्यस्तीति कथ न भावरूपत्वमभावरूपत्वेन प्रतिभासनान्न भावरूपतेति चेत् (।) न (।) **अभावस्य** प्रतिभासाभावात्। अभावानाम्परस्परविभागप्रतीतेर्घटाभाव. पटाभाव[6] इत्यत्र पटादीनाम्भेदो नाभावानामेकत्वेन प्रतिभासनादित्युक्त। यत एवन्त**स्माद् भाव**स्य या **क्रिया** तस्या **प्रतिषेधनिर्देशो**ऽभावंकरोतीति।

अत एव स्पष्टयति। **भावं न करोतीति याव**दिति। यावानेवास्य वाक्यस्यार्थस्तावानेवाभाव करोतीत्यस्यापीत्यर्थ। **तथा चे**ति (।) पातप्रतिबन्धस्याभाव-
105b मात्रत्वेनाकार्यत्वे। **अयमि**ति कुण्डादि। तेन कार[7]णे**नायमि**ति बदरादि·। **केन चित्कुण्डादिनाधारेण प्रतिबद्ध**·। पातादनिवारितो **न कदाचित्तिष्ठेत्**। सदैव पतेदित्यर्थ·। **तस्मादित्या**दिनोपसहार। **अपि**शब्दादाधेय इत्यनेनापि व्यपदेशेन **क्षणिकानां** पूर्वक्षणसंगृहीतेनो**पादानेन समानदेशस्यो**त्तरक्षणसगृहीतस्य कार्य**स्योत्पादन**मुच्यते। **तस्मात्** सामान्येऽयमपि प्रकारो न सम्भव[1]तीति ख्यापनायाभ्युपगम्यैतदुक्त पातप्रतिबन्धादजनकोपि स्थापक इति।

तमेवासम्भवन्दर्शयितुमाह। **अस्तु नामे**त्यादि। **पातिनाम्बदरादीनान्तत्प्रतिबन्धः** पातप्रतिबन्धोस्तु नामाजननस्वभाव·। **तत्करण**मिति पातप्रतिबन्धकरणात्। **गतिमतो द्रव्यस्ये**ति सक्रियस्य सामान्यस्य पुनरमूर्त्तत्वादक्रियस्य किं लक्षणां स्थितिं **कुर्वाण** आश्रयः **स्थाप[2]कः स्यात्**। न हि सामान्यस्य पातोऽस्ति येन तत्प्रतिबन्धः

नित्यत्वात्। साऽपि अयुक्तैव—

भेदाभेदविवेचने।

अस्तु नाम आश्रयहेतुका सामान्यस्थितिरपि। सा च सामान्यादन्याऽनन्या वा। अप्रतिबद्धत्वे तदेव[5] तस्याः स्थितिकरणं चेत्, साऽपि सामान्ये ऽप्रतिबद्धेति किं सामान्येन कृतं स्यात्? प्रतिबद्धैव चेत् तदा कः प्रतिबन्धकृति वाच्यम्? स्थितिकरणप्रतीत्या चेत् तत्राऽपि तुल्यः प्रसंगइत्यनवस्था च स्यात्[6]। तत उपकारस्यानवधारणात् सा हि तत्स्थितिरित्यप्रतीतिः जननं चेत् अनुपकारिण्याः किमत्राश्रयेणापेक्षितने? अपेक्षेति हि तत्प्रति-

---

स्थितिर्भवेत्। किन्तु स्थितिर्हि तस्य सामान्यस्य स्वरूपाप्रच्युतिरेवोच्यते। सा च स्वरूपाप्रच्युतिर्नाश्रयायत्ता सामान्यस्य नित्यत्वात्। अभ्युपगम्याप्युच्यते। साप्याश्रयायत्ता सामान्यस्य स्थितिरयुक्तैव। सामान्यात् तस्या स्थितेर्भेदाभेदविवेचने। अन्यत्त्वानन्यत्त्वविचारे क्रियमाणे।

अस्तु नामे[3]त्यादिना व्याचष्टे। आश्रयहेतुकेत्याश्रयायत्ता। सेति स्थिति। तामेवाश्रयादन्या स्थिति स आश्रय करोति न सामान्य। सा स्थिति सामान्ये प्रतिबद्धा तत सम्बन्धसम्बद्धात् सामान्यमुपकृतमेवेत्यत आह। सा चेत्यादि। सेत्यर्थान्तरभूता स्थिति'। न हि तस्या सामान्ये प्रतिबन्धकारण किंचिदस्ति कि सामान्यस्याश्रयेण कृतम्भवतीत्यध्याहार'।

अभ्युपग[4]म्यत एव स्थिते सामान्ये प्रतिबन्ध इति चेदाह। प्रतिबन्धे चेत्यादि। प्रतिबन्धे वाभ्युपगम्यमाने। स्थितिकरणं चेत्। आश्रयेण जनिता या स्थितिस्तस्या स्थिते स्थिति सामान्येन क्रियते। तत साश्रयजनिता स्थिति सामान्ये प्रतिबद्धेति। तत्रापि स्थिते स्थितिकरणे तुल्यः प्रसङ्गः। या सा चाश्रयप्रतिबद्धाया' स्थिते' सामान्येन स्थिति क्रियते सा[5] आश्रयहेतुकाया स्थितेरात्मभूता वा भवेद् व्यतिरिक्ता वा। आत्मभूतत्वे आश्रयेणैव सा कृतेति कथ सामान्येन क्रियते। व्यतिरिक्तत्वे च सैव स्थितिः सामान्येन कृता आश्रयजनिताया आद्याया' स्थिते कि सामान्येन कृतं स्यात्। अथ सामान्येन द्वितीया स्थिति क्रियते। सा आश्रयेण जनिताया स्थितौ प्रतिबद्धा। तदा कः प्रतिबन्ध इति वाच्यं। सामान्य[6]जनितायाः स्थितेराश्रयजनितया स्थित्याऽपरा तृतीया स्थिति यत इति तुल्यः प्रसङ्गः इत्यनवस्था स्यात्। ततोनवस्थानादाश्रयजनिताया स्थितौ सामान्यकृतस्योपकारस्यानवधारणादस्य सामान्यस्य सम्बन्धिनीयमाश्रयेण जनिता स्थितिरित्यप्रतीति' जननं चेत्प्रतिबन्ध इति प्रकृत। न सामान्येनाश्रयजनिताया स्थितेर[7]परा स्थिति' 106a
क्रियते। किन्तु सैवाद्या स्थितिर्जन्यत इति। तदा केवल सामान्य समर्थ स्थिति

463a बन्धः[7]। स च अनाधेयातिशयस्य सामान्यस्याऽयुक्त इति केवलं जनयेदिति नास्त्यन्य आश्रयः स्थितिहेतुः।

अभेदे वा सामान्यात् तत्स्थितिस्वरूपमेव तत्। तच्च नित्य[1]मस्तीति न स्थितिरस्य हि केनचित् क्रियते। तस्माद् न सामान्यस्याश्रयः। तदस्याश्रयो न स्थितिः।

अथ पुनः अव्यक्तस्य सत्त्वे तु तद्व्यक्तिर्हि व्यक्त्या प्रत्ययहेतु[2]भूत(त्वा)त्। तत्र स्थितिभूतोऽपि न युक्तः। यस्मात्।

विज्ञानोत्पत्तियोग्यत्वायात्मन्यन्यानुरोधि यत् ॥१४८॥
तद् व्यङ्ग्यं योग्यताश्च कारण कारकं मतम्।
प्रागेवास्य च योग्यत्वे[3] तदपेक्षा न युज्यते ॥१४९॥

करोतु किमाश्रयेण शावलेयादिना स्थितिकरणायापेक्षितेन। न ह्यनुपकारिण्यपेक्षा युक्ता। तस्मादपेक्षेति हि तत्प्रतिबन्धः। अस्मिन्वस्तुन्यस्यापेक्षेति येयमपेक्षा सा तस्मिन्नपेक्ष्ये प्रतिबन्धस्तदायत्तता। स च प्रतिबन्धो नित्यत्वादनाधेयातिशयस्यायुक्त इति केवलं सामान्य [1] स्थिति जनयेदिति नास्त्यन्य आश्रयः स्थितिहेतु। ततश्च स्थितिकरणादाश्रयस्सामान्यस्याधार इत्येतदयुक्तमिति भाव.। एवम्भेदाभेदविवेचन इति यदुक्तन्ततो भेदपक्षस्तावदपनीत।

द्वितीयपक्षमाश्रित्याह। अभेद इत्यादि। सामान्यादभेदे वा स्थितेरभ्युपगम्यमाने स्वरूपमेव तत्स्थितिरूप सामान्यस्य (।) तच्च स्वरूप सामान्यस्य नित्यमस्तीति न स्थिति[2] रस्य सामान्यस्य केनचिदाश्रयेण क्रियते। यत एवन्तस्मादित्यादि। तदित्यादिनोपसंहार। तदिति तस्मादस्येति सामान्यस्य।

तदेवं वृत्तिराधेयता व्यक्तिरिति यत्पक्षद्वयमुक्तन्तत आद्यस्य निरास कृतः(।)

२—द्वितीयपक्षमाश्रित्याह। अथ पुनरित्यादि। अव्यक्तस्येत्यप्रकाशितस्य। व्यक्तेत्याश्रयेण ज्ञानस्याकारणत्वात् तद्व्यक्तेस्तेनाश्रयेण प्रकाशन यत्। त[3]देव तत्राश्रये सामान्यस्य वृत्ति स्यात्। (।१४६-४७।)

नेत्या चार्य। आत्मनि स्वविषये विज्ञानोत्पादन। तत्र योग्यत्व सामान्यन्तदर्थमन्यानुरोधि। कारणान्तरसापेक्ष यत्तद्वस्तु व्यङ्ग्यं प्रतीत। तस्याश्च स्वविषयज्ञानजननयोग्यतायाः कारणं यत्प्रदीपादि तद्व्यङ्ग्यस्य कारकमेव जनकमेव। पूर्वमयोग्यस्य पश्चाद् विज्ञानजननयोग्यस्य घटादेरुत्पादनात्।

यदि[4] पुन. प्रदीपादिसन्निधानात् प्रागपि घटादि स्वाकारज्ञानजननयोग्यन्तदा प्रागेवास्य च घटादेर्योग्यत्वे तदपेक्षेति प्रदीपापेक्षा। सामान्यस्य नित्यत्वाद-

सामान्यस्याविकार्यस्य तत्सामान्यवतः कुतः।

न कारकाद् व्यञ्जकस्य कश्चिद् विशेषः। अपरं स्वविषयस्य विज्ञानोत्पादनसमर्थं सजातीयोपादाना[4]पेक्षं अनपेक्षं च भावं जनयन्नेव व्यञ्जक उच्यतइति।

परत्र हि जन्य ज्ञानजननशक्तिरनाक्षिप्ता जन्यस्येति जननमात्रण कारकत्वम्।

यदि हि यनो[5] यः विज्ञानोत्पादनयोग्यता प्रतिलभते, स न तज्जन्यः। तस्य सा योग्यता स्वभावभूता हि प्रागेवास्तीति विज्ञानोत्पादनं

विकार्यस्ये। **तदिति** यथोक्तलक्षण व्यङ्ग्यत्व **सामान्यवत** इत्याश्रयात्सकाशात् **कुतो** नैवेत्यर्थ.। **अपरमिति** स्वसन्तानादन्यम्भावसेव जनयन् व्यञ्जक उच्यते। किम्भूत स्वविषयस्य विज्ञानोत्पाद[5]नसमर्थ। **सजातीयोपादानापेक्षमिति** स्वसन्तानसङ्गृहीतपूर्वक्षणसापेक्ष। यथान्धकारावस्थितघटादिक्षणसापेक्षम्विज्ञानजननसमर्थमुत्तरं घटक्षणञ्जनयत्प्रकाशक.।

ननु प्रदीपकार्यत्वे घटस्य प्रदीपोयचयेपि घटस्योपचयोपि स्यादिति चेत् (।) न। उपादानगताद् विभेदात् कार्यस्य भेदो न सहकारिगतात्। सहकारिकारण च प्र[6]दीपादिर्व्यङ्ग्यस्य घटस्येति कुतो महत्वादिप्रसङ्गोस्य (।) यद्वाऽभिव्यक्तावपि क्रियमाणाया तुल्योय प्रसङ्ग इति यत्किञ्चिदेतत्। न च व्यङ्ग्यक्षणसदृशस्य क्षणस्य मृत्पिण्डादुत्पत्तिरपि तु प्रदीपादेवेति कुतोन्यादृशात् तादृशस्योत्पत्ति·। **अनपेक्षं चेति**। यथा सजातीयोपादानापेक्ष स्वविषयविज्ञानजननसमर्थ शब्द जनयन्नभिघात·। न ह्य[7]भिघातात् प्राक् छब्दोस्ति येन समानजातीयापेक्षः शब्दो 106b
भवेत्। शब्दोपि हि व्यङ्ग्य. परैरिष्यत इत्येवमुक्त।

यदि तर्हि कारक एव व्यञ्जक कस्तर्हि कारकव्यञ्जकयोर्हेत्वोर्विशेष इत्यत आह। **परत्रेत्यादि**। व्यञ्जकादन्यस्मिन् कारकत्वेनाभिमत इत्यर्थ.। **ज्ञानजननशक्तिरनाक्षिप्ता जन्यस्य**। न हि स्वविषयविज्ञानजननसमर्थमेव कार्य कारकेण बीजा[1]दिना जन्यते। ततो **जननमात्रेण कारकत्वं** स्वविषयविज्ञानजननसमर्थकार्योत्पादनलक्षणेन तु विशेषेण व्यञ्जकत्वमिति। (१४७-४८॥)

यद्यपि व्यञ्जकाद् व्यङ्ग्यो **विज्ञानोत्पादनयोग्यतां** प्रतिलभते तथापि न जन्यत इति चेदाह। **यदि हीत्यादि**। **यत** इति व्यञ्जकात्। स चेत् व्यङ्ग्यः। **तस्येति** व्यञ्जकस्य **सा योग्यताऽस्य** व्यङ्ग्यस्य व्यञ्जकसन्निधानात् **प्रागेवास्ति**।[2] यतो

न तमपेक्षते। तस्य हि[6] परभूतत्वे सैव ततो भूतेति स्थितिवत्प्रसंगः। तं व्यङ्ग्यं नाप्यन्यत् क्रियते।

463b एवं अकिञ्चित्कत्वेन प्रतिषेधः ततो[7] व्याहतमेतत्।

तत्तु न धूमादिर्जनकोऽथकार्यत्वाद् व्यञ्जकः। सत्त्यं हि जनकः। न तु धूममपेक्ष्याग्निर्विज्ञानं जनयति। तथा[1]भूतस्याग्नेः साक्षादजनकत्वात्। केवलं तत्रोपादानमपेक्ष्य ज्ञानं उत्पद्येत न तु विषयबलेन, असत्यपि तस्मिन् परम्परया लिङ्गानुसारिणा भावात्[2]।

वापि सामान्याकारावभासि ज्ञानं, न तेषां सन्निहितविषयता। न विषयबलेनोत्पत्तिरिति प्रतिपादितं प्रतिपादयिष्यते च। ततः साक्षादुपयोगेन

व्यङ्ग्यस्य स्वभावभूता सा। यथाव्यङ्ग्य प्रागेवास्ति तथा तत्स्वभावभूतापि योग्यता। तमपेक्षत इति व्यञ्जक। व्यङ्ग्याद् व्यतिरिक्तैव योग्यता व्यञ्जकेन क्रियत इति चेदाह। परेत्यादि। अस्यामिति योग्यतायाः। सैव योग्यता। तत इति व्यञ्जकात् स्थितिवत्प्रसङ्गः। यदुक्तम् (।) अन्या चेत् स्थितिस्तामेवाश्रय करोतीत्यादि तदिहापि प्रसज्येत। त[3]मिति व्यङ्ग्य। नापि व्यङ्ग्यादन्यत् तत्करणे व्यङ्ग्यस्य न किञ्चिदिति कृत्वाऽपेक्ष्यत इत्यनेनोपकारित्वमुक्त। अकिंचित्करत्वेन तत्प्रतिषेधस्ततो व्याहतमेतत्।

यदुक्त (।) जनक एव व्यञ्जक इति तस्य तत्त्विवत्यादिना व्यभिचारमाह। न हि धूमोग्नेर्जनकोऽथ च कार्यत्वात्तस्य व्यञ्जक। आदिशब्दाद् बलाकादि. सलिलस्य (।) सत्त्यमित्यादिना परिहरति। न तु धूम लिङ्गम[4]पेक्ष्याग्निरात्मनि स्वलक्षणे ज्ञान जनयति। कस्मात् (।) तथाभूतस्यानुमेयत्वेनाभिमतस्याग्नेः साक्षादजनकत्वात्। अन्यथाग्निस्वलक्षणाकारत्वात् प्रत्यक्षात् प्रतिभासाविशेष स्यात्। केवलमित्यादिनोपादानकारणमेव तस्य साक्षाज्जनकमित्यादर्शयति। लिङ्गज्ञानमुपादान। न विषयबलेनाग्निस्वलक्षणबलेन (।) किङ्कारणम् (।) असत्यपि[5] तस्मिन् वह्नौ पूर्वध्वस्तेपि भावादग्निज्ञानस्य। कथमित्याह। परम्परयेत्यादि। लिङ्गानुसारी लिङ्गानुस्मरणविकल्पस्तेन। तथा हि कस्यचित् पुरुषस्य क्वचिद् धूमन्दृष्टवतो ध्वस्ते धूमे वह्नौ च कथमपि तत्र धूमानुस्मरणविकल्प उत्पन्ने पश्चादन्वयव्यतिरेकानुस्मरणादभूदत्र धूमस्तस्माद् वह्निरप्यत्रासीदित्येव परम्परयाग्निजन्य[6]धूमादग्निज्ञानमुत्पद्यत एव।

नापीत्यादिना पूर्वोक्तमत्रैव योजयति। सामान्याकारावभासि चानुमानज्ञान। न सन्निहितविषयता। विनष्टेपि हि विषये अनुत्पन्ने च सम्भवात्। यदापि सन्निहितो विषयस्तदापि न विषयबलेनोत्पत्तिरिति बिवेदितं प्राक् न हि विकल्पा

स्वविषयविज्ञानजननसामर्थ्येन, तत्र हि परमपेक्षेतेति अवश्यं तत आत्मप्रतिलम्भः न चायमात्मप्रतिलम्भः सामान्यस्य कुतश्चित् संभवति। तस्मात् तत् कुतोऽपि न व्यङ्ग्यम्। नैव सामान्यं व्यक्तियोग्यता[4]प्राप्तमिति।

अथ सामान्यमस्ति स्वाश्रयसमवेतं, तदा स्वाश्रयसमवायापेक्षः तदात्मन्यन्यत्र वा विज्ञानहेतुरिति उक्तम्, तत्र जन्यजनकयोः[5] आश्रयाश्रयिलक्षणसमवेतोऽयं कः स्वाश्रयसमवायापेक्षो विज्ञानहेतुः, तेन जन्यस्य एव स्यात्, तद्धेतोः भावस्य प्राग्भावात्[6] पश्चाच्च ततो भावात्। नित्यं तद्भावसद्भाव इति प्रागपि समवायात् विज्ञानोदयप्रसंगात्।

न हि व्यक्तिः सामान्यस्य संस्कारात् व्यञ्जिका। किन्तर्हि? तद्ग्राहिण[7] 464a

---

यथाभावमेव प्रवर्त्तन्त इत्यादिना। भावाभावानविधानाच्च सा[7]मर्थ्यन्न प्रति- 107a
भासादित्यादिना तृतीये परिच्छेदे ( ) प्रतिपादयिष्यते च। साक्षादुपयोगेन स्वरूपानुकारिविज्ञानजननसामर्थ्येन। तत्रेति स्वविषयज्ञानजनने। परमिति प्रदीपादिक। तत इत्यपेक्ष्यात् प्रदीपादे।

एतदुक्तम्भवति। न सर्वो व्यञ्जको जनक इत्युच्यते (।) किन्तु स्वाकारज्ञानजनकस्य परस्य साहाय्य य प्रतिपद्यते स एव। ततो नास्ति व्यभिचार इ[1]ति। सामान्यमपि स्वाकारज्ञानजननाश्रयमपेक्षत इति व्यङ्ग्यमिष्टन्ततस्तेनाश्रयादुपलम्भयोग्य आत्मा लब्धव्यः (।) न चायमात्मप्रतिलम्भः सामान्यस्य कुतश्चित् सम्भवति। नित्यत्वेनाभ्युपगतत्वात्। तदिति सामान्य।

नैवेत्यादि परः। स्वाश्रयसमवायव्यक्ति ब्रूम इति सम्बन्धः। स्वाश्रयसमवायः कथ व्यक्तिरिति चेदाह। स्वाश्रयेत्यादि। तदिति सामा[2]न्य। अन्यत्रेति स्वाश्रये।

उक्तमित्या चार्य। "तदेवेदमनुपकारकस्याश्रयत्व न सम्भावयाम" इत्यादिनोक्तत्वात्। स्वाश्रयसमवेत हि तदात्मन्यन्यत्र वा विज्ञानहेतुरिति ब्रुवाणेन स्वाश्रयसावायापेक्षः सामान्यपदार्थ विज्ञानहेतुरिष्टः। ततश्च तेन स्वाश्रयसमवायेन सामान्यात्मा जन्यस्य स्यात्। किङ्कारण (।) तद्धेतोर्ज्ञानहेतो स्वभावस्य स्वा[3]श्रयसमवायात् प्राग्भावात्। स्वाश्रयसमवाये सति पश्चाच्च ततः स्वाश्रयसमवायाद् विज्ञानहेतोः स्वभावस्य भावात्। नित्य सामान्यस्य विज्ञानजननस्वभावत्वादसिद्धमेतदिति चेदाह। नित्यमित्यादि। तत्स्वभावसद्भाव इति विज्ञानजननस्वभावे प्रागपि स्वाश्रयसमवायाद् व्यक्तिशून्येपि देशे केवलात् सामान्यादित्यर्थः। सामान्याकारविज्ञा[4]नोदयप्रसङ्गात्। (।१४८-४९॥)

नेत्यादिपरः। व्यक्तिराश्रय सामान्यस्य संस्कारो योग्यताधानन्तस्माद्धेतोर्न

इन्द्रियस्य संस्कारात्। योऽपि--

अञ्जनादेरिव व्यक्तेः संस्कारो नेन्द्रियस्य च ॥१५०॥
प्रतिपत्तेरभिन्नत्वात् तद्भावाभावकालयोः।

अंजनादिभिः संस्कृतमिन्द्रिय प्रतिपत्तौ, कञ्चिदतिशयमासादयति स्पष्टास्पष्टविशेषणात्, तदकारिणश्चातत्संस्कारकत्वात्। नैवं व्यक्तेर्यथा हीन्द्रियस्य संस्कारः कश्चित्[2] तद्भावाभावकालयोः प्रतिपत्तावविशेषात्। विषयसंस्कारो हि इन्द्रियाविशेषेऽपि तद्विशेषाधानादुपकारी स्यात् न

व्यञ्जिका सामान्यस्य। येन तया जन्य स्यात् सामान्य। **किन्तर्हि तद्ग्राहिण** इति सामान्यग्राहिण· **संस्काराद्** व्यञ्जकेति प्रकृत।

योपीत्याद्या चार्य.। **अञ्जनादेरिवेति** वैधर्म्यदृष्टान्त.। **अञ्जनादेः** सकाशाद् यथेन्द्रियसंस्कारो युक्तो **नैवं व्यक्तेः** सका[5]शात्। कस्मात् **प्रतिपत्तेर्ज्ञानस्य** व्यञ्जकत्वेनाभिमताया व्यक्तेर्भावाभावकालयोः सप्तमीद्विवचनमेतत्।

संस्कृतमित्यादिना व्याचष्टे। **अञ्जनादिभिः संस्कृतमिन्द्रियं कंचिदतिशयमात्मभूतमासादयति। प्रतिपत्तौ** प्रतिपत्तिनिमित्त। विशिष्टज्ञानोत्पादनायेति यावत्। निमित्तात् कर्म्मसयोग इत्यनेनात्र सप्तमी। कुत एतदिति चेदाह।[6] **स्पष्टेत्यादि। प्रतिपत्तेरिति** विभक्तिविपरिणामेन सम्बन्ध·। तथा हि तिमिराद्युपहतमिन्द्रियमस्पष्ट विज्ञानञ्जनयति। तदेवाञ्जनादिसस्कृत स्पष्टतोऽवसीयते (।) संस्कृतमिन्द्रिय प्रतिपत्त्यर्थमतिशयमासादयतीति। 107b

अथाञ्जनादे सकाशान्न प्रतिपत्तिभेदस्तदा। **तदकारिणश्च** प्रतिपत्तिभेदाकारिणश्चाञ्जनादेरतत्सं[7]स्कार(क)त्वादिन्द्रियासस्कारकत्वात्। यथाञ्जनादेः सकाशादिन्द्रियस्य **संस्कारो नैवं व्यक्तेः** सकाशात् (।) किङ्कारण (।) **तद्भावाभावकालयोरित्यादि**। तथा हि व्यञ्जिकाया गोव्यक्तेरभावकाले यादृश चक्षुर्विज्ञान वृक्षादावुत्पन्नन्तस्या गोव्यक्ते. (अ)भावेपि वृक्षादौ तादृशमेव। यदि तदभावकाले पूर्वमस्पष्ट विज्ञान वृक्षादिषूत्पन्न पश्चाद् गोव्यक्तिकृत इन्द्रियसस्कारो ग[1]म्येत।

विषयसस्कारेपि सति विषयान्तरे नैव प्रतिपत्तिभेदोऽस्त्यतः सोपि न युक्त इति चेदाह। **विषयेत्यादि**। विषयस्य गन्धादेर्यं केनचित् सस्कारस्स **इन्द्रियाविशेषेपि**। यदि नामान्यत्र विषयान्तरे इन्द्रियस्य प्रतिपत्ति प्रति विशेषो नास्ति। **तथापि तद्विषेषाधानन्तस्य** सस्कृतविषयग्राहकस्य ज्ञानस्य विशेषाधानादुपकारी स्यात्।

चेन्द्रियसंस्काराः।[1]

प्रागदृश्ये दर्शनशक्त्याधानात् उपकारकमिति चेत् अतीन्द्रियदर्शनादेव कथं प्रतिपत्तेर्न भेदकः ?

एकस्मिन् प्रतिनियमे[4]ऽपि सामान्यान्तरस्य दर्शको न स्यात व्यक्त्या च संस्कारात्। तद्दर्शने तद्व्यंग्येषु सामान्यानां कदाप्यनिश्चयोऽन्यो वा स्यात्। अविभागायास्तस्यास्तेषु विशेषाभावात्[5]व्यक्तेरिन्द्रियसंस्कारो न घटते इति

नेन्द्रियसस्का[2]र उपकारी स्यादिति सम्बन्धः।

एतदुक्तम्भवति। विषया हि विनियतास्ते स्वाकारस्यैव विज्ञानस्य साधन नाकारान्तरयुक्तस्य(।)ततो विषयसस्कार प्रतिनियतत्वात् स्वविषयामेव विशिष्टा प्रतिपत्तिञ्जनयन्न विरुध्यते। इन्द्रिय तु स्वग्राह्ये विषयभेदे तुल्य साधनमतस्त-त्सस्कार· सर्वस्मिस्तद्ग्राह्ये प्रतिपत्तेर्भेदक· प्राप्नोतीति। नेन्द्रियस्य व्यक्तिभेद[3]-स्तदिन्द्रियग्राह्ये सर्वस्मिन् दृश्ये विषये स्पष्टाकारज्ञानजननाय सस्कारमाधत्ते। किन्तर्हि व्यक्त्युत्पत्ते· **प्रागदृश्ये** सामान्ये इन्द्रियस्य **दर्शनशक्त्याधानात्** कारणाद् व्यक्तिभेद **उपकारकं इति चेत्**। **अतीन्द्रियदर्शनादेव** च स्पष्टमिन्द्रियस्य सस्कारो गम्यते। व्यक्तिसन्निधानात् पूर्वमसमर्थम्पश्चात्तत्सन्निधाने समर्थमिति स व्यक्ति-भेदोतीन्द्रिय सामान्या[4]ख्यमर्थन्दर्शयन् **कथ प्रतिपत्तेः** सर्वत्र **न भेदको** भेदक एवेत्यर्थः।

एतदुक्तम्भवति। दृश्येपि तावदस्पष्टे स्पष्टाकारदर्शनशक्त्याधानाद् अञ्ज-नादिकृत. इन्द्रियसस्कार सर्वत्र तदिन्द्रियग्राह्ये विषये प्रतिपत्तेर्भेदको दृष्ट (।) कि पुनर्योतीन्द्रियस्यार्थस्य दर्शकस्तथा चान्यस्याप्यतीन्द्रियस्य परमाण्वादेर्दर्शकः स्यादिति भाव। सामान्यस्यैव[5] दर्शनायेन्द्रियस्य सस्कारमाधत्ते व्यक्तिभेद. ततो नास्त्यतिप्रसङ्ग इति चेदाह। **एकेत्यादि**। एकस्मिन् सामान्ये द्रष्टव्ये इन्द्रिय-सस्कारस्य **प्रतिनियमस्तस्मिन्नभ्युपगम्यमाने** तस्मिन्नेव व्यक्तिभेदे शावलेयादिके-समवेत यत्**सामान्यान्तर** सत्ताद्रव्यत्वादि। **तस्य दर्शक** इन्द्रियसस्कारो न स्यात्। इष्यते च। आत्मसमवेतानामेव सर्वसामान्यानान्दर्शनाये[6]न्द्रिय-सस्कारो **नैकस्यैवेति** चेदाह। **व्यक्त्या चेत्यादि**। **तद्दर्शन** इति तेषा व्यक्तिसमवे-ताना सामान्यानान्दर्शने। **तद्व्यङ्ग्येषु** तया व्यक्त्या व्यङ्ग्येषु। दृष्टश्च दूराद् द्रव्यमात्रदर्शने द्रव्यत्वमर्थत्वयोर्निश्चयेपि सति गोत्वादावनिश्चयः। यस्मिन्ननिश्च-यस्तस्य दर्शनाय नाहित. सस्कारभेद इति चेदाह। **एकनिश्चयो वेति न स्यादिति** सम्बन्ध.। एकशब्दो[7]न्यार्थोऽनिश्चितादन्यस्यापि निश्चिताभिमतस्य द्रव्यत्वादे- 108a

---

[1] Bam-po-lna-pa = पञ्चमम्माह्निकम्।

संस्कृतमिन्द्रियमयुक्तम्।

व्यक्तेः सामान्यस्य विज्ञानजननस्वभाव इति स्वभावात् प्रच्युतेः संस्कृतेन्द्रियानपेक्ष एव विज्ञानोत्पादः। संस्कृतेन्द्रियसहकारित्वात् एकाकी न शक्त इति चेत्। अनाधेयातिशयस्यास्य कोयं सहकारार्थः? अनित्त्या
464b **हि भावाः[7] सहकारिणो विशिष्टस्यात्मनो लाभात् तमपेक्षन्ते। यो ह्येषां जनक आत्मा स हि तदैव ततो भवतीति जनक आत्मा हि परस्परापेक्षः। सामान्यान्तरेणासिद्धलिङ्गस्य स स्वभावोऽपि कुत इन्द्रियापेक्षः। . .[1] स हि योऽस्वभावस्तेन तु कथमपि न स्यात्। व्यक्तिसंस्कृतेन्द्रियकार्य-**

निश्चयो न स्यात्। किङ्कारणं (।) **तस्या** व्यक्तेरविभागमयास्तेषु स्वात्मसमवेतेषु सामान्येषु **विशेषाभावात्**। न हि सा व्यक्ति क्वचित् प्रत्यासन्ना क्वचिन्न। ततः सर्वस्य वा निश्चयः सामान्यस्य न वा कस्यचिदपीत्येवन्तावद् **व्यक्तेरिन्द्रियसंस्कारो न घटत इत्याख्यातम्** (।)

अधुनाभ्युपगम्याप्युच्यते। **व्यक्तेरित्यादि**। व्यक्तेस्सकाशात् पक्ष[1]द्वयेपि सामान्यस्य **विज्ञानजननस्वभाव इति** कृत्वा (।) तस्माद् विज्ञानजननात् **स्वभावात् प्रच्युतेः** कारणान्न हि समर्थस्य सहकार्यपेक्षा युक्ता। **संस्कृतमिन्द्रिय** सहकारि यस्य सामान्यस्य तत्तथोक्तन्तद्भावस्तस्मात्। नित्यत्वादनाधेयातिशयस्य सामान्यस्य **कोयं सहकारार्थः** (।) नैव कश्चित्।

अनित्त्या ह्येत्यादिना व्यतिरेकमाह। **सहकारिणः** सकाशाद्विशिष्टस्यात्मनो **ला[2]भात्। तमिति** सहकारिणं (।) कस्माद् (।) **यो ह्येषा** क्षणिकाना **जनक आत्मा** सहकारिसन्निधेः प्राङ्नासीत्। **तदैव** सहकारिसन्निधिकाले। ततः सहकारिणः सकाशाद् **भवतीति** कृत्वा। **एषामिति** क्षणिकाना।

ननु क्षणिकानामपि कथ सहकारिणो विशिष्टात्मलाभापेक्षा। सहभाविनाम्परस्परमनुपकार्योपकारकत्वात्। यश्च क्षणो जायते न तस्य सदसत्त्वकालयोस्स[3]हकार्यपेक्षेति (।)

अयुक्तमुक्तमुपकारी ह्यपेक्षत इति नैष दोष.। सत्तापेक्षयैतदुच्यते। अत एवाह। जन्यतैवैषां परस्परतोपेक्षेति। अनासाद्य **परमिति** सहकारिण। **तत्स्वभावं** समर्थस्वभाव। न हि तस्य सामान्यस्य केवलस्य सहकारिविकलस्य प्राग् यो न विज्ञानजननस्वभावः स पुनः कथंचिद् भावी। **न ह्येति** सम्बन्ध। नित्यत्वादिति भावः।

---

[1] Yan-gar-ba.

त्वात्सहकारि सामान्यं वि[2]ज्ञानहेतुः। एवं चेत् सामान्यं व्यक्तेः पारम्पर्येण कार्यमुक्तं स्यात्।

अपि च।

व्यञ्जकस्य च जातीनां जातिमत्ता यदीष्यते ॥१५१॥

प्राप्तो गोत्वादिना तद्वान् प्रदीपादिः प्रकाशकः।

यो हि[3] कश्चित् विज्ञानहेतुः स हि तस्य व्यञ्जकश्चेत् गोत्वादिषु प्रदीपादेरपि विज्ञानहेतुत्वं स्यात्। आलोकसंस्कारापेक्षया चक्षुषार्थप्रतीतेः। तेन[4] प्रदीपादिः हि गोत्वादिना तद्वान् स्यात्।

न हि व्यक्तेरपि सामान्यस्याभिव्यक्तिः ज्ञानहेतुता मुक्त्वाऽन्या कांचित्, स्वभावातिशयस्याधातुमशक्यत्वात्[5]।

किञ्च (।) व्यक्तेः सामान्यसं[4]स्कारे सति तज्जन्य सामान्यं स्यादिति परेणेन्द्रियसस्कारोङ्गीकृत (व्यक्ते सकाशात्)। तथापि व्यक्तिजन्यत्व प्रसज्यत इत्याह। व्यक्तिरित्यादि। तत्सहकारि। व्यक्तिसस्कृतेन्द्रियसहकारि सामान्यम्विज्ञानहेतुरित्यभ्युपगम्यमाने। व्यक्तिकार्यस्येन्द्रियस्य कार्यत्वात् सामान्यं व्यक्तेः पारम्पर्येण कार्यमुक्त स्यात्। (।१४९-५०॥)

भवतु नाम सामान्यस्य व्यञ्जिका व्यक्ति. तावदस्या जातिमत्त्व न युक्तम[5]तिप्रसङ्गादित्याह। अपि चेत्यादि। जातीनां सामान्याना व्यञ्जकस्य व्यक्तिभेदस्य जातिमत्ता यदीष्यते। तदा गोत्वादे. प्रकाशक. व्य (?प्र) दीपादि (:) व्यञ्जकत्वात्तेन गोत्वादिना तद्वान् गोत्वादिमान् प्राप्तः। शावलेयादिवत्। गोत्वाधार. प्राप्त इत्यर्थः।

यो हीत्यादिना व्याचष्टे। गोत्वादिषु व्यङ्ग्येषु विज्ञानहेतुत्वं प्रदीपादेरप्यस्ति। कथमिति चेदाह। तेज इत्यादि[6]। तस्मादस्यालोकस्य विज्ञानम्प्रति हेतुत्व। तत इति ज्ञानहेतुत्वात्। प्रदीपादय इति (।) आदिशब्दादिन्द्रियसस्कारादिपरिग्रह। तेषामपि ज्ञानहेतुत्वात्। व्यक्ते सकाशाद् विशिष्टस्यैवाभिव्यक्ति सामान्यस्य भवति न तथा प्रदीपादेरिति चेदाह। न हीत्यादि। व्यक्तेरपि सकाशात् सामान्यस्याभिव्यक्तिर्ज्ञानहेतुतां मुक्त्वा न ह्यन्या काचित्। यदि हि सामा[7]न्यस्या- 108b
तिशयाधान व्यक्त्या क्रियते न प्रदीपादिना। तदा भवेद्विशेषस्तच्च नास्ति। स्वभावातिशयस्याधातुमशक्यत्वात्। नित्यत्वात् सामान्यस्येति भावः। समवाय इत्यादि। व्यक्तौ च समवेतं गोत्व न प्रदीपादौ। तस्येति सामान्यस्य। अजन्य-

समवायोऽभिव्यक्तिश्चेत्, तस्योत्तरं हि तस्य समवायस्य **अयोगादि-त्युक्तम्**। एषां समवेतानामपि दृश्यतापत्तिः पूर्ववत् पश्चादपि न कश्चिद्[6]
465a विशेषः न ज्ञानहेतुता। समवायादेव ज्ञानहेतुत्वे[7] प्रदीपादावपि स एव प्रसंगः।

तद् नाधेयता सामान्यस्य नाऽप्याश्रयेण व्यक्तिरवृत्तेः न ज्ञानहेतुः।

अत एव--

व्यक्तेरन्या[1]थवानन्या येषां जातिस्तु विद्यते ॥१५२॥
तेषां व्यक्तिष्वपूर्वासु कथं सामान्यबुद्धयः।

तु शब्दोऽवधारणार्थे विद्यत एवेति। वस्तुसती। हि स्वसामर्थ्य

जनकयो' कोय समवाय इत्युक्तत्वात्।

भवतु नाम समवायस्तथाप्यस्य सामान्यस्य समवायमात्रं व्यक्त्या सह जातं नान्यः कश्चिद्विशेषो[1] विज्ञानजननलक्षण। पूर्ववदिति व्यक्तिसमवायात् प्राग्वत् पश्चादपि व्यक्तिसमवायेपि यद्यपि सामान्यस्य न कश्चिद् विशेषस्तथापि समवायबलादेव स्वविषयज्ञानजननमिति चेदाह। समवायादेवेत्यादि। ज्ञानहेतुत्वेन सामान्यस्याभ्युपगम्यमाने। स्वाश्रयो यो यत्र समवेतस्तत्समवायिन। सामान्य-स्याभ्युपगम्यमाने। स्वाश्रयो यो यत्र समवेतस्तत्समवायिन। सामान्यादन्येषामपि परमाणुसमवेतानां रूपादीनामपि दृश्यतापत्ति[2] स्यात्। समवायस्यैकत्वेन सर्वत्राविशेषात्। यथा हि सामान्यमतीन्द्रियमपि केवलस्समवायो दर्शयत्येव परमाणुगतानपि रूपादीन् किन्न दर्शयेत्। यतश्च समवायपक्षेऽप्यन्दोषस्तस्मात् ज्ञानहेतुतैव सामान्ये व्यक्तेर्व्यञ्जकत्वं। तच्चेत्थ भूत व्यञ्जकत्वन्तुल्यम्प्रदीपा-दावपीति स एव प्रसङः प्राप्तो गोत्वादिना तद्वानित्यादिक। (। १५०-५१॥)

तदिति तस्मान्नाधेयता सामान्यस्य स्वा[3]श्रये वृत्तिर्नापि स्वाश्रयेण व्यक्तिरभि-व्यक्ति स्वाश्रये सामान्यस्य वृत्ति। अतश्चावृत्ते कारणात् सामान्यस्यानेकत्र व्यक्तिभेदे एकाकारज्ञानहेतुः। न हि यो यत्र न वर्त्तते स तत्रात्मवृत्तिद्वारेण ज्ञानहेतुर्युक्त।

अत एवानेकत्र एकस्य सामान्यस्यावृत्ते कारणात्। **व्यक्तेः** सकाशादन्या यदि **जातिरथवानन्या। येषां** वादिना। **व्यक्तिष्वपूर्वासु** सप्रत्युत्पन्नासु पश्चाद्वा दृ[4]श्यमानासु। **तु** शब्दो विद्यते शब्दात्परेण द्रष्टव्योवधारणार्थः। अत एवाह। **विद्यत एवेत्यादि। वस्तुसती** येषा जातिरिति यावत्। **स्वसामर्थ्ये** सति स्वप्रतिपत्तिद्वारेण। **अन्यत्रेति** व्यक्तिभेदे बुद्धिञ्जनयन्। कि विशिष्टा **स्वरूपानुकारिणीमेकरूपानुगता**

नान्यत्र स्वरूपानुका[2]रिणीं बुद्धिं जनयन् तेन संबंधमपेक्षते, अन्यथाऽतिप्रसङ्गात्।

स च सामान्यस्य सतः तत्त्वान्यत्वपक्षयोर्न संभवति।

एकत्र दृष्टस्यान्यत्र दर्शनासम्भवात्[3] सतः ॥१५३॥

सा हि बुद्धिर्भूतग्राहिण्येकभाविनी व्यक्त्यन्तरमेव स्कन्देत् तत्र दृष्टं किञ्चिद् अन्यत्र दर्शनं स्यात्।

अनन्यत्त्वेऽन्वयाभावादन्यत्त्वेऽप्यनपाश्रयात्।

सतोऽसम्भवः।

यत्र बुद्धिञ्जनयति तेन सम्बन्धमपेक्षते। सम्बन्धमन्तरेण स्वाकारबुद्धिजननेऽति-**प्रसङ्गात्**। (।१५१-५२॥)

स चेति स[5]म्बन्धो व्यक्त्यन्तरेण **सामान्यस्य सतो** विद्यमानस्य। **तत्त्व**पक्षे-ऽन्यत्त्व**पक्षे** च न **सम्भव**ति (।) कस्माद् (।) **एकत्र** व्यक्तिभेदस्यार्थान्तरभूतस्यान-र्थान्तरस्य **चान्यत्र** व्यक्त्यन्तरे **दर्शनासम्भवात्। सा ही**त्यादिनैतदेव साधयति। **सा हि बुद्धिर्भूतग्राहिणी** वस्तुभूतसामान्यग्राहिण्य**ेकभाविनी**। एकत्र व्यक्तिभेदे उत्पन्ना **व्यक्त्यन्तरमेव सा स्कन्देत्** गच्छेद् (।) व्यक्त्यन्तरमपि सामान्याका[6]रेण गृह्णीयादिति यावत्। यदि **तत्रै**कस्मिन् व्यक्तिभेदे **दृष्टं किञ्चिद्** वस्तुभूत सामा-न्य**मन्य**त्रेति यत्र व्यक्तिभेदे तया स्कन्दितव्य। **तच्चान्यत्र** दर्शन। **सत** इति वस्तुभूतस्य सामान्यस्य न सम्भवतीति सम्बन्ध। किङ्कारणम् (।) आश्रयाद-**नन्यत्वे**भ्युपगम्यमानेन्वयाभावात्। न ह्येकस्मादव्यतिरिक्तस्तदात्मभूतोन्य-दन्वेति। आश्रया**दन्यत्त्वे**पि सामन्यस्य व्यक्ताव[7]**नपाश्रय**ात्। अनन्तरोक्तेना-धाराधेयादिभावनिषेधेनाश्रयभावस्य निषिद्धत्वात्। यदि व्यतिरिक्तस्य सामा-न्यस्यासम्बन्धान्न व्यक्त्यन्तरे स्वाकारज्ञानजननम् (।) एवन्तर्ह्याद्यायामपि व्यक्तौ तत्तुल्यमिति किमुच्यते व्यक्तिष्वपूर्वास्विति व्यक्तिष्वित्येव वक्तव्य। तथैकत्र दृष्टस्यान्यत्र दर्शनासम्भवादित्यपि वक्तव्य। एकत्रापि व्यक्तिभेदे सम्बन्धमन्तरेण दर्शनासम्भवात्।[1]

सत्यमेतत्। अभ्युपगम्यैतदुक्तमित्यदोष।

योपि मन्यते (।) तत्त्वान्यत्त्वपक्षे सामान्यस्यान्यदर्शन न सम्भवत्यस्माकन्तु भिन्नाभिन्नमेव सामान्य। तथा हि (।)

"निर्विशेष न सामान्य भवेच्छशविषाणवत्।
केनचिच्चात्मनैकत्व नानात्वं चास्य केनचित्।
यदा च शबलम्वस्तु युगपत् प्रतिभासते।

स्वभावो हि तत्त्वमन्यत्त्वमेव वा न लंघयति। रूपस्यातद्भूतस्याऽन्यत्त्वाव्यतिक्रमात्। इदमेव रूपान्यत्त्वं यन्न तदेव न अकारान्तरवत् अविशेषा[4]त्। तच्चानन्यत् तदा तदेव तत् स्यात् अतत्त्वे वस्त्वन्तरवद् अन्यत्त्वप्रसंगात्।

न चैकवस्तुस्वभावस्य व्यक्त्यन्तरान्वावेशः[6] अव्यक्त्यन्तरत्वप्रसगात्। ततो व्यक्तेरव्यतिरेकिणो नान्वयिनी बुद्धिः नाऽपि व्यतिरेकिणः, तस्य

तदान्यानन्यभेदादि सर्वमेव प्रलीयत" इति।[1]

तन्निषेधार्थमाह। **स्वभा[2]वो ही**त्यादि। स्वभावात् **तत्त्वमेवान्यत्त्वमेव वा न लघयतो**ति सम्बन्धः।

ननु देशकालस्वभावाभेदेपि सामान्यविशेषयोरनुगतव्यावृत्तिरूपाभ्या भेदोपीष्यत इत्यत आह। **रूपस्यानुगतस्य** स्वभावस्या**तद्भूतस्य** व्यावृत्तरूपस्वभावस्या**न्यत्त्वाव्यतिक्रमात्**। व्यावृत्तेभ्यो विशेषरूपेभ्यो भिन्नस्यानुगतरूपस्य सामान्यस्यान्यत्त्वमेव स्यादित्यर्थं। अस्त्यतद्रूप[3]त्वमन्यत्त्वमेव (।) कथमित्यत आह। **इदमेवे**त्यादि। **यन्न** तदित्यतद्रूपमित्यर्थं। एतावदेवान्यत्त्वलक्षणमित्यर्थं। **अाकारान्तरवत्**। षष्ठयर्थे वति। तथा हि सुखाद् दु.खस्याप्यन्यत्त्वमसुख रूप दु खमिति कृत्वा। इयता चातद्रूपस्यान्यत्त्वलक्षणेन व्याप्तिरुक्ता। अस्य चान्यत्त्वलक्षणस्याविशेषादभिमतेपि सामान्ये।

एतेन पक्षधर्म उक्त। प्रयो[4]गस्तु। यद्वस्तुत्वे सत्यतद्रूपन्तस्य ततोन्यत्त्वमेव तद्यथा सुखाद् दु खस्य। वस्तुत्वे सत्यव्यक्तिरूप चेष्यते सामान्यमित्यतद्रूपत्वेनान्यत्त्वे व्यवहारस्य साध्यत्वात् स्वभावहेतु। एवन्तावदतद्रूपत्वे सामान्यस्यान्यत्त्वमेवापादितम् (।) अथान्यत्त्व नेष्यते तदा तत्त्व प्राप्नोतीत्याह। **तच्चे**त्यादि। व्यक्तेरनन्यत्तदा **तदेव** व्यक्तिरूपमेव **तत्** सामान्यम्भवति। **अतत्त्वे** इत्यव्यक्ति[5]रूपत्वे **वस्त्वन्तरवदन्यत्त्वप्रसङ्गात्**। एतच्चानन्तरमेवोक्त।

अस्त्वनन्यत्त्व सामान्यस्य तथापि व्यक्त्यन्तरमनुयास्यतीत्यत आह। **न चैके**त्यादि। **एकव्यक्तिस्वभावस्य व्यक्त्यन्तरान्वावेशो**नुगमो व्यक्त्यन्तरस्वभावत्वमिति यावत्। कस्मात् तस्यावगम्यमानस्याव्यक्त्यन्तरत्वप्रसङ्गात्। यदि शाबलेयात्मकं सामान्य बाहुलेयस्यात्मभूत भवेत्तदा बाहुलेय शाबले[6]य एव जात शाबलेयात्मकात् सामान्यादव्यक्तिरेकाच्छाबलेयवदिति कुतोस्य व्यक्त्यन्तरत्व। **तत इति** तस्माद् **व्यक्तेरव्यतिरेकिणः** सामान्यात्सकाशाद् **अन्वयिनी**त्यनुगामिनी।

---

[1] Ślokavārtika, Ākrti 10.

क्वचिदप्यनाश्रयात्. अन्यस्यापि केनचित्- अनुपकार्यं[7](त्व)ात् व्यङ्ग्यव्यञ्जक- 465b
भावादेः अन्यस्यापि सम्बन्धस्याभावात्, असम्बन्धात् न ज्ञानजननप्रसंगात्। तद्
एकस्य वस्तुनो दर्शनेन एक[1]वृत्तस्य अन्यत्र वृत्तिमन्विच्छन्, तत्त्वान्यत्वे
आक्रामतीति न युक्तमेतद्।

तस्मादर्थेषु इयमेकाकारा वासनाऽऽहिता प्रतीतिर्भ्रान्तिरेव[2]। भावभेदो
वासनायाः प्रकृतिश्चास्या आश्रय इति निर्णीतमेतत्। प्रधानेश्वरादिकार्यशब्दा
भावेषु अतद्भूतभेदेषु कथमभेदेन वर्त्तन्ते[3]।

नापि व्यतिरेकिण सामान्याद् अन्वयिनी बुद्धिरिति प्रकृत। कस्मात् (।) **तस्य** व्यतिरिक्तस्य सामान्यस्य **क्वचिद्** भेदेऽ**नाश्रय**ादप्रवृत्ते (।) सम्बन्धमन्तरेण प्रवृ[7]-
त्ययोगात्। "वृत्तिराधेयता व्यक्तिरिति तस्मिन्न युज्यत" इत्यादिना च व्यङ्ग्य- 109b
व्यञ्जकस्याधाराधेयभावस्य च सम्बन्धस्य निषिद्धत्वात्। अन्यस्तर्हि सामान्य-
तद्वतोः सम्बन्धो भविष्यतीति चेदाह। **अन्यस्यापी**त्यादि। **व्यङ्ग्यव्यञ्जकभावा-**
देरिति पञ्चमी। आदिशब्दादाधाराधेयभावपरिग्रह। एतस्मात् पूर्वनिषिद्धात्
सम्बन्धद्वयाद**न्यस्यापि** यस्य कस्य[1]चित् **सम्बन्धस्य** व्यक्ति प्रति सामान्यस्या-
भावात्। किङ्कारण (।) नित्यत्वात् केनचिद् व्यक्तिभेदेनानुपकार्यस्य सामान्यस्या-
प्रतिबन्धेन। न ह्यप्रतिबन्धस्य कश्चित् सम्बन्धोस्तीत्युक्त।

एतेन **चान्यत्वेऽपाश्रया**दिति श्लोकभागो व्याख्यात.। (।१५२-५३॥)

असत्सम्बन्धमपि सामान्य व्यक्तिषु स्वरूपानुकारिणी प्रतीति जनयतीति चेदाह। **असम्बन्धा**दित्यादि। नास्य सम्बन्धोस्तीति विग्रह। स[2]र्वस्मात् सर्वत्र प्रतीतिः स्यादित्यर्थ·। **तदिति** तस्मा**दयमिति** सा मा न्य वा दी। **एकस्य** सामान्यस्य **दर्शनेन** हेतुना। **एक**स्मिन् शाबलेये व्यक्तिभेदे **वृत्तिर्यस्य** तस्यान्यत्र व्यक्त्यन्तरे **वृत्तिम-**
न्विच्छिन् वस्तुत्वेनेष्टस्य सामान्यस्य व्यक्ते सकाशाद् ये **तत्त्वान्यत्वे**। ते **नाक्रमति** वस्तुनो गत्यन्तराभावात्। चोक्तो दोष इत्ययुक्तमेतद्वस्तुभूतात् सामान्यादनुयायि-
ज्ञा[3]नमिति।

यत एवन्त**स्मादर्थेषु** परस्परविवेकिष्वियमे**करूपैकाकारा** प्रतीति**र्भ्रान्तिरेव** (।) भिन्नेष्वभेदाध्यारोपेण वृत्ते. । कुतस्तर्हि सोत्पन्नेत्याह। **विकल्पे**त्यादि। विजातीय-व्यावृत्तपदार्थानुभवेन या तथाभूतविकल्पस्य प्रकृत्या जनिका **वासना**हिता तत. समुत्थिताः। एतच्च प्रागेवोक्तमित्याह। **भावभेद** इत्यादि। भावानान्तत्कार्याणाम-तत्कार्येभ्यो[4] भेदः। तथाभूताना चानुभावेनाहिता या वासना तस्याः **प्रकृतिश्च** स्वभावश्चास्या **आश्रय इति निर्णीतमेतत्** प्राक तत्र भावभेदः पारम्पर्येण कारण

तेऽपि संकेतवत् सन्तानवासनयोपस्कृतत्वाद् सर्वेषामर्थानां दर्शनेषु अनपेक्ष्य तद्भेदं तथाध्यवसायात् अतथाभूतकल्पितव्यवच्छेदेन[4] उपादानबलप्रभवा विकल्पारोपिता हि विकल्पविज्ञानप्रतिभासिन्यर्थे वर्त्तन्ते ।

नहि तेषु अतथाभूतेषु सामान्यस्य भेदोऽभेदो वा[5] कश्चित् । तथाभूतविकल्पान्तरेण भेदोऽपि प्रतिपत्तृणामध्यवसायवशात् स्यात् । तदध्यवसायादेव चेत् सामान्यं

वासना प्रकृति साक्षादिति द्वयमुपन्यस्त। यद्यन्यापोह एव शब्दवाच्यः कथन्तर्हीदानीमित्यादि। **प्रधानेश्वरादिकार्यशब्दा** इति प्र धा न कार्य मी श्व र कार्यञ्जगदिति। आदिशब्दाच्छ ब्द ब्र ह्म[5]परिणाम इत्यादिशब्दाना परिग्रह ।

भावेष्वाध्यात्मिकबाह्येषु। अतद्भूतोऽप्रधानादिकार्यात्मको भेदो येषान्ते तथोक्ता । यद्यप्यप्रधानकार्यात्तेषा भेद स्यात् तदा भवेत् प्रधानादिकार्यात्मको भेद· (।) स एव च सर्वेषामभेद । तेना**भेदेना**निमित्तेन सर्वत्र **वर्त्तन्ते**। स च नास्ति भावानामन्यापोहवादिनो मतेनाप्रधानादिकार्यात्मकत्वात्। ततश्च[6] कथमेवभूतेष्वभेदेन वर्त्तन्ते। नैवेत्यभिप्राय । ततश्चाव्यापिन्यपोहव्यवस्थेति भाव ।

तेषीत्यादिना परिहरति। तेपि प्रधानादिकार्यशब्दा विकल्पविज्ञानप्रतिभासिन्यर्थे प्रवर्त्तन्ते इति सम्बन्ध । कथमित्याह (।) **संकेते**त्यादि। वस्तुन्य**तथाभूते**। इच्छावशाद् य सकेत प्रधानकार्य **जगदिति**। तेनाहिता या वासनाशक्ति-
1102a स्तयोत्तरोत्तरक्षणविप[7]रिणामे**नोपस्कृतत्व**ाद् विज्ञानसन्तते **सर्वे**षा बाह्याध्यात्मिकानामर्थानां **दर्शने**ष्वनुभवेषु सत्स्वप्य**नपेक्ष्य तद्भेद**मप्रधानकार्याद् भेदम्वस्तुगत। यदि नामार्थानामप्रधानकार्याणामेव दर्शनम्वस्तुधर्मेण तथापि वस्तुस्वभावमनपेक्ष्येत्यर्थ (।) **तथाध्यवसायाद् यथासंकेत**मप्रधानकार्यानपि भावान् प्रधानकार्यत्वेनाध्यवसानात्। अतथाभूतकल्पितप्रधानकार्यत्वेन **कल्पि[1]तं** चैतन्य सा ख्ये न तस्य **व्यवच्छेदेन** प्रधानकार्याभावा इति यद् **विकल्पविज्ञानन्तत्प्रतिभासिन्यर्थे**। स एव विजातीयव्यवच्छेदेनान्यापोह इति भाव । कि भूतास्ते शब्दा इत्याह। **उपादाने**त्यादि। **विकल्प**हेतोर्वासनाया दाढर्च्यमु**पादानबल**न्तस्मात् **प्रभव** उत्पादो यस्य विकल्पस्य तस्मात् **समुत्थिताः**

एतदुक्तम्भवति । यदि नाम वस्तुनि तथाभूतभेदाभा[2]वस्तथापि विकल्पारोपित एवान्यापोह शब्दाना प्रवृत्तेरङ्गन्ततो नास्याव्यापितादोष इति। प्रधानादिकार्यशब्दानामभेदेन प्रवृत्तौ तेषु भावेषु सामान्यमेव वस्तुभूत किन्नेष्यत इति चेदाह। **न हीत्यादि। तेषु** प्रधानकार्यत्वेनाध्यारोपितेषु। **अतथाभूतेष** प्रधानकार्येषु व्यक्त्यभावात् सामान्यस्याभाव इति भाव ।

किन्नेति चेत्, तेनाप्यवश्यं तत्र भेदो नान्तरीयकतयेष्टव्यः, स एव सामान्यकार्ये पर्याप्तः इत्येवं निष्प्रयोजना सामान्यकल्पना ।

यदि सत्स्वसत्सु भावेषु नेयमर्थती सामान्यबुद्धिः विप्लवात्[7]**। नास्या विषयनिरू-** 466a

---

अन्यापोहवादिनस्तु न[3] दोष इत्याह। **तथेत्यादि**। प्रधानादिकार्यत्वकल्पनयेत्यर्थ.। **तदन्यस्या**प्रधानादिकार्यस्य **भेदो** व्यवच्छेद प्रधानादिकार्यत्वेनारोपितानाम्भावाना **प्रतिपत्तृणामध्यवसायवशात् स्यात ।**

तदध्यवसायवशादेव प्रतिपत्रध्यवसायवशादेव शावलेयादिष्वनुवृत्तिप्रत्ययनिमित्त **सामान्यं किन्नेति** चेत्।

नैतदस्ति। यस्मात् **तेन** सामान्यवादिना[4] सामान्य कल्पयताप्य**वश्यं** तत्र शाबलेयादिषु विजातीयाद् **भेदो नान्तरीयकतयेष्ट**व्योन्यथा गोत्वादेरसिद्धि स्यात्। **स एव** भेद. **सामान्यकार्ये**ऽभिन्नशब्दप्रवृत्त्यादिलक्षणे **पर्याप्त.** शक्त । **इत्येवं निष्प्रयोजना सामान्यकल्पना।**

एतदुक्तम्भवति। यथा प्रधानकार्येष्वपि भावेषु सामान्यमन्तरेण प्रधानादिकार्यशब्दास्तद्बुद्धयश्चैकाकारा[5] प्रवर्त्तन्ते। तथा गवादिषु गवादिशब्दास्तद्बुद्धयश्चैकाकारा किन्नेष्यन्ते कि सामान्येन पारमार्थिकेन कल्पितेन। दृष्टा च परैरपि सामान्यमन्तरेण बहुषु सामान्येष्वभिन्नाभिधानप्रत्ययवृत्ति ।

तदुक्तम्भ ट्टो द्यो त क रा भ्या

"तस्मादेकस्य भिन्नेषु या वृत्तिस्तन्निबन्धन ।
सामान्यशब्द सत्तादावेकधीकरणेन वेति।" श्लोक वा० आकृ० २४

तेनायमर्थ (।) यथा प्रत्येक[6]मनेकार्थसमवायित्वेन सत्त्वद्रव्यत्वादौ सामान्यशब्दस्तद्बुद्धिश्च सामान्यमन्तरेण प्रवर्त्तेते (।) न चानेकार्थसमवायित्व सामान्य यदेव सत्त्वे तदेव द्रव्यत्वादावस्ति। **निःसामान्यानि सामान्यानीति** वचनात्। न चोपचारात्तयो (शब्दज्ञानयो) वृत्तिरस्खलद्बुद्धिग्राह्यत्वात्। तस्माद् यथा सामान्य विना तयो सत्तादौ वृत्ति[7]स्तथा शाबलेयादिषु सामान्यमन्तरेण (।) 110b
यथा शाबलेयोऽगोव्यावृत्तस्तथा बाहुलेयोऽगोव्यावृत्तस्तथा खण्डोऽगोव्यावृत्त इत्य भिन्नाभिधानप्रत्ययवृत्ति. किन्नेष्यत इत्यर्थ ।

स्यादेतत् (।) सर्वत्र सामान्यबुद्धिर्निर्विषयेष्टैव केवल सामान्यमन्तरेण **क्वचि**दविसम्वादो न स्यादित्यत आह। **यदीत्यादि**। यदिशब्दोभ्युपगमद्योतनार्थ ।[1] यद्यस्यास्सर्वत्र निर्विषयत्वमभ्युपगम्यते। **सत्स्विति** विद्यमानेषु भावेष्वगोव्यावृत्तेषु। **असत्स्विति** परमार्थत: प्र धा ने श्व रा दिकार्यतयाऽविद्यमानेषु भावेषु। **नेय-**

पणं प्रति कश्चिदादरः। क्वचिदस्या ग्रीवंसंवादो वस्तुनि। तथाभूतस्य ग्रहणं न नियमात्।[1] **प्रत्यक्षवेदनावत्। अतथाभावेऽपि भावादिति निवेदयिष्यामो निवेदितं च।**

भेदविषयोऽप्ययं बहुलं भिन्नवस्तुदर्शनबलेन तेषु भावाध्यवसायात्।[2] **तथा-**

मर्थवती सामान्यबुद्धि'। तया यथारोपितस्याभिन्नाकारस्य बाह्येष्वभावभा(?) वादतश्चाभूतग्रहाद्। **विप्लवो** भ्रान्तिरेवेति कृत्वा। **नास्या**स्सामान्यबुद्धेर्निर्विषयाया **विषयनिरूपणं पति कश्चि**[2]**दादरः**। यदि सर्वैव सामान्यबुद्धिर्भ्रान्ता कथन्तर्ह्यनुमानाद् वस्तुसम्वाद इत्याह। **क्वचिदि**त्यादि। क्वचिद् **वस्तुन्यस्य** बुद्धेः सकाशादविसम्वादो **यस्म**(ात्) **कार्यकारणसम्बद्धाद्** यथोक्तात्। एतच्च निवेदित प्राक्। "यत्रास्ति वस्तुसम्बन्धो यथोक्तानुमितौ यथे"त्यादिना (१।८३)। न **तथाभूतस्या**भिन्नरूपस्यानुमानग्राह्यस्य वस्तुनि समावेशाद् **विद्यमानत्वादनु**मानविकल्पस्य[3] वस्तुविसम्वाद.। **प्रत्यक्षवदिति**। वैधर्म्यदृष्टान्त'। किङ्कारणम् (।) **अतथाभावे**पीति व्यतीतेपि वस्तुनि परम्परया लिङ्गानुसारेण भावात्। यद्वाऽतथाभावेपि सामान्यरहितेऽपि वस्तुन्यभिन्नाकाराया बुद्धेर्भावात्। इति एव। **निवेदयिष्यामः**। **निवेदितं च** प्राक्। **भावाभावानुविधानात् सामर्थ्य**मित्यन्तरे (।)

यदि सामान्यबुद्धि' स्वाकाराभेदेन भिन्नान भावानभिन्नानध्यस्य विधिरूप[4]तया प्रतिपद्यते कथमस्या अन्यापोहविषयत्वमुक्तमित्यत आह। **भेदे**त्यादि। अस्या सामान्यबुद्धेर्भिन्नपदार्थदर्शनबलेनेति विजातीयव्यावृत्तस्वलक्षणानुभवसामर्थ्येन। उत्पत्तेरित्यध्याहार.। बहुलग्रहणम्वस्त्वभावेपि शशविषाणादौ विकल्पबुद्धे प्रवृत्तिख्यापनार्थं। **तेषु** भिन्नेषु स्वलक्षणेषु **भावाध्यवसायात** स्वाकाराभेदे[5]न स्वरूपाध्यवसायात्। दृश्यविकल्पयोरेकीकृत्य प्रवृत्तेरित्यर्थ.। यस्माद् **भिन्नवस्तुदर्शनबलेनो**त्पद्यते बुद्धिरुत्पन्ना च तान्येव भिन्नवस्तूनि स्वाकाराभेदेन प्रतिपद्यते(।) तस्माद् भेदविषयत्वम्भिन्नविषयत्वमित्यर्थ.। युक्तन्तावद्वस्तुदर्शनद्वारायातेष्वनित्यादिविकल्पेषु वस्तुदर्शनबलोत्पत्तेर्भेदविषयत्व। यत्र तु न तथाभूतम्भिन्न[6]म्वस्तु। यथा नित्यादिविकल्पेषु। शशविषाणादिविकल्पेषु च (।)तत्र कथम्भेदविषयत्व तेषामिति चेदाह। **तथा भावे**त्यादि। यथैव भिन्नवस्तुस्वभावग्राह्यानुभवबलेनोत्पन्ना अनित्यादिबुद्धयः स्वप्रतिभासे भिन्नभावाध्यवसायेन प्रवर्त्तमाना भेदविषयाः। एवन्तथा
111a **भावकल्पनाया**मेव स्वप्रतिभास एव भिन्नबाह्यभावाध्यवसा[7]यकल्पनाया सत्या भिन्नविषयत्वे **सत्यपरत्रेति** अविद्यमानेषु नित्यप्रधानकार्यादिषु शशविषाणादिषु च

भावकल्पनायामेव अपरत्र भावात्। अन्यच्च सामान्यान्यप्रतिपत्तिरियं स्वाश्रय-

---

नित्यप्रधानादिकार्यशशविषाणादिविकल्पानाम्भेदविषयत्वस्य **भावात्। स्वाश्रयमा-**श्रगतव्यक्तिभेद एव स्थित। न तु व्यक्तिशून्ये देशे। तदुक्त भट्टे न।

"पिण्डेष्वेव च सामान्य नान्तरा गृह्यते यतः।
न ह्याकाशवदिच्छन्ति सामान्यन्नाम केचन॥ (श्लोक० २५)
प्रत्येकसमवेतत्वन्दृष्टत्वान्न निरोत्स्यते।
तथा च सति नानात्वन्नैकबुद्धेर्भविष्यति॥ (वन० ३०)
यथा च व्यक्तिरेकैव दृश्यमाना पुनः पुन·।
कालभेदेप्यभिन्नैव जातिर्भिन्नाश्रया सती"ति॥[1] (वन० ३३)

उद्योतकरोप्याह।[2] "केन सर्वगतत्व जातेरभ्युपगम्यते येन (मृत्पिण्डे) मृद्गवके गोत्व स्यादपि तु स्वविषये सर्वत्र वृत्तिर्वर्त्तत इति सर्वगतेत्युच्यते। क· पुनर्गोत्वस्य स्वो विषय। यत्र गो[2]त्वम्भवति। क्व पुनर्गोत्वम्वर्त्तते। यत्र गोत्व-निमित्तोनुवृत्तिप्रत्यययो भवति। क्व पुनरनुवृत्तिप्रत्यय गोत्व करोति (।) यत्तस्य साधन। क. पुर्नित्ये गोत्वे गोस्साधनार्थः। यत्तेन व्यज्यते। न हि ककुदादिमदर्थ-व्यतिरेकेण गोत्वस्य व्यक्तिरिति। न पिण्डेभ्योर्थान्तर गोत्वम्पिण्डान्तरालेष्व-ग्रहणादिति बौद्धो ब्रुवाण पिण्डान्तरालम्पर्यनुयोज्य·। किमिदम्पि[3]ण्डान्तराल। किमाकाशमाहोस्विदभाव उत द्रव्यान्तरमिति। यद्याकाश न तत्र गोत्व न ह्याकाश गौरिति प्रतीयते। एतेनाभावो द्रव्यान्तर च व्याख्यात।

"विशेषप्रत्ययानामाकस्मिकत्वाच्च। अय पिण्डप्रत्ययव्यतिरेकभाक् प्रत्यय उप-जायमानो निमित्तान्तराद् भवति। दृष्टा खलु पिण्डव्यतिरेकभाजा प्रत्ययाना निमित्तान्तरादुत्पत्तिर्यथा चर्मवस्त्रक[4]म्बलेषु नीलप्रत्ययस्तच्च निमित्तान्तर सामा-न्यमिति (।) तस्माद् व्यक्तिसर्वगत सामान्य। व्यक्तिशून्ये[5]पि देशे विद्यमान-त्वात्। न च तत्र सामान्यस्य प्रतीतिर्व्यञ्जकाया व्यक्तेरभावात्। यत्रैव च व्यक्तौ सामान्य प्रतीयते सैव सामान्याभिव्यक्तौ समर्था सामान्यप्रतिपत्त्यन्यथानुप-त्त्या गम्यते नान्ये"ति।[3]

तदाह भट्टः।

"यद्वा सर्वगतत्वेपि व्यक्तिः शक्त्यनु[5]रोधतः।
शक्तिः कार्यानुमेयादिव्यक्तिर्दर्शनहेतुका।

---

[1] Ślokavārtika. [2] Nyāyavārtika.

मात्रगतो वा, आकाशादिवत् सर्वत्र भावकल्पना स्यात्।

न याति न च तत्रासीदस्ति पश्चात्;

तत्र यदि स्वाश्रयमात्रग[3]तकाले पक्षयोर्घटादिशन्ययोः घटादेरुत्पादे कथं भिन्नदेशद्रव्यवर्त्तिनः सामान्यस्य तेषु सम्भवः? स्वतः पूर्वद्रव्यात उत्पद्यमानं द्रव्ये न याति। निष्क्रिय[4]त्वाभ्युपगमात्। यस्मात् अन्यत्रभावात् तस्मादचलतः उभयान्तरालाव्यापिनो भिन्नदेशेन द्रव्येण योगो न युक्तः। प्राक् न च स तत्रासीत,

---

तेन यत्रैव दृश्येत व्यक्ति शक्तन्तदेव तु।
तेनैव च न सर्वासु व्यक्तिष्वेतत् प्रतीयते।
भिन्नत्वेपि हि कासाचिच्छक्ति काश्चिदशक्तिका।
न च पर्यनुयोगोस्ति वस्तुशक्ते कदाचन।
वह्निर्दहति नौ(?ना)काश कोत्र पर्यनुयुज्यता"मिति।[1]

तत्र तयो **पक्षयोर्मध्ये यदि स्वाश्रयमात्रगतं** अपूर्वघटाद्युत्प[6]त्तौ घटत्वादिशून्ये प्रदेशे पश्चादुत्पन्नाद् घटादे**र्भिन्नदेशं** यद् द्रव्यन्तद्वर्त्तिन **सामान्यस्य। कथन्तेषु** पश्चादुत्पन्नेषु घटादिषु **सम्भवो** नैवेत्यभिप्राय। भवेत् सम्भवो यदि तस्मात् **पूर्व-द्रव्यात्** तत्सामान्यम्पश्चा**दुत्पद्यमानन्द्रव्यं याति**। तच्च नास्तीत्याह। **यस्मादि-**त्यादि। **तदिति** सामान्य **पूर्वद्रव्यादि**ति यत्र तत्पूर्व समवेत तस्मा**दुत्पित्सु** द्रव्य[7]-
111b मुत्पत्तुमिच्छ पूर्व घटादिक न **याति**। अमूर्त्तत्वेन **निष्क्रियत्वात्** सामान्यस्य (।) पूर्वद्रव्यादचलतोपि भिन्नदेशेन योगो भविष्यति विम्बस्यादर्श इवेति चेदाह। **न हीत्यादि। अन्यद्रव्यवृत्ते**रित्युत्पित्सुद्रव्याद् भिन्नदेशद्रव्यवृत्तेर्भावस्य सामान्याख्यस्य तत. पूर्वकादाश्रया**दचलतस्तदुभयान्तरालाव्यापिनः** पूर्वपश्चादुत्पन्नद्वयान्तराला-व्यापिन स्वाश्रयाद् **भिन्नदे[1]शेन** द्रव्येण योगो **न हि युक्त** इति **सम्बन्धः**। बिम्बस्य तु भिन्नदेशे नादर्शेन योगोस्तीति ब्रुवाण कथन्नोन्मत स्यात्। सामग्रीबलाद भ्रान्तं ज्ञान प्रतिबिम्बानुगतादर्शप्रतिभासि तत्र जायते। यथोक्त (।)

"विरुद्धपरिणामेषु वज्रादर्शतलादिषु (।)
पर्वतादिस्वभावाना भावाना नास्ति सम्भव" इति।

येपि तत्र भावान्तरोत्पत्तिमिच्छन्ति (।) तेपामपि न बिम्बेन योगोस्तीति यत्किञ्चिदेत[2]त्। उत्पित्सुद्रव्यात् **प्राक्** सामान्यात्मा **न च तत्रोत्पित्सुदेशे आसीत्**। व्यक्तिशून्ये देशे तस्य स्थानानभ्युपगमात्। अस्ति पश्चात् तत्सामान्य

पश्चा[5]दपि नास्ति। तत्राऽपि अनुत्पादात् न च कुतश्चित् आगतः, एवं अन्यत्र जाड्यात् क इमं भारं सहेत।

न चांशवत् ॥१५४॥

जहाति पूर्वं नाधारं;

उत्पित्सुदेशात् भिन्नदेशं। तयोश्च।

अहो व्यसनसन्ततिः।

भिन्नदेशयोर्वस्तुनोः सम्बन्धो द्विधा भवेद्--नानावयवात्मकं एकात्मकं वा।

व्यक्तावुत्पन्नाया। सामान्यशून्याया व्यक्तेरनभ्युपगमात्। न च तत्र देशे व्यक्त्या सहोत्पन्न नित्यत्वात्। न च व्यक्त्युत्पाद एव सामान्यस्योत्पादो भिन्नत्वात्। अभिन्नत्वे वा ततो न सामान्यविशेषभाव स्यात्। **न च कुतश्चित्** पूर्वका[3]द् व्यक्तिविशेषादा**गतं**। एतन्न **याती**ति यदुक्तन्तस्यैवोपसहारद्वारेणोपन्यास।

यावद्भि प्रकारै सामान्यस्य व्यक्त्यन्तरे सम्भवस्ते प्रकारा नेष्यन्ते तत्र च सामान्यमिष्यत इति व्याघात। स च प्राज्ञानान्दु सहत्वाद् भार। अत एवाह। **क इमम**ित्यादि। प्राज्ञो हि कथमयुक्त सहते। जडस्त्वज्ञानाद् युक्तायुक्तविचारणाक्षम सहेतापि। यदाहान्य[4]त्र **जाड्य**ादिति।

ननु चोत्पित्सुद्रव्ये सामान्यस्योत्पत्तावपि समवेतत्व प्रतिभासादेवावगन्तव्य(।) स च व्यक्तिसमवेतत्वप्रतिभासोनुत्पादेपि सामान्यस्य विद्यत एवेति किमुत्पादेन व्यक्तिसमवेतञ्च सामान्यस्य रूपमिष्यते। तेन तत्पूर्वद्रव्यसमवेतमपि ततोऽविचलदुत्पित्सुद्रव्यसमवेत च प्रतिभासत इति कथन्न **याती**त्यादि दूषणायो[5]च्यतेभीष्टत्वात्।

सत्य। यो हि सामान्यस्य प्रतिभास नेच्छति तस्येद दूषण स्यात् **प्रतिभासत** इति। यस्तु सामान्यप्रतिभासोलीक इति मन्यते तस्य कथ दूषण। अलीकत्व चोत्पित्सु द्रव्य न याति न च तत्रासीन्न चोत्पन्नमित्यादिना ग्रन्थेन सामान्याभावेपि सामान्यावभासिनो ज्ञानस्योत्पत्ते प्रतिपादितमा चा र्ये ण (।) न च प्रतिभासनादेव[6] सत्यत्व। द्विचन्द्रादेरपि सत्यत्वप्रसङ्गात्।

नापि प्रत्यक्षबाधैका बाधा। अनुमानबाधाया अपि बाधात्वात् (।) यदि तदशवत् स्यात्तदैकेनाशेन पूर्वम्भिन्नाधारे स्थितमशान्तरेणोत्पित्सु द्रव्य व्याप्नुयात्। अनशम्वा पूर्वमाधार हित्वा। द्वयमप्येतन्नास्तीत्याह। **न चे**त्यादि। **पूर्वमाधार**मिति सू त्र भाग। **उत्पित्सुदेशाद् भिन्नदेशमि**ति मिश्रके[7]ण स्पष्टयति। **तयोश्चे**ति 112a
पूर्वपश्चादुत्पन्नयोर्द्रव्ययो।

भिन्नेत्यादिना व्याचष्टे। **द्विधा भवे**दिति। नानावयवात्मतया। पूर्वाधार-

466b **अन्यो[7]न्याभ्यां तत्सम्बन्धात् आलोकरज्जुवंशवत्। न च सावयवत्वमन्तरेण भिन्नदेशिनां केषांचित् एकत्र वृत्तिर्युक्ता तस्यात्मद्वयाभावात्, एकात्म[1]नश्च तत्प्रदेशवर्त्तिसम्बन्धरूपत्वात्, अन्यथा तत्सम्बन्धायोगात्। एकस्याधेयस्य यत्र स्थानं तस्मिन्नेव काले तेनात्मना तत्र न स्थानमिति एकस्य स्थिता[2]स्थितात्मनोर्युगपद् विरोधाद् अयुक्तमेतत्।**

त्यागेन वा। प्रथमन्तावत् पक्षमाह। **नानेत्यादि**। एतच्च परप्रसिद्धचोच्यते। न त्वेकमनेकावयवात्मकमिष्यत इत्युक्त। **अन्यान्योभ्यामवयवाभ्याम्परस्परभिन्नाभ्यामशाख्या[1]न्तत्सम्बन्धात्**। ताभ्याम्भिन्नदेशाभ्या सम्बन्धात्। **आलोको** हि सावयवत्वादन्येनावयवेन घटेन सम्बध्यते। अन्येन घटादिभि। एव **रज्जुवंश**दण्डादावपि स्वसम्बन्धिभि।

न हीत्याद्यस्यैव समर्थन। अथ सावयवत्वेन सामान्यमनेकवृत्तीष्येत। तथापि कथमेकमनेकत्र वर्त्तेत। यस्मादेकदेशा सामान्यस्य वर्त्तन्त इति (।) ये च तदैकदे[2]शा सामान्यस्य प्रत्येकम्पिण्डेषु वर्त्तन्ते। ते कि सामान्यात्मका उत नेति (।) यदि सामान्यात्मका एकमेकत्र वर्त्तत इति प्राप्त। न चैकमेकत्र वर्त्तमान सामान्यमिति युक्तम्वक्तु। अथ न सामान्यात्मकास्ते। कथ सामान्यमनेकत्र वर्त्तत इत्युच्यते। एकदेशेषु च सामान्यस्य यद्येकदेशान्तरेण वृत्तिस्तदानवस्था स्यात्। **न च सावयवत्वमन्त[3]रेणैक**स्यानेकत्र **वृत्तिर्युक्ता**। अथानवयव प्रतिपिण्ड परिसमाप्त्या पिण्डवदसाधारणत्वान्न सामान्यम्भवितुमर्हति। कि कारण**न्तस्या**नवयवस्य सामान्यस्यैकेन द्रव्येण सम्बन्धो य आत्मा। तद्व्यतिरेकेण **द्वितीयात्माभावात्। एकात्मनश्च** तस्य सामान्यस्य **तत्प्रदेशवर्त्तिसम्बन्धरूपत्वात्**। उत्पित्सुघटदेशात्। पूर्वदेशवर्त्ति यद् घटद्रव्य[4]न्तत्सम्बन्धिरूपत्वात्। नास्ति भिन्नदेशेन युगपद्योग। **अन्यथे**त्युत्पित्सुदेशद्रव्यसम्बन्धरूपत्वे **तत्सम्बधायोगात्**। तेन पूर्वद्रव्येण सम्बन्धायोगात्। तस्मादेकव्यक्तिनियतात्मन सामान्यस्य नास्ति **तस्मिन्नेव काले** भिन्नदेशेन द्रव्येण सम्बन्ध.। सम्बन्धे वा पूर्वव्यक्तिनियतैकात्मकत्वेन सामान्यस्य पूर्वव्यक्तौ स्थितिस्तस्मिन्ने[5]व काले भिन्नदेशव्यक्तिसम्बन्धेनास्थितिरेतच्चविरुद्धमित्याह। **एकस्याधेय**स्येत्यादि। **तत्र स्थानमि**ति पूर्वव्यक्तौ। **तदैव** तस्मिन्नेव काले व्यक्त्यन्तरे त्वयाभ्यपगमात्। पूर्वव्यक्तित्यागमन्तरेणैकस्य चान्यत्रान्वययोगात्। तत्र पूर्वस्या व्यक्तौ। **तेनैव** पूर्वव्यक्तिनियतेनात्मना। तस्य सामान्यस्यास्थानमित्य**युक्तमे**तत्। किङ्कारण।[6] **तत्स्थिते**त्यादि। तस्यामेव व्यक्तौ **स्थितास्थितात्मनो**. स्वभावयो**रेकस्य** सामान्यस्य **युगपद् विरोधात्**।

सर्वत्र सर्वदा सर्वाकारेण स्थितात्मनेति चेत्, तत्स्वभावदर्शनाश्रयप्रत्ययः

ननु यथैकत्यागेनापरत्र वृत्तिरेवमपरापरावयवैर्बहुषु च वृत्तिर्दृष्टत्वादिति द्विविधाभ्युपगम्यते। तथा सामान्य यदा येनैव रूपेणैकत्र वृत्तन्तदैव तेनैव रूपेणान्यत्र वर्त्तते दृष्टत्वादिति सापि तृतीया वृत्ति[7] किन्नाभ्युपगम्यते। तदुक्तम्भ ट्टेन॥ 112b

"न हि द्वैविध्यमेवेति वृत्तेरस्ति नियामक।
त्रिविधापि हि दृष्टत्वात् सम्भवेद् द्विविधा यथे"ति।[1]

उ द्यो त क रो प्याह। "न गोत्वमवयवी न च समुदायस्तस्मान्न तत्र कृत्स्नैकदेशशब्दौ स्त । न चेत् तत्रैतौ शब्दौ स्त तस्माद् गोत्व कि कृत्स्नम्वर्त्तते उतैकदेशेनेति न युक्त प्रश्न । कथन्तर्हि गोत्व गोपु वर्त्तते। आश्रयाश्रयिभावेन[1]। क पुनराश्रयाश्रायिभाव (।) समवाय । तत्र वृत्तिमद् गोत्व । वत्तिः समवाय इह प्रत्ययहेतुत्वात्तेन सर्वत्र पूर्वद्रव्य उत्पित्सुद्रव्ये च समवाय एव वृत्तिरत कथमुच्यते (।) स्थितास्थितात्मनोरेकत्र विरोधादयुक्तमेतदि"ति।[2]

एतदेवाह। सर्वत्रेत्यादि। **सर्वत्र** पूर्वव्यक्तावुत्पित्सुद्रव्ये च। **सर्वदे**वोत्पत्सुद्रव्योत्पादेपि यदा वर्त्तते तदापि द्रव्य[2]स्र **जहाति**। तेन स्थितास्थितात्मनोर्नैकत्र विरोधो स्थितात्मनोऽभावादिति। तदयुक्त। न ह्येकसमवेतत्वमेवान्यव्यक्तिसमवेतत्वमन्यस्यास्तत्र प्रतिभासनप्रसङ्गात् (।) तस्मादेकसमवेतत्वान्यसमवेतत्वयो परस्पर भेद एव। तच्चाभिन्न सामान्यादेकसमवेतत्वादननुगमवदन्यत्र सामान्यस्याप्यननुगमप्रसङ्ग । यद्वैकव्य[3]क्तिकालादिसम्बन्धेन ज्ञानजननशक्तिर्यासामन्यस्य। न साऽन्यव्यक्त्यादिसम्बन्धत्वेन। तेनैकस्या व्यक्तौ सामान्यस्य ज्ञानजननशक्तिरन्यस्या ज्ञानजननशक्तिविरोधिनी। शक्तिश्च शक्तिमतोऽभिन्ना। शक्तिलक्षणत्वाच्च वस्तुन । तेन यद्वस्त्वेकन्तदेकवृत्त्येवेति व्याप्तिसिद्धि । वस्तु चैक सामान्य यदि कथमन्यत्रापि वर्त्तेत। तथाभूत[4]स्य प्रतिभासादिति चेत् (।) न। प्रतिभासो ह्यप्रतिभासस्य बाधको नावस्तुनस्तस्यापि प्रतिभासनात्। अस्य तु वस्तुप्रतिभासो बाधको न चानुगत वस्त्वस्तीत्युक्त। अत एव न प्रतिज्ञाया प्रत्यक्षबाधा। सामान्यज्ञानस्य प्रत्यक्षत्वाभासा(?)च्च।

ननु यावदस्याप्रामाण्य न तावदनुमानस्य प्रवृत्तिर्यावच्च नानुमानस्य प्रवृत्तिस्तावन्नास्य[5] प्रत्यक्षाभासतेत्यन्योन्याश्रयत्व स्यादिति चेत् (।) न। यतोनुमान प्रतिभासमानस्य वस्तुत्वसन्देहमात्रेणैव प्रवर्त्तते। नाप्यस्याप्रामाण्यनिमित्तमनुमानम्प्र-

---

[1] Ślokavārtika. [2] Nyāyavārtika.

सर्वत्र सर्वाकारः स्यात्।[3] **तथा च सति गव्यप्यश्व इति प्रत्ययः स्यात्। अश्वे स्थितात्मनोर्द्रव्यसम्बन्धात्, तत्स्वभावप्रतिपत्त्या च तथा निश्चयाद्, तस्यैकस्याकारान्तराभावात्।**

तस्माद् अनवयवं अनेकदेशे युगपन्नाधीयते।

पूर्वमाधारं हित्वाऽपि भिन्नदेशस्थानमित्यपि नाभिमतः।

अन्यत्र वर्त्तमानस्य ततोऽन्यस्थानजन्मनि ॥१५५॥

वर्त्ततेपि तु स्वसाध्यप्रतिबद्धलिङ्गनिमित्तम् (।) अतः सामान्यज्ञानस्य बाधकन्तस्मान्नास्ति परमार्थत एकम्वस्त्वेकदाऽनेकवृत्ति। वृत्तौ तु तत्स्थितास्थितात्मनोर्विरोध एव।[6] आ चार्य स्त्वभ्युपगम्यापि दोषमाह। **तत्स्वभावेत्यादि**। । सामान्यस्वभावस्य **दर्शनमाश्रयो** यस्य प्रत्ययस्य स **सर्वत्र** भिन्नजातीयेपि द्रव्ये **सर्वाकारः स्यात्। तथा च सति गामप्यश्व** इत्यादि। किङ्कारणम् (।) इत्याह। **अश्वे**
1132a **स्थित** आत्मा यस्य द्रव्यत्वस्येति विग्रहः। गमकत्वाद् व्यधिकरणस्यापि[7] बहुव्रीहि[1]। अश्वे स्थित इति वा **साधनं कृते**ति समास.। पश्चादात्मशब्देन द्विपदो बहुव्रीहिः। **तत्स्वभावप्रतिपत्त्या** चाश्वस्थितस्वभावद्रव्यत्वप्रतिपत्त्या च **तथा निश्चयाद्** गौर्द्रव्यमिति निश्चयात।

स्यादेतत् (।) नाश्वसमवेतद्रव्यत्वप्रतिपत्त्या द्रव्यमिति प्रतीति (।) किन्तर्हि (।) द्रव्यत्वमात्रप्रतिपत्त्येत्यत आह। **तस्य** चेत्यादि। **तस्य** चाश्वे द्रव्यत्वस्यै**क[1]स्यादृष्टस्याप्रतिपन्नस्याश्वसमवेतत्वव्यतिरेकेणाकारान्तर**स्याश्वास(.स)मवेतत्वलक्षणस्याभावात्। तस्मादश्वसमवेतेनैव द्रव्यत्वेन विशिष्टा गा द्रव्यमिति प्रतिपद्यमानोश्व इति प्रतीयात्। यस्य त्वश्वव्यतिरिक्तमेव द्रव्यत्वसामान्यन्तेन च विशिष्टमसौ गा प्रतिपद्यमानो नियमेनाश्व इति प्रतीयात्।

तस्मादित्युपसहार। अनवय[2]व सामान्य**मनेकदेशे**ऽनेको देशोऽस्येति तस्मिन् घटादौ **युगपन्नाधीयते**। नाधेयता प्रतिपद्यते। इयता च न **चांशवदि**त्येतद् व्याख्यातं।

जहाति पूर्वन्नाधारमित्येतत् पूर्वेत्यादिना व्याचष्टे। स चेति पूर्वाधारत्यागः सामान्यस्य **नाभिमतः**। (१५४-५५)

अन्यत्रेति पूर्वव्यक्तौ **वर्त्तमानस्य** सामान्यस्य **स्वस्मात्** पूर्वाधारदेशाद् **अचल**तस्तत. पूर्वाधार[3]देशादन्यत्र स्थाने जन्म यस्य द्रव्यस्य तस्मिन् वृत्तिरित्यतियुक्ति-

[1] Pāṇini 2.2

स्वस्मादचलतः स्थानाद्वृत्तिरित्यतियुक्तिमत् !
यत्रासौ वर्तते भावस्तेन संबध्यतेऽपि च ॥१५६॥
तद्देशिनञ्च व्याप्नोति किमप्येतन्महाद्भुतम् !

इति संग्रहश्लोकौ ।

यः सर्वत्रगतसामान्यवादी तस्यापि—

व्यक्तौ वैकत्र सा व्यक्त्याऽभेदात् सर्वत्रगा यदि ॥१५७॥
जातिर्दृश्येत सर्व्वत्र;

न जातेः कदाचिदभिव्यक्तिरिति निषिद्धमेतत्। तस्मात् अनपे[7]क्षितपरो- 467a
पस्कारा नित्यं वा दृश्येत, कदाचिद् अकृता वा; तत्स्वभावावस्थानात्, अन्य-स्वभावस्य कुतश्चिदप्यनुत्पादात् ।

मदित्युपहसति (१५६)

पूर्वव्यक्तिदेशादविचलदपि सामान्यन्ततोन्यदेशन्द्रव्य व्याप्नोतीति चेदाह। **यत्रेत्यादि**। यत्र देशेऽसौ पश्चात्कालभावी भावो वर्त्तते। तेन देशेन सामान्य न सम्बध्यते स्वव्यक्तिसर्वगतत्वाभ्युपगमात्। यत्र देशे सामान्य न वर्त्तते तद्देशिन च पश्चात् काल[4]भाविनम्भाव व्याप्नोतीति न्यायातिक्रान्तत्वात् किमप्येतन्महाद्भुत-मिति प्रकारान्तरेणोपहसति। न हि यो यत्र देशे न वर्त्तते स तद्देश व्याप्नोतीति न्यायानुसारिणा शक्यमवसातु (१५७)

सर्वगतत्वकल्पनामपि निराचिकीर्षन्नाह । **यस्येत्यादि** । तस्यापि सर्वगत-सामान्यवादिन सर्वत्रगा यदि जातिस्तदैकत्र शावलेयादौ या तस्याव्यक्तिरभि-व्यक्तिस्त[5]या करणभूतया। सा जातिस्सर्वत्र व्यक्तिशून्येपि देशे। विजातीय-व्यक्तिभेदे च **व्यक्तैव** प्रकाशितै**वाभेदादेक**त्वात् सर्वत्र व्यक्तिशून्येपि देशे दृश्येत।

एतदुक्तम्भवति। यद्यपि व्यक्तिशून्ये प्रदेशे विजातीयव्यक्तौ च स्वव्यक्तेर्व्य-ञ्जिकाया अभावस्तथापि स्वव्यक्त्यभिव्यक्तेनैव रूपेण तत्रावस्थानाज्जातेरुपलम्भ स्यान्नो चेत् स्वभावनानात्व[6] प्राप्नोतीत्येकरूपा चेष्यत इति भाव । **न जातेर्नित्याया** अनाधेयातिशयत्वेन **कदाचिदभिव्यक्तिरिति निषिद्धमेतत्**।" वृत्तिराधेयता व्यक्ति-रिति तस्मिन्न युज्यत" (१।१४६) इत्यत्रान्तरे। यत एवन्**तस्मात** सा जाति**र्नित्य-मनपेक्षितपरोपस्कारा**नाधेयातिशया। एवम्भूता यदि स्वभावेन स्वविज्ञानजनन-योग्या। तदा नित्यन्**दृश्येत**[7] व्यक्ते प्राक् पश्चाच्च। अथ न योग्या तदा कदाचिद् 113b
दश्येत। कि कारण (।) **तस्मिन** विज्ञानजननयोग्य**स्वभावे** तद्विपरीते **चावस्थानात्**। सर्वकालमेकरूपत्वादित्यर्थः। असमर्था व्यक्त्यसन्निधाने तत्सन्निधाने तु समर्था भवति।

अभ्युपगम्यापि व्यापिन्य[1]पि एकत्र व्यक्ता भेदाभावात् व्यक्तैव सर्वत्रेति व्यक्तिशन्येष्वपि देशेषु न दृश्येत ।

न च सा जात्यपेक्षिणी ।
व्यञ्जकाप्रतिपत्तौ[2] हि न व्यंग्ये संप्रतीयते ॥१५८॥
विपर्ययः पुनः कस्मादिष्टः सामान्यतद्वतोः ।

यो हि स्वाश्रयेन्द्रियसंयोगापेक्षं सामान्यं आश्रयशून्येषु प्रदेशेषु न दृश्यत ति प्रति[3]क्ति, तस्या[3]पि स्वाश्रयेन्द्रियसंयोग उपकारक इति ततस्तद्दर्शी यथास्थितां

ततो न नित्यन्दर्शनमदर्शनम्वा जातेरित्यत आह । **स्वभावे** त्यादि । नित्यत्वेनानाधेयातिशयत्वादिति भाव. ॥ (१५७-५८)

यदि जातेर्नास्ति व्यक्ति[1]स्तत्कि व्यक्त्यैवैकत्र सा व्यक्तेत्याद्युच्यत इत्यत आह । **अभ्युपगम्या**पीत्यादि । **व्यापि**न्यपि जाति । **एकत्रा**श्रये व्यक्ता **भेदाभावा**देकत्वाज्जाते**र्व्यक्तैव** प्रकाशितैव **सर्वत्र व्यक्तिशून्ये** देशे । विजातीये च व्यक्तिभेदे । **व्यक्तिशून्येष्वपीत्यपि** शब्दाद् विजातीयेपि व्यक्तिभेदे । अपि च **न च सा** जाति**र्व्यक्त्यपेक्षिणी** । व्यञ्जिका व्यक्तिर्नापेक्ष्येत । व्यक्तेर्जातिव्यञ्जकत्वा[2]भावादिति भाव. । यदि हि व्यञ्जिका व्यक्तिमपेक्षेत । तदा **व्यञ्जकाप्रतिपत्तौ न व्यङग्यस्य प्रतीति** स्यान्न हि प्रदीपाद्यप्रतीतौ घटादे प्रतीतिर्भवति । तथेहापि व्यक्त्यप्रतीतौ न जातिप्रतीति स्यात् । **सामान्यतद्वतो**स्तु व्यङग्यव्यञ्जकयो**र्विपर्ययः पुनः कस्मादिष्टः** । तथा हि नागृहीतविशेषणाविशेष्ये बुद्धिर्वर्त्तत इति नियमात् ।[3] प्रागेव सामान्यग्रहणमिष्टन्तद्द्वारेण तु व्यक्ते । ततो व्यञ्जिकाया व्यक्तेर्ग्रहणमन्तरेणापि व्यङग्याभिमतस्य सामान्यस्य प्रतिपत्तिरिष्टेति विपर्यय ।

यो हीत्यादिना व्याचष्टे । **स्वाश्रय**यो यत्र समवेत सामान्य । सामान्यग्राहक**मिन्द्रियं** च तयो**स्संयोग**स्तदपेक्षा प्रतीतिर्यस्य **सामान्यस्य** तत्तथोक्त । **आश्रयशून्या**: प्रदेशा विजातीय[4]व्यक्त्यध्यासिता व्यक्तिशून्याश्च । तेषु **न दृश्यते** । यथोक्तसयोगाभावात् । तस्याप्येव वादिन । क्वचिद् व्यक्तिर्दर्शने सत्यस्त्येवा**श्रयेन्द्रियसंयोगो** जाते सर्वत्र स्थिताया **उपकार**क इति । **तत** आश्रयेन्द्रियसयोगाद्धेतो**स्तद्दर्शी** क्वचिद् व्यक्तिभेदे जातिदर्शी **यथास्थितां** सर्वदेशव्यापिनीञ्जातिम्**पश्येत्** । यत्रैव व्यञ्जिका व्यक्तिस्तत्रैव जाते [5] स्वरूप दृश्य नान्यत्रेति चेदाह । **न ही**त्यादि । **तस्यामिति** जातौ । क्वचिद् व्यक्तौ **दृश्यमानाया**न्तदीयामिति सामान्यसम्बन्धि । एकस्य दृष्टादृष्टविरोधात् । एवन्तावद् व्यक्तेर्व्यञ्जिकात्वमभ्युपगम्य च शब्दोपात्तोर्थो व्याख्यात: ।

पश्येत्। न हि तस्यां दृश्यमानायां अदृष्टा सा एव युक्ता, सामान्यस्य व्यक्ति[4]-व्यंङ्ग्यत्वात्। व्यञ्जकविप्रयुक्तेषु देशेषु न दृष्टेत्यपि निराकृत, तत्र तथाभूतस्य व्यंग्यव्यञ्जकभावस्याभावात्। स्वयं प्रतीत्य परप्रत्यायनहेतुर्हि प्रदीपादिप्रकाशकः स्वरूपशून्ये देशे व्यंग्यो न स्वयं दर्शकः, नैवं व्यक्तिरपि सामान्यस्य, विपर्ययात्।

कथं हि सा सामान्य व्यञ्जिका[6] स्यात्, तत्प्रतिपत्तिद्वारेण दृश्या च स्यात्।

अधुना न सा व्यक्त्यपेक्षिणीत्यादि व्याख्यातुमाह। **व्यक्तिव्यङ्ग्यत्वादित्यादि**। तस्य च मिथ्यात्वमनन्तरोक्तेनैव[6] प्रतिपादित। न ह्येकस्य दृष्टादृष्टमस्त्यतोऽपूर्वपक्ष एवाय केवलन्दोषान्तराभिधानार्थ गजनिमीलन कृत्वोपन्यस्त। तथाभूतस्येति न्याय्यस्य। **तत्रेति** जातितद्वति। न्याय्यस्य **व्यङ्ग्यव्यञ्जकभावस्याभावात्**। किङ्कारण। **स्वेत्यादि**। हि यस्मात्। **स्वरूपशून्ये** देशे प्रदीपादिरहिते देशे। स्वव्यङ्ग्य घटादिक। **नैवं** यथो[7]क्तेन न्यायेन **व्यक्तिर्व्यञ्जिका सामान्यस्य**। 114a
किङ्कारणम् (।) विपर्ययात्। यस्मादगृहीत्वापि व्यक्ति सामान्यमादौ गृह्यत इतीष्यते परेण। सामान्यग्रहणद्वारेणैव व्यक्तेर्ग्रहणाभ्युपगमादतश्च व्यञ्जकाप्रतिपत्त्यापि व्यङ्ग्यस्य ग्रहणात्। व्यञ्जकधर्मातिक्रमो व्यक्ते।

एतदेवाह। **कथं** हीत्यादि। मेनि व्यक्ति सामान्यस्य व्यञ्जिका च स्यादिति **स[1]म्बन्धः**। **तत्प्रतिपत्तिद्वारेणेति** सामान्यप्रतिपत्तिद्वारेण। सा व्यक्तिर्दृश्या स्यादिति विरुद्धमेतत्। **एव**मिति सामान्यदर्शनबलेन। व्यक्तेर्दर्शनेभ्युपगम्यमाने। **व्यङ्ग्या** सा व्यक्ति **प्रसज्यते** सामान्यञ्चेत्यध्याहार। **प्रदीपेन घटवदिति**। तृतीयेति योगविभागात् समास। सुप्सुपेति वा समास। यथा प्रदीपेन घटो व्यङ्ग्यस्तद्वत्सा[2]मान्येन व्यक्तिर्व्यङ्ग्या प्राप्तेर्थ। तत्**प्रतिपत्तिमन्तरेण** सामान्यप्रतिपत्तिम्विना व्यक्ते**रदृश्यरूपत्वात्**। **अन्ये त्वाहुः**। व्यङ्ग्या च सैव प्रसज्यत इत्यत्र चशब्देन सामान्यव्यञ्जकमित्येतदुपात्त। तत प्रदीपघटाभ्या तुल्यमिति द्वन्द्वादेव वतिर्द्रष्टव्य। पूर्वनिपातलक्षणस्य व्यभिचारित्वाद् घटशब्दस्यापूर्वनिपात। प्रदीपव[3]त् सामान्य व्यञ्जक। घटवच्च व्यक्तिर्व्यङ्ग्या। **प्रसज्यत** इति वाक्यार्थ इति। अनेनेति **सामान्यवादिना**। सामान्यम्विना **किमसम्भवत्कार्यमभिसमीक्ष्य**। एवमित्युक्तविधिना। **बह्वायासः**। अशक्यसाधनतया बहुदु खहेतु। (१५८-५९)

परस्परेत्यादि पर। **भेदाद्विलक्षणत्वाद्धेतोर्व्यतिरेकिणीष्वनन्वयिनीषु**। **अन्वयिन** एकाकारस्य **प्रत्ययस्य** प्र[4]त्ययग्रहणमुपलक्षणमेव शब्दस्य। सामान्यमन्तरेणा**योगात्**। सामान्यवाद आश्रित इति सम्बन्ध।

कथमित्याचार्यः। ये **पाचकादि**शब्दा न क्रियानिमित्तानिच्छन्ति तान् प्रत्ये-

एवं प्रदीपेन घटवत् व्यङ्ग्या प्रसज्यते। केनचित् प्रकारेण एवं प्रतीतिमन्त्ररेणादृश्य-
467b रूपत्वात्। अन्य[7]च्च, अनेन किमयुक्तमभिसमीक्ष्य एवं वह्वायास आश्रितः सामान्य-
वादिना परस्पर-भेदात्। व्यक्तिव्यतिरेकिणीषु अन्वयिनः प्रत्ययस्यायोगात्। कथं—

पाचकादिष्वभिन्नेन विना[1]प्यर्थेन वाचकः ॥१५९॥

नहि पाचकवाचकादीनामनन्वयिनामपि पचनपाचकेति शब्दप्रत्ययानुवृत्ति-
रस्ति। तेषु अभिन्नमन्यदेकं नास्तीति[2] यैर्भेदैर्हि तथा प्रतीयेरन्। कर्मत्वादिति
चेत्, अथ प्रत्ययादेव सोऽपि प्रत्ययः वरम्। अन्येन वा कर्मणा किं कृतः। भेदो हि

तदुक्त। अभिन्नेन सामान्याख्येनार्थेन विना पाचकादिषु कथमेक शब्दो वाचकः। वाचकग्रहणेन प्रत्ययोन्वयी गृहीत एव तेन विना शब्दस्याप्रवृत्ते[5]। अत एव वृ त्तौ **शब्दप्रत्ययानुवृत्तिरस्ती**त्याह।

उ द्यो त क रे णापि गवादिष्वनुवृत्तिप्रत्यय पिण्डादिव्यतिरिक्तनिमित्ताद् भवति विशेषप्रत्ययानामनाकस्मिकत्वान्नीलादिप्रत्ययवत्। यत्तन्निमित्तन्तत्सामान्य-मिति सामान्यसिद्धौ प्रमाणे कृते स्वयमेवाशकितम् (।)

अथ मन्यसे यथा पाचकादिशब्दा अनुवृत्ताश्च भवन्ति न च[6] पाचकत्वन्नाम सामान्यमस्ति (।) यदि स्यात्। भावोत्पत्तिकाल एवाभिव्यक्त स्यात् तथा गवा-दिष्वनुवृत्तिप्रत्यया इति। न (।) हेत्वर्थापरिज्ञानात्। विशेषप्रत्ययानामना-कस्मिकत्वादित्यस्य हेतो पिण्डप्रत्ययव्यतिरिक्तस्य प्रत्ययस्य निमित्तान्तरादुत्पाद
114b इत्ययमर्थ·। न पुन सर्वानुवृत्तिप्रत्यय सामान्यादेव भवतीति। एव[7]ञ्च सति पचनक्रियाया यत्प्रधान साधनन्तत्पाचकशब्देनोच्यते। तच्च प्राधान्य पाचकान्त-रेष्वप्यस्तीति न दोष इति वदता पाचकत्वादिसामान्यम्विना पाचकादिशब्दाना वृत्तिरिष्टैवो द्यो त क रे णेत्यनेनाभिप्रायेणा चा र्ये णाप्युक्त **कथ**मित्यादि।

न च पचनक्रियाया प्राधान्यनिमित्ताया पाचकादिशब्दप्रवृत्तिर्युक्ता। त[1]न्निमित्तत्वे हि प्रधान प्रधानमित्यनुगामी शब्द. स्यान्न पाचक इति। अत एवाह (।) **न हीत्यादि**। **तेष्वि**ति पाचकादिषु। **अन्यदिति** द्रव्याद् व्यतिरिक्त। एव सर्वशक्तिष्व**भिन्नं येनै**केन ते पाचकादयो भिन्नास्सन्तोपि **तथे**त्यभेदेन **प्रतीयेरन्** ज्ञानेन। उपलक्षणमेतत् तथाभिधीयेरन्। पाचकेष्वधिश्रयणादिलक्षण। पाठकेष्व-ध्ययनात्मक[2]मेवमन्येष्वपि यथायोग्य। **कर्मै**कप्रत्ययादिनिमित्तमस्तीति **चेत्**। **स** इत्यन्वयी। प्रत्ययग्रहणमुपलक्षणमेव शब्दोपि। **अन्येन** वेति **कर्मणो** हेतुना प्रयत्नादिना। **भिन्न**मित्यादिनैतदेव समर्थयते। **तदि**ति बाह्योपन्यासे। तत्कर्मेति

अभिन्नप्रत्ययस्य हेतुर्न स्यादथ एकसामान्य[3]वांछा सा भिन्नकर्मणोऽपि अभिन्नं प्रत्ययं जनयेत् चेत्--व्यक्तिभिः कोऽपराधः कृतः, येन तास्तथा नेष्टाः। यदि तासामेकरूपत्वात, अतदाकारविशेषव[4]तीति व्यतिरेकप्रतीतिर्न स्यादित्यत्र यथा-व्यतिरेक विशेषप्रत्यया अपि यथासंकेतं अर्थान्तरविवेकादित्युक्तम। ततो व्यक्ति-वत्--

---

वा सम्बन्धनीय। प्रतिपाचक कर्मणो भेदात्। **येनापराधेन ता** व्यक्तयस्तथेत्यभिन्न-प्रत्यय[3] हेतुत्वेन।

सत्य (।) न कश्चिदपराध किन्तु तासा व्यक्तीना**मेकरूपत्वात्**। तथा हि द्रव्यमेकरूपमनशत्वात्। एतदेव चेद**भिन्नप्रत्यय**यनिबन्धन न तु ततो व्यतिरिक्त धर्मान्तरन्तदा पाचकस्य पाचकत्वमिति **व्यतिरेकप्रतीतिर्न स्यात**। न हि तस्यैव ततो व्यतिरेको युक्त । तस्याव्यक्तेराकारस्त**दाकार**स्तस्मादन्योऽभेदाकारस्तस्य **वि[4]शेषः** सोस्ति यस्या **सा अतदाकारविशेषवती**। द्रव्याकारादन्याकारेत्यर्थ ।

एतदुक्तम्भवति । द्रव्येभ्य एव प्रत्ययो द्रव्यमित्येवमाकार । ततोन्येनैवा-कारेण पाचकप्रत्यय[प्रतिषेधप्रत्यय]स्स यदि द्रव्यनिमित्तमेव स्यात् तदा द्रव्यमात्र-प्रत्ययाविशिष्ट· स्यात्। अथ किमर्थमतदाकारविशेषवतीत्युभयमुक्तमतदाकारेत्येव वक्तव्य।[5] विशेषवतीत्येव वा। उच्यतेऽभेदाकारेत्युक्ते द्रव्यस्याभाव इति प्रति-षेधप्रत्ययोप्यतदाकार इति शक्येत व्यपदेष्टु न चासौ वस्त्वन्तरनिबन्धन परेणेष्ट । विशेषप्रत्ययानामेव धर्मान्तरनिबन्धनत्वात्। विशेषग्रहणे च केवले क्रियमाणे। चैत्रप्रत्ययो मैत्रापेक्षया भवति विशेषवान्। न त्वतदाकार । चैत्राद्यभिधा[6]नेन द्रव्यस्यैव प्रतिपादनात्। उभयोपादानात्त्वयमर्थो भवत्यद्रव्याकारश्चासौ प्रत्ययो वस्तुस्पर्शाद् विशेषवाश्चेति। तस्मात् तत्र द्रव्यव्यतिरिक्ते न निमित्तान्तरेण भाव्यमिति।

उक्तमित्या चार्य । यथा व्यतिरेको गोर्गोत्व पाचकस्य पाचकत्वमित्यादिको यथा च विशेषप्रत्यया अनन्तरोक्तास्तथोक्तमिति सम्बन्ध ।[7] कथमुक्तमित्याह। 115a
यथास्वमित्यादि। अर्थान्तरविवेकोर्थान्तरव्यवच्छेद । यथास्वमिति यस्य शब्दस्य **यथासंकेतं** यो व्यवच्छेदस्तस्मादित्यर्थ । तथा हि पाचकशब्दोऽपाचकव्यवच्छिन्नम-प्रतिक्षिप्तभेदान्तर प्रतिपादयन् धर्मिवचन· (।) पाचकत्वशब्दस्तु तमेव व्यवच्छिन्न प्रतिक्षिप्तभेदान्तरमाहेति धर्मवचन.। ततो धर्मधर्मिभेदकल्पनया पाचकस्य[1] पाच-कत्वमिति व्यतिरेकविभक्ति. प्रयुज्यते। एव द्रव्यशब्दस्याप्यद्रव्यव्यवच्छिन्ने स्वभावे संकेतितत्वात् तदनुसारेणाद्रव्याव्यवच्छेदानुसारेणाद्रव्यव्यवच्छेदानुकारिणी बुद्धि-

भेदान्न हेतुः कर्मास्य;

पाचकाद्यभेदप्रत्ययस्य। यदि तेषां कर्मजात्यभेदाद्धेतुः,

न जातिः कर्म्मसंश्रयात्।

गोत्वमिव गमनादिः अर्थान्तरसम्बन्धि[6]जातिर्हि अर्थान्तरप्रत्ययहेतुश्चेत् **पाचककर्मस्वपि** कर्मजातिः, तत्कर्मापि पाचकशब्देन न वाच्यम्। अथ किमिति
4683 तत्कर्माश्रयस्य द्रव्यम्। कर्मजातिरपि सा[7]—

श्रुत्यन्तरनिमित्तत्वात्;

रुत्पद्यते। पाचकशब्दात् त्वपाचकव्यवच्छिन्नानुकारिण्येव बुद्धिरतो यथाव्यवच्छेद मकेतानुसारेण विशेषवती बुद्धिरेकत्राप्यविरुद्धा। एतच्च भेदान्तरप्रतिक्षेपाप्रतिक्षेपेत्यादिषु प्रतिपादित[2]।

तस्मादित्यादिनोपसहार। यथा **व्यक्तीना** भेदस्तद्वत् कर्मणापि भेदाद्धेतोरस्य **पाचकाद्यभेदप्रत्ययस्य** न हेतु कर्मेति सम्बन्ध। **तेषां** पाचकाना यानि **कर्माणि** पाकाख्यानि तेषु कर्मसु या पाचकत्व**जातिः** समवेता सैवा**भेदाद्धेतुः** पाचकाभेदप्रत्ययस्य। **नेत्या**दिना प्रतिषेधति। न जातिर्हेतुरिति प्रकृत। किङ्कारण (।) **कर्मसंश्रयात्**। कर्मणि सम[3]वेतत्वात्। द्रव्या**दर्थान्तर** कर्म तत्**सम्बन्धिनी**। अर्थान्तर इति द्रव्ये। **गोत्वमिवेति** निदर्शन। न हि गोत्व शाबलेयादिसम्बन्धि। कर्क्कादिष्वश्वभेदेषु गोप्रत्ययहेतु। **पाचककर्मसु** पाकाख्येषु कर्मजातिस्समवेता। न च तानि कर्माणीति पाकाख्यानि। शब्दग्रहणमुपलक्षण। तथा पाचकप्रत्ययेन परिच्छिद्यन्ते। तस्य पाकाख्यस्य कर्मण आश्रयो द्रव्य[4] पाचकशब्देनोच्यते। न च तत्र द्रव्ये **कर्मजातिस्स**मवेता।

एवन्तावदर्थान्तरसम्बन्धित्व कर्मजातेराश्रित्य द्रव्यविषय पाचकाभिधानप्रत्यय प्रत्ययनिमित्तत्वमुक्तम् (।) (१५९-६०)

अधुना प्रकारान्तरेणाह। **तस्ये**त्यादि। **पाचकश्च**तेरन्या श्रुति **श्रुत्यन्तरं**। श्रुतिग्रहणमुपलक्षणमेव ज्ञानान्तरनिमित्तत्वात्। श्रुत्यन्तरमेवाह। **पाक** इत्यादि। **तत** इति कर्मजाते कर्मविष[5]यस्याभिधानस्य प्रत्ययस्य च हेतुत्वात् कर्मजातेरित्यभिप्राय।

स्यान्मत (।) न कर्मजाति पाचकप्रत्यय जनयति किन्तु कर्मजातिसमाश्रयात् कर्मेवेत्यत आह। **तस्ये**त्यादि। तस्येति पाचकाद्यभेदप्रत्ययस्य। **कर्मनिमित्तं** यस्येति विग्रह। प्रोक्त व्यक्तिवद् भेदान्न **हेतुः कर्मास्ये**त्यादि।

ननूक्त जातिसमाश्रयाद् भिन्नमपि कर्माभिन्नप्रत्ययहेतुरिति।

पाकः पाक इति ततः स्यात् न च पाचक इति। तस्य सा कर्मनिमित्तता प्रोक्ता। अन्यच्च—

स्थित्यभावाच्च कर्मणः ॥१६०॥

न ह्यनित्यं कर्म सर्वत्र। तस्य प्रत्ययस्य कर्मनिमित्तत्वे निरुद्धे कर्मणि पाचक इति नोच्येत, पचत एव कर्मभावात्। तत एव—

असंबन्धान्न सामान्यं; नायुक्तं शब्दकारणात्।
अतिप्रसंगात्;

असंबंधात न सामान्यं शब्दहेतुताऽतिप्रसगात्[2] नासम्बद्धम्। तत एव कर्मण सामान्यं न कर्माविशेषात्। एकं कर्म तत्सामान्यं हि न कर्म कर्त्रभावात् (आकृत्यभावात्)। आश्रयसम्बन्धोऽपि न तत्र। तथा हि असम्बन्धात् न शब्दज्ञानकारणम्।

उक्तमिदमयुक्तन्तूक्त। जातिसम्बन्धेपि कर्मणस्तथैव भिन्नत्वात्। **किञ्चे**-त्यादिनोपचयहेतुमाह। **तस्य** पाचकाद्यभेदप्रत्ययस्य कर्मनिमित्तत्वेऽभ्युपगम्यमाने। **निरुद्धे कर्मणि पुरुष पाचक इति नोच्येत**। उच्यते च योग्यतामात्रेण (।) ततो न वस्तुभूतक्रियानिमित्तोय व्यपदेश। अतीतस्यापि कर्मणोस्तित्ववाददोष इति चेदाह **पचत** एवेत्यादि[7] (।) यद्यतीतस्य सत्त्व स्याद् वर्त्तमानवदुपलभ्येतोपलब्धिलक्षण- 115
प्राप्त च कर्मेष्यते।

स्यान्मत (।) कर्मजाति कर्मणि समवेता कर्मापि द्रव्ये समवेतन्तत सम्बद्ध-सम्बन्धात् कर्मजातिर्द्रव्यविषयस्य पाचकप्रत्ययस्य हेतुरिति चेदाह। **तत एवेत्यादि**। **तत एवेति** कर्मणो विनष्टत्वादेव न सामान्यस्य कर्मणा सम्बन्ध साक्षात्। नापि कर्मद्वारेण पारम्पर्येण द्रव्यसम्बन्धोस्या[1]**म्बन्धात्** कारणान्न **सामान्यं** पाचकाद्यभिधानप्रत्ययस्य हेतु। असम्बद्धमपि हेतुरिति चेदाह। **नेत्यादि**। अयुक्तमित्यसम्बद्ध। शब्दग्रहणमुपलक्षणमसम्बद्ध सामान्य न ज्ञानशब्दकारणमित्यर्थ। कुत (।) **अतिप्रसङ्गात्**। गोत्वमप्यश्वज्ञानस्य हेतु स्यात्। (१६०-६१)

विनष्टे हीत्यादिना व्याचष्टे। **तत् सामान्यमिति** कर्मसामान्यन्न कर्मणि समवेतन्तस्यासत्त्वात्। कर्माभावादेव कर्त्तरि पा[2]चके पारम्पर्येणापि समवेतम् (।) अत. सम्बद्धसम्बन्धोप्यस्य सामान्यस्य द्रव्येण सह नास्ति। **अन्यथेत्यसम्बद्धस्यापि** ज्ञानादिहेतुत्वे। स्थित्यभावाच्च कर्मण इत्यादि यदुक्त (।) तम(?द)तीतेत्यादिना पक्षान्तरमाशकते। **अतीतं** यद्विनष्ट। **अनागतं** यद् भविष्यति कर्म। **तयोरिति** शब्दज्ञानयोः (।) कर्माप्यतीतानागतमसत्। **ज्ञानाभिधानयोर्निमित्तमिति-**

अन्यथाऽतिप्रसङ्गः स्यात्। तदतीतानागतयोर्निमित्तीकृत्य तयोः प्रवृत्तिरिति चेत्—

कर्माऽपि नासज्ज्ञानाभिधानयोः ॥१६१॥

न निमित्तम्। तद्, (ते)

अनैमित्तिकतापत्तेः;

असत् शक्तिविकलं कथ[4] निमित्तं स्यात्। तस्यैव वस्तुनः क्रियाकरणलक्षणत्वात् ततः अतीतानागतकर्मनिरोधो नानुपलब्धिनिमित्तम्। व्यक्त्यादिकमन्यत्तु नेष्ट[5]त्वात्, ते अनिमित्ते स्याताम्। तथा च न जातिसिद्धिः, तस्या ज्ञानाभिधानयोर्निमित्तत्वेनेष्टत्वात्। यदि शक्तिः पाचकादिशब्दनिमित्तं, न तु कर्मसामान्ये[6],

न च शक्तिरनन्वयात्।

सम्बन्ध। कि कारण[3] (।) **तयो**रित्यादि। तयोर्ज्ञानाभिधानयो·।

असतीत्यादिना व्याचष्टे। उपाख्यायते प्रकाश्यते वस्त्वनयेत्युपाख्यार्थक्रियाशक्ति। सा निर्गता यस्मादसतस्तत्तथोक्त। **असद्** यस्मादर्थक्रिया**शक्तिविकलं**। तदेवभूत **कथं** शब्दज्ञानयो**र्निमित्त** स्यादित्यर्थ।

अथासतोपि हेतुत्वमिष्यते तदा तस्य वस्तुत्वमेव स्यान्नासत्त्व। किङ्कारणमित्याह। **कार्ये**त्यादि। ल[4]क्षणशब्द स्वभाववचन। **तदिति** तस्मात्। अतीत प्रच्युतरूप। अनागतमसप्राप्तरूप। कर्मण सकाशादन्य**च्च व्यक्त्या**दिक ज्ञानाभिधानयोर्निमित्तत्वेन **नेष्टं** सामान्यवादिना।

"व्यक्ति कर्माश्रयो द्रव्य।"

आदिशब्दात् सकेतवासना तत्परिपाकयोर्ग्रहण। **ते** इति शब्दज्ञाने। **तथा चेत्यन्वयि**नो पाचकादिशब्दज्ञानयोरनिमित्तत्वे सति **न जातिसिद्धिः**।[5] चशब्दात् नित्य सत्त्वमसत्त्वम्वा शब्दज्ञानयो स्यात्। कस्मान्न जातिसिद्धिरित्याह। **तस्या** इत्यादि। **तस्या जाते**रभिन्नस्य **ज्ञानस्याभिधानस्य** च **निमित्तत्वेनेष्टत्वात्**। यथा च पाचकादिविषये। ते अनिमित्ते प्रवर्त्तेते तथा गवादावपीति केन निबन्धनेन जाति· कल्प्येत।

शक्तिरित्यादिना पक्षान्तरमाशकते। कर्माश्रयस्य द्रव्यस्य शक्ति। शब्दग्रहणमुपलक्षण[6] (।) पाचकादि ज्ञानस्यापि शक्तिर्निमित्त। **नेत्यादिना** प्रतिषेधति। न पाचकादिशक्ति पाचकादिशब्दनिमित्त (।) किङ्कारण (।) शक्तेर्द्रव्याव्यतिरेकेण द्रव्यवदेवानन्वयादनन्वयिनश्चार्थस्यान्वयिज्ञानाभिधानं प्रति निमित्तत्वानभ्युपगमात्। अभ्युपगमे वा जातिकल्पनाया निर्निबन्धनत्वप्रसङ्गात्।

न ह्यन्यैव काचित् पाकादिशक्तिः, तस्याः पाकाद्यर्थक्रियासपयोगेन द्रव्यस्यानुपयोगि[7]त्वप्रसङ्गात्। यदि तस्यां तदुपयोगः, किमिति शक्तिकृत्यम्। शक्तावुपयोगाय 468b
शक्त्यन्तरस्य व्यतिरेकिणोऽभ्युपगमेऽतिप्रसङ्गात् द्रव्यमेवोपयुज्यत इति वाच्यम्[1]।

तस्मात् उपयोगे शक्तौ अर्थक्रियायामेवोपयुज्यत इति किन्नेष्यते, अन्तराले किमनर्थिकया शक्त्येति तत्कार्यद्रव्यमेव तदन्वयात्, तत्रान्वयी शब्दो न स्यात्।

सामान्यं पाचकत्वादि यदि प्रागेव तद् भवत ॥१६२॥
व्यक्तं सत्तादिवन्नो चेन्न पश्चादविशेषतः।

भिन्नैव शक्तिरिति चेदाह। **न ह्रीत्यादि**। न हि द्रव्याद[7]न्यैव शक्तिर्यदि स्यात्तदा 116a
तस्या एकशक्ते **पाकाद्यर्थक्रियासपयोगेन** कारणेन **द्रव्यस्य** शक्त्याधार**स्यानुपयोगित्वप्रसङ्गात्**। तस्या पाकादिनिर्वर्त्तिकाया शक्तौ तस्य द्रव्यस्योपयोग। एवमपि पारम्पर्येण पाकादौ द्रव्यमुपयुक्त स्यादिति भाव।

किमित्यादि सिद्धान्त वादी। अर्थान्तरभूतया **शक्त्या** न किञ्चित् प्रयोजन। तथा हि पाकादिनिर्वर्त्तिकाया प्रथमाया **शक्तौ** द्रव्य[1] यया शक्त्योपयुज्येत। सापि शक्तिर्यदि व्यतिरिक्ताऽभ्युपगम्येत तदा पाकादिनिर्वर्त्तिकाया **शक्तौ द्रव्यस्योपयोगाय शक्त्यन्तरस्य** द्रव्याद् **व्यतिरेकिणोऽभ्युपगमेऽतिप्रसङ्गात्**। तस्यामपि शक्तावुपयोगायापरा व्यतिरिक्ता शक्ति कल्पनीया तत्राप्यपरेत्यनवस्था स्यादित्यर्थ। तस्मादन्तरेण व्यतिरिक्त शक्ति **द्रव्यमेव** प्रथमाया पाकादिनिर्वर्त्तिकाया श[2]क्ता**वुपयुज्यत इति वाच्यं**। एव च द्रव्यस्योपयोगे **शक्ता**विष्यमाणे। तद्द्रव्यमर्थक्रियायां पाकादिलक्षणाया**मेवोपयुज्यत इति किन्नेष्यते**। द्रव्यस्यार्थक्रियायाश्चान्तराले **किमनर्थिकया शक्त्या** कल्पितया।

यत एवन्त**स्मात्** पाकाद्यर्थक्रियाशक्तिरित्यनेन द्रव्यमेवोच्यते। किम्भूतन्तत्कार्यं तत्पाकादि कार्यं यस्य। तच्च द्रव्य व्यक्त्यन्तर नान्वेतीति कृत्वा। ततो[3] द्रव्यात् पाचक पाचक इत्य**न्वयी शब्दो न स्या**ज्ज्ञानञ्च। शब्दग्रहण तूपलक्षण। (१६१-६२॥)

पाचकादिषु द्रव्येषु पाचकत्वादिसामान्यमस्ति तदन्वयि शब्दज्ञाननिबन्धनमिति चेदाह। **सामान्यमित्यादि**। **सामान्यं पाचकत्वादि** यदीष्यते। तदा पाकादिनिर्वर्त्तनशक्त्यवस्थाया. **प्रागेव** द्रव्यस्योत्पत्तिसमकाल एव द्रव्यसमवेत**न्तद् भवेदित्यर्थ**। **तथा च** तदहर्जातो[4]पि बाल पाचकादिज्ञानाभिधानविषय स्यादिति भाव। **नो चेत्** प्रागेव भवेत् तदा **पश्चादपि न** भवेत्। तस्य द्रव्यस्याविशेषात्। अस्त्येव **सर्वकाल**

अथापि पाचकत्वमिति सामान्यस्य कादाचित्कत्वे सत्यर्थे तत्समवायस्य अकादाचित्कत्वात्। तत्प्रथमत्वे सत्तादिवद् व्यज्येत। यावन्ति अर्थे सामान्यधर्माणि तानि अस्योत्पादेन सह समवयन्ती[4]ति ग्रन्थः।

तद्व्यतिक्रमेऽविशेषात् पश्चादपि तत्समवायो न स्यात्। तत्सम्बन्धिस्वभाववैगुण्यात्, स तस्य प्रागभावे तत्रैव च स्वभावे[5] स्थितस्य स्यादिति दुरन्वयमेतत्।

द्रव्ये पाचकत्वादि। किन्तु प्रागनभिव्यक्तमतो न शब्दज्ञानयोर्निमित्तमित्यत आह। **व्यक्तमिति**। प्रागेवाभिव्यक्तम्भवेदित्यर्थ। **सत्तादिवत्**। यथा सत्ताद्रव्यत्वादि। यावद्द्रव्यभावि। अर्थक्रियायाश्च प्राग[5]व योग्यदेशावस्थितं द्रव्य।

अथापीत्यादिना व्याचष्टे। **सत्यर्थे** जात्याश्रये **तत्समवायस्य** सामान्यसमवायस्य**काकादाचित्कत्वात्** सर्वकालभावित्वात्। एतदेव द्रढयन्नाह। **यावन्ति** हीत्यादि। **अर्थे** जात्याश्रये। **समवायधर्माणि** सम्बन्धयोग्यानि **तानि** सामान्यानि। **अस्यार्थस्य** य उत्पाद.। **तेन सह समवयन्ति**। अस्मिन् सामान्याश्रय इति विभ[6]क्तिविपरिणामेन सम्बन्ध। उत्पादसमकालमेव द्रव्येण सह सम्बध्यत इति यावत्। **इति समयः**। सा मा न्य वा दि न सिद्धान्त। यदाहो द्यो त क र (।) "प्रागोत्वान्नासौ गौर्नाप्यगौरिति। किङ्कारणम् (।) अभावे तौ विशेषणप्रत्ययौ न च विशेषणप्रत्ययौ विशेष्यसम्बन्धमन्तरेण भवतो न च प्राग् गोत्वयोगाद् वस्तु विद्यते। न
116b चाविद्यमान गौरिति वाऽगौरिति वा श[7]क्यते व्यपदेष्टु। यदैव वस्तूत्पद्यते तदैव गोत्वेनाभिसम्बध्यत इति। तथा न सतस्सत्तासम्बन्धो नासत। यदैव च वस्तु तदैव सत्तया सम्बध्यत" इति।[1]

अथ सिद्धान्तमतिक्रम्य पश्चाद् भावित्व सामान्यस्य कल्प्यते। **तदा तद्व्यतिक्रमे** सिद्धान्तव्यतिक्रमे। तस्य सामान्यस्याश्रयस्य द्रव्यस्य **पश्चादप्यविशेषान्न तत्समवायः स्यात्**। तेन सामान्येन समवायो न स्यात्।

यथा फलैकस्वभा[1]वस्यापि रक्तता प्राङ् न भवति। पश्चाच्च भवति। तद्वत्पुरुषस्य पाचकत्वादिसामान्यमित्यत आह। **तत्सम्बन्धी**त्यादि। **तत्सम्बन्धिस्वभाववैगुण्यात्**। पाचकत्वादिसामान्यसम्बन्धिस्वभाववैगुण्यात्। **स** इति सामान्यसमवाय। **तस्येति** पुस.। न ह्यविगुणे स्वभावे स्थितस्य तत्सम्बन्धो न भवेत्। **तत्रैव** च सामान्यसमवायविगुणे **स्वभावे स्थितस्य** द्रव्यस्य पश्चात् सामान्य[2]समवायो भविष्यतीति **दुरन्वयन्दुर्बोधमेतत्**। फलस्याप्याम्रादे. पूर्व पश्चाच्च यद्येकस्वभावता। तत्रापि तुल्य चोद्य। सामान्यसम्बद्धमेव तदा द्रव्य क्रियोपकारापेक्षन्तु सामान्य व्यनक्ति। (१६२-६३)

---

[1] Nyāyavārtika.

क्रियोपकारापेक्ष्यस्य व्यञ्जकत्वेऽविकारिणः ॥१६३॥
नापेक्षाऽतिशयेप्यस्य क्षणिकत्वात्क्रिया कुतः ।

कर्मोपकार[6]मपेक्ष्य द्रव्यस्य पाचकत्वव्यञ्जकं चेत्, स्वभावाश्रयोऽयमनाधेयातिशयाद् अविशेषाधायिनि काऽपेक्षा ? अतिशये वा कर्मणः क्षणिक[7]त्वात्। 469a प्रतिक्षणं स्वभावभूतस्यान्यस्यान्यस्यातिशयस्योत्पत्तेस्तदपि क्षणिकं स्यात्। ततः स्वोत्पत्तिस्थानविनाशिनः कुतः क्रिया, कमपेक्ष्य व्यञ्जकं स्यात्[1]।

ननु कथमेकवस्तुत्वाभावे वस्तुनि ज्ञानशब्दौ प्रवर्त्तेते, यथा पाचकादिष्विति तथा ।

सा च प्राङ्नास्तीति न प्राक् सामान्याभिव्यक्तिरित्यत आह। **क्रियोपकारे**-त्यादि। पाकादिलक्षणा क्रिया। तत्कृतो य उपकारस्त**दपेक्षस्य** सामान्य प्रति **व्य[3]ञ्जकत्वेऽभ्युपगम्यमाने**। तस्य द्रव्यस्याक्षणिकत्वाद**विकारिणोनपेक्षा** सहकारिण प्रति।

अथ विक्रियेत तदाप्य**तिशयेस्य** द्रव्यस्य क्षणिकत्वमापद्यते। **क्षणिकत्वा**च्चोत्पादानन्तर ध्वसिन· **कृतः क्रिया**। येन तदुपकारापेक्ष जातेर्व्यञ्जक स्यात्।

कर्मोपकारेत्यादिना व्याचष्टे। अधिश्रयणादिलक्षणो व्यापार कर्म। तत्कृत उपकारोतिशयस्त**मपेक्ष्य** स्थिर[4]स्वभावस्य पूर्वस्वभावादचलतोनतिशयात् स्वभावान्तरानुपादानात्। **अविशेषाधायिनि** कर्मणि। **कापेक्षा**। नैव । **अतिशये वा** द्रव्यस्य क्रियाकृतेभ्युपगम्यमानेऽतिशयाधायकस्य कर्मण **क्षणिकत्वात** तस्याप्युपकार्यस्य द्रव्यस्य स्वभावभूतेनान्येनातिशयेनोत्पत्तव्य।

यदि क्रियाकृतोऽतिशयो न स्वभावभूतो **द्रव्यस्य** तदर्थान्तरस्य करणाद् द्रव्यं नैवोप[5]कृत स्यात्। तस्माद् यथाक्रियाक्षण प्रतिक्षण **स्वभावभूतस्यान्यान्यस्यातिशयोत्पत्तेस्तदपि** द्रव्य देवदत्तादि **क्षणिकं स्यात**। **तत** इति क्षणिकत्वात्। **स्वोत्पत्तिस्थानविनाशिनः** स्वस्मिन्नेवोत्पत्तिदेशे विनाशिन· पुस· **कृतः** पाकलक्षणा **क्रिया**। यदपेक्षन्तत् क्रियासापेक्ष पाचकादिद्रव्यसामान्यस्य **व्यञ्जकं स्यात**।

ननु च प्रथमादिक्रियाक्षणद्वारेण द्रव्यस्य[6] क्षणिकत्व क्रियाऽभावे च कथ क्षणिकत्वमिति चेत् (।) न। यत क्रियासम्बन्धोत्पन्नाना क्षणानामन्यस्या क्रियायास्सामान्याभिव्यञ्जिकाया अभावादित्यर्थ·।

तस्मात् स्थितमेतद् यथा वस्तुभूता जातिर्नास्तीति। (१६३-६४)

कथन्तर्हीत्यादि परः।

यथेत्यादि सि द्धा न्त वा दी। **यथा पाचकादिष्** पाचकत्वादिसामान्यन्नास्ति तथा

तत् तेष्विति न वा चेतः, यथा तेष्वपीति[2] यथा तेषु न वृत्तिरिति परीक्षितम्।

किन्तर्हि ते अनिमित्ते न स्याताम। नानिमित्ते, अथ किमिति चेत् बाह्यतत्त्व निमित्तेन। यथास्वं[3] यो यो वासनाप्रबोधात् विकल्पोत्पत्तिः, ततः शब्दा भवन्ति। न पुनर्विकल्पाभिधानयोर्वस्तुसत्ताश्रय इत्युक्तप्रायमेतत्। यथास्वं दर्शन[4] वासनावशात् विरोधिरूपसमावेशेन परापरदर्शनेऽपि तदन्वयिदर्शनात्। न च तत्र तन्निबन्धनस्वभावः क्वचिदप्यस्ति। परस्परविरोधिनोरेकत्र स्थित्यसम्भवात्।

अनियमेन स्याद्। तदनिमित्त भवद्धि क्वचिद् भवेत् क्वचिच्च न भवेदिति न निश्चेयम्।

117a प्रसाधितमथ च तत्र प्रवर्त्तेते **अन्वयिनौ[7] ज्ञानशब्दौ**। तथान्यत्राप्यन्तरेण सामान्यन्तौ भिवष्यत ।

तद्वदित्यादि पर । **तेष्विति** पाचकादिषु सामान्यम्विना कथमन्वयिनोर्ज्ञान-शब्दयोर्वृत्तिरिति। ततोन्वयज्ञानशब्दवृत्ते पाचकादिष्वपि पाचकत्वादिसामान्य-मस्तीति चिन्तितमेतदनन्तर। तथा तेषु पाचकत्वादि सामान्य स न सम्भवतीति।

यद्यन्वयि रूपन्नास्ति[1] **तत्किमिदानी मनिमित्ते** ते शब्दज्ञाने **स्यातां**। **ने**त्यादि सि द्धा न्त वा दी। अस्त्येव तयोर्निमित्त यत् परेणेष्यते तस्य प्रतिक्षेप । तदेवाह। **किन्तर्हीत्यादि**। वस्तुभूत सामान्यम्**बाह्यतत्वं निमित्ते** ते **न** भवत । किन्तर्हि तयोर्निमित्तमित्यत आह। **यथा**स्वमित्यादि। यो य आत्मीयो **वासनाप्रबो**धस्त-स्मादन्वयिनो विकल्पस्योत्पत्ति । **ततो विकल्पोत्पत्तेः** सकाशाद् यथाविक[2]ल्प **शब्दा भवन्ति। न पुनर्विकल्पाभिधानयोर्वस्तुसत्ता**। अन्वयिपदार्थ**सत्तासमाश्रय इत्युक्तप्रायमेतत**। अवश्य चैतदेष्टव्य। तथा हि यथास्व समवाय**वासनावशात्** सिद्धान्ताश्रयेण ज्ञानवासनानुरोधाद् **विरोधिरूपसमावेशेन** परस्परविरुद्धरूपाध्या-रोपेण प्र धा न कार्यमी श्व र कार्यमहेतुक सम्वृत्तिमात्र जगदित्येव सर्वभेदेष्वन्व-यिनो**स्तयो**[3]रिति ज्ञानाभिधानयो । अ**परापरदर्शने**पीति परस्परभिन्नानामर्थाना-न्दर्शनेपि। **न च तत्रेति** प्रधानादिकार्यत्वेन परस्परविरुद्धेन रूपेण कल्पितेष्वर्थेषु। **तन्निबन्धन**. शब्दज्ञानयोर्निबन्धन । कस्मान्नास्तीत्याह। **परस्परविरोधि**नोरित्यादि।

अनियमेनेत्यादि पर । सर्व सर्वत्रान्वयि ज्ञानमभिधान च स्यात्।

एतदेव साधयन्नाह।[4] न ह्यनिमित्तमित्यादि।

नन् यथास्व वासनाप्रबोधाद् विकल्पोत्पत्तेरित्यादिना तयोरनिमित्तत्व प्रतिषि-द्धमित्यनवकाशमेव चोद्य। एवम्मन्यते। आन्तरमेव निमित्तन्तयोरिष्यते तस्य च निमित्तस्य केनचिदासत्तिविप्रकर्षाभावात्। सर्वत्र सर्वविकल्पहेतुत्व स्यादिति।

न ह्यनिमित्तं तद्। वासना[6]विशेषनिमित्तत्वात्, तथाभूतं बाह्यं न प्रकाशितमपीत्युक्तम्। न चासति तस्मिन्न भवितव्यम्। सुप्ततैमिरिकाद्युपलब्धेषु अर्थेषु अभावेषु ग्रंथ[7]वासनारोपितरूपविशेषे तथा विकल्पस्योत्पत्तेः। न च ते तदुत्पत्त्याऽसत्सु सर्वत्र सर्वाकारा भवन्ति। विभागेनैव तथैवोपलब्धानां[1] विकल्पनात्। एकभावेनात्र स्वभावेनापि एकज्ञानकार्यं क्वचिद् भाव एव भेदादिति संक्षेपः। 469b

अन्यच्च—

तुल्ये भेदे यया जातिः प्रत्यासत्त्या[2] प्रसर्पति ॥१६४॥
क्वचिन्नान्यत्र सैवास्तु शब्दज्ञाननिबन्धनम्।

—इति संग्रहश्लोकः।

न ह्यनिमित्ते भवदित्यत्र बाह्यनिमित्ताभावादनिमित्तमिति द्रष्टव्य।[5]

नानिमित्ते इति सिद्धान्तवादी। अविशिष्टनिमित्ते। न भवत इत्यर्थः। अत एवाह। **वासनाविशेषनिमित्तत्वादिति**। यथाभूतदर्शनद्वारायाता वासना सा तत्रैवाध्यवसितनद्भावम्विकल्प जनयति। न सर्वत्रेति समुदायार्थः। तथाभूतमित्यन्वयि रूप। **न चासति तस्मिन्नन्वयिनि** बाह्ये निमित्ते विकल्पेन न भवितव्यम्भवितव्यमे[6]व।

तदेव **सुप्ते**त्यादिना साधयति। सुप्तश्च **तैमिरिक**श्च ताभ्यामुपलब्धेष्वर्थेषु गवादिषु केशमक्षिकादिषु च यथाक्रम। **अभावेषु** शशविषाणादिषु। समवा**यवासना**। यथा स्व सिद्धान्त सकेतवासना तद्बलेना**रोपितरूपविशेषे** प्रधानकार्यादिषु। **तथा** विकल्पोत्पत्तेरन्वयिनो **विकल्पस्योत्प**[7]**त्तेः**। न ह्येतेषु यथोक्तेषु बाह्यमन्वयि 117b
रूपमस्ति। स्वप्नतिमिरोपलब्धानामेवासत्त्वात्। तेषा चासत्त्व तृतीये परिच्छेदे (३।८५) प्रतिपादयिष्यते। सिद्धान्तसमारोपितस्य तु परस्परविरोधिनोर्युगपदेकत्रेत्यादिना प्रतिपादितमेवासत्त्व। **न च ते** विकल्पा स्वप्नाद्युपलब्धेष्व**सत्सु** वस्तुभूतान्वयिरूपमन्तरेणाप्युत्पद्यत इति **सर्वत्रा**[1]र्था. **सर्वाकारा** भवन्त्यपि तु प्रतिनियता एव। नियमहेतु चाह। **विभागेनैवे**त्यादि। **तथैवोपलब्धानामिति** विभागेनोपलब्धाना। विभागेनैव **विकल्पनात्**। सुप्ततिमिरावस्थायान्तावद् भ्रान्तज्ञानारूढानामर्थाना विभागेनोपलम्भ। सिद्धान्तारोपितानामपि यथास्व सिद्धान्तश्रवणकाले। **शशविषाणमित्यादिष्वपि**। शशविषाण बन्ध्यासुत इ[2]ति व्यवहारव्युत्पत्तिकालेऽनादित्वाद् व्यवहारवासनाया.। उक्त चात्रेत्यादि।

"एकप्रत्यमर्शार्थज्ञानाद्येकार्थसाधन" (१।७५) इत्यत्र।

अपि च यथा धवखदिरादय. परस्परभिन्नास्तथा गवादय.। तत्र **तुल्ये भेदे**

ख. सांख्यमतनिरासः

न निवृत्तिं विहायास्ति यदि भावान्वयोऽपरः ॥१६५॥
एकस्य कार्यमन्यस्य न स्याद्[3]त्यन्तभेदतः ।

यद्येते भावा निवृत्त्यन्वयिस्वभावेन केनचित् शून्याः, बहवो भावा एककार्यतायां न स्युः । यो हि तज्जननस्वभावः, न हि[4] सोऽन्यस्य । योऽस्ति न स जनकः, व्यतिरेकस्य निःस्वभावत्वात् । यज्जनकं तद् वस्तु, तज्जनकस्यान्यत्रा-

---

कस्माद् वृक्षत्व धवादिष्वेव वर्त्तते न गवादिष्विति पृष्टेन परेणैतदेव वक्तव्य भावशक्तिरेव सा धवादीना येन त एव वृक्षत्व प्रति[3] प्रत्यासन्ना न गवादय इति । तदा तुल्ये भेद्ये **यया प्रत्यासत्त्या** भावशक्तिलक्षणया **जातिः क्वचित्** स्वाश्रयाभिमतेऽर्थराशौ । **प्रसर्प्पति** । व्याप्य वर्त्तते । **सैव** भावशक्तिरन्वयिशब्दज्ञाननिबन्धनमस्तु । कि सामान्येन कल्पितेन (।)

तेन यदुच्यते ।

"विषयेण हि बुद्धीना विना नोत्पत्तिरिष्यते ।
विशेषादन्यदिच्छन्ति सामान्यन्तेन तद् ध्रुव ।
ता हि[4] तेन विनोत्पन्ना मिथ्या स्युर्विषयादृते ।
न त्वन्येन विना वृत्तिस्सामान्यस्येह दुष्यती"ति ।

तदपास्त । न हि यथा सामान्यमन्तरेण केषुचित् सामान्यवृत्तिरिष्यते । तथा सामान्यम्विना सामान्यबुद्धिरिष्यतामिति परोभ्युपगम कार्यते । येन ता हि तेन विनोत्पन्ना मिथ्या स्युरिति परस्योत्तर स्यात् । केवल यथा परस्य सामान्यमन्तरेण के[5]षुचित् पदार्थषु यया प्रत्यासत्त्या सामान्यवृत्ति सैव भ्रान्तान्वयिज्ञानशब्दनिमित्तमस्तु कि सामान्येनेत्ययमर्थोत्र विवक्षित इति न कश्चिद्दोष ।

तस्मात् स्थितमेतद् (।) व्यावृत्तेरेवैकत्वाध्यवसायाद् भावेष्वन्वयो नान्यस्येति । (।१६४–६५॥)

अत्र सां ख्य. प्राह । **न निवृत्तिमित्यादि** । **भावान्वयो** भावानामेकरूपत्वं । **अपर** इति वस्तुभूत । तदे**कस्य** बीजस्य य[6]त्**कार्यन्तदन्यस्य** पृथिव्यादेर्न **स्यात्** । कस्मात् (।) तयोर्बीजपृथिव्योर**त्यन्तभेदतः** । (।१६५–६६)

यद्येत इत्यादिना व्याचष्टे । **एषा**मिति भावाना यथा बीजादेकादीनामेकमकुराख्य कार्य । **यो हीत्यादिना** तदेव साधयति । **यो हि तस्य** बीजस्याकुर**जनन-**

---

[1] Śloka, Ākṛtī 37, 38

भावात्, अन्येन न स्यादुत्पन्नम्[5]।

यदि तज्जनकस्वभावो यः स एवान्यस्यापि स्यात्, तेन स्वभावेन तत्र ततोऽभिन्नः स्यादित्यस्ति स्वभावान्वयः।

यद्येकात्मतयाऽनेकः[6] कार्यस्यैकस्य कारकः ॥१६६॥
आत्मैकत्रापि सोस्तीति व्यर्थाः स्युः सहकारिणः।

यद्यनेक एकस्वभावत्वात् एकस्य कारकः, तेषामभिन्नः स्वभावः स हि एकसन्निधानेऽप्यस्ति हेत्ववैकल्यात्,[7] एकोऽपि जनकः स्यात्। 470a

नापैत्यभिन्नं तद् रूपं विशेषाः खल्वपायिनः ॥१६७॥

नहि तस्याभिन्नस्वभावस्य अर्थान्तरेऽपि विशेषोऽस्ति। विशेषे सत्य[1]भेद-

---

स्वभावो न हि सोन्यस्य पृथिव्यादेरस्ति।[7] योस्ति बुद्ध्यारोपितो व्यावृत्तिलक्षणो न 118a
स जनकः। कस्माद्। व्यतिरेकस्यान्यव्यावृत्तिलक्षणस्य निःस्वभावत्वात्। तस्माद् बीजस्वलक्षणमेव जनकं यच्च जनकरूपन्तदेव वस्तु। तज्जनकं चेत्यङ्कुरजनक स्वलक्षण। अपरत्रेति पृथिव्यादौ। अपर पृथिव्यादिकमकुर जनयेत्। स हीत्यादि। हि शब्द एवकारार्थ। तस्येति बीजस्य। अ[1]न्यस्य पृथिव्यादे (।) स पृथिव्यादिस्ते-नाकुरजननेन बीजस्वभावेन ततो बीजादभिन्नः स्यात्। इत्यस्तिस्वभावान्वयः। तेन केचित् स्वभावभेदेपि प्रकृत्यैककार्यकारिण इन्द्रियादिवदित्ययुक्तमुक्तमिति।

यदीत्यादिना सि द्धा न्त वा दी। आत्मैकत्रापीति। कारणकलापस्य येना-भिन्नेनात्मना जनकत्वमिष्यते। स आत्मा तेषां कारणा[2] नाम्मध्ये एकत्रापि कारणे-स्तीति। तेनैकेन कार्य कृतमिति कृत्वा व्यर्थाः स्युः सहकारिणः।

ननु व्यावृत्तिवादिनोप्यन्त्यावस्थाया सर्वेषा जनकत्वात् कारणान्तरवैयर्थ्यं।

नैतदस्ति। समुदितानामेव तेषान्तादृश सामर्थ्य क्षणिकाना। हेतुप्रत्यया-यत्तसन्निधित्वात्। परस्य तु नित्यवादिन सदा तद् रूपमस्तीति भवेत्कारणान्तरा-णामानर्थक्य। अत एवोक्तमेकत्रापि सोस्तीति कारणान्तरविकलावस्थायाम-पीत्यर्थः।

यदीत्यादिना व्याचष्टे। अनेकः पदार्थो यद्येकस्वभावत्वादेकस्य कार्यस्य कारकः जनक स तेषां कारणाभिमतानामभिन्नो जनक स्वभाव एककारणसन्निधानेप्य-स्ति। ततश्च सर्वस्यामवस्थायामवैकल्यात् कारणस्य यत्र तत्रावस्थितिरेको[4]पि जनकः स्यात्। (।१६६–६७)

एतदेव द्रढयन्नाह। यस्मादित्यादि। एकस्मिन्नपि बीजादौ सन्निहिते नापै-त्यभिन्नं तत्कार्यजनन सामान्यरूपं। विशेषा व्यक्तिभेदा अपायिनः। न हि तस्या-

हानेः। स हि तत्राप्यस्तीति नैकस्य स्थितावपि तस्यापायोऽस्ति। ये विशेषा अवस्थाभेदास्तेषां सहस्थितिनियमाभावात् स्यादपायः।

न च ते जनका इष्टाः[2]। सहकारिणां हि एकस्वभावतया जनकत्वाभ्युपगमात्। तस्माद् जनकस्य स्थानात्, अस्थायिनोऽजनकत्वात् एकस्थितावपि कार्योत्पत्तिः स्यात, न च भवति। तत·—

एकापाये फलाभावाद् विशेषेभ्यस्तदुद्भवः।

अनेकसहकारिसाधारण कार्य एकविशेषापायेऽपि न स्याद्, सर्वविशेषा[4]पायेऽपि स्यात्। नन्वखिलेऽप्यभिन्ने रूपे न भवति। कार्य हि कुतश्चिद् भावधर्मी न स्यात्, य भवति तत्तस्य वैकल्यात्। न चाभिन्नस्य एकस्य स्थितावपि[5] वैकल्यमस्ति। अविकले तस्मिन अभवत तस्याजनकतां सूचयति।

भिन्नस्य कार्यजननस्वभावस्य बीजादर्थान्तरेपि पृथिव्यादौ विशेषोस्ति। किङ्कारणम् (।) विशेषे सत्यभेदहानेः। स ह्यभिन्नो जनकाभिमत स्वभावस्तत्रा[5]पि बीजेपि केवलेस्तीति। नैकस्य स्थितावपि तस्येत्यभिन्नस्य रूपस्य जनकाभिमतस्यापायो विनाशोस्ति। त्रैगुण्यस्य सर्वात्मना सर्वत्र सर्वदा सत्त्वात्। ये विशेषा अवस्थाभेदास्तेषां सहस्थितिनियमाभावात् स्यादपायः।

एतच्चाभ्युपगम्योक्त। अन्यथा नित्यादवस्थान्तरव्यतिरिक्ताना विशेषाणामपि कथमपाय। न च [6]ते जनका इति विशेषा कस्मान्नेष्टा इत्याह। सहकारिणामित्यादि। तस्मादेकस्मिन्नपि बीजादौ स्थिते जनकस्यात्मन स्थानात्। अस्थायिन इति विशेषस्य। एकस्थितावपीति बीजादेरन्यतमस्य स्थितावपि कार्योत्पत्तिः स्यात। न च भवति कार्योत्पत्ति। तत सामान्यस्थितेपि सहकारिणाम्म-
118b ध्ये। एकस्य विशेषस्यापा[7]ये। फलाभावाद विशेषेभ्यस्तदुद्भव· कार्योद्भव। न सामान्यात्। तत्कार्यमङ्कुरादिक। कि भूत। अनेकमित्यादि। अनेकस्य सहकारिण साधारणं। अनेकसहकारिजन्यमित्यर्थ। एकविशेषापायेपीति सहकारिणामन्यतमभेदापायेपि। अनेन व्यतिरेकमाह।

पुनरित्यादिनान्वय। तस्माद् विशेषेष्वेवान्वयव्यतिरेकौ कार्यस्य न तु सामा[1]न्ये। तदाह (।) नन्वविकल इति। एकविशेषस्थितावविकलेप्यभिन्ने रूपे तत्कार्यन्न भवति। कार्य हीत्यादिनैतदेव विभजते। कुतश्चिद् भाव उत्पाद स एव धर्म.। स यस्यास्ति तत् तद्भावधर्मि। कदाचित् यत्र भवति तत्तस्य जनकस्य वैकल्यान्न चाभिन्नस्य रूपस्य जनकाभिमतस्य सहकारिणां मध्ये। एकस्य स्थितावपि वैकल्यमस्ति। अविकले तस्मिन् सामान्यरूपे[2] कार्यमभवत् तस्य सामा-

यत्साकल्यवैकल्याभ्या तत एव कार्यस्योत्पत्तिः, तस्मिन् सति भवतो नियमः स्यात्। तदन्यस्मादुत्पत्तिकल्पनाया[6] हि अतिप्रसङ्गात। तस्माद् विशेषा एव जनका न सामान्यम्। ततस्त एव वस्तु।

स पारमार्थिको भावो य एवार्थक्रियाक्षमः ॥१६८॥

इदमेव हि **वस्त्ववस्तुलक्षणं अर्थ**[7]**क्रियायोग्यताऽयोग्यते इति वक्ष्यामः।** 470b
अर्थक्रियासमर्थो योग्योऽर्थः।

स च नान्वेति योऽन्वेति न तस्मात् कार्यसंभवः।

तस्माद् सर्वं सामान्यं अनर्थक्रियायोग्यत्वात न वस्त्विति वस्तु विशेष एव, तत एव तन्निष्पत्तेः।

स्वभावानन्वयात तर्हि एकस्य जनकं रूप तदन्यस्य नास्तीति अजनकः स्यात्।

न्यस्याजनकात्मतां सचयति। (।१६७–६८॥)

ननु न सामान्यमेव जनकमिष्यते येनायन्दोष म्यादपि तु अनेकात्मतया जनक इत्युक्तमित्यत्राह। **यत्साकल्येत्यादि।** येषा च विशेषाणा **साकल्यवैकल्याभ्या** कार्यम्भावाभाववत्। **तत एव** विशेषेभ्य **कार्यस्योत्पत्तिः। तस्मिन् सतीति** हेतुभावयोग्ये विशेषे सति भवत कार्यस्य। **तदन्यस्मा**[3]**दिति।** विशेषादन्यस्मात् सामान्या**दतिप्रसंगात्** सर्व सर्वस्य कारण स्यात्। यत एव **तस्माद् विशेषा एव जनकाः। न सामान्यं** जनक। **ततो**ऽजनकत्वात् **त एव** विशेषा **वस्तु।** परमार्थसन्त इत्यर्थ। कि कारण (।) यस्मात् पारमार्थिको भाव परमार्थसन्नित्यर्थ। **स एवार्थक्रियाक्षमः।**

इदमेव **ह्रीत्यादिना** व्याचष्टे। **अर्थक्रियायोग्यता वस्तुनो लक्षणं। अ**[4]**योग्यता** त्ववस्तुनो लक्षण। **वक्ष्याम** इति सम्बन्ध (।)

अर्थक्रियाक्षम यत्तदत्र परमार्थसदि (३।३) त्यादिना। सर्वार्थक्रियायोग्योर्थो विशेषात्मको **नान्वेति**। विशेषस्य व्यक्त्यन्तराननुयायित्वात्। **योन्वेति** सामान्यात्मा। **तस्मात्** सामान्यात्मनो **न कार्यस्य सम्भव।**

तस्मादित्यादिनोपसहार। **अनर्थक्रियायोग्यत्वादि**त्यर्थक्रियायामयोग्यत्व।-दित्यर्थ।[5] **तत एवेति** विशेषादेव **तन्निष्पत्ते**रर्थक्रियाया निष्पत्ते।

तदेवम्परै कल्पितस्याजनकत्व प्रतिपादित। (१६८–६९)

अधुना यत्परेणोक्त"एकस्य कार्यमन्यस्य न स्यादत्यन्तभेदत" इति तत्परिहर्त्तु तदेव चोद्यमावर्त्तयति। **स्वभावानन्वयात्तर्ही**त्यादिना।

"ज्वरादिशमने कश्चित् सह प्रत्येकमेव वा (१।७६)"

जनकत्वे भेदा[2]विशेषात् सर्वो जनकः स्यात्।

नैतदस्ति—

तेनात्मना हि भेदेऽपि हेतुः कश्चिन्न चापरः ॥१६९॥

स्वभावोऽयं एकजनकात्मनो भिद्यमानाः[3] सर्वे समं जनका न वा कश्चिज्जनक इति। यथा तेषु न विशेषभावः, ततो भेदाविशेषेऽपि कुतश्चिदात्मातिशयात् कश्चिज्जनको[4] नापरः, स हि तस्य स्वभावो नापरस्य।

न हि वस्तुस्वभावेषु किमग्निर्दहत्युष्णो वा नोदकमिति पर्यनुयोगमर्हति, स्वभावायोऽयमिति यतः इति तन्मात्रं स्यात्। निर्हेतुकत्वेऽनपेक्षिणोऽनियमेनातिप्रसङ्गात्। तस्मात् स्वभावोऽस्य स्वहेतोरित्युच्यते। तस्यापि तज्जननात्मता

इत्यादिना प्रागप्येतत् परिहृतन्तथा[6]प्यधिकविधानार्थं पुनरुपन्यासः। **एकस्य** बीजादेर्यज्जनकं **रूपन्तदन्यस्य** पृथिव्यादेर्नास्तीति कृत्वाऽन्य सहकारी **अजनकः स्यात्**। जनकस्वभावाद् भिन्नस्वभावस्य **जनकत्वे** चाभ्युपगम्यमाने **भेदाविशेषात् सर्वो** यवबीजादिरपि शाल्यङ्कुरस्य **जनकः स्यात्**।

नैतदइत्यादिना परिहरति। शालिबीजस्यैकस्य जनकस्य य आत्मा **तेना[7]त्मना** पृथिव्यादेः यवबीजादेश्चात्यन्त**भेदेपि हेतुः कश्चित्** पृथिव्यादि· शाल्यकुरस्य **नापरो** यवबीजादि·। **च**शब्द श्लोकपूरणार्थ·। एवकारार्थो वा। किङ्कारण (।) **स्वभावोयं** भावाना एकस्य यो जनक आत्मा तस्मादात्मन स्वभावाद् भिद्यमाना· सर्वे **समन्तुल्यं जनकाः** प्राप्नुवन्ति (।) भेदाविशेषान्न वा कश्चिज्जनक इति (।)

1192 स्यादेतच्चो[7]द्य। यद्येषामेकस्माज्जनकादात्मनो भिन्नानान्तदतत्कार्यजनन प्रति नियमलक्षणो विशेषो न सम्भवेत्। किन्तु सम्भवेदेव। **तन** इति विशेषसम्भवात्। **भेदाविशेषेपि कृतश्चिदात्मातिशयाद्**विशिष्टकार्यप्रतिनियतलक्षणात् **कश्चिज्जनकः** पृथिव्यादि शाल्यकुरस्य **नापरो** यवबीजादि. (।) कस्माच्छाल्यङ्कुरजनना[1]विशेष**स्तस्य** पृथिव्यादे सहकारिण **स्वभावो नापरस्य** यवबीजादेः। अयमेव विभाग किकृत इति चेदाह। **न ही**त्यादि। **किमग्निर्दहत्युष्णो वा नोदकन्दहत्युष्ण चेति न पर्यनुयोगमर्हति** प्रत्यक्षादिप्रमाणसिद्धत्वात्। एतावत्तु प्रष्टु युक्त स्यात्(।) कुतो हेतोरय यथोक्तस्वभाव इति। अवश्य हि स्वभावभेदस्य हेतुना भाव्य। यतो[2] **निर्हेतुकत्वेऽनपेक्षिणो** देशादि**नियमेनातिप्रसंगात**। सर्वत्र सर्वदा सर्वात्मना भावप्रसगात्। **तस्मात् स्वभावोस्य** कारणाभिमतस्य **स्वहेतोः** सकाशाद् भवती**त्युच्यते। तस्यापि** स्वहेतोस्त**ज्जननात्मता** तथाभूतकारणस्वभावजननात्मता **तदन्यस्मात्** स्वहेतोरि**त्यनावर्हेतुपरम्परा**।

तदन्यस्मात् इत्यनादि[6]र्हेतुपरम्परा।

न हि भिन्नानां कश्चिद्धेतुरपरः, स्वभावादिति न किमपि बाधकम्।

स्वभावोऽयमभेदे तु स्यातां नाशोद्भवौ सकृत्।

स्वभावेनाभेदात्।[7] स्वात्मवद् नानाविभागोत्पत्तिस्थितिनिरोधा न स्युः। 471a
तथाऽभेदेनोपलक्षणात्। भेदाभेदलक्षणे हीमे एका[1]कारस्यापि व्यतिरेकाव्यतिरेके, एकात्मनि विरोधाभावात्।

भेदोऽपि तेन नैवं[1]चेत्;

न वै सर्वाकारेणाभेदे ब्रूमो येनैवं स्यात। किन्त्वस्य कश्चिदात्मा[2] भिन्नाभिन्न इति भेदात् न सहजादिः।

न हि भिन्नानाम्भावाना हेतुप्रविभागे बाध[3]क प्रमाणमस्ति। तदेवाह। **भिन्ने**त्यादि। **स्वभावादिति** वस्तुस्थिते। एकत्वे तु **बाधकम**स्तीत्याह। **अभेदे** त्वित्यादि। परस्परमभेदादेकस्य नाशे सर्वस्य **युगपन्नाशः** उत्पादे सर्वस्योत्पाद स्यादित्यर्थ।

अभेदादित्यादिना व्याचष्टे। **विश्वस्य** सर्वस्य पदार्थराशे. स्वभावेनाभेदात्। **विभागोत्पत्ती**त्यादि। एकस्योत्पत्तिर[4]न्यस्यात्पत्तिरेकस्य **स्थिति**रन्यस्य **निरोध** इत्येवम्विभागेनोत्पत्त्यादयो **न** स्यु। **स्वात्मवदिति**। यथैकस्यावस्थाविशेषस्य विभागेन नोत्पत्त्यादयस्तद्वदित्यर्थ। आदिशब्दादेकस्य ग्रहणमन्यस्याग्रहणमित्यादि। सूत्रे तु नाशोत्पादग्रहणमुपलक्षणार्थं। **तथा** तेनैव विभागोत्पत्त्यादिना **उपलक्षणा**न्निश्चयादभेदस्य।[5] अन्यथा भेदाभेदौ केन लक्ष्येते। **एकाकारस्यापी**ति तुल्याकारस्यापि **व्यतिरेको** विभाग पृथगुत्पत्त्यादिमत्त्व। तद् भेदस्य लक्षण। **अव्यतिरेको**ऽविभाग पृथगुत्पत्त्यादिमत्त्वाभाव। तदभेदस्य लक्षण। सत्यपि विभागोत्पत्त्यादिमत्त्वे कस्माद् भेद इत्याह। **विरो**[1]**धिनो**रित्यादि। विरोधिनोरुत्पादानुत्पादप्रभृ[6]तिकयोर्युगपदेकात्मनि विरोधात्। नाभेद एवार्थाना किन्तु भेदोप्यस्ति। तदुक्त।

सर्वं हि वस्तुरूपेण भिद्यते न परस्पर।
स्वरूपापेक्षया चैषा परस्परविभिन्नतेति।

तेन कारणेन। नैव (।) न सकृदुत्पादादिप्रसग इति चेदाह। **नेत्याद्यस्यैव** व्याख्यान। **न वै सर्वेणाकारे**णाव्यतिरेक**मभेदं ब्रूमः। यें**[7]**नैवं स्यात्**। सकृन्ना- 119b
शोत्पादादि स्यात्। किन्त्**वस्य** बाह्याध्यात्मिकस्य भेदस्य **कश्चिदात्मा** घटाद्यवस्थाविशेषलक्षणो भिन्नो नान्यस्त्रैगुण्यात्मक सुखदुःखमोहात्मताया वस्तु रूपताया द्रव्यरूपताया सत्तारूपतायाश्च सर्वत्रानुगमात्। तेनायमर्थोवस्थातद्वतोः

एवं हि--

य एकस्मिन् विनश्यति ॥१७०॥

तिष्ठत्यात्मा न तस्यातः;

स्थानास्थानयोरेकाश्रयत्वे[3] **कोऽन्यो धर्मो भेदकः ? एवं क्वचिदपि नानात्वं न स्यात्। सर्वाकारविवेकिनोरर्थयोरभ्युपगमात। नाम केवलं नेष्टं स्यात। वस्तु तु**[4] **नेत्युक्तं प्राक्।**

तद् इमे नैकयोगक्षेमाः इमे भावा भिन्ना एव।

न स्यात् सामान्यभेदधीः।

तद् इदं नार्थान्तरं अनायत्तं, अजन्यत्वात्, अस्य सामान्यं भेदो वेति व्यपदेशं

परस्परमभेदोप्यवस्थानान्तु परस्परम्भेद एव। इति यथोक्तादवस्थादिलक्षणाद् **भेदा**[1]**त्**। (१६९-७०)

एव तर्हि सामान्यस्य नित्यत्वात् सर्वत्र स्थान। विशेषाणान्तु विनाश इत्येतदङ्गीकृत। ततश्चैकस्मिन् विशेषे विनश्यति सति यस्तिष्ठति सामान्यात्मा न स तस्य विशेषस्य सम्भव। विरुद्धधर्माध्यासात् सामान्यविशेषयोर्भेद एव स्यात्। अन्यथा **स्थानास्थानयोरेकात्माश्रयत्वे**भ्युपगम्यमाने विरुद्धावपि धर्मावेकात्मन्यङ्गीकृतौ भ[2]वतश्च (।) **कोन्यो धर्मो भेदको** नैव कश्चित्। नैव विरुद्धौ धर्मावेकत्राङ्गीक्रियेते तयोर्लक्षणभेदाद् भिन्नत्वात्। तथा हि विशेषा पृथगुत्पादादिना सर्वाकारविवेकिन सामान्यन्तु पृथगुत्पत्त्याद्यभावात् सर्वत्राविवेकीत्यत आह। **सर्वाकारे**त्यादि। **सर्वाकारविवेकाविवेकिनोर्यथाक्रमम्भेदसामान्ययोरर्थयोरभ्युपगमात्। नाम केवलमिति**[3] भेदसामान्ये भिन्ने इत्येतदभिधानमात्र **नेष्टं स्यान्न** तु वस्तु। **वस्तु तु** भेदसामान्यात्मकम्परस्परम्भिन्नमेवेष्टं। एतच्चोक्त **प्राक्**। नामान्तर वार्थभेदमभ्युपगम्य तथाभिधानादित्यादिना।

तदिति तस्मात्। **इमे भावा** इति विशेषा सामान्यम्वा परस्परभिन्ना एव। किभूता **नैकयोगक्षेमा** विरुद्धधर्माध्यासिता इति यावत्। अ[4]त. कारणान्न **स्यात्सामान्यभेदधीः**। सामान्यविशेषयो परस्परमसम्बध्नन्ती बुद्धिर्न स्यादित्यर्थ। बुद्ध्यभावाच्च व्यपदेशोपि प्रतिक्षिप्त एव। बुद्धिनिबन्धनत्वात्तस्य। तेन।

"अन्योन्यापेक्षिता नित्य स्यात् सामान्यविशेषयो।
विशेषाणान्तु सामान्यन्ते च तस्य भवन्ति हि (आकृ० ९)"

-इति निरस्त। **तदिति** तस्मात्। इद सामान्यम्भेदेभ्यो[5]र्थान्तर। भेदेष्वनायत्त। कस्मात् (।) तैर्भेदैस्तस्य सामान्यस्याजन्यत्वात्।

नार्हति ।

अन्यापोहेऽपि समान एष प्रसंग इति चेत् । न समानः । तथा—

निवृत्तेर्निःस्वभावत्वात् न स्थानास्थानकल्पना ॥१७१॥

अन्यापोह[6] इति न कश्चिद् भावः तस्यापि स्वभावानुगमिनीभिः स्वरूपस्थितिप्रच्युतिकल्पनाभिः कल्पना न स्यात् ।

उपप्लवश्च सामान्यधियस्तेनाप्यदूषणा ।[7] 471b

मिथ्याज्ञानं हीदं निर्विषयमेव अनेकत्रैकाकारं तद्विषयस्याभावात्, न स्थितिरस्थितिर्वा ।

द्वितीयोर्थ (।) **तदिदं** भेदात्मक वस्तु सामान्यादर्थान्तरन्तस्मिन् सामान्ये **अनायत्तन्तेनाजन्यत्वात्** । नित्यस्यार्थक्रियाऽसामर्थ्यात् । अस्य भेदस्येद **सामान्यमिति व्यपदेशं नार्हति । भेदो वास्य** सामान्यस्येति ॥

अन्यापोहेपि सामान्ये **एष प्रसंग** इति । य एकस्मिन् विनश्य[6]ति तिष्ठत्यात्मेत्यादिक । तथा हि धवे खदिरे वा विनश्यत्यवृक्षव्यावृत्तिस्तिष्ठत्येव वृक्षान्तरे ।

नेत्यादिना परिहरति । अयमत्रार्थो द्विविधोन्यापोह एको विजातीयव्यावृत्तौ बाह्य स्वाकारभेदेनाध्यस्तो विकल्पबुद्ध्या यो विषयीक्रियते शब्देन च । तस्यैवार्थक्रियाकारित्वेन च प्रवृत्तिविषयत्वान्न बुद्धि[7]प्रतिभासमात्रस्यार्थकारित्वा- 120a
भावात् । अपरोर्थाद् यत् प्रतीयतेऽन्यनिवृत्तिमात्र । (१७०–७१)

यच्चैतदन्यनिवृत्तिमात्रन्तस्य नि स्वभावत्वान्नैतच्चोद्य । आ चा र्ये ण वा यदभिमतन्तस्य नि स्वभावत्वादभावादित्यर्थ । तदाह (।) **निवृत्तेर्निःस्वभावत्वादिति न स्थानास्थानकल्पना ।**

विशेषे विनश्यति किमन्यापोहस्तिष्ठति । किम्वा निवर्त्तत इति । इय स्थानास्थान[1]कल्पना युक्ता । **तस्येत्यन्यापोहस्य** । स्वभावानुषङ्गिण्यो वस्त्वनुपातिन्य । विकल्पबुद्ध्यारोपित यत्सामान्यन्तत्र तर्हि **स्वरूपस्थितिप्रच्युतिकल्पना** भविष्यतीत्यत आह । **उपप्लवश्चेत्यादि** । य सामान्याकारोऽनेकपदार्थाभिन्न प्रतिभासते (।) **सामान्यधिय उपप्लवो** भ्रान्तोऽत सोपि बहिर्नास्त्येव (।) यत एवन्तेनापि विप्लवत्वेन कारणेन[2] सामान्यधी । **अदूषणा** । नास्या यथोक्त दूषणमस्तीति विग्रह ।

इदमेकाकार विकल्पविज्ञान **निर्विषयं** । यस्मान्मिथ्याज्ञानम्मिथ्यार्थमेव कथमिति चेदाह । **यदित्यादि** । यस्मादनेकत्रैकाकारं । **तद्विषयस्य** विकल्पविज्ञानविषयस्य सामान्यस्य **न स्थितिरस्थितिर्वा** । कस्मात् (।) **तस्य** मिथ्याज्ञान**विषयस्याभावात्** । (१७१–७२)

यत्पुनरिदं वचनं तज्जनको हि तत्स्वभावः—

यत्तस्य जनकं रूपं[1] ततोऽन्यो जनकः कथम् ॥१७२॥

इति ब्रूमः, तत्रान्यजनक रूपं नास्तीति न ब्रूमः। किन्तर्हि ? यदेकस्य तज्जनकं स्वरूपं तदन्यस्य नेति ब्रूमः। अन्योऽपि स्वरूपेणैव जायते न (पर)रूपेण अतत्त्वात्। तेऽपि यथास्वं भिन्ना जनकाश्च स्वभावेनेति कोत्र विरोधः ? एकरूपविकलः तद्रूपो न स्यात्, नातत्कार्यः[3]। तेनैव तत्कार्यं इत्यत्र को न्यायः ?

अपि च।

भिन्ना विशेषा जनकाः

इत्युक्तम।

तेऽपि विशेषास्तेनात्मना नान्योन्यान्वयिनः। यदेकस्य जनकं रूपं[4] तन्नास्ति। न तावताऽजनकाः। यदि तेऽभिन्नाः, तथा सति सत्त्यम। विशेषा जनकाः, तेऽपि

समानदोष[3]तामपनीय पुन प्रकारान्तरेण प्रक्रान्तञ्चोद्य परिहर्त्तुमाह। **यत्पुनरित्यादि। तज्जनको हि** तस्य शाल्यङ्कुरस्य जनको हि स **तस्य** शालिबीजस्य **स्वभाव**। **यच्च तस्य** शालिबीजस्य शाल्यङ्कुर**जनकं** रूप। **ततो** जनकाद् रूपा**दन्यः** पृथिव्यादि**र्जनकः कथमिति। तत्रेत्युपन्यासे।** तत्र वा चोद्ये प्रतिविधीयते। शालिबीजाद**न्यस्य[4]** पृथिव्यादे**स्तज्जनक**मङ्कुरजनक **रूपं नास्तीति न ब्रूमः।** किन्तर्हि **यदेकस्य** शालिबीजस्य **जनकं रूपन्तदन्यस्य** पृथिव्यादेर्**नेति ब्रूमः**। भावाना परस्परमनन्वयात्। **अन्योपीति।** पृथिव्यादि**न। न पररूपेणेति** न शालिबीजरूपेण। कि कारणम् (।) **अतत्वाद**ततत्स्वभावत्वात्। न चात्र बाधक प्रमाणमस्तीत्याह। **ते पृथिव्यादयो यथा[5]स्व**मिति (।) यस्य यत्स्वलक्षण तेन **भिन्नाश्च** परस्परमेकस्य कार्यस्य **जनकाश्च स्वभावेनेति कोत्र विरोधो** न कश्चिद् बाधकप्रमाणाभावात्। न तु शाल्यङ्कुरजनकाभिमतेन शालिबीजरूपेण विकलस्य पृथिव्यादे शाल्यङ्कुरकार्यत्वम्विरुद्धमित्यत आह। **एकरूपेत्यादि। एकस्य** शालिबीजस्य जनक यद्रूपन्तेन **विकलः** पृथिव्यादि**स्त[6]द्रूपः** शालिबीजादिस्वभावो **न स्यात्। नातत्कार्यः** किन्तु तत्कार्य एव। स शाल्यङ्कुर कार्यमस्येति विग्रह। यदि तु बीजस्यैवाङ्कुरजनकत्व स्यात् स्याद् विरोधस्तच्च नास्ति। तदाह। **तेनैवेत्यादि।** शालिबीजेनैव तत्कार्यमङ्कुराख्य।

अपि चेत्यादिना पूर्वोक्त स्मारयति।

120b "एकापाये फलाभावाद् विशेषेभ्यस्तदुद्भव" इति (।) प्रमाणबलेन **वि[7]शेषा जनका** इत्युक्त प्राक्। **तेनात्मनेति** तेन जनकरूपेण। **यदेकस्य** बीजस्य **जनकं**

न विशेषस्वभावाः ।

स्यादेतत् । अभिन्ना अपि[5] तदेकशक्तियोगात जनकाः । तेनाजनकाः प्रोक्ताः । तेन सामान्यरूपेण तेऽजनकाः । तस्यानपायात् । एकत्र स्थितेनाऽपि फलो[6]त्पाद-प्रसंगादित्युक्तम् ।

प्रतिभासोऽपि भेदकः ॥१७३॥

अनन्यभाक् ;

किंच, शब्दा उत्पादस्थितिनिरोधविशेषाः । सर्वार्थाभेदचित्तो यः[7] तस्य 472a
ह्यर्थेषु बुद्धिप्रतिभासभेदो विरुद्धधर्माध्यासात् न वा स्यात । सति वा तस्मिन् अभेदे न क्वचित् स्यात् । तथा चैकात्मवद अय (प्र)विभागो[1] न स्यात । तस्मादयं भिन्नप्रतिभासादिभेद एव न ।

रूपमन्यस्य पृथिव्यादेस्**तन्नास्ति**। न **तावते**ति शालिबीजरूपवैकल्यमात्रेणा **जनकः** पृथिव्यादय । **अप्यभेद** इत्यादि। तेषु भेदेष्वभेदोप्यस्तीत्यर्थ ।

स्यादेतदित्यादिना व्याचष्टे। **तदे**वाभिन्न रूप**मेका शक्ति**स्तया **योगात्**।

तेनेत्या चार्य । **तेना**भिन्नेन[1] रूपेण ते विशेषा **अजनकाः प्रोक्तः**।

सत्यपीत्यादिना व्याचष्टे। **तेन सामान्यरूपेण ते** विशेषा **अजनकाः** (।) किङ्कारण (।) **तस्य** सामान्यरूपस्य नित्यत्वे**नानपायात**। एतच्च "**नापैत्यभिन्न-न्तद्रूपम्विशेषाः खल्वपायिन**" (१।१६७) इत्यादिना प्रागुक्त। (१७२–७३)

"**स्याता नाशोद्भवौ** सकृदि"(१।१७०)त्यादिना **विरुद्धधर्माध्यासाद्** भेद-म्प्रसाध्य प्रतिभासभेदेनापि साधयितु[2]माह । **कि चे**त्यादि। किम्विशिष्ट प्रति-भासभेद (।) **अनन्यभाक्**। प्रतिव्यक्ति भिन्न । **अपि**शब्दादुत्पत्त्यादिभेदश्च भेदक । एतच्च पूर्वोक्तमेव समुच्चीयते।

योपि वे दा न्त वा द्याह । अभावग्रहणनिमित्तको हि भेदग्रहो न चाभाव प्रत्यक्षग्राह्य । तेन प्रत्यक्षेण सत्तामात्रङ्गृह्यते न भेद । तदुक्त।

"गव्यश्वे वोपजातन्तु प्रत्यक्ष न विशिष्यते" (।)

इत्यत आह[3]। **न्याय**मित्यादि। **तस्ये**त्यभेदवादिन । **बुद्धिप्रतिभासभेदो** बुद्धेराकारभेद । विरुद्धधर्माध्यासश्चेति पृथगुत्पत्तिविनाशादिक । **सति वा तस्मिन्** प्रतिभासादिभेदे भावाना**मभेदे**भ्युपगम्यमाने **न क्वचिद्** भेद **स्यात्**। लोकप्रती-तश्च भेद । **तथा चे**त्यभेदे सति **अय प्रविभाग** इति प्रतिभासादिप्रविभाग । **एकात्मवत्**। यथैकस्मिन् सुखात्म[4]नि न प्रतिभासादिभेदस्तद्वत्। **तस्मादयं** बाह्या-ध्यात्मिको भेदो **विशेष एव** परस्परविलक्षण एव। किभूत (।) **भिन्नप्रतिभा-**

न चात्र अभेदप्रतिभासापरदर्शनं अभूतं, यद्बलेन अभेदज्ञानं जायेत। ततो विशेष एव सोऽर्थः।

स एवार्थस्तस्य[2] व्यावृत्तयोऽपरे।
तत् कार्यं कारणञ्चोक्तं तत्स्वलक्षणमिष्यते ॥१७४॥
तत्त्यागाप्तिफलाः सर्वाः पुरुषाणां प्रवृत्तयः।

योर्थक्रियाकारी स एव वस्त्विति युक्तम्। स च विशेष एव। यच्च[3] सामान्यमिति तद्धि तस्यैव व्यावृत्तिः। न हि तस्यार्थत्वे दृश्यस्य रूपानुपलक्षणं युक्तम्। भेदेषु अभेदप्रत्ययस्य तदुपलक्षणकृतत्वात्।

अपि[4] च—

यथा भेदाविशेषेऽपि न सर्वं सर्वसाधनम् ॥१७५॥
तथा भेदाविशेषेऽपि न सर्वं सर्वसाधनम्।

सादिः। भिन्न प्रतिभासादिर्यस्येति विग्रहः।

निर्विकल्पकबोधेन द्व्यात्मकस्यापि वस्तुनो ग्रहणादभेदोपीति चेदाह। **न चात्रेत्यादि। अत्रेति** भेदेषु। **अपरमिति** द्वितीय। **यद्बलेनाभिन्नप्रतिभासबलेन। ततो विशेष[5] एव** भेद एव। न त्वभेदोस्ति। स एव विशेषो वस्तु।

ये त्वपरे सामान्यधर्मा वस्तुत्वादयस्तस्यैव व्यावृत्तय. कल्पिता। (१७३–७४)

तत्कार्यमित्यादि। कार्यादिपदसामानाधिकरण्यान्नपुसक। अन्यथा विशेशस्य प्रक्रान्तत्वात्स इति स्यात्। **तदेव** विशेषरूप **कार्यं कारणं चोक्तन्तदेव** स्वलक्षणमुच्यते (।) **तत्त्यागाप्तिफला** इति तस्यैव विशेषस्य हेयस्यो[6] पादेयस्य वा यथाक्रम त्याग आप्तिश्च फल यासाम्प्रवृत्तीनान्तास्तथोक्ता। **स चार्थक्रियाकारी विशेष एव। तस्यैवेति** विशेषस्यापरस्माद् विजातीयाद् भेदो व्यावृत्तिमात्र। न तु वस्तुभूत किञ्चित् सामान्य नाम।, (१७४–७५)

यदि हि स्यात् तदुपलब्धिलक्षणप्राप्तम्भेदव्यतिरेकिणोपलभ्येत। हि यस्मा-
1212 त्। **न हि तस्य** सामान्यस्यार्थत्वे वस्तुत्वे सति **दृश्यस्य सतः। रू[7]पानुपलक्षणं स्वरूपाग्रहण युक्तं**। कस्मात्। **तदुपलक्षणकृतत्वात्** सामान्योपलक्षणकृतत्वाद् **भेदेषु** भेदप्रत्ययस्य। न हि स्वयमगृहीतम्परत्र ज्ञानहेतुः।

एवन्तावत् मी मा स का दिमतेन प्रातिभासिक सामान्य निराकृत्यानुमानिकमपि पूर्वोक्त सा ख्य मतेन निराकर्त्तुमाह। **अपि चेत्यादि**। यथा साख्यस्य भेदाविशेषेपि न **सर्वं सर्वसाधनं। तथा** बौ द्ध[1]स्य **भेदाविशेषेपि न सर्वं सर्वसाधनं**। कस्य पुनश्चोद्यस्याय समाधिरित्याह। **यदुक्तमित्यादि। तज्जनकस्वभावादिति** (।)

एवं जनकस्वभावात् भेदजनकं स्यात्। जनकत्वेऽपि[5] अविशेषात् सर्वो जनकः स्यादिति यदुक्तम्। अत्र चोद्ये। यदि अविशेषभूतं, तथा च सति यथाऽऽत्मत्वाभेदवादिनोऽत्र अभेदस्य विशेषाभावे[6]ऽपि न सर्वो सर्वजनकः, तथा विशेषेऽपि भविष्यति।

अथवा—

भेदे हि कारके किञ्चिद् वस्तुधर्म्मतया भवेत् ॥१७६॥
अभेदे तु विरुध्येते तस्यैकस्य क्रिया[7]क्रिये। 472b

भेदमात्राविशेषेऽपि स्वहेतुप्रत्ययनियमितस्वभावत्वात्, कश्चिदेव कारकः स्यान्नान्ये, अतत्स्वभावलक्षणत्वात्। तथा नात्र कश्चिदपि[1] विरोधः।

एकत्वेऽपि न तत् तस्मादेव एवं कारकत्वाकारकत्वे इति।

एकत्वेऽपि न तस्य तत्रैव तथा कारकत्वाकारकत्वे इति हि विरोधः।

भेदोप्यस्ति क्रियातश्चेत् न कुर्युः सहकारिणः ॥१७७॥

अथ सर्वाकारेषु अभेदो नो[2]च्यते भेदस्य भावात्। ततश्च न कारकं किंचिदपि। तथा चेत् केनाऽपि प्रकारेण भेदात् सहकारी हि कारको न स्यात्।

पर्यायेणाथ कर्तृत्वं स किं तस्यैव वस्तुनः।

शाल्यङ्कुरजननस्वभावाद् भिन्न पृथिव्यादि। अस्येत्यङ्कुरस्य। **जनकत्वे** वाभ्युपगम्यमाने भेदस्या**विशेषात् सर्वो जनकः स्या**दिति। **अत्र** चोद्ये उक्तमेवोत्तर। इदन्तु द्वितीयमुच्यते। कि पुनरुक्तमित्याह। **यदी**त्यादि। प्रतिनियत[2]कार्यजनकाजनकत्वलक्षणो विशेषो न स्यात्। (१७५–७६)

स्यादेतच्चोद्यमिति।

यथेत्यादिना श्लोकार्थमाह। **तथा विशेषेपि भविष्यति। न सर्वः सर्वजनक** इति सम्बन्धः। **वस्तुधर्मतये**ति वस्तुशक्त्या। भावाना**मभेदे** त्वभ्युपगम्यमाने। तस्य सर्वत्राभिन्नत्वेनाभ्युपगतस्यैकत्र **क्रियाक्रिये विरुध्येते**। (१७६–७७)

भेदमात्रेत्यादिना व्याचष्टे। **हेतु**रुपादानकारण। **प्रत्यया**[3]स्सहकारिण (।) **स्वहेतुप्रत्ययाः** स्वहेतुप्रत्ययास्तै**र्नियमितो** विशिष्टकार्यनिर्वर्त्तनसमर्थं कृत **स्वभावो** येषान्ते तथोक्ता। तद्भावस्तस्मात्। **नान्य** इत्यकारकाभिमता न **कारका स्युः। किङ्कारणम्** (।) अतत्स्वभावत्वात्। अतत्कार्यजननस्वभावत्वात्। **तस्ये**त्येकस्य त्रैगुण्यस्य। **तत्रैवे**त्येकस्मिन्नेव कार्ये। **तथे**ति तेनैवाभिन्नेन प्रकारेण। तथापि यदा शा[4]लिबीज शाल्यङ्कुर जनयति तदैव न यववीज शाल्यङ्कुर जनयति। यश्च शालिबीजस्यात्मा। स एव यवबीजस्येत्येकत्रैकस्य क्रियाक्रिये प्रसज्येते।

अथ च[3] न किञ्चिदपि कारकं, अभावः स्यात्। सर्वेषां सर्वत्र पर्यायेणोपयोगात्, तन्निवेशिन्या रूपान्तरेण परिणतायाउपयोगात् एकस्य कथं न तस्यैवैकस्य पर्यायस्य[4] आश्रयो वा। अभिन्नपरिणामो वा। विशेषे वा कथंचिद् एकत्वहानिरिति न किंचिदपि युक्तम्।

किञ्च--

अत्यन्तभेदाभेदौ च स्यातां तद्वति वस्तुनि ॥१७८॥

त्रैगुण्यस्य तेन तेन शालिवीजादिसन्निवेशेन भेदोप्यस्ति। अतो भेदात् कस्यचिद् क्रिया चेत्। "भेदश्चेदक्रियाहेतुर्न कुर्युः सहकारिण।" तेषामपि परस्पर भेदात्।

नेत्यादिना व्याचष्टे। सर्वाकारा धिय[5] किन्तस्यैवैकस्य वस्तुन। नैवेत्यर्थ। भेदाधिष्ठानत्वात्। पर्यायस्येति भाव।

अथेत्यादिना व्याचष्टे। **सर्वेषाम्**भेदाना **सर्वत्र** कार्ये **पर्यायेण क्रमेणोपयोगात्।** एतच्च यदा प्र धा न शक्त्याधिष्ठितानामेव भेदानामपरापरपरिणामेन कार्यकर्तृत्वमिति दर्शनन्तदोक्त। यदा त्विद दर्शनम्प्रधानशक्तिरेवापरापररूपेण परिणामार्थ-
121b क्रिया[7]यामुपयुज्यते तदेदमुच्यते (।) **शक्तेर्वेत्यादि**। त्रैगुण्यलक्षणायास्त**न्निवेशिन्याः** पूर्वमकारकाभिमतपदार्थनिवेशिन्या पश्चाद **रूपान्तरेण** कारकाभिमतरूपेण **परिणताया** उपयोगान्नैव कश्चिदकारकोस्तीत्यनेन सम्बन्ध। **भेदो** नानात्वमाश्रयो यस्य **पर्यायस्य** स तथोक्त। एकस्याभेदस्य **कथञ्चैव**। शालिबीज**स्यैकस्य** यवबीजादिरूपतया परिणामो न यु[1]क्त इत्यर्थ।

एतेन **स किन्तस्यैव वस्तुन** इत्येतद् विवृत। (१७७-७८)

शक्तेर्वेति यदुक्तन्तत्राह। **परिणामो** वेति। **अव्यतिरेकिण्या** इति निर्विभागाया शक्ते परिणामो वावस्थानान्तरप्राप्तिर्वा कथ। अथेष्यतेऽवस्थान्तराणा प्राप्तिरात्मभूतैव त्रैगुण्यस्य। ततो **विशेषे** वा **कथंचिद**भ्युपगम्यते। प्रधान**स्यैकत्वहानिरिति।**

एवन्तावत्परिणामपक्ष निराकृत्याधुनाऽभि[2]न्नम्वा भिन्नाभिन्नम्वा भिन्नम्वा सर्वासु चोत्तरोत्तरावस्थास्वनुयायित्वादूर्द्ध(?र्ध्व)वृत्ति वा। **समं सर्वासु व्यक्तिष्वनुयायित्वात्** तिर्यग्वृत्ति वा सामान्यमभ्युपगम्य सा ख्य मी मा स क नै या यि काद्यभिमत दूषयितुमाह। किचेत्यादि।

तेन योपि दि ग म्ब रो मन्यते (।) नास्त्याभिर्घटपटादिष्वेक सामान्यमिष्यते तेषामेकान्तभेदात्। किन्त्वपरापरेण पर्यायेणावस्थास[3]ज्ञितेन परिणामि द्रव्यमेतदेव च सर्वपर्यायानुयायित्वात् सामान्यमुच्यते। तथा हि सुवर्णात्मक घट भङ्क्त्वा

अन्योन्यं वा तयोर्भेदः सदृशासदृशात्मनोः ।

मौलिनिर्वर्त्तने तदेव सुवर्णद्रव्य घटरूपतया विनश्य मौलिरूपतयोत्पद्यमान सुवर्णस्वभावेन तिष्ठतीत्यपरापरावस्थाया परिणामि। तत्सामान्यमित्युच्यते। परिणामित्वादेव चावस्थातद्वतोरभेदोन्यथावस्थातु सकाशादवस्था[4]या भेदे परिणामायोगात्। घटात्मतया च सुवर्णद्रव्यस्य विनाशुपटार्थी शोक प्रतिपद्यते। मौलिरूपतयोत्पादे तदर्थी प्रामोद्य प्रतिपद्यते (।) सुवर्णतया च विनाशोत्पादाभावे सुवर्णार्थी माध्यस्थ्य प्रतिपद्यते (।) तेन युगपदुत्पादव्ययध्रौव्ययुक्त सदिति वस्तुनो लक्षणमिति। तदाह।

"घटमौलिसुवर्णार्थी वि(?)नाशोत्पादस्थितिष्वय।
शोकप्रमोदमाध्यस्थ जनो याति सहेतुक।
न नाशेन विना शोको नोत्पादेन विना सुख।
स्थित्या विना न माध्यस्थन्तस्माद् वस्तु त्रयात्मक।
पयोव्रतो न दध्यत्ति न पयोत्ति दधिव्रत ।
अगोरसव्रतो नोभे तस्माद् वस्तु त्रयात्मक।
न सामान्यात्मनोदेति न व्येति व्यक्तमन्वयात्।
वे (व्ये)त्युदेति विशेषेण सहैकत्रोदयादि सदि"ति।

सोप्यत्र निराकृत[6] एव द्रष्टव्य । **तद्वति** सामान्यविशेषवति वस्तुन्यभ्युपगम्यमाने। **अत्यन्तमभेदाभेदौ** स्याता। विशेषेभ्यो घटपटादिभ्य सामान्यस्य त्रैगुण्यादिलक्षणस्याव्यतिरेकात् सामान्यमपि विशेषात्मकमित्यत्यन्तभेद स्यात्। सामान्यस्याभावात्। सामान्याद् विशेषाणामव्यक्तिरेकादैक्यमित्यन्ताभेदो विशेषाणामभावात्। एकम्भेदसामान्यात्मक[7] नास्तीति यावत्। 122a

अथ सामान्यविशेषयो कथचिद् भेद इष्यते। अत्राप्याह। **अन्योन्य**मित्यादि। **सदृशासदृशात्मनो**स्सामान्यविशेषयोर्यदि कथचिदन्योन्यम्परस्परम्भेदस्तदैकान्तेन तयोर्भेद एव स्यात्। घटपटवत्। न चार्थान्तर सामान्य प्रतीयते। तस्मान्नैक सामान्यविशेषात्मक वस्तु विद्यते। दि ग म्ब र स्यापि तद्वति वस्तुन्यभ्युपगम्यमानेऽत्यन्त[1]भेदाभेदौ स्याता। यदा घटाद्यवस्थाभेदेभ्य सुवर्णत्वसामान्यस्याभेदस्तदात्यन्तमेकान्तेन भेद स्याद् घटमौल्यादे। सुवर्णत्वसामामान्यस्याभावात्। अथ सुवर्णत्वसामान्याद् घटमौल्याद्यवस्था भेदानामभेदस्तदात्यन्तमभेद एकान्तेनैकत्व सुवर्णरूपतैव स्यादित्यर्थ। अथावस्थातद्वतो स्वभावाभेदे सत्यपि लक्षणभेदाद् भेद इष्यते। तथा हि सुवर्णत्व[2] सामान्यस्य स्वरूप सर्वावस्थानुयायि प्रतीयते (।)

अथाऽभिन्नेनात्मना स्वात्मभूतेन भिन्नस्वभावाः तदभिन्नस्वभावात्मत्वात् तद्वन्तः स्युः। भेदस्यापि कुतो[6] भेदः परस्परम्।

सामान्यस्य च तस्य न तदात्मता। तेनाऽपि तदात्मना तथा भवितुं न युक्तम्।

473a **तथाभावे हि तद्धर्मा स्यात्। न ह्ययं एकः प्रवृत्तिनिवृत्तिस्वभावो युक्तः[7]।**

न सर्वात्मनाऽभेद एव।

घटाद्यवस्थाना स्वरूप व्यावृत्त प्रतीयते। तेनावस्थातद्वतोर्लक्षणभेदाद् भेदोस्त्येवेत्यत्राह। **अन्योन्य**मित्यादि। **सदृशासदृशात्मनो**रित्यवस्थातद्वतोर्यदि भेदस्तदा तयोरन्योन्यम्भेद परस्परमेकान्तेन भेद स्यात्। अनुगतव्यावृत्तिरूपयोः परस्परासंश्लेषात्। न चापर स्वभावोस्ति येन तयोरभे[3]द स्यादनन्तधर्मात्मकस्य धर्मिणोऽप्रतीते ( )। **भावाश्चेद् भेदिन** इति सम्बन्धः। **अभिन्नेनात्मना** प्रधानाख्येनान्येन वा। वस्तुत्वादिना सुवर्णत्वेन वा तेषामेव घटादीनाम्भेदाना **स्वात्मभूतेना**व्यतिरिक्तेन तद्वन्त. स्यु**रभिन्नस्वभाववन्तः** स्यु। तेषा प्रधानादीनामभिन्नः स्वभावस्तदभिन्नस्वभाव आत्मा रूप यस्य भेदस्य घटादिलक्षणस्य स **तदभि[4]न्नस्वभावात्मा**। तद्भावस्तस्माद् (।) भेदस्यापि कुतो भेद परस्पर। नैव। अनेनात्यन्ताभेदो व्याख्यातः।

अथ तस्य भेदस्य घटादिलक्षणस्य समान एक आत्मा न भवति। भेदस्य घटादिरूपेणानेकात्मकत्वात्। तथा सति **तदात्मना** भेदस्वभावेन **तेनापि** सामान्यपदार्थेन त्रैगुण्यादिना **तथेति** सामान्यात्मना **भवितुन्न युक्तं**। भेदादव्यतिरिक्त[5]त्वात् सामान्यस्य समानता न प्राप्नोतीत्यर्थ। एतेनात्यन्तभेदो व्याख्यात।

तथाभावे हीति सामान्यात्मकत्वे प्रधानादेरिष्यमाणे प्रधानाद्यात्मा**ऽतद्धर्मा** भेदधर्मा **न स्यात्**। अव्यतिरेकिणावस्थाख्येन धर्मेण तद्वान्न स्यादित्यर्थ.। अवस्थातद्वतोः परस्परतो भेद स्यादिति यावत्। तमेव साधयन्नाह। **न ह्ययं**मित्यादि। **अयमेकः** स्व[6]भाव **प्रवृत्तिनिवृत्तिमान्न युक्त** इति सम्बन्धः। **स्थानं** प्रवृत्ति। **विगमो** निवृत्ति। तथा हि प्रधानशक्तौ स्थिताया सुवर्णद्रव्यत्वादौ च स्थितेऽवस्थानान्निवृत्तिरिष्यते। **एतेनान्योन्यम्वा तयोर्भेद** इत्यादि व्याख्यात।

नेत्यादिना पराभिप्रायमाशकते। **न सर्वात्मना** सामान्यविशेषयो**रभेद एव**
122b किन्तु **तयोरपि** भेदसामान्ययोर्**भेदो भवे[7]द्यदि**। **न** हीत्यादिना व्याचष्टे। क्वचिद् द्रव्ये सामान्यविशेषस्य परस्परम्**भेदोऽभेदो वैकान्तिको** न हीति सम्बन्ध। किङ्कारण (।) **विवेकिने**त्यादि। **सामान्यं** शक्ति सुवर्णत्वन्द्रव्यत्वञ्चाविशेषो घटादय इत्येवभेदेन **व्यवस्थापनात्**।

तयोरपि भवेद्भेदो यदि;

न हि क्वचिद् भेदोऽभेदो वैकान्तिकः, सामान्यविशेषेति व्य[1]वस्थापनात्।

येनात्मना तयोः ॥१७९॥

भेदः सामान्यमित्येतद्यदि भेदस्तदात्मना।

यदि स भेदः सामान्यविशेषयोर्यमात्मनमाश्रित्य सामान्यविशेषेति तेनात्मना भेदस्तदा[2] व्यतिरेक एव। यस्मात् तौ यदि तयोरात्मानौ व्यतिरेकिणौ तदा व्यतिरेक एव, सामान्यविशेषयोर्हि स्वभावभेदात्।

स्वभावो हि भावः। एवं हि--

भेद एव तथा च[3] स्यान्निःसामान्यविशेषता ॥१८०॥

भेदसामान्ययोर्यद्वद् घटादीनां परस्परम्।

व्यतिरेके च सामान्यविशेषयोर्भेदेऽपि न सामान्यवद परस्परसम्बन्धाभावात्। घटादि[4]वदित्युक्तम्।

अपि च--

येनेत्या चार्यं। तयोर्भेदसामान्ययोरय भेद इद सामान्यमित्येतद्येनात्मना व्यावर्त्तेनानुगतेन च स्वभावेन भेदो व्यव[1]स्थाप्यते। यदि तेनात्मना सामान्यविशेषयोर्भेदस्तदा भेद एवात्यन्त। (१७९)

यदीत्यादिना व्याचष्टे। यमात्मानमित्यनुगत व्यावृत्तञ्च। तेनात्मना सामान्यविशेषयोर्यदि भेद इति सम्बन्ध। एतदेव स्फुटयन्नाह। यस्मादित्यादि। तौ भेदव्यवस्थापकावात्मानौ तयोरिति सामान्यविशेषयो। स्वात्म(ा)नौ स्वभावभूतौ। तौ चेदनुगतव्यावृत्तावात्मानौ व्यतिरे[2]किणौ परस्परव्यावृत्तौ तदा व्यतिरेक एव भेद एव। किङ्कारण (।) स्वभावभेदात्। (१७९-८०)

स्यान्मतम् (।) अवस्थाऽवस्थात्रोर्भेदव्यवस्थापको हि स्वभाव एव भिद्यते न भाव इत्याह। स्वभावो हीत्यादि। स्वभाव एव भाव इत्यर्थ। तथा चेति (।) भेदसामान्ययोरत्यन्तभेदे सति। भेदस्य निस्सामान्यता। सामान्यस्य च निर्विशेषता स्यादिति सम्बन्ध. (।) सामान्यस्य भेदवत्त्व भे[3]दाना च सामान्यवत्त्व न स्यात् सम्बन्धाभावादिति यावत्। यद्वद् घटादीनां भेदाना सम्बन्धाभावात् परस्परन्तद्वत्ता नास्ति। (१८१)

व्यतिरेके चेत्यादिनार्थमाह। भेदसामान्ययोरजन्यजनकत्वेन सम्बन्धाभावात्। भवति च तयोस्सम्बन्धितया प्रतीतिस्तस्माद् भ्रान्तत्वमुक्तमिति "न स्यात् सामान्यभेदधीरि"त्यत्रान्तरे (१।१७१)।(१८०-८१)

यमात्मानं पुरस्कृत्य पुरुषोयं प्रवर्तते ॥१८१॥
तत्साध्यफलवाञ्छावान् भेदाभेदौ तदाश्रयौ ।
चिन्त्येते स्वात्मना भेदो व्यावृत्त्या च समानता ॥१८२॥
अस्त्येव वस्तु नान्वेति प्रवृत्त्यादिप्रसङ्गतः ।

गौरश्वाद् भिन्नोऽभिन्नो वेति व्यतिरेकाव्यतिरेकप्रश्नकरणम्। सर्व एव व्यतिरेको वस्तुनः स्वभाव[6] इति अधिकृत्य प्रवर्त्तते ।

स एव हि तत्र वचनमिति वाच्यम्। न ह्येतेन द्रव्यत्वादिवचनम्। यथात्मवत

एवमूर्ध्वसामान्यवाद दि ग म्व रा द्यभिम[4]त। तिर्यक्सामान्यवादञ्च सा ख्या द्यभिमत साधारणदूषणेन निराकृत्य पुनस्तिर्यक्सामान्यवादमेव दूषयितु-माह। **अपि** चेत्यादि।

एतदुक्तम्भवति (।) अर्थक्रियार्थिन सामान्यविषयभेदाभेदचिन्तया न किञ्चित् प्रयोजनमर्थक्रियारहितत्वात्। किन्तु। **यमात्मान**मर्थक्रियायोग्य **पुर-स्कृत्या**लम्बनीकृत्य। **तत्साध्यफलवाञ्छावान्।** तेनात्मना[5] यत्साध्यम्फलन्त दभिलाषावान्। **अयं पुरुषः प्रवर्त्तते**। **तदाश्रया**वर्थक्रियासमर्थाधिष्ठानौ **भेदा-भेदौ** चित्येते। तस्य चार्थक्रियायोग्यस्य **स्वात्मना** स्वेन रूपेण **भेद** आत्यन्तिको-स्त्येव। **व्यावृत्त्या** च विजातीयव्यावृत्तेन रूपेण **समानता**स्त्येवाध्यवसितैकत्व रूपया। इयतैवार्थक्रियार्थिनो भेदाभेदचिन्ता समाप्ता।' ततोनर्थक्रियाकारिण सामान्यस्य कि[6] स्वलक्षणे भेदाभेदचिन्तयेति। (१८१–८२)

ननु चार्थक्रियार्थिन पुरुषस्य व्यावृत्त्यापि समानताया किम्प्रयोजनमर्थक्रिया रहितत्वात्।

सत्य (।) स्वलक्षणान्येव व्यावृत्त्या सामान्यमुच्यते शब्दात्तत्रैकत्वाध्यव सायेन प्रवृत्तिर्यथास्यादित्यदोष ।

अथ स्यात् स्वलक्षणमेव स्वलक्षणान्तरानुयायीति कि परिकल्पितया व्यावृ
123a त्त्येत्याह। स्वलक्षणानाम्परस्परम्भेदात्[7]। यदि घटरूपम्पटे स्यादुदकाहरणार्थी पटेपि **प्रवर्त्तेत**। तदाह। **प्रवृत्त्या**दीत्यादि। **आदि**शब्दात् तुल्योत्पत्तिनिरोधा दिप्रसङ्ग ।

सर्व एवेत्यादिना व्याचष्टे। विशेषमेवार्थक्रियायोग्य स्वभावाख्यमात्म भूतमित्यर्थ । कस्य भावस्य वस्तुनो**धिकृत्य प्रवर्त्तते**। स **एव हीन्यर्थ**क्रियाकारी विशेष । **तथेति**। गौरित्यादिशब्दै । अर्थक्रियार्थी हि स्व[1]लक्षणप्रतिपादना भिप्राय एव शब्द प्रयुङ्क्ते दृश्यविकल्प्ययोरेकीकृत्य। प्रतिपत्तापि तथैव प्रति

पृथगभिधानात्। अर्थस्य हि तेनाऽव्यभिचारात् ततः[7] कल्पनात्। निर्लोठितं 473b
चैतदाचार्येण।

तद् गवादिशब्दप्रत्युपस्थापितमर्थं भिन्नमभिन्नं वा पृच्छन्, अर्थान्तरस्य उपन्यासेन तत्र द्विधा बुद्धिः कुतः क्रियते। तस्माद् योस्यात्मा[1]ऽनन्यसाधारणः तं पुरस्कृत्य विशिष्टार्थक्रियार्थी पुरुषोऽय प्रवर्त्तते। यथा गोर्वाहदोहादौ नान्यसम्भाविन्यर्थं। यथा युद्ध[2]प्रवेशे यथास्व शब्देनोच्यते, न द्रव्यत्वादि सामान्यम्।

पद्यते। ततो व्यवहर्त्तृणामध्यवसायवशाच्छब्दव्यापारापेक्षयैतदुक्त। शब्दे तु ज्ञान **स्वलक्षणप्रतिभासो** नास्तीति स्वलक्षणमवाच्यमुक्तमित्यदोष।

द्रव्यादयस्तु न तत्रेति। गौरित्यादिशब्दैर्गवादिचोदनाया। कस्मात् यथास्व द्रव्यत्वादिशब्दैस्तेषाङ्ग[2]वादे **पृथगभिधानात्** गोद्रव्यमित्यादिना। कथन्तर्हि गौरित्यादिपदप्रयोगे सत्ताद्रव्यत्वादय प्रतीयन्त इत्याह। **अर्थस्येत्यादि**। अर्थस्य गवादे। **तेन** सत्त्वद्रव्यत्वादिनाऽव्यभिचारात्। ततोर्थाद् गति सामान्याना स्यात्। न तु विशेषशब्द सामान्ये व्याप्रियते। **निर्लोठितं चैतदाचार्य** दि ङ् ना गे न सा मा न्य प री क्षा दौ यथा न विशेषशब्दाना सा[3]मान्ये वृत्तिरिति।

अत्र चोद्यते। कस्य पुन सामान्यस्य विशेषेणाव्यभिचार। यत्तावत् परपरिकल्पितन्नास्त्येव। यच्चान्यव्यावृत्तिलक्षण प्रसज्यमात्रन्तदपि नास्त्येव। नापि विकल्पबुद्धिप्रतिभासिनो बाह्येनाव्यभिचारोस्ति तस्य स्वतन्त्रत्वात्।

उच्यते। स्वलक्षणमेव सजातीयव्यावृत्तम्विशेष। तदेव विजातीयव्यावृत्तिमपेक्ष्याभेदे[4]नोपात्त सामान्यमित्युच्यते। तत सामान्यविशेषयोर्वस्तुत एकत्वात्। कृतकत्वानित्यत्वयोरिवाव्यभिचार। शब्दव्यापारभेदात्तु केवल **क्वचिच्छाब्दी** प्रतिपत्ति क्वचिदार्थीत्युच्यते। **तदिति** तस्मादय पुरुष। **गवादिशब्दप्रत्युपस्थापितङ्** गवादिशब्दसन्निधापितमर्थमर्थक्रियाश्रय। **अर्थान्तरस्य** सामान्यस्योपन्यासेन भेदसा[5]मान्याकारतया द्विमुखा बुद्धिर्यस्य स तथोक्तः। **योस्य गवादेरात्मा** स्वभाव.। **अनन्यभावसाधारणस्स** एव स्वभाव शब्दचोदित इति वक्ष्यमाणेन सम्बन्ध। यमर्थ सास्नादिमन्त **पुरस्कृत्यालम्बनीकृत्य** विशिष्टार्थक्रियार्थी। तमेवाह। **यथेत्यादि**। यथा गोर्वाहदोहादावर्थी गामधिकृत्य प्रवर्त्तते। **अन्यसम्भविन** इति गोरन्यस्मिन्नश्वे स[6]म्भविनोर्थस्यार्थी गा पुरस्कृत्य न प्रवर्त्तत इति वाक्यार्थ समर्थनीय। कोर्थोन्यसम्भवीत्याह। **यथा युद्धप्रवेश** इति। यथास्वमिति यस्य य· शब्दो वाचक। **न द्रव्यत्वादि सामान्यं। चोदित**मिति लिङ्गविपरिणामेन सम्बन्ध। तच्चोदनया गवादीना गवादिशब्दैश्चोदनया। **तदेत्यर्थक्रियार्थिन**

तद्वचनं तदा प्राप्तुमनभिप्रेतत्वात्, गवादिसमावेशात्, तदात्म[3]भूतानां अननुगमात्मतया तत्रानुभयरूपत्वात्।

तमेव भावं तत्रैव च प्रकारैः पर्यनुयुक्ते। तस्य भेदेऽपि द्रव्यत्वाद्यभेदोऽस्या[4]बाधक एव। सर्वत्र व्यावृत्तिलक्षणस्य च सामान्यस्य स्वभावभेदाभ्युपगमात्।

स्वभावभूतस्य सामान्यस्याभेद इत्युक्तम। स्वात्मनैवाभेदे तन्निबन्धनक्रियार्थी समं द्वयोरपि प्रवर्त्तेत, एकोऽपि तद्भावत्वात्। तस्य हि अर्थक्रियाकारित्वे तदन्यस्यापि तत् तुल्यमिति सोऽपि किम् न करोति ?

123b प्रवृत्तिकाले। **प्राप्तुमनभिप्रेतत्वाद्** द्रव्यत्वादिसामा[7]न्यस्येति। विभक्तिविपरिणामेन सम्बन्धः। कस्मात् पुनर्गवादिशब्देन द्रव्यत्वादिसामान्य चोदयितु नाभिप्रेतमित्याह। **गवादिसमावेशाद्** गवादिशब्दस्य गवादौ लोके सकेतितत्वात्। गवादिस्वभावत्वाद् द्रव्यत्वादिसामान्यस्य गवादिचोदनयाऽभिधानमिति चेदाह। **तदात्मभूतानां** चेति। गवादिस्वभावाना द्रव्यत्वादिसामान्याना गवादिवदेवानन्वयेन हेतुना[1] **तत्रेति** तस्य गवादिभेदस्य। **अनुभयरूपत्वा**दसामान्यविशेषरूपत्वादेवेति यावत्। ततश्च विशेष एव चोद्यते।

तदेवाह। **तमेवेत्यादि**। तमेव चानन्यसाधारणम्**भाव**मर्थक्रियार्थी पुरुषो भेदाभेद**प्रकारैः पर्यनुयुङ्क्ते**। अन्या पोहवादि नोपि व्यावृत्तिलक्षणो द्रव्यत्वाद्यभेद स्वलक्षणानामिष्टस्ततोऽत्यन्तभेदो विशेषाणा विरुद्ध इत्यत आह[2]। **तस्येत्यादि**। तस्यार्थक्रियाकारिणोर्थस्य **भेदे** प्रकृत्या स्थिते सति व्यावृत्तिलक्षणो **द्रव्यत्वाद्यभेदो**स्य विशेषस्या**बाधक एव**। तस्य कल्पितत्वात्। तस्मात् पारमार्थिको भेद। स्वलक्षणानामुपकल्पितमेकत्वमनेन च प्रकारेण भेदाभेदाविशिष्टावस्माक (।) तदेव दर्शयन्नाह। **सर्वत्रेत्यादि**। **स्वभावेन भेदः** स्वजातीयविजातीयात्। **सामान्यस्य च व्यावृत्तिलक्षणस्याभ्युपगमादिति** सम्बन्धः।

न व्यावृत्तिरूपेण सामान्येनाभेद किन्तु वस्तुभूतेनैवेति चेदाह। **स्वभावभूतस्येत्यादि**। वस्तुभूतस्य **सामान्यस्याभेद इति** व्यक्तिभ्योनर्थान्तरत्वे। **उक्त**मिति सामान्यादव्यतिरेकाद् भेदानामैक्य। भेदवदेव वा सामान्यस्याप्यनेकत्वमित्युक्त प्राक्। न सामान्यद्वारेण भेदानामैक्यमित्युच्यते। किन्तु योसौ विशेष[4]स्तेनैवाभेद इत्याह। **स्वात्मनैवेत्यादि**। स्वेनैव विशेषरूपेण गवाश्वादीनामभेदे **तद्** गोद्रव्य **निबन्धनं** यस्या अर्थक्रियाया वाहदोहादिलक्षणायास्त**यार्थी** पुरुषः (।) **समम**ित्युभयत्राप्यवसितगवादिभाव.। **द्वयोरपी**ति गवि चाश्वे चैव। यस्मा**देकोपि** हि कारणत्वेनाभिमतो गोपदार्थस्तामर्थक्रियाम्वाहदोहादिस्वभावा।

ग. जैनमतनिरास:

एतेनैव यदह्रीका: किमप्यश्लीलमाकुलम् ॥[1]१८३॥
प्रलपन्ति प्रतिक्षिप्तं तदप्येकान्तसम्भवात् ।

दिगंबराणां इदं च किमप्ययुक्तं अश्लीलमहेयोपादेयमपरिनिष्ठानात् आकुले "स्यादुष्ट्रो दधि न स्यादि"ति यैरुक्त तेऽपि एतेनैव प्रक्षिप्ताः । भावेनैव 474a
एकान्तभेदात् ।

तदन्वये वा—

तत्स्वभावत्वात्तदर्थ[5]क्रियाकरणस्वभावत्वादेव करोति । तदन्यस्यापि तस्माद् गोद्रव्यादन्यस्याप्यश्वस्य **तद्वाहदोहादिकरणस्वभावत्वन्तुल्यमिति सोप्यश्व** गोसाध्यामर्थक्रिया **किन्न करोति** ॥०॥ (१८२–८३)

एतेनैवेति सर्वस्यार्थस्य भेदसाधनेन । **अह्रीका** नग्नतया निर्लज्जा क्ष प ण का । अयुक्ताभिधानस्य कुत्सितत्वात् किमपीत्याह । **अश्लीलङ्ग्राम्य** । सर्वं [6] सर्वस्वभावो न च सर्वं सर्वस्वभाव इति यत् **प्रलपन्ति प्रतिक्षिप्तन्तदपि** तस्मा**देकान्तसम्भवात्** । एकस्यैवान्तस्यात्यन्तभेदप्रकारस्य सम्भवात् । (१८३–८४)

ननु दि ग म्व रा णा सर्वं सर्वात्मक न सर्व सर्वात्मकमिति नैतद्दर्शनन्तत्किमर्थ-मिदमा चा र्ये णो च्यते ।

सत्य (।) यथा दर्शनन्त्व"त्यन्तभेदाभेदौ च स्यातामि"(१।१७८)त्यादिना पूर्वमेव दूषित ।

यत्पुरनरेतदुक्त[7](।)तद्यथा कटकेयूरादिषु सुवर्णप्रत्ययस्यानुयायिनस्सद्भा- 124a
वास्सुवर्णत्वसामान्य कल्प्यते । तथा घटपटादिषु द्रव्यत्वादिप्रत्ययस्यान्वयिन सद्भावाद् द्रव्यत्वसामान्यमेक किन्नेष्यते । न चेष्यतेऽभिन्नप्रत्ययसद्भावेपि तथा कटककेयूरादिषु सामान्यकल्पना माभूदित्येवम्परमेतत् ।

स्यादुष्ट्रो दधि । द्रव्यादिरूपतयैकत्वात् । स्यान्न दधि उष्ट्रावस्थातो दध्य-वस्था[1]या भिन्नत्वात् । अश्लीलमित्यस्य व्याख्यान**मयुक्त**मिति । तस्यायुक्तत्वात् । विद्वज्जनायोग्यतया ग्राम्यमिति भाव । अश्लीलमित्यस्य ग्राम्यपर्यायत्वात् । **अहे-योपादेय**मिति । अत्याज्यमग्राह्यञ्च । कस्मा**दपरिनिष्ठानात्** । यदि हि किंचित्सुख-साधनत्वेन निश्चितमन्यच्च दु खसाधनत्वेन तदा यथाक्रम हेयमुपादेय वा स्यात् । तच्च नास्ति यत: सर्वस्य[2] सर्वस्वभावत्व (।) न च सर्वस्य सर्वस्वभावत्व । अत **एवाकुल**मेकस्यापि स्वभावभेदस्य गृहीतुमशक्यत्वात् ।

सर्वस्योभयरूपत्वे तद्विशेषनिराकृतेः ॥१८४॥
चोदितो दधि खादेति किमुष्ट्रन्नाभिधावति ।

एवं उष्ट्रोऽपि स्याद् दधि । नापि स एव उष्ट्रः, येनाऽन्योऽपि स्यादुष्ट्रः, तथा दध्यपि[2] स्यादुष्ट्रः । नापि तदेव दधि, येनान्यत् स्याद् दधि ।

तदनयोरेकस्यापि वा कस्यचित तद्रूपाभावस्य चाभावात्, अतद्भाविनो वा स्वानियतस्य चाभावात् । कस्यचिद् विशेषस्य[3]भावेन दधि खादेति चोक्त उष्ट्रमेव भुञ्जीत ।

अथास्त्यतिशयः कश्चिद्येन भेदेन वर्त्तते ॥१८५॥

एतदुक्तम्भवति । यदावस्थातद्वतोस्सर्वात्मनाऽभेदोवस्थानात्तु परस्परम्भेदस्तदायन्दोषस्तदाह । **तदन्वये** वेति । तस्य स्वभावभेदस्य परस्परान्वये वा । दध्यादिस्वभावस्य द्रव्यस्योष्ट्रादिषु तादात्म्येनानुगमादिति यावत् ।

सर्वस्यो[3]भयरूपत्वं । उभयग्रहणमनेकत्वोपलक्षणार्थन्तस्मिन् सति तद्विशेषस्य उष्ट्र उष्ट्र एव न दधि । दधि दध्येव नोष्ट्र इत्येव लक्षणस्य निराकृते । **दधि खादेत्येव** चोदित. पुरुष **किमुष्ट्रं** खादितु **नाभिधावति** । **उष्ट्रोपि** दध्यभिन्नाद् द्रव्यत्वाद् अव्यतिरेकात् **स्याद दधि** । **नापि स एवेति** । **उष्ट्र** एवोष्ट्र इत्येकान्तवाद । **येनान्योपि** दध्यादिक **स्यादुष्ट्रः[4] तथा दध्यपि स्यादुष्ट्रः** । उष्ट्राभिन्नेन द्रव्यत्वेन दध्नस्तादात्म्येनाभिसम्बन्धात् । **नापि तदेवेति** दध्येव **दधि** । **येनान्यदप्युष्ट्रादिक स्याद् दधि** । एतेन सर्वस्योभयरूपत्व व्याख्यात ।

तद्विशेषनिराकृतेरित्येतदनयोरित्यादिना व्याचष्टे । उभयथापि दध्युष्ट्रविशेष. स्यात् । दधिरूपाभावो वोष्ट्रे स्यात् । उष्ट्ररूप वा दध्यसम्भवि यद्युष्ट्रस्वरूप एव नियत[5]म्भवेत् । एव दध्नोपि वाच्य ।

आद्यस्य तावदसम्भवस्तदित्यादिना कथ्यते । तदेवमनेकयोर्दध्युष्ट्रयोर्न कश्चिद् विशेष इति सम्बन्ध । **एकस्यापीति** दध्न उष्ट्रस्य वा **कस्यचित् तद्रूपाभावस्येति** । उष्ट्ररूपाभावस्य दधिरूपाभावस्य **चाभावात्** ।

द्वितीयस्यापि प्रकाराभावमाह । **स्वरूपस्येत्यापि** । **अतद्भाविनो** दध्यभाविन उष्ट्रस्वरूपस्य । उष्ट्राभाविनो[6] वा दधिस्वरूपस्य । **स्वनियतस्य** उष्ट्रस्वभावनियतस्य । दधिस्वभावनियतस्य **चाभावात्** (१८४–८५)

अथास्ति दध्युष्ट्रयोरतिशयः **कश्चिद येनातिशयेन दधि खादेति** चोदित· पुरुषो **भेदेन वर्त्तते** । उष्ट्रपरिहारेण दध्न्येव प्रवर्तते ।

एतदुक्तम्भवति । यथा दध्युष्ट्रयो. परस्पर स्वरुपम्भिन्नन्तथा द्रव्यपर्याययो-

स एव दधि सोऽन्यत्र नास्तीत्यनुभयं परम्।

अथानयोरस्ति कश्चिदतिशय[4]: यदत्र तथा चोदितः क्षीरविकारे दध्न्येव प्रवर्त्तते नान्यत्र। अतिशयोऽर्थक्रियार्थिप्रवृत्तिविषयः, स एव तत्फलविशिष्टोपादान[5]भावेन लक्षितस्वभावो हि दधिस्वभावत्वात्। तादृशस्वभावः स च नान्यत्र, अर्थिनः प्रवृत्त्यभावात्।

तस्मात् तत्र उभयस्वभावाभाव इत्येकान्त[6]वादः।

अपि च—

५—शब्द-चिन्ता

सर्वात्मत्वे च सर्वेषां भिन्नौ स्यातां न धीध्वनी ॥१८६॥

लंक्षणभेदाद् भेदो यदीष्यते[7] तदा स एव स्वरूपातिशयो दधि। स चान्यत्रोष्ट्रे 124b
नास्ति। नापि द्रव्यत्व दध्यादिव्यतिरिक्त प्रतिभासते। इत्यनेन द्वारेणानुभयं सामान्यविशेषरहित सर्वमस्तु। परं केवल। एकत्वन्तु कल्पित। अनयोरिति दध्युष्ट्रयो.। तथा चोदित इति दधि खादेति चोदित। क्षीरविकारो दधि। नान्यत्रेत्युष्ट्रे। स एवातिशयो दधि। किम्भूत (।) अर्थक्रियार्थिप्रवृत्तिविष[1]यः। दधिसाध्यार्थक्रिया तया योर्थी पुरुषस्तस्य प्रवृत्तिविषय (।) किङ्कारण (।) तत्फलेत्यादि। दधिसाध्य फल तदेव विशिष्यतेन्यस्मादिति विशेष। तस्योपादानभावो हेतुभावस्तेन लक्षितः स्वभावो यस्य वस्तुन। तदेव दधीति कृत्वा। स च तादृश इत्यनन्तरोक्तो दधिस्वभावः। अन्यत्रेत्युष्ट्रे। कस्माद् (।) दध्यर्थिनस्तत्रोष्ट्रे प्रवृत्त्यभावात्। (१८५–८६)

सर्वात्मत्व[2] इत्येकरूपत्वे सतीत्यर्थ। भिन्नौ नियतार्थौ। धीध्वनी। ज्ञान शब्दश्च। तदभावाद् भिन्नबुद्धिशब्दाभावात्। भेदाना सहारवादस्य। एकीकरणवादस्यासम्भवः। भेदेन गृहीतयो श्रुतयोर्वा। एकत्वेनोपसहारो निर्देश। स्याद्वुष्ट्रो दधीत्यादि।

सोयमित्यादिना व्याचष्टे। क्वचिदपि दध्न्युष्ट्रे वा प्रतिनियतमेकमाकारमपश्यन् कथ बुद्ध्याधिमुच्येता[3]र्थानिति सम्बन्ध। किम्विशिष्टया बुद्ध्येत्याह। असंसृष्टेत्यादि। असंसृष्टोन्याकारो यस्मिन्नर्थे स तथोक्त। स यस्या बुद्धेरस्ति सा ससृष्टान्याकारवती। विभक्तार्थग्राहिण्येवेति यावत्। अभिलपेद्वा कथ। प्रत्यर्थं प्रति(नि)यतसकेतेन ध्वनिनेत्याकूत। कस्मान्नाधिमुच्येतेत्याह।

भेदसंहारवादस्य तदभावादसम्भवः।

तदभावाद् सम्भवकल्पनेच्छा कथमिव तद्भावी शब्दो येन प्रत्याख्यायेत।

474b **वि[7]कल्पानां योऽविषयः, न हि स एव शब्दैः। तेषु शब्दप्रवृत्तिः केन बाध्येत ?**

(१) आप्तशब्दचिन्ता

अवाच्योऽर्थो न बुद्ध्युपलब्धः। सम्बन्धस्यापि स्वरूपेणानभिधा[1]नमुक्तम्। अभिधाने हि सम्बन्धित्वेन बुद्ध्युपस्थानात् यथाभिप्रायमप्रतीतः।

तत् प्रतीयमानोऽपि सम्बन्धिरूप एवेति स्वस्वरूपेण नाभिधीयते। तस्मा[2]-न्नाभाववत् सम्बन्धेऽपि प्रसंगः*।

अपि च। अभावाभिधेयवादिनं प्रति प्रतिविदधन् अब्रुवाणः कथं प्रतिविद-ध्यात् ? अत्रापि शब्दे कथमभावोऽनुक्तः[3]?

अथाभावमेव नेच्छति तेनावचनम्। तदेवाभावो नास्तीति कथम् ?

विभागाभावाद् भावानामिति। तत्संहारवाद इति भेदसहारवादो न स्यात् (।) स्यादुष्ट्र· स्याद् दधीत्यादिक ।

अथ पुनरससृष्ठौ दध्युष्ट्रौ प्रतिपद्य सहरेत्। स्यादुष्ट्र स्याद् दधीति। **तदाप्येकरूपसंसर्गिण्या**। उष्ट्ररूपेणैव दधिरूपेणैव वा ससर्गिण्या बुद्धेरससृष्टाकार-ग्राहिण्या क्वचिदुष्ट्रे दधनि च। प्रतिनियमात् तत्प्रतिभासभेदकृत एव तयोर्दध्युष्ट्रयो स्वभावभेदोपि । **एकानेकेत्यादि** । प्रति[5]भासभेदस्यानेकव्यवस्थितिर्विषय· । एकव्यवस्थिति प्रतिभासभेदस्येति योज्य। भिन्नप्रतिभासविषयौ च दध्युष्ट्रौ तथा च सति नैक उष्ट्रो दधि वा तदुभयरूप· तदुभयन्दध्युष्ट्रात्मक रूप यस्येति विग्रह· । मिथ्यावाद एव स्या द्वा द· ॥०॥ (१८६–८७)

भेदलक्षणमिति व्यावृत्तिलक्षणम्विजातीयव्यावृत्तान्येव स्वलक्षणानि सामान्य-मित्यु[6]च्यन्ते। **प्रकृत्या** स्वभावेन। आदिशब्दादुदकाद्याहरणाद्येकफला ।

भवतु नामेत्यादिना चा चा र्य पराभिप्रायमाशकते। भावानाम्वस्तूना स्वभावभेद· स्वभावे नैवान्यस्माद् व्यावृत्ति । तत्रेति निरुपाख्येषु (।) कथ स्वभावभेदविषया व्यावृत्तिविषया· शब्दा ।

125a ननु निरुपाख्येषु शब्दानां प्रवृत्तिरेव नास्ति तत्किमर्थमिदमाशकितमि[7]ति कदाचित् परो ब्रूते। तन्निराकरणार्थमाचार्य· प्राह। **तेष्ववश्य शब्दप्रवृत्या** भाव्य। ये तु न चान्यापोहवादिना शक्यम्वक्तुन्नैव निरुपाख्येषु शब्दाना प्रवृत्तिरिति। यतस्तेष्ववश्य शब्दप्रवृत्त्या भाव्यमिति चोदको ब्रूत इति व्याचक्षते। तेषामनेन क्रमेण देशकालनिषेध एव सर्वभावेषु क्रियते। **तथा सम्बन्धस्य स्वरूपणानभिधानमुक्तं।**

---

*Bam.po drug.pa=**षष्ठमाह्निकम्**।

यत् पुनरर्थनिषेधेऽनर्थकशब्दाप्रयोगात् निर्विषयस्य नञोऽप्रयोग इत्यु[4]त्तरं वक्ष्यते ।

एव यत्पुनरेतत् तदर्थ[1]निषेधेऽनर्थकशब्दाप्रयोगात्। निर्विषयस्य नञोऽप्रयोग इत्यत्रोत्तरम्वक्ष्यत इत्यादि ग्रन्थो वक्ष्यमाणश्चोदकाभिप्रायेणावाचक स्यात्।

तस्मादा चा र्य एव निरुपाख्येषु शब्दप्रवृत्ति समर्थयते "तेष्ववश्य शब्दप्रवृत्त्या भाव्यमित्या"दिना ग्रन्थेन। कस्मात् (।) कथचिज्ज्ञानशब्दविषयत्वेनाव्यवस्थापितेषु निरुपाख्येषु सर्वत्रार्थे विधिप्रतिषेधे वा योगात्[2]। यदि क्वचिदसत आकारस्य निषेधे ज्ञानाभिधाने स्याता। तदा निषिद्धाकारपरिहृतेर्थे विधि स्यात्। **तथा चे**ति विधिप्रतिषेधाभावे। अन्वयव्यतिरेकौ विधिप्रतिषेधौ आश्रयो यस्य व्यवहारस्य स तथोक्त.। तमेव व्यवहारभावमुष्णेत्यादिनाऽह। उष्णस्वभावोग्निरित्यन्वयाश्रयो व्यवहार। नानुष्ण इति व्यतिरेकाश्रय। अयमप्यतिप्रसिद्धो[3] लोकव्यवहारो न स्यादित्यपिशब्देनाह। उष्णव्यवस्था ह्यनुष्णव्यवच्छेदेन (।)

तस्य चानुष्णस्योष्णाभावलक्षणस्य कथञ्चिद् व्यवस्थानात् कथन्तद्वयवच्छेदेनोष्ण व्यवस्थाप्येत। तदाह। **स्वभावान्तरेत्या**दि। उष्णाभाव एवोष्णस्वभावादन्तरम्विलक्षणन्तद्विरहरूपेणेति स्वभावान्तरमुक्त। अत एवासत इत्येतद् घटते।

ननु स्वभावविशेष स्वभावान्त[4]रन्तस्य कथचिदपि विकल्पबुद्धे शब्दस्य च विषयत्वेनाव्यवस्थापनात्। सर्वथानुष्णस्याप्रतिपत्तेरनिश्चयात् तद्वयवच्छेदलक्षणस्याग्निस्वभावस्याप्रतिपत्तिरनिश्चय। यथाग्निस्वभावस्यैव सर्वस्य पदार्थस्य। ततो व्यामूढमनिश्चितरूप जगत् स्यात्।

स्यादेतत् (।) न तत्र वह्न्यादौ कस्यचिदसतो निषेधो येनाभावेप्यवश्य प्रवृत्त्या भाव्यमिति चोद्यते।[5] किन्त्वनुष्ण स्पर्शाख्य **सदेव** वस्त्वेव। अग्नेश्चार्थान्तर निषिध्यत इति।

कथमित्याद्या चा र्य। **सदेवे**ति वचनात् सत्त्वमिष्ट। निषिध्यत इति वचनादसत्त्वमेक च कथ सदसन्नाम। नेत्यादिना पर परिहरति। तत्राग्नावनुष्ण नास्तीत्यनेन सर्वत्रानुष्णमसदिति ब्रूम। एव ह्युच्यमाने सत्त्व प्रतिज्ञाय पुन· सर्वत्र सत्त्वनिषेधे सदसत्त्वमेकत्र प्र[6]तिज्ञातम्भवेत्। केवलन्तत्र त्वग्नावनुष्णन्नास्तीति ब्रूम:। ततश्चान्यत्र सतोन्यत्रासत्त्वमविरुद्ध। अयमेव च देश ह (?) इत्याह। इह नास्तीति देशस्य निषेध·। इदानीन्नास्तीति कालस्य। अनेन प्रकारेण नास्तीति **धर्मस्य**। धर्मिणो निषेध.। कस्मात् (।) **तन्निषेधे** धर्मिणो निषेधे। **तद्विषयस्य** धर्मिविषयस्य शब्दस्य निर्विषयतया प्रवृ[7]त्त्यभावात्। ततश्च धर्मिशब्दाप्रवृत्तेरनिर्दिष्टो विषयो 12

यस्य नञस्तस्याप्रयोगात्। इदमिह नास्तीत्यवश्यमिदमादिपदैर्विषय. प्रतिषेधस्योपस्थाप्योन्यथा किम्विषयोय प्रतिषेध इत्येव स न ज्ञायते। एतच्च सर्व मु द्यो त क रादीनाम्मतमुपन्यस्त।

सोपीत्या चा र्य। **तत्रा**पीत्या चा र्य। **तत्रापी**त्यादिदेशकालधर्मनिषेधेन देशादीना निषेध सत्त्वात्। **आदि**शब्दात् कालस्य प[1]रिग्रह। व्यक्तिभेदाद् बहुवचन। नार्थस्येति धर्मस्य। क्वचित् सत्त्वादेव। न त्वर्थशब्देन धर्मिणो निर्देश। परेणापि धर्मिनिषेधस्यानिष्टत्वात्।

स्यादेतन्न देशादिनिषेध क्रियते नाप्युष्णस्य निषेध। किन्त्वनुष्णेन सहाग्नेर्य सम्बन्धस्स निषिध्यते।

नत्वित्याद्या चा र्य। **तन्निषेधेपी**ति सम्बन्धनिषेधेपि तुल्यो दोष। धर्म्मिवत् सम्बन्धस्याप्यनिषेधात्। तदेवास[2] स(?) तीत्यादिना साधयति। असति सम्बन्धे शब्दाप्रवृत्ति। आदिशब्दादनिर्दिष्टविषयस्य नञोऽप्रयोगात्। अथवा तुल्यो दोष (।) कथ। निषेधादसति यो निषेधस्तस्य त्वयैव निषेधादिति व्याख्येय। कथ निषेध इत्याह। **असती**त्यादि। असतो वास्येति सम्बन्धस्य निषेधे। **तद्वत्** सम्बन्धवत्। धर्मिणोपि निषेध।

नेत्यादि पर। सम्बन्धो नास्तीत्येव स्वशब्देन न वै सम्ब[3]न्धस्य निषेध.।

एतदुक्तम्भवति। यथा सम्बन्धस्य स्वशब्देन स्वरूपेणाभिधानन्नास्ति तथा निषेधेपि। तदेवाह। किन्तर्हि नेह प्रदेशे घटो (।) नेदानी काल इत्येव प्रतिषेधोक्तौ सत्या। नानेन देशेन कालेन वास्य घटस्य सम्बन्धोस्तीति प्रतीति। तथा नैवन्नाऽनेन प्रकारेण घटोस्तीत्युक्तौ नैतद्धर्मा घट इति प्रतीति। **तथे**त्येव प्रतीतौ सत्या।

तथापीत्या चा[4] र्य। नेदानीमित्यादिनापि कथ सम्बन्धो निषिद्धो यावदस्य पुस. सम्बन्धो धर्मो वा नास्तीति मतिर्भवति। नेह नेदानीमिति प्रतिषेधे सम्बन्धो नास्तीति मति। नैवमिति प्रतिषेधे धर्मो नास्तीति मति।

ननु धर्मनिषेधोऽपि सम्बन्धनिषेध एव। धर्मधर्मिणो सम्बन्धनिषेधात्। सत्य। सयोगसमवायलक्षणसम्बन्धभेदात्तु सम्बन्धो धर्मो वेति भेदेनोक्त[5]। न चास्यास्सम्बन्धो नास्तीति मते कथचिद् भावे सम्बन्धादिसत्ताया सम्भव। कस्मादभावेष्वित्यादि। तथाशब्दो यथाशब्दार्थमाक्षिपति। यत्तदोर्नित्याभिसम्बन्धात्। सत्सु देशादिषु यथा नास्तीति बुद्धेरभाव। सत्स्वभावबुद्धेर्विरोधात्। तद्वदभावेषु। असति बुद्धिप्रवृत्तेरनभ्युपगमात्। तस्मात् सम्बन्धाभावप्रतीते सकाशान्नायमिहेत्याद्या प्रतीति[6]। सा तदभावे सम्बन्धाभावप्रतीत्यभावे न स्यात्

यद्वा **सेति** सम्बन्धाभावप्रतीति·। **तदभाव** इति सम्बन्धाभावे। प्रतीतौ वा **तदभावस्य** सम्बन्धाभावस्य। तादृशी सम्बन्धाभावप्रतीतिस्सा विद्यते यस्य पुसः। तस्य यथाप्रतीतिमत । तत्प्रभवास्सम्बन्धाभावप्रतीतिजन्मानस्सम्बन्धाभावविषयाः शब्दाः केन वार्यन्ते। विकल्पानाम्वि[7]षय सम्बन्धाभावो न शब्दा- 126a
नामिति चेदाह। **स एव हीत्यादि**। यो न वितर्काणाम्विषय. स एव न शब्दानाम्विषय.। विकल्पविषयस्त्ववश्य शब्दविषय इत्यर्थ.। **ते चेत् प्रवृत्ता** इति वितर्क·।

ननु पुरोवस्थिते नीलादौ नीलमित्यादिविकल्प.। स्वलक्षणविषयो न च स्वलक्षण शब्दवाच्यमित्याह। न हीत्यादि। अवाच्यमर्थमिति स्वलक्षण। विकल्पा[1]धिकाराद् विकल्पबुद्धयो गृह्यन्ते। समीहन्त इत्यालम्बन्ते। सामान्याकारैव सदा विकल्पबुद्धिर्यापि सन्निहिते स्वलक्षणे। सविकल्पनिर्विकल्पयोस्तु यौगपद्यादभिमान एष मन्दमतीना विकल्प स्वलक्षणाकार इति (।) विचारित चैतत्. **प्रमाणविनिश्चये** शास्त्रकारेणेति नेह प्रतन्यते।

ननु यदि विकल्पबुद्ध्या विषयीकृतत्वात् सम्बन्धाभावो वाच्य । एवन्तर्हि सम्बन्धोपि वाच्य स्याद् विकल्पबुद्ध्या विषयीकृतत्वाद्(।) अथेष्यत एव। कथन्तर्ह्याचार्य दि ङ् ना गे न तस्यावाच्यत्वमुक्तमित्याह। **सम्बन्धस्येत्यादि**। **स्वेन रूपेणेति** सम्बन्धरूपेण (।) सम्बन्धिन सम्बन्ध इति परस्परापेक्षालक्षणम्भावमात्रमद्रव्यभूत सम्बन्धस्य स्वभाव । तेन च रूपेण तस्याभिधायक शब्दो नास्ति। सम्बन्धशब्दो हि तस्याभिधायक[3] एष्टव्य स च प्रयुक्त कयोरित्याक्षिपति। तत्र राजपुरुषयो सम्बन्ध इत्युच्यमाने राजपुरुषयोरित्यस्य व्यतिरेकस्य हेतु. सम्बन्धस्तदा स सम्बन्ध. सम्बन्धिरूपेण प्रतीयते। तदाह। **अभिधानेन सम्बन्धित्वेनेत्यादि**। राजपुरुषयो· सम्बन्ध इत्यभिधाने राजपुरुषाभ्या परस्परसापेक्षाभ्या निष्कृष्टरूपस्यैव सम्बन्धस्य सम्बन्धित्वेन **बु[4]द्धावुपस्थानात्** । **यथाभिप्रायमप्रतीतः**। राज्ञः पुरुष इति परस्परापेक्षालक्षणस्सम्बन्धो यथा ज्ञातुमिष्टस्तेन रूपेणाप्रतीति । **तदिति** तस्मादय सम्बन्धः **प्रतीयमानोपि सम्बन्धशब्दात्**। यथोक्तविधिना **सम्बन्धिरूप एवेति** न सम्बन्धेनाभिधीयते । **तस्माद्गाभाववत् सम्बन्धेपि प्रसंग इति** सम्बन्धाभावो यथा बुद्ध्या विषयीक्रियत इ[5]ति **वाच्यः** प्रसक्तो नैव सम्बन्धेपि वाच्यत्वमित्यर्थ·। सम्बन्धाभावो हि **स्वेन रूपेण** बुद्ध्या विषयीक्रियते। शब्देनापि तथैवाभिधीयते। सम्बन्धस्तु स्वरूपेण गृह्यते। नाप्यभिधीयते। सम्बन्धिरूपापन्नस्यैव विषयीकरणादभिधानाच्च। तथा चाह।

असत्त्वभूतस्सम्बन्धो रूपन्तस्य न गृह्यते।

तस्मादभावेषु शब्दाः सन्ति । तेषु कथमभावभेद इति चेत् । तत्रापि---

---

नाभिधान स्वरूपेण सम्बन्धस्य कथञ्चनेति ।[6]

तस्मात् स्थितमेतद् विकल्पविषयोवश्यम्वाच्य इति। ततश्च यदि नास्ति सम्बन्ध इति मतिस्तदा तत्प्रभवोपि शब्द प्रवर्त्तत एव। तथाचाभावविषय शब्द आपतित एव।

अथ माभूदयन्दोष इति सम्बन्धस्य नास्तीति बुद्ध्या विषयीकरण नेष्यते। नेह घट इत्यत्र कस्य निषेधो (।) न तावद् देशादेस्तस्य सत्त्वात् (।) न सम्बन्धस्य
126b तद्भावस्याग्रहणादि[7]ति यत्किञ्चिदेतत् ।

अपि चाभावमभिधेयं यो ब्रूते तं ब्रुवाण प्रति अयमभावा**नभिधानवादी** अभावो न वाच्य इति **प्रतिविदधन्** प्रतिक्षिप**न्नब्रुवाणः कथं प्रतिविदध्यात्** । न ह्यभाव-शब्दमुच्चारयता अभावस्य वाच्यत्व शक्य प्रतिपादयितु । अथेच्छत्यभावस्य वचनन्तदा वचने वास्याभावस्याभ्युपगम्यमाने **कथमभावोनुक्तः** (।) उक्त एव। अभावो न वाच्य इत्य[1]नेनैवाभावशब्देन तस्योक्ते । अथ परेणाभावस्य वाच्यत्व यदुच्यते तदनुवादेन निषेध क्रियते (।)

नाभावो वाच्यस्तेनादोष इति चेत्।

नन्वनुवादेपि किमभावस्य वाच्यता न भवति येनैवमुच्यते। तस्मादिष्टस्यै-वाभावस्य वाच्यता । स्वभावो नैवास्ति **तेना**सत्त्वाद**वचन**मभावस्येति चेदाह। **अथाभावमेवे**त्यादि। **तेने**त्यभावस्या**सत्त्वेन**।[2] इदानीमित्यभावस्यासत्त्वे **तदेवाभावो नास्तीति वचनं कथं**। अभावो नास्तीत्यस्यैवाभावशब्दस्य प्रयोगो न स्यात्(।) कथञ्च न स्यादभावस्यैवानभ्युपगमात्। अभावो ह्यस्य वाच्य स च नाभ्यु-पगम्यते। परपरिकल्पितस्याभावस्य प्रतिषेध इति चेदिष्टस्तावदभावविषय शब्द । तस्मात् कथचिदभावव्यवहार प्रवर्त्तयताऽवश्यमभावविषया ज्ञा[3]नशब्दा एष्टव्या.।

यत्पुनरेतदुक्तम् (।) **अर्थनिषेधे** सत्यनर्थ**कशब्दाप्रयोगात्** कारणा**न्निर्विषयस्य नञोप्रयोग इत्यत्रोत्तरम्वक्ष्यते ।**

"अनादिवासनोद्भूतविकल्पपरिनिष्ठत" (१।२०७) इत्यादिना ।

तस्मादित्युपसहार । इयता च ग्रन्थेन यदुक्तन्तेष्ववश्य शब्दप्रवृत्त्या भाव्य-मिति तदेवाचार्य ण समर्थित ।

अत्र पर प्राह । यद्यभावेष्वपि **शब्दास्सन्ति तेष्व**[4]भावेषु **कथं स्वभावभेदः** शब्दप्रवत्तिहेतुर्येनापोहविषयत्वमभावप्रतिपादकाना स्यात् ।

तदभावादसम्भवः।
रूपाभावादभावस्य शब्दा रूपाभिधायिनः ॥१८७॥
नाशंक्या एव सिद्धास्ते व्यवच्छेदस्य वाच[5]काः।

शब्दानां वस्तुव्यापारेषु किं रूपमभिधेयमाहोस्विद् भेद इति शङ्का स्यात्, अभावस्तु विवेकलक्षण एव। निर्निमित्तीकर्त्तव्यस्य कस्यचिद रूपस्य अभावात्, तद्भावेऽभावायो[6]गाद वा भावस्य तल्लक्षणत्वाद् वा।

तेन तस्मिन्नेव वस्तुनि विवेकः। ते हि तथाभावख्यापिनः शब्दाः किं विवेक-विषयतया अप्रतिशरणा इत्याशङ्क्य[7]। तस्मात् सर्वे शब्दा विवेकविषया विकल्पाश्च 475a
सिद्धाः। तेन एकवस्त्वनुसारिणोऽपि यथास्वं विशेषभेदैरुपकल्पिता[1] विशेषैर्भे-

---

अत्रोत्तरमाहा चा र्यः। **तत्रापीत्यादि। रूपाभावादिति** स्वरूपाभावादभावस्य। **रूपाभिधायिनः** स्वभावग्राहका **शब्दा नाशंक्या एव।** यतस्ते शब्दा अभावविषया **व्यवच्छेदस्यान्यापोहस्य वाचकाः सिद्धा** एव।

एतदुक्तम्भवति (।) अभावविषया[5]णा **शब्दाना** भावस्वरूपाग्राहकत्वादपोहविषयत्वन्तथा भावविषयाणामपि शब्दानाम्भावस्वरूपाग्राहकत्वादपोहविषयत्वमेव (।) केवल केचिच्छब्दा भावाध्यवसायाद् भावविषया केचिदभावाध्यवसायादभावविषया उच्यन्ते। **वस्तुनि वृत्ति**र्व्यापारो येषा शब्दानान्तेषा **किं रूपमभिधेयं** विधिरूपेण वस्तुग्राह्यमाहोस्विद् **भेदोऽन्य[6]**व्यावृत्त स्वभावोध्यवसीयत **इति शङ्का स्यात्। अभावस्तु विवेकलक्षण** इति स्वभावविरहलक्षण कस्मा-**न्निमित्तीकर्त्तव्यस्य रूपस्य** वस्तुस्वभावस्य। **तदभावे** तस्य रूपस्य सत्तया ह्यभाव-**योगात्।** तस्य रूपस्य भावस्तद्भाव स एव लक्षण यस्य भावस्य स तथोक्त। अय-
मेव स मुख्यो विवेकोन्यापोह। अन्यस्तु गवादिशब्दविषयो[7]पोहनिमित्तत्वादपोह इत्यु- 127a
पचरित सर्वभावविरहलक्षण। तस्य विवेकस्य **तथाभावख्यापिन** इति विवेकरूपाभिधायिन॥ **विवेकविषया इत्यन्यापोहविषया** विकल्पाश्च **विवेकविषया** इति सम्बन्ध। **ते** शब्दा विकल्पाश्च। एक व्यावृत्तिसमाश्रयभूतम्वस्तु। **प्रतिस(?श)रणम**धिष्ठान येषा शब्दाना विकल्पानाञ्च। ते तथोक्ता। तथा ह्यकृतकव्यवच्छेदेन यदेव वस्तु कृतकशब्दस्य विकल्पस्य वाधिष्ठानन्तदेवानित्यानात्मादिशब्दानाम्विकल्पाना च। ते तथाभूता अपि भिन्नविषया एवेति सम्बन्धः। कस्माद् **यथास्वमित्यादि।** या व्यावृत्तिर्यतो व्यवस्थाप्यते सा तस्या अवधिः। यथा कृतकाख्यस्य व्यवच्छेदस्याकृतक। एवमनित्यत्वलक्षणस्य व्यवच्छेदस्य नित्य इत्यादि। तेषा[2] **यथास्वमवधीना** भेदास्तैर्भेदैरुपकल्पिता रचिता अनित्य-

देष्विव बुद्धौ प्रतिभात्सु विवेकेषु चोपस्थापनात् भेदविषया एव।

तेन स्वभावस्यैव साध्यसाधनभावेऽपि न साध्य[2]साधनयोः संसर्गः। ततश्च प्रतिज्ञार्थैकदेशो हेतुः स्यादिति। तन्न। स चाय हेतावेवोक्तः—

उपाधिभेदापेक्षो वा स्वभावः केवलोऽथवा ॥१८८॥
उच्यते[3] साध्यसिद्ध्यर्थं नाशे कार्यत्वसत्त्ववत्।

स्वभावनिष्पत्तौ अपेक्षितपरव्यापारभावो हि कृतकः। **तेनेयं** कृतकश्रुतिः

त्वादीना विवेकिना भेदा परस्पर विशेषा। **तैर्भेदैर्भिन्नेष्विव** विकल्प**बुद्धौ प्रतिभात्सु** प्रतिभासमानेषु धर्मिषु। तेषा शब्दाना**म्विवेकेष्** भेदेषु विकल्पाना **चोपस्थापनात्**। यथाक्रम वाचकत्वेन ग्राहकत्वेन चोपश्लेषात्।

ननु च कृतकानित्यत्वयोर्नैवावधिभेदोस्त्यकृतकस्येव नित्यरूपत्वात्।[3] ततश्च प्रतिज्ञार्थैकदेश एव हेतु।

नैष दोषो यस्मादकृतकस्यापि प्राग्भावस्यानित्यत्वात्। कृतकस्यापि प्रध्वसाभावस्य नित्यत्वादस्त्येवावधिभेद। यद्वा कारणेन कृत शब्दो न भवतीत्यस्य समारोपस्य व्यवच्छेदेन कृतको द्वितीयादिक्षणे स्थायित्वसमारोपव्यवच्छेदेनानित्य इत्युच्यत इत्यस्त्येवावधिभेद। **तेनेति** यथोक्ते[4]न व्यावृत्तिभेदेन स्वभावहेतौ **स्वभावस्यैव साध्यसाधनभावेपि न साध्यासाधनयोः संसर्ग** एकत्व। **ततश्च** यदुक्त स्वभावे साध्ये **प्रतिज्ञार्थैकदेशो हेतुः स्यादिति** स दोषो नास्तीत्याह।

तन्नेति (।) **तदि**ति तस्मात्। **स चायं स्वभाव** इति सम्बन्ध। स्वभाव इत्यव्यतिरिक्तो धर्म। स कदाचित् सत्त्वमन्यो वा। यद्यपि कृतके सत्त्वमस्ति सत्सु च कृतकत्वन्तथा[5]पि हेतुकृतोय स्वभाव इत्येतावन्मात्रविवाक्षाया कृतको हेतुरुच्यते। न तु सामर्थ्यविवक्षाया। प्रमेयत्वादिवत्। सामर्थ्यमस्त्येतावन्मात्रविवक्षायाञ्च सत्त्व हेतुरुच्यते तेन तु हेतुकृतत्वविवक्षाया। (१८७–८८)

तेन यदुच्यते (।) "कृतके सत्त्व विद्यते न च तस्यानित्यत्वे व्यभिचारोस्ति (।) तत्किमित्युपाधिभेदेन विशेष्यत" इति तदपास्त। कृतकत्वादौ[6] सामर्थ्यस्याविवक्षितत्वादिति। हेतुत्वेनापदिश्यमान उच्यमान। **उपाधिभेदापेक्षो** विशेषणभेदापेक्ष। **केवलो** वेत्युपाध्यनपेक्ष। **साध्यसिद्ध्यर्थमुच्यते**। अनित्यत्वे साध्ये कृतकत्वमुपाधिभेदापेक्षन्तदनपेक्षन्तु सत्त्व। अपेक्षितेत्यादिनोपाधिभेदापेक्षत्व कृत-
27b कत्वस्याह। परस्याहेत्वभिमतस्य जनन[7]शक्तिरेव व्यापारः। अन्वयव्यतिरेकानुविधानमेव चापेक्षा। **स्वभावनिष्पत्तौ** स्वभावनिष्पत्तिनिमित्तम**पेक्षितः परव्यापारो येन भावेन** स कृतकः। सज्ञाया कनो विधानात् सज्ञाशब्दोय **कृतक** इति। यत

स्वभावाभिधायिन्यपि परोपाधिमाक्षिपति। एतेन[4] **प्रत्ययभेदभिन्नतादयो व्याख्याताः।**

एवं उपाधिभेदं प्रत्यपेक्षः क्वचित् स्वभावहेतुरिति। क्वचिच्च प्रयोगेऽनपेक्ष उच्यते। यथाऽनित्यः[5] **एव सत्त्वम्। क्वचित् स्वभावभूतधर्मभेदपरिग्रहद्वारेण, यथा तत्रैवोत्पत्तिः।**

अनया दिशा स्वभावहेतुविभागान्तरेष्वपि द्रष्टव्यः।

सत्तास्वभावो हेतुश्चेन्न सत्ता साध्यते कथम् ॥१८९॥
अनन्वयो हि भेदानां व्याहतो हेतुसाध्ययोः।

यदि सत्ताऽनित्यैव स्वभावहेतुभूता कस्मात् न साधयितु[7]**मिष्टा।** 475b
तत् तथा प्रधानेन विशषीभवति न च विशेषः साधयितुं शक्यते, तस्यानन्व-

---

एवन्तेनेयं **कृतकश्रुतिः स्वभावाभिधायिन्यपि** सती **परोपाधिमत्यन्तविशेषणमेन** स्वभावमा**क्षिपति। एतेनेति** कृतकत्वस्योपाधिभेदापेक्षत्वप्रतिपादनेन। **प्रत्ययानां** कारणनाम्**भेदस्तेन** भेत्तु शील यस्य स तथोक्तस्तद्भावस्तत्त्व। स्थानकरणादिभेदाद् भिद्यते शब्द। आदिशब्दात् प्रयत्नानन्तरीयकत्**वादयो व्याख्याताः।**

एवमित्यादिनोपसहार। **क्वचित् प्रयोगे उपाधिभेदंप्रत्यनपेक्षः**। अतएवाह। सामान्येन **अनित्य एव** साध्ये **यथा सत्त्वं। स्वभावभूतश्चासौ धर्मश्च** तस्य **परिग्रहेण**[2] क्वचित्स्वभावो हेतुरुच्यते इति प्रकृत। **यथा तत्रैवेत्यनित्यत्वे** साध्य **उत्पत्तिः**। न चोत्पत्तिरुत्पत्तिमतोन्याभावस्याजन्यत्वेनोत्पत्त्यभावप्रसङ्गात्। केवलमर्थान्तरभूतेवकल्पिताविशेषणत्वेन तेनोत्पत्तेरिन्युत्पत्तिमत्वादित्यर्थ। अयमुपाध्यपेक्ष एव स्वभावो द्रष्टव्य.। कृतकत्वादौ परभूत उपाधिरहितत्वात्मभूत एव धर्मविशेष इत्येता[3]वान् विशेष।

अनया दिशेति। उपाध्यपेक्षानपेक्षहेतुप्रविभागदिशा। (१८६)

यदि **सत्ताख्यः स्वभावो हेतुः** सत्त्वमिति यावत्। प्रधानादि**सत्ता कथं न साध्यते**। अथ सत्ता सामान्ये साध्ये सिद्धसाध्यता स्यादत सत्ताविशेषस्साध्यस्तस्मिंश्च साध्ये विशेषस्यानन्वयात् साध्यशून्यो दृष्टान्त स्यादतो न सत्ता **साध्यते**। तदा हेतावपि सत्त्वे विशेषस्यानन्वया[4]त् साधनशून्यो दृष्टान्त स्यात्। तदाह (।) **अनन्वयो हीत्यादि। भेदानाम्**विशेषाणां **व्याहतो** दुष्टो **हेतुसाध्ययोः**। हेतौ साध्ये चेत्यर्थः। अन्यत्र **चेत्यनात्मादौ। तदिति** सत्त्व। **किल**शब्दोनभिमतार्थे एव प्रसाध्यमानमिति। (१८६-९०)

अस्ति **प्रधानमित्यादिना प्रधानलक्षणयोगेन विशेषीभवति न च विशेषः**

यात्। यथाह "प्रमाणविषयाज्ञानाद्" इति। स चायं विशेषः साध्यहेतुः[1] क्वचिन्न व्याहन्यते। किन्तर्हि। हेतावपि तुल्यदोषत्वात्। न हि हेतुरनन्वयः सिद्धेरङ्गम्। तेन संशयभूतत्वात् न सोऽपि दोषः। एवम्--

भावोपादान[2]मात्रे तु साध्यसामान्यधर्म्मिणि ॥१९०॥
न कश्चिदर्थः सिद्धः स्यादनिषिद्धश्च तादृशम्।

न सर्वथा सत्तासाधने विशेषः साध्यते। भावमात्रविशेषणः कस्मिंश्चिद् धर्मिणि अस्ती[3]ति साधनेऽनिर्दिष्टस्वभावविशेषः क्वचित् सत्तामात्राप्रतिषेधात्। नेह सत्तासाधनप्रतिषेधः। किन्तु एवं क्वचिदस्तीति वचनेऽस्य विशेषमपरं क्वचित् अपरामृशन्[4] स्वार्थं कथं पुष्णाति ?

तस्मादनेन उपात्तमत एव साध्यं--

उपात्तभेदे साध्येऽस्मिन् भवेद्धेतुरनन्वयः ॥१९१॥

साधयितुं शक्यते तस्यानन्वयात्। य[5]थाऽहेत्याचार्य दि ग्ना ग। "अस्ति प्रधानमित्यनेन प्रधानस्वलक्षणमेव साध्यत" इति यत्सा ख्ये नोक्त तत्प्रमाणस्यानुमानस्य विषयाज्ञानात् सामान्यविषय ह्यनुमान स्वलक्षणविषय। **व्याहन्यते** दुष्यति। **किन्तर्हि** (।) **हेतावपि तुल्यदोषत्वात**। तदेवाह (।) **न हि हेतुरित्यादि**। न विद्यते ऽन्वयोस्येत्यनन्वय **सिद्धे** साध्यसाधनस्य **ना[6]ङ्गं**। कुत इत्यसाधारणाद्धेतो। **भावः** सत्ता स(ा) **उपादान**म्विशेषण यस्य धर्मिणस्तन्मात्रे। तन्मात्रत्वादेव **सामान्यरूपे धर्मिणि** साध्ये। सा ख्य स्य **न कश्चिदर्थः सिद्धः स्यात्**। त्रैगुण्यादिलक्षणस्यासिद्धे। **अनिषिद्धश्च तादृशं**। तादृशमिति सामान्यमात्र। अनेन सिद्धसा-
128a **ध्यतामाह।[7]** (१९०-९१)

न सर्वथेत्यादिना व्याचष्टे। **सत्तासाधन** इति सत्तासिद्धौ। **भावमात्रविशेषण** इति सत्तामात्रविशेषण। **अनिर्दिष्टः स्वभावविशेषो** यस्येति विग्रह। **नेहे**ति वस्तुमात्रसाधने। **सत्तासाधनप्रतिषेधः**। **किन्तु** स वादी **तथा** सामान्ये नास्ति कश्चिदिति कञ्चनास्य धर्मिणो भेदं विशेष नित्यत्वादिकम**परामृशन्न**सस्पृशन्। **अनेने**ति वादिना। **उपात्तभे[1]द** इत्युपात्तविशेष। त्रिगुणात्मको नित्य इत्यादि नोपात्तभेदे **साध्ये**स्मिन् प्रधानादिके धर्मिणि। **भवेद्धेतुरनन्वयः**। नास्य साध्यधर्मविशेषणदृष्टान्तेन्वयोस्तीत्यनन्वय। यत एव (।)

सत्तायान्तेन साध्यायाम्विशेषः साधितो भवेत्।

अन्ये तु **सत्तायामित्यादि** पश्चाद् धर्मादौ व्याख्याय। पूर्वार्द्धमु**पात्तभेदमित्यादि** पश्चाद् व्याचक्षते।

सत्तायां तेन साध्यायां विशेषः साधितो भवेत् ।

स हि धर्मी[5] **प्रधानलक्षण एको नित्यसुखाद्यात्मकोऽन्यो वा यथाकथञ्चिदपि विशेषितः तत्स्वभावः सिद्धः स्यात् । स च तथा नान्वेति ।**

ननु यः सत्ता[6]**मात्रान्वयी सिद्धः न तेन सिद्धेन किमपि । अग्न्यादिषु न एवं प्रसंगः, तत्रापि नाग्निसत्तायां कश्चिद् विवादः । विशिष्टाधारविशेषणाभिमत**[7]**- स्यानन्वयाद् असिद्धिः ।** 476a

न वै स आधारो विशेषीकरोति । तदयोगव्यवच्छेदेन विशेषणाद् इत्युक्तं वक्ष्यते च ।

स ही[2]त्यादिना व्याचष्टे। **एको** मूलप्रकृतेर्भेदाभावात्। **नित्यो** निरन्वय-विनाशाभावात्। त्रिगुणत्वात्मकत्वात् सुखदुःखमोहात्मकः। **अन्यो** वेति कर्तृ-त्वादियुक्त । **यथाकथंचिदपीति**। यथोक्तैर्द्धर्मै समस्तैर्व्यस्तैर्वा विशेषित.। **तत्स्वभाव** इति यथोक्तविशेषणविशिष्टस्वभाव (।) **स च धर्मी तथेति** विशिष्टेन स्वभावेन नान्वेति सपक्षे। तथा भूतस्य[3] दृष्टान्तधर्मिणोसिद्धे । **न तेन सिद्धेनेति** सत्तामात्रेण। सत्तामात्रे विवादाभावात्। (१९१–९२)

नन्वित्यादि पर । **एवं प्रसङ्ग** इति य सामान्यविशेषविकल्पेन सत्तायाम् उक्त । तदुक्त (।)

"विशेषानुगमाभाव सामान्ये सिद्धसाध्यते"ति।

यस्मात्**तत्राप्यग्न्यादिष** साध्येषु **नाग्निसात्ताया कश्चिद्विवादो**स्त्यग्निमात्रस्य सिद्धत्वात्। न च तेन सिद्धेन किञ्चित्[4] तस्याप्रवृत्त्यङ्गत्वात्। देशादिविशिष्टो ह्यग्नि प्रवृत्त्यङ्ग नाग्निमात्र। स एव तर्हि साध्य इत्याह। विशिष्ट आधारो यत्राग्न्यादिक साध्यते स विशेषण यस्याग्न्यादिकस्य स **विशिष्टाधारविशेषणं** (।) तस्य। साध्यत्वेन**ाभिमतस्य**। सपक्षेऽनन्वयादसिद्धि ।

नेत्या चार्य । **न वै स आधारो** विशेषणभावेन गृहीतोपि तमग्नि**म्विशेषी-करोति**।[5] येनान्वय स्यात्। कि कारण। **तदयोग** इत्यादि। तस्य धर्मस्य तस्मिन् धर्मिण्ययोगो य आशकितस्तस्य **व्यवच्छेदेन** विशेषणात्। एतच्च **पक्षधर्म** (१।३) इत्यत्र**ोक्तं**। **वक्ष्यते च** चतुर्थे परिच्छेदे (४।१४९)।

ननु च व्याप्तिग्रहणकाले प्रदेशायोगव्यवच्छिन्नो वह्निरसिद्ध । तत्सिद्धौ वा किमर्थोन्वयानुगम । कथम् (।) असिद्धो यस्मात्। यत्र यत्र धूमस्तत्र त[6]त्राग्नि-रिति व्याप्ति प्रतियता सामान्येनाभिमतदेशायोगव्यवच्छिन्नोपि बह्निराक्षिप्त एव। केवलमिदानीमस्मिन्देशे वह्निरित्येव विशेषप्रतीत्यर्थमन्वयानुगमनमिष्यते।

तस्मात् तत्र सामान्यस्यैवायोगव्यवच्छेदेन साधनम्। न तथाऽत्र क्वचित् सत्तासिद्धिः। प्रधानादिशब्दवाच्यस्यैवार्थस्याभावात् निर्विशेषेणैव सा सत्ता।

कथं स विज्ञातव्योऽभिधा[2]तव्यो निश्चेतव्यश्चेति सोऽपि सिद्ध एव। तत् किमिदानी ज्ञेयं अस्तीति सिद्धिरस्तु। तथाऽपि किं सिद्धं स्यात्? अन्यत्र तदेवाग्निसामान्य तत्र न सिद्धमिति साध्यते।

तत्रापि तदयोग[3]विरहिणा सामान्येनान्वयो न सिद्ध एव।

न वै कश्चित् तथाभूतेनार्थेनान्वयं करोति। तस्मात् परं प्रतिपादयता यत्र धमस्तत्राग्निरिति धूमोऽग्निनान्तरीयको[4]ऽन्यविनाभावी दर्शनीयः, स तथाऽग्निमात्रेण व्याप्तः सिद्धो यत्रैव स्वयं दृश्यते तत्रैवाग्निबुद्धिं जनयति। तत्र साध्यनिर्दे-

---

तस्मादित्युपसहार। **तत्रे**ति प्रदेशादौ। तदयोगव्यवच्छेदेनेति तस्मिन् प्रदेशादौ
128b धर्मिणि साध्यधर्मस्य**ायोगव्यवच्छेदेन** सामान्यस्याग्निमात्रस्य साधनात्[7] नास्त्यन्वयदोष। नापि सिद्धसाध्यता प्रदेशायोगव्यवच्छेदस्यासिद्धत्वात्। प्रधानादिके धर्मिण्ययोगव्यवच्छेदेन सत्तामात्र साध्यमिति चेदाह। न **तथे**त्यादि। क्वचिदिति प्रधानादिके धर्मिणि। कस्मात् (।) **प्रधानादिशब्दवाच्यस्यैवार्थस्य** त्रैगुण्यादिलक्षणस्यैवाभावात्। **निर्विशेषेणैव सा** सत्ता। विशेषणभूतस्याधारस्याभावात् (।)

कथमित्यादि पर। सोपि ध[1]र्मी **कथं विज्ञातव्यः**। ज्ञात्वा च शब्देनाभिधातव्य। अभिहित प्रमाणेन **निश्चेतव्यः**। तस्माज्ज्ञेयत्वादिभि· सोपि सिद्ध **एव**। तस्मिन् सत्ता सामान्य साध्यते। **तत्किमिदानी ज्ञेयन्निर्विशेषणमस्तीत्ये**तावता प्र धा न स्य **सिद्धिरस्तु**। ज्ञेयाद्यर्थो हि प्रधानार्थ· शब्दार्थरूप स्यान्न नित्यादिगुणोपेत। प्रधानन्तावत्सिद्धम्भवत्यन्ये च धर्मा अन्यै प्रमाणै· से[2]त्स्यते इति चेदाह। **तथापि** ज्ञेयत्वादिना **किं सिद्धं स्यात्** (।) नैवाभिमतस्य प्रधानस्य स्वलक्षणस्य सिद्धि स्यात्। अस्य शब्दार्थरूपत्वात्। अन्यनुमानेपि तर्ह्यग्निमात्र सिद्धमित्यसाध्य स्यादित्याह। **अन्यत्र** तु **तदेवाग्निसामान्य**नियताधारमसिद्धन्तत्र देशे न **सिद्धमिति साध्यते।**

ननु **तत्रापि तदयोगविरहिणे**ति तेन प्रदेशेनायोगस्तदयो[3]गस्तेन विरह· प्रदेशेन योग इत्यर्थ। सोस्ति यस्य सामान्यस्य तत्तथोक्त। तेना**न्वयो न सिद्धः**।

नेत्यादिना परिहरति। **न वै कश्चि**द्न्यायज्ञ **तथाभूतेन** प्रदेशसम्बन्धिनाऽग्निसामान्येन व्याप्ति **करोति। तस्मात परं** प्रतिवादिन **प्रतिपादयता धूमोग्निनान्तरीयकोग्न्यविनाभावी दर्शनीयः। यत्र धूमस्तत्राग्निरित्येव। स** धूमस्त**थे**ति स[4]र्वोपसहारव्याप्तिप्रदर्शनेनाग्निमात्रेण **व्याप्तः सिद्धो यत्रैव** प्रदेशे

शेन न किञ्चित् प्रयोजनम्। तत्र दर्शनात् सम्बन्धाख्यानमात्राच्चे[5]ष्टस्य सिद्धेः। तदनिर्देशे च कथं तद्विशिष्टेऽन्वयः ? तद् अयं अग्न्यविनाभावितया सिद्धः। अर्थात् अग्निरेव प्रदेशेनायोग व्यवच्छिनत्ति। तस्मात् स एव तथा[6] साध्य उच्यत इति।

न पुनस्तथोपन्यासपूर्वकोऽन्वयः। साध्योक्तेरिहानङ्गत्वात्। तत्पर्वगामिनि प्रतिज्ञासाधनेन कश्चिदपनयेत्[7]। तथा चाह— 476b

"अन्यत्रा व्यभिचारेऽपिधर्महेतुं हि दर्शयेत्।
तत्र तेन प्रसिद्धिमत धर्मिणं गमयिष्यति॥"

तस्मात् यथाग्निसाधनं नैव सत्तासाधनमपि प्राप्तम्।

निश्चिताव्यभिचार च लिग तत्र प्रसिद्धिमत्
तेन व्यापकधर्मेण धर्मिण गमयिष्य।

धर्मिणि **स्वयं** स्वेन **रूपेण दृश्यते तत्रैवाग्निबुद्धिञ्जनयति**। **तत्रैतस्या** सामर्थ्यादनुमेयप्रतीतौ **साध्यनिर्देशेन न किञ्चित् प्रयोजनन्तेन** विनापि साध्यसिद्धे एतदेवाह। **तत्रेत्यादि। तत्र** साध्यधर्मिणि लिङ्गस्य **दर्शनात् सम्बन्धाख्यानमात्राच्चेष्टस्य** साध्यस्य **सिद्धे**.[5]। यतश्च न साध्यस्य धर्मधर्मिसमुदायस्य निर्देशस्तदा **तदनिर्देशे च कथन्तद्विशिष्टे** साध्यधर्मेणान्वयः(।) नैव (।) यतोनन्वयदोष स्यात्। **तदिति तस्मादयन्धूमोग्न्यविनाभावितया सिद्धः सामर्थ्यादेव तेन प्रदेशेनायोगम्व्यवच्छिनत्ति**। तस्मात् समुदाय साध्य उच्यते।

यदि हि तत्र नाग्नि स्यान्नैव धूमो भवेदिति सामर्थ्य। अन्वय[6]स्तु केवलेनैव साध्यधर्मेण दर्शनीयो न साध्यधर्मधर्मिसमुदायेन। तस्य दृष्टान्तेऽसिद्धत्वात्। समुदायेन च व्याप्तिप्रदर्शने प्रयोजनाभावात्। अत एवाह। **न पुनरस्यास्तथेति** प्रदेशविशिष्टस्य**ोपन्यासपूर्वकोन्वयः**। कि कारण (।) **साध्योक्ते रिहान्वय**प्रदर्शनकालेऽ**नङ्गत्वात्**। साध्यनिर्देशपूर्वकाले वान्वयस्येष्यमाणे नैव सा[7]धनवाक्यात् **कश्चित्** प्रतिज्ञावाक्य**मपनयेत्**। 129a

तस्मात् स्थितमेतत् (।) पक्षमनुप्रदर्श्यैव साध्यधर्मेण लिङ्गस्य व्याप्ति कथनीयेति। तथा चाह आचार्य दि ग्ना ग। "लिगस्य धूमादे साध्येनाव्यभिचारोन्यत्र सामान्ये न धर्मिमात्रे दर्शयितव्य। **निश्चिताव्यभिचारं च लिङ्गन्तत्रे**"ति साध्यधर्मिणि **प्रसिद्धं सत्। तेन व्यापकधर्मेण** युक्त साध्य**धर्मिणं** गमयिष्यति।[1]

तस्मादित्यादिनोपसहार। **यथाग्निसाधन**म्विशेषपरिग्रहादनवद्य **नैव सत्तासाधनम**नवद्य विशेषासिद्धै। तदेव सिद्धसाध्यताप्रसगादनन्वयाच्च न प्र धा ना दे सत्ता साध्या।

अपरामृष्टतद्भेदे वस्तुमात्र तु साधने ॥१९२॥
तन्मात्रव्यापिनः साध्यस्यान्वयो न विहन्यते ।

स्वभावविशेषापरिग्रहेण साधनसत्तायामपि वस्तुमात्रव्यापि[2]नि साध्यधर्मे नान्वयव्याघातः ।

न हि तत्रावश्यं विशेषपरिग्रहक्रिया । सत्तामात्राश्रयेऽपि साधने सामर्थ्यात् साध्यत्वमेव वैफल्यात्[3]।

अपि च—

नासिद्धे भावधर्म्मोस्ति व्यभिचार्युभयाश्रयः ॥१९३॥
धर्मो विरुद्धोऽभावस्य सा सत्ता साध्यते कथम् ।

सत्तासाध्ये तद्धेतुः सर्वत्र प्रत्ययः त्रयी दोषजातिं असिद्धव्यभिचारविरुद्धं

साधन पुन सर्वमत्रमनुद्दिष्टमिति प्रतिपादयितुमाह। **अपरामृष्टे**त्यादि। अपरामृष्टोनुपात्तस्तद्भेदः। यस्मिन् **वस्तुमात्रे** सत्तामात्रे । तस्मिन् **सा[2]धने** क्रियमाणेन्वयो न विहन्यते। कस्य (।) **तन्मात्रव्यापिनः** सत्तामात्रव्यापिनस्साध्यस्य। तदेव विवृण्वन्नाह। **वस्तुमात्रव्यापिनि साध्यधर्मे। स्वभावविशेषापरिग्रहेण** पुनस्सत्त्वे क्रियमाणे **नान्वयव्याघातः**। न साध्यशून्यो दृष्टान्त इत्यर्थः।

न हि तत्रेति। सत्त्वे **साधने**। कस्मात् (।) **सन्मात्राश्रयेपि** सत्त्वमात्रस्य हेतुत्वेनाश्रयणेपीत्यर्थ । न पुन[3] साध्यत्वे सत्ताया विशेषानाश्रय (।) कस्माद् (।) **वैफल्यात्** (१९२–९३)

सत्ताया साध्याया पुनर्दोषान्तरन्दातुमाह। **अपि चेति। असिद्धे** प्रधानादौ धर्मिणि **न भावधर्मोस्ती**त्यसिद्धो हेतु । यस्तु भावाभावो**भयाश्रयो** धर्मः स सत्त्वे साध्ये **व्यभिचार्य**नैकान्तिको यो**ऽभावस्य धर्मः** स सत्त्वे साध्ये **विरुद्धो** सत्त्वस्यैव साधनात्। यस्या प्रधानादिसत्ताया साध्याया हेतु[4]र्यः कश्चिदुपादीयते स सर्वो दोषत्रय नातिवर्त्तते (।) **सा सत्ता साध्यते कथं**। इह च हेतोः सिद्धत्वमभ्युपगम्य विरुद्धानैकान्तिकान्तिकत्वे उक्ते हेत्वसिद्धावनयोरसम्भवात्। (१९२–९३)

ननु सर्वज्ञादिसत्तायामपि साध्याया हेतोरसिद्धतादिदोषस्य तुल्यत्वात् कथन्तत्सत्तासिद्धिः।

नैष दोष.। यद्यदुपदिश्यते तज्ज्ञानपूर्वकमेव यथाऽन्यत् किञ्चित्। उप[5]दिश्यते च चतुरार्यसत्य। तस्मात्तदपि ज्ञानपूर्वकमेव यस्य तज्ज्ञान सोस्माभिः सर्वज्ञोभ्युपगम्यत इति। न कश(?काचित्) क्षति । **तद्धेतु**रिति सत्ताहेतुः। **त्रयी**मिति त्र्यवयवान्दोषजातिन्दोषप्रकारा**न्नाभिवर्त्तते**। तामाह। **असिद्ध**मित्यादि। **विरोध-**

नातिवर्त्तते। तत्र भावधर्मो हेतुरादिष्टोऽपि कथमसिद्धसत्ताके स्यात्।

यो हि तत्र भावधर्ममिच्छति स कथं भावं नेच्छेत्? कदाचिदस्वभावस्यैवा[5]पेक्षया धर्मिणि व्यतिरेकीव धर्मो निर्दिश्यते। धर्मधर्मिवचनशब्दानां वाच्यार्थे निश्चयज्ञानविषय एव न कश्चिदपि विशेष इत्युक्तम्। यथा उभावपि धर्म इति वचने नहि वस्तुनि अनाश्रितेऽविरोधेन प्रतिषेधमात्रस्याभावेऽपि अविरोधात्। यथा न भवति मूर्त्तमिति अमूर्त्तत्वं निरुपाख्येऽपि[7] स्यात्। 477a

यदि निरुपाख्याभावान्न प्रतिषेधविषयत्वम्। ततः किं विधिविषयोऽस्ति। तदपि नेति चेत। कथं न स प्रतिषेधविषयः[1]? विधिनिवृत्तिरूपत्वात् प्रतिषेधस्य।

मिति विरुद्धता। तत्र भावधर्मो हेतुरसिद्धसत्ताके कथं सिध्येत्।

स्यादेतद् (।) भावधर्म· प्र[6] धा ना देस्सिद्धो न तु भाव इत्याह। यो हीत्यादि। यो हि प्रधानादिभावधर्म्महेतुर्न्तत्र प्रधानादाविच्छति स कथं वादी प्रधानादिकम्भावं सिद्ध नेच्छेत्। तस्माद् भाव एव धर्म। कथन्तर्हि भावस्याय धर्म इति कथ्यत इति चेदाह। कदाचिदपेक्षयेति भेदान्तरप्रतिक्षेपलक्षणया व्यतिरेकीव भिन्नरूप इव धर्मिणः सकाशाद् धर्मो निर्दिश्य[7]ते। यथा कृतकत्वमस्ये- 129b
त्यकृतकव्यावृत्त एव भाव उच्यते। नत्वन्य एव धर्मो धर्मशब्देनोच्यतेऽन्यश्च धर्मी धर्मिशब्देनेत्याह। न हीत्यादि। यस्मादन्यव्यावृत्तिनिरपेक्ष पुमान् यदा शब्दस्याकृतकादेवैकस्माद व्यावृत्ति जिज्ञासते। तदा कृतकत्वमस्येत्युच्यते। यदान्यव्यावृत्तिसाकाक्षोऽकृतकत्वादेवैकस्माद् व्यावृत्ति जिज्ञासते तदा कृतक शब्द इत्यु[1]च्यत इति। एतच्च प्रागेवोक्तम्(।)भेदान्तरप्रतिक्षेपाप्रतिक्षेपेत्यादिना।

अथ पुनरुभयोर्भावाभावयोर्द्धर्म हेतुम्ब्रूयात्। कथ पुनरेको धर्मो भावाभावयोर्भवति (।) धर्मो हि स्वभावो यश्च भावस्य स्वभाव कथमभावस्य स्यादित्याह। अनाश्रितेत्यादि (।) अनाश्रितम्वस्तु यस्मिन् व्यतिरेकमात्रे तस्य व्यतिरेकमात्रस्य प्रतिषेधमात्रस्य धर्मत्वेन कल्पि[2]तस्याभावेप्यविरोधात्। व्यतिरेकमात्रमेव कथम्भवतीत्याह। अपर्युदासेन प्रसज्यप्रतिषेधेन। प्रसज्योपसर्जनो विधि. पर्युदासः स चेह नाश्रित.। यथा न भवति मूर्त्त इत्यमूर्त्तत्वं मूर्त्तत्वनिवृत्तिमात्र भावेपि विज्ञाने निरूपाख्येप्यभावेपि स्यात्।

पर· प्रतिबद्धुमाह। निरुपाख्याभावान्न प्रतिषेधविषयत्वं। यदधिकरणादिश[3]क्तियुक्तन्तत्कस्यचिद्विषय स्यात्। निरुपाख्य च सर्वशक्तिरहितन्तत्कथम्विषय स्यात्। संप्रति प्रतिषेधविषयत्वे प्रतिषिद्धे किम्विधिविषयोस्ति निरुपाख्य। तदपि

तद् अव्यवच्छेदमात्रं द्वयोरपि भावाभावयोः विपक्षवृत्तिशङ्काव्यवच्छेदेन गमकत्वं लभ्यं कथमात्म[2]सात् कुर्यात्। स च स्ववाचा उभयधर्मतां ब्रुवाणः सतोऽन्यत्रापि अस्य वृत्तिं भाषते सत्तायामव्यभिचारवचन इति कथं न व्यभिचारः? सत्ताया अभावधर्मस्तु भावमात्रव्या[3]पिनोऽर्थस्य व्यवच्छेदस्य हेतुवचनमत्र विरुद्धहेतौ स्यात्। तस्य च वस्तुनः क्वचिदभावाद् अभावे भावव्यवच्छेदस्य सत्त्वात्। तस्मादयं त्रिप्रकारोऽपि धर्मः[4] सत्तायाः साधनेन हेतुलक्षणाश्रय विना न चान्या गतिः। तस्मान्न सत्ता साध्यते। तन्मात्रव्यापिनि भावधर्मस्यात्र सामान्यसाधनत्वेऽपि सिद्धसत्ताके धर्मिणि नासिद्धिः।

तेन च साध्यधर्मेण व्याप्तिः कथंचिद् वा यदि निश्चीयते विरुद्धव्यभिचार-

---

विधिविषयत्वन्निरुपाख्यस्य **नेति चेत्। कथमि**दानीमभावो **न प्रतिषेधविषयः**। विधिविषयत्वनिषेधादेव हि प्रतिषेधविषयत्व। किं कारणम् (।) **विधिनिवृत्तिरूपत्वात् प्रतिषे[4]धस्य। तदि**ति तस्मादेतदनन्तरोक्तम**व्यवच्छेदमात्रं द्वयोरपि** भावाभावयो सम्भवत् सत्त्वे साध्ये गमकत्व कथमात्मसात् कुर्यात्। किम्विशिष्ट गमकत्व। **विपक्षे**त्यादि। **विपक्षे** प्रयोगे **वृत्ति**र्हेतोस्तस्य **शङ्का** तस्या अपि **व्यवच्छेदेन** न **लभ्यन्न** चोभयधर्मस्य व्यवच्छेदमात्रस्य विपक्षाद् व्यावृत्तिरस्तीति **कथन्तद् गमकत्वमात्मसात् कुर्यात्। स च** वा[5]दी **स्ववाचान्यवचनेन**। सत्तासाधनस्य हेतो**रुभयधर्मतां ब्रुवाणस्सत.** साध्या**दन्यत्राप्य**सति अस्योभयधर्मस्य हेतो**र्वृत्तिम्**भाषते (।) स एव च **सत्तायां** साध्यायाम**व्यभिचारनिबन्धनत्वाद्** गमकत्वस्येत्यव्यभिचारम्भा(?)एत इति हेतो **कथं नो**न्मत्त।

अभावधर्मन्तु हेतु **सत्ताया**म्वदतोस्य वादिनो विरुद्ध स्यात्। सत्त्वविपरीतस्यासत्त्वस्य साधनात्।[6] क पुनरस्यैव अभावस्यैव धर्म इत्याह। व्यवच्छेद कीदृशम्**भावमात्रव्यापी सामर्थ्य**लक्षणस्तस्य **व्यवच्छेदो** नियमेनाभावस्यैव भवति (।) न तु मूर्त्तत्वादेर्व्यवच्छेदम्तस्यैवोभयधर्मत्वात्। कस्माद्विरुद्ध इत्याह। **तस्य** भावमात्रव्याप्यर्थव्यवच्छेदस्य **भावे क्वचिदभावादभावे** च सर्वत्र भावाद्
130.1 विरुद्धत्व। **तस्मादयं त्रिप्रकारोपि** भावाभावोभयसम्बन्धी धर्म **सत्ता[7]यास्साध्रनेन हेतुलक्षणमुक्तः**। न च त्रिप्रकारादधर्मादन्या **गतिरन्य** प्रकारोस्ति यत**स्तस्मान्न सत्ता साध्यते**। साधनत्वे लिङ्गत्वेऽस्यास्सत्ताया **सामान्ये**नानुपात्तविशेषणत्वेन। **सिद्धसत्ताके धर्मिणि नासिद्धिः**। अनित्यत्वादिके **वस्तुधर्म**साध्ये। किम्विशिष्टे **तन्मात्रव्यापिनि। तेन च साध्यधर्मेण** लिगस्य **व्याप्तिः। कथंचिदि**त्यन्वय[1]मखेन

योरभाव इति[6] नायं प्रसगः। व्याप्तौ धर्मिसमाश्रये वाऽनिश्चिते सति तत्स्वभावतया गमको न स कश्चिदपि गमकः स्यात्। अतएव स्वधर्मेण व्याप्तः सिद्धः[7] स्वभावो गमको वाच्यः। 477b

न हि प्रकाशतया प्रदीपो हि प्रकाशकः, तद्रूपाप्रतिपत्तौ स्वामर्थक्रियां करोति।

सिद्धः स्वभावो गमको व्यापकस्तस्य निश्चितः ॥१९४॥

तद्धर्मनिश्चयादेव[1]।

व्यापित्वनिश्चये हि तद्धर्मिणो धर्मः गम्यस्वभावः। अयं निवृत्तावपि तन्निवर्त्तकः। तस्यायं व्यापको धर्मः स्वयं निवर्त्तमानो व्याप्यस्य तस्य धर्मस्य निवर्त्तकः। यद्यस्याभावे[2] न भवेत्, एवं ह्यस्य व्यापकः सिद्धो भवति।

तस्माद् एतेन गमकलक्षणेन द्विविधस्यापि साधनप्रयोगस्य गमकलक्षणं

व्यतिरेकमुखेण (?न) **वा यदि निश्चीयते**। न विरोधव्यभिचारौ। न विरुद्धत्वमनैकान्तिकत्वम्वा(।)इति हेतोर्नाय प्रसंगोसिद्धि (?द्ध) विरुद्धानैकान्तिकलक्षण। अनिश्चितायान्तु साध्यधर्मेण लिङ्गस्याव्याप्तौ। **धर्मिसमाश्रये वा** पक्षधर्मत्वे **वाऽनिश्चिते सति तत्स्वभावतया** निश्चितत्रैरूप्यस्वभावतया यो **गमको**ऽभिमतो हेतुर्न **स कश्चिद् गमकः**। अत[2] एव कारणात् **स्वधर्मेण** स्वेन साध्यरूपेण **व्याप्तः** साध्यधर्मिणि **सिद्धो** निश्चितो हेतु**स्वभावो वाच्यः**।

एतदेव द्रढयन्नाह। **न हीत्यादि**। **प्रकाशतया** प्रभास्वरतया घटादीनप्रकाशयन् यदा कदाचिद् घटाद्युदरान्तर्वर्त्ती भवति तदा **तद्रूपाप्रतिपत्तौ** प्रभास्वरताऽप्रतिपत्तौ सत्या **स्वामर्थक्रियां** घटादिप्रकाशनलक्षणा **न हि करोति**।

ग[3]मकस्वरूपमभिधायाधुना गम्यस्वरूपमाह। **व्यापकस्तस्ये**ति। योसौ गमको व्याप्य स्वभावस्तस्य **व्यापकः** स्वभाव निश्चितो गम्य।

तद्धर्मेत्यादिना व्याचष्टे। धर्मिणो **धर्मो** गम्य (।) कीदृशस्तस्य गमकत्वेनाभिमतस्य **व्यापकत्वेन निश्चितः**। कथ पुनर्व्यापकत्वेन निश्चित इत्याह। **तद्धर्मनिश्चयादेव** व्याप्यधर्मनिश्चयादेव।

इयता गम्य[4]गमकयो स्वरूपन्दर्शित।

निवर्त्त्यनिवर्त्तकयोरपि स्वरूपमाह। **तस्ये**त्यादि। अयमिति व्यापको धर्म स्वय **निवृत्तौ** सत्या **तस्य** व्याप्यस्य **निवर्त्तकः**।

तस्येत्यादिना व्याचष्टे। **अयं व्यापको धर्मः स्वयन्निवर्त्तमानस्तस्य व्याप्यस्य निवर्त्तक** इति सम्बन्ध। किङ्कारण। यस्मादेवं ह्यस्यायं साध्यो **धर्मो व्यापकः सिद्धो भवति। यद्यस्य** व्यापकस्याभा[5]वे व्याप्यो **न भवेत्। तदि**ति वाक्योपन्यासे।

उक्तं वेदितव्यम्।

द्विविधो हि प्रयोगः साधर्म्यवानेव वैध[3]र्म्यवान् च। यदन्ये अन्वयी व्यतिरेकी चेत्याहुः। नानयोः अन्यत्र संयोगभेदात् अर्थतः कश्चिद् अपि भेदः। साधर्म्येणापि प्रयोगेऽर्थाद् वैध[4]र्म्यवतो गतिः। असति तस्मिन् साध्यहेत्वोरन्वयाभावात्। एवं साधर्म्यवतोऽन्वयगतिः स्यात्। तस्मिंश्चासति साध्याभावश्चेत् हेत्वभावे शका[5] स्यादिति विस्तरेण वक्ष्यामः। उदाहरणं--

(१) निर्हेतुकविनाशः

अनित्यत्वे यथा कार्यमकार्यं वाऽविनाशिनि ॥१९५॥

एतेन च अनयोर्द्वयोरुदाहरणमुक्तम्। तत्रान्वयी "यश्च कश्चित् कृतकः स सर्वोऽप्यनित्यः।" यथा घटा[6]दिः। शब्दश्च कृतकः। एव कृतकत्वमनित्यत्वेन

अनेनानन्तरोक्तेनानुवर्त्यानुवर्त्तकभावस्य निवर्त्यनिवर्त्तकभावस्य च प्रदर्शनेन **द्विविधस्यापि** साधर्म्यवतो वैधर्म्यवतश्च **साधनप्रयोगस्य गमकलक्षणं** साध्यसाधकत्वलक्षणमुक्तम्वेदितव्य।

तद्व्याचष्टे। **द्विविधो** हीत्यादि। **यथाहुरेके** इति नै या यि का। **साधर्म्यवानेव** हि प्रयोगोन्वयी[6]। **वैधर्म्यवानेव** च व्यतिरेकी।

ननु साधर्म्यप्रयोगे पक्षधर्मत्वमन्वयश्चेति (।) तथा वैधर्म्यप्रयोगेपि पक्षधर्मत्व व्यतिरेकश्चेति द्विरूपन्तर्हि लिङ्गम्प्राप्तमित्याह। **नानयो**रित्यादि। अनयोरित्यन्वयव्यतिरेकिणोर्हेत्वोर्वस्तुत **परमार्थतो न कश्चिद् भेदः**। द्वयोरप्यन्वयव्यतिरेकवत्त्वात्।
130b अन्यत्र सयोगभेदात्[7]। तस्मात्तावेवान्वयव्यतिरेकौ कदाचित्साधर्म्यप्रयोगेण प्रतिपाद्येते कदाचिद् वैधर्म्यप्रयोगेणेति प्रयोगमात्रम्भिद्यते न त्वर्थ। किं कारण (।) यस्मात् **साधर्म्येणापि हि प्रयोगेऽर्थात** सामर्थ्यात्। साध्यविपक्षाद्धेतोर्व्यावृत्तिर्वैधर्म्यन्तस्य गति।

तदेव सामर्थ्यमाह। **असती**त्यादि। **तस्मिन्निति** वैधर्म्ये। एव हि साध्येनान्वितो हे[1]**तु**ः स्याद् यदि **साध्याभावे न भवेत्**। तथा वैधर्म्य इति वैधर्म्यप्रयोगे। तस्मिन्नित्यन्वये यदि हि साध्येन हेतोरन्वय स्यात् तदाय साध्यनिवृत्तौ निवर्त्तेत। **एतच्च** व्य ति रे क चि न्ता **याम्वक्ष्यामः**। (१९४-९५)

अनित्यत्वे यथा कार्यं। अनित्य एव कृतकत्वं। एतच्चान्वयिन उदाहरण। अकार्यम्वा। अविनाशिनीति व्यतिरेकिण उदाहरण। तेनायमर्थो भवति (।) **अविनाशिनि**[2] विनाशाभावे सति। अकार्यं कृतकत्वन्न भवति। तदेवाह (।) **अनेने**त्यादि। **अनयोरि**त्यन्वयव्यतिरेकिणो। यत्किञ्चिदिति सर्वोपसहारेण

व्याप्तं कथितमिति शब्दोऽपि कृतकत्ववचनसामर्थ्यादेवानित्यः शब्द इति भवति। तस्मान्नावश्यं पक्षो निर्देश्यः[7]। अयं हि अन्वयी प्रयोगः। 478a

व्यतिरेकेऽपि इति अनित्यत्वाभावे कृतकत्वस्याभावः। शब्दः कृतक इति तत्स्वभावसिद्धः। तदभावे न भवतः कृतकत्वस्य शब्दे च भाव[1]ख्यातौ तदात्मनो भावः, सामर्थ्यात् सिद्धः पूर्वत् प्रतिज्ञावचनं अकृतक इति।

अन्वयस्तु अर्थापत्त्या सिद्धः। तदात्मनियतस्य तन्निवृत्तौ तन्निवृत्तेः। नियमं[2] प्रसाध्य निवृत्तिर्वक्तव्या।

सा चेत् सिद्धा, तदात्मनियमं अर्थादाक्षिपतीति सिद्धोऽन्वयः।

व्याप्तिकथनेनार्थान्नित्याद् व्यावृत्ति कृतकत्वस्यो**क्तेति** व्यतिरेकमति। **शब्दश्च कृतक** इति पक्षधर्मकथन। पक्ष. कस्मान्नोच्यत इत्याह। **कृतक**स्येत्यादि। **अनित्यत्वेन व्याप्तं कृतकत्वं** यदा शब्देन **कथित**मन्तदा[3] नियमेन स्व व्यापक सन्निधापयतीति **सामर्थ्यादेवानित्यः शब्द** इति भवति। **तस्मान्नावश्यमि**त्यादि। **अ**हेति साधर्म्यप्रयोगे (।)

वैधर्म्यवन्त प्रयोगमाह। **व्यतिरेके**णीत्यादि। एतच्चाकार्यम्वा ऽविनाशीत्येतस्य विवरण। इहापि न प्रतिज्ञावचन। यस्मात् सिद्धस्वभावतया निश्चितया नित्यस्वभावतया हेतुभूतया। **तदभाव** इत्यनित्यत्वाभावे सति **न भ[4]वतः कृतकत्वस्य शब्दे च भावख्यातौ** सद्भावकथने कृते सति **तदात्मनः** सत इत्यनित्यस्वभावस्य सत कृतकत्वस्य शब्दे **भाव** इति। **सामर्थ्यादनित्य** शब्द इति सिद्धे। **पूर्ववदिति** साधर्म्यप्रयोगवत्।

नन्वत्र वैधर्म्यप्रयोगेऽन्वयो नोक्त इत्याह (।) **अन्वयस्त्वित्यादि। अन्वय**मन्तरेण वैधर्म्यस्यानुपपत्तिरर्थापत्तिः। किङ्कारण (।) **न हीत्यादि। य[5]स्मा**दतदात्मनियतस्यानित्यस्वभावेऽप्रतिबद्धस्य। **तन्निवृत्ता**वनित्यत्वनिवृत्तौ **निवृत्ति**र्युक्ता। यत एवन्तस्मात् स्वयन्तादात्म्यतदुत्पत्तिभ्या हेतो साध्ये **नियमं** प्रमाणेन **प्रसाध्य** साध्यनिवृत्त्या मूढ प्रति हेतो**र्निवृत्तिर्वक्तव्या**।

तेन यदुच्यते (।) "प्रमाणेन चेन्नियम प्रसाधित. किन्निष्फलेन निवृत्तिवचनेन। कथ वा नियम न प्रतिपद्यते।[6] न तु तन्निवृत्तौ निवृत्तिमि"ति तदपास्त।

अन्ये त्वन्यथा व्याचक्षते। प्रसाध्य शब्दार्थादाक्षेपवचनस्तेनायमर्थो नियम प्रसाध्य नियममर्थादाक्षिप्य निवृत्तिर्वक्तव्येति। तथाभूतेन वचनेन निवृत्तिर्वक्तव्या। निवृत्युक्ति· सामर्थ्यान्नियममाक्षिपतीति। अत एवाह। **सा चेत्यादि। से**ति नियमस्याक्षेपिका निवृत्ति. सिध्यति परम्प्रति। यदि तथा[7]भूतेन वचनेन प्रकाशते। **तदा-** 131a

कथमिदानीं कृतकोऽवश्यमनित्य इति येन उच्यत[3] इति। एवं--

अहेतुत्वाद्विनाशस्य स्वभावादनुबन्धिता।

न हि विनश्वरं वस्तु तद्भावे हेतुमपेक्षते। स्वहेतोरेव विनश्वराणां भावात्। तस्माद् यः क[4]श्चित् कृतकः स स्वभावेनैव नश्वरः।

तथा हि वस्तु--

त्मनियमं साध्यात्मनियम**मर्थादुक्तिसामर्थ्याद्दाक्षिपति। इति** हेतो **सिद्धोन्वयः।**

कथमित्यादि पर। **इदानी**मिति निश्चिते व्याप्यव्यापकभावे गमको हेतु-रित्यभ्युपगमे सतीत्यर्थ। कथ केन प्रमाणेन **कृतकोवश्यमनित्य इति** प्रत्येतव्यो निश्चेतव्यो **येन** त्वयैवमुच्यते। कृतक शब्दोऽनित्य। यत्कृतकन्तदनित्य[1]मित्येव पृष्टो व्याप्तिविषय बाधक प्रमाणन्दर्शयितुमाह। **यस्मादि**त्यादि। यस्माद् विनाशस्य निवृत्तिधर्मकत्वलक्षणस्य स्वभावात् स्वरूपमात्रादनुबन्धिता। यद्वा भवत्यस्मादिति भाव (।) स्वो भाव स्वभाव स्वहेतुरित्यर्थ। तस्मादेवानु-बन्धिता विनाशस्य वस्तुनि सद्भावस्तस्मात् कृतकोऽनित्य। कुत एव तदहे**तुत्वाद्** यतो न जनकाद्धेतोरन्यो **विनाश[2]स्य** हेतु (।) तस्मात् **स्वभावादनुबन्धः।**

तदयमत्र समुदायार्थ। मुद्गरव्यापारानन्तर द्वय प्रतीयते घटनिवृत्ति। कपाल च (।) तथैते विनाशरूपतया प्रतीयेते। तत्र घटनिवृत्तेर्नीरूपत्वेनाकार्य-त्वादिति वक्ष्यति। तत्कार्यत्वेन तु प्रतीतिभ्रान्तिरेव। कार्यत्वे वास्या न घट-निवृत्तिरूपत्व स्यात्। घटसम्बन्धित्वेन कृतकत्वात्। विनाशरूप[3]तया च न प्रतीति स्यात् घटस्य सत्त्वात्। कपालस्यापि मुद्गरकार्यत्वे सत्यपि विनाश-रूपता। घटस्यानिवृत्तत्वादिति च वक्ष्यति। ततश्च कथमस्य विनाशरूपतया प्रतीति। निर्हेतुके तु विनाशे स्वरसतो निवर्त्तमान एव घटो मुद्गरादिसहकारी कपालजनकत्वेन सदृशक्षणानारम्भकत्वात् मुद्गरव्यापारानन्तर घटनिवृत्ते कपा-लस्य[4] च सद्भावात्तयोर्विनाशरूपतया विनाशस्य च सहेतुकत्वेन मन्दमतीना-मवसायो युज्यत एव।

मुद्गरव्यापारानन्तर सन्तानविच्छेदात्। तत्कथ **निर्हेतुक**विनाशाभ्युपगमवा-दिना प्रतीतिबाधा चोद्यत इति। एतमेवार्थमाह। **न ही**त्यादि। नश्यन्त इति येषान्तावत् कृतकाना नाशो दृश्यते ते विनश्यन्त। **तद्भावे विनश्वरस्वभावे** स्वरूप[5]जनकादन्यत्र **हेतुमपेक्षते**। कुत। **स्वहेतोरेव विनश्वराणां** निवृत्तिधर्माणा **भावात्**। यतश्च नश्वरस्वभाव प्रत्यनपेक्षता भावानान्त**स्माद् यः कश्चिद् कृतकः स स्वभावेनैव नश्वरः**। (१९५-९६)

सापेक्षाणां हि भावानां नावश्यंभावतेक्ष्यते ॥१९६॥

भावनाशोऽपि निरपेक्ष एव। सापेक्षत्वे[4] हि घटादीनां केषां चिन्नित्यताऽपि स्यात्। येन--

बाहुल्येपि हि तद्धेतोर्भवेत् क्वचिदसंभवः।

क्वचिद असम्भवः स्यात्। यदि विनाशहतोर्बाहुल्यं तेषामपि स्वप्रत्ययाधीन[6]-सन्निधानत्वात् नावश्य सन्निधानमिति कश्चिन्न नश्येदपि। न हि हेतवोऽवश्यं फलवन्तः वैकल्यप्रतिबन्धभावात, तेनान्यफलाभावात्।[7] 478b

एतेन व्यभिचारित्वमुक्त[7] कार्याव्यवस्थितेः ॥१९७॥

सर्वेषां नाशहेतूनां हेतुमन्नाशवादिनाम्।

इत्यन्तरश्लोकः।

तदयं भावोऽनपेक्षस्तद्भावम्प्रति तद्भावनियतः। तद्यथा सकलकारण-

यदि सहेतुको विनाशस्तदावश्यभावी न स्यादित्याह। **सापेक्षाणामित्यादि। हीति** यस्मात् (।) सापेक्षाणाम्भावाना **नावश्यम्भाविता** (।) तस्मात् **निरपेक्षो-**भावो वि[6]नाशे विनश्वरे स्वभावो हेतु**सापेक्षत्वे हि घटादीनाम्मध्ये केषाञ्चिन्नि-त्यतापि स्यात्।** येषा नाशकारणमसन्निहित। **बाहुल्याद्** विनाशकारणाना न क्वचिदसन्निधानमिति चेदाह। **येनेत्यादि। तद्धेतोरिति** विनाशहेतो**स्तेषा-मपि** विनाशकारणाना **नावश्यं सन्निधानमिति** सम्बन्ध। कस्मात् (।) **स्वप्रत्य-**याधीनसन्निधित्वात् स्वकारणाय[7]तसन्निधित्वात्। न च विनाशकारणान्त 131b
कारणानि सर्वत्र सन्निहितानि। ततश्च विनाशहेतोरसन्निधानात् **कश्चिन्न नश्ये-दपि।** सत्यपि विनाशहेतुसन्निधाने न नियतो विनाश (।) यतो न **ह्यवश्यं हेतवः फलवन्तः** विनाशाख्यकार्यवन्त। कस्मात् (।) सहकार्यसन्निधान **वैकल्यं।** विरुद्धोपनिपात **प्रतिबन्धः।** एतेन सापेक्षस्य नावश्यम्भावित्वेन व्यभिचा[1]रित्व-मुक्त। (१९५-९६)

सर्वेषा नाशहेतूना नाशस्य लिङ्गत्वेन ये हेतव उपादीयन्ते तेषा। कस्मात् (।) **कार्याव्यवस्थितेः।** नाशलक्षणकार्योत्पत्तिनियमाभावात्। **हेतुमन्नाशवादिनां** हेतुमन्तन्नाश ये वदन्ति तेषा। यतश्चाहेतुको विनाश। **तत्तस्मादयम्भावः कृतकोनपेक्षस्तद्भावम्प्रति** विनश्वरस्वभावम्प्रति। **तद्भावनियतो** निवृत्तिधर्म-कताया नियत। दृष्टा[2]न्तमाह (।) **असम्भवेत्यादि।** न सम्भवति प्रतिबद्धो यस्या सा कारणसामग्री। **सकलेति** सहकारिप्रत्ययेन सन्तानपरिणामेन च[5] परि-पूर्णेत्यर्थ। प्रयोगस्तु। ये यद्भाव प्रत्यनपेक्षास्ते तदभावनियता। **तद्यथा**

सामग्री[1] कार्योत्पादने ऽसम्भवत्प्रतिबन्धा।

ननु क्वचित् अनपेक्षाणामपि केषांचित् नावश्य तद्भाव इति भूमिबीजोदक-सामग्रीणामपि अंकुरानुत्पत्ते[2]रिति चेत्। न। तत्रापि हेतुभूतस्य सापेक्षत्वात्। नैवं भावस्य काचिदपेक्षा। तत्रापि अन्त्यायां हेतुसामग्र्यां कार्योत्पादने याऽव्यवहिता सा फलवत्येवेति[3]। सैव तु तासां मध्येऽङ्कुरहेतुः। अन्यास्तु पूर्वपरिणामस्तदर्थ एव।

न च तां तत्र कश्चित् प्रतिबद्धुं समर्थः। एकत्र अविकारानुत्पत्तेः, उत्पत्तौ वा

ऽसम्भवत्प्रतिबन्धा कारणसामग्री कार्योत्पादने। अन्यानपेक्षश्च कृतको भावो विनाश इति स्वभावहेतु। (१९६–९७)

नन्वित्यादिना नैकान्तिकत्वमा[3]शकते। क्वचित् कार्येऽनपेक्षाणामपि केषांचित् कारणाना नावश्यन्तद्भाव इत्याह। भूमीत्यादि। सा हि कार्यजननेऽपेक्षा सामग्री। तस्यामसत्यामपि कदाचित् प्रतिबन्धकालेऽङ्कुरानुत्पत्तेः। एतच्च सन्तानस्यैकत्वमध्यवसायोक्त।

नेत्यादिना परिहरति। तत्र यथोक्ताया सामग्र्या सन्तानस्य परिणामः स्वभावान्तरोत्पत्तिलक्षणस्तत्र सापेक्षत्वा[4]त्। ततोऽनपेक्षत्वादित्यस्य हेतोस्तत्रावृत्तिः। कृतकस्याप्यस्ति विनाश प्रति कालान्तरापेक्षा ततो हेतुरसिद्ध इत्याह। नैवमित्यादि। कृतकस्य भावस्य नाशे काचित् कालान्तरापेक्षेति वक्ष्यति।

स्यादेतद् (।) एकस्वभावा एव भूमिबीजादय कुतस्तेषा सन्तानपरिणामापेक्षत्व (।) अतो व्यभिचार एव हेतोरित्याह। तत्रापीत्यादि।

एतदुक्तम्भ[5]वति। न भूमिबीजादय एकस्वभावा पश्चादिव प्रागपि कार्योत्पादनप्रसङ्गात्। किन्तूत्तरोत्तरपरिणामेन भिन्ना। तत्रेति तस्या सन्तानपरिणामेन भिन्नाया सामग्र्यामन्त्या या सामग्री। कार्योत्पादने लक्षणान्तरेणाव्यवहिता सा फलवत्येवेति कुतो हेतोरनैकान्तिकत्व।

स्यादेतत् (।) पूर्वा सामग्री जनिकापि सती न नियतेत्याह। सैवेत्यन्त्या साम[6]ग्री तत्र तासु मध्येऽङ्कुरहेतुर्नान्या काचित्। किमर्थन्तर्ह्यङ्कुरार्थिभिः पूर्वा सामग्र्युपादीयत इत्याह। अन्यास्त्वित्यादि। पूर्व परिणामः पूर्वावस्थाविशेषस्तदर्थ-एवाऽङ्कुरजननसमर्थान्त्यसामग्र्यर्थ एव। तेनार्थिभिरुपादीयते सामग्री रूपतया चाध्यवसीयते।

स्यादेतद् (।) अन्त्याया अपि सामग्र्याः प्रतिबन्धः सम्भवति। तेन
132a कार्योत्पादनि[7]यमाभावात् साध्यशून्यो दृष्टान्त इत्याह न चेत्यादि। तामन्त्यां

एकत्वहानेः[4] तदात्मनो हेत्वप्रच्युतौ तदुत्पादने प्रतिबन्धहेतोर्वैगुण्यमकुर्वाणस्य अभावात्। न हि यवबीजादयः सापेक्षाः शाल्यंकुरजनने। तदुत्पत्ति[5]प्रत्ययानां कदाचित् तत्रापि सन्निधानात् चेत् कथं निरपेक्षाः ? कथमेषां यत् शालिबीजं तदेव उत्पादनस्वभावः। तदभावात् तत्स्वभावापेक्षा।

एवं तर्हि[6] कृतकानां च केषांचित् सतां वा यो नश्वरः स एव नास्ति। तस्मात् तत्स्वभावापेक्षत्वाद् न विनश्वराः।

शालिबीजादीनां स्वभावो हि स्वहेतोरिव[7] यो न तद्धेतुः स न तत्स्वभावः स्यात्। 479a

---

सामग्रीन्तत्र कार्ये जन्ये। **एकत्र भाव** इत्यन्त्ये क्षणे। विकारस्योत्पत्तौ वा तस्यान्त्यस्य क्षणस्यैकत्वहानेः पूर्वस्य प्रच्युतेर्विकाराख्यस्य च द्वितीयस्योत्पत्ते। ततश्च नासावन्त्य· स्यात्।

अथ न तस्यान्त्यस्य जनकस्वभावात् प्रच्युतिरिष्यते। तदा **तदात्मनो** जनकात्मन.। स्वभावाद**प्रच्युतस्य त**[1]**दुत्पादनं** कार्योत्पादन **प्रति वैगुण्यमकुर्वाणस्य प्रतिबन्धहेतोर**प्रतिबन्धकत्वाद् विघातकरणात्।

पुनरपि व्यभिचारमाशकते। **यवबीजादयो न सापेक्षाः** (।) कस्मिन् (।) **शाल्यङ्कुरे** कार्ये जन्ये। कस्मात् (।) **तदुत्पत्तिप्रत्ययानां कदाचित् तत्रापि** यवबीजादौ **सन्निधानात्**। ते **निरपेक्षा** अपि न शाल्यकुर जनयन्तीत्यनैकान्तिक एवेति।

कथमिति सि द्धा न्त वा दी।[2] सापेक्षा एवेत्यर्थं। **एषा**मिति यवबीजादीना **शालिबीजस्य** यस्त**दुत्पादनः** शाल्यङ्कुरोत्पादन स्वभाव स एवैषा नास्तीतिसम्बन्धः। **तत्स्वभावापेक्षा** इति शाल्यकुरोत्पादनस्वभावापेक्षा।

कदा च कथ निरपेक्षत्व स्या**देवन्तर्ही**ति पर। **कृतकानां च केषांचित् सताम्वा** केषाचित्। **स एव** स्वभावो **नास्ति यो नश्वरः**। **तस्मात् तत्स्वभावापेक्षत्वाद्** विनश्व[3]रस्वभावापेक्षत्वा**न्न विनश्वरा** इत्यसिद्धत्व हेतोरिति।

एतन्निराकर्त्तुम्प्रक्रमते। **शालिबीजे**त्यादि। आदिशब्दाद् यवबीजादीना। स **स्वभाव** इत्यभिमतेतरकार्य जननाजननस्वभाव· **स्वहेतो**रिति कृत्वा। **यो** यवबीजादि**र्न तद्धेतुः**। **स** शालिबीजहेतुर्यस्य हेतु**र्नभवती**त्यर्थं। सोऽतत्स्वभाव इत्यशाल्यकुरजननस्वभावः।

नन्वतद्धेतुश्च स्या[4]त् तत्स्वभावश्चेत्याह। **नियतशक्तिश्**चेत्यादि। नियता प्रतिनियता शक्तिर्यस्य स तथा (।) **स हेतु**रिति शालियवबीजजननस्वभावः। **स्वरूपेण** विभक्तेनैव स्वभावेन **प्रतीतः** प्रत्यक्षतः।

नियतशक्तिश्च स हेतुः स्वरूपेण प्रतीत एव। न च स्वभावनिश्चयोऽपि अर्थेषु आकस्मिकः। अनपेक्षस्य हि देशकालद्रव्यनिश्चयायोगात्। तथाऽत्रापि नियमहेतुर्वक्तव्यः। यतः केचिन्नश्वरात्मानो जाता। न चात्र नियामकः[2] स्वभावस्य हेतुरस्ति।

यदि सर्वजन्मिना अनित्यतासिद्धेः, जन्मिनामेव स्वभावो विनाशी। न वै जन्म नाशस्वभावहेतु। न चाहेतोः स्वभा[3]वनियमः। तस्मान्नात्र हेतोः क्वचित् स्वभावप्रविभागः। तदभावात् फलस्य सतो वा नास्तीत्यसमानम्। सेयं विनाशस्य निरपेक्षता क्वचित् कदाचित्[4] भावविरोधिनी तदभावं सत्तया साधयति। यो हि

स्यादेतत् (।) न हेतुकृत स्वभावभेदो भावाना किन्तु स्वभाव एव कस्यचित् (।) तादृशस्वभावोन्यस्य चान्यादृश इत्याह। **न चेत्यादि। आकस्मिक** इति निर्हेतुक। **अनपेक्षस्या**हेतो[5] क्वचिद्देशे। क्वचित्काले। क्वचिच्च शालिबीजादौ **द्रव्ये** शाल्यकुरोत्पादनस्य स्वभावस्य **नियमो** न स्यात्। किन्तु सर्व्वस्य सर्वदा सर्वत्र भवेदपेक्षाभावात्। तस्माद् देशादिकमपेक्ष्य भवन्नियमो हेतुमानिति गम्यते। यथा शालिबीजादीना स्वभावनियमस्**तथात्रापि** कृतकेषु, सत्सु वा **नियमहेतुर्वक्तव्यो यतो** नियामकाद्धेतो कृतकास्सन्तो वा **केचि[6]न्नश्वरात्मानो जाता** नान्ये।

स्यादेतद् (।) यदि नाम नियामको हेतुर्न शक्यते दर्शयितुन्तथापि सम्भाव्यत इत्याह। **न चात्र** लोके नश्वरस्य स्वभावस्य **नियामको हेतुरस्ति**। न सम्भाव्यत एवेति यावत्। सर्वेषा जन्मवता नाशस्य सिद्धेर्दृष्टत्वात्। अनियतहेतुको विनाश इति यावत्।

132b यदि **सर्वजन्मिनां विनाशसिद्धिरे**वन्तर्हि सत्त्वादिति हेतु[7]रनैकान्तिक स्यात्तदाह। **जन्मी**त्यादि। जन्मवता**मेव स्वभावो नाशी** नाजन्मवता। नाकाशादीना सतामपीति परो मन्यते। आ चा र्य आह। **न वै जन्मे**ति। न हि जन्मवशाद् भावस्य स्वभाव उत्पद्यते। तस्मान्न जन्म **नाशस्य हेतुः**। नाप्याकाशादौ सत्त्वमस्तीत्याह। **न चेत्यादि। अहेतो**राकाशादे **स्वभावनियमः** स्वरूपनियमोऽहेतोर्देशकालप्रकृतिनियमा[1]योगात्। यतश्च सर्वजन्मिना विनाशसिद्धिराकाशादीना, चासत्त्वं। **तस्मान्नात्र** कृतकेषु सत्सु वा **हेतो**र्नश्वरानश्वरजनकत्वेन **स्वभावप्रविभागः। तद्भावाद्धे**तुप्रविभागाभावात् **फलस्य** कृतकस्य **सतो वा** नश्वरानश्वरप्रविभागो **नास्तीत्यसमानं** यवबीजादिना। **सेयम्विनाशस्य निरपेक्षता क्वचिद्** वस्तुनि। **कदाचित्** काले विनाशस्य यो **भा[2]वस्तेन विरोधिनी** करोति **तदभावं। तस्य क्वचित**

स्वभावनिरपेक्षः तस्य क्वचित् कदाचिच्च सत्तायाः तत्कालद्रव्यापेक्षः तदपेक्षत्वात् इति निरपेक्ष एव न[5] स्यादित्युक्तम्। अथ विनाशस्य स्वभावः स तदनपेक्षत्वात् निर्हेतुकः स्यात्।

सत्ताहेतुभावादेव तथोत्पत्तेः। सत्ता हि भवतः तादृशस्यैव भावस्याभावात्। नावश्य[6] सतः कुतश्चिद् भाव इति चेत्, अथ सत्तैव आकस्मिकीति नेय कस्यचित्

कदाचिच्च विनाशस्याभाव **स्वभावेन** सत्तया **साधयति**। सर्वत्र सर्वकालम्भाव साधयतीति यावत्। कि कारण। **यो हीत्यादि। तत्कालद्रव्यापेक्ष** इति यस्मिन् काले भवति यत्र वा द्रव्ये। त काल द्रव्यञ्चापेक्षत इति **निरपेक्ष एव न स्यादित्युक्तं** प्राक्।

ननु विनाशकहेत्वनपेक्षत्वेन विनाशस्यानपे[3]क्षत्व, न तु कालाद्यनपेक्षत्वेन (।) तत्कथमुच्यते तत्कालद्रव्यापेक्ष इति निरपेक्ष एव विनाशो न स्यादिति। यदि च कालानपेक्षो विनाश द्वितीयेपि क्षणे विनाशो न स्यात् तत्कालापेक्षत्वात्। द्रव्यानपेक्षत्वे च कस्य तर्हि विनाश स्यात्।

एवम्मन्यते (।) जातस्य तद्भावेऽन्योनपेक्षणादिति वचनात्। द्वितीय एव क्षणे विनाशो भवति नान्यस्मिन् क्षणे।[4] तथा सर्वस्य जातस्य भवति न द्रव्यविशेषस्य। तेन द्रव्याऽनपेक्षत्वे कस्य तर्हि विनाशो भवतु (।)

इति निरस्त। कालान्तरे द्रव्यविशेषे च नाशस्य भावे कालान्तरस्य द्रव्यविशेषस्य च विनाशकत्वमेव स्यात्। **विनाशस्य तद्भाव** एव भावात्। **तस्मात्** तत्कालद्रव्यापेक्षत्वे **निरपेक्ष** एव न स्यादित्युच्यते।

तर्हीति पर। नेत्या चार्य। **सत्ताया** यो हे**तुर्भावस्तस्मा[5]देव तथोत्पत्ते**-र्नश्वरस्वभावस्योत्पत्ते। एतदेव स्पष्टयति। **सतो हि भवत** इति सत्ता प्रतिपद्यमानस्य **तादृशस्यैव** नश्वरस्वभावस्यैव(।)**भावात्। नावश्यं सतः** पदार्थस्य **कुतश्चित्** कारणाद् **भाव** उत्पादन **इति चेत्**। केचिद्धि सन्तोपि नोत्पत्तिमन्तो यथाकाशादय इति परो मन्यते। **आकस्मिकी**त्यहेतुका। **नेयं** सत्ता **कस्य**चिदर्थस्य **कदाचित्** काले क्वचिद् द्रव्ये[6] **विरमेत**।

ननु च घटादीना स्वहेतुत सत्तानियमे कथमाकाशादिसत्ताप्रसङ्ग।

सत्य (।) किन्तु न कस्यचिद् विरमेतेत्यस्यायमर्थ। न स कश्चिद् भावो यत्स्वभावोसावाकाशादिर्न स्यात् सर्वात्मक प्रसज्यत इत्येके। तदयुक्त (।) यदि हि घटादिरूपमाकाशे स्यादहेतुक स्यात् तस्य मृत्पिण्डादिकमन्तरेण भावात्। **तस्मान्नेयमाकाशादेस्सत्ता। कस्यचि[7]**दात्मादे **कदाचित्** काले **क्वचिद्** देशे 133a

479b **कदाचित् क्वचित् विरमेत। तस्माच्चेयं कस्यचित् कदाचित्। यस्य[7] यत्र किंचित् न प्रतिबद्धम्। सेयं सत्ता क्वचिदप्रतिबन्धिनी चेत् न नियमवती स्यात्। तस्माच्चेयं सत्ताऽऽकस्मिकी क्वचित्।**

अथ कथमहेतुको विनाश उक्त इति चेत्। जातस्य तद्भावेऽन्यस्यानपेक्षणत्वात्। न चात्र विनाशो नाम कश्चिद्, भाव एव हि नाशः।

स एव हि क्षणस्थायी जातः। तस्माद् मन्दाः तत्स्वभावं[2] तदूर्ध्वं व्यवस्यन्ति न प्राक्, दर्शनेऽपि पाटवस्याभावात् इत्युक्तम्। तत्सामर्थ्यात् अविद्या तद्वशेनाविद्याहतदृष्टे नाशवत् पश्चाद् विनाश्यः। तदयं विनाशः[3] सत्ताव्यतिरेकेण

विरमेत। देशकालद्रव्यनियता न भवेदित्यर्थः।

एतदेव द्रढयन्नाह। तद्धीत्यादि। तद्धि वस्तु। किंचिदुपलीयेताश्रयेत्। **यस्य यत्र किंचिद्**उत्पादादिक प्रतिबद्धमायत्त। न चोपलीयेत यस्य यत्राप्रतिबद्ध। **सेयं सत्ता क्वचिदप्रतिबन्धिनी चेत्**। द्रव्यकालापेक्षया **न नियमवती स्यात्**। तथा चाकाशस्येय सत्ता नात्मन.। आ[1]त्मनस्सत्ता न कालस्येत्यादि न स्यात्। यतश्चै**वन्तस्माच्चेयं सत्ताकस्मिकी क्वचि**न्नित्याभिमतेष्वपि।

यदि सत्ताहेतोरेव विनश्वरस्योत्पाद. **कथ**मिदानी**महेतुको विनाश उक्त** इति व्याघातमाह।

जातस्येत्यादिना परिहरति। **जातस्य** निष्पन्नस्य **तद्भावे** विनश्वरताभावे जनकाद्धेतो**रन्यस्यानपेक्षणात्।**

अहेतुको विनाश उक्त.। उक्त **चात्र** प्राक् यथा[2] **न विनाशो नामान्य एव कश्चिद्** भावात् किन्तु **भाव एव हि नाशः।**

ननु च प्रध्वसाभावो नाश स कथम्भावस्वभावो भवतीत्याह।

स एव हीत्यादि। यस्मात् स्वहेतोरेव **क्षणस्थायी जातस्तस्माद्** भाव एव नाश उक्त'। य एव सत्ताकालो भावस्य तमेवैक क्षण स्थातु शील यस्य स तथा। न पुनरुत्पद्य क्षणमपि तिष्ठति। यदि तिष्ठेन्न कदाचिन्न निवर्त्तेतेति वक्ष्याम[3]. । यद्येकक्षणस्थायी भावो विनाश कस्मात् प्रवाहविच्छेदात् प्रागपि तथा न निश्चीयतेऽनिश्चयाच्चाक्षणिक स इत्याह। **तमस्ये**त्यादि। **तं** नाश**स्वभाव**मस्य घटादेराससारमविद्यानुबन्धात् **मन्दा उर्ध्वं** प्रवाहविच्छेदकाले **व्यवस्यन्ति न प्राक्** सत्ताकाले। **दर्शनेपीति** नश्वरस्वभावस्य सत्यपि **दर्शने**। न दर्शनकालेऽध्यवसायोस्ति। अविद्या(साम)**र्थ्या**[4]त्सदृशापरोत्पत्त्या च दर्शनपाटवस्याभावात्। यतश्च सन्तानविच्छेदकाले नाशस्वभावस्य निश्चयस्त**स्मात् तद्वशेन** निश्चय-

नान्यमपेक्षत ति तद्व्यापी। विनाशकारणानपेक्षोऽयं कथं पतिपद्येतेति चेत् तद्धेतोरसामर्थ्यात्। अभावकारिणः क्रियायाः प्रतिषेधाच्च शब्दः किमु। कथंहि सामर्थ्याभाव इति चेत्। सिद्धे हि भावे कारको न तं करोति। अन्यक्रियां तस्य न किञ्चिदिति तदतद्रूपस्य अकिंचित्करत्वात्, तदतद्भावोऽकिंचि[5]त्करोऽपि नापेक्षते।

क्रियाप्रतिषेधस्तु कथमिति चेत्। विनाश इति हि भावस्याभावन्ते मन्यन्ते। तद् अयं विनाशहेतुरभावं करोतीति प्राप्तम्। तत्र यद्यभावो नाम[6] कश्चित् कार्य-स्वभावः स्यात्। स एव भाव इति नाभावः स्यात्। तस्मादभावं करोतीति भावं

वशेन। **पश्चादिति** यस्मिन् काले नाशस्वभावस्य निश्चयस्तत्कालोपाधिरेव स भावस्य विनाशस्वभावो व्यवस्थाप्यते (।) दृष्टान्तमाह। **विकारेत्यादि**। यथा विषद्रव्य गृहीतमपि भ्रान्तिसद्भावात् प्रागनवधारितमज्ञै. पुरुषै. पश्चाद् विषकृ[5]तस्य विकारस्य लालास्रुत्यादेर्दर्शनेन विष व्यवस्थाप्यते तद्वत्। एताव-न्मात्रेणाय दृष्टान्तो न तु मारणशक्तिर्गृहीता पश्चादवधार्यत इति दृष्टान्त.। **तदिति** तस्माद् **अयम्विनाश** इति सम्बन्ध। वस्तुनो या **सत्ता** तद्व्यतिरेकेण **न** किचिद् विनाशकारण**मपेक्षत इति तद्व्यापी** सत्ताव्यापी।

कथमित्यादि पर। **असामर्थ्याच्चेति** प्रतिवचन। **तद्धेतो**रिति नाशहे[6]तो। चकारादकारकत्वाच्च। एतदेव विवृण्वन्नाह। अभावकारिण इत्यभावकारि-तयाभिमतस्य **क्रियायाः** कारकत्वस्य **प्रतिषेधाच्चेति**। अवस्तुकारी योभिमत. सोकारक एव भवति। असामर्थ्यन्दर्शयितुमाह। **सिद्धे हीत्यादि**। नाशहेतुर्भावा-दभिन्नम्वा विनाश कुर्यात्ततोन्यम्वा। न तावदाद्य पक्ष सिद्धे हि **भावे** कारको नाशहेतुस्तम्भाव **न करो[7]ति** सिद्धत्वादेव। नापि द्वितीय पक्ष। यतो **नाप्यन्य-** 133b
क्रियान्तस्य भावस्य **न किञ्चित्**। तदवस्थत्वात्। **तदतद्रूपेत्यादि**। भाव**रूपस्य** ततोन्यस्य च विनाशस्य **कारणाच्चाकिञ्चित्**करो विनाशहेतुरतो नापेक्ष्यत इति सिद्धमसामर्थ्य।

क्रियाप्रतिषेधस्तु कथमित्याह। **विनाश इति हि भावस्याभावन्ते** हेतुमन्ना-शवादिनो **मन्यन्ते**। अस्माभिर्भावस्वभाव एव विनाश इत्यु[1]क्त। **तदिति** तस्मा-**दयं विनाशहेतु**र्विनाश करोत्यभावं **करोतीति प्राप्तं। तत्रैतस्मिन्** प्राप्ते सति **यद्य-भावो नाम कश्चित् स्वभावः कार्यः स्यात्**। तदा कार्यत्वादकुरादिवत् **स एव भाव इति नाभावः स्यात्**। अथ यथा घटो घटरूपेण कार्य· पटश्च पटरूपेण कार्यो न तु कार्यत्वाद् घट पटो भवति। तथा भावो भावरूपेण कार्योऽभावोप्यभावरूपेण कार्य.[2] स्यात्! न तु भाव एव भवतीति। तदयुक्तम्भवतीति हि भावो न भवतीति

480a **न करोतीति क्रियाप्रतिषेधोऽस्य कृतः स्यात्। तथाऽपि अयमकिंचित्करः किमिति[7] निवर्त्स्यते। सिद्धा विनाशं प्रत्यनपेक्षा भावस्य। तस्मात्—**

असामर्थ्याच्च तद्धेतोर्भवत्येव स्वभावतः ॥१९८॥

चाभावस्तेनाभावो भावविरोधी। न चाभावरूपतया तस्य प्रतिभासनादभाव-रूपता। भवनधर्मत्वेनाभावरूपतया प्रतिभास एव न स्यादितीदमेव चोद्यते। न च परस्परविविक्तरूपतयाऽभावाना प्रतिभास। यतश्चाभावस्य नीरूपत्वा-दकार्यत्वन्**तस्मादभावं करोतीति भावं[3] न करोतीति** वाक्यार्थ स्यात्। तेन **क्रिया-प्रतिषेधोस्य** नाशहेतो **कृतः स्यात्। तथापि** क्रियाप्रतिषेधेप्यय विनाशहेतु**रकि-ञ्चित्करः। किमिति** नाशेऽपेक्ष्यते भावेनेति **सिद्धा विनाशं प्रत्यनपेक्षा भावस्य।**

ननु निर्हेतुकेपि विनाशे कथम्विनाश प्रत्यनपेक्षा भावस्य। स्वभावो हि स तस्येत्थ येनापेक्ष्य निवर्त्तते विरोधिन (।) यथाऽन्येषा प्रवाहो मुद्गरा[4]दिक। तेन पूर्वम्विरोधिनोऽभावे नानिवृत्ते कथ क्षणिकत्वमिति।

तदयुक्त। यतो विरोध्यपेक्षस्वभावत्व यदि वस्तुनो न पूर्वमपि तदास्य पूर्वो-त्तररूपयोर्भेदाद् नित्यत्वमेव। अथ पूर्वमपि स स्वभावोस्ति तदा पूर्वमप्यस्य निवृत्ति स्यात्। अथ तदा विरोध्यभावान्न निवर्त्तते। कथन्तर्हि विरोध्यपेक्षस्वभा-वत्व। सत्येव विरोधिनि। विरोध्यपेक्षस्वभाव[5]त्वस्य भावान्नान्यदा। यदि विरोधी वस्तुनो नोपकारक कथन्नन्तदपेक्षते। उपकारे वा विरोधिसन्निधाने-प्यपरस्य भावस्योत्पत्तिरिति पूर्वको भावस्तदवस्थो दृश्येत। विरोधे सन्निधाना-भावेनानिवृत्ते। अथ निवर्त्तते। न तर्हि विरोध्यपेक्षया भावस्य निवृत्ति (।) यदि च न भावम्विनाशयति कथम्विरोधी। न च क्षणिकवादिना विरोधिसन्निधाने सत्ता[6] नो निवर्त्तने। किन्तर्हि नोत्पद्यते। तथा हि निरोधमुपगच्छन्नेव घटो मुद्गरादिसहकार्यपेक्ष कपालजनकत्वेन सदृशक्षणानारम्भको भवतीति सन्तानानुत्प-त्तिर्न तु विरोधिनमपेक्ष्य प्रवाहो निवर्त्तते। यतश्च पूर्वसन्तानेनोत्पित्सोर्भावस्य विरोधिसन्निधाने सन्तानानुत्पत्तिरत एव मन्दमतीना सहेतुकनाशाध्यवसायो
134a मुद्गरादौ च विरो[7]धित्वावसाय इति सर्व सुस्थ। तस्मान्निरपेक्षत्वादेव यत्र नाम क्वचिद् भवद्दृष्टो विनाशस्तत्रैष स्वभावत एव भवति।

नन्वहेतुकेपि नाशे यदैव घटादेर्नाश प्रतीयते तदैवाहेतुक स्यान्न पूर्वमप्रतीते-रर्थैकक्षणस्थायित्वेन घटादेरुत्पत्ते पूर्वमपि नाश (।) ननु यथैकक्षणस्थायित्वे नोत्पत्ति स्वहेतुभ्यस्तथा ऽनेकक्षणस्थायित्वेनाप्यु[1]त्पत्ति स्यात्। विचित्रशक्तयो हि सामग्र्यो दृश्यन्ते। तत्र काचित् स्यादपि याऽनश्वरात्मान जनयेदित्याह।

यत्र नाम भवत्यस्मादन्यत्रापि स्वभावतः।

सोऽयं क्वचित्[1] सत्तादर्शननिरपेक्षत्वात् स्वभावः स्यात्। तथाऽन्यत्रापि स्वभावभावी विशेषाभात्।

अस्मादित्यादि। अस्माच्च स्वभावमात्रभावादन्यत्रापि देशादिव्यवधानेनादृष्टे। तथा दृष्टे (।) विरोधि सन्निधानात् पूर्वमपि **स्वभावत** एव विनाशो भवति।

एवम्मन्यते। येषान्तावद्विनाशो दृश्यते तेषा यदि न प्रतिक्षण विनाश. स्यात् तदा विना[2]शप्रतीतिरेव न स्यात्। तथा हि यदि द्वितीये क्षणे भावस्य स्थितिस्तदासौ सर्वदैव तिष्ठेत्। द्वितीयेपि क्षणे क्षणद्वयस्थायी स्वभावत्वात्। तदा च तेनापरक्षणद्वय स्थातव्य। अपरस्मिन्नपि क्षणे क्षणद्वयस्थायिस्वभावत्वादपरस्मिन् क्षणेऽवस्थान स्यादेवमुत्तरोत्तरे क्षणे द्रष्टव्यमित्याससारम्भावस्य स्थिति स्यात्।

अथ प्रथमे क्षणे भाव[3]स्य क्षणद्वयस्थायी स्वभावो द्वितीये क्षण एकक्षणस्थायी। तथापि तयो स्वभावयोर्भेदात् क्षणिकत्व स्यात्। न त्वेवमपि प्रथमे क्षणे भावस्यानेकक्षणावस्थायिस्वभावादक्षणिकत्व स्यान्नाससार स्थितिप्रसङ्गादित्युक्तत्वात्।

ननु द्वितीयेपि क्षणे भावस्योत्तरक्षणानवस्थानेपि पूर्वक्षणस्थायी रूपाभेदेन पूर्वमपि स्थानात् क्षणद्वय[4]स्थायित्वमस्त्येवेति चेत् (।)

न। पूर्वम्भावस्य ह्येष स्वभावो यदेकस्मिन् क्षणे तिष्ठत्यन्यस्मिन् क्षणे स्थास्यति। स एव चेत्स्वभावो द्वितीये क्षणे तदाप्येकस्मिन् क्षणे तिष्ठत्यन्यस्मिन् क्षणे द्वय स्थास्यतीत्येवमुत्तरोत्तरक्षणेपि द्रष्टव्यमिति न विनाशो भावस्य स्यात्। दृश्यते च (।) तस्माद विनाशप्रतीत्यन्यथानुपपत्त्या प्रतिक्षणविनाशानुमान।

अदृष्टेषु तर्हि कृतकेषु कथ प्र[5]तिक्षणविनाशित्वानुमान विनाशस्यैवादर्शनात्।

नैष दोषो यस्मात् तेषामपि प्रथमे क्षणे य एव स्वभाव. स एव चेत् द्वितीयादिक्षणे तदाऽभूत्वा भवनमेव प्रथमक्षणवत्। अथ प्रथमे क्षणे तस्य जन्मैव न स्थितिर्द्वितीये च क्षणे स्थितिरेव न जन्म। एवमपि क्षणिकत्व स्यात्। जन्मजन्मिनो स्थितिस्थितिमतोश्चाभेदात्। न च द्वि[6]तीये क्षणे जन्म विना स्थितिर्युक्ता। जन्म चेन्न तदास्थितिस्तस्या द्वितीयादिक्षणभावित्वात्। द्वितीयादौ क्षणेप्येवमिति सर्वत्रोत्पत्तिरेव न स्थितिरिति क्षणिकत्व। कि च परस्परभिन्नस्यापरापरकालसम्बन्धित्वस्य कृतकाद् भावादभिन्नत्वात् क्षणिकत्वमेव।

सोयमित्यादिना का रि का र्थमाह। **अयमिति** विनाश। **क्वचिद्** घटादौ मुद्गरादिसन्निधाने[7] **तथान्यत्रा**पीति मुद्गरसन्निधानात् पूर्वमपि। एवन्देशादि- 134b

या काचिद् भावविषया द्विधैवानुमितिस्ततः[2] ॥१९९॥
स्वसाध्ये कार्यभावाभ्यां संबन्धनियमात्तयोः।

तस्मात् भावविषयानुमानं द्विविधमेव कार्यलिङ्गकं स्वभावलिङ्गकं च। यथास्वं विशेषक(व्यापि)साध्ये लिंगिनि तयोरेव प्रतिबन्धात् यथोक्तपूर्वम्।

(३) अनुपलब्धिचिन्ता

क. अनुपलब्धेः प्रामाण्यम्

प्रवृत्तेर्बुद्धिपूर्वत्वात् तद्भावानुपलम्भने ॥२००॥
प्रवर्तितव्यं नेत्युक्तानुपलब्धेः प्रमाणता।

तृतीय[4]स्तु हेतुरनुपलब्धेरविशेषेण क्वचिदर्थे गमक इत्युच्यते। सत्तानिश्चय-ध्वनिव्यवहारप्रतिषेधे हि सर्वैव लिङ्गम्।

व्यवधानेपि। (१९८-९९)

यत्पूर्वमुपन्यस्तन्तत्र द्वौ वस्तुसाधनाविति तदुपसहरन्नाह। **तत** इति तस्माद् **या काचिद् भावविषया** कार्यस्वभावाभ्या लिङ्गाभ्या **द्विधैवानुमितिः**। कस्मात्तयो कार्यस्वभावयोरेव **स्वसाध्ये सम्बन्धनियमात्**। **कार्यं लिङ्गं** यस्या अनुमिते । एव **स्वभावो लिङ्गं** यस्या इति विग्रह[1]। **यथास्वं व्यापिनि साध्य** इति कार्यस्य कारण व्यापक साध्य(।)स्वभावस्यापि स्वभावो व्यापक. साध्यस्तस्मिन् साध्ये **लिङ्गिनि तयोरेव** कार्यस्वभावयोर्लिङ्गयो. **प्रतिबन्धात्**। (१९८-९९)

अनुपलब्धिमधिकृत्याह। **प्रवृत्ते**रित्यादि। प्रवृत्ते'। सन्निश्चयशब्दव्यवहार-लक्षणयोः **बुद्धिपूर्वत्वात्** प्रमाणपूर्वत्वात्। **तद्भावानुपलम्भने** तस्य प्रवृत्तिविषयस्य भाव[2]स्य प्रत्यक्षानुमानाभ्यामनुपलम्भने प्रेक्षावता **प्रवर्त्तितव्यं नेतीयता** लेशेनादृश्य-विषयाया अप्यनुपलब्धेरुक्ता **प्रमाणता**। तृतीयस्तु **हेतुरनुपलब्धिगमक इत्युच्यत** इति सम्बन्ध । **अविशेषेणेति** दृश्यविषयेत्यमुम्विशेषन्त्यक्त्वा सामान्येन **क्वचिदर्थे** साध्ये। **सन्निश्चयेत्यादिना** तमेवार्थन्दर्शयति। प्रमाणपृष्ठभावी सदिति[3] विकल्पः सन्निश्चयः। तत्पृष्ठभाव्येव सदिति **ध्वनिः** सच्छब्दः। तथैव सदित्यनुष्ठानं **सद्व्यवहार**'। तेषां **प्रतिषेधे हि सर्वैव** दृश्यविषयाऽदृश्यविषया च।

ननु का रि का या प्रवृत्तिरित्युक्तन्तत्कथ वृत्तौ **सन्निश्चयेत्यादि** व्याख्यायत **इत्याह। सन्निश्चयाद्धीत्यादि**। यस्मात् सतां विद्यमानाना निश्चयाच्छब्दव्यवहाराः

सन्निश्चयाद्धि शब्द[5]व्यवहाराः प्रवर्त्तन्ते। तस्मात् ते प्रवृत्तिरित्युक्तम्। तथा ह्यनुपलब्धिरेवासतामसत्त्वमित्युक्तम्। तच्च प्रतिपत्तृवशादुक्तं, न वस्तुवशात्। याव[6]दत्राप्रतिपत्तिः तावदत्र स्वभावोऽस्य नास्ति। सताऽपि तेन तदर्थाकरणात्। वस्तुतस्तु अनुपलभ्यमानो न सन्नासन्। सतामपि स्वभावा[7]दिविप्रकर्षादनुपलम्भात् तस्यासत्स्वपि तुल्यत्वात्। तत् प्रतिपत्तुः प्रमाणाभावात् उपलब्धिलक्षणमेतत् सत्त्वं तन्निवृत्तं स्वनिमित्तान् शब्दव्यव[1]हारान् निवर्त्तयति। 480b

तेन यापीयमनुपलब्धिरुपलब्धिलक्षणप्राप्ताना साऽपि वस्तुतोप्यसत्त्वरूपाऽप्रवृत्तियोग्यत्वात्। तस्या अपि अत्र विषये तुल्य प्रामाण्यम्। असन्निश्चय[2]यफलाऽपि सा।

प्रवर्त्तन्ते त[4]स्मात्ते सन्निश्चयशब्दव्यवहारास्त्रयोपि प्रवृत्त्यङ्गत्वात् पुरुषप्रवृत्तेर्निमित्तत्वात् **प्रवृत्तिरित्युक्तः**। तस्मान्न सू त्र वृ त्त्योर्व्याघात इति।

किम्पुन कारणमुपलम्भनिवृत्तौ सद्व्यवहारो निवर्त्तते। **तथा ह्यनुपलब्धिरेव** द्विप्रकाराप्यविशेषेण**ासत्त्वमित्युक्तं** प्राक। **तच्च**ासत्त्वम्विप्रकृष्टायामनुपलब्धौ **प्रतिपत्तृवशादुक्त**। प्रतिपत्ता ह्यनुप[5]लभ्यमानन्नास्तीत्यध्यवस्यति। **न वस्तुवशात**। तथा हि विप्रकृष्टेर्थे सत्त्वमसत्त्वञ्च सन्दिग्ध। तस्मात् **तावद्धि स** विप्रकृष्टो **भावोस्य** प्रतिपत्तुर्**नास्ति यावदत्राप्रतिपत्तिः**। कस्मात्(।)**सतापि तेन** विप्रकृष्टेनार्थेनानुपलब्धेन **तदर्थाकरणात्**। तस्य पुसोर्थाकरणात्। सन्नप्यसत्कल्प। **वस्तुतस्त्वनुपलभ्यमानो न सन्नासन्**। कस्मात् (।) **सतामपि** कदाचि[6]त् **स्वभावादिविप्रकर्षादनुपलम्भान्ना**सत्तानिश्चय। **क्वापि** सत्तानिश्चयस्तस्यास्यानुपलम्भस्या**सत्स्वपि तुल्यत्वात्**। तदिति तस्मात्। **एतत् सत्त्व**मिति सम्बन्ध। किम्भूतमनु**पलब्धिलक्षणन्**देशादिविप्रकृष्ट **प्रतिपत्तुः प्रमाणाभावात्**। प्रत्यक्षानुमानाभावा**न्निवृत्तन्न** वस्तुवशात्। कि करोति (।) **स्वनिमित्तान् शब्द[7]व्यवहारान् निवर्त्तयति**। 135a

उपलब्धिलक्षणमित्यन्ये पठन्ति। उपलब्धिरेव सत्त्वमुपचारात् तथाभूत सत्त्वं निवृत्तमित्यर्थ।

येनैवन्त**ेन** कारणेन **यापीयमनुपलब्धिः** (।) केषाम् (।) **अनुपलब्धिलक्षणप्राप्तानां**। या **वस्तुतोप्यसत्त्वरूपा** (।) अपिशब्दात् प्रतिपत्तृवशादपि। कि कारणम् (।) **अप्रवृत्तियोग्यत्वाद**सद्व्यवहारयोग्यत्वात्। तस्या अप्यनुपलब्धेरेतत्सद्व्यवहारप्रतिषेधकत्वेन **तुल्यं प्रामाण्यं**। **अत्र विषय** सद्व्यवहारप्रतिषेधे।

येयमनुपलब्धिलक्षणप्राप्तानु पलब्धि**रसन्निश्चयफलापि सा**। असन्निश्चयः

असत्तायां तल्लक्षणो यदुपलब्धियोग्यः सकलेष्वन्येषु कारणेषु सन् नोपलभ्येत। न पुनः पूर्वाऽसत्तासाधनी।

शास्त्राधिकारासम्बद्धा[3] बहवोऽर्था अतीन्द्रियाः ॥२०१॥
अलिङ्गाश्च कथन्तेषां सभावोऽनुपलब्धितः।

तदभावसाधनेऽनुपलब्धिमात्रेण सर्वार्थानां प्रमाणत्रयनिवृत्त्या सिद्धं स्यात् (इति) तस्य शास्त्र[4]स्य निवृत्तिर्हि न ह्यभावसाधनी तस्य क्वचिदधिकारे प्रवृत्तेः। शास्त्रप्रवृत्तौ हि पुरुषार्थसाधनोपायं कमप्याश्रित्य प्रवृत्तौ। अन्यथाऽसंबद्ध[5]प्रलापस्य अप्रामाण्यात्।

तत्र प्रकरणेऽपि बहवोऽर्था नावश्यं निर्देश्या यथा प्रत्यात्मनियता पुरुषचेतसः कस्यचिदनियतनिमित्तभावि[6]वृत्तयः। देशकालविप्रकृष्टेषु उपधानद्रव्यभेदवत्।

फल यस्या इति विग्रहः। (२००–२०१)

असत्तायांमित्यादिना व्याचष्टे। असत्तायामप्यनिश्चयेपि यस्मान्न ह्यस्ति सम्भवो **यदुपलब्धियोग्यो** भाव **सकलेष्वन्येषूपलम्भकारणेष् सन्** विद्यमानो **नोपलभ्येत**[2]। **न पुनः पूर्वा** विप्रकृष्टविषयानुपलब्धिर**सत्तासाधनी**। तथा हि (।) प्रत्यक्षानुमानागमनिवृत्तिलक्षणैवानुपलब्धि। तत्र **शास्त्रस्याधिकारो**स्मिन् प्रकरणे **तत्रासम्बद्धा** अनान्तरीयका **बहवोऽर्थाः** स्वभावादिविप्रकर्षिण शास्त्रे नाधिक्रियन्त इति यावत्। प्रत्यक्षस्यापि न ते विषया इत्याह**तीन्द्रियाः**। नाप्यनुमानस्य यस्मादलिङ्गा।[3] नैषा लिङ्गमस्तीत्य**लिङ्गाः**। तेषामतीन्द्रियाणामर्थाना प्रमाणत्रयानिवृत्तिलक्षणाया **अनुपलब्धितः** कथमभाव (।) नैव। (२००–१)

सोयमिति वादी। **सर्वार्थाना**मिति देशकालस्वभावविप्रकर्षिणा **प्रमाणत्रयनिवृत्त्येति** प्रत्यक्षानुमानागमनिवृत्त्या। **तस्येति शास्त्रस्य क्वचित्** पुरुषार्थानुपयोगिन्यर्थे**ऽनधिकारे** विनियोगाभावे **प्र**[4]**वृत्तेः**। **यस्माच्छास्त्रं** हीत्यादि। **अन्यथेति पुरुषार्थानुपयोगिनमर्थमाश्रित्य शास्त्रप्रवृत्तौ। असबद्धप्रलापस्या**सम्बद्धाभिधायिन शास्त्रस्याप्रामाण्यात्।

स्यादेतत् (।) सर्व एवार्था पुरुषार्थोपयोगिन इत्यत्राह। **तत्रेत्यादि। तत्र प्रकरण** इति पुरुषार्थचिन्ताप्रस्तावे। **प्रत्यात्मनियता** इति प्रतिपुरुषनियताः। एतेन [5]पुरुषाणामानन्त्यादानन्त्य चेतोवृत्तीनामाह। **अनियतान्निमित्ताद्** भवितुशीलं यासामिति विग्रह। अनेनैकस्मिन्नपि पुंसि निमित्तभेदाद् बहुत्वं। एव भूताश्चेतोवृत्तयो **नावश्यं** साकल्येन प्रतिपद **निर्देश्या** अशक्यत्वात्। कालदेश-व्यवहिता वा पुरुषार्थानुपयोगिनो **द्रव्यविशेषा नावश्यं निर्देश्यास्ततो न तच्छा-**

न तच्छास्त्रं विषयीकरोति। न च तथा विप्रकृष्टे स्वसामर्थ्योपधानात् ज्ञानोत्पादनशक्तिर्नास्ति[7]। 481a

स चावश्यं कार्योपलम्भस्य चाप्यभावे येनानुमिनोति, न च ते प्रमाणत्रयनिवृत्ता अपीति न निश्चयसामर्थ्यम्। तस्मात् सर्वाऽनुपलब्धिर्हि न निवृत्तिनिश्चयस्य साधनी। तद् इयं हि—

स्त्रम्विषयीकरो[6]**ति**। ताश्च चेतोवृत्तयस्ते च विशेषास्तानिति पुलिंगेनोक्ता। "पुमान् स्त्रिये"ति[1] पुस· शेष कृत्वा।

नापि प्रत्यक्षस्य विषया इत्याह। **न चे**त्यादि। **तथा विप्रकृष्टेष्वि**ति देशादिविप्रकृष्टेषु **स्वसामर्थ्योपधानात्**। स्वरूपसन्निधानात्। **ज्ञानोत्पादनशक्तिर्नास्ति**। एतेना**तीन्द्रिया** इत्येतद् व्याख्यात।

अनुमानस्यापि न ते विषया इत्याह।[7] **स चावश्य**मित्यादि। **एषा**मिति 135b
देशादिव्यवहिताना। **येने**ति कार्योपलम्भेन। **न च त** इति विप्रकर्षिण। **सर्वे**त्यदृश्यानुपलब्धिरपि। **निवृत्तिनि**श्चयस्याभावनिश्चयस्य। यत एवन्त**दि**ति तस्मात्। **इय**मित्यदृश्यानुपलब्धिस्सदसन्निश्चयफला नेति (।) **सन्निश्चयफला न** भवति सद्व्यवहारनिमित्ता। न चाप्यसन्निश्चयफला सन्देहात्। **इति** हेतो[1]( ) **स्याद्वानुपलब्धे**र**प्रमाणता**। **व्यवसायफलत्वादि**ति निश्चयफलत्वात् **प्रमाणानां**। प्रत्यक्षमपि हि प्रमाण सर्वाकारग्रहेपि येष्वाकारेषु निश्चयमावहति तेष्वेव।

ननु प्रवृत्तिनिषेधप्रमाण स्यादित्याह। **न ही**त्यादि। **इय**मित्यनुपलब्धि। **निःशंकपरिच्छेद**मिति नि शक परिच्छेदो यस्य चेतस इति विग्रहः। सशये सति न प्रवर्त्तितव्यम[2] वश्यमित्येव निश्चित चेतो न करोतित्यर्थ। **संशयादपि क्वचित्** कृषीवलादेर्लोकस्य **प्रवृत्तेः**। कथन्तर्ह्यप्रवृत्तिफलत्वेनास्या प्रामाण्यमुक्तमित्यत आह। **तथात्वे तदि**त्यादि। तथा तेन रूपेणै**तदप्र**वृत्तिकारणमनुपलम्भाख्यं **निरवद्यं** निर्दोष यदि **निश्चयपूर्वं व्यवहरेत्** कश्चित्। प्रमाणपूर्वं सद्व्यवहारादि प्रवर्तयेत्। इत्यनेन द्वारेण से[3]यमदृश्यानुपलब्धिर**प्रवृत्तिफला प्रोक्ता** निश्चितसद्व्यवहारादिप्रतिषेधफला प्रोक्ता (।) सन्दिग्धस्तु सद्व्यवहारादिर्न निषिध्यत इति पुरुषस्य प्रवृत्तिर्भवत्यपि।

लिङ्गातिशयभाविनीति लिङ्गमनुपलब्धिस्तस्या अतिशयो विशेष उपलब्धिलक्षणप्राप्तत्वन्तस्य भावस्सद्भावस्स यस्यामस्ति सा तथोक्ता। **लिङ्गविशेष-**

---

[1] Pānini 1.2.67

सदसन्निश्चयफला नेति स्याद् वाऽप्रमाणता ॥२०२॥

न चेयं अनुपलब्धिः प्रमाणम्। व्यवसायफलत्वात् प्रमाणानाम्।

इदं प्रवृत्तिनिषेधमपि[2] न निःशंकपरिच्छेदं चेतः। संशयादपि क्वचित् प्रवृत्तेः। तथात्वे तदेव निरवद्यं निश्चयपूर्वं व्यवहरेद् इति अप्रवृत्तिफला[3] प्रोक्ता।

प्रमाणमपि काचित् स्यात् लिङ्गातिशयभाविनी।

अत्र सर्वाऽनुपलब्धिरसमग्रा लिङ्गविशेषवती प्रमाणमपि। यथोदाहृता प्राग्। यस्या[4]ऽपि अनुपलम्भे न प्रमाणं इति वादी—

स्वभावज्ञापकाज्ञानस्यायं न्याय उदाहृतः ॥२०३॥

यस्य कस्यचित् स्वरूपविषयादिना प्रकर्षादननुपलम्भमात्रेणा[5]सन् नाम। यथोक्तं प्राग्। योऽपि ज्ञापकस्य लिङ्गस्याभावात् अतीन्द्रियार्थः स्वभावविशेषो वा प्रतिक्षिप्यते। यथा नास्ति विरक्तं चेतः, देवताविशेषभावो वा। दानहिंसादि-

---

वतीत्यर्थः। उपलब्धिलक्ष[4]णप्राप्तानुपलब्धिरिति यावत्।

अत्रेत्यादिना व्याचष्टे। अत्रेति निवृत्तिनिश्चये। **यथोदाहृता प्रागिति**। (२०२–३)

"असज्ज्ञानफला काचिद्धेतुभेदव्यपेक्षये"त्यादिना (।)।

यत्पुनरुक्तम् (।) अप्रमाणमनुपलब्धिरिति तन्नाविशेषेण बोद्धव्य किन्तु स्वभावेत्यादि। देशादिविप्रकृष्ट स्वभाव (।) ज्ञापक लिङ्ग। तयोरज्ञान।

"स्वभावज्ञापकाज्ज्ञानस्याय न्याय उदाहृत·।[5]" (१।२०३)

असत्त्वे साध्ये नास्ति प्रामाण्यमिति। स्वभावाज्ञान प्रत्यक्षनिवृत्ति। ज्ञापकाज्ञानमनुमाननिवृत्ति·। अदृश्यविषयाया प्रत्यक्षानुमाननिवृत्तेरय न्याय उदाहृत इति समुदायार्थ.।

यस्येत्यादिना व्याचष्टे। यस्य कस्यचित् पिशाचादे । स इति स्वभाव·। **तदनुपलम्भमात्रेणेति** तेन तद्विषयानुपलम्भमात्रेण प्रत्यक्षनिवृत्ति[6]रूपेणासन्नाम। **यथोक्तं प्रागिति**। "सतामपि कदाचिदनुपलम्भादि"त्यादिना। स्वभावाज्ञानमनेन व्याख्यात।

ज्ञापकाज्ञानम्व्याख्यातुमाह। **योपीत्यादि। ज्ञापकस्येत्यस्य** विवरण लिङ्गस्येति। **अतीन्द्रियः प्रतिक्षिप्यतेऽर्थः। यथा नास्ति विरक्तं चेत** इत्यादि। तथा
136a ज्ञापकस्य लिङ्गस्याभावात् स्वभावविशेषो वा[7] प्रतिक्षिप्यते। अत्र विशेष प्रतिक्षिप्यते न धार्मिमात्र। यथा **नास्ति दानेत्यादि**। दान च हिंसा विरतिश्चेति द्वन्द्वः। तद्विषयाश्चेतनाः। **दानचेतनाना हिंसाविरतिचेतनानां** चेत्यर्थः।

विरतिचेतनानां चाभ्युदयनिःश्रेयस हेतुता नास्तीति च प्रत्यक्षेऽप्यर्थे तस्य फलस्यानन्तर्याभावात्। अतत्फला[7] साधर्म्यात् विपर्यस्तोऽपवदेतापि। न तावता व्यवहितानां फलानां हेतोः फलानामुत्पत्तिदर्शनात् तदभावः। मूषिकस्य चोन्मत्तकुक्कुरस्य विषविकार इव, तद्भावे विरोधाभावात्, अत्रानुपलब्धिमात्रमप्रमाणम्। 481b

यदि भावे यत् प्रमाणं नैवास्ति, अत एव संशयो युक्तः। प्रमाणसंभवादेव प्रतिक्षेपः।

अभ्युदयहेतुना स्वर्गादिफलहेतुना। अत्र चेतनाना न स्वरूप प्रतिक्षिप्यते तासा प्रत्यक्षत्वात्। किन्त्वभ्युदयहेतुत्व स्वभावो विशेषो नास्तीत्युच्यते।

ननु चेतनाना प्रत्यक्षत्वा[1]दभ्युदयहेतुतापि तदात्मभूतत्वात्। प्रत्यक्षस्यैवेति कुतो भ्रान्तिरित्यादि।

प्रत्यक्षेप्यर्थे **विपर्यस्तोऽपवदेतापीति** सम्बन्ध.। कथम्विपर्यस्त इत्याह। **अतत्फलेत्यादि**। अतत्फला अनभ्युदयफला ये दृष्टाश्चेतना विशेषा अव्याकृताः। तैस्साधर्म्यात्। साधर्म्यमेव कथमित्याह। **फलस्यानन्तर्याभावा**दिति या अन्या अतत्फलाश्चेतना। याश्च तत्फला उभयत्र तत्फ[2]लस्यानन्तर्यन्न दृश्यते। **न तावतेति** फलस्यानन्तर्यादर्शनमात्रेण। **तदभावः** फलाभाव। कस्माद् (।) **व्यवहितानामित्यादि**। **हेतोः** सकाशात् कालान्तरेणोत्तरोत्तरावस्थापरिणामलक्षणेन **व्यवहितानां फलानान्दर्शनात्। मूषिकस्यालर्क्कस्य चोन्मत्तकुक्कुरस्य विषविकार इव** स हि न विषसचारकाल एव भवति किन्तु सहकारिण कालविशेषस्य सन्निधौ-[3]निष्पद्यते। न तु हेत्वन्तरमेव तद्वत्।

स्यादेतत् (।) मूषिकादिविषविकारस्य कालान्तरे दृष्टत्वात् सद्भावो युक्त एव। दानादिफलन्तु न कदाचनापि दृष्टमिति कथन्तस्य सद्भाव इत्याह। तदित्यादि। **तदभाव** इति। तयोर्दानादिफलातीन्द्रियवस्तुनोर्भावे **विरोधाभावात्। अत्र** दानादिफलेऽतीन्द्रियभावे **वानुपलब्धिमात्रमप्रमाणं**।

यदि बाधक प्रमाण नास्ती[4]त्यप्रतिक्षेपो **भावेऽस्तित्वे** कि **प्रमाणन्नैवास्ति प्रमाण**मतः सत्तानिश्चयो न युक्त इति पर।

अत एवेत्या चार्य। अत्यन्तमतीन्द्रियस्यार्थस्य साधकबाधकप्रमाणाभावात् प्रेक्षावतः **संशयो** युक्तः। यदि वा यद् वस्तु निराकर्त्तुन्न शक्यते न च तस्य साधक प्रमाण प्रतिभाति। तस्यैव सम्भावना युक्ता भवेदस्य कदाचित् साधक प्रमाण

तदत्र केषांचिदर्थानां स्वभावानां च दर्शनपाटवाभावात् च[2] कारणानां फलोत्पादनियमाभावात् ज्ञापकस्यासिद्धिः ।

नेयता तदभावः, पुनरपि केषांचित् पर्यायेण अभिव्यक्तेः ।

कार्ये तु कारकाज्ञानमभावस्यैव साध[3]कम् ।

कस्यचित् प्रतिभावत[5]। तस्मादर्थसशयात् प्रमाणसंशयाद्वाऽप्रतिक्षेप.।

अन्ये तु विरक्तचित्तेऽभ्युदयहेतुत्वे चात एवेति साधकबाधकप्रमाणाभावात् सशयोस्त्विति व्याख्याय। विरक्त चित्त सर्वज्ञत्वे भवेद्वा प्रमाणमित्यप्रतिक्षेप । तच्च प्रमाण द्वितीये परिच्छेदेऽभिधास्यत इति व्याचक्षते।

यत एव व्यवहितंस्यापि कार्योत्पत्ति'। **तत्तस्मादत्र** एवातीन्द्रियेषु मध्ये **केषांचिदर्थानां स्वभावानां चेति** यद्यपि पाठक्रम । तथापि यथायोग सम्बन्ध ।

केषाचित् स्वभावनामभ्युदयहेत्वादीना भवेज्ज्ञापकासिद्धिः । कथ (।) **दर्शनपाटवाभावात्**। तद्विषयस्यानुभवस्य यथागहीतस्वरूपनिश्चयोत्पादने सामर्थ्याभावात् केषाचिदर्थाना विरक्तचित्तत्वादीना। प्रत्यक्षानुमानलक्षण कार्य ज्ञापकन्तस्याभावात्।[7]

136b तथाभूतस्य कार्यस्य कस्मादभाव इत्याह। **कारणानामित्यादि**। न हि कारणैरवश्यमात्मज्ञापकङ्कार्य सर्वपुरुषग्राह्यमारब्धव्यमिति नियम'।

अन्ये त्वन्यथा व्याचक्षते। केषा चित् स्वभावानामभ्युदयहेतुवादिना। **अर्थानां च विरक्तचित्तादीनाम्भवेज्ज्ञापकस्य** निश्चायकस्य प्रमाणस्यासिद्धिः। कुत. (।) **दर्शनपाटवाभावात्** ।

एतदुक्त[4]म्भवति। दर्शनमे[1]व ज्ञापक कस्यचिदर्थस्य तच्चापटुत्वात् सर्वाकारनिश्चयन्नोत्पादयति। कारणाना च कार्योत्पादननियमाभावस्तेनानन्तरकार्यादर्शनात्। कार्यद्वारेणाप्यभ्युदयहेतुत्वन्न शक्य निषेद्धु। तथातीन्द्रियाणामर्थाना दर्शनस्य मनोविज्ञानलक्षणस्यापाटवात् प्रत्यक्षेणाग्रहण। न हि कार्यद्वारेणैषा निश्चय कारणाना च कार्योत्पाद[2]ननियमाभावात्। न हि कारणैरवश्यमात्मज्ञापक कार्यं सन्तानान्तरे जनयितव्यमिति नियम । तस्मान्न प्रत्यक्ष नानुमान तेषामस्ति।

नेयतेति यथोक्तज्ञापकाभावमात्रेण **तदभावो**तीन्द्रियाणामभाव । यस्मात् प्रत्यक्षानुमानाभ्यामनुपलब्धानामपि **केषांचिदर्थानां पुनरपि पर्यायेण** क्रमेण कुड्यविवरावस्थितानामर्थाना प्रत्यक्षेणानु[3]मानेनाभिव्यक्तेः प्रतीते.। तदेव विप्रकृष्टे स्वभावानुपलम्भो नासत्तासाधन। नापि कार्यानुपलम्भ.।

स्वभावस्याभावे साध्येऽनुपलम्भ वाप्रमाणमुच्यते। कारणानुपलम्भस्तु प्रमाणमेव।

न हि येषां बहूनां कारणानां कार्यस्य सम्भवः।

ननु कारणविनाशेऽपि न कार्यस्थितिदर्शनम् [4]।

कारणस्थितिकालभावि कार्यं न ब्रूमः।

न च तथा स्थायी भावस्तदुपादान. पारम्पर्येण सन्तानोपकारात् तत्कार्यव्यपदेशः। हेत्वभावे भावोत्पादे नहि सत्तेत्युक्तम्[5] **। यद्यस्य कथंचिदभावः सिध्येत् तदा तत्फलं तस्य नास्तीति निश्चीयते।**

कारणानुपलम्भस्तु तत्राप्यभावसाधनमित्याह। **कार्ये त्वित्यादि**। कार्ये तु स्वभावादिविप्रकर्षिण्यपि कारकाज्ञान कारणानुपलब्धिरभावस्य साधनमेव।

स्वभावेत्यादिना व्याचष्टे। विप्रकृष्टविषयस्य **स्वभावस्याभावे साध्ये** स्वभावा**नुप**[4]**लम्भ एवाप्रमाणमुच्यते। कारणानुपलम्भस्तु प्रमाणमेव।**

ननु विप्रकृष्टविषये कारणानुपलम्भ एव निश्चेतुमशक्यस्तत्कथ कार्याभाव साधयेत्। सत्यम् (।) एतावद् वक्तु शक्यते (।) कारणमन्तरेणानुद्दिष्टविषये कार्यमवश्य न भवतीतीयता लेशेनास्योपन्यास। अत एव सामान्येनाह। **न ह्यस्तीत्यादि**।

नन्वित्यादि पर। अग्नेर्**विनाशेपि**[6] वासग्रहादौ धूमस्य दर्शनात्। तथा चासत्यपि कारणे कार्य दृष्टमिति व्यभिचार। असति कारणे कार्यन्न स्यादित्यनेन वाक्येन **कारणस्थितिकालभावि कार्यं**। यावत् कारणसत्ता तावत् कार्यसत्तेत्येव**म्न ब्रूमो** येन कारणनाशेपीत्यादिक प्रसग स्यात्। किन्तर्ह्यनेन वाक्येनोच्यत इत्याह। **हेतुरहितेत्यादि**।

एवन्तावत् स्थिरतामभ्युपग[6]म्योक्त। क्षणिकत्वे तु कारणे विनष्टे कार्यस्थानमेव नास्तीति कुतो व्यभिचाराशका। तथा हि योग्निजन्यो धूमक्षणस्तस्याग्निविनाशे नास्त्येवावस्थान। क्षणिकत्वेन विनाशात्। यश्च पश्चात् स्थायी धूम स धूमहेतुक एव नाग्निहेतुक। तदेव दर्शयन्नाह। **न च तथेत्यादि**। **तथा स्थायीति** नष्टेप्याद्ये कारणे कालान्तरस्थायी। **तदुपा**[7]**दानः** पूर्वनिरुद्धहेतूपादान। 137a

कथन्तर्हि पाश्चात्योपि धूमोग्निहेतुक इत्युच्यत इत्याह। **पारम्पर्येत्यादि**। आद्यन्तावद् धूमक्षणम्वह्निरेव जनयति (।) स धूमक्षणोऽपर सोप्यपरमित्येव पारम्पर्येण। एतदेव स्फुटयन्नाह। **सन्तानोपकारा**दिति। प्रबन्धस्य प्रथमतो जननात् **तत्कार्यव्यपदेशः**। तस्माद् यस्य कारणस्य पाश्चात्यमपि कार्यमित्येव[1] व्यप-

स्वभावानुपलम्भश्च स्वभावेऽर्थस्य लिङ्गिनि ॥२०४॥

स्वभावाभावे स्वभावस्यैव लिङ्गिनि स्वभावा[6]नुपलम्भः कश्चिदपि प्रमाणमेव।

यदि व्यापकानुपलम्भ एव तत्स्वभावः सिध्येत् यथा शिंशपाया वृक्षत्वम्।

[82a] **तदभावः प्रतीयेत हेतुना यदि केनचित्[7]।**

यदि अस्य व्यापकस्य च स्वभावस्याभावः कुतश्चिद् गमकाद्धेतोः सिध्येत्। तदभावेनैव स्वकार्ये न व्याप्ये निवर्त्तेत तदभावासिद्धौ[1] निवृत्तावपि संशयात्,

ख, स्वभावानुपलब्धिः

कथं भावस्य स्वयमनुपलब्धेरभावसिद्धिः ?

दृश्यस्य दर्शनाभावकारणासम्भवे सति ॥२०५॥

भावस्यानुपलब्धस्य भावाभावः प्रतीयते।

देशः। **यद्यस्य** हेतोः **कथंचित्प्रमाणेनाभावः सिध्येत्** तदा **तत्फलन्तस्य** हेतोः **फलम्नास्तीति निश्चीयते।**

एतच्चोदृष्टविषयस्याभावस्य साधनमभिप्रेत्योक्तम् (।) अनुदृष्टविषये तु नैतत्प्रमाण प्रतिबन्धफलत्वात्।

स्वभावेत्यादि। अर्थस्येति व्यापकस्य स्वभावेऽव्यतिरिक्ते **लिङ्गिन्यसत्त्वेन** साध्ये **स्वभावानुपलम्भश्च** व्यापकानुपलम्भश्चा[2]भावस्य साधनमिति प्रकृत। (२०३–४)

स्वभावाभावेत्यादिना व्याचष्टे। **कश्चिदिति** व्यापकानुपलम्भः। यद्यनुपलभ्यमानो व्यापक स्वभावोस्य व्याप्यस्य सिद्ध स्यात् तदा भवेत् प्रमाण। कारणव्यापकानुपलम्भश्च भवेत् प्रमाण यदि तदभावस्तयो कारणव्यापकयोरभाव प्रतीयेत हेतुना केनचित्। स्वभावानुपलम्भाख्येन।

यदीत्यादिना का रि[3] का र्थ माह। **यद्यस्य** कारकस्याभावः **सिद्ध्येदिति** सम्बन्धः। **व्यापकस्य च स्वभावस्याभावः। कुतश्चिद् गमकाद्धेतो**रित्युपलब्धिलक्षणप्राप्तानुपलम्भात्। सोय कारको व्यापको वाऽसन्नेव सिद्धो यथाक्रमं कार्यं व्याप्यञ्च निवर्त्तयति। **तदभावासिद्धौ** कारकव्यापकयोरभावासिद्धौ **निवर्त्स्येपि**

भावो हि यथास्वं ग्राहकेण यदि उपलभ्य एव भवेत्। स दर्शनप्रतिबन्धिषु व्यवधानादिषु असत्सु उपलब्धिरेव। अनुपलब्धस्त्वसन्निति निश्चीयते। उपलम्भाव्यभिचारात्। अयमेव हेतुर्हेतुव्यापकयोरभावेऽपि वेदितव्यः।

ग. अनुपलब्धिरेवाभावः

विरुद्धस्य च भावस्य भावे तद्भावबाधनात् ॥२०६॥
तद्विरुद्धोपलब्धौ स्यादसत्ताया[4] विनिश्चयः।

कार्ये व्याप्ये **च संशयात्**। (२०४–५)

यदि स्वभावाभावे साध्ये तद[4]नुपलम्भ एवाप्रमाणमुच्यते। **कथमिदानीम्भावस्य** घटादे. **स्वयमनुपलब्धेरभावसिद्धिः**।

उत्तरमाह। **दृश्यस्येत्यादि**। विप्रकृष्टे विषये स्वभावानुपलम्भे प्रमाणमुक्त। न तु दृश्यविषय इत्यर्थः। **दृश्यस्येति** स्वभावाद्यविप्रकृष्टस्य **भावस्यानुपलब्धस्य** सत। **भावस्य** सत्ताया **अभावः प्रतीयते**। कदा **दर्शनाभावकारणासम्भवे सति**। द[5]र्शनाभावस्य कारण कारणान्तराणा वैकल्यन्तस्यासम्भवे सति। उपलम्भप्रत्ययान्तरसाकल्ये सतीत्यर्थ।

भावो हीत्यादि विरण। स्वभावाद्यविप्रकृष्टो भावो **यदि भवेत्। यथास्वं ग्राहकेण करणेनेति** यस्य यद् ग्राहकमिन्द्रियन्ते**नोपलभ्य** एव भवेत् **स** इति यथोक्तो भाव·। **दर्शनप्रपिबन्धिषु व्यवधानादिष्** (।) आदिशब्दाद् वैकल्यप्रतिबन्धादिष्व**सत्सु**। उ[6]पलम्भप्रत्ययेषु सत्स्विति यावत्। (२०५–६)

तथा भूतोनुपलब्धस्त्वसन्निति **निश्चीयते**। किङ्कारण (।) **तादृशः सत** उपलब्धिलक्षणप्राप्तस्य सत। **उपलम्भाव्यभिचारात्**। य एवाय स्वभावस्याभावनिश्चये दृश्यस्य दर्शनेत्यादिनोक्तोऽयमेव **हेतुर्वेदितव्यः**। कस्मिन् साध्ये (।) **हेतुव्यापकयोरभावेपि** साध्ये।

विरुद्धस्य चेत्यादि।[7] यस्याभावस्साध्यस्तेन यो **विरुद्धस्तस्योपलब्धौ च** 137b
स्यादसत्तायाः प्रतिषेध्याभावस्य **निश्चयः**। किङ्कारणम् (।) **विरुद्धस्य भावस्य भावे सत्तायान्तद्भावबाधनात्**। तस्य निषेध्याभिमतस्य सत्ताबाधनात्।

यो हीत्यादि विवरण। कस्मान्नावतिष्ठत इत्याह। **तदित्यादि**। तयोर्विरुद्धयोर्ये **उपादाने** तयोरन्योन्य **परस्परं** यद् **वैगुण्यन्तस्याश्रयत्वेन**। यथा शीतोपादानमुष्णोपादानवैगुण्यस्याश्रय इतरश्चेतरस्येत्यर्थ। तेन कारणेन विरुद्ध-

यो हि भावो येन सह युगपद् नावतिष्ठते, तदुपादाने परस्परवैगुण्याश्रयत्वेनारम्भविरोधात्। तयोर्विरुद्धयोरेकस्य भावे[5]ऽप्यन्याभावे गतिर्भवति। यथोक्तं प्राक्। तत एवानुपलब्धेर्नैव भेदो व्यवस्थाप्यः। तत एव विरोधगतेः, विरोधाच्चाभावसाधनाद्।

भवतु नामैवंविधाया अनुपलब्धेरभावगतिः। कथं न स्यात्। दृष्टान्ता-
482b **पेक्षाभावात्। न ह्यस्यां काचिदपि सत्ता। किन्न व्योमकुसुमा[7]द्यनुपाख्यमिति अदृष्टान्तः। तदसदिति कथं अवगन्तव्य येनैवं स्यात्। अनुपलब्धेरेव चेत्। तत्रापि कथमदृष्टान्तिकाऽसत्तासिद्धिः, सदृष्टान्त[1]त्वे वाऽनवस्थाप्रसंगः। तथा**

योरेकत्र युगपदारम्भविरोधात। **तयोर्विरुद्धयोरेकस्य भावेऽप्यन्याभावगतिर्भवति। यथोक्तं प्रागनुपलब्धिप्रभेदे।** "न शीतस्पर्शोत्राग्नेरि"त्यादि। यद्यप्यत्रानुपलब्धिरिति न श्रूयते तथापीद स्वभावविरुद्धाख्य लिङ्गमनुपलब्धेस्सकाशान्न[2] पृथगुच्यते (।) किङ्कारण (।) तत **एवानुपलम्भाद् विरोधगतेः। विरोधाच्चाभावसाधनादित्युक्त।**

भवतु नामैवम्विधाया दृश्यानुपलब्धेः सकाशाद् **भावगतिः।** सा पुन कथमनुमान (।) नैवानुमान किन्तु प्रमाणान्तरमेवेति भाव।

कथन्न स्यादित्या चार्य।

दृष्टान्तेत्यादि पर। **दृष्टान्तापेक्षं** ह्यनुमानमन्वयव्यतिरेकवत्त्वात्। दृष्टान्तापेक्षणमेवा[3]ह। **न हीति। अस्या**मित्यनुपलब्धौ।

किन्नेत्याचार्य।

तदित्यादि पर। तद् **व्योमकुसुमादि।** असदिति **कथं** केन प्रमाणेना**वगन्तव्यं येनैवं स्याद**दृष्टान्त· स्यात्। **अनपलब्धेरेव** लिङ्गाद् व्योमकुसुमाद्यसदवगन्तव्यमिति **चेत्।** तत्रेति व्योमकुसुमादौ। **कथमदृष्टान्तिका** दृष्टान्तरहिताऽसत्तासिद्धिः। **सदृष्टान्तत्वे वानवस्थाप्रसंग** इति तत्रा[4]प्य(प)रोपीति कृत्वा। **तथा चे**त्यनवस्थाया सत्या साध्यस्याप्रतिपत्तिः। यतश्च दृष्टान्तत्वेनवस्थादोष। **तस्मान्निरुपाख्याभावसिद्धिर**दृष्टान्तिका कर्त्तव्या। **तद्वदन्यत्रापि** (।) नेह घटोनुपलब्धिलक्षणप्राप्तस्यानुपलब्धेरित्यादावपि प्रयोगे **दृष्टान्तानपेक्षणादननुमानमनुपलब्धिः** (।)

शृण्वन्नपीत्या चार्य। असकृदुक्तमेतत्। य[6]था स्वभावानुपलब्धौ नाभावः साध्यते किन्त्वभावव्यवहार इति शृण्वन्नपि **देवानां** मूर्खाणा **प्रियो नावधारण-**

चाप्रतिपत्तिः। तस्माद् अनुपाख्यासिद्धिवदन्यत्रापि दृष्टान्तानपेक्षणादननुमानम्।

शृण्वन्नपि[2] देवानां प्रियः नावधारणपरः। असच्छब्दव्यवहाराणा निमित्तं सोपलब्धिर्हि स्वसन्निधानात्, स्वनिमित्तसामग्रीयोगसन्निधानः सर्वोऽत्र[3] दृष्टान्तः। असत्तैवात्र अनुपलब्धिः। अत एवेयं कारणात् कार्यानुमानलक्षणेति, ततः स्वहेतावन्तर्भवतीति वक्ष्यामः[4]।

सच्छब्दव्यवहारनिषेधेऽपि प्रमाणनिवृत्या निमित्तवैकल्येन अकुरादयोऽपि

पटुर्येन सत्यपि दृष्टान्ते तदसिद्धिश्चोद्यते। दृष्टान्तमेव दर्शयितुमुपक्रमते। **निमित्तं** हीत्यादि। उपलभ्यानुपलब्धिर्दृश्यानुपलब्धिर्या **निमित्तं** कारणमसद्व्यवहाराणां। **सेत्यनुपलब्धि स्वसन्निधान**ादात्मसन्नि[2]धानात्। **स्वनिमित्तान्** स्वमनुपलब्धिरूप निमित्त येषान्तानेतान**सद्व्यवहारान्** साधयतीति कृत्वा **सर्वोत्र दृष्टान्त**। किभूत (।) **स्वनिमित्तसामग्रीयोग्यसन्निधानः**। स्वकारणाना सामग्री तस्या योग्य सन्निधान यस्याङ्कुरादेस्स तथोक्त (।) प्रयोग पुन। यस्य यत्र निमित्त सकलमप्रतिबद्धमस्ति तत्र तेन भवितव्यन्तद्यथाङ्कुरादि।[7] अस्ति 381a
चोपलब्धिलक्षणप्राप्तस्यानुपलब्धावसद्व्यवहाराणा निमित्तत्वमिति स्वभावहेतु। कस्माद् (।) अत्राभावव्यवहार एव साध्यते न पुनरभाव एवेत्याह। **असत्तेत्यादि। अत्र** दृश्यानुपलब्धाव**नुपलब्धिरेव** सत्ता। यथोक्त प्राक्। **तस्मादभावो न** (?) साध्यते। यत एवात्राभावव्यवहार साध्यतेऽत **एवेयमनुपलब्धि** स्वभावहेतावन्तर्भवतीति[1] **सम्बन्ध। कारणाद्** दृश्यानुपलम्भात् **कार्यस्यासद्व्यवहारस्यानुमानं** तदेव **लक्षणं** यस्येति सामान्येनान्यपदार्थमुपदर्श्य पश्चाद् भावप्रत्ययः। समग्रात् **कारणात् कार्यानुमाने** च योग्यतानुमानमिति स्वभावहेतावन्तर्भाव (।) वक्ष्यामश्चतुर्थे परिच्छेदे ( )।

दृश्यानुपलब्धौ भवतु दृष्टान्तोऽदृश्यानुपलब्धौ तु कथमित्याह। **सच्छब्दे**त्यादि देशादिविप्रकृष्टेषु[2] **प्रमाणनिवृत्त्या सद्व्यवहारनिषेधे** साध्ये कारणाभावात् कार्यस्याभाव साध्यस्तेनात्र न केवलन्निरुपाख्य दृष्टान्त किन्तु **निमित्तस्य** कारणस्य **वैकल्येनाभाविनोऽङ्कुरादयोपि दृष्टान्तः**। प्रयोगस्तु (।) यद्विकलकारणन्तन्न भवति यथा बीजरहितोऽङ्कुर। विकलकारणश्चादृश्यानुपलब्धौ सद्व्यवहार इति कारणानुपलब्धि।

यत्पुनरुक्त (।) तदसन्निरुपा[3]ख्य कथ प्रतिपत्तव्यमिति तत्रापि **निरुपाख्ये दृष्टान्ते। इयमेवमज्ञानव्यवहारलक्षणा प्रवृत्तिर्निषिध्यते**। अनुपलब्धितो न त्वभाव साध्यते। किङ्कारणम् (।) **अनुपलब्धीत्यादि**। विषाणादिविविक्तशश-

दृष्टान्तः। न हि निरुपाख्यं केवलम्। निरुपाख्येऽपि इयमेव प्रवृत्तिर्निषिध्यते, अनुपलब्धि[5]लक्षणाया असत्तैव सिद्धा। निमितदभावमभ्युपगम्य प्रवृत्ति निवृत्ति च विलोमयन् तत्र यथाभ्युपगमं निरुपाख्यं अन्यद् वा[6] प्रतिपाद्यते।

मस्तकाद्युपलब्धिरेवानुपलब्धि पर्युदासवृत्त्या। सैव लक्षण यस्या. शशविषाणासत्तायाः सा **सिद्धैव।**

स्यादेतद् (।) अदृश्यानुपलब्धावसत्त्वे[4] विषयभूते सिद्धे। तन्निमित्तोप्यसद्व्यवहार सिद्ध एवेति किन्तेनासद्व्यवहारेण। अदृश्यानुपलब्धावपि सद्व्यवहारनिमित्तस्याभावाद् व्यवहाराप्रवृत्ति सिद्धैवेति सद्व्यवहारनिषेधेनापि साधितेन कि।

तथा पूर्वप्रसिद्धविषयोपदर्शनलक्षणेन दृष्टान्तेनाप्यनुपलब्धौ न किचित् प्रयोजनमित्यत आह। **सोय**मित्यादि। मूढ प्रत्येतत् साध्यत इति यावत्।[5]

क्वचिदप्यसद्व्यवहार**निमित्तं** दृश्या**नुपलम्भमभ्युपगम्या**सद्व्यवहार**प्रवृत्तिम्विलोमयन्न**कुर्वन्। अदृश्यानुपलब्धौ तदभाव च सद्व्यवहारनिमित्तस्य प्रमाणस्याभाव चाभ्युपगम्य सद्व्यवहार**निवृत्ति च विलोमयन्न**कुर्वन्। **यथाभ्युपगमं प्रतिपाद्यत इति** दृश्यानुपलम्भेन निमित्तेन त्वयाऽसद्व्यवहारोन्यत्र कृतस्तदिहाप्यस्ति (।) तस्मा[6]दसद्व्यवहारङ् कुर्विति प्रतिपाद्यते। तथा प्रमाणेन निमित्तेन त्वया क्वचित् सद्व्यवहारः कृतस्तदिहाप्यनिरुपाख्ये नास्ति। तस्माद् सद्व्यवाहारम्मा कुर्विति प्रतिपाद्यते। किमिव **निरुपाख्यवत्**। यथा शशविषाणादावसद्व्यवहारनिमित्तस्य दृश्यानुपलम्भस्य भावादसद्व्यवहारस्तथेहापीति।

138b **अन्यद्वेति** (।) यथा सन्निहितनिमित्तस्याऽङ्कुरादेः प्र[7]तिपत्तिरेव सद्व्यवहारस्यापीति। यथा च निरुपाख्ये प्रमाणाभावात् सद्व्यवहारस्य निवृत्ति। **अन्य**स्मिन् वा कारणविकले कार्ये निवृत्तिस्तद्वद विप्रकृष्टेषु सद्व्यवहारस्य निवृत्तिरिति **प्रतिपाद्यते।**

स एव तावदुपलब्ध्यभावोनुपलब्ध्याख्य **कथं** केन प्रमाणेन **सिद्धः** (।) न प्रत्यक्षेणाभावविषयत्वविरोधात्। नाप्यनुमानेन प्रत्यक्षपूर्वकत्वादस्य[1]। नापि प्रदेशसम्बन्ध्यनुपलम्भोऽभावस्य नीरूपत्वेन सम्बन्धित्वायोगात्। प्रदेशस्यानुपलम्भे च धर्म्मसिद्धेराश्रयासिद्धो हेतुरित्यनुपलब्धेर्न पक्षधर्मत्वमित्युद्यो त क र प्रभृतय:।

अत्राह। **एतदुत्तरत्र वक्ष्यामस्तद्विशिष्टोपलम्भोऽतस्तस्याप्यनुपलम्भनन्त-**

स एव तावदुपलब्ध्यभावः कथं सिद्ध इति चेत्। एतदुत्तरत्र वक्ष्यामः।

अन्यत्रापि अनुमाने साध्यधर्मेण व्यापके इच्छन् किमिति भावः प्रत्याय्यः। याप्य[7]स्य निर्देशादेव व्याप्नुवतः सिद्धेः। 483a

निश्चितार्थसम्बन्धस्यापि दृष्टान्तेन स्मृत्यर्थश्चेत् तदेतदत्रापि तुल्यम्। ोऽयमन्यत्रापि अनुपलब्धिमात्रेण अभावव्यवहारकल्पना मूढं[1] प्रति स्मृतिजनन-ामत्र।

कथं च यद् "न सन्ति प्रधानादयोऽनुपलब्धेः"। तत्र कथं अभावव्यवहारसिद्धिर्वा त्ताव्यवहारनिषेधे कथ स्यात। तदर्थनिषेधे धर्मिवाचिनोऽभिधानस्याप्रयोगात्, र्विषयस्य प्रतिषेधस्य चायोगात्।[1]

मादनुपलम्भोय प्रत्यक्षेणैव सिध्यतीति। यत्पुनरुक्तमनुपलब्धौ किन्दृष्टान्तोप[2]-र्शननेत्याह। **अन्यत्रापीत्यादि।** विधिसाधनेप्यनुमाने **साध्यधर्मेण व्यापकेन** व्याप्यधर्मं कृतकत्वादिक साधन**मिच्छन्** प्रतिपाद्य **किमिति** दृष्टान्तेन **प्रत्याय्यः।** केङ्कारण (।) यथास्व साध्येन **व्याप्यस्य** हेतो**र्निर्देशादेव व्याप्नुवतः** साध्यधर्मस्य **सिद्धेः। निश्चितार्थस्सम्बन्ध**लक्षणो येन **तस्य** व्यामूढम्प्रति **स्मृत्यर्थः।** तदेतद् **दृष्टान्तेन मूढं प्रति स्मृतिजननमत्रानुपलब्धौ।** एतदेवाह। **सोय**मित्यादि। **अन्य-त्रापीति** शशविषाणादौ (।२०५–६)

अथ यदिदमाचार्य दि ग्ना ग प्रभृतिभिरुक्त। "न सन्ति प्रधानादयोनुपलब्धे" रेति तत्र प्रयोगे। आ चा र्य आह। **कथं च न स्यादिति।**

चोदक स्वाभिप्रायेणाह। **तदर्थे**त्यादि। तदर्थस्य प्रधानार्थस्य **निषेधे** सति **प्रधानादिधर्मिवाचिनोभिधान[4]स्याप्रयोगात्।** न हि वाच्यमन्तरेण वाचकस्य प्रयोगोस्ति। यदा च प्रधानादिशब्दानामप्रयोगस्तदा न सन्तीति प्रतिषेधवा-च्येव शब्दोवशिष्यते। तस्य च प्रतिषेध्यासकीर्त्तने **निर्विषयस्य प्रतिषेध**स्येति प्रतिषेधवाचिन शब्दस्या**प्रयोगात्।** तथा च न सन्ति प्रधानादय इति द्वयोरपि प्रतिज्ञापदयोरप्रयोगात्। कुत्र कि साध्यत[5] इति व्यर्थानुपलब्धे साधनयोग। प्रधानादीना च पक्षभूतानामभावाद् पक्षधर्मो हेतु स्यात्। प्रतिज्ञापदयोर्वा पर-स्पर विरोधस्तथा हि प्रधानादय इति प्रयोगात् तदर्थसन्निधान। पुनर्न सन्तीति वचनात् तेषामसन्निधान। एते च सन्निधानासन्निधाने युगपदेकत्र विरुध्येते। (२०६–७)

---

[1]Ruń. bahi-phyıı.

नैष दोषः, एवं--

अनादिवासनोद्भूतविकल्पपरिनिष्ठितः ॥२०७॥
शब्दार्थस्त्रिविधो धर्म्मी भावाभावोभयाश्रयः।
तस्मिन्भावानुपादाने साध्येऽस्यानुपलम्भनम् ॥२०८॥
तथा हेतुर्न तस्यैवाभावः शब्दप्रयोगतः।

निवेदितं तावत् यथा एते शब्दा न स्वलक्षणविषयाः। अनादि[4]कालीनवासना-प्रभवे विकल्पे प्रतिभासिनमर्थं विषयत्वेनात्मसात् कुर्वन्ति।।

वक्तुस्तु तद्विकल्पभाजः श्रोतुश्च यथा प्रतिभासि वस्तु प्रतिपादन[5]समीहया प्रयोगात्। तदाकारविकल्पजननात्।

न चोपादानकार्यप्रत्ययेऽप्रतिभासिरूपविषयत्वेन तत् शक्यं निश्चेतुम्।

नैष दोष इति परिहार। यस्मा**दनादेर्वासना[6]**यास्समुद्भूते **विकल्पे परिनिष्ठितस्समारुढः शब्दार्थः** स च **भावाभावोभयाश्रितत्वात् त्रिविधो** धर्म्म। **तस्मिन्** शब्देर्थे वाह्यप्रधानादिको भावोनुपादानमस्येति तस्मिन् **भावानुपादाने साध्ये**। **अस्ये**ति बुद्धिपरिवर्त्तिन प्रधानादिर्धामिण। **तथे**ति बाह्यप्रधानाद्युपादानत्वे-
139a **नानुपलम्भनं हेतुः**। वासनोपादानत्वेनोपलम्भन[7]मेवात्रानुपलम्भन। **न तस्यैव** विकल्पप्रतिनिष्ठितस्य धर्मिणोऽभाव**स्साध्यते**। कस्मात् (।) प्रधानादिशब्दाना **प्रयोगतः**। तन्निषेधे हि निर्विषयत्वाच्छब्दप्रयोग एव न स्यात्।

निवेदितमित्यादिना व्याचष्टे। यदि हि स्वलक्षणमभिधेय स्यात् तदा स्वलक्षण-प्रतिषेधे शब्दार्थस्य प्रतिषेधात् तद्वाचिन शब्दस्याप्रयोग स्यात्। यावता निवेदित-मेतद् **यथैते शब्दा न स्वलक्ष[1]णविषया** इति। किन्त्व**नादिवासनायाः प्रभव** उत्पादो यस्य **विकल्पस्य** तस्मिन् **प्रतिभासी** योर्थस्त**म्विषयत्वेनात्मसात्कुर्वन्ति**।

कुत एतद् विकल्पविषयमेवार्थम्विषयीकुर्वन्तीत्याह। **वक्तुस्तद्विकल्पभाज** इति भावाभावोभयाश्रयसामान्याकारविकल्पभाज (।) कारणमाह। **यथे**त्यादि। **यथाप्रतिभासि वस्तु**। प्रतिभासिवस्त्वनतिक्रमेण या **प्र[2]तिपादनसमीहा** तया शब्द**प्रयोगात्**। तस्माद् विकल्पप्रतिभासिन एवार्थान् शब्दा विषयीकुर्वन्ति।

तथा श्रोतुश्च तद्विकल्पभाज इति सम्बन्ध। कि कारण (।) **तदाकारविक-ल्पजननात्**। भावाभावोभय।श्रयसामान्याकारविकल्पजननाच्च विकल्पप्रतिभासिन एवार्थान् शब्दा विषयीकुर्वन्ति।

स्यादेतद् (।) यदि नामैवन्तथापि कथन्न स्वलक्षणविषया श[3]ब्दा. स्वलक्ष-णप्रतीतेरित्याह। **न चे**त्यादि। **उपादानं** च **कार्यं** च ते एव **प्रत्ययो** ज्ञानन्तत्रा-

स तु विकल्पः सदसदुभया[6]कारप्रत्ययाहितवासनाप्रभवत्वात्, तत्प्रतिभास्याकाराध्यवसायवशेन च भाव(ाभाव)ोभयधर्म इत्युच्यते ।

तद् अत्र धर्मिणि आश्रित्य कथं प्रधानशब्दात् प्रतिभासमानोह्य[7]यमर्थो न भावोपादान इति सदसत्त्वं चिन्तयन्ति । तस्य भावानुपादानत्वे साध्ये स एव प्रत्यात्मवेद्यत्वात् अप्रतिक्षेपार्हो धर्मी[1] । 483b

न च स एव स्वलक्षणमिति शक्यं वक्तुम् । असंप्राप्ते निरुद्धे चार्थे तस्यानपा-

---

प्रतिभासि यद्रूपन्तद्विषयत्वेन तन्न शक्यन्निश्चेतुं । तत्रोपादानप्रत्ययो वक्तु प्रतिपादनसमीहारूपो विकल्प. शब्दस्य कारणत्वात् । कार्यप्रत्यय शब्दोत्थ श्रोतुर्विकल्प । न हि स शब्दार्थो य. शब्दे प्रत्यये न प्रतिभासते । न च तत्र स्वलक्ष[4]ण प्रतिभासते । स्पष्टाकारविवेकात् ।

ननु कथ विकल्पाभावाश्रयोऽर्थजन्यत्वेनाविकल्पकत्वप्रसगात् । कथञ्चाभावाश्रयोऽभावस्याकारणत्वात् । कथञ्चैक उभयाश्रयोऽहेतुकत्वप्रसङ्गादित्यत आह । **स त्वित्यादि** । सदसदुभयाकारो **विकल्पः सदसदुभयप्रत्ययस्तेनाहिता वासना ततः प्रभव** उत्पादो यस्य स तथोक्त । **इति** हेतोर्भावाभावो[5]भयधर्म इत्युच्यते ।

द्वितीय कारणमाह । **तदित्यादि** । **तस्मिन्नेव** विकल्पे **प्रतिभासी** य **आकार**स्तस्य सदसदुभयरूपतया**ध्यवसाय**स्तद्वशेन च । **भावाभावोभयधर्म इत्युच्यते ।** (२०९)

एतदुक्तम्भवति । सत्प्रत्ययाहितवासनाप्रभवस्सदाकाराध्यवसायीव भावधर्म इत्युच्यते । एवमभावोभयधर्मयोरपि द्रष्टव्य पूर्वपूर्वसदादिप्रत्य[6]याहितवासनाप्रभवत्वादेव सदादिविकल्पानामनादित्वम् (।) अतो न भावादिजन्यत्व । यतश्च शब्दार्थस्त्रिविध । **तत्तस्मादत्र** शब्दार्थे **धर्मिणि** व्यवस्थिता विवा**दाश्रयत्वेन** स्थिता. पुरुषास्**सदसत्त्वं** प्रधानादे**श्चिन्तयन्ति । कथं** चिन्तयन्तीत्याह । **किमयं प्रधानशब्दादुच्चरिताद्** विकल्प**प्रतिभासमानोर्थो** बाह्यप्रधाननिबन्धनो भवति न वेति । **तस्य** प्र[7]धानादिविकल्पप्रतिभासस्य **भावानुपादानत्वे** धर्मे **साध्ये** 139b **स एव** विकल्पप्रतिभासो बुद्धिस्वभावतया **प्रत्यात्मवेद्यत्वात** स्वसम्वेदनप्रत्यक्षसिद्धत्वाद**प्रतिक्षेपार्होर्थो धर्मी ।**

ननु च स एव विकल्पग्राह्यार्थः स्वलक्षण स्वलक्षणरूपतयाध्यवसायात् । ततश्च प्रत्यक्षसिद्ध एव प्रधानादि शब्दश्च स्वलक्षणविषय इत्याह । **न च स एवेत्यादि ।**[1] स एव विकल्पप्रतिभास्यर्थो बाह्य **स्वलक्षणमिति शक्यम्वक्तुं** । किं

यात्। वस्तुनि विपरीताकाराभिनिवेशेषु तीर्थान्तरीयप्रत्ययेषु च[2] भावात्।

परमार्थैकतानत्वे शब्दानामनिबन्धना ॥२०९॥
न स्यात् प्रवृत्तिरर्थेषु दर्शनान्तरभेदिषु।
अतीताजातयोर्वाऽपि न च स्यादनृतार्थता ॥२१०॥
वाचः कस्याश्चिदित्येषा बौद्धार्थविषया मता।

—इति संग्रहश्लोकौ।

तस्य च यथा समीहितरूपानुपादाने साध्ये तथाऽत्रानुपलम्भधर्मत्वात्, न साध्य[1]धर्मा[4]सिद्धिः।

न पुनरत्र शब्दप्रतिभास्यर्थोऽपह्नूयते। तस्य बुद्धौ उपस्थापन [2]शब्दप्रयोगात्। तदभावे हि तदयोगात्।

अपि च।

कारणम्(।) असंप्राप्तेऽनुत्पन्ने स्वलक्षणे निरुद्धे च तस्य विकल्पप्रतिभासस्यानपायात्। किं च वस्तुनि घटादौ विपरीताकारः परस्परविरोधिनो नित्यानित्यादय। तानभिनिवेष्टु शील येषान्तीर्थान्तरीयप्रत्ययानान्तेष भावाच्छब्दार्थप्रतिभासस्य। न च स एवार्थ स्व[2] लक्षणमिति प्रकृतेन सम्बन्ध ॥ (२०९–१०)

अमुमेवार्थ सग्रहीतुमाह। परमार्थः स्वलक्षणन्तस्मिन्नेकस्थान प्रवृत्तिर्येषान्तद्भावस्तत्त्वन्तस्मिन्सति शब्दानामनिबन्धना परमार्थनिबन्धनरहिता प्रवृत्तिर्न स्यात्। दर्शनान्तरभिन्नेष्वर्थेषु। सिद्धान्तभेदभिन्नेषु। अतीताजातयोर्वापीति अतीतानगते चार्थे शब्दानाम्प्रवृत्तिर्न स्यात्। तथा कस्या[3]श्चिद् वाचो(ऽ) भूतार्थता मृषार्थता न स्यात्। इति यथोक्ताद्धेतोरेषा वाक्। बौद्धार्थविषया। विकल्पप्रतिभास्यर्थविषया मता। (२१०–११)

तस्य चेति प्रधानादिविकल्पप्रतिभासस्य। यथासमीहितं रूपं यथापरिकल्पितम्वाह्यप्रधानादिरूपन्तदनुपादानत्वे साध्ये। तथानुपलम्भ इति यथा समीहितरूपोपादानत्वेनानुपलम्भोस्तीति कृत्वा [4] न साधनधर्मासिद्धिर्नापक्षधर्मो हेतुरित्यर्थ.।

न पुनरत्र प्रयोगेऽयमेव शब्देत्यादि। शब्दादुत्पद्यते यो विकल्पस्तत्प्रतिभास्यर्थोपहनूयते। किं कारण (।) तस्य विकल्पप्रतिभास्यर्थस्य श्रोतृबुद्धावुप-

---

[1]Bsgrub-par.bya-baḥi-chos [2]Bskyed. paḥi-phyir.

शब्दार्थापह्नवे साध्ये धर्माधारनिराकृतेः ॥२११॥
न साध्यः समुदायः स्यात् सिद्धो धर्मश्च केवलः।

यदि शब्दार्थस्यैवापलापे प्रधानशब्दवाच्यस्य धर्मिणो हि निराकृतेः साध्यधर्माश्रयाभावः स्यात्[6]। तद् अयं आधारव्यवच्छेदानपेक्षो न विवादास्पदमिति नोपन्यसनीय एव।

अपि च।

सदसत्पक्षभेदेन शब्दार्थानपवादिभिः ॥२१२॥
वस्त्वेव[7] चिन्त्यते ह्यत्र प्रतिबद्धः फलोदयः। 484a
अर्थक्रियाऽसमर्थस्य विचारैः किं तदर्थिनाम् ॥२१३॥
षण्ढस्य रूपवैरूप्ये कामिन्याः किं परीक्षया।

न हि शब्दार्थोऽसन् कचित्[1] पुरुषार्थमुपरुणद्धि, सन् वा समादधाति। **यथाभिनिवेशं तस्याऽसत्त्वात्। यथातत्त्व** वाऽनवस्थितत्वात्[1]।

स्थापनाय **शब्दप्रयोगात्। तदभावे** विकल्पप्रतिभास्यर्थाभावे। **तदयोगाच्छब्द**प्रयोगायोगात्।

अपि च यदि **शब्दार्थस्य वापह्नवः सा**[5]**ध्यते**। तदा शब्दार्थापह्नवे साध्ये तस्य साध्य**धर्मस्य** नास्तित्वस्य य **आधारो** धर्मी शब्दार्थलक्षणस्तस्य **निराकृतेर्न साध्यः** धर्मिधर्मात्मक **समुदायः स्यात्। केवलश्च** साध्य**धर्मस्सिद्ध** एव। नास्तित्वमात्रस्य क्वचित् सिद्धत्वात्।

यदीत्यादि विवरण। **तदि**ति तस्मादयं साध्यधर्म आधारेण यो **व्यवच्छेदो** विशेषणमस्येद नास्तित्वन्त**दनपेक्ष**। इ[6]**ति** हेतो**र्नोपन्यसनीय एव** विवादकाले। (२११-१२)

सदसत्पक्षभेदेनेति सदसत्प्रतिज्ञाभेदेन **वस्त्वेव चिन्त्यते। शब्दार्थानपवादिभि**रर्थक्रियार्थिभि प्रेक्षावद्भि.। यस्मादत्र वस्तुनि **प्रतिबद्धः फलोदयः**। (२१२-१३)

यदि नामैवन्तथापि किन्न शब्दार्थो विचारणीय इत्याह (।) अर्थेत्यादि। **अर्थक्रियां** प्रत्य**समर्थस्य** शब्दार्थस्य **विचारैः** सदसत्त्वविचारै **किन्तद**[7]**र्थिनामर्थ**- 140a
क्रियार्थिना (।) निदर्शनमाह **षण्ढस्ये**त्यादि। पुस्त्वरहितस्य यद् **रूपवैरूप्यन्त**स्मिन् विषये **कामिन्या** मैथुनाभिलाषिण्या **किम्परीक्षया**। (२१३-१४)

न हीत्यादि विवरण। न हि **शब्दार्थोऽसन् कंचित पुरुषार्थमुपरणद्धि** निवर्त्तयति। **सन् वा समादधाति** करोतीति यथायोग सम्बन्धनीय। कि कारण (।) **यथाभिनिवेशं** पुरुषस्त[1] शब्दार्थम्बाह्यतयाऽभिनिविशतेऽध्यवस्यति तथा **तस्या**-

तस्मादयं प्रवर्त्तमानः सर्वदा[2] **भावाभावविचारेऽवधीरितविकल्पप्रतिभासोऽनपेक्षितो यत्रायं पुरुषार्थः प्रतिबद्धः (तद्) एव वस्तु अधिष्ठानीकरोति। यथाऽग्नौ शीतप्रतिघात इति।**

न हि अत्र शब्दार्थशक्ति[3]**रस्ति। तदनुभवाप्तावपि तदभावात्। तदयमर्थक्रियार्थी तदसमर्थं प्रति दत्तानुयोगो न युक्तः। न हि वृषस्यन्ती षण्ढस्य रूपवैरूप्य**[4]**परीक्षायामवधत्ते।**

घ. *कल्पितस्यानुपलब्धिः*

यत् पुनरेतदुक्तं निरूपणानुपलम्भो धर्म इति।

शब्दार्थः कल्पनाज्ञानविषयत्वेन कल्पितः ॥२१४॥
धर्म्मो वस्त्वाश्रयासिद्धि[5]**रस्योक्ता न्यायवादिना।**

कल्पनाविषयत्वाच्छब्दार्थ एव कल्पितः। तस्य हि वस्त्वाश्रयणानुपलम्भधर्म इत्यभिप्रायः।

सत्त्वादविद्यमानत्वात्। यथातत्त्वं वा समीहितत्वात्।

यथार्थस्वलक्षण ज्ञानस्वलक्षणम्वा स्थितन्तथा शब्देनाविषयीकृतत्वात्। यत एवन्**तस्मादयं** पुरुषस्सदसच्चिन्ताया **प्रवर्त्तमानः सर्वदाऽवधीरितविकल्पप्रतिभासोऽनपेक्षितविकल्पप्रतिभासो वस्त्वेवाधिष्ठानीकरो**[2]**ति** विषयीकरोति **यत्र वस्तुन्ययं पुरुषार्थः प्रतिबद्धः। अग्नावित्यग्निस्वलक्षणे। आविग्रहणाद् दाहपाकादि।**

स्यादेतद् (।) ईदृशोर्थः शब्दार्थेनापि साध्यत इत्याह। **न हीत्यादि। अत्रेति** शीतप्रतिघातादौ। कस्मात् **तदनुभवाप्तावपि।** तस्य शब्दार्थस्यानुभवाप्तावपि। **तदभावात्** तस्य शीतप्रतीकारादेरभावात्। **तत्** तस्मा**दयमर्थक्रियार्थी**[3] पुरुषः। **तदसमर्थन्तस्यामर्थक्रियायामसमर्थ** शब्दार्थं **प्रति दत्तानुयोगो** दत्तावधानो भवितुन्न **युक्तः। न हि वृषस्यन्ती** मैथुनमिच्छन्ती **षण्ढस्य** परिचरितुमशक्तस्य **रूपवैरूप्यपरीक्षायामवधत्ते**ऽवधानवती भवति।

उ द्यो त क रा द्युक्तदूषणनिरासार्थं पृच्छति। **यत्पुनरेतदुक्तमाचार्य दि ग्ना गेन** (।) **कल्पितस्ये**त्यादि। तस्य[4] कोर्थः।

उत्तरमाह। **शब्दार्थ** इत्यादि। **कल्पनाज्ञानविषयत्वाच्छब्दार्थः** प्रधानादिशब्दार्थः। **कल्पितो वस्तुनो** बाह्यस्य प्रधानलक्षणस्या**श्रय**णन्तेना**सिद्धि**रनुपलब्धिरस्य प्रधानादिशब्दार्थस्य धर्म **उक्तो** लिङ्गभूतो भावानुपादानत्वे साध्ये। **न्यायवादिना**चार्य दि ग्ना गे न।

६. आगम-चिन्ता

यदुक्तं प्रमाणत्रयनिवृत्तावपि न हि[6] वस्त्वभावासिद्धिरिति तदन्यप्रमाण-निवृत्तौ न स्यात्। तयोर्हि सकलविषयित्वाभावात्। अत्रागमो न किञ्चिद् व्याप्नोति। तन्निवृत्तिः यथा[7] न गमिकेति चेत्। उक्तमत्र आगमेषु सर्वार्थानुपयोग 484b
इति अप्रकरणापन्नत्वात्।

अपि च।

नान्तरीयकताऽभावाच्छब्दानां वस्तुभिस्सह ॥२१५॥
नार्थसिद्धिस्त[1]तस्ते हि वक्त्रभिप्रायसूचकाः।

यथाभावं न हि शब्दानां प्रवृत्तिः। यतस्तेभ्योऽर्थप्रकृतिर्निश्चीयेत। ते हि

तेन यदुच्यते उ द्यो त क रा दिभिः। यदि प्रमाणेन प्रधान सत्त्वेन क[5]ल्पित कथमस्यानुपलब्धिर्द्धर्मः प्रतीयते। अथासत्त्वेन कल्पित प्रधानन्तथापि कथमस्यानुपलब्धिर्धर्मोऽसत्त्वादिति (।)

तदपास्तं। यस्मात् **कल्पनाज्ञानविषयत्वाच्छब्दार्थ एव कल्पितः**। न तु प्रमाणेन बाह्य प्रधान सत्त्वेन कल्पित। **तस्ये**ति प्रधानशब्दार्थस्य **बाह्यप्रधान-वस्त्वाश्रयणानुलम्भ** इत्ययमभिप्राय आचार्य दि ग्ना ग स्य। (२१४–१५)

यदुक्तमित्यादि परः। प्र[6]माणत्रय प्रत्यक्षानुमानागमलक्षण। **अन्यप्रमाण-निवृत्ताविति** प्रत्यक्षानुमाननिवृत्तौ निवृत्तिर्देशादिविप्रकृष्टाना। **तयो**रिति प्रत्यक्षानुमानयोः। **न किञ्चिद् व्याप्नोति** सर्वमेव विषयीकरोति। तन्निनिवृत्तिरागमनिवृत्तिः।

उक्तमत्रेति सि द्धा न्त वा दी। **अप्रकरणापन्नत्वादिति** पुरुषार्थचिन्ताप्रप्रस्तावानुपयोगित्वात्। "**शास्त्राधिकारास**[7]म्बन्धा बहवोर्था" इत्यत्रान्तरे (१।२०१) 140b
उक्तत्वात्।

एतच्च बाह्येषु आगमस्य प्रामाण्यमभ्युपगम्योक्तम् (।)

अधुना नैव बाह्येर्थस्य प्रामाण्यमित्याह। **अपि चे**त्यादि। **वस्तुभिस्स्वलक्षणैस्सह**। शब्दा**नान्तरीयकताया** अविनाभावस्याभावात् तेभ्यः शब्देभ्यो **नार्थसिद्धिर्न बाह्यवस्तुनिश्चयः। यस्मात्ते हि वक्त्रभिप्रायसूचकाः।**

यद्यपि घटविवक्षातः पटशब्दस्योत्पत्ति[1]स्तथापि स्थानकरणाभिघातादेरेव साक्षात् करणात् तदुत्पत्तेर्व्यभिचाराभावान्नाहेतुकत्व (।) यश्च घटविवक्षाजन्य घटशब्दमवधारयति। तस्य पटशब्दात् पटविवक्षानुमानन्तदवधारण च प्रकरणादिना लोकस्य विद्यत एवेति विवक्षानुमानेऽव्यभिचार एव।

वक्तुर्विवक्षावृत्तित्वात तत्रान्त[2]रीयकतया तयैव गमका स्युः। पुरुषस्य सर्वोऽप्यभीष्टोर्थः न तथा भूतोऽस्ति चेत् तत्रानाश्रितस्वभावस्य हि नान्यो गमकः।

अथ[3] "आप्तवादाविसंवादसामान्यादनुमानता" इति आगमस्य अनुमानतैवोक्ता सा कथमिति चेत्। नायं पुरुष आगमप्रामाण्यमनाश्रित्य अस्तिं समर्थः। अत्यक्षफलाना प्रवृत्तिनिवृत्त्योर्महानुशंसापापयोः श्रवणात्, तद्भावे विरोधादर्शनाच्च।

तस्मात् सति प्रवर्त्तितव्ये एवं प्रवृत्त इति परीक्षया प्रामाण्य[5]माह। तच्च।

यथाभावं यथास्वलक्षण। **यत** इति यथाभाव प्रवृत्ते शब्देभ्योर्थ**प्रकृतिरर्थ**स्वभावो नि[2]श्चीयेत। **ते ही**ति शब्दा। विवक्षया वृत्तिर्येषान्ते तथोक्ता। **तत्रान्तरीयका** विवक्षानान्तरीयका। **तामेव** विवक्षा। सैव विवक्षा स्वलक्षणमन्तरेण न भवति (।) अतोस्त्येव शब्दानामर्थाव्यभिचार इत्याह। **न चेत्यादि। यथार्थं** यथावस्तु भवितु शील यासान्तास्तथोक्ता। क्षीणदोषस्य कृपालोर्यथार्थभाविनी सर्वा इत्याह। अर्थेऽप्रतिबद्धोपि शब्दार्थं गम[3]यिष्यतीति चेदाह। **न चेत्यादि।** तस्मिन् वस्तुन्यप्रतिबद्ध स्वभावो यस्य शब्दलक्षणस्य। अन्य यत्रासौ न प्रतिबद्ध.।

यदि बाह्ये वस्तुनि शब्दस्य नास्ति प्रामाण्य यत्तर्हीद**माप्तवादाविसम्वादसामान्यात्**। यो य आप्तवाद सोऽ**विसम्वादी**। यथा "क्षणिका सर्वे सस्कारा" इत्यादिकः। आप्तवादश्चायमत्यन्तपरोक्षेप्यर्थे तस्मादयमप्यवि[4]सम्वादीत्येवमाप्तवादस्याविसम्वादसामान्यादविसम्वादित्वादनुमानतेत्यागमस्य बाह्येर्थेनुमानत्व**मु**क्तमाचार्य दि ग्ना गे न।

तत्कथमित्यनेनाभ्युपेतबाधामाह। **नाय**मित्यादिना परिहरति। एतत् कथयति (।) नाचार्येण भाविक प्रामाण्य कथयता अनुमानत्वमागमस्योक्तमपि तु पुरुषप्रवृत्तिमपेक्ष्य। यस्मान्नायम्पुरुषः प्रवृत्तिकाम[5] **आगमप्रामाण्यमनाश्रित्यासितुं समर्थः**। किङ्कारण। **प्रत्यक्षं** परोक्ष फल येषान्तेषा केषाचित् **प्रवृत्तिनिवृत्त्योरिति** यथायोग सम्बन्ध। हिसादिचेतनाविषयाणा निवृत्ते स्वर्गादिफलत्वेन **महानुशंसाश्रवणात्**। हिंसाचेतनाविशेषाणा प्रवृत्तेर्नरकादिफलत्वेन महा**पापश्रवणत्वात्**। न चात्र वस्तुबलप्रवृत्तमन्यत्प्रमाण साधकम[6]स्ति येनागममनपेक्ष्यान्यत. प्रमाणम्प्रवर्त्तेत।

नापि बाधकमस्ति यतो निवर्त्तेत। बाधकाभावमेवाह। **तद्भाव** इति यथोक्ताभ्या प्रवृत्तिनिवृत्तिभ्यामिष्टानिष्टस्य फलस्य भावे **विरोधादर्शनाच्च** इच्छति चायमागमवशेन प्रवर्त्तितु तत् **सति प्रवर्त्तितव्ये**। (२१५–१६)?

सम्बद्धानुगुणोपायं पुरुषार्थाभिधायकम् ॥२१६॥
परीक्षाधिकृतं वाक्यं अतोऽनाधिकृतम्परम् ।

सम्बन्धो हि वाक्यानामेकस्मिन्नर्थ उपसंहारेणोपकारः । अन्यथा[6] **वक्तुर्वैगुण्यमुद्भावयेत्** । दश दाडिमादिवद् असम्बद्धमेव । **अशक्योपायफलानि** शास्त्राणि न हि फलार्थी आद्रियेत् विचारयितुम् । **अपुरुषार्थफलानि च** । **विषशमनार्थं तक्षक-चूड़ामण्यलंकरणोपदेशवत्** । **काकदन्तपरीक्षावच्च** ।

तद्विपर्ययेणोपसंहारवत् शक्योपायं[1], **पुरुषार्थवचन** शास्त्रं हि **परीक्ष्यते** । **अन्यत्र** अवधानस्यैव अन्याय्यत्वात् । तत् परीक्षायां तस्मिन् अविसंवादभाजि 485a

---

वरमेवमागमम्परीक्ष्य **प्रवृत्त** इत्यागमस्य **परीक्षया प्रामाण्यमाहा** चार्य[7] । 141a
न च सर्व शास्त्र परीक्षयाधिकृत । किन्तु **तच्चेत्यादि** शास्त्र । पदार्थानाम्परस्पर-**सम्बन्धात्** सम्बद्ध । **अनुगुणः** साधयितु शक्य फलसाधनो**पायो** यस्मिंस्तदनु-गुणोपाय सम्बद्ध च तदनुगुणोपाय चेति विशेषणसमास । एव भूतमपि यदि पुरु-**षार्थाभिधायकन्तदा परीक्षाधिकृतं वाक्यं** । अतो यथोक्तस्वभावादपरमन्यद्वाक्य-**मनधि**[1]**कृतम्परीक्षाया** ।

सम्बन्ध इत्यादिना व्याचष्टे । **वाक्यानाम**ङ्गाङ्गिभावे**नैकस्मिन्नर्थे** विधेय-प्रतिषेध्यलक्षणे **उपसंहारो** मीलनन्ते**नोपकारः** परस्पर वाक्याना सम्बन्ध । अनु-पकारक पुन केषामित्याह । **दश दाडिमे**त्यादि दश दाडिमानि षडपूपा कुण्ड-मजाजिन पललमित्येवमादीनि वाक्यानि । न ह्येषामेकार्थोपसहारोस्ति परस्प-रम[2]सम्बन्धात् । **अनयथे**त्यसम्बद्धत्वे **वक्तुः** शास्त्रकारस्य **वैगुण्य**मसम्बद्धा-भिधायित्व**मुद्भावयेत्** । अशक्योपायो येषा फलानन्तान्यशक्योपायानि । एव भूतानि फलानि येषा शास्त्राणान्तानि । **फलार्थी** पुमान्नाद्रियेत **विचारयितुं** । एत-च्चानुगुणोपायमित्येतस्य वैधर्म्येण विवरण ।

पुरुषार्थ फल येषा शास्त्राणा तानि तथोक्तानि । ततोन्या**न्यपुरु**[3]**षार्थ-फलानि** । तानि **च** नाद्रियेत विचारयितु ।

अशक्योपायफलस्योदाहरण । **विषे**त्यादि । एव ह्यस्य विष शाम्यति यदि **तक्षक**नागराजस्य कर्णावस्थितेन रत्नेनालङ्कार क्रियत इति । एतच्चाशक्य-**साधन** ।

अपुरुषार्थफलस्योदाहरण । **काकदन्तपरीक्षावच्चेति** ।

तद्विपर्ययेण तेषा यथोक्तानान्त्रयाणा विपर्ययेण**ोपसंहारवत्** । ए[4]**तेन सम्बद्ध**-मित्येतद् व्याख्यात । **शक्योपाय**मित्यनेनानुगुणोपायमिति । **अन्यत्रे**ति सम्बन्धादि-

प्रवर्त्तमानः शोभते।[2]

कः पुनरस्याविसंवादः ?—

प्रत्यक्षेणानुमानेन द्विविधेनाप्यबाधनं ॥२१७॥
दृष्टादृष्टार्थयोरस्याविसंवादः तदर्थयोः।

प्रत्यक्षाभिमतानां अर्थानां तथाभावः प्रत्यक्षेणाबाधनम्[3]**।**

यथा नीलादिसुखदुःखनिमित्तोपलक्षणरागादीनां बुद्धीनां। अतथाभूतानां चाप्रत्यक्षता। यथा शब्दा[4]**दिरूपसन्निवेशिनां सुखादीनां च। द्रव्यकर्मसामान्यादिवत्। तथा नागमापेक्षानुमानस्य विषयाभिमतानां तथा स्यात्। यथा चत्वारि**

त्रयरहिते। **अवधानस्यै**वेत्यादरस्य। **तदि**ति यथोक्तगुणत्रययुक्त शास्त्र **परीक्षायां** सत्या न विसम्वादभाग् भवति। **तस्मिन्नविसम्वादभाजि** शास्त्रे **प्रवर्त्तमानः** पुरुषः **शोभते।**

कः पुनरस्य शास्त्रस्या**विसम्वाद** इत्याह। **प्रत्यक्षे**णेत्यादि प्रथमोर्थः श[5]ब्दो वस्तुवचन। द्वितीयो विषयवचन। तेनायमर्थ.। दृष्टादृष्टयोर्वस्तुनोस्तदर्थयोः प्रत्यक्षानुमानविषययोर्यथाक्रम प्रत्यक्षेणानुमानेन च द्विविधेन वस्तुबलप्रवृत्तेनागमाश्रितेन चाबाधनमस्य शास्त्रस्याविसम्वाद·। (२१६–१७)।

प्रत्यक्षेत्यादिना व्याचष्टे। शास्त्रे **प्रत्यक्षाभिमतानाम्**प्रत्यक्षत्वेनोपगतानां**अर्थानान्तथाभावः** प्रत्यक्षभा[6]वः **प्रत्यक्षेणाबाधनं।**

यथेत्यादिना स्वसिद्धान्ते प्रत्यक्षाभिमतमर्थं पञ्च**स्कन्ध**सगृहीतन्दर्शयति। **नीला**दीत्यनेन रूपादीन् पञ्च विषयानाह। अनेन च रूपस्कन्ध उक्तः। सुख**दुःखे** इति वे द ना स्कन्धः। **निमित्तस्य** स्त्रीपुरुषादिचिह्नस्योपलक्षणं निमित्तोपलक्षण। अनेन स ज्ञा स्कन्धः। **रागादि**ग्रहणेन स स्का र स्कन्ध। आदिशब्दाद्
141b द्वेष[7]मोहा[8]दपरिग्रह.। **बुद्धि**ग्रहणेन वि ज्ञा न स्कन्ध। नीलादि च सुखदु खे च निमित्तोपलक्षण च रागादि च बुद्धिश्चेति द्वन्द्वः। एव शास्त्रे प्रत्यक्षाभिमताना प्रत्यक्षत्वमेव। नीलादीना चक्षुर्विज्ञानादिप्रत्यक्षत्वात् (।) सुखादीना स्वसम्वेदनप्रत्यक्षत्वात्। **अतथाभिमतानां** चाप्रत्यक्षाभिमता(ना) चार्थानाम**प्रत्यक्षता** (।) प्रत्यक्षेणावधानमिति प्रकृतेन सम्बन्धः[1]। **यथे**ति विषयोपदर्शन। शब्दादिरूपेण सन्निवेष्टु शील येषा सुखादीनान्तेषामप्रत्यक्षता। शब्दादिस्वभावाना सुखदु.खमोहाना प्रत्यक्षेणाप्रतीतेः

एतत् सा ख्य दर्शनप्रतिक्षेपेणोक्त।

वै शे षि का दि दर्शनप्रतिक्षेपेणाह। **द्रव्यं** द्विविध। अद्रव्य द्रव्य यथाका-

आर्यसत्त्यानि[5]। **तेषां अननुमेयानां तथाभावः, यथात्मादीनाम्। आगमापेक्षमनुमानमपि। रागादिरूपं तत्प्रभवं चाभ्युपगम्य तत्प्रहाणा**[6]**य स्नानाग्निहोत्रादेरनुपदेशवत्।**

सेयं शब्दपरिच्छेदस्य अशेषस्य विषयस्य विशुद्धिः अविसंवादः।

आप्तवादाविसंवादसामान्यादनुमानता ॥२१८॥

बुद्धेर[7]**गत्याभिहिता परोक्षेऽप्यस्य गोचरे।** 485b

तस्यास्य एवंभूतस्य दोषक्षयस्य अविसंवादसामान्याद्, वृष्टव्यभिचारस्य

शादि। अनेकद्रव्य च द्रव्य। यथावयवि द्रव्य। **कर्मो**त्क्षेपणादिक। **सामा**[2]**न्यं** सत्ता गोत्वादिक (।) **आदि**शब्दाद् विभागादिपरिग्रह।

न हि नीलादिविषय पच व्यतिरेकेणान्यस्य प्रत्यक्षतास्ति। तद्व्यतिरेकेणानुपलब्धे.। **वस्तुबलप्रवृत्तमनुमानमनागमापेक्षानुमानं**। तस्य **विषयत्वेनाभिमतानान्तथाभावो**नुमानविषयभावोनुमानेनाबाधक। **चत्वारि चा र्य सत्यानि**। उत्तरत्र प्रतिपादयिष्यते। **अननुमेयानान्त**[3]**थाभावो**ऽननुमेयत्वमनुमानेनाबाधन। **यथात्मादीनाम्** (।) आदिशब्दात् प्रधानेश्वरादिपरिग्रह। न ह्येषा किञ्चिल्लङ्गमस्ति येनानुमेया स्यु। एतदपि प्रतिपादयिष्यति। विशुद्धे विषयद्वये ( ) ऽत्यन्तपरोक्षे चागमविषये पौर्वापर्यविरोधेन यस्मिन् चिन्ता प्रवर्त्तयति तस्मि**न्नागमापेक्षमनुमानमपि**। अबाधनमिति प्रकृत।

कीदृशन्तदबाध[4]नमित्याह। **रागादिरूप** रागद्वेषमोहस्वभाव**मधर्ममभ्युपगम्य तत्प्रभवं** रागादिसमुत्थापित कायवाक्कर्म चाधर्ममभ्युपगप्य। **तत्प्रहाणाय** तस्याधर्मस्यापगमाय **स्नानाग्निहोत्रादे**:। तीर्थस्नानेन पापक्षयो भवति। यमुद्दिश्याग्नौ घृतादिक हूयते तस्य पापक्षयो भवतीत्येवमादे**रनुपदेशः**। आदिशब्दादुपवासादिपरिग्रह[5].। तथा हि न स्नानादि पापमपनयति (।) पापनिदानेन रागादिना विरोधाभावात्।

सेयमनन्तरोक्ताप्रत्यक्षेणानुमानेन द्विविधेन शक्यपरिच्छेदस्य शक्यनिश्चयस्या**शेषस्य विषयस्य** बाधालक्षणा। तस्यास्तावदस्या विसम्वादाद् **सामान्यात्**। यथा शक्यपरिच्छेदेर्थे **आप्तवादस्याविसम्वाद**स्तथात्यन्तपरोक्षेपि आप्तवादत्वादेव। ततश्चाप्तवादलक्षणा[6]ल्लिङ्गादुत्पन्नाया अविसम्वाद**बुद्धेरनुमानता**चार्य दि ग्नागे ना **भिहिता** (२१७–१८)

परोक्षेप्यर्थस्य गोचर इत्यत्यन्तपरोक्षेप्यस्य शास्त्रस्य गोचरे विषये। सा **चागत्या**भिहितान्येन प्रकारेणात्यन्तपरोक्षे प्रवृत्त्यसम्भवात्। सत्या प्रवृत्तौ वरमेव

प्रत्यक्षानुमानगम्येऽर्थे प्रतिपत्तेः; तदाश्रयत्वात्,[1] **तदन्यप्रतिपत्तिवत् अविसंवादेऽनुमेयम्।**

ततः शब्दप्रभवाऽपि शाब्दवत् नाभिप्रायमेव निवेदयति। अविसंवादाद् अनु[2]**मानमपि।**

अथवा प्रकारान्तरेण क्लेशप्रहाणाविसंवादात् अनुमानमेव वक्तव्यम्।

हेयोपादेयतत्त्वस्य सोपायस्य प्रसिद्धितः ॥२१९॥
प्रधानार्थाविसंवादादनुमानं[3] **परत्र वा।**

प्रवृत्त इति।

42a **तस्येत्यादि** विवरण। तस्यागमस्याचार्य दि ग्ना गे न निर्दिष्टानुमानभाव[7]-स्य। **अस्येत्यस्माभिस्सम्बन्धादनुगुणोपाय**मित्यादिना विचारितस्य। अत एवाह (।) **एवंभूतस्येति** सम्बन्धादिगुणयुक्तस्येत्यर्थ। प्रत्यक्षानुमानगम्ये तस्मिन् **वस्तुन्यविसम्वादसामान्याद**विसम्वादत्वात् कारणाद् **दृष्टव्यभिचारस्या**पवादस्य **प्रत्यक्षानुमानागम्येर्थे** विषये। आप्तवादादनुत्पन्नाया **प्रतिपत्ते**र्बुद्धेरविसम्वादोनुमीयते। क[1]स्मात् (।) **तदाश्रयत्वा**दाप्तवादाश्रयत्व चाचार्यपारम्पर्योपदेशात् सिद्ध। **तदन्यप्रतिपत्तिवत्**। अत्यन्तपरोक्षादन्यस्मिन् विषये प्रत्यक्षानुमानविषये प्रतिपत्तिवत्। **ततो** यथोक्तादाप्तवादा(द)त्यन्तपरोक्षेर्थे यथोक्तागमाश्रिता बुद्धि **शब्दप्रभवापि** सती शब्दादुत्पन्नापि। **शाब्दवदि**ति यथान्य शाब्द प्रत्ययोभिप्रायमात्र[2] निवेदयति। **तथा** नेय बुद्धि**रभिप्रायमेव निवेदयति**। एवकारस्य भिन्नक्रमत्वात्।

किन्तर्ही[4]ष्टस्य प्रत्यक्षानुमानागम्यस्यार्थस्यानन्तरोक्तेन न्यायेन**ाविसम्वादादनुमानमपि** प्रवृत्तिकामस्य पुसोभिप्रायवशात्। वस्तुतस्त्वननुमान शब्दानामर्थैस्सह सम्बन्धाभावात्।

अस्यैवार्थस्य ख्यापनार्थोऽपिशब्द प्रकारान्तरेणाप्त[3]वादाविसम्वाद दर्शयन्नाह। **अथवे**त्यादि। हेय सर्वन्दु ख। उपादेय **सर्वक्लेशप्रहाण**न्निर्वाण। तयोस्तत्त्वमविपरीत रूपन्दु खसत्यस्य निरोधसत्यस्य च। सह उपायेन यद् वर्त्तते हेयोपादेयतत्त्वन्तस्योपाय। **हेयस्योपाय** स मु द य सत्त्य। उपादेयस्योपादेय (? यो) मार्गसत्य। अस्य **हेयोपादेयतत्त्वस्य सोपायस्य** भ ग [4]व दृर्शितस्य वस्तुबलायातेन प्रमाणेन **प्रसिद्धितो** निश्चयत कारणात्। भगवद्वचने सत्त्यचतुष्टयलक्षणस्य प्रधानस्यार्थस्याविसम्वाद (।) सत्त्यचतुष्टयलक्षणोर्थ· प्रधानन्तदधिगमेन निर्वाणप्राप्ते.। तस्मात् **प्रधानार्थाविसम्वादात्**। भगवद्वचनादुत्पन्न ज्ञान **परत्रा**प्य-

हेयोपादेयोपायानां तदुपदिष्टानां वैपरीत्यमविसंवादः। यथा चतुर्णां आर्यसत्त्यानां वक्ष्यमाणया नीत्या। तस्यास्य पुरुषार्थोपयोगिनोऽभियोगार्हस्य[4] अविसंवादाद् विषयान्तरेऽपि तथात्वोपगमो न विप्रलम्भाय, अनुपरोधात्, वक्तुर्निष्प्रयोजनाभिधानवैफल्यात्।

तच्च तदुभयथाऽपि अनवकाशं[5] आगमस्यानुमानत्वमेवोपवर्णितम्। आगमात् प्रवृत्तौ प्रवर्त्तितव्यम्। तथा चेद् न खल्वेवमनुमानमनपायम्। अर्थेषु "नान्तरीयकताभावाच्छब्दानां" इत्युक्तम्।

पुरुषातिश[6]यापेक्षं यथार्थमपरे विदुः ॥२२०॥
इष्टोयमर्थः शक्येत ज्ञातुं[7] सोतिशयो यदि। 486a

यथार्थदर्शनगुणयुक्तः पुरुषो निःक्लेशः, तेन प्रणयनं हि अविसवाद इत्यन्ये। सर्व एव प्रेक्षापूर्वकारी प्रवृत्तिकामः आगमं अनागमं वाऽन्विष्यति न तु

त्यन्तपरोक्षेप्यर्थे**नुमानम्वा** शब्द पूर्वप्रकारापेक्ष[5] या विकल्पार्थ।

तयोर्हेयोपादेययोरुपायौ तदुपायौ। हेय चोपादेय च तदुपायौ चेति द्वन्द्व। **तेषान्तदुपदिष्टानान्तेनाप्तेनोपदिष्टाना मवैपरीत्यमनुमानेन** निरूप्यमाणानामविसम्वाद। **यथा चतुर्णान्दु** खादीना**मार्यसत्यानां** द्वितीये परिच्छेदे। **वक्ष्यमाणया नीत्या** विचारेण। **तस्यास्येति** भगवता[6] पूर्वनिर्दिष्टस्याधुना विभक्त त्वादस्य स त्य च तु ष्टयलक्षणस्य। किभूतस्य **पुरुषार्थोपयोगिनः**। पुरुषार्थो निर्वाण तत्रोपयोग कारणत्व स यस्यास्ति तथा। अत एवा**भियोगार्हस्याभ्यासार्हस्या विसम्वादाद विषयान्तरेपि** प्रत्यक्षानुमानागम्ये।[7] **तथात्वोपगम** इत्यविसम्वादोपगमो न विप्रलम्भाय। न विस[7]म्वादाय भवति। कि कारणम् (।) **अनुपरोधात्**। प्रमाणेनाबाधनात्। प्रधाने च सत्त्यचतुष्टयलक्षणेर्थे पुरुषमविसम्वाद्य पुनस्तृतीये स्थाने **वक्तुर्निष्प्रयोजनं** यद्वितथा**भिधानन्तस्य वैफल्यात्**। 142b

कदाचित् तत्राज्ञानादपि तथाभिधान स्यादिति चेदाह। **तदित्यादि**।**उभयथा** पीति श्लोकद्वयनिर्दिष्टेन प्रकारेण। तदेत**दागमस्यानुमान[1]त्वमगत्योपवर्णितमिति** सम्बन्ध.। अनुमानकारणत्वादनुमानमिति द्रष्टव्य। **आगमात् प्रवृत्तौ** सत्याम्वरमेवयुक्तादागमात् प्रवृत्तो न तु प्रमाणगम्य एवार्थे विसम्वादकादिति।

न खल्वेवमुक्तेनापि प्रकारेणागमाश्रये ज्ञानमनुमानमनपायं निर्दोष। कस्माद् (।) अनान्तरीयकत्वादसम्वादत्वा**दर्थेषु** शब्दानामिति निवेदितमेतन्नान्तरी[2]**यकताभावाच्छब्दानाम्वस्तुभिः सहे** (१।२१३) त्यादिना (।) **पुरुषस्यातिशयाः**

व्यसनेन। अपि नाम अतोऽनुष्ठेयं ज्ञात्वा प्रवृत्तः सन् अर्थवान् इति एवं शक्य-दर्शनाविसंवादप्रत्ययत्वात्, तदन्यत्राऽपि प्रवर्त्तेत एवंप्रायत्वात् लोकव्यवहारस्य।

(१) पौरुषयेत्वे

क, *पुरुषातिशयप्रणीतं वचनं प्रमाणम्*

पुरुषपरीक्षया पुनः प्रवृत्तौ प्रवृत्तिरेव न स्यात्। तस्य तथाभू[2]तस्य ज्ञातुम-शक्यत्वात् नानिष्टेः। तादृशां अवितथाभिधानात्।

तथा हि—

(अयमेवं) न वेत्यन्यो दोषानिर्दोषतापि वा ॥२२१॥
दुर्लभत्वा[3]त्प्रमाणानां दुर्बोधेत्यपरे विदुः।

क्षीणदोषादिकत्वन्तमपेक्ष्यते यद्वचनन्तद् **यथार्थमपरे** वादिनो **विदुर्जानीयु**ः। **यथार्थं** यथावस्तु व्यवस्थितन्तथैव दर्शन ज्ञान **यथार्थदर्शनं**। तदादिर्यस्य कृपावैराग्यादे-स्तद्**यथार्थदर्शनादि**। स एव **गुण**स्तेन युक्त **पुरुष** आप्तस्तेन **प्रणय**नन्तेनाप्तवच[3] नमागमस्या**विसम्वाद इत्यन्ये**। (२२०-२१)

इष्ट इत्यादि **सि द्धा न्त वा दी**। **योय**मनन्तरोक्तोर्थः स इष्टोस्माक। किन्तु **शक्येत ज्ञातुं** पुरुषनैयम्येन **योतिशयो** यथा दर्शनादिलक्षणस्य तु शक्य।

सर्व एवेत्यादिना व्याचष्टे। **सर्व एव प्रेक्षापूर्वकारी। आगममनागमम्वान्वेषते** निरूपयति। अनागमन्त्यक्त्वागमद्वारेण **प्रवृत्तिकामः**।[4] **न व्यसनेना**सक्तिमात्रेण। प्रवृत्तिकामता**मपि नेत्या**दिनाह। **अपिना**मेति कथन्नाम। **अत** इत्यागमा-**दनुष्ठेयं** साक्षात् कर्त्तव्यमर्थं **ज्ञात्वा प्रवृत्त**. सन्नर्थवान् फलवान् **स्याम्भवेयमिति**। सोन्वेषमाण पुरुष **शक्यं दर्शनं** निश्चयो यस्मिन्नर्थे प्रत्यक्षानुमानगम्ये तस्या-**विसम्वाद**ः प्रत्यक्षानुमानाभ्यामवधान। स एव प्रत्ययोव[5]लम्बनन्तेना**न्यत्रापि** प्रत्यक्षानुमानागम्येप्यर्थे **प्रवर्त्तेत**। कि कारणम् (।) एव**प्रायत्वाल्लोकव्यवहारस्य** (।) एवमित्येकदेशाविसम्वाददर्शनेनान्यत्र प्रवर्त्तन। **प्रायो** बाहुल्येन यस्मिन् लोकव्यवहारे स तथोक्त.।

पुरुषपरीक्षया पुन. प्रवृत्तावभ्युपगम्यमानाया **प्रवृत्तिरेव न स्यात्**। कि कारणं (।) तस्य पुस**स्तथाभूतस्य** यथार्थदर्शना[6] दिगुणयुक्तस्य। **नानिष्टेर**प्रवृत्तिरेव स्यादिति सम्बध्यते। तेनायमर्थो न पुनर्यथार्थदर्शनादिगुणयुक्ताना पुसामवितथा-भिधायित्वेनानिष्टेरप्रवृत्तिरेव स्यात्। कि कारणम् (।) **तादृशां** यथार्थदर्शनादि-गुणयुक्तानाम**वितथाभिधानात्**। यथावस्थितवस्तुप्रकाशकवात्।

143a किं पुन कारणन्तथाभूतः पुमान् ज्ञातुमशक्य इत्याह।[7] **तथा हीत्यादि। अयं पुमानेवन्दोषवान्। न वा**। एवन्दोषवान्। किन्तु निर्दोष **इत्येवमन्यदोषानिर्दोषतापि**

चैतसेभ्यो गुणदेशेभ्यो ये पुरुषाः (सम्यङ्मिथ्या)[1] **प्रवृत्तयस्ते चातीन्द्रियाः स्वप्रभवकायवाग्व्यवहारानुमेयाः**[2] **स्युः। व्यवहा(रा)श्च प्रायशो बुद्धिपूर्वमन्यथापि कर्त्तुं शक्यन्ते (।) पुरुषेच्छावृत्तित्वात्(।)तेषां च चित्राभिसन्धित्वात् (।) तदयं लिङ्गसंस्कारात् कथमनिश्चिन्वन् प्रपद्येत।**

अथ किन्नैवमेतादृशः पुरुषोस्ति यो निर्दोषः॥

सर्वेषां सविपक्षत्वान्निर्ह्रासातिशयाश्रिता॥ (२२२॥)

वा दुर्बोधेत्यपरे विदुः। निर्दोषतेत्येतदपेक्षया दुर्बोधेत्येकवचनेन स्त्रीलिगेन च निर्देश.। अन्यदोषा इत्येतदपेक्षया तु दुर्बोधा इति पुल्लिङ्गबहुवचनाभ्या विपरिणाम कर्त्तव्य.। कस्माद् (।) दुर्बोधत्वाद् दु.प्राप्यत्वादन्य[1]गुणदोषनिश्चायकाना **प्रमाणानां** (।)

चैतसेभ्य इत्यादिना व्याचष्टे। **सम्यग् मिथ्या** च प्रवृत्ति· कायवाक्कर्मलक्षणा येषा पुसान्ते तथा। चेतसि भवा· चैतसा गुणदोषा । चैतसेभ्यो गुणेभ्य कृपावैराग्यबोधादिभ्यो हेतुभ्य **सम्यक्प्रवृत्तयः** यथार्थप्रवृत्तय । चैतसेभ्यो दोषेभ्यो रागादिभ्यो मिथ्याप्रवृत्तायो विपरीतप्रवृत्त[2] यो भवन्ति। **ते चे**ति परेषा चैतसा गुणदोषाश्चेतोधर्मत्वेना**तीन्द्रियाः**। ततो न प्रत्यक्षगम्या । नाप्यनुमानगम्या अतीन्द्रियत्वादेव स्वभावलिङ्गस्यासिद्धे । किन्तु **स्वस्माद्** गुणदोषरूपात् **प्रभव** उत्पादो यस्य **कायवाक्कर्मण**ः। तेन कार्यलिङ्गेना**नुमेयाः**। तच्च नास्ति। यस्माद् **व्यवहाराश्च** कायवाक्कर्मलक्षणा **प्रायशो** वा[3] बहुल्येन। **बुद्धिपूर्व**मिति कृत्वा प्रतिसंख्यानेना**न्यथापि कर्त्तुं शक्यन्ते**। तथा हि सरागा अपि वीतरागवद् आत्मानन्दर्शयन्ति। वीतरागाश्च सरागवत्। कि कारण (।) **पुरुषेच्छावृत्तित्वाद्** व्यवहाराणा पुरुषेच्छया **वृत्तिः** प्रवृत्तिर्येषामिति विग्रह ।

यदि नाम पुरुषेच्छावृत्तयो व्यवहारास्तथापि किमित्यन्यथा क्रियन्त इत्याह। **तेषां चे**ति पुसा **चित्राभि**[4]**सन्धित्वाच्चित्राभिप्रायत्वात्** ततो यथेष्ट व्यवहारा प्रवर्त्तन्त इति नास्ति गुणदोषप्रभवाणा व्यवहाराणाम्विवेकनिश्चयः (।) **त**दिति तस्मादयमनुमाता पुमान् **लिङ्गसंकरा**ल्लिङ्गव्यभिचारा**दनिश्चिन्वन्** क्षीणदोष· **कथ**मागमस्य कर्त्तार **प्रतिपद्येत** नैवेति निगमनीय ।

अथ किमित्यादि। **यो निर्दोषो** रागादिदोषरहितस्तादृशः **पुरुष किन्नैवा**[5]**स्ति**। अस्तीति प्रतिपादयन्नाह। **सर्वेषामि**त्यादि। प्रतिपक्षसम्मुखीभावे निर्ह्रासमपचय

---

[1]The restoied text from first page up to here.

[2] Bva-ba-dañ. smras-pao = **क्रिया-वचन०**

सात्मीभावात्तदभ्यासाद्धीयेरन्नास्रवाः क्वचित्।

स तु प्रहीणाश्र(?स्र)वो दुर्ज्ञानः। दोषा हि निर्ह्रा[1]सातिशयधर्माणो विपक्षाभि(भ)वोत्कर्षापकर्षं साधयन्ति ज्वालादिवत्। ते हि विकल्पप्रभवाः सत्यप्युपादाने कस्यचिन्मनोगुणस्याभ्यासादपकर्षिणः। तत्पाटवे निरन्वयविनाशधर्माणः स्युः (।)

प्रतिपक्षासम्मुखीभावे चातिशयमुपचय श्रयन्ते ये रागादयस्ते **निर्ह्रासातिशयाश्रिताः**। तेषा **सर्वेषां विपक्षत्वात्**। यस्य च सम्मुखीभावासम्मुखीभावाभ्या निर्ह्रासातिशयम्भजन्ते स एव तेषा विपक्षो बाधकस्तेन सह वर्त्तत इति सवि[6]पक्ष। तद्भावस्तत्त्वन्तस्मात्। स बाधकत्वादिति यावत्। येन च बाधकेन दोषाणा सविपक्षत्वन्तस्य **बाधकस्याभ्यासात्** पुन. पुनर्नैरन्तर्येणोत्पादनाद् य **सात्मीभाव**स्तदौर्ज्जत्यन्तन्मयता। **तस्माद्** बाधकसात्मीभावा**द्धीयेरन्**। क्षीयरेन्। **आस्रवा**
143b रागागदय· **क्वचित्** सन्ताने सात्मीभूतदोषप्रतिपक्षे दोषाणा च बाधक नैरात्म्यज्ञानमिति प्रतिपादयिष्यति। तस्मान्न तथाभूत पुरुषो नेष्यते एतावत्तु ब्रूमः **स तु क्षीणास्रवो दुर्ज्ञान** इति।

दोषो हीत्यादि विवरण। **दोषा हि** रागादय। किभूता (।) **निर्ह्रासातिशयधर्माणः**। अपकर्षोत्कर्षस्वभावा. सन्तो **विपक्षाभिभवोत्कर्षं** विपक्षकृतो योभिभव[1]स्तिरस्कारस्तस्योत्कर्षापकर्षं **साधयन्ति** गमयन्ति। तेनायमर्थं (।) निर्ह्रासधर्माण विपक्षाभिभवोत्कर्षं साधयन्ति **बाधकाभिभवो**त्कर्षेण दोषाणा निर्ह्रासात् अतिशयधर्माणो बाधकाभिभवापकर्षं साधयन्ति। बाधकाभिभवमान्द्येन तेषामतिशयधर्मत्वात्। **ज्वालादिवत्**। आदिशब्दाच्छीतोष्णस्पर्शादिपरिग्रह। यथा ज्वालादयो बाधकस्योदकादेरुत्कर्षापकर्षे सति निर्ह्रासातिशयधर्माणो यथाक्रममुदकाद्यभिभवोत्कर्षं साधयन्ति तद्वत्।

ननु च बाह्यार्थप्रतिबद्धा रागादय· बाह्य च वस्तु नित्य सन्निहितमेव (।) तत्कथ रागादीनामुच्छेद इत्यत आह। ते हीत्यादि। हिशब्दो यस्मादर्थ.। **ते** रागादयो **विकल्पप्रभवाः**। विकल्पादयोनिशोमनस्कारलक्षणात् प्रभव उत्पाद एषामिति विग्रह.। तथा ह्ययोनिशोमनस्कारमन्तरेण **सत्यपि** बाह्येर्थे नोत्पद्यन्ते रागादय तत्सम्मुखीभावे च विनाप्यर्थेनोत्पद्यन्त इति विकल्पप्रभवा रागादय। तत: सत्य-**प्युपादाने** यथोक्तलक्षणे। अनादरविवक्षाया चेय सप्तमी। **कस्यचित् मनोगुणस्य नैरात्म्यदर्शनलक्षणस्याभ्यासात्**। **अ[4]पकर्षिणः** अपचयवन्तो भवन्तीत्यर्थ·।

एतदुक्तम्भवति। यद्यपि तावद् दोषनिदानस्य सर्वदा नोच्छेद. प्रतिपक्षस्यात्यन्तपाटवाभावात् (।) तथापि प्रतिपक्षाभ्यासात् मन्दीकृतसामर्थ्यादुपादानाद् अपकर्षिण. क्षामक्षामतरा दोषा भवन्तीत्यनेन च हेतुरुक्त.। यदा तु यथोक्तस्य

ज्वालाविवत् (।) **तेन स्यादपि नि(र्)दोषः** (। २२४)

कथं निर्दोषो नाम (।) **यावता दोषविपक्षसात्मत्वेपि दोषसात्मनो विपक्षोत्पत्तिवत्। यथा प्रत्ययं दोषोत्पत्तिरपि** (।) **नायं दोषः** (।) **यस्मात्**(।)

नि[2]रुपद्रवभूतार्थस्वभावस्य विपर्ययै (:॥२२३॥)

न बाधा यत्नवत्त्वेपि बुद्धेस्तत्पक्षपाततः।

मनोगुणस्य भावनाप्रकर्षपर्यन्तवर्त्तितया पाट[5]व जातन्तदा **तत्पाटवे**। तस्य मनोगुणस्य पाटवे सति। अन्वय क्लेशबीजमन्वेत्युत्पद्यतेऽस्माद्दोष इति कृत्वा (।) निर्गतोन्वयो यस्मिन् विनाशे स निरन्वयविनाश (।) स धर्मो येषान्दोषाणान्ते **निरन्वयविनाशधर्माणः**। वासनया सह विनाशधर्माण इत्यर्थ। **ज्वालाविवत्**। यथा ज्वालादय प्रतिपक्षस्योदकादेरुत्कर्षे सत्यत्यन्तविनाशधर्माणस्तद्वत्। प्रयोग पुन (।) ये यदुपधानादपकर्षिणस्ते तदत्यन्तवृद्धौ तदभिभवान्निरन्वयविनाशधर्माण। तद्यथा ज्वालादय सलिलाभिभववृद्धौ। नैरात्म्यदर्शनोपधानाच्चापकर्षधर्माणो दोषा इति स्वभावहेतु।

यत एवन्**तेन** कारणेन **स्यादपि** कश्चिन्**निर्दोषः**। **कथमित्यादि** पर। **यावतेत्ययन्निपातो य**[7]**देत्यस्मिन्नर्थे** वर्त्तते। **दोषसात्मनो विपक्षोत्पत्तिवदिति** 144a
चानादिकालाभ्यासात्। दोषसात्मन पुस विपक्षोत्पत्तिर्नैरात्म्यदर्शनोत्पति। एवन्**दोषविपक्षस्य** नैरात्म्यदर्शनस्य **सात्मत्वेपि यथाप्रत्ययं**। **यथा**कारणसन्निधानन्**दोषोत्पत्तिरपि** स्यात्।

नायमित्या चार्य। सर्वसासारिकोपद्रव[1]रहितत्वान्निरुपद्रव। भूतविपरीतमनित्यादिस्वलक्षणमर्थो विषयोस्येति भूतार्थ। भूतार्थग्रहणादेव च मार्गश्चित्तस्वभाव। निरुपद्रवश्चासौ भूतार्थश्चेति **निरुपद्रवभूतार्थस्तथाभूतश्चासौ स्वभावश्चेति** कर्मधारयगर्भ एव कर्मधारयसमास निरुपद्रवस्य भूतार्थस्य भूतार्थत्वेनाभ्यासात् सात्मीभावगते (।) अनेन च चित्त**स्वभाव**[2]**स्य** दोषप्रतिपक्षस्य **विपर्ययैर्यथोक्तात्** त्रयाद् विलक्षणै सोपद्रवैरभूतार्थैरस्वभावैश्च दोषै**र्न बाधनं**। सात्मीभूत मार्गमभिभूय न दोषाणामुत्पत्तिरित्यर्थ। किङ्कारण (।) **यत्नवत्त्वे पीत्यादि**। एतदाह। सात्मीभूतस्य मार्गस्य दोषोत्पादनाय यत्न एव न सम्भवति।

तथाप्यभ्युपगम्योच्यते (।) दोषोत्पादने यत्नवत्त्वे **बुद्धेस्तत्पक्षपाततः**। तस्मि[3]न् दोषप्रतिपक्षभूते गुणवति नैरात्म्यमार्गे। पक्षपातेन बहुमानत। दोषो-

---

[1] Bam-po bdun-pa-**सप्तममान्हिकम्**।

न हि स्वभावोऽयं तेन विना निवर्त्तयितुं शक्यः। श्रोत्रियकापालिकघृणावत्। यत्नश्च प्राप्यनिवृत्तयोः स्वभावयोर्गुणदोषदर्शनेन क्रियेत। तच्च विपक्षसात्मनः पुरुषस्य दोषेषु न संभवति। तस्य निरुपद्रवत्वाद् (।)

अशेषदोषहानेः। पर्यवस्थानजन्मप्रति[3]बद्धदुःखप्रविवेकात् प्रशमसुखरसस्यानुद्वेजनाच्चाभूतार्थं खल्वप्युपादानबलभाविसन्तानस्य विपर्ययोपादानान्न स्यात् न भूतार्थं (।) वस्तुबलोत्पत्तेः (।)

त्पादने यत्नन्निवर्त्त्य। गुणपक्षपातेन दोषप्रतिपक्ष एव यत्नाधानादिति यावत्।

स्वभावपदमेव तावदादौ व्याचष्टे। **न हि स्वभावो** नैराप्म्यदर्शनलक्षण प्रतिपक्षसात्मनि व्यवस्थितेन पुरुषेण। **अयत्नेन** प्रयत्नेन **विना निवर्त्तयितुं शक्यः श्रोत्रि[4]यकापालिकघृणावदिति**। य श्रोत्रियं सन् कापालिको भवति तस्य श्रोत्रियावस्थाया या घृणा सा यथा यत्नमन्तरेण न शक्यते निवर्त्तयितुन्तद्वत्। मार्गस्वभावनिवर्त्तनाय **यत्नश्च** क्रियमाण। **प्राप्यस्य** रागादिस्वभावस्य **गुण**दर्शनेन **निवर्त्त्यस्य** विपश्यनास्वभावस्य **दोषदर्शनेन क्रियेत। तच्च** दोषदर्शन **विपक्षसात्मन** दोषप्रति[5]पक्षसात्मन **पुंसो** दोषप्रतिपक्षेन **सम्भवति**। तथा तच्च गुणदर्शनम्विपक्षसात्मनो **दोषेषु** न सम्भवति।

कस्मात् पुन· प्रतिपक्षे दोषदर्शनन्न सम्भवतीत्याह। तस्येत्यादि। **तस्य** प्रतिपक्षस्य **निरुपद्रवत्वात्**। त्रिविधो ह्युपद्रवो यस्याभावान्निरुपद्रवो मार्ग। तथा हि चित्तम्विबद्धु हेतुर्दोषोपद्रवो यैश्चित्तम्विबद्धम्भूतार्थदर्शने न प्रवर्त्तते।[6] कायचित्तव्यथाहेतुर्दुःखदौर्मनस्योपद्रव·। सास्रवसुखस्याप्रशान्ततया तदुपभोगे **वै**रस्योद्वेगश्च।

तत्र प्रथमस्योपद्रवस्याभावमाह। **सर्वदोषहानेरिति**। सर्वस्य रागादिदोषस्य हानेर्विगमात्।

पर्यवस्थानेत्यादिना द्वितीयस्याभावमाह। रागादिसम्मुखीभाव पर्यवस्थान
144b च जन्म च **पर्यवस्थानजन्मनी**।[7] तयोर्यत्**प्रतिबद्धन्दुःखन्तस्य विवेकात्**। रागाद्युत्पत्तिकाले यद् दुःख कायचित्तपरिदाहलक्षणन्तत्पर्यवस्थानप्रतिबद्धजातिजराव्याध्यादिदुःखन्तु जन्मप्रतिबद्धं।

ततीयस्योपद्रवस्याभावमाह। प्रशमेत्यादि **प्रशमो** रागादिविरहलक्षण निर्वाण। तस्मिन् यत्**सुख**मनास्रवन्तस्य **रस** अस्वादस्तस्यानुद्वेजनात्। अवैमुख्यकरणात्। **अभूतार्थ**मभ[1]तविषय **खल्वपि** रागादि। न स्यादिति सम्बन्धः।

यद्यभूतार्थं कथन्तर्हि तस्योत्पत्तिरित्याह। **उपादानबलभावी**ति वितथविकल्प-

अभूतार्थश्च दोषा न प्रतिपक्षसात्म्यवाचिनः। तस्मात् पुनर्न दोषोत्पत्ति(र्) यत्नेपि बुद्धेर्गुणपक्षपाते (न) प्रतिपक्ष एव यत्नाधानात् परीक्षावतो विशेषेणा-दुष्टात्मनः।

ख. *सत्कायदर्शनं दोषकारणम्*

कः पुनरेषां दोषाणां प्रभवो यत्प्र[4]तिपक्षाभ्यासात् प्रहीयन्ते॥

सर्व्वासां दोषजातीनां जातिः सत्कायदर्शनात्। (।२२४॥)
साविद्या तत्र तत्स्नेहस्तस्माद् द्वेषादिसम्भवः।

न हि नाहं न मम इति पश्यतः परिग्रहमन्तरेण क्वचित् स्नेहः। न चाननुरा-

---

वासनाबलभावि। तदेवभूतरागादिबीजाश्रयस्य विज्ञान**सन्तानस्य विपर्ययो-पादानात्** रागादिविपर्ययलक्षणस्य प्रतिपक्षस्य परिग्रहान्न स्यान्नोत्पद्येत। न तु **भूतार्थम**विपरीतविषय **न** भवेत्। किन्तु भवे[4]देव। किं कारणम् (।) **वस्तुबल-प्रवृत्तेः**। यथावस्थितवस्तुसामर्थ्येनोत्पत्तेः। दोषसात्म्येपि तावत् स्थितस्य। प्रमाणान्यनित्यादिभताकारग्राहीणि। प्रतिपक्षमर्गमावहन्ति। (२२२–२३)

किं पुनर्विपश्यना सात्मनि स्थितस्य। **अभूतार्थश्च** दोषा रागादयः। आत्मात्मीयाध्यारोपितेर्थे प्रवृत्ते। ते **प्रतिपक्षस्य** भूतार्थस्य यत् **सात्म्य** स्वभावत्वन्तस्य **वा[3]चिनो** न भवन्ति। यत एवन्त**स्मान्न पुनः** प्रहीणदोषाणा **दोषोत्पत्तिः**। दोषोत्पादन**यत्नेपि बुद्धेर्गुणपक्षपातेन** कारणेन रागादि**प्रतिपक्ष एव यत्नाधानात्** प्रयत्नस्य करणात्। कस्य **परीक्षावतो** युक्तचा विचारकस्य दोषसात्म्येपि तावत् स्थितस्य। **विशेषेण**ातिशयेन गुणेष्वेव यत्नाधान**मदुष्टात्मनः** प्रतिपक्षसात्मनि स्थितस्य[4]।

कः पुनरेषान्दोषाणां प्रभव उत्पत्तिकारण। प्रभवत्युत्पद्यतेस्मादिति कृत्वा। **यस्य** दोषहेतो· **प्रतिपक्षाभ्यासेन प्रहीयंते।**

उत्तरमाह। **सर्वासामि**त्यादि। **दोषजातीनान्**दोषप्रकाराणा **जाति**रुत्पत्ति **सत्कायदर्शनात्**। आत्मात्मीयाभिनिवेशात्।

ननु चाविद्याहेतुकाः क्लेशा आगमे उक्तास्तत्कथ न व्याघात इत्याह। **साऽविद्येति** सैव[5] **सत्कायदृष्टि**रविद्या। ततो नास्ति विरोध·। केन पुन· क्रमेण दोषाणा सत्कायदर्शनादुत्पत्तिरित्याह। **तत्रेत्यादि। तत्रात्मात्मीयत्वेनाभिनि(वि)**ष्टे विषये। **तत्स्नेहः**। आत्मात्मीयस्नेहः। **तस्मादात्मात्मीयस्नेहात् द्वेषादिसम्भव** इति क्रम :।

न हीत्यादिना व्याचष्टे। **नाह**मित्यात्माकारप्रतिषेध.। **न ममेत्यात्मीयाकार**स्य। अनात्माकारेण नात्मीयाकारेण च **पश्यतः** पुरुषस्य। **परिग्रहमन्तरेणेति।**

गिणः क्वचिद् द्वेषः। आत्मात्मीयानुपरोधिन्युपरोधप्रतिघातिनि च तदभावात्। तस्मात् समानजातीयाभ्यासजमात्मदर्शनमात्मीयग्रहं प्रसू[5]ते। तौ च तत्स्नेहं स द्वेषादीनिति। सत्कायदर्शनजाः सर्वदोषाः। तदेवाज्ञानमित्युच्यते।

मोहो निदानं दोषाणामत एवाभिधीयते ॥ (२२५॥)
सत्कायदृष्टिरन्यत्र तत्प्रहाणे प्रहाणतः।

मोहं दोषनिदानमाह (।) अमूढस्य दोषानुत्पत्तेः। पुनरन्यत्र सत्कायदृष्टिः। तच्च तत् प्रधाननिर्देशे सति स्यादनेकजन्मता दोषाणां[6] एकोत्पत्तिविरो(धा)त्। न

आत्मात्मीयत्वेन तदनुग्राहकत्वेन परिकल्प्य ग्रह. तेन विना **न क्वचित्** विषये **स्नेहः**। **न चाननुरागिणः** आत्मात्मीयादिस्नेहरहितस्य **क्वचिद् द्वेषः**। अनुनय-
145a मन्तरेण तस्याभावात्। किङ्कारणम् (।)**आ[7]त्मात्मीये**त्यादि। **आत्मात्मीययो-रनुपरोधिन्य**प्रा.तिकूलवर्त्तिनि। उदासीनपक्षे। **तदभावात्** तस्य द्वेषस्याभावात्। उपरोध**प्रतिघातिनि** चेति। आत्मीयत्वेन गृहीतस्य य उपरोध· पीडा। तत्**प्रतिघातिनि** तत्प्रतिषेध कुर्वति। मित्रपक्षे **तदभावात्**। द्वेषाभावात्। कित्वा-त्मात्मीयस्नेहविषयभूतविरोधेन। य· स्थित प्र[1]तिकूलवर्त्ती। तत्रैव द्वेष.। **तस्मा-न्नात्मात्मीयस्नेहमन्तरेण** द्वेष इति। **तस्मा**दित्यादिना निगमन। यत एवन्त**स्मात्तौ** चेति। **आत्मदर्शना**त्मीयग्रहौ। **स्नेह प्रसुवाते** इति वचनविपरिणामेन सम्बन्ध। **स च स्नेहो द्वेषादीन् प्रसूते** जनयति।

तयोस्तर्ह्यात्मदर्शनात्मीयग्रहयो को हेतुरित्याह। **समाने**त्यादि। **समान-जातीयन्त[2]देवात्मदर्शनन्तस्याभ्यास** पौन पुन्येनादिकालमुत्पत्तिः। तद्वासना च। तस्माज्जा**तमात्मदर्शन**मात्मीयग्रह प्रसूते। तस्मात् **सत्कायदर्शनजाः सर्वे क्लेशाः**। (२२३-२४)

तदेव च सत्कायदर्शनम**ज्ञान**मविद्येत्युच्यते सिद्धान्ते।

येनैव सत्कायदर्शनमेवाऽविद्याऽत **एव** कारणात् **मोहोनिदानं** प्रधानकारण-**न्दोषाणां** रागादीना**मभिधीयते**[3] सू त्रा न्त रे[1]—"अविद्याहेतुकाः सर्वक्लेशा" इति **सत्कायदृष्टि**र्दोषाणा निदानम**न्यत्र** सूत्रान्तरेभि धीयते। कस्मात्। **तत्प्रहाणे** सत्कायदृष्टे प्रहाणे दोषाणा **प्रहाणतः**। "**मोहन्दोषनिदानं**" दोष कारणमाहुर्बुद्धा भगवन्त·। कस्माद् (।) **अमूढस्याज्ञान**रहितत्य **दोषानुत्पत्तेः पुनरन्यत्र** प्रदेशे **सत्कायदृष्टि**न्दोषनिदानमाहु। **तच्चैत[4]त्का**रणत्व मोहस्य सत्कायदृष्टेश्च **प्रधान-**

---

[1] **बुद्धवचने**

च द्वयोः प्राधान्ये एकैकनिर्देशः परभागभाक्। उभयथाप्येकस्य निर्देशे न विरोधः। प्राधान्यं पुनस्तदुपादानत्वेन। तत्प्रहाणे दोषाणां प्रहाणात्। तस्मात् सम्भवति सत्कायदर्शनजन्मनां दोषाणां तत्प्रतिपक्षनैरात्म्यदर्शनाभ्यासात् प्रहाणं।

७—अपौरुषेय-चिन्ता

(१) सामान्येन निरासः

गिराम्मिथ्यात्वहेतूनां दोषाणां पुरुषाश्रयात्॥ (२२६॥)
अपौरुषेयं सत्यार्थमिति केचित् प्रचक्षते।

हेतु**निर्देशे सति स्यान्न** हेतुमात्रनिर्देशे। किं कारणम् (।) **अनेकस्मादिन्द्रियविषयो-ऽयोनिशोमनस्कारकलापाज्जन्म** येषान्दोषाणान्तेषा**मेकस्मात्** मोहात् सत्कायदृष्टे-**श्चोत्पतिविरोधात्**। तस्मादन्यकारणसम्भवेपि प्राधान्य गृहीत्वा मोहसत्काय दृष्टच्चो. कारणत्वमुक्तमिति गम्यते।

यदि चान्यो मो[6]होन्या च सत्कायदृष्टिस्तयोश्च प्राधान्यन्तदा **न च द्वयो**-र्मोहसत्कायदृष्टच्चो. **प्राधान्ये** सत्ये**कैकनिर्देशः**। क्वचित् मोहस्यैव निर्देश क्वचित् सत्कायदृष्टेरेवेत्यर्थ.। न **परभागभाक्** शोभाभाक् वक्तुरकौशलमेवावहतीति यावत्। यदा पुनरनयोर्न स्वभावभेदः। तदा मोहशब्देन सत्कायदृष्टिशब्देन **चोभयथाप्येकस्यार्थस्य** पर्यायेण **निर्दे[6]शेन न विरोधः** प्राधान्यस्य। **प्राधान्यं पुन**-स्सत्कार्यदर्शनस्य **तदुपादानत्वेन** दोषाणामुपादानत्वेन(।) तच्चानन्तरमेव प्रति-पादित। प्रतिपादयिष्यते च द्वितीये परिच्छेदे।

तस्य च सत्कायदर्शनस्य **प्रहाणे** सति **दोषाणां प्रहाणतः** प्राधान्य। यत एवन्**तस्मात् सम्भवति सत्कायदर्शनाज्जन्म** येषान्**दोषाणान्तेषा तस्य** सत्काय- 145b
दर्शनस्य **प्रति[7]पक्षो नैरात्म्यदर्शनन्तस्याभ्यासात् प्रहाणं**।

स च क्षीणदोषः पुमानौद्देशिको **दुरन्वयो** दुर्बोधो **यदुपदेशाद्** यस्य क्षीण-दोषस्योपदेशा**दयं** प्रवृत्तिकाम· **प्रतिपद्येत**। तेनोपदिष्टमर्थमनुतिष्ठेत् ॥०॥ (२५)

मा भूत् पुरुषाश्रयं पुरुषहेतुकम्**वचनमागमः**। किं कारणम (।) अनन्तरोक्तेन न्यायेनागम**प्रणेतुर्दुरन्वयत्वात्**। दुर्बोधत्वात्।

गिराम्वचसा मिथ्यात्वस्य मृषार्थत्वस्य ये **हेतवो दोषा** रागादयस्**तेषां**(।) कर्त्तरि चेय षष्ठी। आश्रयणमाश्रय·। **पुरुषस्याश्रय** इति समास·। पुरुषशब्दाच्च कर्मणि षष्ठी। न चोभयप्राप्तौ कर्मणीति नियम.। शेष विभा[8]षेति विकल्पनात्।

स तु क्षीणदोषो दुरन्वयो यदुपदेशाद[7]यं प्रीतपद्यते। मा भूत् पुरुषाश्रयं वचनमागमः प्रणेतुर्दुरन्वयात्।

तेनायमर्थो(।) मिथ्याहेतुभिर्दोषै पुरुषपरिगृहीतत्वादिति।

अथवा दोषाणा[2]मिति कर्मणि षष्ठी दोषाणा पुरुषेणाश्रयात् परिग्रहात्।

अपौरुषेयम्वचस्सत्यार्थम्मिथ्यात्वहेतोर्दोषस्याभावादिति केचित् मी मा स का **आचक्षते।**

एतदुक्तम्भवति। त्रिविधमप्यप्रामाण्यम्मिथ्यात्वाज्ञानसऊशयलक्षणे वादे नास्त्येव। यत शब्दाना द्विविध· स्वभावो निसर्गसिद्ध औपाधिकश्च तत्र निसर्गसिद्धो यो यथार्थप्रतिपादकत्वम् (।) अयथार्थप्रतिपादकत्व पुन[3]रौपाधिकः। स्वभाव· पुरुषाधीनत्वात्। तदाह।

"शब्ददोषोद्भवस्तावद् वक्त्र्यधीन इति स्थित।
तदभावः क्वचित् तावद् गुणवद्वक्तृकत्वत·। (६२)
तद्गुणैरपकृष्टाना शब्दे सक्रान्त्यसम्भवात्।
यद्वा वक्तुरभावेन न स्युर्दोषा निराश्रया" इति[1] (६३)

तेन वे दे पुरुषनिवृत्तौ मिथ्यात्वनिवृत्ति। नाप्यनुत्पतिलक्षणमप्रामाण्यम्वेदादर्थावगते.। नापि स[4]शयलक्षणमप्रामाण्य वेदादर्थगतौ सशयस्याप्रतिभासनात्। तदाह।

"एवभूतस्य वेदस्य ज्ञानोत्पत्ति च कुर्वतः।
स्वरूपविपरीतत्वसशयौ भाष्यवारितावि"ति॥[2]

यतश्चाप्रामाण्य त्रयन्निवृत्त। निसर्गसिद्धश्च ययार्थप्रतिपादनलक्षणः स्वभावो वेदस्यास्ति तस्मात् स्वत एवास्य प्रामाण्यमर्थप्रतिपादकत्वात। यतश्च शब्दे व[5]क्तृदोषेण बाधदुष्टकारणत्वलक्षणस्य दोषस्य सम्भवस्तेन वेदे पुरुषनिवृत्तौ दोषनिवृत्ते. स्वत.। प्रामाण्यापवादकयोर्बाधकारणदुष्टत्वज्ञानयोर्निवृत्तेर्नाप्रामाण्याशङ्का। तदाह।

[1] "तत्रापवादनिर्मुक्तिर्वक्त्र्यभावाल्लघीयसी।
वेदे तेनाप्रमाणत्व नाशङ्कामपि गच्छति। (६८)
प्रामाण्य पौरुषेये तु प्रमाणान्तरभावतः।

---

1. Ślokavārtika, Choda. 2. Ibid.

न खलु सर्व एवागमः संभाव्यविप्रलम्भो विप्रलम्भहेतूनां दोषाणां पुरुषाश्रयाद् (।) अपौरुषेयं सत्यार्थमित्येके। कारणाभावो हि कार्याभावं साधयतीति। एवंवादिनः तानेव[8] प्रति।

१. पूर्वपक्षनिरास :—

गिरां सत्यार्थहेतूनां गुणानां पुरुषाश्रयाद् ॥ (२२७॥)
अपौरुषेयं मिथ्यार्थं किन्नेत्यन्ये प्रचक्षते।

तदभावे तु तद्दुष्येद् वैदिक न कदाचन।
तेनेतरप्रमाणैर्या चोदनानामसगति :।
तयैव स्यात् प्रमाणत्वमनुवादत्वमन्यथा।
चोदनार्थान्यथाभाव कुर्वतश्चानुमानत ।
तज्ज्ञानेनैव यो बाध : स कथ विनिवार्यते। (८९)
तन्मिथ्यात्वादबाधश्चेत् प्राप्तमन्योन्यसश्रय।
नानुमानादतोन्यद्धि बाधक किचद[7]स्ति ते।" (९०) 146a

न चान्याप्रमाणैर्वेदार्थस्याग्रहेऽभावो रसादिवत्। अथ रसादेरपरया रसबुद्धया ग्रहात् पूर्विकाया रसबुद्धे प्रामाण्यम्वेदार्थेप्येवम्भविष्यति। तदाह ॥

"न चान्यैरग्रहेर्थस्य स्यादभावो रसादिवत्।
तद्धियैवार्थबोधश्चेत्तादृग्धर्मे भविष्यति।
ममासिद्धमितीद चेद् वेदाज्जातेऽवबोधने।
वक्तुन्न द्वेषमात्रेण युज्यते सत्यवादिने"ति। (९१,९२)

न खल्वित्यादिना कारिकार्थमाचष्टे। **सर्व एवेति** पौरुषेयो[1]ऽपौरुषेयश्च। **सम्भाव्यविप्रलम्भः** सम्भाव्य अशकनीयो विप्रलम्भो विसम्वादोस्येति। किन्तु पौरुषेय एव सम्भाव्यविप्रलम्भ.। **विप्रलम्भहेतूना** विसम्वादहेतूनान्**दोषाणां पुरुषाश्रयात्**। (२२७)

यत्पुनर**पौरुषेयन्तत्सत्यार्थमित्येके**। यस्माद् वेदेषु मिथ्यात्व**कारणाना** पुरुषाणाम**भावः कार्यस्य** मिथ्यात्वस्य**ाभावं** साधयतीत्यपौरुषेय सत्यार्थमिति[2] (।)

य **एवम्वादिनस्तानेव** मी मा स का न **प्रत्यन्ये प्रचक्षते**। परमुखेन (? न) शास्त्रकार एवाह। **गिरां सत्यत्वस्य** ये **हेतवो गुणास्तेषां पुरुषाश्रयादपौरुषेयेषु** वाक्येषु पुरुषनिवृत्त्या सत्यत्वकारणस्य गुणस्य निवृत्ते· कार्यस्यापि सत्यत्वस्य **निवृत्तिरित्यपौरुषेयम्वाक्य मिथ्यात्वं किन्न** भवति।

(१) एतदुक्तम्भवति। शब्दे सत्यत्त्वमिथ्यात्वयोः पुरुषायत्तत्वा[3]द् यदि

पुरुषनिवृत्तौ सत्यार्थत्वमिष्यते मिथ्यार्थत्व किन्नेष्यत इत्युच्यते। परमार्थतस्तु पुरुषनिवृत्त्या सत्यार्थत्वमिथ्यार्थयोर्निवृत्तेरानर्थक्यादनुत्पत्तिलक्षणमेवाप्रामाण्य। तेन (।)

"ममासिद्धमितीदं चेद् वेदाज्जातेवबोधने।
वक्तुन्न द्वेषमात्रेण युज्यते सत्यवादिने"ति। (९२,९३)
निरस्त। वेदात् स्वभावतोर्थावबोधस्यानुत्पत्ते·।

(२) किञ्च (।) वर्णानामवाचक[4]रूपत्व प्रत्येक समस्ताना चावाचकत्वाद् वर्णरूपश्च वेद इति कथमतोर्थज्ञान।

नन्वगृहीतसमयस्यापि वाक्यादुच्चारितात् कोप्यर्थोनेनोक्त इति सन्देहो दृश्यते।

स चैव स्याद यद्यर्थप्रतिपादने शब्दस्य स्वभावेन शक्ति स्यात्। एवन्तर्हि सन्देहलक्षणमस्याप्रामाण्य स्यात्। इष्टेनिष्टेचार्थे प्रकाशनशक्तिसम्भवात्। यदि चास्य स्वभाव[5]त एव सा शक्ति कि सकेतेन। यथा दीपस्यार्थप्रकाशने शक्तस्येन्द्रियापेक्षा तथा शब्दस्यापि सकेतापेक्षेति चेत्। न। प्रदीपेन्द्रिययो प्रत्येकमभावेप्यर्थप्रकाशकत्वाभावात्। तत्रान्योन्यापेक्षत्व युक्त। नैव शब्दशक्ति-सकेतयो। सकेतमात्रेणैवार्थप्रतीतेरुत्पत्ते। तस्मान्न स्वभावत शब्दोर्थप्रतिपादन-समर्थ इत्यु[6]त्पत्तिलक्षणमप्रामाण्यम्।

(३) नन्वग्निहोत्रञ्जुहुयात् स्वर्गकाम इत्यादि वाक्येष्वग्निहोत्रादे स्वर्गादिसाधनोपायत्व प्रतीयत एवेति कथमनुत्पत्तिलक्षणमप्रामाण्य।

सत्यमेतत् (।) केवल प्रतीतिर्ह्यप्रतीतेर्बाधिका। न तु मिथ्यात्वस्य। तस्यापि प्रतीते:। तेन किमेभिर्वाक्यैरग्निहोत्रादि स्वर्गसाधनानुपाय एवोपायतया
146b प्रद[7]र्श्यतेऽथोपाय एवेति मिथ्यात्वाशका न निवर्त्तत एव। बाधकप्रमाणाभावा-दपौरुषेयत्वस्य मिथ्यार्थत्वेन सह विरोधाभावच्च। दृष्टश्चापौरुषेयाणाम्वितथ-ज्ञान हेतुत्वं। तद्यथा ज्योत्स्नादीना शुक्लवस्त्रादौ पीतज्ञानहेतुत्व। तेन चोदनार्था-न्यथाभावोनुमानत· क्रियत इति कथन्तज्ज्ञानेन बाधा। रसादिज्ञानानान्तु तृप्त्यादि-कार्याविसम्वादा[1]देव प्रथम प्रामाण्यनिश्चयादन्यदा त्वभ्यासादिना स्वत एव प्रामाण्यनिश्चयो युक्त इति न मिथ्यात्वाशङ्का। वेदे तु नैव कदाचिदप्यविसम्वाद प्रतिपन्न इति कथमन्यदापि स्वत. प्रामाण्यनिश्चय। तेन सत्यपि विज्ञाने प्रति-भादेर्यथैव हि स्वातन्त्र्याच्च प्रमाणत्व तथा वेदेपि दृश्यता।

(४) किच (।) चोदनार्थज्ञानस्याविद्यमानोपलम्भन[2]रूपत्वात् मिथ्यात्व। तथा

यथा रागादिपरीतः पुरुषो मृषावादी दृष्टस्तथा वयाधर्मतादियुक्तः सत्यवाक्। तद्यथा वचनस्य पुरुषाश्रयात् मिथ्यार्थता। तथा सत्यार्थतापीति। स निवर्त्तमानस्तामपि निवर्त्तयतीत्यानर्थक्यं स्यात्। विपर्ययो वा। न हि शब्दाः प्रकृत्यार्थवन्तः समयात् ततोर्थख्यातेः। कायस[1]ज्ञादिवत्। अप्रातिकूल्यन्तु योग्यता (।) समये तदिच्छाप्रणयनात्। निसर्गसिद्धेष्विच्छावशात् प्रतिपादनाऽयोगात्। तेऽन(र्थ)काः

हि कार्यार्थे वेदस्य प्रामाण्यमिष्यते। कार्यश्चार्थानुष्ठेय एव, स च भावित्वेनाविद्यमानत्वान्न चोदनाज्ञानकालभावीति। तत्कथमविद्यमानविषयत्वाच्चोदनाज्ञानस्य न मिथ्यात्व। सर्वविकल्पाना च पूर्वमवस्तुविषयत्वस्य प्रतिपादितत्वात् तेनापि चोदनाज्ञानस्य मिथ्यात्वमेव। कि च। लोकवेदयोर्वर्ण्णा पदानि चाभि[3]न्नान्येव वाक्यभेदस्तु केवलमिष्यते। लोके च पदानामर्थ सकेतवशात्। लौकिकपदार्थश्च वैदिकाना पदानान्तेन पौरुषेय एवार्थसम्बन्ध । लौकिकपदार्थद्वारेण च वैदिकवाक्यार्थावगमो भवतीति पौरुषेय एवासौ लौकिकवाक्य इव। लोके च पदान्यनेकार्थानीति वैदिकवाक्यस्याप्यनेकार्थतासम्भवाद् विपरीतार्था[4] शका न निवर्त्तत इति सशयलक्षणमप्रमाण्य वेदस्येति।

यथेत्यादिना कारिकार्थं व्याचष्टे। **रागादिपरीतो** रागादियुक्त । **दये**ति करुणा। सैव सात्मीभूता **धर्मता**। **आदि**शब्दात् प्रज्ञाश्रद्धादि। **तै[युक्तः]**। **तत्तस्माद् यथा वचनस्य पुरुषाश्रयात् मिथ्यार्थता। तथा सत्यार्थतापि। स** इति पुरुष । **तामपि** सत्यार्थता**न्निवर्त्तयति**। न केव[5]ल मिथ्यार्थता। इति पुरुषनिवृत्तौ तद्धर्मयोः सत्यार्थत्वमिथ्यार्थत्वयोर्निवृत्ता**वानर्थक्यं** वेदे **स्यात्**।

अथ पुरुषनिवृत्तावपि सत्यार्थतेष्यते। तदा सत्यार्थता**विपर्ययो** मिथ्यार्थता **वा** स्यात्।

(५) स्यान्मत (।) न पुरुषापेक्षया शब्दानामर्थवत्ता किन्तु स्वभावत एवेत्याह। **न हीत्यादि। प्रकृत्या** स्वभावे**नार्थवन्तः** (।) कि कारण (।) **समयात्** स[6] केतात्। **ततः** शब्देभ्योर्थ**ख्याते**रर्थप्रतीते । **कायसंज्ञादिवत्**। हस्तविकाराक्षिनिकोचादय कायसज्ञा। यथा तत्र समयात् क्वचिदर्थप्रतिपत्तिस्तद्वत्। यदि पुनः स्वभावत एव शब्दा अर्थप्रकाशका स्युस्तदा न सकेतमपेक्षेरन्। तस्मान्न स्वतोर्थप्रकाशनयोग्यता शब्दाना (।) किन्त**्वप्रातिकूल्यन्तु** यथासंकेत प्रवृ[7]त्ति- 147a
रेव शब्दाना **योग्यता**। कि कारण (।) **समये** सकेतकाले **तस्य** सकेतकर्त्तुर्यत्र नियोक्तु**मिच्छा** तया यथेष्ट शब्दाना **प्रणयनात्** प्रवृत्तेः। यदि पुर्नानिसर्गसिद्धाः स्वभावसिद्धा. क्वचिदर्थे शब्दाः स्युस्तदा **निसर्गसिद्धेषु** पुरुषे**च्छावशाद्** यथेष्टं

पुरुषसंस्कारादर्थवन्तः स्युः। तत्संस्कार्यतैव चैषां पौरुषेयता युक्ता नोत्पत्तिः। तत एवार्थविप्रलंभात्। उत्पन्नोप्यन्यथा समितो नोपरोधी तदन्यपुरुषधर्मवत्। तदयं निवर्त्तमानः स्वकृतसमयसं[2]भवामर्थप्रतिभां निवर्त्तयति। तत्कुतस्तन्निवृत्या सत्यार्थता।

अथ पुनः (।) उत्पत्तिरेव पौरुषेयता न समयाख्यानं(।) विपर्य(?एवमपि)
अर्थज्ञापनहेतुर्हि संकेतः पुरुषाश्रयः ॥(२२८॥)

संकेतेनार्थप्रतिपादनायोगात्।

तस्मादनर्थकाः स्वत शब्दास्तेनर्थकास्सन्तः **पुरुषसंस्कारात्** पुरुषसकेतादर्थवन्तः[1]। अथ माभूदनर्थकत्वमिति पुरुषसस्कारापेक्षयार्थवत्त्वन्तेषामिष्यते। तदा पौरुषेयतयैव स्यात्। यस्मात् **तत्संस्कार्यतैव** पुरुषसस्कार्यतैव **चैषां** शब्दाना **पौरुषेयता युक्ता**। न पुरुषादुत्पत्तिः। कि कारण (।) **तत एव** पुरुषसमयादेवार्थविप्रलम्भाद् विसम्वादात्। न पुरुषादुत्पत्तेर्विप्रलम्भ। यस्मादुत्पन्नोपि पुरुषाच्छब्दोन्यथा **समित** इति मि[1]थ्यार्थताविरोधेन यथाभाव **समितः** सकेतित। **नोपरोधी** न विप्रलम्भक। **तदन्य** इति शब्दादन्य **पुरुषधर्म** उन्मेषनिमेषादि स्वतोनर्थकोपि यथाभाव पुरुषेण समितो न विप्रलम्भकस्तद्वत्।

उपसहरन्नाह। **तदिति**। तस्मादयं पुरुषो **निवर्त्तमानः स्वकृतसमयात् सम्भव** उत्पादो यस्या **अर्थप्रतिभाया** अर्थबुद्धेस्तामपि **नि[3]वर्त्तयति। तदिति** तस्मात्। **कुतस्तन्निवृत्या** तस्य पुरुषस्य निवृत्या **सत्यार्थता** किन्त्वानर्थक्यमेव स्यात्।

एतेन यदुच्यते।

यत्पूर्वापरयोः कोटचोः परैः साधनमुच्यते।
तन्निराकरण कृत्वा कृतार्था वेदवादिन ॥
पूर्वा वेदस्य या कोटि. पौरुषेयत्वलक्षणा (।)
परा विनाशरूपा च तदभावो हि नित्यतेति।[1]

तदपास्तं सत्यपौरुषेयत्वे नित्य[4]त्वे च वेदस्यानर्थक्येनाकृतार्थत्वात्। (६) **अथ पुनरुत्पत्तिरेव पौरुषेयता न समयाख्यानन्न** सकेतकरण पौरुषेयता' तेनापौरुषेयत्वादेव यथार्थो वेद इति भाव।

एवमप्यर्थज्ञापनहेतुरर्थाभिव्यक्तिहेतु. **संकेतः पुरुषाश्रय** पुरुषेच्छानुरोधी

---

[1] Ślokavārtika.

गिरामपौरुषेयत्वेप्यतो मिथ्यात्वसम्भवः।

किं ह्यस्यापौरुषेयतया (।) यतो हि समयादर्थप्रतिपत्तिः। स पौरुषेयो वितथोपि स्यात्। शीलं साधनं स्वर्गवचनम् (।) अन्यथा समयेन विपर्या[5]सयेत् ।) तेनायथार्थमपि प्रकाशनसंभवात्।

स एव दोषः (।)

यथार्थमवश्यम्वर्त्तत इति **गिरामपौरुषेयत्वेभ्युपगम्यमाने। अ[5]तः** पुरुषेच्छा-रोधिन सकेतात् **मिथ्यात्वसम्भवः।**

(७) **किमित्यादि** विवरण। **अस्येति** वेदस्य **यतो हि समयात्** सकेतादर्थ-तीतिरर्थप्रकाशन **स** समय **पौरुषेयस्ततो वितथोप्यलीकोपि स्यात्।** स्वातन्त्र्यात्। तश्च **शीलं साधनं** हेतुर्यस्य **स्वर्गस्य**। तथाभूतश्चासौ स्वर्गश्च सुमेरुपृष्ठलक्षण-तस्य यद्वेदे **वचनन्तदन्यथा समये[6] 'न विपर्यासयेत्**। निरतिशया प्रीति स्वर्ग इत्ये म्विपरीतार्थ कुर्यादग्निहोत्रादिसाधनेन च विपरीतार्थ कुर्यात्**तेन** कारणे**नाय-**ार्थमपि **प्रकाशनसम्भवात्** (।)

स एव दोषो य पौरुषेयेषूक्त (।) पुरुषदोषात् सम्भाव्यविप्रलम्भ· ौरुषेय इति। (२२८)

(८) नन्वपौरुषेय एव शब्दार्थयो सम्बन्ध। तथा हि यथेदानीन्तना वृद्धा[7] 147b र्वप्रसिद्धमेव शब्दार्थसम्बन्धमुपदिशन्ति। तथा पूर्वपूर्ववृद्धा अपीत्यनादित्वाद-ौरुषेय एव सम्बन्ध। तदुक्त।

"शब्दार्थानादिता मुक्त्वा सम्बन्धानादिकारण।
अस्ति नान्यदतो वेदे सम्बन्धादिर्न विद्यत" इति[1]

स च सम्बन्धस्त्रिप्रमाणक। तथा हि (।) श्रोतुरर्थप्रतिपत्तये केनचिद् द्धेन शब्दे प्रयुक्तेऽन्य पार्श्वस्थ प्रतिपत्ता प्रयोक्तारम्वाच्य वाचक प्रत्यक्षे[1] ण तिपद्यते। श्रोतुश्च प्रतिपन्नत्व प्रवृत्तिद्वारेणावगच्छति। अर्थप्रतिपत्त्यन्यथानु-पत्त्या च शब्दार्थाश्रिता वाच्यवाचकशक्ति चावगच्छतीति त्रिप्रमाणक एव म्बन्ध.। तदुक्त॥

"शब्द (ान्) वृद्धाभिधेयाश्च प्रत्यक्षेणात्र पश्यति।
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया॥
अन्यथानुपपत्त्या च बुद्धयेच्छक्ति द्वयाश्रिता
अर्थापत्त्या च बुध्यन्ते सम्बन्धन्त्रि[2] प्रमाणकमिति।"

---

[1] Ślokavartika.

क. अपौरूषेयत्वेऽप्यप्रामाण्यम्

सम्बन्धापौरुषेयत्वे स्यात् प्रतीतिरसंविदः ॥२२९॥

स्यादेतद् (।) अकार्यसम्बन्धा एव शब्दा न तेर्थेषु पुरुषैरन्यथा विपर्यास्यन्ते। तेनादोष इति किमिदानीं संकेतेन। स हि सम्बन्धो यतोर्थप्रतीतिः।

नायं समयमपेक्षेत (।) अप्रतीत्याश्रयाः कथं सम्बन्धाः (।)

संकेतात्तदभिव्यक्तावसमर्थान्यकल्पना।

न वै सम्बन्धो विद्यमानोप्यनभिव्यक्तिः प्रतीतिहेतुः (।) संकेत(:ख)त्वेनमभिव्यक्तिमेतर्हि सिद्धोपस्थायी किमकारणं पोष्यते।

तत्राह। **सम्बन्धापौरुषेयत्व** इत्यादि। शब्दार्थयोस्स**म्बन्धापौरुषयत्वे**भ्युपगम्यमाने **स्यात् प्रतीति**रर्थप्रतिपत्तिरस**म्विदः**। सकेतज्ञान सम्वित्। सा न विद्यते यस्य तस्य। **अकार्यः** पुरुषैरजन्य **सम्बन्धो** येषान्ते तथा। **ते शब्दा अर्थेषु** वाच्येषु **पुरुषैर्यथार्थप्रकाशकत्वात्**। स्वभावा**दन्यथा विपर्यस्यन्ते** वितथज्ञा[3]नहेतवो न क्रियन्ते। **तेना**विपर्यासेना**दोषो** विसम्वादलक्षणो दोषो नास्ति। **इदानीमिति** सम्बन्धापौरुषेयत्वे **किं संकेतेन** प्रयोजन। **यस्मात् स हि** शब्दार्थयो**स्सम्बन्धः** स **चेदर्थप्रतीति**हेतु सम्बन्धोपौरुषेयस्तदा **नायं** पुरुषो निसर्गसिद्धसम्बन्धत्वाच्छब्दादर्थ प्रतिपद्यमान **समयमपेक्षेत**। प्रदीपादिवत्। अपेक्षते च सकेतन्तस्मा[4]न्न शब्दानामर्थेन सहापौरुषेय सम्बन्धो राजचिह्नादिवत्।

(९) स्यान्मतम् (।) अपौरुषेय एव सम्बन्ध स तु सकेतनिरपेक्षो प्रतीत्याश्रय इत्याह। **अप्रतीत्याश्रयोर्थ**प्रतीतेरेवाश्रयो वा **कथं सम्बन्धः** (।) नैव। प्रतीत्यन्यथानुपपत्त्या सम्बन्धकल्पनात्। प्रतीत्यभावे कथ सम्बन्ध। अथ (।)

"ज्ञापकत्वाद्धि सम्बन्ध स्वात्मज्ञानमपेक्षते।
तेनासौ[5] विद्यमानोपि नागृहीत प्रकाशक.।
सर्वेषामनभिव्यक्ताना पूर्वपूर्वप्रयोक्तृत (।)
सिद्ध सम्बन्ध इत्येव सम्बन्धादिर्न विद्यत इति।"

तत्राह। **संकेतेत्यादि**। **संकेतेन तस्य** सम्बन्धस्याभि**व्यक्तौ**। **असमर्था** निष्फला सकेता**दन्यस्य** सम्बन्धस्य **कल्पना**।

एतदुक्तम्भवति। सकेते सत्यर्थप्रतीतेरुत्पत्तिरसति चानुत्पत्तिरित्यन्वयव्यतिरेका[6]भ्यां सकेत एवार्थप्रतीते कारणमिति कि सम्बन्धेनान्येन।

नेत्यादिना व्याचष्टे। **अनभिव्यक्तो** प्रकाशितोर्थ**प्रतीतिहेतुः**। **एनमिति** सम्बन्धं **स तर्हीति** सम्बन्धः। सकेतादेवार्थप्रतिपादनें **सिद्धे** सति **उपस्थातु शीलं** यस्य स

नन्वियानसम्बन्धोस्य व्यापारो यदर्थे प्रतीतिजननं तत् समयेनैव कृत[5]-मिति। नायोग्ये समयः समर्थ इति। योग्यता सम्बन्धश्चेत् तर्हि वै शब्दः सम्बन्धोस्तु। समर्थं हि रूपं शब्दस्य योग्यता। कार्यकरणयोग्यतावत्। सा चेदर्थान्तरं किं शब्दस्येति सम्बन्धो वाच्यः। योग्यतोपकार इति चेत् (।) न (।) नित्यायान्निरतिशयत्वात् तत्राप्यतिप्रसंगात्। उपकारासिद्धेः। योग्यतायां च स्वतो योग्यत्वेऽर्थ एव किन्नेष्यते।

सम्बन्ध. **किमकार**ण कस्मान्निष्फल पोष्यते।

(१०) नैष्फल्यमेवाह। **नन्वित्यादि। इयानेतावन्मात्र एव। यदर्थे** वाच्ये 148a **प्र[7]तीतेर्ज्ञानस्य जननं**। तत्प्रतीतिजनन **समयेन कृतमिति** निष्फलस्सम्बन्ध। **नायोग्ये समयस्समर्थः**। किन्तर्हि य एवार्थप्रतिपत्यन्यथानुपपत्या प्रतिपादकेन समर्थः प्रतिपन्न· शब्दस्तत्रैव सकेत समर्थ इति **योग्यता सम्बन्धश्चेत्**। तदुक्त।

"शक्तिरेव हि सम्बन्धो भेदश्चास्या न दृश्यते।
सा हि कार्यानुमेयत्वात् तद्भेदमनुवर्त्तते" इति॥ (सब० २८)

अत्राह। **तत्किमित्यादि**।

एवम्मन्यते। नैका शक्ति शब्दार्थयो स्थिता किन्तु शब्दस्था हिं वाचक-शक्तिरन्यार्थे स्थातु वाच्यशक्तिरन्यैव। यदा तु शब्दशक्ति सम्बन्धस्तदा य एव सम्बन्धस्स एव सम्बन्धी प्राप्त इति पृच्छति (।) **तत्किम्वै शब्दः सम्बन्धोस्तु**।

नन्वन्या हि योग्यताऽन्यश्च शब्दस्तत्कथ शब्दस्सम्बन्ध इत्यत आह।

यस्मात् **समर्थं हि रूपं शब्द**स्यार्थप्रतिपादन प्रति **योग्यता**। **कार्यकारणयो-ग्यता[4]वत्**। कार्यकरणाय योग्यता कार्यकरणयोग्यता। यथा कारणस्यात्मभता। तद्वत्। **सा चे**दिति योग्यता तत शब्दादर्थान्तरं तदा **किं शब्दस्य** भवतीति शब्द-योग्यतयोस्**सम्बन्धो वाच्यः**। अन्यथा शब्दस्येय योग्यतेति न सिध्येत्। यार्थान्तरभूता **योग्यता** तस्या शब्दस्यो**पकार इति चेत्**। शब्देन योग्यताया उपकार क्रियत इति यावत्। तेन शब्दजन्यत्वा[3]च्छब्दस्य योग्यतेत्युच्यत इति भाव.। **न** शब्देनोपकारो योग्यताया (।) कुत. (।) **नित्याया** योग्यताया **निरतिशयत्वात्**। अथ योग्यताया अपि शब्देन व्यतिरिक्त एवोपकार क्रियते। तदा तस्य शब्दकृतस्योपकारस्य योग्यतया कः सम्बन्ध इति वाच्य। अथ तत्राप्युपकारे योग्यतयान्य उपकार. क्रियते तदा **तत्राप्युप**कारे यथोक्तविधिनाऽपरापरस्योपका[4]रस्य कल्पनाया**मतिप्रसङ्गात्**। ततोनवस्थाया**मुपकारासिद्धेः** सैव योग्यतया सह शब्दस्य सम्बन्धासिद्धिः। किञ्च व्यतिरिक्ता योग्यतामुपकुर्वाण शब्दः स्वरूपेणैवोपकरोति न पररूपेण। शब्दस्या-

नामिश्राणां सिद्धानां कश्चित सम्ब[6]न्धोऽभेदप्रसंगात्। अनपेक्षणाच्च।

२. सिद्धान्त.—

समयस्तर्हि कथं (।) **शब्दार्थसम्बन्धः पुरुषेषु वृत्तेः।**

तदाख्यानं समय (:।) **ततः प्रत्यायकत्वसिद्धेः सम्बन्धाख्यानात्। न तु सम्बन्धः** (।)

अर्थविशेषसमीहाप्रेरिता वाग्, अत इदमिति विदुषः स्वनिदानावभासिनमर्थं सूचयतीति। बुद्धिरूपवाग्विज्ञप्त्योर्जन्यजनकभावः सम्बन्धः। ततः शब्दात् प्रतिपत्तिरविनाभावात् (।)

नुपकारकत्वप्रसगात्। तदा **योग्यतायां च स्वतः** स्वरूपेण शब्दस्य **योग्यत्वेऽर्थ एव** शब्दस्वभाव प्रतीतिजननयोग्य **किम्नेष्यते**। कि पा[5]रम्पर्येणेति यावत्। तस्मान्न योग्यता सम्बन्धो न च सार्थप्रतीतिर्हितु । समवायादेवार्थप्रतीते.।

बौद्धस्यापि **तर्हि समयः कथं शब्दार्थयोस्सम्बन्धः** (।) कथ च न स्यात् **पुरुषेषु वृत्तेः**। अस्यार्थस्याय वाचक इत्यर्थकथन स म य । स च पुरुषेषु वर्त्तते न शब्दार्थयो'। न चान्यधर्मोन्यस्य धर्मोऽश्वधर्म इव गो ।

(१) आ चा र्य स्तु न केवल समयो न[6] सम्बन्धोन्योपि भाविक. सम्बन्धो नास्तीत्याह। **नेत्यादि**। तथा हि भावाना रूपश्लेषो वा सम्बन्ध स्यात्। पारतन्त्र्य वा परस्परापेक्षण वा। **तत्रामिश्राणाम्परस्परभिन्नाना न कश्चिद्** रूपश्लेषलक्षणस्सम्बन्ध । तेषामभेदप्रसङ्गात्। एकत्वापत्ते । तथा **सिद्धानां** निष्पन्नाना रूपाणा न **कश्चित्** पारतन्त्र्यलक्षण **सम्बन्धः** (।) सिद्धे पारतन्त्र्या-
148b योगात्।[7] परस्परापेक्षालक्षणोपि सम्बन्धो नास्तीत्याह । **अनपेक्षणाच्चेति**। सिद्धस्य सर्वनिरपेक्षत्वात् ।

(२) क. यदि तर्हि शब्दार्थयोर्नास्ति सम्बन्ध कथन्तर्हि शब्दार्थप्रतीति'। कथ च शाब्द ज्ञानमनुमानेऽन्तर्भाव्यते। समयो वा तदा किप्रयोजन इति (।)

आह। **अर्थविशेषेत्यादि** (।) **अर्थविशेषो** य प्रतिपादनाभिप्रायेण विषयीकृत । **तस्य समीहा** प्रतिपादनेच्छा। तया[1] **प्रेरिता** जनिता वाक् सूचयति प्रकाशयति **स्वनिदानप्रतिभासनमर्थ**। वाचः स्वनिदान प्रतिपादनाभिप्रायः। तत्प्रकाशिन कस्य **सूचयति**। **अत इदमिति** विदुष.। **अतः** प्रतिपादनाभिप्रायात् सकाशा**दिदम्वचन**-मागतमिति यो **विद्वान् तस्य**। इति एव **बुद्धिरूपस्याभिप्रायलक्षणस्य वाग्विज्ञप्तेश्च जन्यजनक**लक्षणस्स**म्बन्धः**। **ततः शब्दात् प्र[2]तिपत्तिरविनाभावादिति** (।) ततो जन्यजनकभावाद् वाक्यादर्थप्रतिपत्ति ।

तेन यदुक्त (।) पदादर्थमतिर्यद्यप्यनुमान वाक्यात्त्वर्थप्रतीतिः प्रमाणान्तरं

सम्बन्धाग्रहात् (।) न चात्राविनाभाव उपयोगीति (।)

तदपास्त। अविनाभावमन्तरेण वाच्यवाचकभावस्याभावात्।

यदप्युक्त (।) कथ शब्दादर्थप्रतिपत्ति। कथ च शाब्द ज्ञानमनुमानेन्तर्भवतीति। तत्परिहृत[3] (।)

ख इदानी समयप्रयोजनमाह। **तदाख्यान**मित्यादि। **तदाख्यान**मविनाभावाख्यान **समयः**। आख्यायतेनेनेति कृत्वा। **तत** इति समयात्-**प्रत्यायक**स्यार्थप्रतिपादनाङ्गस्याविनाभावलक्षणस्य **सिद्धेः** प्रतीते। उपचारेण समयस्य **सम्बन्धाख्यानात्** सम्बन्धव्यपदेश। न तु पुन· स एव समयो मुख्य सम्बन्ध।

तेन यदुच्यते।

"समय. प्रति[4]मर्त्यम्वा प्रत्युच्चारणमेव वा।

क्रियते जगदादौ वा सकृदेकेन केनचिदि"ति (।) निरस्त।

ग. ननु यद्यविनाभावेन शब्दार्थप्रतीतिस्तदा शब्दस्यार्थप्रतिपादन वाचकत्वेन न स्यात्। धूमस्येवाग्निप्रतिपादन। यदि च शब्दार्थयोस्समयेन विना भावाख्यानात् समयस्सम्बन्ध उच्यते। अग्निधूमयोरपि समय स्यादिति।

नैष दोषो यस्मात्।[5] इममर्थमकृतसमयेनापि शब्देन प्रतिपादयामीत्येवमर्थस्य वाच्यत्व शब्दस्य च वाचकत्वमारोप्यार्थप्रतिपादनाभिप्राये सति यदा शब्द प्रयुङ्क्ते तदा शब्दस्य वाचकरूपस्यैवोत्पत्ति।

घ. नन्वर्थप्रतिपादनाभिप्रायेण वर्णा एव जन्यन्ते न च वाचका वर्णा इष्यन्ते तत्कथमुच्यतेऽभिप्रायाद् वाचकस्य शब्दस्योत्पत्तिरिति।

सत्य (।) केवलम्वक्तृश्रो[6]त्रोर्वर्णेष्वेव वाचकाभिमानाद् वाचकस्यैवोत्पत्तिरुच्यते। तस्मादस्यैव वाच्यवाचकभावलक्षणस्याविनाभावस्य शब्दार्थसम्बन्धस्य मूढ प्रति आख्यान समयस्सम्बन्ध उच्यते। न तु सर्वमेव कार्यकारणभावाख्यान समय· (।) तेन न धूमादौ सम्बन्ध· समय उच्यते। यद्यपि सकेतव्यवहारकालयो शब्दार्थसम्बन्धस्य भेदस्तथापि सादृश्यादेकत्वाध्य[7]वसायेन लोकस्य प्रवृत्ति। 149a
अत एव च यमेव शब्दार्थसम्बन्ध पूर्वप्रतिपन्न वक्ता कथयति तमेव श्रोता प्रतिपद्यते। तेन यदुच्यते॥

"प्रत्येक स च सम्बन्धो भिद्येतैकोऽथवा भवेत्।
एकत्वे कृतको न स्याद् भिन्नश्चेद् भेदधीर्भवेत्।(सबध० १८)
वक्तृश्रोतृधियो भेदाद् व्यवहारश्च (न) दुष्यति।
वक्तुरन्यो हि सम्बन्धो बुद्धौ श्रोतुस्तथापर.।

अस्तु वाऽन्य एव नित्यः सम्बन्धः (।) **तेन** (।)

गिरामेकार्थनियमे[7] न स्यादर्थान्तरे गतिः ॥ (२३०) ॥

न हि तेन सम्बन्धेनासम्बद्धेर्थेप्रतीतिर्युक्ता। तस्य वैफल्यप्रसंगात्। दृष्टश्चेच्छावशात् कृतसमयः सर्वः सर्वस्य दीपकः।

अनेकार्थाभिसम्बन्धे विरुद्धव्यक्तिसम्भवः।

अथ मा भूद् दृष्टविरोध इति सर्वे सर्वस्य वाचकाः। तथा न सर्वं (:)सर्वसाधनो संकरात् कार्यकारणतायास्तत्र प्रतिनियतसाधनेऽभिमतेऽर्थे

श्रोतु कर्तुञ्च सम्बन्धम्वक्ता क[1] प्रतिपद्यते ।
पूर्वदृष्टो हि यस्तेन त श्रोतुर्न करोत्यसौ।
य करोति नव सोपि न दृष्ट· प्रतिपादक" इति (।)

तदपास्त। सर्वत्र वाच्यवाचकसम्बन्धानाम्भिन्नानामप्येकत्वाध्यवसायेन लोकस्य प्रवृत्ते (।) न चाप्यनादिता तेषा प्रत्यभिज्ञाया अप्रमाणत्वादिति। (२२९)

ङ. **अस्तु वाऽविनाभावसम्बन्धादन्य एव नित्यः** शब्दार्थयोस्सम्बन्धः। **तेन** सम्बन्धेन **गिरां** शब्दानाम्[2]**कार्थनियमे** सति पुन समयवशान्न **स्यादर्थान्तरे** यत्रासौ शब्दो न नियमितस्तत्र **गतिः** प्रतिपत्तिः। कि कारण। **न हि तेनै**कार्थनियतेन **सम्बन्धेनासम्बद्धेर्थे प्रतीतिर्युक्ता**। कस्मात् (।) **तस्य** सम्बन्धस्य **वैफल्यप्रसङ्गात्**। न भवत्येव तत्र प्रतीतिरिति (।)

आह। **दृष्टश्चेत्यादि**। पुरुषे**च्छावशात् कृतः समयो**स्येति **दीपकः** प्रकाशक.।

अनेकेत्या[3]**दि**। **अनेकार्थेन** शब्दस्य**ाभिसम्बन्धे**भ्युपगम्यमाने यद्येकार्थनियमेन समयकारोभिव्यक्ति करोति। तदाभिमत एवार्थे करोति न त्वन्यस्मिन्नेव विरुद्धे इति नास्ति नियमस्ततो **विरुद्धव्यक्तिसम्भवः**। अभीष्टाद् विरुद्धस्याप्यर्थस्याभिव्यक्तिः सम्भाव्यते।

अथेत्यादिना व्याचष्टे। एकार्थप्रतिनियमे समयवशादनेकार्थप्रतिपा[4]दन दृष्ट विरुध्यते (।) तस्मात्तस्य दृष्टस्य विरोधो **मा भूदिति सर्वे** शब्दा **सर्वस्यार्थस्य वाचकाः**।

च **तथेत्यादिना** विरुद्धव्यक्तिप्रतिपादन। यथा सर्वे सर्वस्य वाचका इष्यन्ते **तथेदमप्यवश्यमेष्टव्य** (।) **न च सर्वार्थ. सर्वस्य** कार्यस्य **साधक** इति न्यायप्राप्तत्वात्। न्याय चाह। **संकरादिति**। प्रतिनियतत्वात् **कार्यकारणतायाः**। **तत्रैतस्मिन् न्या**[5]**ये** सति **प्रतिनियतम्विशिष्टमेव** वस्तु साधन कारण यस्याभिमतस्यार्थस्य साध्यस्य स्वर्गादे.। **तस्मिन्** विषयभूते। शब्दस्य किम्विशिष्टस्य (।)

[1]सर्वेषां साधनानां[2] साधारणस्य दृष्टव्यक्तिमेव समयकारः करोतीति कुत एतत्[2]। 489a
सोऽनियतो नियमं पुरुषात् प्रतिपद्यते[3]।

अपौरुषेयतायाश्च व्यर्था स्यात् परिकल्पना ॥२३१॥

अपि नाम असंकीर्णमेवार्थं जानीयामिति पुरुषहेतुकः संकरो व्यक्तः।

तत्र यादृशा[3]: पुरुषैः क्वचित् प्रयुक्ताः संकीर्यन्ते, तादृशा अपि सर्वसाधारणास्सन्तः क्वचिदर्थे तैः विनियमिताः। तत्त्वापरिज्ञानात् भावेनैव[4] (? प्रकृत्यैव) वैदिका नियता इति चेत् नोपदेशमपेक्षेरन्, अन्यथा संकेतेन च न प्रकाशयेयुः, व्याख्याविकल्पश्च न स्यात्। उपदेशस्य शक्यविकल्पे उपदेशे

सर्वेत्यादि। **सर्वेषां साध्यानां** कार्याणा यथास्व यानि साधनानि कारणानि तेषा वाचकत्वेन **साधारणस्य** तस्य **शब्दस्येष्टव्यक्तिमेव** विशिष्टसाध्यसाध्यकत्वेनाभिमत एवार्थेभिव्यक्ति **समय[6]कारः करोतीति कुत एतत**।

एतदुक्तम्भवति। य एवार्थो वस्तुस्थित्या स्वर्गसाधन किन्तत्रैव समयकारेणाग्निहोत्रादिशब्दोभिव्यक्त किम्वान्यस्मिन्नेव स्वर्गसाधनविरुद्धेर्थे बुद्धिमान्यादिति सन्देह एव।

स इति शब्द· सर्वस्मिन् वाचकत्वेनानियतो **नियम** क्वचिदर्थे **पुरुषात्** पुरुषसकेतात् **प्रतिपद्यते**। स च पुरुषोऽ[7]विरुद्धेप्यर्थे सकेत कुर्यात्। तथा च न केवल 149b
विरुद्धव्यक्तिसम्भवो यापीयम**पौरुषेयता** वेदस्येष्टा तस्या **व्यर्था स्यात् परिकल्पना। अपि नामे**ति। कथन्नाम। **असंकीर्णम**निष्टेनाससृष्ट। इष्ट**मेवार्थम**पौरुषेयेभ्य शब्देभ्यो **जानीयामिति** कृत्वा सकरस्येष्टानिष्टव्यतिकरस्य हेतु· **पुरुषोपाकीर्णो** वहिस्कृ(?ष्कृ)तो वैदिकेभ्य शब्देभ्य। त[1]त्रैवमवस्थिते **यादृशाः** शब्दा पौरुषेयाभिमता. **पुरुषैः क्वचिद्** विवक्षितेर्थे **प्रयुक्तास्संकीर्यन्ते**ऽनिष्टाभिधायकत्वसम्भावनया। **तादृशा** एवापौरुषेयाभिमता **अपि** शब्दा **सर्वार्थसाधारणास्सन्तः क्वचिदर्थे तैः** पुरुषै. समयेन यथेष्ट **विनियमिताः**। किं कारण (।) **तेषां** पुसान्तत्त्वापरिज्ञानात्। **प्रकृत्यैव** स्वभावेनैव **वैदि[2]काः** शब्दा **नियता** अभिमतेर्थे (।) ततो न पुरुषसस्कारकृतो दोष **इति चेत्**। एव सत्यर्थ**प्रकाशने** नोपदेशमपेक्षेरन्। अपेक्षन्ते च। स्वतस्तेभ्योर्थप्रतीतेरभावात्। यदि च ते स्वभावत एव प्रतिनियता. स्युस्तदा यत्र क्वचिदर्थे एकदा समिता पुन· कथचित ततोन्यथासंकेतेनार्थान्तर **न प्रकाशयेयुः**। प्रकाशयन्ति च। ततो न प्रकृ[3]त्यै-

---

[1] Restored from Tibetan [2] Bsgrub. par byed. pa. [3] Mthoñ-bar-hgyur-pa=दृश्यते? Rtogs-par-hgyur-pa. [4] Ño-bo-ñid-kyis.

च्छा[5]**ऽविसंवाद इति व्यर्थैवापौरुषेयता ।**

वाच्यश्च हेतुर्भिन्नानां सम्बन्धस्य व्यवस्थितेः ।

बाह्या अर्थाः शब्दस्य न रूपं, नापि शब्दोऽर्थानाम् । येनाभिन्नात्मतया[6] **व्यवस्थाभेदेऽपि कृतकानित्यवत् अविनाभाविता स्यात् ।**

489b **नापि शब्दाविवक्षाजन्मानो नाप्यजन्मानो विवक्षा**[7]**व्यंग्याः, नार्थायत्ताः ।**

कार्थनियता इति । स्वभावतश्चैकार्थनियमे । योयम्वैदिकेषु वाक्येषु व्याख्यातृणा **व्याख्याविकल्पश्चापरापरव्याख्याभेदश्च न स्यात्** । एकार्थप्रतिनियमात् । भवति च । तस्मात् पौरुषेयवाक्यवन्नैकार्थनियता वैदिका शब्दा इति ।

छ अथ स्यात् (।) नियत एवार्थे तेषामुपदेश इत्यत आह । **उपदेशस्येत्यादि** । व्याख्याभेदेन शक्योर्थना[4]नात्वविकल्पो यस्मिन् वैदिके वाक्ये तत्तथोक्तन्तस्मिन् **शक्यविकल्पे** वैदिके वाक्ये । व्याख्यातृणा य **उपदेशस्तस्येष्टसम्वादो** नास्त्ययमपि कदाचित् स्याद् अस्यार्थो(यम)न्यो वेति नियमाभावात् । **इति** हेतो**व्यर्थैवापौरुषेयता** । तामपि कल्पयित्वा व्यभिचाराशकाया अनिवृत्ते ।

ज यश्च शब्दार्थयो सम्बन्धमिच्छति तेन **वाच्यश्च हेतुः सम्बन्धस्य व्यवस्थि**[5]**तेः** । सम्बन्धव्यवस्थाया । केषाम् (।) **भिन्नानां** परस्परभिन्नाना शब्दार्थाना । (१) न तावच्छब्दार्थयोस्तादात्म्यलक्षण सम्बन्ध । यस्मादर्था हि **बाह्या** घटपटादय. **शब्दस्य न रूपं** न स्वभाव. । शब्दरूपत्वे हि घटादीनामभाव स्यात् । **नापि शब्दोर्थानां** रूपमर्थरूपत्वे हि शब्दरूपताहानिप्रसङ्गात् । **येनाभिन्नात्मतयान्तरीयकता स्यात्** । अ[6]**विनाभाविता** स्यात् । **व्यवस्थाभेदेपीति** व्यावृत्तिभेदसमाश्रयेण साध्यसाधनभेदेपि । किमिव । **कृतकत्वाऽनित्यत्ववत्** । यथा कृतकत्वानित्यत्वयोर्व्यावृत्तिभेदेप्येकात्मतया नान्तरीयकता । तद्वत् ।

(२) तदुत्पत्तिलक्षणोपि सम्बन्धो नास्तीत्याह । **नापीत्यादि** । एतदाह ।
150a तदुत्पत्तिलक्षणो हि **शब्दानां** सम्बन्धो भवन् विवक्षाप्रतिष्ठिते[7]न चार्थेन स्याद् बाह्येन वा ।

(क) न तावदाद्य पक्ष । यस्मान्नाप्येते वैदिका ध्वनयो **विवक्षाजन्मान** इष्यन्ते । विवक्षातो जन्म येषामिति विग्रह । नित्यत्वाभ्युपगमात् । **अजन्मानो वा** अनुत्पन्ना वा सन्तो नापि **विवक्षाव्यङ्ग्याः** । नित्यत्वहानिप्रसगात् । व्यङ्ग्यानामुत्पाद्यत्वादित्युक्त प्राक् ।

(ख) नापि द्वितीय पक्ष इत्याह । **नार्थायत्ता** इति । नापि बाह्यार्थायत्ता । नित्यत्वादेव ।[1]

अन्ये त्वेकमेव ग्रन्थ कृत्वा व्याचक्षते । यस्मान्न विवक्षाजन्मानो नापि

ततः प्रतिनियमसंसाध्य तदन्वयं कथं साधयेयुः। न चायत्ततायास्तस्याः साधकम।

असंस्कार्यतया पुंभिः सर्व्वथा स्यान्निरर्थता ॥२३२॥

संस्कारोपगमे मुख्यं गजस्नाननिभं भवेत्।

इति संग्रहश्लोकः।

अपि च शब्दार्थसम्बन्धो नित्योऽनित्यो वा स्यात्। यदि अनित्यः[2], पुरुषेच्छाया वृत्तिः अवृत्तिर्वा। अपुरुषायत्तत्वे पुरुषाणा यथाभिप्रायं देशादीनामन्यथात्वे तत्र प्रतिपादनन्न स्यात्। इच्छायामपि अनायत्तस्य पर्वता[3]दिवत् कदाचिदयोगात्।

तद्व्यङ्ग्या। तस्मादुभयथापि नार्थायत्ता न बाह्ये वस्तुनि प्रतिबद्धा वैदिका शब्दा। यतश्च नार्थायत्तास्ततः तस्मात्। **इदानी**मिति सम्बन्धाभावे। **तदन्वयं तस्यार्थस्यान्वयं** सद्भाव ते शब्दा **कथं साधयेयुः**। नैव साधयेयु। किम्भूत (।) तत्प्रतिनियमससाध्य। तस्मिन् बाह्येर्थे तादात्म्य[2]तदुत्पत्तिभ्या य प्रतिनियम शब्दाना तेन ससाध्य। बाह्येर्थेऽप्रतिबन्धेन नियमाभावात्। (२३२)

३ उक्तमेवार्थ श्लोकेन सगृह्णाति। **असंस्कार्यतये**त्यादि। (१) **सर्वथे**ति। यदि पुरुषैरर्थाभिप्रायेण शब्दा न क्रियन्ते नापि सकेत्यन्ते। तदा पुम्भिरसस्कार्यतया हेतुभूतया वैदिकाना शब्दाना**न्निरर्थता स्यात्**। यस्मात् पुरुषसस्कारप्रबद्धे शब्दाना सत्यार्थत्वमिथ्यार्थत्वे[3]। तेन तदभावान्निरर्थतैव स्यात्। (२) निरर्थतापरिहारार्थ पुन पुरुष**संस्कारोपगमे** क्रियमाणे मिथ्यार्थतापि स्यादिति **मुख्यं ग ज स्ना न** मिदम्**भवेत्**। गजो हि पङ्कापनयनाय स्नात्वा पुन पङ्केनात्मानमवकिरतीति। **नित्योऽनित्यो वा स्यादिति** वस्तुनो गत्यन्तराभावात्। (३) **पुरुषेच्छावृत्तिः** पुरुषेच्छावशादुत्पन्न स्यादाकुञ्चनादिवत्। **अवृत्तिर्वा**। नास्य पुरु[4]षेच्छया वृत्ति। अङ्कुरादिवत्। तत्रानित्या पुरुषाधीनत्वपक्षे देशादिपरावृत्त्या। **देशादीना**मन्यथात्वेन आदिशब्दात् कालावस्थाग्रहण। **पुरुषाणां यथाभिप्रायमिति** येन पुरुषेण यथा प्रतिपादयितुमिष्टन्तथा तेन शब्देन **प्रतिपादनन्न स्यादिति** सम्बन्ध। कि कारण (।) पुरुषप्रतिपादने**च्छायां** सत्यामप्यनायत्तस्य शब्दस्य **कदाचिदयोगात्** पुरुषेण नियो[5]क्तुञ्च कदाचिदप्यशक्यत्वादित्यर्थ। **पर्वतादिवत्**। यथा पर्वतादय पुरुषानायत्ता सत्यामपीच्छाया न यथेष्ट नियोक्तुम्पार्यन्ते (।) तद्वत्। दृष्टश्च देशादिपरावृत्या यथाभिप्राय प्रतिपादन। तस्मात् पुरुषेष्वनायत्त सम्बन्ध इति।

ख. सम्बन्धचिन्ता

अयमेव नित्यत्वेऽपि दोषः, तस्य स्थिरभावस्य अन्यथाऽयोगात्। समं सर्वस्मिन्नवस्थान इष्टे प्रतिनियमा[4]भावात्। ततो विशेषप्रतीतिर्न स्यादिति पूर्ववत् प्रसंगः। इच्छावृत्तौ च पौरुषेयत्वमिति विप्रलम्भनशंका।

अपि च।

सम्बन्धिना[5]मनित्यत्वान्न सम्बन्धेस्ति नित्यता ॥२३३॥

पराश्रये सम्बन्धिनि अनायत्ततायां तयोः सम्बन्धिताया अयोगात्। स चाश्रयोऽनित्यः। अपायेऽस्य सम्बन्धस्याप्यपायः[6] स्यात्। अन्यथा नापैति। तदाश्रयार्थश्च वक्तव्यः।

अनित्यस्य सम्बन्धस्यापुरुषाधीनत्वे योयमनन्तरोक्तो दोषोऽयमेव सम्बन्धस्यानित्यत्वेपि **दोषः**। कि कारण (।) **तस्य** सम्बन्धस्य **स्थिरस्वभावस्य** देशादिपरावृत्त्या परावृत्त्यायोगाद**न्यथा** त्वस्यायोगात्। आकाशवत्।

४ क. अथ सर्वेष्वेवार्थेषु सम्बद्ध शब्द (।) तत्राप्याह। **सममित्यादि। सममेककाल सर्वस्मिन्नर्थे** सम्बन्धस्यावस्थानेपि कल्प्यमान **इष्टो** योर्थस्तस्मिन् **प्रतिनियामाभावात्** (।) **ततः** सर्वार्थसाधारणादर्थ**विशेषस्याभिमतस्य प्रतीतिर्न-**
150b **स्यादिति** कृत्वा[7] अनेकार्थसम्बद्धोपि शब्द पुरुषसस्काराद् इष्टार्थनियम प्रतिपद्यत इत्यङ्गीकर्त्तव्यन्तत्र च **पूर्ववत् प्रसगः**। "अनेकार्थाभिसम्बन्धे विरुद्धव्यक्तिसम्भवे" (१।२३१) इत्यादिना य उक्त। एवन्तावन्नित्यत्वे सम्बन्धस्यानित्यत्वेप्यपुरुषाधीनत्वे दोष उक्त'। **पुरुषेच्छावृत्तौ च** सम्बन्धस्य **पौरुषेयत्वमिति** कृत्वा **विप्रलम्भनशङ्का**। विसम्वादहेतो पुरुषस्याभ्युपगमात्।

ख. **अपि चेत्यादि**[1] तत्रैव दूषणान्तरमाह। द्विविधो हि शब्दाना विषय· साक्षाज्जातिस्तल्लक्षिता च व्यक्तिरिति। (१) तत्र यदि व्यक्त्या सह सम्बन्धस्तत्राह। **सम्बन्धिनां** वाच्यानामर्थानाम**नित्यत्वात्**। तेषु विनश्यत्सु सम्बन्धस्यापि तदाश्रितस्य विनाश इति **न सम्बन्धेस्ति नित्यता। पराश्रय** इति परस्सम्बन्धी आश्रयोस्येति कृत्वा। **सम्बन्धिनि** सम्बन्धस्याप्रतिबन्धे सति **तयोः** सम्बन्धि-नो[2]**स्सम्बन्धिताया अयोगात्**। न ह्यप्रतिबद्धेन केनचित् कश्चित् तद्वान् भवति गौरिवाश्वेन। **स चाश्रयः** शब्दार्थसम्बन्धस्यानित्योर्थानामनित्यत्वात्। **अपाये** विनाशेस्याश्रयस्य **सम्बन्धस्याप्याश्रितस्यापायः**। प्रदीपापाये प्रभाया इव तदाश्रिताया। **अन्यथा** यद्याश्रयापायेप्याश्रितो **नापैतीतीष्यते** तदाश्रयाभिमते सम्बन्धो नाश्रित स्यात्[3]। तत् आश्रयविनाशेविनाशान्न नित्यः **सम्बन्धः**।

नित्यस्यानुपकार्यत्वादकुर्वाणश्च नाश्रयः।

यदि जाते[7]र्वाच्यत्वाददोष इति चेत्। न। तद्वचने प्रयोजनाभावादिति 490a
निर्लोठितमेतद्। सर्वत्र च जातेरसम्भवात् अयोगो यादृच्छिकेषु व्यक्तिवाचिषु[1] अयोगः, सर्वदा जातिचोदने विशेषान्तरव्युदासेन प्रवृत्तययोगाच्च। तस्मादन्वयव्यतिरेकिणोः भावाभाववतो भावस्य एव सम्बन्धः।

अथैरतः स शब्दानां संस्कायेः पुरुषै[2]र्धिया ॥२३४॥

तदाश्रयार्थश्च वक्तव्यः। तस्य सम्बन्धस्य सम्बन्धिनौ केनार्थेनाश्रयादित्याश्रयार्थो वाच्य'। उपकारार्थो ह्याश्रयार्थ। स चेह नास्ति (।) कि कारण (।) **नित्यस्य सम्बन्धस्यानुपकार्यत्वादनाधेयातिशयत्वादनुपकुर्वाणश्चाश्रयाभिमतो नाश्रयः स्यात्।**

(२) स्यादेतद् (।) **यदि** व्यक्तिर्वाच्या तदा स्यादनन्तरोक्तो दोष'। या[4]वता नित्याया **जातेर्वाच्यत्वाददोषः** सम्बन्धिनामपायेन सम्बन्धस्यानित्यतादोषो नास्तीति **चेत्।**

नेत्यादिना प्रतिवचन। **तद्वचने** जातिवचने **प्रयोजनाभावादिति निर्लोठितमेतदन्यापो ह चि न्ता याम्** (३।५५)

अपि प्रवर्त्तत पुमान् विज्ञायार्थक्रियाक्षमान् (।) इत्यत्रान्तरे। **सर्वत्र** नाभिधाने **जातेरसम्भवात्** कारणात्। जातिचोदनाया **अयोगः**। यथा **यादृच्छिकेषु व्यक्तिवाचिषु[5]** बाह्य निमित्तमन्तरेण शब्दप्रयोगेच्छा यदृच्छा। तस्या भवा यादृच्छिकाः। तेषु देवदत्तादिशब्देषु व्यक्तिवाचिषु। (२३४)

५ चतुष्टयी शब्दाना प्रवृत्तिरिति केषाचिद्दर्शन। जातिशब्दा गुणशब्दा क्रियाशब्दा यदृच्छाशब्दा इति। तेषां मतेनैतदुक्त। अथ देवदत्तादिशब्दोप्यवस्थाभेदेन जातिवाचक इष्यते। तदा **सर्वदा जातिचो**दनेभ्युपगम्यमाने **विशेषान्त[6]रव्युदासेन** व्यक्त्यन्तरपरित्यागेन क्वचिदभिमते व्यक्त्यन्तर **प्रवृत्तययोगाच्च** न जात्यभिधान। दृष्टा च गोस्वामिना गामानयेत्युक्तेऽन्यस्वामिकगोव्युदासेन विनियता एव गोरानयनार्थम्प्रवृत्ति. सा चैव स्यात्। यदि प्रकरणादिना गोशब्दो विशेषवृत्तिः स्यात्। न च गोर्थस्यानयनमस्तीति वाक्यार्थप्रतीतिरपि न स्यात्। तस्मान्न सर्वत्र जा[7]तिश्चोद्यते। यत एव वास्तव. सम्बन्धो न सगच्छते प्रकृति- 151a
भिन्नाना। **तस्मादन्वयव्यतिरेकिण** इति भावाभाववतो भावस्य कार्योभिमतस्य (।) कारणाभिमतभावाभावद्वारेण यौ **भावाभावौ** स एव **सम्बन्धः** जन्यजनकभाव

तावेव भावाभावावाश्रित्य असंसृष्टावपि व्यवहारभावनातः संसृष्टपुरुषस्य भात इति पौरुषेयो भावानां संश्लेषः।

किं च, आश्रयविनाशे[3] सम्बन्धविनाशाद्, स वा शब्दः पूर्वेण न योज्यतेऽसम्बन्धिनो यतः। तत्र उत्पन्नोत्पन्नाश्च भावा अवाच्याः स्युः असम्बन्धिनो यतः, स्थितसम्बन्धाभावा[4]त्। तत्रापि--

अर्थैरेव सहोत्पादे;

अकल्प्यमाने।

न स्वभावो विपर्ययः।

शब्देषु युक्तः;

अथ सम्बन्धिविनाशेऽर्थान्तरेऽभावो अर्थानामवाच्यता वा मा भूदिति कृत्वा

एवा[1] भिन्नाना सम्बन्ध इति यावत्।

यत एवमतः कारणादर्थैः कारणभूतैस्सह कार्यात्मना शब्दाना सम्बन्ध पुरुषैः कर्तृभिर्द्धिया बुद्[1]या संस्कार्यो व्यवस्थाप्य। अर्थे सति शब्दस्य प्रयोगादसति चाप्रयोगात्। अथ भावाभावद्वारेण शब्दस्य यौ भावाभावौ तावाश्रित्य बुद्धया शब्दार्थयो सम्बन्धो व्यवस्थाप्यते इति वाक्यार्थ।

६. एतदेव व्याचष्टे। तावेवेत्यादि। अर्थद्वारेण शब्दस्य यौ भावाभावौ तावाश्रित्य स्वभावेनासंसृष्टावपि शब्दार्थावसम्बन्धिनौ संसृष्टौ सम्बद्धौ पुरुषस्य प्रति[2]भातः। विकल्पबुद्धौ प्रतिभासेते। कुत. (।) व्यवहारभावनातः। अनादिकालीनव्यवहाराभ्यासत.। इति हेतो पौरुषेयो भावानां शब्दार्थाना संश्लेषः सम्बन्धः। व्यवहारवासनाबलेनावस्थाप्यमानत्वात।

७. वस्तुभूतसम्बन्धाभ्युपगमेऽयमपरो दोष इत्याह। किंचेत्यादि। वाच्यत्वेनाभिमतस्याश्रयस्य विनाशादविनष्टे सम्बन्धे। स तस्य वा[3]चकत्वेनाभिमत शाब्दो सम्बन्ध। नास्य सम्बन्धोस्तीति कृत्वा तदभावस्तस्मादसम्बन्धात् पुनरपूर्वेण वाच्येन न योज्येत। ततश्चोत्पन्नोत्पन्नाश्च भावा अवाच्याः स्युरसम्बन्धिनो यतः। असम्बन्धिन एव कुत. (।) स्थितसम्बन्धाभावात्। ये य उत्पद्यन्ते तेषु तेषु न तावदुत्पादात् पूर्व सम्बन्ध. स्थितो द्विष्ठस्य तस्य सम्बन्धिनमन्तरेण स्थानायोगात्।[4] तत्रापीत्यादि। तत्राप्युत्पन्नोत्पन्नेष्वर्थेषु तैरेवार्थैस्सह सम्बन्धस्योत्पादे

---

[1] In the margin

उत्पन्नोत्पन्नोऽर्थः सम्बन्धवान् यद्युत्पद्यते, सम्बन्ध उत्पन्नोऽपि न शब्दे स्यात्। तेन असम्बन्धिस्वभावस्य स्वभावविपर्ययमन्तरेण तद्भावायोगात्। अर्थेन[6] सहोत्पन्नस्य अन्यतः सिद्धस्यानुपकारिणि शब्देऽसमाश्रयत्वाच्च।

तस्यापि तदुत्पत्तिसहकारित्वे समर्थस्य नित्योत्पादनप्रसंगः। अनपेक्षत्वात्, नित्यस्यानुप[7]कारात्। असामर्थ्येऽपि पश्चाद् अशक्तिः स्वभावात्यागात्। 490b

सम्बन्धे नायं दोषो विकल्प्यते ॥२३५॥

न हि भावश्लेषापेक्षी पुरुषभावनाप्रतिभासी तदपेक्षालक्षणः सम्बन्धः।

कल्प्यमाने। न स्वभावविपर्ययः शब्देषु युक्तः। योसौ पश्चादर्थेन सम्बन्ध उत्पद्यते। तत्सम्बन्धिस्वभावता पूर्वन्नास्ति सम्बन्धाभावात् पश्चात्तु भवतीति स्वभावविपर्यय शब्दाना स्यात्। स च नित्यत्वान्न युज्यते।

अथेत्यादि व्याख्यान। पूर्व**सम्बन्धिविनाशे** विन[5]ष्ट सम्बन्धो यस्य शब्दस्य तस्यार्थान्तरे पश्चादुत्पन्ने वैगुण्य सम्बन्धवैकल्य तस्माच्चार्थानाम्पश्चादुत्पन्नानामवाच्यता मा भूदिति **कृत्वोत्पन्नोत्पन्नोर्थः सम्बन्धवान्** अगृहीतसम्बन्ध एव **यद्युत्पद्येत**। तथापि **सम्बन्ध उत्पन्नोपि न शब्दे स्यात्**। शब्दस्तेन सम्बन्धेन तद्वान्न स्यात्। किङ्कारण (।) तस्य शब्दस्य **तेन** पश्चादुत्पन्नेन **सम्बन्धेनासम्बन्धि[6]स्वभावस्य तद्भावायोगात्**। तेन सम्बन्धेन सम्बन्धिस्वभावायोगात्। कदा (।) **स्वभावविपर्ययमन्तरेण**। पूर्वासम्बन्धिस्वभावत्यागमन्तरेण दोषान्तरमप्याह। **अर्थेन सहोत्पन्नस्य** च सम्बन्धस्य शब्दादन्यतः **सिद्धस्यानुपकारिणि शब्दे** तस्य**असमाश्रयत्वाच्च**। तद्भावायोग एव। (२३४)

अथ **तस्यापि** शब्दस्य **तदुत्पत्तिसहकारित्वे** सम्बन्धो[7](त्प)त्ति प्रति सहका- 151b
रित्वे कल्प्यमाने। **समर्थस्य** शब्दस्य **नित्योत्पादनप्रसंगः**। सर्वकाल सम्बन्धजननप्रसग। कि कारण (।) **सहकार्यनपेक्षत्वात्**। अनपेक्षत्व पुन**र्नित्यस्य** शब्दस्य सहकारिभि**रनुपकारात्**। अथासमर्थ सहकार्यपेक्षया जनयेत्। तदा प्राक्सम्बन्धजनन प्रत्य**सामर्थ्येपि पश्चादप्यर्थे** सन्निधिकालेप्य**शक्तिः**। कि कारण (।) पूर्वासमर्थ**स्वभावात्यागात्**। वस्तुभू[1]ते **सम्बन्धे** यो **दोषोयम्विकल्पिते** बुद्धिसन्दर्शिते **सम्बन्धे नास्ति**।

न हीत्यादि व्याख्यान। **तदपेक्षा** तेषाम्भावाना परस्परापेक्षा कुतश्चिन्निमित्ताद् बुद्धिपरिकल्पितात्। **तल्लक्षणस्सम्बन्धः पुरुषभावनाप्रतिभासी** (।) पुरुषस्य भावनाभ्यासवती विकल्पबुद्धिस्तत्र प्रतिभासितु शीलमस्येति कृत्वा। स चैव पौरुषेयस्सम्बन्धो न भावश्लेषापेक्षी। भावश्लेषो मिश्रता तदपेक्षी न भवति[2]

सोऽयं नित्यानामपि स्वभावमपरावर्त्तयन् कुतश्चित् स्वयमुत्प्रेक्ष्य घटयेदिति न च तावता ते च्यवनधर्माणः।

यदुक्तं प्राग्, आश्रयोपायेन आश्रितसम्बन्धस्य[2] विनाशात् अनित्य इति। तत्र—

नित्यत्वादाश्रयापायेऽप्यनाशो यदि सम्मतः।
नित्येष्वाश्रयसामर्थ्यं किं येनेष्टः स आश्रयः ॥२३६॥

श्रूयते जात्याश्रययोर्नित्यत्वे[3] आश्रयस्य सहविनाशोऽपि नेति। अथ नित्येषु आश्रयसामर्थ्यम् न पश्यामो, येन अस्य आश्रयः स्यात्। कृतस्य करणाभावात्, कारकस्य चानपेक्षत्वात्[4]।

आश्रयाद् जातेः सम्बन्धस्य च व्यक्तेः उपकाराश्रय इति चेत्।

ज्ञानोत्पादनहेतूनां सबन्धात् सहकारिणाम्।

सर्वेषोम्भावाना प्रकृतिभेदेन स्वस्वरूपावस्थानात्। केवल **सोयं** पुरुषो **नित्यानामपि स्वभावमात्मीयमपरावर्त्तयन्** सम्बन्धिस्वभाव स्थिरमपनीयान्य सम्बन्धिस्वभावमनादधत्। **कुतश्चिदिति** तद्भावे कस्यचिद् भावदर्शनात्। अन्तस्तथाभूतव्यवहारवासनापरिपाकाद्वा। **स्वयमुत्प्रेक्ष्येदमिह** सम्बन्धमिति **घटयेदिति।** पुरुषव्यवहाराभ्यासात्तेपि नित्याभि[3]मतास्तथा स्यु.। पुरुषोपकल्पितसम्बन्धवन्त. स्यु.। **न च तावता ते** पूर्वव्यवस्थितादसम्बन्धिस्वभावा(च्) **च्यवनधर्माणः।**

एतदुक्तम्भवति। बुद्धिपरिकल्पित सम्बन्धस्त्वत्परिकल्पित. सम्बन्धस्त्वत्परिकल्पितेष्वपि नित्येषु न विरुध्यते। तस्मात् स एवाश्रयितु युक्तो न वास्तव इति। **यदुक्तं प्रागाश्रयस्यापायेन** कारणेनाश्रितस्य **सम्बन्धस्य विनाशादनित्यः** सम्बन्ध **इति। तत्रैतस्मिन्** दूषणे **नित्यत्वात्** स[4]म्बन्धस्याश्रयापायेऽप्यनाशो **यदि** जातिवदित्युच्यते। यथा जातेर्**नित्यत्वादाश्रयनाशेऽप्यनाशस्तद्वत्** सम्बन्धस्येति। (२३५)

अत्राप्याह। **नित्येष्वाश्रयाभिमतेषु** जात्यादिष्वपि कायषु किमा**श्रयस्य सामर्थ्यन्नैव। येनेष्टः सो**किञ्चित्कर आ**श्रयः। श्रूयत** इत्यादि विवरण। श्रूयत इत्यनेन प्रसिद्धिमात्रमेतन्निर्वस्तुकमित्येतदाह (।) व्यक्त्याश्रिता। केवलन्नित्येषु जात्यादि[5]ष्वा**श्रयसामर्थ्यमा**श्रयकृतमुपकारन्न **पश्यामो येनासावाश्रयाभिमत आश्रयः स्यात्।** कि कारण (।) **कृतस्य** सिद्धस्वभावस्य **कारणाभावात्। अकारकस्य चाश्रयस्यानपेक्षत्वात्।** (२३६)

आश्रयात् सकाशाज्जातेः **सम्बन्धस्य च व्यक्तिरभिव्यक्तिरूपस्य** म्भ (?तु) योग्यता भवति। सैव चाश्रयकृत **उपकारस्तेन** कारणेन पदार्थ **आश्रय इति चेत्।**

उत्तरमाह। **ज्ञानेत्या**[6]दि। **सहकारिणां ज्ञानोत्पादनहेतूनां** प्रदीपादीना

तदुत्पादनयोग्यत्वेनोत्पत्तिर्व्यक्तिरिष्यते ॥२३७॥
घटादि[5]ष्वपि युक्तिज्ञैरविशेषेऽविकारिणाम् ।
व्यञ्जकैः स्वैः कुतः कोर्थो व्यक्तास्तैस्ते यतो मताः ॥२३८॥

सहकारिणः सकाशाद् उपादानापेक्षत्वात् ज्ञानजननंप्रति **क्षणा**[6]**न्तरस्योत्पत्ति-रेव घटादीनामभिव्यक्तिः** । **अन्यथाऽनपेक्ष्य तदुपकारं ज्ञानजननप्रसङ्गात्** ।

सामर्थ्यकारिणश्च जनकत्वात्[7], **तस्य तदात्मकत्वात्** । **अर्थान्तरत्वेऽनुपकार-** 491a
प्रसंगात् । **सामर्थ्याच्च ज्ञानोत्पत्तेः घटादीना नित्य**[1]**मग्रहणं स्यात्** । **आलोक-**

सम्बन्धाद् योग्यदेशावस्थानात् सकाशात् **तदुत्पादनयोग्यत्वेन** स्वानुरूपज्ञानोत्पादनसामर्थ्येन **घटादिष्वपि** व्यग्येषु **योत्पत्तिः** सैव **युक्तिज्ञैर्न्यायविद्भिर्व्यक्तिरिष्यते** । जात्यादीनान्तु व्यङ्ग्यानान्नित्यत्वादविकारिणां व्यञ्जकात्सकाशा**दविशेषे** । ज्ञानोत्पादनयोग्यतानुत्पत्तौ । **स्वैर्व्यञ्जकैस्तेषा** जा[7]त्यादीना **कोर्थ.** क उपकार· 152a
कृत (।) नैव कश्चित् । यतस्ते जात्यादयस्तैर्व्यञ्जकै**र्व्यक्ता मता**. । (२३७)

सहकारिण इत्यादिना व्याचष्टे । सहकारिण प्रदीपादे **सकाशात्** किम्भूता**दुपादानापेक्षात्** पूर्वको (ज्ञानजननासमर्थो)[11] घटादिलक्षण उपादानकारण समर्थस्य घटादिलक्षणस्य घटापेक्षत्वात् ।[3] स्वविषय**ज्ञानजनन** प्रति योग्यस्य **क्षणान्तरस्योत्पत्तिरेव घटादीनामभिव्यक्ति**. । **अन्यथा** यदि प्रदीपादेस्सकाशात् ज्ञानोत्पादनयोग्यता न लभन्ते घटादयस्तदा**नपेक्ष्य तदुपकारं** प्रदीपोपकार घटादीना **ज्ञानजननप्रसङ्गात्** ।

अथ प्रदीपादि· प्रागसमर्थस्य व्यग्यस्य सामर्थ्य करोतीतीष्यते । तदा **सामर्थ्यकारिणश्च** प्रदीपादेर्घटादीन्प्रति **जनकत्वात्** । कि कारण (।) **तस्य** सामर्थ्यस्य **तदात्मकत्वाद**व्य[2]ग्यात्मकत्वात् । तस्य जनने घटादिरेव जनित स्यात् ।

अथ माभूदेष दोष इति प्रदीपादिकृतस्य सामर्थ्यस्य व्यग्यादर्थान्तरत्वमिष्यते । तदा**र्थान्तरत्वे च** सामर्थ्यस्याभ्युपगम्यमाने । भावस्य घटादे प्रदीपादिभि**रनुपकारप्रसङ्गात्** । न ह्यन्यस्मिन् कृतेन्य उपकृतो भवत्यतिप्रसगात् । यच्च प्रदीपादिकृत **सामर्थ्य**मर्थान्तिरन्तस्माच्च घटादि**ज्ञानो**[3]**त्पत्ते**स्सामर्थ्यमेव सर्वकाल गृह्येतेति स्वविषयज्ञानाजननाना **घटादीनां नित्यमग्रहण**प्रसङ्गात् । इष्यते च घटादीना ग्रहणात् । तदाप्यनालोकापेक्षग्रहणप्रसंगात् । **आलोकमनपेक्ष्य** घटादीनाङ्**ग्रहणम्प्रसज्येते**त्यर्थ । आलोकानपेक्षैव कथमिति चेदाह । **अनपे-**

---

[1] In the margin. [2] "**तदपेक्षत्वात्**" is missing.

मनपेक्ष्य ग्रहणं प्रसज्येतेति। अनपेक्षाऽऽत्मानुपकारात्। तद् इमे स्वविषयविज्ञानजनने परं[2] अपेक्षमाणाः, ततः स्वभावातिशयं स्वीकुर्वन्ति। तेनास्य ते जन्या एव। ज्ञेयरूपासादनात्तु ज्ञानवशेन कार्यातिशयवाचिना शब्देन विशेषख्यात्यर्थं[3] व्यंग्यमित्युच्यते। नैवं जातिसम्बन्धादयः कथंचिदनुपकार्यत्वात्। अनुपकारिणा नैव व्यक्ता युज्यन्ते।

सम्बन्धस्य च वस्तुत्वे[4] स्याद्भेदाद् बुद्धिचित्रता।

स चाय सम्बन्धो वस्तु भवन्नियमेन शब्दार्थाभ्यां भेदाभेदौ नातिवर्त्तते। रूपं हि तस्य स्वभावस्यातत्त्वमेव अन्यत्त्वमित्युक्तं प्राक्।

स[5] चायं चक्षुर्ग्राह्यः सन् स्वबुद्धौ तदन्यविवेकेन रूपेणाप्रतिभासमानः कथ-

---

क्षेत्यादि। येय घटादीनामालोकानपेक्षा प्रसक्ता सा **आत्मानुपकारा**[4]त् प्रदीपादिभिर्घटाद्यात्मनोनुपकाराद् व्यतिरिक्तस्य हि सामर्थ्यस्य करणेन घटादीना कश्चिदुपकार। **तदिति** तस्माद् **इमे** व्यग्या **स्वविषयज्ञानजनने। परम्प्रदीपादिकमपेक्षमाणाः।** तत इति परस्मात् **स्वभावातिशयं** ज्ञानजननयोग्य स्वरूप **स्वीकुर्वन्ति** (।) **तेन** कारणे**नास्य** प्रदीपादेस्ते व्यग्याभिमता **जन्या एव।** यदि जन्या[5]. कस्माद् व्यङ्ग्या इत्येवम्व्यपदिश्यन्त इत्याह। **ज्ञेयरूपे**त्यादि। व्यञ्जकात् प्रदीपादेस्सकाशाज्ज्ञेयरूपस्य ग्राह्यरूपस्यासादनाल्लाभात्तु कारणादवश्य तद्विषय ज्ञानम्भवति(।)अतो **ज्ञानवशेन। कार्यातिशयवाचिना।** अगृहीतज्ञान कार्य कार्यातिशयस्तद्वाचिना व्यग्यादि**शब्देन।** अनागृहीतज्ञानेभ्य कार्येम्यो **विशेषख्यात्यर्थं।** यदावश्यकेणो[6](?नो)पात्तज्ञानन्तदेव जन्यमपि सद् **व्यङ्ग्यमित्युच्यते।** यत्तु नैवभूतन्तत्कार्यमेवेत्युच्यत इत्येव प्रसिद्ध्यर्थ व्य(ङ्ग)ग्या ख्याप्यन्त इत्यर्थ। **नैवं जातिसम्बन्धादय** इति। जातिश्च सम्बन्धश्च तावादी येषा। आदिशब्दादन्यस्यापि नित्याभिमतस्याश्रितस्य परिग्रह। **कथंचिदाश्रयाभिमतेनानुपकार्यत्वात्।** तेनानु-
152b **पकारिणा नैव व्यक्ता युज्यन्त** इति स[7]म्बन्ध·।

न च सम्बन्धस्त्रिप्रमाणक इति दर्शयितुमाह। **सम्बन्धस्य च वस्तुत्वे** सम्बन्धिभ्या सम्बन्धस्य **भेदात्** तृतीय सम्बन्धाख्यो भावो जात। स च यद्युपलब्धिलक्षणप्राप्तस्तदा पदार्थत्रयालम्बनत्वेन **स्याद् बुद्धिचित्रता। स चायं** शब्दार्थयो**स्सम्बन्धो वस्तु भवन्नियमेन शब्दार्थाभ्यां भेदाभेदौ नातिवर्त्तते** क्रामति। भेदाभेदव्यतिरिक्त प्रकारो भविष्यतीति चेदाह।[1] **रूपं हीति** यतो रूप स्वभावो वस्तु **तस्य स्वभावस्यातत्त्वमेवातद्भाव एवान्यत्त्वमित्युक्तं** प्राक्। "रूपस्यातद्-

न्तथा स्यात्। अविवेकादर्शनयोर्विवेकसत्ता विपर्ययाश्रय[6]त्वात्। अन्यथा तत्स्थितेरभावप्रसङ्गः। ते च अतीन्द्रियत्वात् अप्रतिभासमानेऽपि न दोष इन्द्रियादिवदिति चेत्।

न। ततोऽप्रतिपत्ति[7]प्रसंगात्, अप्रसिद्धस्य च अज्ञापकत्वात्। सन्निधिमात्रेण ज्ञापनेऽव्युत्पन्नानामपि स्यात्। 491b

नानुमानात् प्रतिपत्तिः, लिङ्गाभावात् दृष्टान्तासिद्धेः[1]। तत्राऽपि इन्द्रियत्वेन

भूतस्यान्यत्त्वाव्यतिक्रमादि"त्यत्रान्तरे।[1]

स चायं सम्बन्ध ऐन्द्रिय सन् स्वबुद्धौ सम्बन्धालम्बनाया बुद्धौ। तदन्यविवेकेनेति। तस्मात्सम्बन्धादन्यस्सम्बन्धी ततो विवेकेनार्थान्तरेण रूपेणाप्रतिभासमानः कथन्तथा स्यात् तदन्यविवेकि रूप कथ स्यात्। कि[2] कारण(।)दृश्यस्य प्रत्यक्षादर्थादविवेकोऽपृथग्भाव (।) यच्चादर्शनन्तयोर्दृश्याविवेकादर्शनयोर्यथाक्रम विवेकसत्ता विपर्ययाश्रयत्वात्। विवेकविपर्ययो विवेकाभावस्तस्य दृश्याविवेक आश्रय.। सत्ताविपर्ययोसत्त्वन्तस्य दृश्यादर्शनमाश्रय। तेनायमर्थ (।)यद्यतो भेदेन नोपलभ्यते तत्ततो नान्यत्। यद्यत्[3] दृश्य सन्नोपलभ्यते तन्नास्तीति या[3]वत्।

अन्यथेति। यद्यतोर्थान्तरमभ्युपगत दृश्य च तस्य तस्मादविवेके सत्यदर्शने च यदि विवेक सत्ता च कल्प्यते। तदा तत्स्थितेरविवेकाभावयोर्व्यवस्थितेरभावप्रसङ्गः। तथा हि दृश्याविवेकादर्शने अस्या व्यवस्थाया निमित्ते। ते चेति[3] विवेकाभावयोर्न साधनमिष्टे तदा तद्व्यवस्थोच्छिद्यते। अतीन्द्रियत्वात् सम्बन्धस्य विवेकेन बुद्धावप्रतिभास[4]नेपि न यथोक्तदोष इन्द्रियादिवदिति चेत्। यथेन्द्रियञ्चक्षुरादि रूपादिभ्यो विवेकेन बुद्धौ न प्रतिभासतेऽथ च व्यतिरिक्तमस्ति। तद्वत् सम्बन्धो भविष्यतीत्यर्थ

नेत्या चार्य। नातीन्द्रियस्सम्बन्ध। ततोतीन्द्रियात् सम्बन्धादर्थस्याप्रतिपत्तिप्रसङ्गात्। कि कारण। अप्रसिद्धस्य स्वेन रूपेणानिश्चितस्याज्ञापकत्वात्। न हि येन सह यस्य सम्बन्धो[5] न गृह्यते तद्द्वारेण तस्य प्रतीतिर्युक्ता।

अथाज्ञात एव सम्बन्धोर्थ ज्ञापयतीन्द्रियवदित्याह। सन्निधिमात्रेणेत्यादि। सम्बन्धस्य सन्निधिमात्रेण सत्तामात्रेणार्थज्ञापनेभ्युपगम्यमाने शब्दार्थसम्बन्धम्प्रत्यव्युत्पन्नानाम[6]प्यस्यार्थस्यायम्वाचक इति प्रतिपत्ति स्यात्।

स्यान्मतम् (।) अस्त्येव सम्बन्धस्य विवेकेनोपलब्धि। सा तु न प्रत्यक्षात्

---

[1] B. यच्च। [2] B. ते चेद्। [3] B. प्राप्य।

साधनापेक्षणात्।

इन्द्रियादिषु तुल्यमिति चेत्। न। तेषामन्यथानुमानात्। ज्ञानं केषुचित् सत्सु अन्वयवत् व्यतिरेकवच्च तन्मात्रादसम्भवं तद्व्यतिरेकापेक्षां च साधयति।

ततः कार्यद्वारेणेन्द्रियसिद्धिः। नैवं सम्बन्धस्य।

तस्यैवासिद्धौ तत्कार्यस्यैव ज्ञानाभावात्[3]। न हि शब्दरूपमर्थो वा लिंगम्। तयोः सर्वत्र योग्यत्वात्। अर्थविशेषप्रतीतिसमाश्रयस्य अप्रत्यायनात् न प्रतीति·।

किन्तर्ह्यनुमानादित्यत आह। **नानुमा[0]नात् प्रतिपत्तिस्सम्बन्धस्य।** कुतो लिङ्गाभावात्। न हि सम्बन्धसाधन किञ्चिल्लिङ्गमस्ति। अर्थप्रतीतिरपि न लिङ्ग **दृष्टान्तासिद्धेः।** न हि क्वचिद् दृष्टान्ते सम्बन्धकार्यार्थप्रतीति प्रतिपन्ना। किङ्कारण (।) **तत्रापि** दृष्टान्तत्वेनोपनीते सम्बन्धस्यातीन्द्रियत्वेन कारणेन **साधनापेक्षणात्।** न चास्ति साधन (।) तत्रापि दृष्टान्तासिद्धे।

[53a तदेतद् दृष्टान्तरहितत्व**मिन्द्रियादिष्**वतीन्द्रिये[7]षु सत्तासाधकेनुमाने क्रियमाणे **तुल्यमिति चेत्। न** तुल्य। कुत। **तेषामिन्द्रियादीनामन्यथानुमानात्।** नप्रत्यक्षाणामिन्द्रियादीनामिदन्तया किचिद् रूप प्रसाध्यते। येन तुल्यो दोष स्यात्। किन्तु **ज्ञानं** कार्यभूत प्रत्यक्ष **केषुचिदालोकादिषु सत्सु** व्यतिरेकान्वयवत्। निमीलितलोचनाद्यवस्थासु **व्यतिरेकवत्।** उन्मीलित[1]लोचनाद्यवस्थासमन्वयवत्। तदेवभूत ज्ञा[1]न कार्यन्तन्मात्रासम्भव। येषु सत्स्वप्यभवद् दृष्टन्तन्मात्रादस**म्भवमनुत्पत्तिमात्मन** साधयति। **तद्व्यतिरिक्तापेक्षा च।** यथा सन्निहितकारणाद् व्यतिरिक्तकारणापेक्षाञ्च **साधयति।**

अस्ति किमपि कारणान्तरमिति। **ततो** यथोक्तान्वयात्[2] **कार्यद्वारेणेन्द्रिय**सिद्धिः। कारणान्तरवैकल्यासम्भविनश्चाकुरादयोत्र दृष्टान्त। **नैवं सम्बन्धस्य** चक्षुरादिव[2]त्कार्यव्यतिरेकेणानुमान। विशेषानुमानात्। तथा हि सम्बन्धोस्तीति यदनुमानन्तद्विशेषस्यैवानुमान।

तच्चायुक्त। कि कारण। **तस्यैव** सम्बन्धस्यासिद्धौ सत्यान्तत्कार्यस्यैव सम्बन्धकार्यस्यैव **ज्ञानस्याभावात्।** शब्दार्थो लिङ्गमिति चेदाह। **न हीत्यादि।** न हि **तत्र** सम्बन्धविशेषे **शब्दरूपमर्थो वा लिङ्गं।** किं कारण(।)**तयोः** शब्दार्थयो**स्सर्वत्र योग्यत्वात्।** सर्वस्य शब्दस्य सर्वस्मिन्नर्थे वाचकत्वेन योग्यत्वात् सर्वस्य चार्थस्य सर्वस्मिन् शब्दे वाच्यत्वेन योग्यत्वात्।[3] अर्थविशेषप्रतीतेश्च कारणं सम्बन्धविशेषस्तस्य **चार्थविशेषप्रतीतिसमाश्रयस्य** सम्बन्धस्यानियताभ्यां शब्दार्था-

---

[1] B. **कार्यतन्मात्रा०।** [2] B. **०क्तान्यायात्।** [3] B. **सर्वस्य चार्थस्य सर्वस्मिन् शब्दे वाच्यत्वेन योग्यत्वात्**—added

न ह्यसत्यां सम्बन्धविशेषेण सा युक्ता। तस्यां वा अनिमित्तायां तद्विशेषः प्रतीतिनियमवत् प्रतिपादनमप्यनिमित्तं शब्दानां किन्नेष्यते? ततस्तल्लिङ्गं सदृशं अविशेषेण सम्बन्धं गमयेत्। तस्माद[5]विशेषेणैव सर्वस्यार्थस्य प्रतीतिः स्यात्। तस्मात् सम्बन्धसिद्ध्याऽर्थप्रतीतेर्न कश्चित् सम्प्रदायं अपेक्षेत।

सम्प्रदायसहितस्य लिङ्गत्वमिति चेत्। तत् किमनया परम्परया? स एव सम्प्रदायापेक्षोऽर्थज्ञापनं किन्न करोति?

भ्यामप्रत्यायनात्। प्रत्यायने वा विशेषाभावे न सर्वसम्बन्धप्रतीतः सर्वार्थगतिः स्यात्। न चैवम् (।) तस्मादनियता[4]भ्या शब्दार्थाभ्यामप्रतीतिरस्य सम्बन्धस्य।

यदि च शब्दार्थाना सम्बन्धेन सह सम्बन्धविशेष सिद्ध स्यात् क्वचित्तदा सम्बन्धविशेषप्रतीतिः स्यात्। न ह्यसत्या सम्बन्धविशेषेण शब्दाना सम्बन्धसिद्धौ सा सम्बन्धविशेषप्रतीतिर्युक्ता।.

अथ पुनस्सम्बन्धमन्तरेण शब्दात् सम्बन्धविशेषप्रतीतिरिष्यते तस्याम्वा सम्बन्धप्रतीतावनिमित्तायामिष्यमाणाया[5]न्तद्विशेषः प्रतीतिनियमवत् सम्बन्धविशेषप्रतीतिप्रतिनियमवद्[1] अर्थप्रतिपादनमप्यनिमित्त शब्दानां किन्नेष्यते। तच्छब्दार्थस्वभाव लिङ्गं सदृशन्तुल्यं सर्वसम्बन्धे[2](।) ततश्चाविशेषेण शब्द सर्व सम्बन्धङ्गमयेत् तदाऽविशेषेणैव सर्वस्यार्थस्य प्रतीतिः स्यात्। सर्वस्य पुरुषस्य गृहीतसमयस्यागृहीतसमयस्य[3] सर्वार्थप्रतीति स्यात्। तस्माद् यथोक्ते[6]न न्यायेन सम्बन्धसिद्ध्याऽर्थप्रतीतेः कारणान्न कश्चित् पुरुषोर्थप्रतीतौ सप्रदायं परोपदेशमपेक्षेत।

न केवलस्य शब्दस्य सम्बन्धसिद्धौ लिङ्गत्व किन्तु संप्रदायसहितस्य लिङ्गत्वमिति चेत्। तत्किमिदानीमनया परम्परया। सम्प्रदायस्तत शब्दस्य लिङ्गत्वन्तस्मात् सम्बन्धप्रतीतिस्ततोर्थस्य प्रत्यायनमिति किमनया परम्परया।[7] स एव 153b
शब्दः केवलो वस्तुभूतसम्बन्धरहितस्सम्प्रदायापेक्षोर्थज्ञापनं किन्न करोति येन सम्बन्धोपरः कल्प्यते।

अत एवार्थप्रतीत्यन्यथानुपपत्त्यापि शक्तिसम्बन्धकल्पना निरस्ता। शक्तिमन्तरेण सकेतबलादेवार्थप्रतीतिसम्भवात्।[4] तेन "सम्बन्धस्त्रिप्रमाणक" इति यदुच्यते तदपास्त।

---

[1]B. तद्विशेषप्रतीतिप्रतिनियतवत्। [2]B. तुल्यं सम्बन्धः।
[3]B. च—added. [4]B. सद्भावात्।

492a स च शब्दो यदभिप्रायैः प्रयुज्यमानो दृष्टोऽन्यथा न दृष्टः। दर्शना[7]दर्शनाभ्यां धूमादिवत् प्रतीतिं जनयतीति अविनाभावाख्यः सम्बन्धः। न चात्र अन्यस्य सामर्थ्यं पश्यामः[1]।

अथापि शब्दार्थयोः सम्बन्धो नान्यस्य--

ताभ्यामभेदे तावेव नातोऽन्या वस्तुनो गतिः ॥२३९॥

रूपभेदनिबन्धनत्वात् व्यवस्थान्तरस्य। तद्रूपं तु तदेव स्यात्।[2] धर्मभेदस्तु स्यात् पूर्वोक्तेन क्रमेण। स चाविरुद्ध एव, न तु वस्तुभेदः। न भेदाभेदौ मुक्त्वा वस्तुनोऽन्या गतिः।

तस्य वस्तुनो लक्षण[3]त्वात्। रूपस्य चैतद् विकल्पानतिवृत्तेः। किञ्च।

स च शब्दो यदभिप्रायैर्यदर्थप्रतिपादनाभिप्रायैः पुरुषैः प्र[1]युज्यमानो दृष्टः समयकालेऽन्यथा न दृष्ट इति विवक्षितार्थविपर्ययेण प्रयुज्यमानो न दृष्टः। एतेनान्वयव्यतिरेकावुक्तौ। (२३८)

इति यथोक्ताभ्यान्दर्शनादर्शनाभ्यान्तस्यार्थस्य प्रतीतिञ्जनयति धूमादिवत्। स एव दर्शनादर्शनशब्दाभ्या सूचित शब्दार्थयोरविनाभावाख्यः सम्बन्धः। न चात्राप्रतीतिजनने यथोक्तमविनाभाव मुक्त्वान्यस्य वस्तुभूतस्य[2] सम्बन्धस्य सामर्थ्यम्पश्यामः। नापि तस्य सम्बन्धस्य सिद्ध्युपाय सिद्धिनिमित्त किंचित् पश्याम।

एवन्तावत् सम्बन्धिभ्या सम्बन्धभेदाभ्युपगमे दोषमुक्त्वाऽभेदाभ्युपगमेपि दोषमाह। अथेत्यादि। ताभ्यामिति सम्बन्धिभ्या सम्बन्धस्याभेदे सति। तावेव सम्बन्धिनावेव शब्दार्थौ केवलमिति न सम्बन्धो नाम कश्चित्। तत्त्वान्यत्त्वरहितस्तर्हि सम्बन्धो भवि[3]ष्यतीति चेदाह। नात इत्यादि। अतस्तत्त्वान्यत्वविकल्पादन्या नास्ति वस्तुनो गतिः।

रूपेत्यादि विरण।[1] रूपभेदः स्वभावभेद.। तन्निबन्धनत्वाद् व्यवस्थान्तरस्येति स्वभावान्तरव्यवस्थानस्य। यत्तु न भिन्नरूप किन्तु तद्रूप सम्बन्धिरूपमेवेष्ट सम्बन्धाख्यम्वस्तु। तत्तदेव स्यात्। सम्बन्धिस्वभावमेव स्यान्नान्यत्। कथन्तर्ह्यनयो सम्बन्ध इति[4] प्रतीतिरित्याह। धर्मभेदस्तु परिकल्पितः स्यात्। पूर्वोक्तेन क्रमेणान्यापोहविहितेन व्यावृत्तिभेदसमाश्रयेण। स च व्यावृत्तिभेदः। कल्पनाकृत एकस्मिन्नप्यविरुद्धः। न तु वस्तुभेद एकत्राविरुद्ध. किन्तु विरुद्ध एव। एकस्य परमार्थेन नानात्वायोगात् न भेदाभेदौ मुक्त्वा वस्तुनोन्या गतिः।

---

[1] B. वचनं।

भिन्नत्वाद्वस्तुरूपस्य सम्बन्धः कल्पनाकृतः।

इत्युक्तं प्राक्। न हि श्लेषलक्षणः सम्बन्धिनो[4]रशिलष्टेषु पदार्थेषु सम्भवति। न च तयोः सम्बन्धस्य अर्थान्तरमपि भवति। एवम्—

सद् द्रव्यं स्यात् पराधीनं सम्बन्धोऽन्यस्य वा कथम् ॥२४०॥

न हि सिद्धं सत् परमपेक्षते[5]। अनपेक्षत्वेन स्वतन्त्रश्च न सम्बन्धः। द्रव्यमिति स्वभाव उच्यते। स कथं परभावस्य श्लेषः स्यात्। न स्वभावान्तरस्य सत्तयाऽन्यः शिलष्टो नाम[6]। अशिलष्ठेन माभूत्, शिलष्टेन तु स्यादिति चेत्। न। यस्तौ श्लेषयेत्, तस्यैव ताभ्यां श्लेषासिद्धेः। तदिमौ यद्यर्थान्तरेण[7] शिलष्यतः 492b

---

कुतस्तस्य वस्तुनो रूपलक्षणत्वात् स्वभा[5]वलक्षणत्वात्। रूपस्य चैतद् विकल्पानतिवृत्तेः। भेदाभेदविकल्पानतिवृत्ते। भिन्नत्वाद् वस्तुरूपस्य शब्दार्थस्वरूपस्य। न् रूपश्लेषलक्षणस्सम्बन्धो भाविक. किन्तु कल्पनाकृत एवेत्युक्त प्राक्। "पुरुषस्य व्यवहाराभ्यासादससृष्टावपि ससृष्टौ तौ भासेते तद्वशात्सम्बन्धव्यवस्थेत्या" दिना। न हि श्लेषलक्षणस्सम्बन्धिनोः परस्परम्मिश्र[6]तालक्षण सम्बन्धोऽशिलष्टेष्वससृष्टेषु पदार्थेषु सम्भवति। शब्दार्थाना रूपश्लेषादर्थान्तरमेव तृतीयम्वस्तु सम्बन्ध इत्याह। न चेत्यादि। (२३९)

यस्मान्निष्पन्न सत् तदर्थान्तरम्पराधीनं कथ। सम्बन्धाधीन कथम्भवेत्। सम्बन्धाधीनश्च सम्बन्ध इष्यते द्विष्ठत्वात्। नापि तदर्थान्तरम्परश्लेषरूपत्वात्सम्बन्धो युज्यत इत्याह। द्रव्यम्पदार्थान्तरञ्च[7] कथमन्यस्य सम्बन्धिन सम्बन्धः 154a स्यात्।

एतेनार्थान्तरत्वे सम्बन्धस्य सम्बन्ध्याश्रितत्वम्परश्लेषरूपत्वञ्च यत्परेणेष्टन्तदुभय निरस्त।

यदि नामार्थान्तर कस्मात् पराधीन न भवतीत्याह। न हीत्यादि। यस्मान्न हि सिद्धं सत् परमपेक्षते। निष्पन्नस्य सर्वनिराशसत्वात्। अनपेक्षत्वेन स्वतन्त्रश्चान्यस्य न सम्बन्धः। [1]न चार्थान्तर सम्बन्धो युज्यते (।) यस्माद् द्रव्यमिति स्वभाव उच्यते पदार्थान्तरमेवोच्यते (।) स कथं परभावस्य सम्बन्धिनो श्लेषः स्यात्। नैव स्यात्। नापि श्लेषहेतुर्भवति। किं कारण। यस्मान्न स्वभावान्तरस्य तृतीयस्य सत्तयान्यः सम्बन्धिनो स्वभावः शिलष्टो नामाभूदशिलष्टेनासम्बद्धेन सम्बन्धाख्येन शिलष्टो भाव। शिलष्टेन तु शिलष्टः स्यादिति[2] चेत्।

नैतदेवं। किं कारणं (।) तस्यैव सम्बन्धाख्यस्य ताभ्यां सम्बन्धिभ्यां श्लेषा-

तदाऽतिप्रसंगः विशेषाभावात्।

किञ्च—

वर्णा निरर्थकाः सन्तः पदादिपरिकल्पिताः।
अवस्तुनि कथं वृत्तिः सम्बन्धस्यास्य वस्तुनः॥२४१॥

वाचको हि वचनांगेन तद्वान् स्यात्। सन्तोऽपि वर्णा अवाचकाः। तद् न तेषु वाच्यवाचकभावसम्बन्धो वर्त्तते। तद्वृत्तौ स्वरूपहानिप्रसंगात्[2]। क्रमविशेषेण वर्णा एव वाचका इति चेत्।

सिद्धेः। यस्सम्बन्ध. सृष्ट सन् **तौ** सम्बन्धिनौ **श्लेषयेत्। तदय**मित्यादि। **यद्यर्थान्तरेण** तृतीयेन सम्बन्धिनौ **श्लिष्यतस्तदातिप्रसंगः**। सर्वो येन केनचित् तृतीयेन श्लिष्ट. स्यात्। **विशेषाभावात्।** न हि सम्बन्धाभिमतस्यान्यस्य च पदार्थान्तरेण सम्बद्धत्वे कश्चिद् विशेषोस्ति। (२४०)

किञ्च।[3] वर्णा ये **सन्तो** वस्तुसन्तस्ते तावन्निरर्थकास्ततो न ते वाचकास्तेन न तत्र वाच्यवाचकसम्बन्धस्य वृत्ति। पदादेर्स्ताहि सार्थकत्वात् तत्र सम्बन्धवृत्तिर्भविष्यतीत्याह। **पदादिपरिकल्पित**मादिशब्दाद् वाक्यम्वाचकम्भवेत्। तस्मिश्च परिकल्पिते पदे वाक्ये वाऽवस्तुन्यवस्तुस्वभावे। कथ **सम्बन्धस्य** वाच्यवाचकत्वलक्षणस्य **वस्तुनो** वस्तुस्वभावस्य **कथम्प्रवृ[4]त्तिर्नैव**।

वाचको हीत्यादि विवरण। वाचको हि **वचनांगेनो**क्तिनिमित्तेन सम्बन्धाख्येन **तद्वान्** सम्बन्धवान् **स्यात्। सन्तोपि** विद्यमाना अपि **वर्णाः** प्रत्येकमर्थाप्रतिपादकत्वात्। साहित्याभावात्। नानाप्रयोक्तृप्रयुक्तेभ्यश्चार्थप्रतिपत्त्यदर्शना**दवाचकाः।**

तदिति तस्मान्न **तेषु** वर्णेषु **वाच्यवाचकभावसम्बन्धो वर्त्तते। तद्वृत्तौ** तेषु वाच[5]केषु वर्णेषु सम्बन्धस्य वृत्तौ सत्या सम्बन्धस्य यद्वाचकत्वाङ्गत्वन्तस्य हानिप्रसङ्गात्।

क्रमविशेषेणानुपूर्वी विशेषेणैकप्रयोक्तृप्रयुक्ता **वर्णा एव वाचका**स्ततो न यथोक्तदोष **इति चेत्।** तदुक्त।

"यावन्तो यादृशा ये च यदर्थप्रतिपादने।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधका.॥" (स्फोट० ६६)

एतदेव स्पष्टयति।

"तेषान्तु गुणभूतानामर्थ[6]प्रत्यायनं प्रति।
साहित्यमेककर्त्रादिक्रमश्चापि विवक्षितः॥ (स्फोट० ७०)

न। क्रमस्यानर्थान्तरत्वेन अभेदकत्वाद्। तद्रूपस्य क्रमान्तरेऽपि अविशेषात् तुल्या[3] प्रतिपत्तिः।

अर्थान्तरत्वमपि क्रमस्य पश्चात् निषेत्स्यमानत्वात्।

कर्त्रैकत्वनिमित्ते च क्रमे सति नियामक।
प्रयुञ्जानस्य यत्पूर्वम्बुद्धेभ्य· क्रमदर्शन॥ (स्फोट० ७१)
युगपद् दृष्टसामर्थ्यान्नैव[1] शक्ताः क्रमे यथा।
भावास्तथा क्रमे शक्ता यौगपद्ये न शक्नुयु॥" (,, ७३)

किञ्चार्थप्रत्यायन प्रति।

"अवश्यम्भाविनी नित्य प्रत्यासत्तिश्च[7] कस्यचित्। 154b
न तावता व्यपेतत्वादितरेषामनङ्गता॥ (,, ८३)
यथा विसर्जनीयस्य व्यवधाने न शक्तता।
तथैव शक्तिरन्येषामानन्तर्ये न विद्यते॥ (,, ८५)
न च यत्रैकशोऽशक्तिस्तत्र सर्वेषाम[2]शक्तता।
रथाङ्गानि हि दृश्यन्ते शक्तानि[3] वहनादिष्वि"ति॥(,, ८६)

नेत्यादिना परिहारमाह। नैतदेव। यस्माद् वर्ण्भ्य क्रमस्यानर्थान्तरत्व स्यादर्थान्तरत्वम्वा[4]। तत्र प्रथमे पक्षे **क्रमस्यान[1]र्थान्तरत्वेन** कारणेनाभेदकत्वाद-विशेषकत्वात्। न हि यद्यतोनर्थान्तरन्तत्तत्स्वभावस्य भेदकम्भवति। ततश्च **तद्रूपस्य** वर्ण्णात्मकस्य क्रमस्य। रस इत्यत्र यद्रूपन्तत **क्रमान्तरे** सा इत्येतस्मिन्नपि वर्ण्णवद**विशेषात् तुल्या** स्यादर्थ**प्रतिपतिः**।

व्यतिरिक्तस्तर्हि वर्ण्णेभ्य क्रम इत्यत आह **अर्थान्तरत्वम**पीति। वर्ण्णेभ्योर्था-न्तरत्वमपि **क्रमस्य[2] पश्चात् निषेत्स्यमानत्वात्**। यतो न युगपदुत्पन्नानाम्वर्ण्णाना[5] क्रम. सम्भवत्यप्रतीतं। अयुगपदुत्पन्नानामपि नार्थान्तरभूत क्रमोऽ युगपदुत्पा-दस्यैव क्रमरूपत्वात्। तथा हि लौकिका क्रम कथयन्तोऽयुगपदुत्पादमेव कथयन्ति। **तस्मा**दयुगपदुत्पाद एव क्रम। नापि क्रमोऽयुगपदुत्पन्नयोरेकस्य धर्म एकप्रतीतौ क्रमस्याप्रती[3]ते.। नाप्युभयधर्मः। एककालमुभयस्यासत्त्वादसतश्च कथ धर्म। तस्मात् पूर्वापरयोर्भावयो स्वरूपमेव क्रम उच्यते इति वक्ष्यति। पूर्वापररूपे च क्रमे तथापि न वर्ण्णा· क्रमेणार्थाधिगमनिमित्तम्भवति। प्रत्येकमर्थाप्रतिपादक-त्वात्। साहित्याभावात्। नियतक्रमवर्त्तिनामयौगपद्येन सम्भूय कारित्वानुपपत्तेश्च।

---

[1]B. सामर्थ्या नैव। [2]B. सर्वेष्वशक्तता।
[3]B. शक्तानि दृश्यन्ते। [4]B. च [5]B. नास्ति वर्णानां।

स्यादेतद् (।) यथा के[4]वलस्य बीजस्याकुर प्रत्यकारकत्वेपि सहकारिसन्निधाने विशिष्टत्वात् कारकत्व। तथा वर्ण्णा. प्रत्येकमसमर्था (अ)प्यानुपूर्वीविशेषेण विशिष्टा अर्थप्रतीतिहेतव इति।

तदयुक्त। अन्त्यस्य हि वर्ण्णस्य वर्ण्णान्तरसहितस्य केवलस्य चोच्चारणे को विशेषो यत्कृतावर्थप्रतीतिभावाभावौ स्याता।

नन्वयमेव विशेषो ये सहितासहित[5] ते।

सत्त्य। कार्यकरणे हि खलु तेषा साहित्य। न च ते यदा सन्तस्तदा व्याप्रियन्तेर्थप्रतीतौ। प्रत्येकमसमर्थत्वात्। नाप्यन्यवर्ण्णकालेऽसत्त्वात्।

एष तर्हि विशेषो येयं क्वचित् प्रवृत्ता पूर्ववर्ण्णोपलब्धि क्वचिन्नेति।

नैतदपि सार। न हि प्रवृत्तापूर्ववर्ण्णोपलब्धिरन्त्यम्वर्ण्णम्भेत्तुमर्हत्यसत्त्वात्। अविशेषे च यत्र कार्ये वर्ण्णाना प्रत्येकमशक्तिस्तत्र[6] सहितानामप्यविशेषात्। अन्धानामिवादित्यदर्शने।

तेन न च यत्रैकशो शक्तिरित्यादि निरस्त। रथाङ्गाना हि विशेषोत्पत्तौ सत्या साहित्यावस्थायाम्वहनादौ सामर्थ्यमन्यथा प्रत्येकवत् साहित्येपि सामर्थ्यन्न स्यात्। न च परस्परम्वर्ण्णाना कार्यकारणभावो येन पूर्वे वर्ण्णा. पारम्पर्येणार्थप्रतीतौ
155a शक्ता स्यु।[7] नापि पूर्ववर्ण्णजनितसस्कारसहितस्यान्त्यस्य वर्ण्णस्यार्थप्रतीतिहेतुत्वात् पूर्ववर्ण्णाना पारम्पर्येण सामर्थ्य। वर्ण्णानुभवाहितसस्कारस्य वर्ण्णेष्वेव स्मृतिहेतुत्वान्नार्थे। न हि गवानुभवाहितसस्कारोऽश्वे स्मरणमुपकल्पयति। न च पूर्ववर्ण्णाहितसंस्कारसहितान्त्यवर्ण्णदर्शने सत्यर्थप्रतीतेर्दृष्टवात् तद्धेतुत्व। सकेताभावेर्थप्रतीतेरभा[1]वात्। सकेतश्च सामान्यविषयो न वर्ण्णस्वलक्षणविषय इति कथम्वर्ण्णा: क्रमविशेषेण वाचका.।

किञ्च (।) केवलस्य वर्ण्णस्यार्थाप्रतिपादकत्वें सस्कारसहितस्यापि न तत् स्यात्। विशेषानुत्पत्ते (।) तत्कथ कश्चिद्वर्ण्ण· साक्षादर्थप्रतिपादने समर्थ: कश्चित् पारम्पर्येणेत्युच्यते। यदप्युच्यते।

"इत्थ क्रमगृहीताना युगपद् याथवा स्थिति।[2]
तत सा कारण न स्यान्नित्यमर्थधियम्प्रति॥"[1]

एव क्रमप्रतिपन्नानाम्वर्ण्णाना नित्यत्वाद् व्यापित्वाच्चाकाशदेशे या युगपत् स्थितिरवस्थानन्तदेव निमित्तमर्थप्रतीतिं प्रतीति।

तदयुक्तं। प्रतीयमानो हि शब्दार्थं प्रतिपादयति न सन्निधानमात्रेण। सर्व-

[1] Śloka, Sphot. 108

पदार्थप्रतिपादनप्रसङ्गात्। न चैककर्तृकाणा यौगपद्य प्रतिभासते। नापि नित्य[3]-त्व व्यापित्व च युज्यत इति वक्ष्यतीत्यसारमेतत्।

यच्चाप्युच्यते।

"यद्वा प्रत्यक्षत पूर्व क्रमज्ञातेषु यत्पर।
समस्तवर्णविज्ञानन्तदर्थज्ञानकारण ॥
तत्र ज्ञाने च वर्णाना यौगपद्य प्रतीयते।
नावश्य यौगपद्येन प्रत्यक्षस्थेन तद् भवेत् ॥"[1]

यत्परमित्युत्तर पूर्वापरपरामर्शेन (?ण) समस्तवर्णविषय विज्ञानन्तदर्थप्रतीति-निमित्त। त[1]द्भवेदित्यर्थप्रतिपादनम्भवेदन्येनापि यौगपद्यज्ञानेनार्थप्रतिपादनम्भवे-दित्यर्थ इति।

एतदप्ययुक्त। क्रमो हि प्रयोक्तृप्रयुक्तो न यौगपद्य। प्रयोक्तृप्रयुक्तावस्थेभ्यश्च वर्णेभ्योर्थप्रतीतिरिति न यौगपद्यादर्थप्रतीति स्यात्। सक्रमाणाञ्च वर्णाना यौगपद्येन ग्रहणे भ्रान्तत्वप्रसगात्। न च तेषा यौगपद्यमस्ति नित्यत्वा[5]-योगादिति।

"चित्ररूपा च ता बुद्धि सदसद्वर्णगोचरा।
केचिदाहुर्यया वर्णो गृह्यतेऽन्त्य पदे पदे ॥" (स्फो० ११)

प्रतिपदमन्त्यो वर्णो यया बुद्धया गृह्यते सा सन्निहितासन्निहितवर्णविषयत्वेन स्मरणप्रत्यक्षरूपाभ्यामुभयरूपेति केचिदाहु।

तदप्ययुक्तम्(।)एकस्य ज्ञानस्य प्रत्यक्षाप्रत्यक्षरूपविरोधात्। न च प्रत्यक्ष-मेवै[6]क सदसद्वर्णविषय। अभावविषयत्वविरोधात्। नापि स्मृतिरूप सन्निहित-विषयत्वेनानिष्टत्वात्। अत एव च पदादिग्राहकज्ञान कल्पितविषय स्यादिति।

अन्ये त्वन्त्यवर्णपरिज्ञाने सति पूर्ववर्णानुभवाहितसस्कारप्रबोधकारित स्मरण सर्ववर्णेष्वर्थप्रत्यायकमाचक्षते। तदाह।

अन्त्यवर्णे हि विज्ञाने सर्वसस्कार[7]कारित स्मरण यौगपद्येन सर्वेष्वन्ये 15
प्रचक्षते ॥ कथ क्रमेणानुभूताना युगपत्स्मरणमिति चेदाह।

"सर्वेषु चैवमर्थेषु मानस सर्ववादिना।
इष्ट समुच्चयज्ञान क्रमज्ञानषु सत्स्वपि ॥ (स्फो० ११३)
तेन श्रोत्रमनोभ्या च क्रमाद् वर्णेषु यद्यपि।
पूर्व ज्ञान परस्तात्तु युगपत् स्मरणम्भवेत् ॥

[1] Śloka, Sphot 109-10

वर्णानां न वाचकत्वे पदादि वाचकं स्यात्।

(वैयाकरणपक्षनिरास.—)

तदसति वर्णानां वाचकत्वे पदादि वाचकं स्यात्। तच्च न किंचित्। व्यतिरेकाव्यतिरेकयो[4]विरोधात्।

तस्माद् इन्द्रियविज्ञानविशेषानुबन्धि सभागवासनोपादानविकल्पप्रतिभासविभ्रमं पदं[5] एकावभासि मिथ्यैव। एकानेकत्वयोरयोगात्। अनेकया बुद्धया

तदारुढास्ततो वर्ण्णा न दूरेर्थावबोधनात्।
शब्दादर्थमतिस्तेन लौ[1]किकैरभिधीयत" इति ॥*

एतदप्ययुक्त। एककर्त्तृप्रयुक्तानामेवार्थप्रतिपादकत्वेनायुगपद्वृत्तिनामेवार्थप्रतिपादकत्वात्। न च स्मरणविषयाणा वर्ण्णाना यौगपद्यमध्यवसीयते। नियतक्रमाणामेव स्मर्यमाणत्वात्। नापि स्मृत्या वर्ण्णस्वलक्षणग्रहणम्प्रत्यक्षवत् स्पष्टप्रतिभासाभावात्। एकस्य च स्पष्टास्पष्टानेकाकारायोगाच्च। केवल स्मरणेनास्पष्टस्वभावा[2]नाम्वर्ण्णाना स्वाकाररूपाणा बाह्यवर्ण्णाभेदेनाध्यवसायात् बाह्यवर्ण्णानामेव वाचकत्वमुच्यते। अवाह्येषु च वर्ण्णेषु बाह्यवर्ण्णाध्यवसायेन पदादिपरिकल्पितमस्माभिरिष्यते।

एव मी मा स क पक्षे वर्ण्णाना वाचकत्वे निरस्ते पदाद्यपि निरस्तमेव। वर्ण्णादिव्यतिरेकेण पदादेरभावात्। तदुक्त।

न वर्ण्णव्यतिरेकेण पदमन्यद्धि विद्यते।
वाक्यम्वर्ण्णपदाभ्या च व्यतिरि[3]क्तन्न किञ्चनेति ॥

सप्रति वैयाकरणाना वर्ण्णादिव्यतिरिक्तम्पदादि निराकर्त्तुमाह। **तदसतीति**। तदित्युपन्यासे। तस्मादर्थे वा। **असति वर्ण्णानाम्वाचकत्वे पदादि वाचकं स्यात्तच्च** पदादि **न किञ्चित्**। कि कारणम् (।) वर्ण्णेभ्यस्तस्य पदादे-**र्व्यतिरेकाव्यतिरेकयोर्विरोधात्**। व्यतिरेके भेदेनोपलम्भ. स्याद् दृश्यस्य। अदृश्यत्वेप्यवाचकत्वमगृहीतस्य ज्ञापकत्वायोगात्।[4] अव्यतिरेकेपि वर्ण्णवदेवावाचकत्वप्रसग·।

यत एवन्तस्मात्। **इन्द्रियविज्ञानविशेषः** क्रमवर्ण्णग्राहिपटीय श्रोत्रविज्ञानन्तदनु**बन्धी** तदनुभवद्वारायातः। सभागवासना सजातीयविकल्पशक्तिरुपादान यस्य विकल्पस्य स तथोक्त। **सभागवासनोपादानश्चासौ विकल्पश्च तस्य** प्रतिभासविभ्रमः। प्रतिभासभ्रान्तिरेव **पदं** वाक्य **चैकावभासि[5] मिथ्यैव।**

---

[1] Rigs-pa = [2] Rims-pa = क्रम: [2] Ślokavārtika Ślok (Sphot.)

क्रमेण[1] **ग्रहणायोगात्। न तदेकया ग्राह्यं, वर्णानुक्रमेण ग्रहणात्**[6]**।**

एकवर्णग्रहणेऽपि अनेकबुद्धिव्यतिक्रमात्। क्षणिकत्वाद् बुद्धीनाम्। क्षणस्य

एतदुक्तम्भवति। क्रमवर्ण्यानुभवपृष्ठभावि मनोविज्ञानन्तान् वर्ण्यान् पदादि-रूपतयैकस्वभावानध्यवस्यतीति पदादिपरिकल्पित मिथ्यैव।

ननु वर्ण्यानाम्भिन्नानामेवानुभवात् कथमेकपदाद्यवभासी विकल्प उत्पद्यते। उत्पद्यते च। तस्माद् वर्ण्येष्वेकपदाद्यनुभवेन भाव्यमिति।

नैष दोष.। प्रतिपादको हि सकेतकाले वर्ण्यक्रममेकपदादिरूप[6]तया प्रति-पन्नमेव पर प्रत्येकमिद पदादीति सकेतयति। तदा च परस्यापि तत्र वर्ण्यक्रमे एकपदाध्यारोपिका बुद्धिरुत्पद्यते। तस्य चैकपदाद्यध्यारोपितैकाकारानुभवाहित-सस्कारस्य पुसो व्यवहारकालेपि वर्ण्यक्रमश्रवणादेकमिद पदम्वाक्यम्वेत्येकाकारस्य विकल्पस्योत्पत्तिर्भवति। एव पूर्वपूर्वश्रोतृणा पूर्वपूर्ववक्तृभ्यो[7] वर्ण्यक्रमेष्वेकत्वारो- 156a
पेण प्रतीतिर्भवतीत्यनादित्व पदादिव्यवहारस्य।

अत एवोच्यते। अनादिसभागवासनो विकल्पप्रतिभासविभ्रम पद वाक्य चैकावभासि मिथ्यैवेति। मिथ्यात्व च भिन्नानाम्वर्ण्यानामेकपदादिरूपतया स्मरणज्ञाने प्रतिभासनात्। तावतश्चैकानेकत्वयोर्विरोधेनायोगात्।[1]

अथ स्यादेकमेव पदादि प्रत्यक्षग्राह्यन्तत्कथ मिथ्येति।

तदयुक्त। यस्मान्न ह्येक पदादि। किं कारण। **अनेकया** वर्ण्यक्रमग्राहिण्या **बुद्धया क्रमेण ग्रहणायोगात्।** एकत्वे ह्येकयैव बुद्धया सकृद् **गृह्येत।** न त्वेकयैव बुद्धया पदादेर्ग्रहणमिति चेदाह। **न तदेकयेत्यादि। तत्** पदादि। **नैकया बुद्धया ग्राह्यं।** किं कारण। **वर्ण्यानुक्रमेण** वर्ण्यपरिपाटया पदवाक्ययोर्ग्रहणा[2]त्।

एकवर्ण्यरूपन्तर्हि पदमेकबुद्धिग्राह्यम्भविष्यतीत्यत आह। **एकवर्ण्येत्यादि।** एकवर्णनिष्पत्तिकालेप्यनेकबुद्धिव्यतिक्रमान्नैकवर्ण्य.। तथा हि भागित्युक्तेऽर्द्धमा-त्राकालो निरच्को गकारः प्रतीयते। साच्कस्तु मात्राकाल प्रतीयत इति कथमे-कवर्ण्यरूप पदम्विद्यते यदेकबुद्धिग्राह्य स्यात्। तेन यदुच्यते। सकलमेव गृह्णाति।

"अल्पीयसापि यत्नेन श[3]ब्दमुच्चरितम्मति.।
यदि वा नैव गृह्णाति वर्ण्यम्वा सकल स्फुट।
पृथक् च नोपलभ्यन्ते वर्ण्यस्यावयवा क्वचिदि"ति (।)

त्दपास्त। यथोक्तेन न्यायेन सावयवत्वाद् वर्ण्यस्य। न चैकया बुद्धया क्रमवता वर्ण्यभागाना ग्रहणं **क्षणिकत्वाद् बुद्धीनां।**

---

[1] Śloka, Sphot. 10, 11 [2] Ibid

493a **च एकपरमाण्वतिक्रमकालत्वात्। आधिक्ये विभागवतः पर्यवसानायो[7]गात्। अनेकाणुव्यत्ययनिमेषकालत्वात् निष्कृष्टस्य वर्णस्य निष्पत्तेः। स्मृतिरपि तत्कालैव। यथानुभवं स्मरणात्[1], अनुभवस्मरणानुक्रमयोर्विशेषानुपलक्षणाच्च नैकं पदादि। अभेदप्रतिभासत्वाद्[1] बुद्धेः। तदनेकत्वस्य निषेत्स्यमानत्वाच्च। तद् न वस्तु[2],**

स्यादेतद् (।) यावता कालेन वर्ण्णनिष्पत्तिस्तावत्काल एक· क्षणस्तत एकया बुद्धया पदस्य ग्रहणम्भविष्यतीत्यत आह। **क्षण[4]स्येत्यादि**। यावता कालेनैक परमाणु परमाण्वन्तरमतिक्रामति तावत्कालत्वात् क्षणस्य। विभागरहित काल स **चैकपरमाण्वतिक्रमकाल** एव युज्यते। यथोक्तात्कालादा**धिक्ये** क्षणस्याभ्युपगम्यमाने। **विभागवतः** शक्यविभागस्य क्षणस्य कालप**र्यवसानायोगात्**। तेनैकस्याप्यतिनिष्कृष्टस्य वर्ण्णस्यानेकक्षणेन **निष्पत्तिः**। कि कारण। **अनेके**त्यादि। **अनेक[5]स्या**णोर्व्यत्ययो व्यतिक्रमो यस्मिन्निमेषे सो**नेकाणुव्यत्ययो निमेषः**। तेन तुल्यकालत्वादन्त्यस्य **निष्कृष्टस्या**प्याकारादे**र्वर्ण्णस्य** परिसमाप्ते। तस्मान्नैकवर्ण्णरूप पदमेकबुद्धिग्राह्य। नाप्यनेकात्मकमेकपद स्मृतिग्राह्य। कि कारण(।) **यथानुभवं स्मरणात्**। यथानुभवो वर्ण्णानामनुक्रमेण तथा स्मृतिरपि तत्र क्रमभाविन्येवेति **स्मृतिरपि तत्कालैव**। स एवा[6]नुभवक्रमकालोस्या इति कृत्वा। एतच्चान्या प्रवृत्तिमधिकृत्योक्तमभ्यासवत्यान्तु प्रवृत्तौ क्रमेणानुभूतानामपि वर्ण्णाना यद्यपि युगपत्स्मरणम्भवति तथाप्यनु**भवस्मरणानुक्रमयोर्विशेषानुपलक्षणाच्च नैकम्पदादि**। तेनायमर्थ (।) अनुभवे योयम्वर्ण्णानामनुक्रम प्रतिभासते

156b स्मरणे च यो वर्ण्णानुक्रम प्रतिभासते तयोर्विशेषो भेदो नोप[7]लक्ष्यतेऽत कथमेक पदाद्येकबुद्धिग्राह्यमुच्यते।

नाप्यनेकमेव पदादि। कि कारणम् (।) **अभेदप्रतिभासत्वात् बुद्धेः**। अभेदनैकत्वेन प्रतिभासनाद् बुद्धे पदवाक्याकाराया तथा हि [illegible] चोच्चारिते एकमिद पद वाक्य चेति लोकस्य मतिर्भवति।

तेन यदुच्यते।

"शैघ्र्यादल्पान्तरत्वाच्च गोशब्दे सा भवेदपि।
देवदत्तादिशब्देषु स्फुटो भेद प्रतीयते" इति (स्फोट० १२१)

तदपास्तं।[1] वर्ण्णानुभवोत्तरकालमेकपदाध्यारोपिकाया बुद्धेरुत्पत्ते। **तदनेकत्वस्य** पदाद्यनेकत्वस्योत्तरत्र **निषेत्स्यमानत्वाच्च**।

---

[1] Yan-bahi-phyir =? Snan-bahi-phyir

एतद्विकल्पानतिक्रमात्। वस्तु च सम्बन्धः स कथं तदाश्रयः स्यात्? आश्रयणीयस्यायोगात्। एवमनाश्रितः स्यात्। तथा चासम्बन्धः स्यात्[3]।

तस्मान्न स्वाभाविकः शब्दार्थयोः सम्बन्धः। तदभिप्रायस्य प्रयोगादुत्पन्नोऽभिव्यक्तो वा शब्दः तदव्यभिचारीति तत्त्वमस्य सम्बन्धः। सा चोत्पत्तिरभिव्यक्ति[4]र्वा अव्यभिचाराश्रयः पौरुषेयीति पौरुषेय एव सम्बन्धः। तद्द्वारेण च अर्थप्रत्यायने शब्दानां न नियम इत्यपौरुषेयत्वेऽपि स एव[5] विप्रलम्भः।

नानेकमेव पदादि। **तदिति** तस्माद् (।) एकानेकत्वेन प्रतिभासनादेकानेकयोर्विरोधेनायोगात् पदादि **न वस्तु**। यद्वा तत्पदादि न वस्तु। एकानेकत्वायोगादिति भावः। कि कारण(।)तस्य वस्तुन **एतद्विकल्पानतिक्रमात्**। यस्माद् वस्त्वेकरूप[2] वा स्यादनेकरूप वा कदाचित् स्यान्न तूभयरूप विरोधात्। **वस्तु च** शब्दार्थ**सम्बन्धः** परेणेष्ट **स कथन्तदाश्रयः स्यात्**। अवस्तुभूतपदवाक्याश्रय स्यात्। तत्पदवाक्यमाश्रयोस्येति विग्रह। कि कारण। असत्त्वेन पदादेरा**श्रयणीयस्यायोगात्**। एवमित्याश्रयणीयाभावेऽनाश्रितः सम्बन्ध **स्यात्**। **तथा चानाश्रितत्वादसम्बन्धः** सम्बन्धः **स्यात्**। सम्बन्धिपा[3]रतन्त्र्याभावात्।

यत एवन्त**स्मान्न स्वाभाविकोपौरुषेय शब्दार्थयोस्सम्बन्धः**। किन्तु पौरुषेय एव सम्बन्ध। यस्मात्। **तदभिप्रायस्यार्थप्रतिपादनाभिप्रायस्य य प्रयोगान्तः** परिस्पन्दादि। तस्मा**दुत्पन्नः** शब्द एतत् स्वदर्शनेनोक्त। **अभिव्यक्तो वा शब्द** एतत्पराभिप्रायेणोक्त। **तदव्यभिचारी**। अर्थप्रतिपादनाव्यभिचारीति कृत्वा **तत्त्व**मर्थप्रतिपाद[4]नाभिप्रायकार्यत्व**मस्य** शब्दस्य **सम्बन्धः**। अर्थप्रतिपादनाभिप्रायेण शब्दप्रयोगात्। **सा चोत्पत्तिरभिव्यक्तिर्वा** शब्दस्यार्थप्रतिपादनम्प्रत्य**व्यभिचाराश्रयो**ऽव्यभिचारस्य निमित्त **पौरुषेयी** पुरुषकृता। **इति**। एव **पौरुषेय एव सम्बन्धः** शब्दार्थयो:। **तद्द्वारेण च** यथोक्तसम्बन्धद्वारेणा**र्थप्रत्यायने शब्दानान्न नियम इत्यपौरुषेयत्वेपि** शब्दाना **स[5] एव विप्रलम्भो** विसम्वाद। तथा **चापौरुषेयत्व**कल्पना व्यर्थे**वेति** भाव:। (२४१–२४२)

अपौरुषेयतापि वेदवाक्यानां मी मा स कै रिष्टा। **कर्त्तृणां** वेदस्य प्रणेतृणा**मस्मृतेर्लिङ्गात्। किल** शब्दश्चायुक्तताख्यापनाय।

यापीत्यादि व्याख्यान। बहूनामर्थाना कर्त्ता न स्मर्यते। न च ते तावताऽकृतका.। तद्यथा जीर्णकूपादय.। एव हेतोर्व्यभिचारादयुक्तरूपा[6]**पीयमपौरुषेयता। वेदवाक्यानां कर्त्तुरस्मरणाद् वर्ण्यते** जै मि नि ना। अस्यैवम्विधस्य वस्तुन. **सन्त्य-**

ग. नापौरुषेयता

अपौरुषेयतापीष्टा कर्तृणामस्मृतेः किल।

याऽपीयं वैदिकवाक्यानां अपौरुषेयता वर्ण्यते कर्त्तुरस्मरणाद्—

सन्त्यस्याप्यनुवक्तार इति धिग् व्यापकं तमः ॥२४२॥

तस्यैव तावदीदृशं प्रज्ञास्खलितं कथं वृत्तमिति सविस्मयानुकम्पं नः चेतः।
493b **तत्रापरेऽपि अनुवदन्तीति निर्दयं[7] आक्रान्तं भुवनं तमसा व्याप्तम्। कः प्राणिनो हितेप्साविप्रलब्धस्यापराधः ?**

तथा हि सौगता मन्त्राणां कर्त्तॄन् अष्टकादीन्, काणादाश्च हिरण्यगर्भं[1]। स्मरन्ति। तेषां च स मिथ्यावाद इति चेत्। क इदानीं तथाऽपौरुषेयत्वं यः पौरु-

---

द्यत्वेप्यनुवक्तार इति। किमत्र वक्तव्य केवल **धिग्व्यापकन्तमः**। तथा हि (।) य कर्त्तुरस्मरणादपौरुषेयतामाह जै मि नि'। **तस्यैव तावदीदृशमतिस्थलं प्रज्ञा-**
157a **स्खलितं कथं वृत्तं जातमिति[7]** कृत्वा सह विस्मयेनानुकम्पया वर्त्तत इति **सविस्मया-नुकम्पं नोस्माकं चेतः**। श्रुतवतोप्येवमविद्याविलसितमिति सविस्मय। गाढे-नाविद्याबन्धेन सत्त्वाः पीडयन्त इति कृत्वा सानुकम्प। तदत्रा**परेपीदानीन्तन्मता-**नुसारिण' कु मा रि ल प्रभृतय परीक्षकमन्या एवमेतद**नुवदन्तीति निर्दयं** निष्कृ-**पमाक्रान्तं भुवनं** जगद् येन **तमसा** तत्तथोक्त धि[1]ग्व्यापकन्तम'। अज्ञानस्यैवात्र धिग्वादो युक्तो न प्राणिन । यस्मात् **कः प्राणिन** एव वादिनोपि **हितेप्साविप्रलब्ध-**स्य हितप्राप्तीच्छया विप्रलब्धस्य विसम्वादितस्या**पराधः**। किन्त्वज्ञानस्यैवाय-न्दोष.। कि पुनस्तस्यैवम्वदत प्रज्ञास्खलित।

यस्मादिद साधनमसिद्धमनैकान्तिकञ्च। (२४२)

तत्रासिद्धमधिकृत्याह। **तथा हीत्यादि**। स्मरन्ति सौ ग ता वेद[2]स्य **कर्त्तॄ-न ष्ट का दीन्**। आदिशब्दाद् वा म क वा म दे व वि श्वा मि त्र प्रभृतीन्। **हिर-ण्यगर्भं** ब्र ह्मा ण वेदस्य कर्त्तारं **स्मरन्ति का णा दा वैशेषिकाः**। ततश्चासिद्ध कर्त्तु-रस्मरणं। **तेषां** सौगतानाञ्च **स** वेदस्य कर्त्तृस्मरणवादो **मिथ्यावादस्तत**। सिद्धिहेतोरिति **चेत्। क इदानीम्वेदादन्योपि पौरुषेयः** शब्दः। न कश्चित् पौरु-षेय इत्यर्थ[3]। **एवमिति** कर्त्तुः स्मरणवादस्य मिथ्यात्वे। एतदेव स्पष्टयन्नाह। कु मा र स म्भ वे त्या दिष्वित्यादि। **कुमारसम्भवादिषु** ग्रन्थेषु का लि दा सा दय **आत्मानमन्यम्वा प्रणेतारं** कर्त्तार **व्यपदिशन्तो यदेवम्प्रतिव्यूह्यरन्**। प्रतिक्षि-

षेयो भवति ? एवं कुमारसम्भवादिषु आत्मानं वा अन्यं वा प्रणेतारं व्यपदिशन्तो यदेवं प्रतिव्यू[2]ह्येरन्। तत्र प्रतिव्यूहनेऽभ्युपेतबाधेति चेत्। नन्विदमेव अभ्युपगमेऽगं इति केन बाधा ? तत् परस्यापि तुल्यमेव। तस्येष्टत्वाददोष[3] इति चेत्। कुतोऽस्येयमिष्टिरप्रामाणिकाऽऽदित आसीत्। तदा अकस्माद् ग्राही चायं किं क्वचित् साधनं अपेक्षते, येन पौरुषापौरुषेयचिन्तया[4]ऽऽत्मानं वा दुःखयति।

तत एव इष्टेरनभ्युपेतबाधायामिष्यमाणायां तदन्यस्यापि तुल्यमित्यनुपालम्भः।

प्येरन्। मिथ्यावादो युष्माक न यूय प्रणेतार इति। **तत्र** कुमारसम्भवादौ कर्त्तु **प्रतिवहनेभ्युपेतबाधा**।[4] कुमारसम्भवादीना पौरुषेयत्वेनाभ्युपगतत्वा**दिति-चेत्। नन्विदमेव** कर्त्तुरस्मरणमपौरुषेया**भ्युपगमेङ्गं** साधन। तच्च कुमारसम्भवादावस्तीति यथोक्तेन न्यायेनेति कथमनेन पौरुषेय· कुमारसम्भवादिरिष्ट इति कस्य **केन बाधा**। अथ तुल्येपि न्याये कुमारसम्भवादौ कर्त्तु प्रतिवहनेभ्युपेतबाधनमिष्यते। **तदेतद[5]भ्युपेतबाधनम्परस्यापि** वेदवादिनोपि वेदवाक्येषु प्रणेतृप्रतिवहने **तुल्यमेव। तस्य** वेदवादिनो वेदापौरुषेयत्वमिष्टमतो पौरुषेयत्वस्येष्टत्वात् कर्त्तुः प्रतिवहनेप्य**दोषः**। अभ्युपेतवाधादोषो नास्तीति **चेत् कुतोस्य** वेदवादिन· आगमोपादाननिमित्तताया· परीक्षाया प्रागियमपौरुषेयो वेद इत्येव **मिष्टिरभ्यु[6]पगति। अप्रमाणिका** प्रमाणरहिता आसीत्। तथा हि वेदस्यापौरुषेयत्वाभ्युपगमे कर्त्तुरस्मरण प्रमाणमुक्त। तत्र चानन्तरमुक्तो दोष इत्य**प्रमाणिकेयमिष्टिः**।

अथ प्रमाणमन्तरेण वेदस्यापौरुषेयत्वमङ्गीकृतवान् वेदवादी। तदा**ऽकस्माद् ग्राही** युक्त्या विना ग्राहकश्**चायं** मी मा स क **किम्पुनः क्वचित्** पौरुषेयापौरु[7]षेय- 175b
त्वादौ **साधनं** प्रमाण**मपेक्षते**। यदिति **पौरुषेयापौरुषेयचिन्तये**ति पौरुषेयापौरुषयत्वसाधनोपन्यासेनात्मानमासादयति। यो ह्ययुक्तिग्राही स सर्वत्र तथैव प्रवर्त्तता। किमिति क्वचित् प्रमाणावतारणेनात्मान **दुःखयतीति** समुदायार्थ.।

तत एवाप्रमणिकाया वेदस्यापौरुषेय**त्वेष्टे**र्हेतोर्वेदवादिनो वेदस्य कर्त्तु· प्रति[1]-वहनेप्य**नभ्युपेतबाधायामिष्यमाणायान्तदन्यस्यापि** तस्मात् मी मा स कादन्यस्यापि पुस· कु मा र स म्भ वादिमपौरुषेयमिच्छतस्तत्प्रणेतृप्रतिवहनेप्यनभ्युपेतबाधन **तुल्यमित्यनुपालम्भः**। तत्र प्रतिवहनेभ्युपेतबाधेत्ययमुपालम्भो नास्तीत्यर्थ·।

किं चानतिशयदर्शीत्यादि। **एवंप्रकाराणां कर्त्तुरस्मरणादित्येवमादीनामपौरुषयत्वसा[2]धनानां** वाक्येषु पौरुषेयापौरुषेयत्वाभिमतेष्वनतिशयदर्शीति सम्बन्धः। तथा हि यथा पौरुषेयाणामनेकेषा चिरकालातीतकर्त्तृकाणा कर्तुरस्मरणमस्ति।

किं च, अनतिशयदर्शी अयं एवंप्रकाराणां अपौ[5]रुषेयत्वसाधनानां वा कार्यधर्माणां वाक्येषु क्वचिदतिशयं अभ्युपेतीत्यप्रत्ययैवास्य वृत्तिः।

दृश्यन्ते च विच्छिन्नक्रियांगसम्प्रदायाः कृतकाश्च। यत्नवन्तः उपलभन्त इति चेत्। न। नियमाभावात्।

494a **अन्यत्रापि उपलम्भानुपलम्भस्य परोपदेशादप्रत्ययाद् अनुपलम्भस्यानिश्चया[7] हेतुत्वात्। स्वयं कृतानामपि अपह्नोतृदर्शनात्, निष्ठागमनस्य अशक्यत्वात्।**

तथा वेदवाक्येष्वेव कर्त्तुरस्मरणादिसाधनस्यानतिशयदर्शी विशेषदर्शी सन् मी मा स क। पुरुषकार्याणा वा शब्दाना धर्मा कार्यधर्मा· पुरुषान्वयव्यतिरेकानुविधायित्वादय[3]स्तेषा **कार्यधर्माणाम्वाक्येषु** लौकिकवैदिकेष्वनतिशयदर्शी सन् **क्वचिद्** वैदिके शब्देतिशय विशेषमपौरुषेयत्वलक्षण**मभ्युपेति** नान्यत्रेति न किञ्चिदभ्युपगमे साधनमस्तीत्यप्रत्ययेवायुक्तेवास्य वेदवादिनो **वृत्तिः**।

तदेव यथोक्तविधिना कर्त्तुरस्मरणादित्यसिद्धो हेतु। अनैकान्तिकत्वमप्याह। **दृश्यन्ते चे**त्यादि। उपदेशपारम्प[4]र्य स म्प्र दा य.। विच्छिन्न क्रियासप्रदाय पुरुषकृतत्वसप्रदायो येषा वटे वटे वै श्र व णादि शब्दानान्ते तथा। अनेनास्मर्यमाणकर्त्तृत्वमाह। कृतकाश्च पौरुषेयाश्च। तत पौरुषेयेपि वाक्ये कर्त्तुरस्मरणम्वर्त्तत इत्यनैकान्तिकोय हेतु। **तानिति विच्छिन्नक्रियासम्प्रदायान्। कृतकान्** शब्दान्। **यत्नवन्तः** पुमास**मुपलभन्ते**ऽनेन कृ[5]ता **इति**। नैतदेव। किङ्कारण। यत्नवतोपि कर्त्तु· स्मरणे **नियमाभावात**। नावश्य कर्त्तारमुपलभते यत्नवानपीति सन्देह एव।

किञ्च (।) **अन्यत्रापौरुषेयाभिमतेपि** शब्देस्य कर्त्ता नोपलभ्यत इत्यनुपलम्भस्य। उपलभ्यते वास्यापौरुषेयस्य कर्त्तेत्युपलम्भस्य न प्रमाणात् कुतश्चिन्निश्चय। किन्तु **परोपदेशात्** किभूतादप्रत्ययाद[6]प्रमाणकात्। एवभूताच्चोपदेशात् **कर्त्तुरुपलम्भानुपलम्भस्यानिश्चयार्हत्वात्**। मया वेदवाक्यानि कृतानीत्येववादिनोनुपलम्भाद् वेदवाक्येषु कर्त्तुरभावो निश्चीयत इत्येतदपि नास्ति। **स्वयंकृतानामपि** शब्दानाम**पह्नोतृदर्शनात्**। स्वयकृत्वापि शब्दा न मयैते कृता इत्यपलपितारो
158a दृश्यन्ते। तत्र च किमनेनैते कृता किम्वान्येने[7]ति **निष्ठागमनस्य** निश्चयगमन**स्याशक्यत्वात्**। (२४२)

तदेव कर्त्तुरस्मरणादिति हेतुन्निराकृत्यान्यदपि साधन।

"वेदस्याध्यनं सर्वं गुर्वध्ययनपूर्वक (।)
वेदाध्ययनवाच्यत्वादधुनाध्ययनं यथा (।)

घ. न नित्यता

(क) गुर्वध्ययनपूर्वकत्वादपि न

यथाऽयमन्यतोऽश्रुत्वा नेमं वर्णपदक्रमम्।
वक्तुं[1] समर्थः पुरुषस्तथान्योपीति कश्चन ॥२४३॥

यदपौरुषेयत्वेऽपि पौरुषेयमित्यादि तदेवोत्तरं स्यात्। तथा हि—

अन्यो वा रचितो ग्रन्थः सम्प्रदायादृते परैः।[2]
दृष्टः कोऽभिहितो येन सोप्येवं नानुमीयते ॥२४४॥

न खलु किञ्चिदपौरुषेयत्वाश्रयोऽन्यत्रेदानीन्तनानामुपदेशेन अशक्तेः[3]। सा चान्यत्रापि एकेन रचिते ग्रन्थेऽन्यस्य तुल्या। तदनुसारिणा सर्वस्तथाऽनुमेयः,

---

[1] इति दूषयितुमुपन्यस्यति। यथेत्यादि। यथायमिदानीन्तनो वेदस्याध्येतान्यतः सकाशाद् श्रुत्वा इमम्वैदिकम्वर्णक्रम। वर्णपदयो क्रमं वक्तुमध्येतु न समर्थः। तथान्योपि वेदस्य कर्त्तृत्वेनाभिमत सोप्यन्यत उपदेशमपेक्षते सोप्यन्यत इत्यनादित्वात् सिद्धमपौरुषेयत्वमिति एव कश्चनाह। तस्याप्येवम्वादिनस्तदेवोत्तरं यत् कर्त्तुरस्मरणादित्यत्रोक्त। एवमनन्तरोक्तप्रकारेणापौरुषेयत्वेपि किमिदानीम्पौरुषेयम्वाक्य सर्वमपौरुषेय स्यात्। अन्यस्यापि कु मा र स म्भ वाध्ययनस्याध्यय[2]नपूर्वकत्वेनानादित्वप्रसाधनात्। तत्र प्रसाधनेभ्युपेतबाधेति चेत्। नन्विदमेवाभ्युपगमाङ्गमित्यादि सर्वम्वाच्य। अस्यैव सग्रहायादिशब्द प्रयुक्त। (२४२–२४३)

अतिप्रसगमेव दर्शयन्नाह। तथा हीत्यादि। अन्यो वा पुरुषरचितः कुमारसम्भवादिको ग्रन्थः। संप्रदायादृते। परोपदेशमन्तरेण परैः कोभिहितो दृष्टो नैव कश्चिद् दृष्ट। येन कार[3]णेन सोपि वेदादन्यो ग्रन्थ। एवमित्यपौरुषेयः किन्नानुमीयते।

न खल्वित्यादिना व्याचष्टे। न खलु किञ्चिदपौरुषेयत्वाश्रयो पौरुषेयत्वस्य सिद्धिनिमित्तमन्यत्रेदानीन्तनानामनुपदेशेन य पाठस्तत्राशक्तेः। न हि परोपदेशमन्तरेण वेद पठितु शक्त इत्यपौरुषेयत्वम्वेदवाक्यानामिष्ट। सा चानुपदेशपाठाशक्तिरन्यत्रापि[4] पौरुषेयाभिमते। एकेन केनचित् पुरुषेण रचितेन्यस्याध्येतुस्तु-

---

[1] Ślokavārtika, Vākya, 360

न वा कश्चिद्, तस्य तथाऽनिष्टत्वा[4]दित्यादौ "इष्टस्तदाश्रयत्वादि"त्यादि चोक्तम्।

अपि च।

यज्जातीयो यतः सिद्धः सोऽविशिष्टोग्निकाष्ठवत्।
अदृष्टहेतुरप्यन्य(ोऽविशिष्टः)[5] संप्रतीयते ॥२४५॥

न हेतोरदर्शनान्नाहेतुको नाम। अदृष्टहेतवोऽपि भावाः तदन्यैः स्वभावाभेदमनुभवन्तः तथा[6] विधाः समनुमीयन्ते।[1]

अथ हेतुरूपस्य निवृत्तावपि तद्रूपं न निवृत्तं (तदा) कार्यधर्मव्यतिक्रमः।

ल्या। तदनुसारिणेति। अनुपदेशपाठाशक्तिमपौरुषेयत्वसाधकत्वेन योनुसरति तेन सर्वो लौकिकवैदिक· शब्दस्तथा पौरुषेयत्वेनानुमेयः। न वा कश्चिद् वैदिको विशेषाभावात्। तस्य लौकिकस्य वाक्यस्य तथेत्यपौरुषेयत्वेनानष्टत्वादित्यादौ।[5] आदिशब्देनाभ्युपेतबाधापरिग्रहस्तत्रोक्तमनन्तरमेव "इष्टेस्तदाश्रयत्वादपौरुषेयत्वसाधनाश्रयत्वा दि"त्यादि[२]। (२४३–२४४)

अपि च। यज्जातीयो यद्द्रव्यसमानजातीय। यतो हेतो सिद्धोन्वयव्यतिरेकाभ्या। स तज्जातीयत्वेनाविशिष्टोन्योप्यदृष्टहेतुरपि तस्माद्धेतोर्न[३] भवतीत्येव संप्रतीयते। किमिव (।) अग्निकाष्ठवत्। यथेन्धनादेको[6] वह्निर्दृष्टस्तत्समानस्वभावो(ऽ)परोपि तत्समानहेतुरेवादृष्टहेतुरपि सम्प्रतीयते। अनेन वेदस्यापौरुषयत्वसाधने प्रतिज्ञाया अनुमानबाधामाह।

नेत्यादिना व्याचष्टे। हेतोरदर्शनान्नाहेतुको नाम। यस्मादृष्टहेतवोपि। न दृष्टो हेतुरेषामिति विग्रह। त एव भता अपि भावास्तदन्यैर्दृष्टहेतुभि. स्वभा-
158b वाभेद[7]मनुभवन्तस्तुल्यरूपा इत्यर्थ। तथाविधा इति तत्समानहेतवस्समुग्नीयन्ते। अयमत्र समुदायार्थ। लौकिकेन शब्देन समानधर्मो वैदिकोपि शब्दो लौकिकवत् पुरुषहेतुक स्यान्ना वा कश्चिदपीति।

अथ हेतुरूपस्य हेतुस्वभावस्य निवृत्तावपि तद्रूपं पुरुषहेतुशब्दसमान रूपं(न) निवृत्तं वैदिकस्य शब्दस्येष्यते। तदा कार्यधर्मव्यतिक्रमः। अय हि कार्यस्य[1] धर्मो यत्कारणनिवृत्तौ निवृत्ति·। यदा तु निवृत्तेपि पुरुषे वैदिकेषु शब्देषु पौरुषेय रूप स्यात् तदा तेन कार्यधर्मो व्यतिवृत्त· स्यात्। ततः कार्यधर्मव्यतिक्रमात्

---

[1] Yan-dag-par-rjes-su-dpog-par-hgyur-ro.

[२] B. साधनत्वादित्यादि। [३] B. ०तोर्भवती०

ततो न स्यादिति न कश्चित् तथा वचनीयः स्यात् ।[7] रूपविशेषो वा दर्शनीयः, 494b
य एनं हेतुमनुविदध्यात्, येनेष्टस्यानिष्टस्य च इष्टविपर्ययो न स्यात् ।

हेतुस्वभावस्य निवृत्तेरपि वस्तूना अभेदे स भेद आकस्मिकः स्यादिति न क्वचित् निवर्त्तेत । तस्माद् यत्स्वभावजन्मा यो दृष्टः सोऽन्यत्राप्यबिभन्यमानो यतो दृष्टस्तत्कार्यतां[2] अग्नीन्धनवत् स्वात्मना नातिवर्त्तते ।

तत· पुरुषान्न किञ्चिद्वाक्य स्यादिति न कश्चिच्छब्दो लौकिकस्तथेति पौरुषेयत्वेन वचनीयः स्यात् । रूपविशेषो वा पौरुषेयाणा वैदिकाद् भिन्नो दर्शनीयो यो रूपविशेष एनं पुरुषाख्य[2] हेतुमनुविदध्यात् । येन विशेषेणेष्टस्यापौरुषेयत्वेन वेदस्य अनिष्टस्य च लौकिकस्य । इष्टविपर्ययो न स्यात् । यथाक्रम पौरुषयत्वमपौरुषेयत्वम्वा स्यात् ।[1] न च लौकिकवैदिकाना कश्चित् स्वभावभेदोस्तीत्युक्त ।

कि च पुरुषाख्यस्य हेतोर्यः स्वभावस्तस्य निवृत्तेर्निवृत्तावपि षष्ठीसप्तम्योरभेदात् । यथा वृक्षे शाखा वृक्षस्यशाखेति ।[3] वैदिकाना वाक्याना पौरुषेयैर्वाक्यैरभेदेन तुल्यरूपत्वेभ्युपगम्यमाने । स तेषा लौकिकानाम्वाक्यानाम्भेदः पुरुषकृतो विशेष आकस्मिकः स्यादहेतुक स्यात् । पुरुषमन्तरेणापि वैदिकेषु वाक्येषु तस्य विशेषस्य भावात् । तथा च न क्वचिन्निवर्त्तेताकाशादौ । न चैवन्तस्माद् यः स्वभावो यज्जन्मा । यस्माज्जन्म यस्ये[2]ति विग्रह । सोन्यत्रा[4]प्यदृष्टहेतावप्यविभज्यमानः । दृष्टहेतुना कार्येणापृथक्क्रियमाणस्तत्कार्यता यातो भवन् दृष्टस्तत्कार्यतां स्वात्मना स्वेन रूपेण नातिवर्त्तते । किमिव (।) अग्नीन्धनवत । अग्निश्चेन्धन चेत्यग्नीन्धनन्तेन तुल्यन्तद्वत् । दृष्टेनेन्धनकारणेनाग्निना भेदमनुभवन्नदृष्टकारणोप्यग्निर्यथेन्धनकार्यता नातिवर्त्तते तद्वत् । (२४४–२४५)

तत्रैतस्मिन् न्याये स्थिते । लौ[5]किकवैदिकयोर्वाक्ययोर्भेदमप्रदर्श्य अपौरुषेयत्वसाधनाय ये हेतवः प्रवितन्यन्ते । विस्तरेणाभिधीयन्ते । तद्यथा "कर्त्तुरस्मरणात् ।"

वेदस्याध्ययन सर्वैः गुर्वध्ययनपूर्वकम् (।)
वेदाध्ययनवाच्यत्वात् अधुनाध्ययन यथा । (वाक्य० ३६६)
अतीतानागतौ कालौ वेदकारवियोगिनौ ।
कालत्वात् तद्यथा कालो वर्त्तमानस्समीक्ष्यते ॥

---

[1] B. न स्यात् । [2] B. जन्माऽस्येति ।

तत्राप्रदर्श्य ये भेदं कार्यसामान्यदर्शनात्।
हेतवः प्रवितन्यन्ते सर्वे ते व्यभिचारिणः ॥२४६॥

यथाऽऽद्योऽपि पथिककृताग्निः पथिककृता[3]ग्नित्वात् ज्वालान्तरपूर्वको न काष्ठनिर्मथनपूर्वकः अनन्तराग्निवत्।

कथं पथिककृतदहनस्य व्यभिचारः ? ज्वालोद्भवसामर्थ्यं ह्याश्रित्य[4] हेत्वन्तरं प्रतिक्षिप्यते। यदि ह्यग्निर्विनाऽपि स्यात्, अन्येष्वपि स्यादिति तत्र ज्वालेतरजन्यनोर्बाध्यबाधकाभावे ज्वालाप्रभवत्वं अन्यथापि स्याद्। एवं धर्मयो[5]रेकत्रार्थे

ब्रह्मादयो न वेदा[6]ना कर्त्तार इति गम्यता।
पुरुषत्वादिहेतुभ्यस्तद्यथा प्राकृता नरा"[1] इति।

सर्वे ते हेतवो **व्यभिचारिणोऽनेकान्तिका** एव।[2] **कार्यसामान्यदर्शनात्।** पुरुषकार्ये शब्दे सामान्यस्य तुल्य[3]स्य वैदिकेषु शब्देषु दर्शनात्।

किम्वदनैकान्तिका इत्याह। **यथेत्यादि**।

159a यद्वा **तत्रेति**। यद्वेदाध्ययनन्तद्वेदाध्ययनपूर्वकमित्यत्र प्रयोगे। अप्रदर्श्य[7] भेदमिति वेदक्रियाप्रतिभारहितात् पुरुषाद् विशेषमप्रदर्श्य। इदानी वेदाध्ययन वेदाध्ययनपूर्वकन्तथान्यदापीत्येव वेदाध्ययनत्वलक्षणस्य कार्यसामान्यस्य दर्शनादेवप्रकारा हेतव. प्रवितन्यते सर्वे ते व्यभिचारिण.। **यथाऽन्योपि पथिककृताग्निरदृष्टहेतुत्वात्। ज्वालान्तरपूर्वको न काष्ठनिर्मथनपूर्वकः**। कुत (।) पथिकाग्निवत्। किमिव (।) अ[1]नन्तराग्निवदिति ज्वालान्तरसभतदृश्यमानाग्निवत्।

कथमित्यादि। यस्माज्ज्वालोद्भवसामर्थ्यं ह्याश्रित्येति ज्वालाया सकाशादुद्भवसामर्थ्यमाश्रित्य **पथिककृतदहनस्य हेत्वन्तरमरणिनिर्मथन प्रतिक्षिप्यते।** कि कारण (।) **यदि ह्ययमग्निर्विना** ज्वालया **स्यादत्रापीति** ज्वालापूर्वकपथिकाग्निस्थानेपि ज्वालामन्तरेणैव **स्यादिति। तत्रैतस्मिन्** साधनेऽनैकान्तिकत्वमु[2]च्यते। कथ **ज्वालेतरजन्मनोर्ज्वालाया योत्पत्तिः**। इतरस्मादरणिनिर्मथनाद् योत्पत्तिस्तयोरुत्पत्योरग्निसामान्ये परस्परमबाध्यबाधकत्वात्। को ह्यत्रविरोधोग्निश्च स्यान्न च ज्वालान्तरपूर्वक इति। एव सति **ज्वालाप्रभवत्व-**

---

[1] Ślokavārtika. [2] B. **किं कारणं**—added.

[3] B. **तुल्यत्वात्**

सम्भवात् पथिकाग्निरन्यो वाऽर्थ एकप्रतिनियतो न स्यादित्याशक्यते व्यभिचारः।

सोऽप्यन्योन्यव्यतिरेकिधर्मावतारो वस्तुसामान्येऽविरुद्ध[6] इत्युच्यते नावस्थाभेदिनि विशेषे वा। निष्कलस्यात्मनो तदतत्त्वविरोधात्। न च ज्वालेतरजन्मनोः पथिकाग्नौ बाध्यबाधकता[7]। तस्य ज्वालाप्रभवव्यतिरेकासंभवाभावात्। एव पथि- 495a
काग्निर्ज्वालाप्रभव इति स्यान्न सर्वः। तत्र विशेषप्रतिक्षेपस्य कर्त्तुमशक्यत्वात्[1],

---

म्वह्ने रूपमन्यथापि [स्यादरणि[1] निर्मथनादपि स्यात्। इति[2] एवधर्मयोर्ज्वालेतरसम्भविनोर्द्वयोरेकत्रार्थे वह्निसामान्ये सम्भ[3]वात् कारणात् स पथिकाग्निरन्यो वा चेद[3]ध्ययनादि। एकप्रतिनियत इति ज्वालापूर्वक एव। वेदाध्ययन। वा वेदाध्ययनपूर्वकमेवेत्येतन्न स्यादित्याशंक्यते व्यभिचारः(।) वेदाध्ययन च स्यात्। न च वेदाध्ययनपूर्वक। तथा पथिकाग्निश्च स्यान्न च ज्वालापूर्वक इति। विरोधाभावात्।

ननु यज्ज्वालाप्रभवम्वह्ने[4]र्नं तदरणिनिर्मथनप्रभवमिति क[4]थ न विरोध इत्याह। सोपीत्यादि। सोप्यन्योन्यव्यतिरेकी परस्परविरुद्धो धर्मद्वयस्य ज्वालाप्रभवत्वारणिनिर्मथनप्रभवत्वलक्षणस्यावतारोवकाशो वस्तुसामान्ये[5]ऽविरुद्ध इत्युच्यते। नावस्थाभेदिनि वह्निविशेषे ज्वालाजन्मन्यरणिनिर्मथनजन्मनि वाऽविरुद्ध उच्यते। किन्तु विरुद्ध एव। कि कारण (।) निष्कलस्यात्मनो निर्विभागस्य स्व[5]भावस्य तदतत्त्वविरोधात्। ज्वालाजन्मनो हि ज्वालापूर्वकत्वमतत्पूर्वकत्व च विरुध्यते। अरणिजन्मनश्चारणिपू[6]र्वकत्वमतत्पूर्वकत्व च विरुध्यते पथिकाग्निसामान्येपि द्वयम्विरुध्यत इत्याह[7]। न चेत्यादि। ज्वालेतरजन्मनोः ज्वालोत्पादस्यारणिनिर्मथनोत्पादस्य च पथिकाग्नौ पथिकाग्निसामान्ये बाध्यबाधकता[8]। कि कारण (।) तस्य पथिकाग्नि[9]सामान्यस्य ज्वालाप्रभवव्यतिरेकेण ज्वालोत्पत्तिव्यतिरेकेण[9] योऽसम्भवस्तस्याभावात्[10]। ज्वालोत्पत्तिव्यतिरेकेणारणिनिर्मथनादपि[11] भावादित्यर्थ। यादृशस्तु ज्वालाप्रभव इति स्यान्न सर्वो वह्निरविशेषेण।

---

[1] B. स्यादिति। अरणि०। [2] B. त्यक्तः। [3] B. वेदाध्ययनादिः।
[4] B. रूपं वन्हे०। [5] B. अग्निसामान्य—added
[6] B. रणि०। [7] B. इत्यत आह।
[8] B. भावता। [9] B. ज्वालो—Omitted.
[10] B. योऽसम्भवस्तस्याभावादरणिनिर्भथनादपि—added
[11] B. दृष्ट एवंभूतोऽन्योपि ज्वालाप्रभव—added.

सम्भवत्तादवस्थ्यानियमाच्च ।

यदि विनाऽपि ज्वालया स्यादन्यत्रापि स्यादिति ।

यया सामग्र्या स सम्भवति सा यदि स्यात्, तदा स्यादेव[2] **। तद्भावं प्रदर्श्य तदभावं कथयेत्, तत्र वा ज्वालां तदभावं वा दर्शयेत् ।**

तस्मान्नैकस्य परपूर्वकमध्ययनं सर्वस्य तथाभावं साधयति । तस्यान्यथा[3] **सम्भवाभावात् । तत्क्रियाप्रतिभया रहितस्य एवंभूतस्य तथा स्यादिति तथाभूतमेव वाच्यं स्यात्, नाविशेषेण सम्भवद्विशेषमुच्यमानं सुलभम् ।**[4]

कथं विशेषस्य सम्भवः, यावता तेषामपि पुरुषाणां अशक्तिरेव । इदानीन्तन-

---

किं कारण (।) **तत्र** हेतुभेदभिन्ने वह्नौ **विशेषप्रतिक्षेपस्या**रणिनिर्मथनकृतविशेषा-
159b पह्नव[7]**स्य कर्त्तुमशक्यत्वात् । सम्भव**त्यरणिकृतो विशेषो यस्य वह्नेस्तस्य च **तादवस्थ्यानियमात् ।** ज्वालाप्रभवत्वलक्षणायामवस्थायान्नियमाभावात् ।

यदप्युक्तम् (।) आद्य· पथिकाग्निर्**विना ज्वालया** यदि **स्यादन्यत्रापि** ज्वालारहितेपि प्रदेशे **स्यादिति** ।

अत्रोच्यते (।) भवत्येव[1] । **यया**रणिनिर्मथनलक्षणया **सामग्र्या स** पथिकाग्नि **सम्भवति सा** सामग्री **यदि स्यात्**[1] । यदि पुनरस्याः सामग्र्या **सम्भवं प्रदर्श्य तदभावम्**वह्नेरभाव **कथयेत् । तत्र वा** यथोक्तसामग्रीसम्भविनि देशे **ज्वालान्दर्शयेत्** (।) **तदा स्यादेव** ज्वालापूर्वकत्वमेव वह्नेर्न चैव । तस्मान्न सर्व पथिकाग्निर्ज्वालापूर्वक इति व्यभिचारः ।

यत एवन्त**स्मान्नैकस्य** वेदक्रियाशक्तिरहितस्य **परपूर्वकम**ुपदेष्टृपूर्वकम**ध्ययन**न्दृष्ट **सर्वस्य** हि र ण्य गर्भा[2]देरप्यध्ययनस्य **तथाभावं** परपूर्वकत्व **साधयति ।** कि कारण । **तस्या**ध्ययनस्यान्यथा परपूर्वकत्वमन्तरेण यो **सम्भव**स्तस्याभावात् । स्वयमुपरचय्याध्ययन न सम्भवेदित्यर्थ· । हिरण्यगर्भादीनाम्वेदरचनाया शक्तिसम्भवात् । यस्तु शक्तिविकल इदानीन्तनस्तस्य तथाविधस्य स्वयं कृत्वा वेदमध्येतुमसमर्थस्य । **तत्क्रिया** वेद[3]क्रिया तस्या या **प्रतिभा** तया **रहि**तस्य वेदकरणसमर्थया बुद्ध्या रहितस्येत्यर्थ । **एवंभूतस्य** पुरुषस्य यदध्ययनन्तत्तथा स्यादध्ययनान्तरपूर्वक स्यादिति कृत्वा । **तथाभूतमिति** वेदक्रियाशक्तिरहितस्य यदध्ययननन्त**देव** । एव वाक्य स्यादध्ययनान्तरपूर्वक **वाच्यं स्यान्नाविशेषेण** । यत्पुनरध्ययन

---

[1] B. **अत्रोच्यते । अन्यत्र ज्वालारहितेपि प्रदेशे पथिकाग्निर्भवत्येव ।**

[2] B. **तद**—added.

पुरुषवत्। (अत्र) शक्त्योर्न किञ्चिद् विरोधदर्शनमस्ति तस्मान्नाविरुद्धविध्यनुपलब्धिप्रयोगो गमकः[5]। न ह्यतीन्द्रियेषु विरोधस्य प्रतीतिरित्युक्तम्। न चायं प्रयोगः पूर्वस्माद् भिद्यते।

यदि पुरुषाः शक्ताः स्युस्तदेदानीन्तना अपि स्युरिति।

विशेषासम्भवे सत्येतत् स्यात्। स च दुस्साध्यः। यत्र एकस्याशक्तिस्तत्र सर्वपुरुषाणामपि अशक्तिरित्यपि पूर्ववद् व्यभिचारि। भारतादिष्वपि इदानीन्तनानां

पुरुषातिशयसम्भवेन[4]•स्वय कृत्वाध्ययनात् **सम्भवद्विशेषं**। अविशेषेण सर्वमध्ययनमध्ययनान्तरपूर्वकमित्युच्यमानं व्याप्त्यसिद्धया व्यभिचारित्वान्न छायां पुष्णाति। विवक्षितसाध्यासाधनात्।

कथमित्यादि पर.। **विशेषस्य** स्वय कृत्वा वेदबाह्यानामध्ययनस्य **सम्भवः** कथ। **यावतेति** यदेत्यर्थ। **तेषामपि पुरुषाणां** वेदस्य कर्त्तृत्वेनाभिमतानाम्वेदर[5]चनायामशक्तिः पुरुषत्वादिदानीन्तनपुरुषवत्।

अत्रापीत्या चा र्य॰। अत्रापि प्रयोगे। न **शक्तिपुरुषयोरिति**। वेदकरणस्य शक्ते पुरुषस्य च परस्पर। **न किञ्चिद् विरोधदर्शनमस्ति। ततश्च** ब्र ह्मा दिषु पुरुषत्व हेतुत्वेनोक्त**मविरुद्धत्वान्न** वेदकरणशक्तिमपनयति। **तस्मान्नाविरुद्धविधिः**। अविरुद्धस्य विधिर्यस्मिन्ननु[6]पलब्धिप्रयोगे स एवभूतो**नुपलब्धिप्रयोगो न गमकः**। विरोधाभाव एव कथमित्याह। **न ह्रीत्यादि**। **अतीन्द्रियेष्वत्यन्तपरोक्षेषु** ब्रह्मादिषु वेदकरणशक्त्या सह। सहानवस्थानलक्षणस्य **विरोधस्य प्रतीतिः**। अतीन्द्रियत्वादेव। नापि परस्परपरिहारस्थितिलक्षणस्य विरोधस्य प्रतीति। शक्त्यशक्त्यो पुरुषापुरुष[7]त्वयोश्च परस्परम्विरोधात्। न शक्ति- 160a
पुरुषयोर्य पुरुष स वेदकरण प्रत्यशक्तो यथेदानीन्तन पुरुष इति। **न चायं प्रयोगः** पूर्वप्रयोगादिति। यद्वेदाध्ययनन्तद्वेदाध्ययनपूर्वकमिदानीन्तनवेदाध्ययनवदित्येतस्मात् **पर्वप्रयोगाद् भिद्यते**। तस्मादुभयोरुपादान व्यर्थमेवेत्यभिप्राय।

यत्पुनरुच्यते। **यदि पुरुषाः** प्राक्तना वेद कृत्वा स्वय[1]मध्येतु **शक्ताः स्युस्तदेदानीन्तना अपि स्युरिति।**

अत्रोच्यते। पुरुषाणाम्विशेषासम्भवे **सत्येतदनन्तरोक्त स्यात्। स च** पुरुषाणा विशेषासम्भवा(द्) **दुस्साध्यशक्यसाधन**। बाधकाभावात्। तस्माद् **यत्रैकस्य** पुरुषस्याशक्तिस्तत्र **सर्वपुरुषाणामशक्तिः**(।)पुरुषत्वादित्यस्मिन्नपि साधने **पूर्ववद**ध्यनत्वादिवत् पुरुषत्व लिङ्ग **व्यभिचारि**। कि कारण। **भा र ता दिष्वपि**[2] पौरुषेयाभिमतेष्विदानीन्तनानां पुरुषाणामशक्तावपि **कस्यचिद्** व्या सा दे॰ पुरुषा-

495b **अशक्तावपि[7] कस्यचित् शक्तिसिद्धेः।**

तस्मात् कारणानि विवेचयता अर्थेषु तदतत्प्रतिभवेषु स्वभावभेदो दर्शनीयः। तदभावे सर्वस्तदात्मा भवेत् न वा कश्चित्।[1]

न चात्र लौकिकवैदिकयोर्वाक्ययोः स्वभावनानात्वं पश्यामः। असति तस्मिन् तयोः सामान्यस्यैव दर्शनाद् एकस्य कंचिद् धर्मं विवेचयन् तत्स्वभावसम्भविना आशंक्य व्यभिचार[2]वादः क्रियते।

ननु वेदावेदयोस्तत्त्वलक्षणोऽस्ति विशेषः ?

सत्यम्। न केवलं तयोरेव। डिण्डिकपुराणेतरयोरपि[3] अस्ति। न च तावता स्वप्रक्रियाभेददीपनो नामभेदः बाधते। अन्यत्रापि प्रसङ्गात्।

तिशयस्य **शक्तिसिद्धेः**।

यत एवन्**तस्मात् कारणानि विवेचयता** वैदिकाना वाक्यानां ताल्वादिव्यापार कारणमपनयता। **अर्थेषु** लौकिकवैदिकेषु शब्देषु (।) किम्भूतेषु। **तदतत्प्रतिभवेषु** ताल्वादिकारणेष्वतत्कारणेषु **स्वभावभेदो दर्शनीयः**। ताल्वादिकारणानामी[3] दृश स्वभावो तत्कारणानामन्यादृश स्वभाव इत्येवं स्वभावनानात्व दर्शनीय। येन तदतत्प्रभवत्वम्विभागेन जायते। **तदभावे** स्वभावभेदाभावे **सर्वस्तदात्मा भवेत्**। सर्व शब्द पौरुषेय **स्यान्न वा कश्चित्**लौकिकोपि।

अथ स्याद् (।) अस्त्येव तयो स्वभावभेद इत्याह। **न चात्रेत्यादि**। अत्र जगति **लौकिकवैदिकयोर्वाक्ययोः स्वभावनानात्वं प[4]श्यामः। असति तस्मिन्** स्वरूपभेदे **तयोर्लौ**किकवैदिकवाक्ययोस्**सामान्यस्यैव** तुल्यरूपस्यैव वर्ण्णानुक्रम-लक्षणस्य **दर्शनादेकस्य** लौकिकवैदिकस्य वाक्यस्य **कंचिद् धर्म्मं विवेचयन्** पौरुषेयत्वमपौरुषेयत्वम्वा विभागेन व्यवस्थापयन् पुरुष **आशंक्य व्याभिचारवादः क्रियते**। आशंक्य व्यभिचारो वादो यस्य पुरुषस्य स तथोच्य[5]ते। केन क्रियते। **तत्स्वभावसम्भविना** तेन। लौकिकवैदिकवाक्यसम्भविना तेन वर्ण्णपदरचना-लक्षणेन सामान्येन। पौरुषेयतुल्यधर्मकस्य वेदस्यापौरुषेयत्वम्वदन् व्यभिचार्यते इति यावत्।

ननु **वेदावेदयोस्तत्त्वान्यत्त्वलक्षणो** वेदावेदलक्षणो **विशेषो**स्त्येव। ततो विशे-षाल्लौकिकवैदिकयोर्यथाक्रम पौरुषेयत्वमपौरुषेय[6]त्वम्भविष्यतीति परो मन्यते।

सत्यमित्या चा र्यः। नन्वीदृशो विशेष**स्तयोः** पौरुषेयत्वापौरुषेयत्वसाधको यस्मान्न **केवलमनयोरेव** लौकिकवैदिकयोर्विशेष**ः**। किन्तर्हि (।) **डि ण्डि क पुराणेतरयोरपि**। डि ण्डि कै र्नग्नाचार्यै कृतस्य पुराणस्येतरस्य च पुराणस्य। ईदृशो

यदि तु तादृशीं रचनां पुरुषाः कर्तुं न शक्नुयुः[4], **कृतां वा अकृतसंकेतो विवेचयेत्। तदा व्यक्तमपौरुषेयो वेदः स्यात्।**

ननु पुरुषाणामेव मन्त्रकरणशक्तिः। एतदुत्तरत्र विचारयिष्यामः। अपि च, न मन्त्रो नामान्यदेव किञ्चित्। किन्तर्हि। सत्यतपःप्रभाववतां समीहितार्थ-साधनवचनम्। तद् अद्यत्वेऽपि पुरुषेषु दृश्यत एव। यथास्वं सत्याधिष्ठानबलाद् विषदहनादेः स्तम्भनकरणात्। शबराणां च केषांचित् मन्त्रकरणात्। अवैदिकानाञ्च बौद्धादीनां मन्त्रकल्पानां दर्शनात्।[7] **तेषां च पुरुषकृतेः।** 496a

तत्रापि अपौरुषेयत्वे कथमपौरुषेयं अवितथम्? तथा हि बौद्धेतरमन्त्रकल्पे

विशेषोस्ति। **न च तावता** स्वय[7] व्यवहारार्थं **स्वप्रक्रियाभेददीपनः** समयपरिकल्पितो 160b
नामभेदः सज्ञाभेद पुरुषकृति**म्बाधते** वेदस्य। कि कारणम् (।) **अन्यत्रापि** पुराणेऽपौरुषेयत्व**प्रसंगात्**। डिण्डिकेतरपुराणाना नामभेदस्य विद्यमानत्वात्।

यदि तु या वेदवाक्ये वर्ण्णपदरचना दृश्यते **तादृशीं रचनां पुरुषाः कर्त्तुं न शक्नुयुः। कृताम्वा** निष्पादिताम्वा वर्ण्णपदरचना[1]**मकृतसकेतः** श्रवणमात्राद् **विवेचयेदिय** पुरुषपूर्विकेति। **तदा व्यक्तमपौरुषेयो वेदः स्यात्** (।) न विवे-चयति ता रचनान्तत्कथमपौरुषेयो वेद स्यात्।

नन्वित्यादि पर। म न्त्रा अपि पुरुषकृता **एवेत्येतदुत्तरत्र विचारयिष्यामः। अपि च न मन्त्रो नामान्यदेव किञ्चित्।** किन्तर्हि (।) **सत्येत्यादि**। यथाभूता-ख्यान सत्य। इन्द्रियमनसोर्दमनन्तप। तयो प्रभावो[2] विषस्तम्भनादिसामर्थ्य स विद्यते येषा पुसान्ते तथा। तेषा **सत्यतपःप्रभाववता** पुसा **समीहितार्थस्य साधनन्तदेव** मन्त्र। तद्वचन मन्त्रलक्षणम**द्यत्वेपि पुरुषेषु दृश्यत एव।** कि कारण। **यथास्वं सत्याधिष्ठानबलाद् विषदहनादे( ) स्तम्भनस्य** सामर्थ्योपघातस्य दर्शनात्। तथा **श ब रा णां च केषांचित्** स्वनियमस्थानामद्यापि विषाद्यप-नयनशक्तियु[3]क्तस्य कारणाच्छक्नुवन्त्येव पुरुषा मन्त्रान् कर्त्तुं। **अवैदिकानाञ्च** वेदादन्येषा **बौ द्धा दी नामिति**(।) आदिशब्दाद् आ र्ह त गा रु ड मा हे-श्व रा दीना **मन्त्रकल्पानां**। मन्त्राणा मन्त्रकल्पानाञ्च **दर्शनात्**। विद्याक्षराणि मन्त्रा'। तत्साधनविधानोपदेशा मन्त्रकल्पा। **तेषां च** बौद्धादीना म्मन्त्रकल्पाना **पुरुषकृतेः** पुरुषै करणात्।

तस्मान्न लौकिभ्यो वैदिकाना स्वभावभेदः।[4]

तत्रेत्यादि पर'। तत्रापि बौद्धादिमन्त्रकल्पेप्य**पौरुषेयत्वे** कल्प्यमाने। **कथ-मिदानीमपौरुषेयं** वाक्य सर्वम**वितथ**। किन्तु मिथ्यार्थमपि स्यात्। **तथा हीत्या-**

हिंसा[1]मैथुनात्मदर्शनादयोऽनभ्युदयहेतवोऽन्यथा वा वर्ण्यन्ते। तत् कथं विरुद्धाभिधायि द्वयमेकत्र सत्त्यं स्यात्?

तत्र अर्थान्तरस्य कल्पने तद् अन्यत्रापि तुल्यम्। तथा[2] चार्थनिश्चयात् काचिदपि व्यक्तिर्न स्यात्। तथा च अपौरुषेयत्वग्रहणमपि अनुपयोगमेव।

बौद्धादीनां मन्त्रत्वमेव नास्तीति चेद्, तदन्यत्रापि कोशपानं[3] करणीयम्। विषादिकर्मकृतो बौद्धा अपि दृश्यन्ते तत्रापि मन्त्रत्वं न प्रतिषिद्धम्।

मुद्रामंडलध्यानैरनक्षरैः कर्माणि क्रियन्ते।[4] न च तानि अपौरुषेयकल्पानि युज्यन्ते।

दिनैतदेव बोधयति। **बौद्धमन्त्रकल्पे हिंसामैथुनात्मदर्शनादय** आदिशब्दादनृतवचनादय **अनभ्युदयहेतवो** दुःखहेतवो **वर्ण्यन्ते। इतरस्मिंस्त्वबौद्धमन्त्रकल्पे** त एव हिंसादयोन्य[5]था चाभ्युदयहेतवो वर्ण्यन्ते। यदि च सर्वे मन्त्रकल्पा अपौरुषेया. स्युस्तदा चैतद् **विरुद्धाभिधायि** वाक्य**द्वयमेकत्रापौरुषेये कथं सत्त्यं स्यात्।**

स्यादेतद् (।) बौद्धमन्त्रकल्पे हिंसादिशब्दानामन्य एवाप्रसिद्धोर्थो यो वैदिकेन मन्त्रकल्पेनाविरुद्ध इति (।) अत आह। **तत्रेत्यादि**। तत्र बौद्धे मन्त्रकल्पे प्रसिद्धादर्थादन्यस्यार्थान्तरस्य **कल्पने** क्रियमाणे। **तदर्थान्तर**[6]**कल्पनमन्यत्राबौद्धे** वैदिके मन्त्रकल्पे **तुल्यमिति** कृत्वा सर्वत्र मन्त्रकल्पेष्वर्थान्तरकल्पनासम्भवेनार्थानिर्णयात्। तत्प्रतिपादितेर्थे क्वचित् प्रतिपत्तिरनुष्ठान न स्यात्। **तथा चेत्यर्थानिश्चयेनानुष्ठानाभावे** सदप्य**पौरुषेयम्वाक्य** पुरुषार्थ प्रत्य**नुपयोगं।**

बौद्धादीनां मन्त्रत्वमेव नास्तीति चेदाह। बौद्धादीनाममन्त्रत्व इति।
161a **तदन्यत्रापि** तस्माद् बौद्धा[7]दिमन्त्रादन्यत्रापि वैदिके मन्त्रे मन्त्रत्वप्रतिपादनाय **कोशपानं करणीयं**। न हि काचिद् व्यक्तिरस्तीत्यभिप्राय। दृष्टविरुद्ध चैतद् बौद्धादयो न मन्त्रा इति। तथा हि **विषादिकर्मकृतो** विषकर्मादीन् कुर्वन्तो **बौद्धा अपि मन्त्रा दृश्यन्ते।** तेन **तत्र** बौद्धादिषु मन्त्रकल्पेष्व**मन्त्रत्वमपि** विप्रतिषिद्ध। विषकर्मादिकरणद्वारेण वैदिकानामपि मन्त्रत्वव्यवस्थापनात्। न च[1] विषस्तम्भनादिसामर्थ्ययोगात् वेदवाक्य लौकिकवाक्यादतिशयवदित्येवापौरुषेय युक्त।

तथा हि पाण्यङ्गुलसन्निवेशो **मुद्रा। मण्डलं** देवतादिरचनाविशेषः। **ध्यानन्देवतादिरूपचिन्तन। तैरनक्षरै**रशब्दस्वभावै **स्वकर्माणि** विषाद्यपनयनादिलक्षणानि **क्रियन्ते। न च तानि** मुद्रामण्डलध्यानान्य**पौरुषेयाणि** युज्यन्ते[2](।)

स्यादेतत् (।) मुद्रादिष्वेव पुसा करणसामर्थ्यन्न वर्णक्रमेषु मन्त्रेष्विति।

तेषां क्रियासम्भवे अक्षररचनायां कः प्रतिघातः ? तस्मान्न किञ्चिदशक्यक्रियमेषाम्।

तौ च सत्त्यप्रभवौ[5] मन्त्रकल्पौ कथं परस्परविरुद्धौ ? न वै सर्वत्र तौ सत्त्यप्रभवौ । प्रभावयुक्तपुरुषप्रतिज्ञालक्षणावपि स्तः । स प्रभावो गतिसिद्धिविशेषा[6]भ्यामपि स्यात्।

यदि पौरुषेया मन्त्रास्तदा सर्वे पुरुषाः किन्न मन्त्रकारिणः ? तत्क्रियासाधनवैकल्यात् ।

यदि पुनस्तादृशैः सत्त्यतपःप्रभृतिभिर्युक्ताः[7] स्युः । 496b

अपि च काव्यानि पुरुषः करोतीति सर्वः पुरुषः काव्यकृत स्यात् । अकरणे

तन्न। यस्मात् **तेषां** मुद्रादीना **क्रियासम्भवे सत्यक्षररचनायां** सत्त्यादिमता पुसा **कः प्रतिघातो** विशेषाभावात् । **तस्मान्न किञ्चिदशक्यक्रियमेषा** पुसा। येन पुरुषेणाकृतमतिशयमुपलभ्य लौकिकेभ्यो वैदिकाना स्वभावभेद कल्प्येत।

यदि बौद्धेतरौ मन्त्रकल्पौ[3] द्वावपि पौरुषेयौ **तौ च सत्त्यप्रभवौ**। अवितथाभिधायिपुरुषादुत्पन्नौ। **तत्कथमिदानीन्तावेव** सत्त्यप्रभवौ **मन्त्रकल्पौ** बौद्धेतरौ-**परस्परविरुद्धौ** युज्येते। एकत्र हिंसादीनामनभ्युदयहेतुत्वेन दर्शनादन्यत्राभ्युदयहेतुत्वेन।

नेत्यादिना परिहरति। **न वै सर्वत्र तौ** मन्त्रकल्पौ **सत्त्यप्रभवौ** येनाय विरोध । किन्तु **प्रभावयुक्त**[4]**पुरुषप्रतिज्ञालक्षणावपि तौ** मन्त्रकल्पौ **स्तः**। प्रभाववता पुरुषेण "य इमा वर्णपदरचनामभ्यस्यति तद्विधि चानुतिष्ठति तस्याह यथाप्रतिज्ञातमर्थं सम्पादयिष्यामी"ति या प्रतिज्ञा' तल्लक्षणावपि मन्त्रकल्पौ भवत । ततोन्यथावाद्यपि प्रभावयुक्तौ मन्त्रकल्पौ कुर्यादेवेत्यविरोध । स एव सत्त्याभावात् प्रभाव' कुत इति चेदाह। **स प्र**[5]**भावो गतिसिद्धिविशेषाभ्यामपि स्यात्**। पुण्येन गतिविशेष एव स तादृशो लब्धो देवतादिसङ्गृहीतो मन्त्रसिद्धिविशेषो येन स तादृश प्रभावो भवतीति।

यदि पौरुषेया मन्त्रास्तदा पुरुषत्वात् **सर्वे पुरुषाः किन्न मन्त्रकारिणः** (।) न च कुर्वन्ति। तस्मादभिमता अपि पुरुषा न मन्त्रानकार्षुरित्यभिप्राय'।

तदित्यादि सि द्धा न्त वा दी।[6] तेषाम्मन्त्राणा यत् **क्रियासाधनं** सत्त्यतपःप्रभावादि तेन **वैकल्यान्न** सर्वे पुरुषा मन्त्रकारिण ।

यदि पुनस्तादृशैः सत्त्यतपःप्रभृतिभिर्मन्त्रहेतुभि. पुरुषा युक्ताः स्युस्तदा ते मन्त्रान् कुर्वन्त्येव।

वा कश्चिदपि नैव कुर्यात्, तद्वदित्यपूर्वेषा वाचो युक्तिः !

सत्यम्। मन्त्रक्रियासाधनेन विकला मन्त्रान् न कुर्वते। तदेव साकल्यं कस्यचित् न पश्यामः। सर्वपुरुषाणां समानधर्मत्वात्।

उक्तमत्र, न मन्त्रो नाम सत्त्यादिमत्प्रतिज्ञावचनात्[2] अन्यदेव किंचित्। तानि च क्वचिदेव पुरुषेषु दृश्यन्ते।

सर्वपुरुषास्तद्रहिता इत्यपि अनिर्णयः, तत्सम्भवस्य विरोधाभावात्। न च अत्यक्षस्वभावेषु अनुपलब्धिरभावनिश्चयस्य हेतुः। न च स्मृतिमतिप्रतिवेधसत्त्यशक्तयः सर्वत्र भाविन्यो भवन्ति।

अपि च काव्यानि तत्क्रियाप्रतिभायुक्त **पुरुषः करोतीति** कृत्वा तत्क्रिया-
161b प्रतिभारहितोपि **सर्वः पुरुषः** पुरुषत्वसाम्यात् **काव्यकृत् स्यात्। अकर[7]णे वा कस्यचिदन्योपि नैव कुर्यात्। तद्वत्।** काव्यकरणासमर्थपुरुषवत्। **इत्यपूर्वेषा वा चो युक्तिः।** व्यभिचारिणीत्यर्थ ।

सत्त्यमित्यादि पर.। **मन्त्रक्रियासाधनेन विकलाः** पुरुषा **मन्त्रान्न कुर्वते।** केवलन्त**देवात्र** मन्त्रक्रियासाधनस्य सत्त्यादे **साकल्यं कस्यचित्** पुरुषस्य **न पश्यामः। सर्वपुरुषाणां समानधर्मत्वात्।**

उक्तमिति सि द्धा न्त वा दी। अ[1]त्र चोद्य उक्तमुत्तर। किमुक्त। **न मन्त्रो नामेत्यादि**। वचन च समयश्चेति द्वन्द्व । **सत्त्यादिमतां** पुरुषाणा समीहितार्थसाधनाद्व**चनात्**। तथा सत्त्यादियुक्तपुरुष**प्रतिज्ञा**लक्षणाच्च समयान्न मन्त्रोनामा**न्यदेव किंचित्। तानि च** सत्त्यतपोगतिसिद्धिविशेषलक्षणानि मन्त्रक्रियासाधनानि **क्वचिदेव पुरुषेषु दृश्यन्ते।**

स्यादेतद् (।) यो य पुरुषस्य[2] मन्त्रक्रियासाधनरहितस्तद्यथा रथ्यापुरुष.। पुरुषश्चाय मन्त्रकर्त्तृत्वेनाभिमत पुरुष इति। तत्रापि **सर्वपुरुषास्तद्रहितास्तेन** मन्त्रक्रियासाधनेन रहिता **इत्यपि तत्सम्भवस्य** मन्त्रक्रियासाधनसम्भवस्य पुरुषत्वेन सह **विरोधाभावात्। अनिर्ण्णयोऽनिश्चय**·। मन्त्रक्रियासाधनस्य स्वभावानुपलम्भादेव पुरुषे स्वभावनिश्चय इति चेदाह। **न चे[3]त्यादि**। **अत्यक्षस्वभावेषु** अक्षातिक्रान्त. स्वभावो येषान्तेष्वत्यन्तपरोक्षेष्वित्यर्थः। **अनुपलब्धिर्नाभावनिश्चयस्य हेतुः।** आत्मनि मन्त्रक्रियासाधनाना स्मृत्यादीनामनुपलम्भेन परत्राप्यभावो निश्चीयत इति चेदाह। **न चे**त्यादि। अतिक्रान्तजन्मादिस्मरणं स्मृ तिः। परचित्तावबोधो म ति·। अदृष्टेषु पदार्थतत्त्वदर्शन **प्रतिवेधः। सत्त्य**मनन्यथावा[4]दित्वं। **शक्तिः** प्रभावः। ता मन्त्रहेतवः सर्वभाविन्यः। **सर्वपुरुष-**

तत्साधनसम्प्रदायभेदवद् गुणान्तरसाधनान्यपि[4] स्युः। नापि सन्नपि सर्वैर्द्रष्टुं शक्यः। अत एव अदृष्टस्य अनपह्नवः। नापि पुरुषेषु कस्यचिदपि उत्पित्सोर्मनोगुणस्य प्रतिरोद्धाऽस्ति। बाध्यस्यादृष्टेः[5] बाध्यबाधकभावासिद्धेः।

एतेन सर्वज्ञादिप्रतिषेधादयो निर्वाणितोत्तराः। तत्रापि अतत्साधनसम्प्रदायोऽयं कथमिव अन्येषामपि तथाभावो[6] एवंभूतो नेति न न्याय्यः। नादृष्टज्ञापक इत्यपि।

सन्तानभाविन्यो भवन्ति। येन ता आत्मनि न दृष्टा इत्यन्यत्रापि प्रतिक्षिप्येरन्।

इदानी स्मृत्यादीना क्वचिदेव पुरुषे सम्भवमाह। **तत्साधन**मित्यादि। तेषा स्मृत्यादीना यथोक्ताना यत्साधनमुत्पत्तिकारणन्तस्य **संप्रदाय उपदेशस्तस्य भेदो** विशेष क्वचिदेवागमे सम्भवो न सर्वत्र[5]। **तद्वद् गुणान्तरसाधनान्यपि स्युः।** क्वचिदेव पुरुषे भवेयु। सिद्धि साधन,। स्मृत्यादिकारणाना कार्यभूतानि यानि गुणान्तराणि स्मृत्यादिरूपाणि। तेषा साधनानि निष्पत्तयोपि क्वचिदेव पुरुषे स्यु. स्मृत्यादिकारणानुष्ठानात्। यदि स्मृत्यादि साधन स्यात् किन्न दृश्यत इति चेदाह। **नापी**त्यादि। **सन्नपि** विद्यमानोपि सन्तानान्तरस्थो मनोगुणो **द्र[6]ष्टुं** पुरुषमात्रेण **न शक्य**। **अत एव** कारणा**ददृष्टस्य** सन्तानान्तरस्य मनोगुणस्यान**पह्नवो**प्रतिक्षेप·। **नापि पुरुषेषु** मनोगुण**स्योत्पित्सो**रुत्पत्तिमिच्छो **प्रतिरोद्धा** बाधकोस्ति येन तदन्यगुणातिशायी मनोगुण **कस्यचिदपि नास्ती**ति स्यात्। पुरुषत्वादिक एव धर्मो बाधक इति चेत् (।) न। कि कारण। तस्यान्यसन्तानभाविनो **बाध्यस्य[7]** गुणस्य पुरुषमात्रेणादृष्टेः। पुरुषत्वादिना धर्मेण **बाध्यबाधकभावा-** 162a
सिद्धेः। अबाधकाच्चाप्रतिक्षेपः।

एतेनान्तरोक्तेन सर्वस्यार्थस्य यज्ज्ञानन्तस्य प्रतिषेधः। आदिशब्दाद् वीतरागादिप्रतिषेधादयो निर्वाणितोत्तराः।

यथा न वक्तृत्वादिलिगेन सर्वज्ञत्वादीना प्रतिक्षेप इति। **तत्रापि** बीतरागत्वादिप्रतिक्षेप **एवंभूतः** पुरुषो वीतरागत्वा[1]दिगुणयुक्तो नेति न्यायो युक्तः। किभूत। यादृशोयमसम्भवन्तत्साधनसप्रदाय। असम्भवन्**तत्साधनसंप्रदायो** वीतरागत्वादिसाधनसप्रदायो यस्येति विग्रह। वीतरागत्वादिसाधनेनोपायेन विकलस्स वीतरागादि**र्न भवत्येवं न्याय इति** यावत्। **न दृष्टज्ञापको**तत्स्वभाव **इत्यपि**। अदृष्ट ज्ञापक वीतरागत्वादि लिङ्ग यस्य। स ज्ञापको दर्शनमा[2]त्रेणातत्स्वभावो वीतरागत्वादिगुणवियुक्तस्वभावो भवतीत्यपि न युक्तम्वक्तु। न हि ज्ञापकानुपलम्भमात्रेण ज्ञाप्यस्याभावो न्याय्यः। कि कारण। **सतामपि** केषाचिदर्थाना लिगभूतस्य **कार्यस्यानारम्भसम्भवात्**। आरब्धन्नाम तैरतीन्द्रियै. कार्यन्तथापि **स्वभावविप्र-**

सतामपि कार्यस्यानारम्भसम्भवात्, स्वभावविप्रकर्षेण द्रष्टुमशक्यत्वाच्च ।[7]

197a तस्मादध्ययनं अध्ययनान्तरपूर्वकमिति अध्ययनादिति व्यभिचारि। भारताध्ययने भावात्।

वेदेन[1] विशेषणाददोष इति चेत्। कः पुनरतिशयो वेदाध्ययनस्य, येन अन्यथाऽध्ययनं न शक्यते ? न हि विशेषणं अविरुद्धं विपक्षेण सह असाद्धेतुं[2] निवर्त्तयति। अविरुद्धयोरेकत्र सम्भवात्। इदानीन्तनानां अनध्ययनादिति चेत्। उक्तोत्तरमेतत्। अदर्शनादिति चेत्। इदमपि प्राक् प्रत्यढम्। नाप्यदर्शनमात्रमभावं गमयतीति व्यभिचार एव। तस्माद् विशेषणं अतिशयभाग् न भवतीति अनुपात्तसमम्।

यत् किञ्चिद् वेदाध्ययनं सर्वं तद् वेदा[4]ध्ययनान्तरपूर्वकमिति व्याप्तिर्न

कर्षेणामीषामिद कार्यमिति द्रष्टुमशक्यत्वाच्च । तस्मान्मन्त्रक्रियासाधनवैकल्य[3] यथैकस्य तथा सर्वस्येत्येतदशक्यनिश्चयमिति स्थित।

यत एवन्तस्मादध्ययनमध्ययनान्तरवद् अध्ययनान्तरपूर्वकमिति साध्ये अध्ययनादिति लिङ्ग व्यभिचारि। भा र ता ध्ययने पौरुषेयाध्ययनत्वस्य भावात्।

वेदेन विशेषणाददोषः। अध्ययनमात्रस्य हि व्यभिचारो न वेदेन विशिष्टस्याध्ययननस्येत्यभिप्राय । कः पुनरित्यादि सिद्धान्तवादी। को[4]तिशयो वेदाध्ययनस्य येन तद्वेदाध्ययनमन्यथेति स्वय कृत्वाध्येतु न शक्यते। नैव कश्चिदतिशय (।) ततो वेदाध्ययन च स्यान्न चाध्ययनपूर्वकमिति विरोधाभावात् स एव व्यभिचार । यस्मान्न हि विशेषणं वेदत्वमविरुद्धं विपक्षेणानध्ययनान्तरपूर्वकत्वेन सह। अस्माद् विपक्षाद्धेतुन्निवर्त्तयति । कि कारण। अविरुद्धयोर्वेदत्वानध्य[5]यनान्तरपूर्वकत्वयोरेकत्र वेदवाक्ये सम्भवात्। को ह्यत्र विरोधो यद् वेदाध्ययन च स्यान्न चाध्ययनान्तरपूर्वकमिति। इदानीन्तनानां पुरुषाणामनध्ययनात्। अध्ययनान्तरपूर्वकत्वेनैवाध्ययनात् । उक्तोत्तरमेतत्। भा र ता ध्ययनेपि प्रसङ्गात्। तदपि हीदानीन्तना परोपदेशेनैवाधीयत इति। तस्याप्याद्याभिमतमध्ययनमध्यय[6]नान्तरपूर्वकत्वेन वेदवदपौरुषेय स्यात्। वेदाध्ययनपूर्वकमेव वेदाध्ययन कर्त्तुरदर्शनादिति चेत्। 'इदमपि प्राक् प्रत्यूढं प्रतिक्षिप्त। दृश्यन्ते हि विच्छिन्नक्रियासप्रदाया । कृतकाश्चेत्यादिना। नाप्यदर्शनमात्रमभावं गमयतीति कृत्वा व्यभिचार एव वेदाध्ययनत्वादित्यस्य हेतो । तस्मात् वेदत्व विशेषण-
162b मध्ययनस्य हेतोरतिशय[7]भाग् न भवति विशेषाधायकन्न भवति। विपक्षविरोधाभावेन विपक्षादव्यावर्त्तनात्। उपात्तमपि विशेषणमनुपात्तसमं।

किञ्च। यत्किञ्चिद वेदाध्ययन सर्वन्तदध्ययनान्तरपर्वकमिति वेदेन

सिध्यति। सर्वस्य तथाभावासिद्धेः। यादृशं तु तन्निमित्तं दृष्टं तत्तथैवेति स्यात्। तन्निमित्ततया दृष्टे विशेषे त[5]त्यागेन सामान्यग्रहणं हि हुताशनसिद्धौ पाण्डुद्रव्यवद् व्यभिचार्येव।

एतेन रागादिसाधने वचनादयः प्रत्युक्ताः।

अस्तु वाऽध्ययनं एतद[6]ध्ययनपूर्वकम्।

सर्वथानादितः सिद्ध्येदेवं नापुरुषाश्रयः।
तस्मादपौरुषेयत्वे स्यादन्यो(प्यनरा)श्रयः ॥२४७॥

पुरुष एव हि स्वयं अभ्यूह्य[7] अधीयते परतो वा। तेषामव्यापृतकरणानां 497b
स्वयं शब्दा न ध्वनयन्ति, येन अपौरुषेयाः स्युः।

विशेषितेपि हेतौ **व्याप्तिर्न सिध्यति**। विपर्यये बाधकप्रमाणाभावेन **सर्वस्य** वेदाध्ययनस्य **तथाभाव**सिद्धेरध्ययनान्तरपूर्वकत्वासिद्धेः। **यादृशं** स्वध्ययन स्वय[1] कर्त्तुमशक्तस्य **तन्निमित्त**मध्ययनान्तरनिमित्त **दृष्ट तत्तथेत्य**ध्ययनान्तरपूर्वकमे**वेति स्यात्**। स्वय कृत्वाध्येतुमशक्तस्य यदध्ययनन्तस्य दृष्टे विशेषजाड्यादिलक्षणे तन्निमित्ततया परपूर्वाध्ययननिमित्ततया। तत्त्यागेन तस्य जाड्यादिनिमित्तस्याध्ययनस्य यथा परिदृष्टे विशेषस्य त्यागेन। यद्वा **तन्निमित्ततया** शक्तिनिमित्ततया। **दृष्टेऽवगते विशेषे**स्वय कृत्वाध्ययनलक्षणे[2] **तत्यागेन** तस्य विशेषस्य त्यागेन वेदाध्ययनत्वसा**मान्यस्य ग्रहणं** शक्तस्याशक्तस्य वा सर्व वेदाध्ययनमध्ययनान्तरपूर्वकम्वेदाध्ययनत्वसामान्यादिति क्रियमाण **व्यभिचार्येव**। किमिव (।) **हुताशनसिद्धौ**। अग्निसिद्धौ **पाण्डुद्रव्यत्ववत्**। अग्निसाध्ये धूमे य पाण्डुविशेषो दृष्टस्तत्त्यागेन पाण्डुद्रव्यसामान्यमुपादीयमानमग्निसिद्धौ यथा व्यभिचा[3]रि तद्वदित्यर्थ।

एतेनानन्तरोक्तेन व्यभिचारित्वप्रतिपादनेन **वचनादय**। आदिशब्दात् पुरुषत्वादय **प्रत्युक्ताः**। यथा तेपि व्यभिचारिण इति।

कस्मिन् साध्ये (।) **रागादिसाधने**। रागादिसिद्धौ। यादृशो रागादिप्रभवो वचनविशेषो दृष्टस्तत्त्यागेन वक्तृत्वसामान्यस्य व्यभिचारात्।

अस्तु वेत्यभ्युपगम्याप्याह। सर्वथाप्येवंकृत्वा वेदस्यानादिता सिध्ये[4]दादिरहितत्वमात्र सिध्येत्। **नापुरुषाश्रयः**। अपौरुषेयत्वन्तु न सिध्येत्।

अथ **तस्मादपौरुषेय**मात्रादेवापौरुषेयत्वमिष्यते। तदा **स्यादन्यो**पि लोकव्यवहारोनादिप्रवृत्तत्वा**दनराश्रय**ोपौरुषेय। **पुरुष एव हि स्वयमभ्युह्यो**पकल्प्याधीयते। **परतो** वा श्रुत्वाधीयते तेषा पुसा**मव्यापृतकरणानाम**व्यापृततालवादीना **स्वयं**

अपि स्युरपौरुषेया यदि पुरुषाणामादिः स्यात्[1]। **तदाऽपि अन्यपूर्वकं न सिध्यति। अध्यापयितुरभावात्।**[1]

34a **तत्प्रथमोध्येता कर्त्तैव स्यात्। तदयमनादिः पूर्वप्रदर्शनप्रवृत्तो डिम्भकपांसुक्रीडादिवत् पुरुषव्यवहार इति स्यान्नापौरुषेय एव।**

अनादित्वादपौरुषेयत्वे बहुतरमिदानीमपौरुषेयं। तथा च।

म्लेच्छादिव्यवहाराणां नास्तिक्यवचसामपि।
अनादित्वात् तथाभावः पूर्वसंस्कारसन्ततेः॥ २४८॥

म्लेच्छव्यवहारा अपि केचित् मातृविवाहादयो मदनोत्सवादयश्चानादयः।

शब्दा ध्व[5]नयन्ति। स्वरूप प्रकाशयन्ति। **येन** स्वय ध्वननेनापौरुषेयाः **स्युः**। किन्तु पुरुषव्यापारेणैषा वैदिकाना शब्दाना ध्वननाल्लौकिकवाक्यवत् पौरुषेयत्वमेव।

अपि स्युरपौरुषेयास्सम्भाव्यत एषामपौरुषेयत्व यदि पुरुषाणामादिः स्यात्। अध्ययन चानादिस्तदाप्याद्यस्य पुरुषस्याध्ययनमन्यपूर्वकमध्ययनान्तरपूर्वक **न सिध्यति**। किङ्कार[6]णम् (।) **अध्यापयितुरन्यस्य** पुरुषस्याभावात्। **तत्प्रथमोध्येता** तस्य वेदस्य प्रथमोध्येता स्वयमभ्युह्य वेदमधीत इति **कर्तैव स्याद्** वेदस्य। **तदिति** तस्मादयं वेदाध्ययनलक्षणो व्यवहार एकस्मादधीत्यापरमध्यापयति। सोप्यन्यमिति पूर्वपूर्वदर्शनप्रवृत्तोनादिः पुरुषव्यवहार इति पुरुषैरेवाय
163a रचितो व्यवहार इति स्यान्नापौरु[7]षेय एव। किमिव (।) **डिम्भकपांसुक्रीडावत्**। डिम्भका बालास्तेषा पासुक्रीडा यथा **पूर्ववत्दर्शनप्रवृत्तत्वादनादि पुरुषव्यवहार**स्तद्वत्। आदिशब्दाद् भोजनादिव्यवहार'।

अनादित्वादित्यादि। अनादित्वाद् वेदस्य**ापौरुषेयत्वे**भ्युपगम्यमाने **म्लेच्छादिव्यवहाराणामिति** स्वकुलक्रमागताना मातृविवाहादिलक्षणानामनादित्वात् तथाभावो वेद[1]वदपौरुषेयत्व स्यात्। आदिशब्दादार्यव्यवहारस्यानादे परिग्रह। तथा **नास्तिक्यवचसामपि** धर्माधर्मपरलोकापवादप्रवृत्तानाम**नादित्वात्तथाभावः**। अपौरुषेयत्व स्यात्। अनादित्वमेव तेषा कथमिति चेदाह। **पूर्वसंस्कारसन्ततेः** पूर्वसस्कारवशात् सन्तानेन प्रवृत्तेरित्यर्थ। **म्लेच्छव्यवहारा** अनादय'। के पुनस्त इत्याह। मृते[2] पितरि पुत्रेण **मातृविवाहः** कार्य इति। म्लेच्छाना केषाचिद् व्यवहार। आदिशब्दाद् वृद्धानाम्मारण ससारमोचनार्थमित्यादिव्यवहारपरिग्रह'। आदिशब्दोपात्तमाह। **मदनेत्यादि**। म द न त्र यो दश्याम्पर्वणि **मदनोत्सवः**। अत्राप्यादिशब्दात् पुत्रजन्मोत्सवादयोप्यनादय। **नास्तिकाना** लौ का य

---

[1] Restored.

नास्तिक्यवचांसि चापूर्वप[1]रलोकाद्यपवादीनि।

न हि तान्यनाहितसंस्कारैः परैः प्रवर्त्तयंति। स्वप्रतिभारचितसमयानामपि यथाश्रुतार्थविकल्पसंहारेणैव प्रवृत्तेः। तत्किंचित् कुतश्चिदागतमित्येकस्योपदेष्टुः प्रबन्धेनाभावात् अपरपूर्वकमित्युच्यते। प्रागेव यथादर्शनप्रवृत्तयः सम्यग्मिथ्याप्रवृत्तयो लोकव्यवहाराः।

नन्वादिकल्पिकेष्वदृष्ट (।) एव व्यवहाराः पश्चात् प्रवृत्ता इष्यन्ते। न (।) तेषामप्यन्यसंस्काराहि[2]तानां यथाप्रत्ययम्प्रबोधात्।

ति का नास्त्वचांसि च। किभूतान्यपूर्वपरलोका[3]द्यपवादीनि। अपूर्वस्य धर्माधर्मस्य परलोकस्य चापवादीनि प्रतिक्षेपकाणि। तान्यप्यनादीनीति। लिगविपरिणामेन सम्बन्ध ।(२४८)

कथ पुनर्म्लेच्छादिव्यवहारादीनामनादित्वमित्याह। **न हीत्यादि**। ते च व्यवहारास्तानि च नास्तिक्यवचासीति "नपुसकमनपुसकेनैकवच्चान्यतरस्यामि"-[1]ति नपुसकस्यैकशेष। तेनायमर्थ (।) तान् व्यवहारा[4]स्तानि च नास्तिक्यवचासि **परैरन्यै पुरुषैरनाहितसंस्कारा** अव्युत्पन्नबुद्धय इदानीन्तना **न प्रवर्त्तयन्ति**। किन्तु व्युत्पादितबुद्धय एव। तेप्यपरैस्तेप्यपरैरिति सिद्धमनादित्व।

येप्यपूर्व काव्यादिक कुर्वन्ति। तेषामप्यन्यकृतेनैव सस्कारेण प्रवृत्तेस्तत्कृतोपि व्यवहारोनादिरिति कथयन्नाह। **स्वप्रतिभेत्यादि**। **स्वप्रतिभया** स्वबुद्धया **रचित[5]स्समय** काव्यादिलक्षणो यैस्तेषामपि तावत् पुरुषाणा **यथाश्रुतः** परस्मात् समस्तो व्यस्तो वा योर्थः। तत्र ये **विकल्पास्तेषा संहार** एकत्रोपादानम्वर्गीकरणमिति यावत्। तेनैव प्रकारेण **प्रवृत्तेर्ग्रन्थादीना** करणात्। स्वप्रतिभारचितोपि ग्रन्थो वस्तुत परपूर्वक एव। कथन्तर्हि स्वकृत इत्युच्यते इत्याह। **तत्काव्यादिकमपरपूर्वक[6]मित्युच्यत** इति सम्बन्ध। केनचित् स्वय कृतमित्युच्यते। कि कारण (।) **कुतश्चिदुपदेष्टु** किञ्चिदर्थजातमागतमिति कृत्वा। **एकस्योपदेष्टुः प्रबन्धेनाभावात्**। तदेव स्वप्रतिभारचितोपि तावद् ग्रन्थ परमार्थत परपूर्वक एव। **प्रागेव** किम्पुनर्**यथादर्शनप्रवृत्तयः**। परेभ्यो यथादर्शनमेव प्रवृत्तिर्निवृत्तिर्येषा ते तथोक्ता[7]। 163b
सम्यग्मिथ्याप्रवृत्तयः। सम्यग् मिथ्या च प्रवृत्तिराचरण येषा **लोकव्यवहाराणान्ते** तथोक्ता। तत्र सम्यक्प्रवृत्तय पूज्यपूजादय। मिथ्याप्रवृत्तय कामोपसहितादय'। एते च स्फुटमेव परपूर्वका.।

अत्र व्यभिचारमाशकते। **नन्वित्यादि**। प्रथमकल्पे भवा **आदिकल्पिकाः**।

---

[1] Pāṇini 1.2.69

भवतु सर्वेषामपौरुषेयत्वमिति चेत् (।)

तादृशेऽपौरुषेयत्वे कः सिद्धेपि गुणो भवेत् ।

काममविसम्वादकमित्यपौरुषेयत्वमिष्टं। तद्विसम्वादकानामपि केषाञ्चिदनादित्वादस्तीति किमपौरुषेयत्वेन।

(ख) अनादित्वेऽर्थसस्कारभेदेन सशय

सति वा वेदवाक्यानामेवापौरुषेयत्वे।

अर्थसंस्कारभेदानां दर्शनात्संशयः पुनः ॥२४९॥

यद्य[3]पौरुषेयत्वेपि प्रतिनियतामेव तदर्थप्रतिभां जनयेदाश्वासनं स्याद् (।)

तेष्ववृष्टा व्यवहाराः इष्यन्ते। न हि तै पूर्वेभ्यो[1] व्यवहारा उपलब्धास्तेषामेव प्रथमत्वात्।

तेषामपीत्यादिना परिहरति। **तेषामप्यादिकल्पिकानाम्पुसामन्यसंस्कारारहितानां पूर्व**जन्मप्रसरेषु पूर्वदृष्टव्यवहारेणाहितसस्काराणा पश्चाद् **यथाप्रत्ययय**। यथा सहकारिसन्निधान **प्रबोधात्** प्रवृत्ते। तेपि नापरपूर्वका। (२४८ a b)

भवत्वनादित्वात् **सर्वेषां** म्लेच्छादिव्यवहाराणाम**पौरुषेयत्व[1]मिति चेत्। तादृशे**नादित्वमात्रेण सर्वव्यवहाराणाम**पौरुषेयत्वे सिद्धेपि को गुणो भवेत्** (।) नैव कश्चित्। तथा हि **कामं भवेदविसम्वादकमित्यपौरुषेयत्वमिष्टं। तच्चा**पौरुषेयत्व **विसम्वादकानामपि केषांचि**ल्लोकव्यवहारणा**मस्ती**ति नापौरुषेयत्वमवितथत्वस्य साधक व्यभिचारादिति **किन्तेनापौरुषेयत्वेन** कल्पितेन।

अथ[3] वेदवाक्यानामेवापौरुषेयत्वमिष्यते। तदा **वेदवाक्यानामेवापौरुषेयत्वे सत्य**पि तद्वाच्येष्वर्थेषु **संशय** एव **पुन**रिति भूय। अपौरुषेयत्वमपि कल्पयित्वा भूय. सशय एव प्राप्त इत्यर्थ। कि कारणम्(।)अर्थभेदाना वेदार्थव्याख्यानविकल्पानामाचार्यभेदेन **दर्शनात्**।

यदीत्यादिना व्याचष्टे।

अपौरुषेयत्वेपि यदि वेदवाक्य यथा[4]स्व **प्रतिनियतामेव। तदर्थप्रतिभा**। वेदवाच्यार्थालम्बनाम्बुद्धिप्रवृत्तिकामस्य यदि **जनयेत्**तदा विपरीतार्थसमारोपाभावादा**श्वासनं स्याल्लब्धाश्वास** पुरुषो भवेत्। तत्तु नास्ति। यस्माद्। **यथेष्टन्तु समारोपापवादाभ्या**मधिकशब्दप्रक्षेपेण शब्दान्तरापह्नवेन वेत्यर्थः। **विरुद्धशास्त्रव्यवहारिणो नै रु क्ता। आदिशब्दाद्** वै या क र णा दि[5]परिग्रहः। **वेदवाक्यानि विशसन्तो** नानार्थान् कुर्वन्तो **दृश्यन्ते**। न **च ते** परस्परविरोधिनो व्याख्याभेदोपनीता **अर्थास्तेषा**म्वेदवाक्यानाम् **न संघटन्त** एव सम्भवन्त्येवेत्यर्थ.।

यथेष्टन्तु समारोपापवादाभ्यां नै रु क्त मी मां स कादयो वेदवाक्यानि विशसन्तो दृश्यन्ते (।) **न च तेर्थाः तेषां न घटन्ते** (।) **समयप्राधान्यादर्थनिवेशस्यैकस्य वाक्यस्यानेक** (र्थ) **विकल्पसंभवात्** (।) **प्रकृतिप्रत्ययानामनेकार्थपाठाद्** (।) **रूढेरप्येकान्तेनाननुमतेररूढशब्दबाहुल्यात्** (।) **तदर्थस्य पुरुषोपदेशापेक्षणात। तदुपदेशस्य तदिच्छावृत्तेरनिर्णय एव वाक्यार्थेषु।**

(ग) वर्णवाक्यनित्यत्वनिरास

अपि चायमपौरुषेयत्वं साधयन् वर्णानाम्वा साधयेद् वाक्यस्य वा। तत्र (।)
अन्याविशेषाद् वर्णानां साधने किं फलं भवेत।
न हि लोकवेदयोर्नाना वर्णाः भेदेपि च प्रत्यभिज्ञानाविशेषात् तत एकत्वा-

---

कि कारणम् (।) **अर्थनिवेशस्यार्थवाचकत्वेन** प्रवर्त्तनस्य **समयप्राधान्यात्।** सकेतप्रतिबद्धत्वात्। **एकस्यापि वाक्यस्य** यथासमय**मनेकार्थविकल्पसम्भवात्** सशय एव। प्रकृतिप्रत्ययानुसारेण च वेदवाक्यानाम व्याख्यानात्। तेषा च नियतार्थत्वान्न वेदवाक्येष्वनेकार्थविकल्पसम्भव इत्यपि मिथ्या। कि कारण (।) **प्रकृतिप्रत्ययानामनेकार्थपाठसम्भवात्।** एकापि हि प्रकृतिरनेकेष्वर्थेषु पठ्यते। तथा प्रत्ययोपीति (।) तदवस्थ एव यथाभिप्रायमर्थसस्कारभेदात् सशय।

स्यादेत[7]द् (।) रुढिमाश्रित्य वेदार्थव्याख्यानात् प्रकृतिप्रत्ययानामनेकार्थ- 164a
पाठेपि न सशय इत्यप्यसत्। कि कारण (।) **रुढेरप्येकान्तेन** स्वयमेवा**ननुमते**रनङ्गीकरणात्। एतदेव कुत। **अरूढशब्दबाहुल्यात्।** अरूढा एव ये लोके शब्दास्ते वेदे बाहुल्येन दृश्यन्ते। तद्यथा जर्भुराण[1]प्रभृतय। ततो न तत्र रूढिशब्दान्निर्णय। तत्र **तदर्थस्या**रूढशब्दार्थ[1]स्य निर्णये व्याख्यातृ**पुरुषोपदेशापेक्षणात्। तदुपदेशस्य** च पुरुषोपदेशस्य च। **तदिच्छानुवृत्तेः** पुरुषेच्छानवृत्तेर**निर्णय एव** वेद**वाक्यार्थेषु।** (२४६)

अपि चायं वे द वा **द्यपौरुषेत्वं साधयन्** वर्णानाम्वा **साधयेद् वाक्यस्य वा।** वाक्यविकल्पेनैव पदस्याप्यभिधान द्रष्टव्य।

(१) वर्णविकल्पमधिकृत्याह। **तत्रेत्यादि। अन्याविशेषादिति** (।) लौकिके[2]भ्यो वर्णेभ्यो वैदिकानामविशेषात्। **वर्णानाम**पौरुषेयत्व**साधने किम्फलम्भेत्** (।) नैव किञ्चित्।

न हीत्यादिना व्याचष्टे। यस्मान्न हि **लौकिकवैदिकवाक्ययोर्नाना वर्णाः।**

---

[1] In the Vedic mantras.

सिद्धिप्रसंगात्। भेदानुपलक्षणाच्च वै[5]दिकवर्ण्णासिद्धिः प्रत्यभिज्ञानादप्रतिपत्ति-प्रसंगादनभ्युपगमाच्च। तेषां चापौरुषेयत्वप्रसाधने ते तुल्याः सर्वत्रेति किमनेन परिशेषितं। तथा च सर्वो व्यवहारो पौरुषेयो न च सर्वोऽवितथ इति व्यर्थः परिश्रमः।

अथ वाक्यमपौरुषेयमिष्टं (।)

वाक्यन्न भिन्नं वर्णेभ्यो विद्यतेऽनुपलंभनात् ॥२५०॥

न हि वयं देवदत्तादिपदवाक्येषु दका[6]रादिप्रतिभासं मुक्त्वान्यं प्रतिभासं बुद्धेः पश्यामो द्वितीयवर्ण्णप्रतिभासवत्। न च प्रतिभासमानं ग्रहणे ग्राह्यतयेष्ट-

---

किन्तर्हि (।) यथा वैदिका अकारादयोऽभिन्नास्तथा लौकिका अपि। एकत्वेन प्रत्यभिज्ञायमानत्वात्। सत्यपि प्रत्यभिज्ञाने यदि लौकिकेभ्यो वैदिकाना वर्ण्णाना भे[3]द इष्यते। तदा **भेदेपि**। ततः प्रत्यभिज्ञानाद् वैदिकानामकारादीना प्रत्युच्चारण यदे**कत्वन्तस्यासिद्धिप्रसंगात्**। कि कारण (।) **प्रत्यभिज्ञाविशेषात्**। लौकिकवैदिकवर्ण्णभेदे दृष्टस्य प्रत्यभिज्ञानस्य वैदिकेषु वर्ण्णेष्वविशेषात्। एकत्वव्यभिचारिण प्रत्यभिज्ञानात् कथम्वैदिकानामेकत्व सिध्यतीत्यर्थ। **भेदानुपलक्षणाच्च वैदिकवर्ण्णासिद्धिः**। लौकिकवैदिकयोर्भेदानुपलक्षणात्।

अथ स्याद् वैदिकेषु वर्ण्णेष्वेकत्वनिमित्तत्वात् प्रत्यभिज्ञान प्रमाणमेवान्यत्र तु सादृश्येन भ्रान्तत्वादप्रमाणमित्यत आह। **प्रत्यभिज्ञानादप्रतीतिप्रसङ्गादिति**। यद्यन्यत्राप्रमाण घटादावपि तर्हि प्रत्यभिज्ञानाद् क्षणिकत्वाप्रतिपत्तिप्रसङ्गात्। अन्यत्त्वादेव। भवद्भि र्मी मा स कैर्लौकि[5]कवैदिकवर्ण्णभेदा**नभ्युपगमाच्च**। **तेषाञ्च** वर्ण्णानाम**पौरुषेयत्वसाधने**भ्युपगम्यमाने **ते** वर्ण्णा **सर्वत्र** लोके वेदे च **तुल्या इति किमनेन** मी मा स के नैवमपौरुषेयत्व साधयता **परिशेषितं** परित्यक्तम्वर्ण्णजातं यत् पौरुषेय स्यात्। **तथा** वै लौकिकवैदिकवर्ण्णानामपौरुषेयत्वे सति **सर्वः** शाब्दो **व्यवहा**रो लौकिको वै[6]दिक**श्चापौरुषेयो न च सर्वोऽवितथो** न च सर्व सत्यार्थ। अपौरुषेयत्वेपि वितथार्थस्य सम्भवात्। **इति** हेतो**र्व्यर्थः परिश्रमो**ऽपौरुषेयत्वकल्पनायाः

(२) अथेत्यादिना द्वितीयपक्षोपन्यास। **अथ वाक्यमपौरुषेयमिष्टं**। तदसत्। तथा हि **वाक्यन्न भिन्नम्वर्ण्णेभ्यो विद्यते**। कि कारण। दृश्यस्या**नुपलम्भनात्**।

164b **न हीत्यादिना व्या[7]चष्टे। न हि वयन्देवदत्तादिपदवाक्येषु**। देवदत्तादिपदेषु **वाक्येषु च दकारा-दीना** वर्ण्णाना य. **प्रतिभासस्तं** मुक्त्वाऽन्यवर्ण्णात्मक पद-

मस्त्यन्यद्वेति स (? श) क्यमवसातुम् (।) आकारान्तरवद्(।)अन्यासंभवि कार्यं गमकमिति चेत् (।) स्याद् यदि तेषु वर्ण्येषु सत्स्वपि तत्कार्यं न स्यात्।

न भवति। तेषामविशेषेपि पदवाक्यान्तरे अभावादिति चेत् (।) न (।) तेषामविशेषासिद्धेः (।) अविशेषः प्रत्यभिज्ञानात् सिद्ध इति[7] चेत् (।) न (।)

वाक्यप्रतिभास **बुद्धेः पश्यामः**। **द्वितीयवर्ण्णप्रतिभासवत्**। यथा दकारे प्रतिभासमाने तत्समानकालमेव द्वितीयो वर्ण्णो न प्रतिभासते। तद्वन्न पदवाक्य प्रतिभासते। **न चाप्रतिभासमानं** ग्रहणे बुद्धौ **ग्राह्य[1]तयेष्टमुपलब्धिलक्षणप्राप्त सदस्ती**ति शक्यमवसातु। तथा वर्ण्णेभ्योन्यद् **वेति शक्यमवसातुं**। न चेति सम्बन्ध। अस्तित्वे निषिद्धेन्यत्त्वमपि निषिद्धमेव। तथापि द्वयोरुपादानमत्यन्तसत्त्वप्रतिपादनार्थ। **आकारान्तवत्**। यथैकस्मिन्नाकारे भासमाने तत्राप्रतिभासमान दृश्यमाकारान्तरमन्यन्नास्ति तद्वत्।

अन्यासम्भवीत्यादि[2] (।) अन्येषु वर्ण्णेष्वसम्भवि। अर्थप्रत्यायन**कार्यं**लक्षण **कार्य**व्यतिरिक्तस्य पदवाक्यस्य **गमकमिति चेत्**। तथा ह्यप्रतिपत्तिर्देवदत्तादिपदवाक्येषु दृष्टा। न चेयम्वर्ण्णेभ्यस्तेषा प्रत्येकमनर्थकत्वात्। एकवर्ण्णकालेऽपरवर्ण्णाभावेन सामस्त्याभावाच्चातोवगम्यतेऽस्ति तत्पदवाक्य यत इयमर्थप्रतीतिर्भवतीति।

स्यादित्यादिना प्रतिविधत्ते। **स्याद्** वर्ण्णेभ्यो[3]र्थान्तर पदादि। **यदि** तेषु **वर्ण्णेषु सत्स्वपि तदर्थ**प्रतीतिलक्षण **कार्यन्न स्यात्**। यावान् वर्ण्णसमुदायोर्थप्रतिपादनाय सकेतितस्तावतो यद्यर्थप्रतीतिर्न स्यात् स्यादेतत्। यावता भवत्येव। तदुक्त (।)

नान्यथानुपपत्तिस्तु भवत्यर्थमति प्रति।
तदेवास्यानिमित्त स्याज्जायते यदनन्तरमिति। (स्फोट० ६५)

न भवतीत्यादि पर·। **न भवति** वर्ण्णेभ्योर्थप्रतीति। [4] कि कारण(।)**तेषाम्वर्ण्णानामविशेषेपि पदवाक्यान्तरेर्थ**प्रतीतेर**सम्भवात्**। यदि हि वर्ण्णेभ्योर्थप्रतीति स्यात् तदा सर इत्यस्मिन् पदे यादृश्यर्थप्रतीतिस्तादृश्येव रस इत्यत्रापि स्याद् उभयत्र वर्ण्णानान्तुल्यत्वात्। एव वाक्येपि सदृशवर्ण्णे बोद्धव्य। न च भवति। तस्मान्न वर्ण्णेभ्योर्थप्रतीतिलक्षण कार्यमिति।

नेत्यादिना परिहरति। **तेषाम्वर्ण्णा[5]**ना वाक्यान्तरेष्व**विशेषासिद्धे**·। तथा हि य एकत्र वाक्ये वर्ण्णा न त एव वाक्यान्तरेषु पुरुषप्रयत्नभेदेन वर्ण्णाना प्रतिवाक्यम्भिन्नानामेवोत्पत्ते.।

तस्य व्यभिचारादनिदर्शनाच्च। वर्णविशेषेपि वाक्याभेदात् प्रतिपत्तिभेदः कार्यभेदः स्यात् वाक्यात् (।)तच्चातीन्द्रियमिति कुतः स्यात्। सन्निधिमात्रेण जननेऽभ्युत्पन्नस्यापि स्यात्। तस्मान्न वाक्यं नाम किञ्चिदर्थान्तरं वर्णेभ्यो

स एवायम्वर्ण इति **प्रत्यभिज्ञानात्** प्रतिवाक्य वर्णानाम**विशेषोऽभेद सिद्ध इति चेत्।**

नैतदेव । कि कारण। **तस्य** प्रत्यभिज्ञानस्य **व्यभिचारित्वात्**। दृश्यते हि लूनपुनर्जातेषु केशेषु भिन्नेष्वपि[6] सादृश्यग्रहणाद् विप्रलब्धस्य प्रत्यभिज्ञान। सादृश्यग्रहण च सदृशस्य स्वरूपग्रहण न त्वन्यसदृश इति ग्रहण। **अनिदर्शनत्वा**च्चादृष्टान्तत्वाच्च प्रत्यभिज्ञानस्यालिगस्य। न ह्येक प्रत्यभिज्ञायमानो वादि-प्रतिवादिसिद्धो दृष्टान्तोस्ति। नापि प्रतिपद वर्णैकत्वग्राहक प्रत्यक्ष प्रत्यभिज्ञान
165a सम्भवति। पूर्वकालसम्बन्धित्वस्येदानीमसन्नि[7]हितत्वेनाग्रहणात्। ग्रहणे वा श्रोत्र-ज्ञानवत् स्पष्टप्रतिभास स्यात् (।) न च भवति (।) तस्मान्न पूर्वकालवर्णग्रा-हक। दृश्यमानस्य चेदानीन्तनकालत्वाद् यश्चेदानीन्तनकालसम्बन्धी स्वभाव स कथ पूर्वकालसम्बन्धी। पूर्वापरकालयो परस्परविरोधात् कथ प्रत्यक्षेण तत्त्व-ग्रहण उच्यते। सन्निहितविषय च प्रत्यक्षमिष्यते (।) न च वर्णस्य सन्निधान स[1]म्भवति साशत्वात्। अन्त्यवर्णभागकाले च पूर्ववर्णभागानामसत्त्वात्। तेन न वर्णेषु प्रतिपदमेकत्वग्राहक प्रत्यक्ष प्रत्यभिज्ञान सम्भवति।

तस्मात् स्थितमेतत् प्रतिवाक्य भिन्ना एव वर्णास्तेषामेव भेदार्थप्रतीते-र्भेद इति।

ननु वर्णा निरर्थका इत्युक्तन्तत्कथन्तेषामेव भेदादर्थप्रतीतेर्भेद इत्युच्यते।

सत्य। सन्तो वर्णा निरर्थका वि[2]कल्पविषयास्तु सामान्यरूपा एव प्रति-वाक्य भिन्ना वर्णा वर्णस्वलक्षणा भेदेनाध्यस्ता वाचका इष्यन्ते। तेन वर्णाना-मेव भेदादर्थप्रतीतेर्भेद इत्युच्यते। यदि तु वर्णभेदादयमर्थप्रतीतिभेदो नेष्यते किन्तु **वर्णविशेषेपि** (।) ततो व्यतिरिक्तस्य **वाक्यस्य भेदादर्थप्रतिपत्तिभेद** (।) स एव **कार्यभेदः स्यात्**। सा चार्थप्रतीति**र्वाक्याद्** भवेत्। **तच्च**[3] वाक्यम-**तीन्द्रिय**म्वर्णव्यतिरेकेणेन्द्रियबुद्धावप्रतिभासनात्। **इति** एव **कुतः स्यात्**। वाक्यात् स प्रतीतिर्न स्यात्। सम्बन्धस्यागृहीतत्वात्।

स्यादेतद् (।) अदृश्यमपि तद्वाक्यमिन्द्रियवत् सन्निधिमात्रेण प्रतीतिं जन-यति। प्रतीत्यन्यथानुपपत्या च वाक्यकल्पनेत्यत आह।

सन्निधिमात्रेण वाक्यस्य प्रतीति**जननेऽभ्युपगम्यमाने**। इन्द्रिया[4]दिवद**भ्युत्प-**

यस्यापौरुषेयत्वं साध्येत् (?त)। तदभावाद् वेदाविशिष्टवर्ण्णापौरुषेयत्वमपि प्रथमपक्षे प्रत्युक्तं।

अपि चास्त्वर्थान्तरं वाक्यं तदनेका[8]वयवात्मकं वा स्यादनवयवं वा। 34b

अनेकांगिकतात्मत्व पृथक् तेषां निरर्थता।

तेपि तस्य बहवोवयवाः पृथक् (प्र)कृत्या यद्यनर्थकाः।

अतद्रूपे च तादृप्यं कल्पितं सिंहतादिवत् ॥२५१॥

अर्थवानेवात्मा वाक्यं। ते चावयवाः स्वयमनर्थकाः। तेषु स आत्मा कल्पनासमारोपितः स्यात् सिंहताविवत् माणवकादिष्विति। पौरुषेय एव।

अथ माभू(देष) दोष इति—

प्रत्ये[1]कं सार्थकत्वेपि मिथ्यानेकत्वकल्पना।

ऽस्याप्यकृतसकेतस्यापि पुसोर्थप्रतीतिर्वाक्यात् **स्यात्**(।) न च भवति। तस्माद् वर्ण्णेभ्य सकेतबलादेवार्थप्रतीतेर्भावात् कथमन्यथानुपपत्त्या वाक्यकल्पना। **तस्मान्न वाक्यनाम किञ्चिदवर्थान्तरम्वर्ण्णेभ्यो यस्यान्यस्यापौरुषेयत्वं साध्येत। तदभावाद्** वाक्याभावाद् वर्ण्णा एव केवलमवशिष्यन्ते। ते चाविशिष्टा सर्वत्र तेषा**मपौरुषेयत्वसा[5]**धने।

वेदनाविशिष्टरूपाणा लौकिकानामपि **वर्ण्णानामपौरुषेयत्वं** साधयितव्यम्(।) अत्र च **प्रथमपक्षे** वर्ण्णापौरुषेयत्वसाधनपक्षे **प्रत्युक्तं**। व्यर्थ परिश्रम इति। (२४६-२५०)

अपि चेत्यादि। अनेकावयवात्मत्वे वाक्यस्य कल्प्यमाने **तेषामवयवाना पृथक्** प्रत्येक **निरर्थका** यदि।

तेपीत्यादिना व्याचष्टे। **तस्य** वाक्यस्य **बहवोवयवा पृथक् प्र[6]कृत्या** स्वभावेन यद्यनर्थकास्तदा वाक्यमप्यनेकावयवसमुदायात्मक तद्वदेवानर्थक। ततश्चातद्रूप इत्यनर्थकत्वेनावाचकरूपेऽवयवसऽघाते **तादृप्यं** वाचकवाक्यरूपमर्थवत्त्वमिति यावत्। **कल्पितं** समारोपितम्भवेत्। **सिंहतादिवत्**। यथा सिहो माणवक इत्यादिषपचारेषु। माणवकादिष्वतद्रूपेषु सिहादिकमारो[7]पितन्तद्वत्। 165b

अर्थवानित्यादिना व्याचष्टे। **अर्थवानेवात्मा**। वाचक एव स्वभावो **वाक्यं। ते चावयवा** वाक्यस्य **स्वयमनर्थकाः। तेषु च** स्वयमनर्थकेष्ववयवेषु सोर्थवान् वाक्यात्मा **कल्पनासमारोपितः स्यात्। सिंहतादिवत् माणवकादिषु। इति** हेतोस्स वाचक आत्मा कल्पनारचितत्वात् **पौरुषेय एव**। (२५१)

अथ माभूदेष दोष इति प्रत्येकं वाक्य[1]स्यावयवाः वाक्यार्थेन **सार्थका इष्यन्ते।**

एकावयवगत्या च वाक्यार्थप्रतिपद्भवेत् ॥२५२॥

परिसमाप्तार्थं हि शब्दरूपं वाक्यं(।)ते चावयवास्तथाविधाः पृथक् पृथगिति प्रत्येकं ते वाक्यं। तथा च नानेकावयवं वाक्यमेकावयवप्रतिपत्त्या च वाक्यार्थप्रतिपत्तेरवयवान्तरा(म्प्रत्य)पेक्षा कालक्षेपश्च न स्यात्। तस्य निष्कलात्मनः क्षणेन प्रतिपत्तेरेकज्ञानोत्पत्तौ च निःसे (?शे)षावगमात्।

तदा **प्रत्येकमवयवाना सार्थकत्वे मिथ्यानेकत्वकल्पना** एकस्याप्यवयवस्य परिसमाप्तार्थत्वादवयवान्तरापेक्षा वाक्यस्य न युज्यत इत्यर्थ । यदा **चैकावयवगत्या च**। एकस्यापि वाक्यावयवस्य ग्रहणे **वाक्यार्थप्रतिपत्प्रतीतिर्भवेत्**।

अथ स्याद् (।) एकावयवगत्यापि सामान्येन [2] वाक्यार्थप्रतीतिर्भवत्येव। यदाह। भ र्त्तृ ह रि । "सर्वेषाम्पृथगर्थवत्ता सर्वेषु प्रतिशब्द कृत्स्नार्थपरिसमाप्ते । तथा यदेव प्रथम पदमुपादीयते तस्मिन् सर्वरूपार्थोपग्राहिणि नियमानुवादनिबन्धनानि पदान्तराणि विज्ञायन्त"[1] इति। तत्कथमुच्यते **वृथानेकत्वकल्पनेति**।

नैष दोषो यस्मात्। विवक्षितार्थविशेषापेक्षयैतदुच्यते।

प्रत्येक सा[3]र्थकत्वेपि मिथ्यानेकत्वकल्पना।

एकावयवगत्या च वाक्यार्थप्रतिपद् भवेदिति।

नापि कश्चिदवयवः कारकविशेषस्याभिधायकोन्यश्च क्रियाविशेषस्याभिधायक इति वाक्यावयवाना प्रत्येक सार्थकत्वात् साफल्य युक्त। क्रियाविशेषानन्वितस्य कारकविशेषस्याभिधातुमशक्यत्वात्। तदन्वितस्य त्वभिधाने मिथ्यानेकत्वकल्पनेत्यादिदोष[4]स्तदवस्थ एवेति।

परिसमाप्तार्थेत्यादिना व्याचष्टे। **परिसमाप्तोर्थो** यस्य **शब्दरूपस्य** तत्तथा। **ते चावयवा** वाक्यगतास्त**थाविधा** इति परिसमाप्तार्थरूपा **पृथक् प्रत्येकं**। इति हेतो प्रत्येकन्तेऽवयवा **वाक्यं** प्रसक्ता (।) **तथा** च **नानेकावयवं वाक्य**। अनेकेनावयवेन युक्तमेकम्वाक्य न स्यादित्यर्थ.। प्रत्येक चावयवाना सा[5]र्थकत्वे **एकावयवप्रतिपत्त्या** समस्तवाक्यार्थप्रतिपत्त्या समस्त**वाक्यार्थप्रतिपत्तेरवयवान्तरं प्रति अपेक्षा** श्रोतुर्न स्यात्। **कालक्षेपश्च न स्यात्**। कालहरणेन वाक्यार्थप्रतीतिर्न स्यादित्यर्थ । किङ्कारण (।) **तस्य** वाक्यार्थस्य **निष्कलात्मनो** निर्विभागस्य **क्षणेनैकेन प्रतिपत्तेः**। एतदेव कुत (।) **एकज्ञानोत्पत्तौ** तस्य वाक्यार्थस्य **निःशेषागमात्**।

---

[1] Bhāgavrtti (?)

अन्यथा चैक[2]त्वविरोधात् ॥

सकृच्छ्रुतौ च सर्वेषां कालभेदो न युज्यते ।

मा भूदवयवान्तराप्रतीक्षणेनैकस्मादेवावयवाद् वाक्यार्थसिद्धेरनेकावयवत्वहानिर्वाक्यस्येति। सकृत् सर्वावयवानां श्रवणमिष्येत। तदापि कालक्षेपो न युज्यत एव (।) एकावयवप्रतिपत्तिकाले एव सर्वेषा श्रवणात्। क्रमश्रवणे च पृथगर्थवतां एकस्मादेव तदर्थसिद्धेर[3]न्यस्य वैयर्थ्यात् (।) सकृच्छ्रुतौ च पृथगर्थेष्वदृष्टसामर्थ्यानामर्थवत्ता न सिध्यति। सहितेष्वर्थदर्शनाददोषः (।) न (।) पृथगसतो रूपस्य संहातेष्य (?सहतेष्व) संभवादर्थान्तरानुत्पत्तेश्च। शब्दोत्प-

---

अन्ये त्वन्यथा व्याचक्षते। एका[6]वयवप्रतिपत्त्या च वाक्यार्थप्रतिपत्तौ तस्यावयवस्य कालक्षेपश्च न स्यात्। किङ्कारण। तस्यावयवस्य नि कलात्मन क्षणेनैकेन प्रतिपत्ते । कि कारणम् (।) एकज्ञानोत्पत्तौ तस्य निर्भागस्यावयवस्य निशेषावगमात्।

अन्यथेति यद्येकज्ञानक्षणेन सर्वस्य ग्रहण न स्यात् तदा गृहीतागृहीतस्वभावयोरेक**त्वविरोधात्**। विरुद्धयोरेक[7]त्वायोगात्। (२५२) 166.1

अथ मा भूदयन्दोष इति **सकृच्छ्रुतिरिष्यते**। तदा **सकृच्छ्रुतौ च सर्वेषा**मवयवाना कल्प्यमानाया **कालक्षेपो न युज्यते**। (२५२)

मा भूदित्यादिना व्याचष्टे। **अवयवान्तरा**णाम**प्रतीक्षणेनैकस्मादेवावयवाद् वाक्यार्थसिद्धेर्वाक्यार्थनिश्चयात्** कारणाद् **अनेकावयवत्वहानिर्वाक्यस्येति** कृत्वा **सर्वेषाम्वाक्यावयवानां सकृच्छ्रवणमिष्यते। तदापि कालक्षेपो न युक्त एव**। [1] कि कारणम् (।) **एकावयवप्रतिपत्तिकाल** एव **सर्वेषा**मवयवाना **श्रवणात्**। क्रमेण च श्रवण दृष्ट। **क्रमश्रवणे चा**वयवाना पृथक् **पृथगर्थवता** सता**मेकस्मादेवा**वयवा**त्तदर्थसिद्धेर्वाक्यार्थसिद्धेरन्यस्या**वयवस्य **वैयर्थ्यात्**। एतच्चानन्तरमेवोक्त।

सकृत्सर्वावयवश्रवणे परन्दोषन्दर्शयन्नाह। **सकृच्छ्रुतौ** सर्वावयवाना युगपद्ग्रहणेभ्युप[2]गम्यमाने **पृथक्** प्रत्येक**मर्थेषु** वाच्येष्व**दृष्टसामर्थ्यानामवयवाना** सहितानामप्य**र्थवत्ता** च **न सिध्यति**।

स्यादेतत् (।) **सहितेष्व**वयवेष्व**र्थदर्शनादर्थ**प्रतीते पृथगप्यवयवानामर्थप्रतीतिजननसामर्थ्यमस्त्यतोय**मदोष** इति।

तन्न। कि कारणम् (।) **पृथक्** प्रत्येक तेष्ववयवेष्व**सतो रूपस्या**र्थप्रतिपादनस्वभावस्य **संहतेष्वसम्भवा**त्।

केव[3]लानामवयवाना यद्रूपन्ततोन्यदेव समुदितानामर्थप्रतिपादनसमर्थं रूपमु-

त्तिवादिनस्तावदयमदोष एव (।) **पृथगसमर्थानामप्यवयवानामुपकारविशेषा-दतिशयवतां कार्यविशेषोपयोगात्। प्रत्येकमवयवे[4]षु समर्थेषु व्यर्था स्यात् अन्यकल्पना।**

अथ पुनः (।) **एकमेवानवयवं वाक्यं। तत्र** (।)

एकत्वेपि ह्य[5]भिन्नस्य क्रमशो गत्यसम्भवात्।

कालभेद एव न युज्यते। न ह्येकस्य क्रमेण प्रतिपत्तिर्युक्ता। गृहीतागृही-तयोरभेदात्। गृहीतागृहीताभावात्। क्रमेण च वाक्यप्रतिपत्तिर्वृष्टा। सर्व-वाक्याध्याहारश्रवणस्मरणकालस्यानेकक्ष[5]णनिमेषानुक्रमपरिसमाप्तेः। वर्ण्णरूपा-संस्पर्शिनश्चैकबुद्धिप्रतिभासिनः शब्दात्मनोऽप्रतिभासनात्। वर्ण्णानुक्रमप्रतीतेः

पपद्यत इत्यत आह। अर्थान्तरानुत्पत्तेश्च। पूर्वकादसमर्थरूपादर्थान्तरस्य समर्थस्य रूपस्यानुत्पत्तेश्च। नित्यत्वाद्वर्णानामिति भाव।

अनित्यवादिनोप्ययन्दोष किन्नेत्याह। **शब्दोत्पत्ती**त्यादि। **शब्दोत्पत्तिवादि-नस्तावदयम**नन्तरोक्तो **न दोष** एव। किङ्कारण[4] (।) तस्य वादिन **पृथगसमर्था-नामप्य**समर्थाना पुन पुरुषप्रयत्नकृता**दुपकारविशेषात्** सहितावस्थायामर्थप्रतिपाद-नसामर्थ्यलक्षणेनाति**शयेना**तिशयवतामर्थप्रतीतिलक्षणे **कार्यविशेष उपयोगात्**। नित्यवादिनस्तु **प्रत्येकमवयवेषु समर्थे**ष्वेकस्मादप्यवयवादर्थप्रतीते**व्यर्था स्यावन्य-स्यावयवस्य कल्पना।**

एवन्ता[5]वत्सावयववाक्यपक्षे दोष उक्त।

अथ पुनरेकमेवानवयवम्वाक्यं स्यात्। तत्रैकत्वेपि हि वाक्यस्याभ्युपगम्य-माने। तस्या**भिन्नस्य** निर्भागस्य **क्रमशः** क्रमेण **गत्यसम्भवात्**। ग्रहणासम्भवात् **कालभेद एव न युज्यते**। यतो **न ह्येकस्य क्रमेण प्रतिपत्तिर्युक्ता**। कि कारण (।) **गृहीतागृहीतयोरभेदात्**। न हि तस्य गृहीतात् स्वभावादगृहीतोन्य·[6] स्वभावोस्ति यस्य क्रमेण ग्रहण स्यात्। भवत्वक्रमेण वाक्यस्य ग्रहणमिति चेदाह। **क्रमेण चे**त्यादि। कि कारण। **सर्वस्य वाक्यस्य** यो व्यवहारकालो वक्तु श्रोतुश्च **श्रवण**-कालः **स्मरणकाल**श्च। तस्या**नेकक्षणनिमेषानुक्रमसमाप्तेः**। अनेकः क्षणो यस्मिन्क्षिनिमेषे सोनेकक्षणनिमेषः तस्यानुक्रम परिपाटिस्तेनानुक्रमणोत्पत्ते
166b कारणात्[7]।

वर्ण्णानामिदं क्रमेण ग्रहणं वाक्यस्य त्वक्रमेणैवेति चेदाह। **वर्ण्णे**त्यादि। **वर्ण्णरूपासंस्पर्शिनो** वर्ण्णरूपव्यतिरिक्तस्यै**कबुद्धि**क्षणप्रतिभासिनः **शब्दात्मनोप्रति-भासनात्**। एतदेव कुत·। वर्ण्णानुक्रमप्रतीते **वर्ण्णानुक्रमेणै**व वाक्यस्य **प्रती-**

(।) तदविशेषेप्यनुक्रमकृतत्वाद् वाक्यस्यानुक्रमवती वाक्यप्रतीतिः। वर्ण्यानुक्रमोपकारानपेक्षणे तैर्यथाकथञ्चित् प्रयुक्तैरपि यत्किंचिद् वाक्यं प्रतीयेत। विनापि वा वर्ण्यैरनुक्रमवद्भि[6]रक्रमस्योपयोगात्। अक्रमेण च व्याहर्त्तुमशक्यत्वात्। गत्यन्तराभावाच्च। नैव वाक्ये वर्ण्या (:) सन्ति तवेकशब्दरूपं व्यंजकानुक्रमवशादनुक्रमवद् वर्ण्यविभागवच्च प्रतिभातीति चेदन्न (न) क्रमवता

तेः। न हि क्रमप्रतिभास वर्ण्यकृत मुक्त्वाऽपरो क्रम प्रतिभासस्सम्पद्यते श्रोत्रज्ञाने। इतश्च नाक्रमस्य वाक्यस्य प्रति[1]भास। यतस्त**वविशेषेपि** त्वन्मते न तेषा वर्ण्यानामविशेषेपि वर्ण्या**नुक्रमकृतत्वाद् वाक्य**भेदस्या**नुक्रमवती वाक्यप्रतीतिर्न** युगपद्भाविनी। **वर्ण्यानुक्रमोपकारानपेक्षणे**। वर्ण्यानुक्रमकृतमुपकार वाक्य यदि नापेक्षेत। तदा **तैर्वर्ण्यैर्यथाकथंचित्** तत्क्रमैरन्यक्रमै**रपि प्रयुक्तैर्यत्किञ्चिद् वाक्यं प्रतीयेत**। सरोस्तीति प्रयुक्ते रसोस्तीति प्रतीयेत। व[2]र्ण्योपकारानपेक्षत्वाद् विनापि वा वर्ण्यैर्वाक्य प्रतीयेत। न च वर्ण्योपकारापेक्षया वाक्यप्रतीति। कि कारण। **तैर्वर्ण्यैरनुक्रमवद्भिरस्य** वाक्यस्योपकारा**योगात्**। क्रमवद्भि क्रमवानेवोपकार कर्त्तव्यस्तथा चोपकार्यस्य क्रमवत्त्व स्यात् (।) न चैवमिष्यते।

अक्रमा एव वर्ण्या वाक्यस्योपकारका भविष्यन्तीति चेदाह। **अक्रमेण चे**त्यादि। **अक्रमेण** वर्ण्याना[3] **व्याहर्त्तुमु**च्चारयितु**मशक्यत्वात्**। न च क्रमाक्रमोपकारव्यतिरेकेणान्य प्रकारोस्तीति **गत्यन्तराभावान्नो**पकारका वर्ण्या वाक्यस्येति स्थित। **नैव वाक्ये वर्ण्याः सन्ति**। नैव वर्ण्यात्मक वाक्य। किन्तर्हि वर्ण्येभ्योर्थान्त**रमेकमेव शब्दरूपं** वाक्य। **व्यञ्ज**का ध्वनयो**नुक्रम**वन्तो विशिष्टेनानुक्रमेण व्यञ्जयन्ति न व्युत्क्रमेण। तदुक्त।

"यथानुपूर्वीनियमो विकारे[4] क्षीरबीजयो।
तथैव प्रतिपत्तृणान्नियतो बुद्धिषु क्रम "(।)[१]
तेन यथाकथञ्चित् प्रयुक्तैरित्यादिरदोष इति।

व्यञ्जकानुक्रमवशात् तदेकमपि वाक्य व्यक्त्यनुक्रमाद**नुक्रमवत्**। स्फोटरूपाविभागेन वर्ण्याना नादरूपाणा ग्रहणाद् **वर्ण्यविभागवच्च** पुरुषस्य **प्रतिभाति** (।) परमार्थतोनुक्रमवर्ण्यविभागाभ्या रहितमपि। तदुक्त।

"नादस्य क्रमजन्यत्वान्न पू[5]र्वो नापरश्च स·।
अक्रमः क्रमरूपेण भेदवानिव जायते॥

---

[1] Kumārila.

व्यञ्जकेनाक्रमस्य व्यक्तिः प्रत्युक्ता। व्यक्ताव्यक्तविरोधात्। अवर्णभागेव वाक्येऽसकलश्राविणो वाक्यगतिर्न स्यात् (।) एकस्य स(?श)कलाभावात् सक[7]-

---

तस्मादभिन्नकालेषु वर्णवाक्यपदादिषु।

शब्दकालस्वभावश्च नादभेदाद् विभिद्यत" इति ॥[1]

अत्रोत्तरमाह। अनुक्रमवतेत्यादि। एवम्मन्यते। अवधारणरूपा वाभिव्यक्तिरनवधारणरूपा वा (।) तदावधारणरूपाभिव्यक्तिरक्रमस्य वाक्यस्यानुक्रमवता **व्यञ्जकेन प्रत्युक्ता** प्रतिक्षिप्ता।[6] कि कारण (।) **व्यक्ताव्यक्त**रूपयोरवधृतानवधृतरूपयोरेकत्र **विरोधात्**। न ह्यवधृतरूपादन्यदनवधृत रूपान्तरमेकस्यास्ति येन तत्पश्चाद् व्यज्यते। तेन यदुच्यते। "प्रथमेन वर्णेनाभिव्यक्तस्यानवधारणादवधारणार्थमन्येषाम्वर्णाना व्यापार" इति तदपास्त। प्रथम
167a मेनैव वर्णेनावधारणरूपया व्यक्तेर्निष्पादितत्वात्। अनवधारण[7]रूपाया व्यक्तौ समस्तवर्णेत्यादिनोत्तरम्वक्ष्यति।

अथ स्याद् (।) वर्णेभ्यो भिन्नमेव वाक्य प्रतिभासते न तु ध्वनिससृष्ट। तदुक्त (।)

कैश्चिद् ध्वनिरसम्वेद्य स्वतन्त्रोन्यै प्रकल्पित इति।

अत्राप्याह। **अवर्णेत्यादि**। अविद्यमाना **वर्ण**रूपा **भागा** यस्मिन् **वाक्ये** तस्मिन्नभ्युपगम्यमाने पुरुषस्या**सकलश्राविणो** समस्तवर्णानुक्रमश्राविण खण्डश. श्रोतुरित्यर्थं। कदाचिदप्यस[1]कलस्य **वाक्यस्य गतिः** श्रुति**र्न स्यात्**। कि कारण (।) वर्णव्यतिरिक्त**स्यैकस्य** वाक्यस्य **शकलाभावाद्** भागाभावात्। भवति च लोके कतिपयवर्णश्रवणे पूर्ववाक्यभागश्रवणप्रतीति। अथ वर्णैर्भागवतो वाक्यस्याभ्युपगमात्। कतिपयवर्णश्रवणे पूर्ववाक्यभागश्रवणमिष्यते।

तदयुक्तम् (।) एकत्वाद् वाक्यस्य यदि पूर्वभागश्रवणन्तदा **सकलश्रुतिः** सर्वात्म[2]ना वाक्यस्य श्रवण स्यात्। पूर्वभागाव्यतिरेकात्। अथ न सकलश्रुतिस्तदा **न वा कस्य**चिच्छ्रुति स्यात्। पूर्वस्यापि भागस्य श्रुतिर्न स्याद् वाक्यव्यतिरिक्तत्वादिति।

तेन यदुच्यते म ण्ड ने न। "व्यञ्जकसादृश्याच्च वाक्ये तदात्मग्रहणाभिमानस्तेन नाश्रवण सकलश्रवण वेति" (।)

तदपास्त। सकलासकलवर्णभागप्रतिपत्तिकाले निष्कलस्य वाक्यस्याश्रव[3]-

---

[1] Kumārila.

लश्रुतिर्न्न वा कस्यचित् (।) समस्तवर्ण्णसंस्कारवत्याऽन्त्यया बुद्ध्या वाक्यावधारणमित्यपि मिथ्या। तस्यावर्ण्णरूपसंस्पर्शिनः कस्यचित् कदाचिदप्रतिपत्तेः।

णात्। न हि व्यङ्ग्यव्यञ्जकयो सादृश्यम्वर्ण्णावर्ण्णात्मकत्वेन विसदृशत्वात् तत्कथ वाक्ये वर्ण्णात्मग्रहणाभिमान इति यत्किञ्चिदेतत्।

अन्ये त्वन्यथा व्याचक्षते। अथोपकार्योपकाराभावेनायुक्तमपि क्रमवद् व्यञ्जकानुविधानमक्रमस्य वाक्यस्याभ्युपगम्यते। ततश्चासकलश्रुतिरित्यत आह। **सकले**त्यादि। खण्डश श्रोतुरपि **सकलस्य** निष्कलस्य[4] वाक्यस्य **श्रुतिः** स्यात्। अथ नेष्यते तदा **न वा कस्यचित्** पुस स्यात्। सकलवर्ण्णश्राविणोपि **न** वा निष्कलस्य वाक्यस्य श्रुति स्यात्। अन्त्यावस्थायामपि युगपद् वर्ण्णानामश्रवणेन भागस्यैव श्रवणात्।

अथ स्याद् (।) यथा श्लोक एकदा प्रकाशितो नावधारितोन्यदा प्रकाशने त्ववधारणसहो भवति। पुन पुन प्रकाशने त्ववधार्यते। तथा वाक्य पूर्वध्वनिभा[6]वानभिव्यक्तमपि नावधारित। तेन पूर्वपूर्ववाक्याभिव्यक्त्याहितैस्तु सस्कारैर्वाक्यावधारणप्रति प्रत्ययभूतैरन्त्यवर्ण्णश्रवणकाले तदवधार्यते। तस्माद् वर्ण्णानानुक्रमवताऽक्रमस्य वाक्यस्य व्यक्तिर्युज्यत एव। तदुक्त।

"यथानुवाक श्लोको वा सोढत्वमुपगच्छति।
आवृत्त्या न तु स ग्रन्थप्रत्यावृत्तिर्निरुच्यते॥
प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्त[6]था।
ध्वनि प्रकाशिते शब्दे स्वरूपमवधार्यते॥
नादैराहितबीजायामन्त्येन ध्वनिना सह।
आवृत्तपरिपाकायाम्बुद्धौ शब्दोवधार्यत" इति॥[1]

एतदेवाह। **समस्ते**त्यादि। समस्तैर्वर्ण्णै प्रत्येक वाक्याभिव्यक्तिपूर्वका ये कृता सस्कारा विद्यन्ते यस्या बुद्धेस्सा तथा। तया स**मस्तवर्ण्णसंस्कारवत्यान्त्यया** न्त्यवर्ण्णविषयया **बुद्ध्या** निष्कलस्य **वाक्यस्यावधारणमि[7]त्यपि** कल्पना **मिथ्या**। 167b
कि कारण (।) **तस्य** वाक्यस्या**वर्ण्णरूपसंस्पर्शिनः**। वर्ण्णरूपसस्पर्शरहितस्य श्रोत्रज्ञाने **कस्यचित्** पुरुषस्य **कदाचिदप्यप्रतिपत्तेः** प्रतिवर्ण्णोच्चारण प्रतिभासाभाव इत्यर्थ. श्लोकस्य तूच्चारण प्रतिभासोस्ति।

अथ स्याद् (।) वर्ण्णात्मकमेव वाक्यन्तेनेन्द्रियज्ञानविषयमेवेत्यत आह।

---

[1] Kumārila.

वर्ण्णानां चाक्रमेणाप्रतिपत्तेः कुतोऽक्रममेकबुद्धिग्राह्यं नाम। न चान्त्यवर्ण्णप्रतिपत्तेरूर्द्ध्वमन्यमशकलं शब्दात्मानमुपलक्षयामः(।)

[1](**नापि स्वयमयं वक्ता विभावयति। समाप्तफलः शब्दोन्त्यायां बुद्धौ भातीत्येवं यदि स्यात्। साधु स्यादित्येवं कल्याणकामतया मूढमतिः स्व[7]प्नायते।**

५००b **नहि स्मर्यमाणयोरपि पदवाक्ययोः वर्णाः क्रमविशेषेण विभाव्यन्ते। अक्रमायां बुद्धौ पौर्वापर्याभावाद्। पदवाक्यभेदानां च तत्कृतो भेदो न स्यात्।**

नापि[1] वर्णाक्रमं शब्दरूपं पश्याम इत्युक्तम्।

वर्ण्णानां चाक्रमेणाप्रतिपत्तेः क्रमेणैव प्रतिपत्ते कारणात् **कुतोक्र[1]ममेकबुद्धिग्राह्यम्वाक्यन्नाम।**

अथ स्याद् (।) **अन्त्यवर्ण्णप्रतिपत्तेरुर्ध्वं** मानसेन ज्ञानेन निरवयवस्य वाक्यस्यावधारणमस्त्येवेति चेदाह। **न चे**त्यादि। अन्त्यवर्ण्णप्रतिपत्तेरूर्ध्वं**मन्यम्**वर्ण्णव्यतिरिक्त**मशकलम**खण्ड निर्विभागमित्यर्थं। **शब्दात्मानं न चोपलक्षयामः**।

नापि स्वयमयम्वक्ता यथोक्त शब्दात्मान**म्विभावयति**। तथा हि तदापि वाक्यमवधारय[2]न् वर्ण्णानुक्रममेव बाह्यरूपतयावधारयति (।) न तु वर्ण्णव्यतिरिक्तन्निर्विभागम्वाक्यमवधारयति। केवलमय वक्ता यथा मयोक्त **समाप्तफलः शब्दोन्त्यायाम्बुद्धौ भातीत्येवं यदि स्यात्। साधु** मे स्यादिति या **कल्याणकामताभिप्रेतार्थाशसा। तया मूढमतिः स्वप्नायते।** अस्वपन्नपि स्वप्ने व्यवस्थितमिवात्मानमाचरति। अधिकरणाच्चे[1]ति वक्तव्यमिति स[3]प्तम्यन्तादपि। क्यज्। क्यज् विधानेप्येतद्वक्तव्य स्मर्यत इत्येके। अन्ये त्वाहु (।) स्वप्नवानेवाभेदोपचरात्। अथवा मत्वर्थीयस्यार्श आदिदर्शनेन विधानात्। स्वप्नशब्देनोक्त। तेन कर्त्तुरेवोपमानात् क्यज् प्रत्यय। सुप्त इवाचरति स्वप्नायत इति यावत्। अनेनोपहसति।

स्मरणज्ञानेन तर्हि पदवाक्यमक्रम गृह्यत इति चेदाह। **न हीत्यादि**। न हि[4] **स्मर्यमाणयोरपि पदवाक्ययोः** सम्बन्धिनो **वर्ण्णाः** पदवाक्ययोर्भेदव्यवस्थापका **क्रमविशेषमन्तरेणाक्रमायामेकस्या** बुद्धौ न हि **विभाव्यन्ते** किन्त्वनुभवक्रमवत् स्मरणमपि क्रमेणैवेति यावत्। यदि त्वक्रमायामन्त्याया बुद्धौ पदवाक्ययोर्वर्ण्णाः क्रमविशेषमन्तरेण विभाव्यन्ते। तदा तस्या**मक्रमायां बुद्धौ पौर्वापर्याभावाद्** वर्ण्णा युगपदेव वि[5]भाव्यन्त इति कृत्वा तेषा **पदवाक्यभेदानां** पदभेदाना वाक्यभेदाना **च तत्कृतो** वर्ण्णपौर्वापर्यप्रतिभासकृतो **भेदो** विशेषो **न स्यात्**। वर्ण्णानां क्रम-

---

[1] Restored.

सति वा तद् अनित्यं वा स्यात् नित्यं वा।

अनित्यं यत्नसम्भूतं पौरुषेयं कथन्न तत्।

अवश्यं हि अनित्यं कुतश्चिद्[2] हेतुमद् भवति। तद्वत्ताया आकस्मिकत्वे देशादिनियमे न स्यादित्युक्तम्।

तच्च प्रयत्नप्रेरितान्यविगुणकरणानां दृष्टं[3] अन्यथा वा न दृष्टम्। तथा कारणधर्मदर्शनात् पुरुषव्यापार एव कारणमतः पौरुषेयं स्यात्।

नित्योपलब्धिर्नित्यत्वेऽप्यनावरणसम्भवात् ॥२५४॥

अथ तच्छब्दरूपं नित्यं स्यादुपलभ्यस्वभावं च। स स्वभावस्तस्य कदाचिन्नापैतीति नित्यमुपलभ्येत। यदि न कुतश्चिदपि सामर्थ्यात् प्रच्यवेत्। एवं स हि नित्यः स्याद्। तस्य ज्ञानजननसामर्थ्यस्य जननात्[5]त्मकत्वात्। अर्थान्तरत्वस्य प्रागेव निषिद्धत्वात्।

विशेषप्रतिभासादेव पदवाक्यानाम्परस्परम्भेदस्तदभावे स न स्यादिति यावत्।

नाप्यक्रममित्यादि। न विद्यते वर्णक्रमो यस्मिन् शब्दरूपे तदक्रम शब्दरूपम्वर्णेभ्योन्यन्न पश्याम इत्युक्तं।[6] तस्यावर्णरूपसस्पर्शिन कस्यचिदप्यप्रतिपत्तेरित्युक्तत्वात्।

जातिस्फोटस्तु जात्यभावादेव निरस्त. (।) सति वा तस्मिन्नवर्णक्रमे शब्दरूपे। तच्छब्दरूपमनित्यम्वा स्यात् नित्यम्वा। वस्तुनो गत्यन्तराभावात्। यद्यनित्यन्तदा पुरुषप्रयत्नसम्भूतं पौरुषेयं कथं न तद्वाक्य। पौरुषेयमेव स्यात्। अवश्यं ह्यनित्यमुत्पत्तिमदिति कुतश्चित् स्वहेतोर्भव[7]ति। तथा ह्याकस्मिकत्वे 168a
हेतुरहितत्वे सत्व(?शब्द)स्याभ्युपगम्यमाने देशादिनियमः। आदिशब्दात् कालवस्तुनियमो न स्यादित्युक्तं।

तच्च वाक्य पुरुषप्रयत्नेन प्रेरितान्यविगुणानि करणानि येषां पुसान्तेषाम्भवद् दृष्टं पुनरन्यथा वक्तुकामताभावे करणवैगुण्ये वा नेति। न दृष्टमिति पुरुषव्यापारान्वयव्यतिरेकलक्षणस्य कारणधर्मस्य वाक्य प्रति दर्शनात पु[1]रुषव्यापार एव वाक्यस्य कारणमतः कारणात् पौरुषेयमपि वाक्य। (२५३)

. अथ नित्यन्तद् वाक्य तदास्य नित्यत्वेभ्युपगम्यमाने नित्योपलब्धिर्वाक्यस्य स्यात्। कि कारण (।) तस्य नित्यस्य सतो नावरणसम्भवात्। आवरणाभावात्।

अथेत्यादि व्याख्यान। अथ तच्छब्दरूपम्वाक्यात्मकन्नित्यं स्यादुपलभ्यस्वभावं च। उपलभ्य स्वभावोस्येति विग्रह। (।)[2] स उपलभ्य स्वभावस्तस्य वाक्यस्य कदाचिन्नापैति न हीयत इति कृत्वा नित्यमुपलभ्येत। यस्मादेवं

नापि तस्योपलभ्यात्मनः किञ्चिदुपलम्भावरणं सम्भवति। तस्य सतोऽपि तदात्मानमखंडयतः सामर्थ्यतिरस्कारायोगात्। न हि तत्र अतिशयोत्पादनासमर्थः किञ्चित्करो नाम। अकिंचित्करश्चावरणं अन्यद्वेति विचारितप्रायमेतत्।
501a **कुड्यादयो घटादीनां[7] क अतिशयं उत्पादयन्ति कं वा खण्डयन्ति येनावरणमिष्यते।**

न ब्रूमः ते किञ्चिद् अतिशाययन्तीति। अपि तु न सर्वे घटक्षणाः[1] सर्वस्य इन्द्रियज्ञानहेतवः। परस्परसहितास्तु विषयेन्द्रियालोकाः, एकेन विशिष्टक्षणान्तरोत्पादात् विज्ञानहेतवः। अनुपकार्यस्य[2] अनपेक्षायोगात्। शक्तस्वभावस्य नित्य जननं अजननं वाऽन्यस्य सर्वदा स्यादित्युक्तम्। ते च प्रतिघातिनाऽन्येना-

---

हि स नित्यः स्याद् न कुतश्चिदपि ज्ञानजननलक्षणादपि **सामर्थ्यात् प्रच्यवेत्।** किं कारणम्(।)**तस्य ज्ञानजननसामर्थ्यस्य** तदात्मकत्वान्नित्यशब्दस्वभावात्। नापि शब्दाज्ज्ञानजननसामर्थ्यमर्थान्तर यस्मादर्थान्तरत्वस्य **प्रागेव निषिद्धत्वात्।**[3] "भावानुपकारकत्वप्रसङ्गा"दित्यत्रान्तरे।

स्तिमितेन वायुनावरणान्नित्य नोपलभ्यन्त इति चेदाह। **नापी**त्यादि। **तस्य** बाह्यस्योपलभ्यात्मनो दृश्यस्य **किञ्चिदुपलम्भावरणं सम्भवति।** तत्सिद्धौ प्रमाणाभावात्। **सतोपि** वा विद्यमानस्यापि चावरणस्य **तदात्मानमखण्डतयो** नित्यशब्दात्मानमप्रच्यावयत। **सामर्थ्यतिरस्कारा[4]योगात्।** ज्ञानजननशक्त्यभिभवायोगात्। यस्मान्न हि **तत्र** शब्दात्मन्यतिशयमनुत्पादयन्नावरणाभिमत **किञ्चित्करो** नाम। **अकिंचित्करश्चार्थ** क कस्यावरणं ज्ञानविबन्धकमन्यद्वेति प्रकारान्तरेणोपघातक नैवेति यावत्। निलोंठितप्रायमेतत्। **विचारितप्रायमेतत्** प्राक्। अकिञ्चित्करस्यावरणत्वन्दृष्टमिति कथयन्नाह पर। **कु[5]ड्यादय** इत्यादि। **कुड्यादयो घटादीना कमतिशयमुत्पादयन्ति। कम्वा** सामर्थ्यातिशय **खण्डयन्ति येनावरणमिष्यन्ते।** तस्माद् यथा तेऽतिशयमनुत्पादयन्तो घटादीनामावरणमिष्यन्ते। तथा नित्यस्यापि शब्दस्य किंचिदावरणम्भविष्यतीत्यभिप्राय।

न ब्रूम इत्यादिना परिहरति। **ते** कुड्यादय **कञ्चिद्** घटादिकमतिशाययन्ति वि[6]शिष्ट स्वभाव कुर्वन्तीति न ब्रूम। कथन्तर्ह्यावरणमुच्यन्त इत्याह। **अपि तु न सर्व** इत्यादि। न सर्वघटक्षणास्**सर्वस्य** पुरुषस्येन्द्रि**यज्ञानहेतवः** (।) किन्तर्हि (।) **परस्परसहितास्तु विषयेन्द्रियालोकाः**। परस्परतो **विशिष्टक्षणान्तरोत्पादात्** कारणाद् **विज्ञानहेतवः**। कि कारणम् (।) **अनुपकार्यस्य**
168b परैरनाधेयातिशयस्य परम्प्रत्**यनपेक्षा[7]योगात्**। परैश्चानाधेयातिशय शक्तस्वभावो

ऽव्यवहिताऽन्योन्यस्योपकारिणः[3]। अव्यवधानदेशयोग्यतासहकारित्वात् तेषां अन्योन्यातिशयोत्पत्तेः। व्यवधाने सति हेतोरभावात् समर्थक्षणानन्तरानुत्पत्तेः वि[4]ज्ञानानुत्पत्तिः। तस्मात् पूर्वोत्पन्नस्य समर्थस्य निरोधात्। सति च कुड्येऽन्यस्योत्पित्सोः कारणाभावेनानुत्पत्तेः कार्यकारणज्ञानानुत्पत्तिरिति कुड्यादय आवरण[5] ज्ञेयाः। न पुनः प्राक् प्रतिबन्धात्।

अथवा भावानां क्षणिकानामन्योन्योपकारोऽचिन्त्यत्वाद् हेतुप्रत्यय[6]सामर्थ्यस्यासर्वविदा।

तेन यदिन्द्रियविषययोर्मध्ये स्थितमावरणं विज्ञानोत्पत्तिवैगुण्यतारतम्येन तद् अतिशाययेदपि[7]। 501b

---

वा स्यादशक्तस्वभावो वा। तत्र शक्तस्वभावस्य नित्यं कार्यजननं स्यादजननमन्यस्येत्यशक्तस्वभावस्य स्यादित्युक्तं प्राक्। ते च विषयेन्द्रियादय। तेन प्रतिघातिना कुड्यादिनाऽव्यवहिता यदा भवन्ति तदान्योन्यस्योपकारिणः (।) कि कारणम् (।) अव्यवधानेत्यादि। न विद्यते व्यवधान यस्य देशस्य[1] सोव्यवधानदेशस्तस्य योग्यता सामर्थ्यन्तत्सहकारित्वात् तेषा विषयादीनामन्योन्यातिशयोत्पत्तेः। तेषा पुनरालोकादीना कुड्यादिकृते व्यवधाने सति। अव्यवधानदेशयोग्यतालक्षणस्य हेतोरभावात् समर्थक्षणान्तरानुत्पत्तेः कारणाद् घटादिज्ञानानुत्पत्तिः। यत एव क्षणिकेषु न सर्वकालमेकस्वरूपानुवृत्तिस्तस्मात् प[2]र्वोत्पन्नस्य समर्थस्येन्द्रियादिक्षणस्य स्वरसत एव निरोधात्। सति च व्यवधायके कुड्येन्यस्योत्पित्सोः समर्थस्य क्षणस्य यथोक्तकारणाभावेनानुत्पत्तेर्ज्ञानकारणवैकल्यमत कारणवैकल्यात्। घटादिषु कुड्यादिव्यवहितेषु ज्ञानानुत्पत्तिरिति कृत्वा कुड्यादय आवरणमुच्यते। न पुनः प्राग् विज्ञानजननयोग्यस्य घटा[3]दे· प्रतिबन्धात्। किङ्कारणम्(।) तस्य घटादेर्योग्यस्वभावे स्थितस्य कुड्यादिसन्निधानेपि स्वभावादप्रच्युते। यस्समर्थ स समर्थ एव। न तस्यान्यथात्व कर्त्तु शक्यते। तदेव क्षणिकेषु पदार्थेषु यथोक्तविधिनातिशयमकुर्वदप्यावरणमुच्यते।

अधुनातिशयकरणेनैवावरणमित्याह। अथवेत्यादि। सम्भवत्यपि भावानां[4] घटादीना क्षणिकानामन्योन्योपकारः कुड्यादिकृतोप्युकार सहकारिकृते उपकारे विवादाभावात्। न त्वावरणमिन्द्रियविषयाभ्या दूरवर्ति। तत् कथमिन्द्रियविषयावुपकरोतीत्याह। अचिन्त्यत्वादित्यादि। नैव चिन्तयितु शक्य दूरदेशवर्त्यावरण कथ विषयस्योपकारक। दूरवर्त्तिनाप्ययस्कान्तेनायस समाकर्षणात्।[5] हेतुरुपादानकारण। प्रत्ययः सहकारिकारणन्तयो सामर्थ्यस्याचिन्त्यत्वादसर्वविदाऽसर्वज्ञेन।

आवरणभेदेन शब्दादौ श्रुतिमान्द्यपाटवदर्शनात्। अन्यथाऽकिञ्चित्करस्य सन्निधानस्याप्यसन्निधानतुल्यत्वात्। तस्येदमित्यु[1]पसंहारो विकल्पनिर्मित एव स्यान्न वस्त्वाश्रयः।

न च समारोपानुविधायिन्योऽर्थक्रियाः, न हि माणवको दहनोपचारात् पाक आधीयते[2]। तस्मात् सत्यामपि कल्पनायामतत्परावृत्तयो भावा यथास्वभावस्थिता एव स्युः।

यत्र एवन्तेन कारणेन **यदिन्द्रियविषययोर्मध्ये स्थितमावरणं। तत्ताविन्द्रियविषयावतिशाययेदपि।** केन प्रकारेण (।) **विज्ञानोत्पत्तिवैगुण्यतारतम्येन।** अपिशब्द सम्भावनाया सम्भाव्यतेयमर्थो न ह्यत्र किञ्चिद् बाधकमस्तीति।[6]

ननु सन्निहितेनावरणेन द्वितीयादिक्षणे तद् द्रव्य ज्ञानजननासमर्थञ्जन्यते (।) न तु सम्पर्क्कक्षण एवानुपकारात्। ततश्च प्रथमे क्षणे तद् द्रव्यमावरणसन्निधानेपि दृश्य स्यात्। ज्ञानजननसामर्थ्यस्याप्रतिबन्धात्।

नैष दोष.(।)यो ह्यावरणक्षणस्य जनको दृष्ट. स आव्रियमाणस्यापि क्षण-
169a स्यासमर्थस्यैव जनको दृष्टो यथा द्विती[7]यादिषु क्षणेषु (।) तेनादावप्यावरणक्षणजनक आव्रियमाणक्षणमसमर्थ जनयेद् (।) अत एवोच्यते (।) अचिन्त्यत्वाद्धेतुप्रत्ययसामर्थ्यस्येति। तेन कुत प्रथमक्षणे द्रव्यस्यावरणसन्निधाने दर्शन स्यात्। तारतम्यग्रहणे चायमर्थ उपदर्शित (।)वैगुण्यमादावर्थस्यावरणकारणेत्रापि कृत। द्वितीयादिक्षणेषु तदावरणमतिशयमाध[1]त्त इति।

स्यादेतद् (।) आवरणस्य वैगुण्याधाने सामर्थ्यमन्वयव्यतिरेकाभ्यामनुगन्तव्य (।) न चान्वयव्यतिरेकौ विद्येते इत्याह। **आवरण**भेदेनेत्यादि। कर्प्पटपटकुड्यादि व्यवधानभेदेन **शब्दादौ** शब्दगन्धस्पर्शेषु। श्रुतिग्रहणमुपलक्षणार्थं। तेन श्रवणदर्शनादीना **मान्द्य**तत्पाटवयोर्दर्शनादावावरणसामर्थ्यमनुगम्यते[2]। **अन्यथा** यद्यावरणेन विशेषो नाधीयते। तदा तस्यावरणस्याकिंचित्करस्य **यत्सन्निधानन्तस्य सन्निधानस्याप्यसन्निधानतुल्यत्वात्। तस्य** शब्दस्येदमावरणमित्युपसंहारः **सम्बन्धो विकल्पनिर्मित एव स्यान्न वस्त्वाश्रयः।**

विकल्पारोपितार्थक्रियाश्रयो भविष्यतीति चेदाह। **न चेत्यादि। न च समारोपानुविधायिन्यो** न विक[3]ल्पसमारोपितार्थाश्रया **अर्थक्रिया**स्तासाम्वस्त्वाश्रयत्वात्। **यस्मान्न हि माणवको दहनोपचारादग्निर्माणवक इत्युपचारात् पाके** साध्ये **आधीयते** नियुज्यते। यत एवन्त**स्मात् सत्यामपि कल्पनायामतत्परावृत्तयो भावाः**। तया कल्पनया परावृत्तिर्येषान्ते तथा। तदभावादतत्परा वृत्तयः किन्तु **यथास्वभाववृत्तय एव [4] स्युः**। यथास्वभाव वृत्तिर्येषामिति विग्रहः।

तत् सत्यप्यावरणे ज्ञापयेयुरिन्द्रियादयः। न[3] चैवम। तस्मात् तेनाधेयविशेषास्तथा ज्ञायेरन्।

स्यादेतत्। एवं नित्यानां शब्दानां क्वचित् सत्त्वेऽपि न खल्वेवं नित्यानां शब्दानां कस्मिंश्चिद् सति अतिशयहानिः।

तद्, यदि तेषा ज्ञानजननः स्वभावः। सर्वस्य[4] सर्वदा स्वविषयाणि ज्ञानानि सकृद् जनयेयुः, न वा कदाचित् किञ्चिदपि जनयेयुरित्येकान्त एषः।

अश्रुतिर्विकलत्वाच्च कस्यचित् सहकारिणः[5]।

स्यादेतत्। नावरणेन नित्यानां शब्दानमश्रुतिः। अपि तु किञ्चिद् एषां प्रतिपत्तौ सहकारिप्रतिनियतम्। तत कदाचिद कस्यचिद् भवतीति तत्कृतं तेषां[6] कदाचित् क्वचित् श्रवणमिति चेत्।

काममन्य(प्रतीक्षाऽस्तु) नियमस्तु विरुद्ध्यते ॥२५५॥

न वै वयं कारणानां सहकारीणि प्रतिक्षिपामः। किन्तु अपेक्षन्त एव कार-

---

तदिति तस्मात्। यद्यावरणेन न विशेष आधीयते तदा सत्यप्यावरणे ज्ञापयेयुर्ज्ञान जनयेयुरेवेन्द्रियादयः। न चैवं (।) तस्मात् तेनावरणेनाधेयविशेषा जन्मविशेषा इन्द्रियादय इति गम्यन्ते।

न खल्वेवन्नित्यानां शब्दानां कस्मिंश्चिदावरणविशेषे सत्यतिशयहानिरुत्प[5]त्तिर्वातिशयस्य।

तदिति तस्मात्। यदि तेषां नित्याना शब्दाना ज्ञानजननः स्वभावः। सर्वस्य पुरुषस्य सर्वदा सर्वाणि स्वविषयाणि ज्ञानानि सकृज्जनयेयुः। नो चेद् विज्ञानजननस्वभावस्तदा न कदाचित् कस्य(चि)त्पुरुषस्य किञ्चिद् विज्ञान जनयेयुरित्येकान्त एषः। कस्यचित् सहकारिणो विकलत्वान्नित्यस्यापि शब्दस्य[6] सर्वकालमश्रुतिरिति चेत्।

स्यादेतदित्यादिना व्याचष्टे। अपि तु किंचिदेषां नित्याना शब्दाना प्रतिपत्तौ प्रतिपत्तिनिमित्त सहकारि प्रतिनियत। कस्यचित् किञ्चिदेव वस्तु स्थित्या नियतमस्ति। तत्सहकारि। कदाचित्काले कस्यचिच्छब्दस्य भवतीति यत्कृतं सहकारिकृतमेषां शब्दाना कदाचित् क्वचित् प्रदेशे श्रवणमिति। (२५४)

काम[7]मित्यादि सि द्धा न्त वा दी। काममेवमित्यर्थं। अन्यस्य सहकारिण. 169b
प्रतीक्षा प्रतीक्षणमस्तु न निवार्यते। केवल नियमस्तु विरुध्यते। पूर्वस्वभाव एव शब्दः। स्थित इत्ययं नियमो न स्यादुपकारकस्यापेक्षणीयत्वात्।

न वै वमयमित्यादिनैतदेव व्याचष्टे। न वै कारणानां सहकारीणि प्रतिक्षि-

5022 णानि तदवस्थोपकारिणं[7] सहकारिणम्। ततो लभ्यस्य कार्य उपयोगात्। संकुला प्रतिपत्तिः स्यात्। वक्ष्यते चात्र प्रतिषेधः।

तथा शब्दोऽपि यदि किञ्चिद् अपेक्ष्य कार्यं कुर्यात्, पूर्वस्वभावनियत इत्येतन्न स्यात्। तस्य अपेक्षाच्च सहकारिणः स्वभावान्तरस्य प्रतिलम्भात्। अतिशय-प्रतिलम्भाभावेऽपेक्षायोगाद् इत्युक्तं प्राक्।

अथार्थान्तरभूतमुपकारं लभते, तस्येति सम्बन्धाद्यभावोऽप्युक्तः। तस्य चाज्ञेयत्वं उपकाराज् ज्ञानोत्पत्तेः।

तस्माद् एष शब्दो नेन्द्रियं न सन्निकर्षं नात्मानं अन्यविज्ञानोत्पत्तिसमाश्रयं किंचित् स्वज्ञानजननेऽपेक्षते।

अपि च।

सर्वत्रानुपलम्भः स्यात् तेषामव्यापिता यदि।

तेषां शब्दानां व्यापिताऽव्यापिता वा स्यात्। यद्यव्यापिता तेषां तदा सर्वत्रानुपलम्भः स्यात्। कथं एकदेशवर्त्तिनं तच्छून्यदेशस्थित उपलभेत।

पामः। किन्त्वपेक्षन्त एव कारणानि सहकारिणं किं भूत तद[1]वस्थोपकारिणं। यथाभिमतकार्यजननस्वभावावस्थोपकारिण (।) किं कारण (।) ततः सहकारिण. सकाशाल्लभ्यस्यातिशयस्य कार्ये जन्ये उपयोगाद् व्यापारात्। तथा शब्दोपि वैदिको यदि किञ्चित् सहकारिणमपेक्ष्य कार्यमात्मविषय ज्ञान कुर्यात्। करोतु क प्रतिषेद्धा (।) केवल पूर्वस्वभावनियत इति पूर्वस्मिन्नेव स्वभावे स्थित इत्येतन्न स्यात्। कि कारण (।) तस्य पूर्व[2]स्वभावस्य प्रच्युते.। अपेक्षाच्च सहकारिणस्सकाशात् स्वभावान्तरस्यापूर्वकस्य प्रतिलम्भात्। अतिशयप्रतिलम्भाभावेऽपेक्षायोगात्। यस्मान्न ह्यनुपर्यपेक्षत इति। उक्त-मेतत्प्राक्।

अथ सहकारिण सकाशाच्छब्दोर्थान्तरभूतमुपकारं लभते। तदोपकारस्य चार्थान्तरत्वे। तस्यायमुपकार इति सम्बन्धा[द्य]भावोप्युक्तः। आदिशब्दाद् यदि सम्बन्ध[3]सिद्धचर्थ सहकारिकृत उपकारे शब्दकृत उपकार कल्प्यते तदा तत्राप्य-परस्तत्राप्यपर इत्यनवस्थादोषादयोप्युक्ता। तस्य च शब्दस्याज्ञेयत्वं प्रसक्त। कि कारण (।) सहकारिकृतादेवोपकारादर्थान्तरभूताज्ज्ञानोत्पत्तेः।

यत एवन्तस्मात्। एष शब्दो नेन्द्रियं श्रोत्राख्य (।) नेन्द्रियार्थयोस्सन्निकर्षं। नात्मानं। एतच्च परप्रसिद्धयोक्त। अन्यच्चेति प्रयत्नादि[4]क। किम्भूतम् (।)

अप्राप्तग्रहणपक्षेऽयमदोष इति चेत् न। तत्रापि योग्यदेशस्थितिविशेषापेक्षणाद् अयस्कान्तादिवत्। अन्यथा स्पष्टास्पष्टश्रुतिभेदो न स्यात्। सति चोपलम्भप्रत्यये सर्वदेशे तुल्यमुपलभ्येरन्। तस्मात् नाव्यापिनः।

यिज्ञानोत्पत्तिसमाश्रयम्विज्ञानोत्पत्तिसहकारिण स्वज्ञानजननेऽपेक्षते। कि कारण (।) सर्वस्य तत्र नित्ये शब्देनुपयोगात्।

अपि चेत्यादि (।) **यद्यव्यापिता** तदा **सर्वत्र** देशे **तेषां शब्दानामनुपलम्भः स्यात्। तथा** हि **कथमेकदेशवर्त्तिनं** शब्द **तच्छून्यदेशस्थितः** पुरुष **उपलभेत। अप्राप्तग्रहणपक्षेऽयमदोष इति चेत्**। अप्राप्त एव श्रोत्रदे[5]श शब्द श्रोत्रेन्द्रियेण गृह्यते तत शब्दशून्यदेशावस्थितोपि शब्द गृह्णीयादतस्सर्वत्रानुपलम्भदोषो न भवतीति।

नैतदेवं। कि कारण (।) **तत्राप्यप्राप्तग्रहणपक्षेपि** न व्यवहितस्य ग्रहण सम्भवति। कि कारण (।) तस्य शब्दस्य **योग्यदेशे** यावत् **स्थितिस्तस्यास्तारतम्यस्यापेक्षणा**दिन्द्रियस्य। किमिव (।) **अयस्कान्तादिवत्**। यथायस्कान्तस्याप्राप्ताकर्षकत्वेपि नायो[6]ग्यदेशावस्थितलोहाकर्षणन्तद्वत्। आदिशब्दाद् आशीविषादिर्दीपाद्युपघात कुर्वन् गृह्यते। **अन्यथे**ति यदि शब्दस्य योग्यदेशावस्थानन्तद्ग्राहकमिन्द्रिय नोपेक्षत। तदा योग्यदेशावस्थानतारतम्यभेदेन **स्पष्टास्पष्टप्रतीतिभेदो न स्यात्**। भवति च (।) तस्मात् योग्यदेशापेक्षत्व। योग्यदेशावस्थितस्याप्राप्तस्य शब्दस्य ग्रहणेपि स्पष्टास्पष्टप्रति[7]भासभेदो न 1702a
स्यादित्याह। **सति चोपलम्भप्रत्यये** तालवादिव्यापारलक्षणे **सर्वदेशे** समीपे दूरे च शब्दास्तुल्यमुपलभ्येरन्। न चैव (।) **तस्मात् नाव्यापिन**। न तु बौ द्धै रिन्द्रियदेशमप्राप्तस्यैव शब्दस्येन्द्रियेण ग्रहणमिष्यते कथन्तस्य स्पष्टास्पष्टश्रुतिभेद। तदुक्त।

"येषामप्राप्त एवाय शब्द श्रोत्रेण गृह्यते।[1]
तेषामप्राप्तितुल्यत्व दूरव्यवहितादिषु॥
तत्र दूरसमीपस्थग्रहणाग्रहणे समे (।)
स्यातान्न च क्रमो नापि तीव्रमन्दादिसम्भव "इति।[1]

एवम्मन्यते। यस्य स्पष्टास्पष्टप्रतिभासानि सर्वाण्येव विज्ञानान्यभ्रान्तानि तस्यायन्दोषो न बौ द्ध स्यास्पष्टप्रतिभासस्य ज्ञानस्य भ्रान्तत्वाभ्युपगमात्। अपरापरदेशोत्पत्त्या चागच्छत· शब्दस्य ग्रहणात् क्रमो गृह्यते कर्ण्णदे[2]शे च तीव्रस्य

---

[1] Kumārila.

सर्वेषामुपलम्भः स्याद् युगपद् व्यापिता यदि ॥२५६॥

सर्वत्र व्यापिता यदि युगपदुपलम्भः स्यात्, [न हि] शब्दः क्वचित्[7] नास्ति
502b **इति सर्वे सर्वदेशावस्थितैश्च युगपदुपलभ्येरन्, योग्येन्द्रियत्वात्, विषयसन्निहितत्वादनुपलम्भकत्वाच्च।**

संस्कृतस्योपलम्भे च कः संस्कर्त्ता विकारिणः।

शब्दस्य मन्दस्य चोत्पत्तेस्तीव्रमन्दादिसम्भव इति न काचित् क्षति ।

स्यादेतद् (।) यथा दूरे रूप रजोनीहारादिससृष्ट गृह्यते समीपे तु तदभावात् स्पष्ट । तथा शब्दोपि (।)

दूरासन्नादिभेदेन स्पष्टास्पष्टः प्रतीयत इति।

तदयुक्त । यतो रूप(स्य) रजोनीहारादेस्ससृष्टताग्रहण यदि तावत्तयो पृथक् पृथग् ग्रहणन्तदा दूरासन्नवर्त्तिनो[3] पुरुषयोस्तुल्यो रूपप्रतिभास स्याद् यथावस्थितेन स्वरूपेण ग्रहणात्। अथैकत्वेन तयोर्ग्रहण ससृष्टताग्रहण कथमस्पष्टप्रतिभास ज्ञान भ्रान्तन्न स्यात्। भिन्नानामेकत्वे ग्रहणात् कथ चैक रूपस्यानेकाकार प्रतिभासः। तदुक्त।

"जातो नामाश्रयोन्यान्यश्चेतसा तस्य वस्तुन (.।)
एकस्यैव कुतो रूपम्भिन्नाकारावभासि तदि"ति।[1]
ननु देशकालाव्यापि[4]न शब्दा.।
"यस्माच्छब्दस्य नित्यत्व श्रोत्रजप्रत्यभिज्ञया।
विभुत्व च स्थितन्तस्य कोध्यवस्येद् विपर्यय॥
देशभेदेन भिन्नत्वमित्येतच्चानुमानिक
प्रत्यक्षस्तु स एवेति प्रत्ययस्तस्य बाधक ।
पर्यायेण यथा लोके भिन्नान्देशान् व्रजन्नपि।
देवदत्तो न भिद्येत तथा शब्दो न भिद्यते।
तस्माद्या सर्वकालेषु सर्वदेशेषु चैकता।
प्रत्यक्षप्रत्यभिज्ञानप्रसिद्धा सास्य बाधि[5]का।"[2]

तस्माद् व्यापिनः शब्दा इति।

अत्राप्याह। सर्वेषा पुंसा **युगपत्सर्वशब्दोपलम्भः स्यात्**, तेषा शब्दाना **व्यापिता यदि। न हि कश्चिच्छब्दः क्वचिद्देशे नास्ति किन्तु सर्व. शब्द· सर्वत्रास्ति**

---

[1] Kumārila. [2] Ibid.

स्यादेतत्। सन्नपि न सर्वः शब्द उपलभ्यते, संस्कृतस्य संस्कृतेनैवोपलम्भादिति तत्र न संस्कृतस्योपलम्भः अनाधेयविकारस्य संस्कारायोगात्।

इन्द्रियस्य तु संस्कारः शृणुयात् निखिलं च तत् ॥२५७॥

तत्र यदि संस्कृतेनैवोपलम्भ इति असंस्कृतेन्द्रियो नोपलभते। यस्येन्द्रियसंस्कारः स सर्वान् शब्दान् युगपद् शृणुयादिति प्रसंगोऽनिवृत्त एव।

संस्कारभेदभिन्नत्वादेकार्थनियमो यदि।
अनेकशब्दसंघाते श्रुतिः कलकले कथम् ॥२५८॥

अथापि शब्दानां संस्काराः प्रतिनियताः, तत्र संस्कारप्रतिनियमे केनचित्

व्यापित्वात्। **इति** हेतो। **सर्व**शब्दा **युगपदुपलभ्येरन् सर्वदेशावस्थितैश्च पुरुषैरुपलभ्येरन्**। कि कारण (।) **योग्येन्द्रियत्वात्** पुसा। **विषयस्य** शब्दलक्षणस्य **नित्यस्य**[6] सतो व्यापित्वेन सदा सर्वत्र **सन्निहितत्वात्**। नित्यत्वादेव चानाधेयातिशयस्य प्रबन्धाच्च।

संस्कृतस्येत्यादि। कर्मणि कर्त्तरि वा षष्ठी। तेनायमर्थ (।) प्रयत्नाभिहतवायुना सस्कृतस्य शब्दस्य सस्कृतेनैवेन्द्रियेणोपलम्भे **चाभ्युपगम्यमाने**। **न** यथोक्तदोष इति।

उत्तरमाह। **कः संस्कर्त्ता विकारिणः** शब्दस्य। नैव कश्चित्।

स्यादेतदित्यादिना व्याचष्टे। स[7]र्वकाल **सन्नपि न सर्वः शब्द उपलभ्यते** 170b
सर्वेण पुरुषेण। कि कारण (।) **संस्कृतस्य** शब्दस्य प्रयत्नाभिहतेन वायुना **संस्कृतेनैवेन्द्रियेणोपलम्भादिति। तत्र** तयोर्मध्ये **न** तावत् **संस्कृतस्य** शब्दस्योपलम्भः। कि कारणम् (।) **अनाधेयविकारस्य** शब्दस्य **संस्कारयोगात्। इन्द्रियस्य** त्वनित्यत्वादाधेयविशेषस्य प्रयत्नाभिहतेन वायुना **स्यात् संस्कारः**। यदाह (।)

प्रयत्नाभि[1]हतो वायु· कोष्ठ्यो यातीत्यसशय (श्लो० शब्द० १२२)
कर्णव्योमनि सप्राप्त शक्ति श्रोत्रे नियच्छति (,, १२४)

शब्दरूपप्रतिपत्त्यन्यथानुपत्त्या चेन्द्रियस्य शक्ति· कल्प्यते। शक्तिरूपश्च संस्कार इष्यत इति।

तत्राह। **तदपि** सस्कृतमिन्द्रिय **शृणुयान्निखिलं** निरवशेष शब्द।

तत्रेत्यादिना व्याचष्टे। **यदि संस्कृतेनैवेन्द्रियेण** शब्दस्योपलम्भ **इति** कृत्वा **ऽसंस्कृतेन्द्रियः** पुरुषो **नोपलभते**। तदा **यस्येन्द्रियसंस्कार**[2] कृत· **स सर्वशब्दान् युगपच्छृणुयादिति** पूर्व **प्रसङ्गोऽनिवृत्त एव।**

अथ स्याद् (।) यथा शब्दप्रतिपत्त्यन्यथानुपपत्त्यैन्द्रियस्य सस्कारकल्पना

संस्कृतमिन्द्रियं कस्यचिदेव ग्राहकमिति न युगपत् सर्वश्रुतिरिति। संस्कार-विशेषात् श्रुतिनियम इन्द्रियाणां अभ्युपगम्यमाने अनेकशब्दसंघातस्य कलकल-शब्दस्य श्रुतिर्न स्यात्। न ह्येकः शब्दः कलकलो नाम, भिन्नस्वभावानां युगप-च्छ्रवणात्, स्वभावभेदाश्रयत्वाच्च भेदव्यवस्थितेः।

लघुवृत्तेः सकृच्छ्रुतिर्भ्रान्तिरिति चेत्, वंशादिस्वरधारागमकावयवानामपि
503a **संहारात्[7]।**

(।) तथा शब्दविशेषप्रतिपत्त्यन्यथानुपपत्त्या सस्कारविशेषकल्पना। यदाह।

तथैव तद्विशेषोपि विशिष्टश्रवणाद् भवेदिति।

तस्मात् सस्कारभेदात् प्रतिविषयम्भिन्नत्वादिन्द्रियस्यैकार्थनियम। एकस्यैव शब्दस्य ग्र[3]हण यदि। (२५८)

एव सत्यनेकशब्दसघाते। विचित्रशब्दमूहात्मके कलकलशब्दे श्रुति कथ नैव स्यात्। दृष्टा च।

अथापीत्यादिना व्याचष्टे। इन्द्रियस्य ये संस्कारास्ते शब्दानां प्रतिनियता-स्तत्रैतस्मिन् संस्कारप्रतिनियमे केनचित् संस्कृतमिन्द्रियं कस्यचिदेव शब्दस्य **ग्राहकमिति न युगपत् सर्वशब्दश्रुतिरिति। एव संस्कारविशेषाच्छ्रुतिनियम इन्द्रियाणाम[4]भ्युपगम्यमाने अनेकशब्दसङ्घातस्य कलकलशब्दस्य श्रुतिर्न स्यात्।** यस्मान्न **ह्येकः शब्दः कलकलो नाम।** कि कारणम् (।) **भिन्नस्वभावानां** वेणुमृदङ्गकाव्यपाठगीतशब्दाना कलकले **युगपच्छ्रवणात्।** नापि भिन्नस्वभाव-ग्रहणेप्यभेदो यत **स्वभावभेदाश्रयत्वाच्च भेदव्यवस्थितेः।**

ननु यदानेक शब्द श्रूयते। तदानेकशब्दश्रवणान्यथानु[5]पपत्त्यापीन्द्रियस्या-नेक सस्कार कल्प्यते ततोनेकशब्दश्रवणमविरुद्धमेव।

एवम्मन्यते। ये प्रयत्नाभिहतैर्वायुभि सस्कारा आधीयन्ते। ते यदीन्द्रि-यादभिन्नास्तदा सस्कारवहुत्व कुत। इन्द्रियस्यैकत्वाद्(।)अथ भिन्ना कथ तर्हीन्द्रिय सस्कृत। तस्य च सस्कारा इति **सम्बन्धश्च न सिध्यति** ये च निष्पन्ने भवन्ति ते कथन्तत्स्वभावा विरुद्धधर्माध्यासात्। ते[6]न भिन्नाभिन्ना अपि सस्कारा न युज्यन्त इति यत्किञ्चिदेतत्। न कलकले युगपदनेकशब्दग्रहण किन्तु क्रमेणैव तत्रैकैक शब्द श्रूयते। तानि च श्रवणज्ञानानि लघुवृत्तीनि। ततो **लघुवृत्तेः** कारणात् तेषु क्रमेण गृह्यमाणेष्वपि **सकृच्छ्रुतिर्भ्रान्तिरिति चेत्।** तदा
1712a **वंशादिस्वरधाराया ये गमका** स्वरविशेषास्तेषा येऽवयवास्तेषामपि लघुवृत्तित्वे[7]न **संहारादेकीकरणात् संकुला प्रतिपत्तिः स्यात्।** न त्वससृष्टगमकावयवानुक्रमवती

तस्माद् गतौ शक्तिप्रतिनियमादिन्द्रियस्यानेकात्मा कलकलो न श्रूयते[1]।

ध्वनयः केवलं तत्र श्रूयन्ते चेन्न वाचकाः।

न कलकले वर्णपदवाक्यानि श्रूयन्ते। ध्वनीनां केवलानां श्रवणात्। वाचके च प्रतिनियतशक्तीन्द्रियं न तु ध्वनिषु।

तत्र।

ध्वनिभ्यो भिन्नमस्तीति श्रद्धेयमविवक्षितम् ॥२५९॥

न वयं ध्वनिं शब्दं च वाचकं पृथग्रूपमुपलक्षयामः। एकदा वर्णानुक्रमश्रवण एकमेव शब्दा[3]त्मानं व्यवस्यामः। तत् कथं व्यवहारं व्यवसाय पूर्वकं परिच्छिन्दन्तः प्रवर्तयामः। तस्माद् ध्वनिविशेष एव वर्णाख्य इति।

अपि च।

स्थितेष्वन्ये[4]षु शब्देषु श्रूयते वाचकः कथम्।

न ध्वनिरतो भिन्नो रूपं सह पृथग् वा। न हि प्रत्यक्षेऽर्थे परोपदेशो गरीयान्।

स्यात्। वक्ष्यते चात्र प्रतिषेधस्तृतीये परिच्छेदे। "ह्रस्वद्वयोच्चारणे स्यादि" त्यादिना (३।४९३)।

यत एवन्तस्मादेकशब्दगतौ शक्तिप्रतिनियमादिन्द्रियस्यानेकात्मा। अनेकशब्दस्वभाव कलकलो न श्रूयते। श्रूयते च (।) तस्मान्नेन्द्रियसस्कारोऽपि तु तालवादिना शब्दकरण। तेन याव[1]न्त शब्दाः कृतास्तावन्त एव श्रूयन्त इति कलकलग्रहण। ध्वनयः केवलन्तत्र श्रूयन्ते न वाचकाः शब्दा यदि।

नेत्यादिना व्याचष्टे। न कलकले वाचकानि वर्णपदवाक्यानि श्रूयन्ते। किङ्कारणं (।) ध्वनीनां केवलानामवाचकानान्तत्र श्रवणात्। (२५८)

एकगतिशक्तिप्रतिनियमे ध्वनीनामपि कथ युगपच्छ्रवणमिति चेदाह। वाचकेत्यादि। वाचके च शब्दे प्र[2]तिनियतशक्तीन्द्रियमस्माभिरुच्यते। न तु ध्वनिष्ववाचकेषु।

तत्रेत्यादिना प्रतिविधत्ते। ध्वनय एव हि विशिष्टा वर्णरूपा वाचकाः। तेभ्यो भिन्नमर्थान्तरवाचक शब्दरूपमस्तीत्येतत्सत्ताग्राहकप्रमाणाभावाद् अतिबह्वि यं श्रद्धेयं। कि कारण।

यतो न वयमवाचक ध्वनिं शब्दं च वाचकं पृथग्रूपमिति ध्वनिभ्यो भिन्नस्वभावमुपलक्षयामः। किन्त्वेकदैक[3]स्मिन् वर्णानुक्रमश्रवणकाले एकमेव शब्दात्मानम्वर्णानुक्रमलक्षण व्यवस्यामः। तत्कथं पुनर्ध्वनिव्यतिरिक्तं शब्दात्मानमध्यवस्यन्तो परिच्छिन्दन्त। व्यवसायपूर्वकं निश्चयपूर्वक ध्वनिभ्यो

तद् अयं स्थितेष्वन्येषु व्याहर्तृषु[5] केवलमेव शब्दं शृण्वन् तदुपलम्भप्रत्ययानां सामर्थ्याभावं प्रत्येति तदन्यनिष्पादने। यदि समर्थाः स्युस्तदा तत्साधितं तैरुपलभ्येत।

तत्स्वभावा[6] एव प्रत्ययाः कलकले अर्थान्तरे[1] कथमारभेरन्? न हि कारणाभेदे कार्यभेदो युक्तः। तस्याहेतुकत्वप्रसंगादित्युक्तं प्राक्।

503b न कलकले वाचको[7] न श्रूयते पदवाक्यविच्छेदानामुपलक्षणात्।

भिन्नं शब्दरूपमनिबन्धन कथम्प्रवर्त्तयामः। तस्माद् ध्वनिविशेष एवाकारादिरूपेण स्थितः वर्ण्याख्यः वर्ण्यादिरित्याख्या यस्येति विग्रहः। आदि[4]ग्रहणात् पदवाक्यादिपरिग्रहः।

अपि च (।) यदि कलकले ध्वनयः श्रूयन्ते न वाचका। यदा तर्हि तत्र बहूना व्याहर्त्तृणान्तूष्णीमवस्थानात्। स्थितेष्वन्येषु शब्देष्वेकः पुरुषो व्याहरति तस्यैकस्य श्रवणे वाचकः कथं।

अथ स्यात् (।) तदा ध्वनिरपि प्रतीयत इत्यत आह। न ध्वनिरतो वाचकाद् भिन्नो रूपन्तेन वाचकेन सह पृथग् वा श्रूयते। ध्वनिभ्यः श्रूय[5]त एवेति चेदाह। न हि प्रत्यक्षेर्थे परोपदेशो गरीयान्। येन स्वयम्विवेकेनाशृण्वन्नपि त्वद्वचनमात्राद् ध्वनेः श्रवण व्यतिरिक्तस्य प्रतिपद्यते। तदिति तस्मादयं श्रोता स्थितेष्वन्येषु व्यवहर्त्तृष्वेकस्यैव व्याहरतः। केवलमेवार्थान्तरध्वनिविविक्तमेव शब्दं शृण्वंस्तदुपलम्भप्रत्ययानां व्यवहर्त्तृगताना करणसाङ्गत्यादीना शब्दोपलम्भ[6]प्रत्ययाना सामर्थ्याभावं प्रत्येति। कस्मिन् कर्त्तव्ये। तदन्यनिष्पादने श्रयमाणाच्छब्दादन्यस्य ध्वनेर्निष्पादने। कि कारणं (।) यदि तदुपलम्भप्रत्ययास्तदन्यनिष्पादने समर्थाः स्युस्तदा तत् साधितन्तैः शब्दोपलम्भप्रत्ययैः साधित ध्वनिरूपमुपलभ्येत। न चोपलभ्यते।

अथ स्यात् (।) कलकले ते ध्वन्यारम्भका इत्याह। तत्स्वभावा इत्यादि।

171b ध्वनिरहि[7]तशब्दजननस्वभावा एव पुनः शब्दोपलम्भप्रत्यया व्याहरत्स्वपि बहुषु कलकले स्वकार्य शब्द मुक्त्वा कार्यान्तरं ध्वनि कथमारभेरन्। नैवारभेरन्। यस्मान्न हि कारणाभेदे कार्यभेदो युक्तः। तस्मिन्नेव कारणे कार्यभेदः शब्दध्वनिलक्षणो न युक्त.। किं कारणं (।) कारणभेदानपेक्षिणः कार्यभेदस्याहेतुकत्वप्रसङ्गादित्युक्तं प्राक्। तस्मात् कलकले वाचका एव श्रूय[1]न्ते न ध्वनयः।

ननु यदि कलकले वाचका एव सन्तीत्यभ्युपगम्यते। कथन्तर्हि दूरवर्त्तिनां ध्वनिमात्रश्रवण समीपवर्त्तिना वाचकाना ध्वनीना श्रवणमिति।

---

[1] Don-gshon-du.

कथं वा शक्तिनियमाद् भिन्नध्वनिगतिर्भवेत् ॥२६०॥

तानि प्रतिनियतशक्तीन्यपीन्द्रियाणि प्रतिशब्दनियतान् नाना रूपान्[1] न त्वेव शृण्वन्तीति शब्देष्वेषां निर्वेदाः। वाचकेभ्यो भेदेन कदाचित् श्रवणात्। न हि वाचके प्रतिनियतशक्तीन्यपीन्द्रियाणि[2] ध्वनिषु तद्भिन्ना इत्यत्र अल्पीयान् भागः। इयं हि गतिर्ध्वनिभ्यः समस्ताभ्यः। न हि ध्वनिभागं समेति वाक्यानवस्थानात्[3]। सिद्धमक्रमसत्त्वं शब्दरूपस्येति।

सत्यं। य एव वाचका प्रयत्ननिष्पन्नास्त एव परस्परसहर्षेण ध्वन्यारम्भका (।) तेन कलकले केषाचिद् ध्वनिमात्रस्य प्रतीतिरन्येषामुभयप्रतीतिरित्यदोष। (२५९)

यदप्युक्त समीपवर्तिनापि कलकले[2] ध्वनय एव केवल श्रूयन्ते न वाचका शब्दा इति।

तदप्ययुक्तं। यस्मान्न च कलकले वाचको न श्रूयते। किन्तु श्रूयत एव। कि कारण। **पदवाक्यविच्छेदानामुपलक्षणात्**। अपि च कथं चेन्द्रियस्यैकशक्तिप्रतिनियमाद् भिन्नध्वनिगतिर्भवेत्। बहूना ध्वनीना ग्रहणम्भवेत्। नैव भवेत्।

तानीत्यादिना व्याचष्टे। तानि प्रतिनियतशक्तीन्यपीन्द्रियाणि युगप[3]न्नानारूपान् ध्वनीन् शृण्वन्ति। कीदृशान् (।) **प्रतिशब्दनियतान्**। शब्दं शब्द प्रति व्यञ्जकत्वेन नियतान्। **न त्वेव** शब्दान् युगपच्छृण्वन्तीति क· **शब्देष्वेषामिन्द्रियाणा निर्वेदो** वैमुख्य येन तान् न शृण्वन्ति। न च भावशक्तिरीदृशीति शक्यम्वक्तुं (।) **कदाचिद्** बहूनामपि **वाचकानां श्रवणात्** (२६०)

यदुक्तमित्यादि पर·। यदुक्तम्बौ द्धे न **वाचकेभ्यः** वर्णपदवाक्येभ्यो **भेदेन ध्व[4]नयो** न सिद्धा इति। कथन्न सिद्धा· (।) सिद्धा एव। कि कारण। वचनादर्थप्रतीतेः। शब्दादुच्चरितादर्थस्य वाच्यस्य गते.। **न चेयमर्थगतिर्ध्वनिभ्यः सम्भवति**। कि कारण (।) **न हि ध्वनिभागादल्पीयसो** वर्णव्यञ्जकादर्थप्रतीतिः। वर्णोप्येकस्तावत् प्रायेणानर्थक. (।) प्रागेव व्यञ्जकोल्पीयान् ध्वनिभाग·। सहिता प्रतिपादका इति चेदाह। **न च सोन्यं स[5]मेति** (।) सोल्पीयान् ध्वनिभाग क्षणिकत्वादन्यमुत्तरकालभाविन ध्वनिभाग समेति संश्लिष्यति। **तदिति** तस्मादियमर्थप्रतीतिः समस्तानि परिपूर्णानि पदवाक्यरूपाणि यस्मिन् वाचके तत्तथा। तेन **साध्या** ध्वनिषु न सम्भवति। कीदृशेषु। **असमस्ता** असंश्लिष्टा भागा उत्पन्नोत्पन्नध्वनिभागस्य क्षणिकत्वेन द्वितीयध्वनिभागानवस्थानाद् येषान्ते[6]षु। इति एवमर्थप्रतिपत्त्यन्यथानुपपत्त्या **सिद्धमक्रमसत्त्वं**। अक्रम सत्त्वं यस्य **शब्दरूपस्य तत्तथा**। निर्विभागमिति यावत्। क्रमवद् विभागश्च वाचकव्यतिरिक्तो ध्वनिः

तन्न। क्रमवद् व्यतिरेकिणा क्रमस्य प्रागेव निषिद्धत्वात्। तथाऽतिप्रसंगात्। पूर्वेण कर्मविभागे[4]नापरस्याप्रतिसन्धानात् एकांशाच्चाप्रतीतेः। तद्व्यतिरेकिहस्तसंज्ञादिषु प्रतीतिहेतुः समस्तरूपकर्मात्माशब्दवदे[5]वाभ्युपगन्तव्यः स्यात्। यथास्वं करणप्रयोगाद् भिन्ना वर्णभागाः, कर्मभागा वा क्रमभाविनः। ते क्रमेण विकल्पविषयाद् यथासंकेतमेवा[6]र्थप्रतीतिं जनयन्तीति न्याय्यम्।

(।) क्रमवन्तो भागा यस्येति विग्रहः।

तन्नेत्यादिना प्रतिषेधति। तदेतदनन्तरोक्तं न सम्भवति। कस्मात्। **क्रम-**
172a **वन्तो** ये वर्णास्तद्व्यतिरेकिणा **क्रमस्य** शब्दस्य। "न हि वयन्देवदत्ता[7]दि पदवाक्येषु दकारादिप्रतिभास मुक्त्वा पर प्रतिभासमुपलक्षयाम" इत्यादिना **प्रागेव निषिद्धत्वात्।**

यदि चासमस्तभागेषु ध्वनिष्वर्थप्रतीतेरसम्भवादक्रमसत्त्व शब्दरूप कल्प्यते। तदातिप्रसङ्गश्चैव कल्प्यमाने। **तथा** हि हस्तादीना यथा सकेतगमनागमनादिसूचकानि यानि कर्माणि तेषा ये भागास्तेषा क्षणिकत्वात् **पूर्वेण कर्मभागेनापरस्योत्तर[1]स्य** कर्मभागस्याप्रतिसन्धानादघटनात्। **एकांशाच्चाप्रतीतेः**। एकस्माच्चाल्पीयस· कर्मभागाद् यथा सकेतस्य गमनागमनादिलक्षणस्यार्थस्याप्रतिपत्ते। **तद्व्यतिरेकी**। कर्मभागेभ्योन्यः। यथासकेत **हस्तसंज्ञादयः**। आदिशब्दादर्थप्रतीतौ शिर कम्पादयो गृह्यन्ते। तेष्वर्थप्रतीतिहेतु. **समस्तरूपकर्मात्माभ्युपगन्तव्यः स्यात्। शब्द[2]वदेव**। ध्वनिव्यतिरिक्तशब्दकल्पनावत्।

यत्पुनरुक्तम्म ण्ड ने न। "यदा त्रैविद्यवृद्धा हस्तसज्ञादिविषयानुत्क्षेपणत्वादिशब्दनिर्देश्यान् सामान्यविशेषानभ्युपगच्छन्ति तदा कोय प्रसङ्ग.। एक. कर्मात्माभ्युपगन्तव्य"[1] इति।

तदयुक्त। यतो यद्येकमुत्क्षेपणरूपङ्कर्म सिद्धम्भवेत्। तथा परापरमपि यदि सिद्ध स्यात् तदा तेषु बहुषूत्क्षेप[3]णेषु प्रत्येकमुत्क्षेपणत्वसामान्यम्वर्त्तेत। तदेव तु न सिद्ध पूर्वापरकर्मभागानामनन्वयात्। न च विशेषाभावे सामान्यसद्भाव.। नापि कर्मभागेषु प्रत्येकमुत्क्षेपणादिरूपतया प्रतीतिः (।) किन्तर्हि (।) तद्भागरूपतया (।) तत्कथन्तेषु भागेषूत्क्षेपणत्वसामान्यमभ्युपगम्येत (।) अभ्युपगमे वा एकस्मादपि कर्मभागाद् गमनादिलक्षणस्यार्थस्य[4] प्रतिपत्तिः स्यादर्थाभिधायकस्य सामान्यस्य भावादिति यत्किञ्चिदेतत्। यथा च न कर्मभागेषु व्यतिरिक्तं कर्मात्मा तथा ध्वनिभागेष्वपि न व्यतिरिक्तः शब्दात्मा। कथन्तर्ह्यर्थ-

---

[1] Sphoṭasiddhi 33 (pp. 253–54)

किं च ।

ध्वनयः संमता यैस्ते दोषैः कैरप्यवाचकाः ।
ध्वनिभिर्व्यज्यमानेस्मिन् वाचकेऽपि कथं न ते ॥२६१॥

क्रमो[7]त्यादिभिर्ध्वनिभागैर्व्यक्तः प्रकाशितो वाचको वक्ति । तमपि ते न 504a

---

प्रतीतिरित्याह। **क्रमभाविन एवेत्यादि। यथास्वं** यस्य यत्करणन्ताल्वादि। तस्य **प्रयोगो** व्यापारस्तस्माद् **भिन्ना वर्णभागाः। कर्मभागा वा यथास्वं करण-प्रयोगात्**। कर्म[6]हेतो प्रयोगात् **क्रमभाविनो** भिन्ना इत्यत्रापि सम्बन्धनीय। **ते** यथोक्ता वर्णभागा कर्मभागा वा **क्रमेण विकल्पविषयादत्यनुभवज्ञानानुक्रमानुसारिणा** विकल्पाना क्रमेण विषयमुपगता **यथासंकेतमेवार्थप्रतीतिं जनयन्तीति न्याय्यं**। युक्त्यपेतत्वात्।

किं चेति दोषान्तरमप्याह। यै कैरपि दोषै पूर्वपूर्वस्य ध्वनिभागस्योत्तरो-[6]त्तरेण ध्वनिभागेनाप्रतिसन्धानादित्यादिकै करणभूतैस्ते **ध्वनयो** वै या क र णा दीनामवाचकास्**सम्मताः**। दृष्टा (।) तै क्रमभाविभिर्ध्वनिभिर्व्यज्यमानेस्मिन्-ध्वनिव्यतिरिक्तेपि **वाचके कथन्न ते**। ध्वनिभाविनो दोषा न सन्ति भवन्त्येव।

ननु ध्वनय प्रत्येक समुदिता वा पूर्वोक्तेन न्यायेन नार्थस्य प्रतिपादका। वाचकस्य तु ते प्रत्येकमभि[7]व्यञ्जका इष्यन्ते। एकेन ध्वनिनाभिव्यक्तस्य वाच- 172b
कस्यानवधृतत्वादन्यान्यैरभिव्यक्तस्य सस्काराधानतारतम्यप्रबोधेनावधारणमिति ध्वनिभिर्व्यज्यमाने वाचकेपि कुतस्ते दोषा इति। तदुक्तम्म ण्ड ने न।

"नानेकावयव वाक्य पद वा स्फोटवादिना।
एकत्वेपि ह्यभिन्नस्य क्रमशो दर्शिता गतिरि"ति।

तदयुक्तम् (।) अभिव्यक्तिर्हि ज्ञान (।) न च शब्दानुगमेन विना[1] ज्ञान-मिष्यते भवद्भिः। तेनाभिव्यक्तिरिति निश्चय एवोच्यते। न च प्रथमध्वन्य-नन्तरम्वाचकनिश्चय। प्रतिभासत इति (।) तत्कथमस्याभिव्यक्ति।

तस्मात् स्थितमेतद् यथा ध्वनय. प्रत्येक समस्ता वार्थप्रतिपादनेऽशक्तास्तथा वाचकाभिव्यक्तावपि।

क्रमेत्यादि विवरण (।) **क्रमोत्पादिभिर्ध्वनिभागैर्व्यक्तः प्रकाशितः किला-क्रम** शब्दात्मा **वाचको[2]** र्थम्वक्ति। न सन्निधानमात्रेण (२६१)

तमपि ध्वनिव्यतिरिक्त शब्दात्मान **ते** ध्वनयो **न सकृत् प्रकाशयन्ति**। कि कारण (।) तेषा ध्वनिभागाना **क्रमभावात्**। नाप्येक **एव** ध्वनिभागः शब्दं **व्य-**

---

[1] Sphotasiddhi (by Mandana) 29

सकृत् प्रकाशयन्ति, क्रमाभावात् । नाप्येक एव भागः । तदन्यस्य वैयर्थ्यप्रसंगात्, एक वर्णभागकाले च समस्तस्य अनुपलक्षणात् ।

तद्, अयं अप्रतिसंहृतसकलोपालम्भ उपलम्भसाकल्यसाध्यमर्थं[2] ध्वनिवत् कथं साधयेत् । को हि उपलम्भसाध्येष्वर्थेषु सदसतोरत्यन्तानुपलम्भे विशेषः ? न च सन्निधिमात्रेण साधनम्[3]। व्यक्तिव्यपेक्षणात् । सदसतोः क्रमेण भवन्ती तुल्योपयोगेति ध्वनिभिरशक्यसाधनम् । तत्रापि तथा ।[4] तथा सत्यलमन्येन ।

तस्मान्न वर्णेष्वपौरुषेयता ।

(घ) वर्णानुपूर्वि-चिन्ता

वर्णानुपूर्वी वाक्यं चेन्न वर्णानामभेदतः ।

नक्ति । निश्चाययति । कि कारण (।) तदन्यस्य व्यञ्जकत्वेनाभिमतस्य ध्वनिभागस्य वैयर्थ्यप्रसङ्गात् । इतश्चैको ध्वनिभागो न समस्तस्य शब्दस्य व्यञ्जको यस्मादेकवर्ण[3]भागकाले च समस्तस्य वाचकरूपस्यानुपलक्षणात् ।

तदिति तस्मादय शब्दात्मा । ध्वनिभागै क्रमभाविभि क्रमेण व्यज्यमानत्वात् । अप्रतिसंहितो न संघटितस्सकलोपलम्भो यस्य शब्दात्मनः स एवम्भूत. शब्दात्मा । उपलम्भसाकल्यसाध्यमर्थं स्वाभिधेय प्रकाशनलक्षण कथं साधयेत् (।) नैव साधयेत् । किमिव (।) ध्वनिवत् । यथा ध्वनि[4]भागास्त्वन्मतेन पूर्व्वापरेणाप्रतिसन्धानादर्थन्न प्रकाशयेयुस्तद्वत् ।

को हीत्यादिनैतदेव समर्थयते । उपलम्भसाध्येष्वर्थेषु को हि सदसतोरत्यन्तानुपलम्भे सति विशेषो नैव कश्चित् । यथा हि क्षणिका ध्वनिभागा उत्तरोत्तरभागावस्थायामसत्त्वादसमस्तोपलम्भनान्न समर्थास्तथैवाक्रमोपि शब्दात्मा सन्नप्यस्वीकृतस[5]मस्तोपलम्भनो न समर्थ एवेति । न चाय शब्दात्मा । उपलम्भनिरपेक्ष. सन्निधिमात्रेणार्थप्रतीतिसाधनः । कि कारण (।) तस्या व्यपेक्षणात् । सा चेय व्यक्तिः क्रमभाविनी सदसतो· (।) सतः शब्दात्मन । असतश्च ध्वनिभागस्य क्रमेण भवन्ती तुल्योपयोगा । तुल्यफलेति कृत्वा ध्वनिभिरशक्यसाधनं साधयितुमशक्य यत् कार्यमर्थ[6]प्रतीतिलक्षण । तत्रापि तथा । ध्वनिभिर्व्यज्यमानेपि शब्दात्मनि तथा । अशक्यसाधनमेवेत्यलमन्येन शब्देन ध्वनिव्यतिरिक्तेन कल्पितेन ।

तस्मान्न वर्ण्णेष्वपौरुषेयता । नापि वाक्य इत्युपसंहार· ।

न वर्ण्णव्यतिरिक्तम्वाक्य किन्तु वर्ण्णानुपूर्वी वाक्यं (।) तच्चापौरुषेयमिति चेत् ।

न अर्थान्तरभूतमेव शब्दरूपं[5] वाक्यं अपौरुषेयं चेत्। किन्तर्हि। वर्णानुक्रम-लक्षणं हि नो वाक्यं, तदपौरुषेयं साध्यमिति चेत्।

न। वर्णानामानुपूर्व्या[6] अभेदात्। नेयमर्थान्तर वर्णेभ्यः। दृश्यायां भेदे-नोपलम्भप्रसंगात्। अदृश्यायां, ततोऽप्रतिपत्तिप्रसंगात्, अनिरूपणाच्च।[7] भेद- 504b
वत्याश्चानुपूर्व्या अभावे वर्णमात्रमवशिष्टमिति पूर्ववत् प्रसंगः।

तेषां च न व्यवस्थानं क्रमान्तरविरोधिनः।

यदि वर्णानामानुपूर्वी अकृतका[1], ते च न बहवः समानजातीया येन केनचिद् व्यवस्थितक्रमाः स्युः, अन्ये यथेष्टपरावृत्तयः। किंतर्हि। त्रैलोक्य एक[2] एवाकार-

---

तन्न। कि कारण (।) वर्ण्णानामानुपूर्व्या सकाशादभेदतः[7] (।) 173a

न वर्ण्णेभ्योर्थान्तरमेव शब्दरूपम्वाक्यमपौरुषेयं। किन्तर्हि (।) वर्ण्णानुक्रम-लक्षणं हि नोस्माक मी मा स का नाम्वाक्यं। तदपौरुषेयं साध्यमिति चेत्।

न। वर्ण्णानामानुपूर्व्याः सकाशादभेदात्। नेयमानुपूर्वी अर्थान्तरम्वर्ण्णेभ्यः। किं कारण। दृश्यायामनुपलब्धिलक्षणप्राप्तायान्तस्यामानुपूर्व्यामङ्गीक्रियमाणाया वर्ण्णेभ्यो विभागेन भेदो नोपलम्भप्रसङ्गात्।[1] न चोपलभ्यत इत्यभावसिद्धौ स्वभा-वानुपलब्धिर्वाच्या। अथादृश्यानुपूर्वी (।) तदाप्यदृश्यायामानुपूर्व्यां। तत अनुपूर्व्या अर्थाप्रतिपत्तिप्रसङ्गात् (।) न च दृश्याया आनुपूर्व्या ग्राहक प्रत्यक्षमदृश्यत्वा-देव। नाप्यनुमान लिङ्गाभावात्। वर्ण्णेभ्यो भेदवत्याश्चानुपूर्व्या अभावे वर्ण्ण-मात्रमविशिष्टं सर्वत्र लौकिकवैदिकवाक्येष्विति पूर्ववत् प्रसङ्गः[2] य. किमनेन परिशोषित स्यादित्यादिनोक्त ।

अथ स्याद् (।) क्रमो वर्ण्णाना-धर्ममात्रन्न वस्त्वन्तर तेनादोष । तदुक्त (।)

"धर्ममात्रमसौ तेषान्न वस्त्वन्तरमिष्यते।
क्रमेण ज्ञायमाना स्युर्वर्ण्णास्तेनावबोधका।
न च क्रमस्य कार्यत्व पूर्वसिद्धपरिग्रहात्।
वक्ता न हि क्रम कश्चित् स्वातन्त्र्येण प्रपद्यते।
यथैवास्य परैरुक्तस्तथैवैन विवक्षति।
परोप्ये[3]वं सतश्चास्य सम्बन्धवदनादिता।"[1]

तेन पूर्वपूर्ववृद्धदर्शनायातोनादिवर्ण्णक्रमो पौरुषेय एवेत्यत्राह।

तेषां च न व्यवस्थानं (।) तेषा वर्ण्णाना न व्यवस्थितक्रमत्व। कि कारण (।) व्यवस्थितादेकस्मात् क्रमान्तरस्य विरोधतः।

---

[1] Kumārila.

स्तथा गकारोऽपि। तदाऽग्निरित्येव स्यात् न गगनमिति। अकारगकारयोः पूर्वापरभावस्य व्यवस्थितत्वात्।

कृतकानामपि हेतुपरिमाणनियमवतां[3] अशक्यः क्रमविपर्ययः कर्त्तुम्। यथा बीजांकुरकाण्डादीनां ऋतुसंवत्सरादीनां च। किं पुनरचलितावस्थास्वभावानां अकृतकानां कथंचिद् व्यवस्थितानां पूर्वा[4]वस्थायाः त्यागमन्तरेण अन्यथा भावायोगात्। त्यागे वा विनाशप्रसंगात्, विशेषेण नित्यायामानुपूर्व्यां अपि। प्रतिपदं

यदीत्यादिना व्याचष्टे। **वर्णानामानुपूर्वी** यदि **कृतका** ते च वर्णा **न बहवस्समानजातीया येन केन[4]चिद्** वर्णा **व्यवस्थितक्रमाः स्युर्**वैदिका। **अन्ये** पुनर्लौकिका **यथेष्टपरावृत्तयः**। यथेष्टं परावृत्ति क्रमान्तरेण प्रयोगो येषामिति विग्रह। **किन्तर्हि त्रैलोक्य एक एवाकारस्तथा गकारः**। तदुक्त।

"देशकालप्रयोक्तृणाम्भेदेपि च न भेदवान्।
गादिवर्णो यतस्तत्र प्रत्यभिज्ञा परिस्फुटे"ति।[1]

यदा चैवन्तदा व्यवस्थितक्रमत्वे वर्णानाम[5]**ग्निरित्येव स्यान्न गगनमिति।** किकारणम् (।) **अकारगकारयोः पूर्वापरभावस्य व्यवस्थितत्वात्**। अकारो गकारात् पूर्वमेवाकाराच्च गकारः परेणैव व्यवस्थित इत्यर्थः। गगनमित्यत्र गकारात्परेणाकार. स्यादिति क्रमान्तरन्न स्यात्।

एतदेव द्रढयन्नाह। **कृतकानाम**पीत्यादि। आस्तान्तावदकृतकानामियञ्चिन्ता। येषामन्यथाभा[6]व कथञ्चिदपि कर्त्तु न शक्यते। कृतकानामपि तावद् भावाना कीदृश **हेतुपरिणामनियमवतां** हेतो परिणाम। उत्तरोत्तरावस्थाप्रतिलम्भः। तस्मान्नियम कार्यस्य हेत्वनन्तर सत्ता। स येषा विद्यते। ते तथोच्यन्ते। तेषामप्यशक्यः **क्रमविपर्ययः कर्त्तुं। यथा बीजाङ्कुरादीना**। बी-
173b जात् पश्चादङ्कुरोऽङ्कुरात् काण्ड यत्र पुष्पादी[7]नि न विपर्यय। तथा **ऋतुसम्वत्सरादीना** व्यवस्थितक्रमत्व। ऋतूना हेमन्तादिलक्षणाना। सम्वत्सराणाञ्च शौ क्र बा र्हं स्पत्यादीना। आदिशब्दाद् ग्रहनक्षत्रप्रभृतीना। **किं पुनरचलितावस्थास्वभावानामकृतकानाम्वर्णाना**। अचलिताक्रमाद्यवस्था स्वभावश्च येषामकृतकानामिति विग्रह। **कथंदिद् व्यवस्थितानां**। विनियतेन क्रमेण[1]। **पूर्वावस्थायास्त्यागमन्तरेणान्यथाभावायोगात्** क्रमान्तरेणावस्थानस्यायोगात्। पूर्वावस्थात्यागे वा वर्णानामभ्युपगम्यमाने तेषाम्विनाशप्रसङ्गात्। वर्णानामपि तावन्च पूर्वावस्थात्यागमन्तरेण क्रमविपर्ययो **विशेषेण नित्यायामानुपूर्व्यां**।

---

[1] Kumārila

वर्णान्यत्त्वे अपूर्वाणामुत्पादाद् वा वर्ण[5] **बाहुल्यम्। तच्चैतत् नाभिमतम्।**

अपि च।

वर्ण्णानुपूर्वी वाक्यं चेन्न वर्णानामभेदतः ॥२६२॥
देशकालक्रमाभावो व्याप्तिनित्यत्ववर्णनात्।

सा चेयं वर्णानामानुपूर्वी देशकृता वा स्यात् यथा पिपीलिकानां पंक्तिः, काल-[6] **कृता वा, यथा बीजांकुरादीनाम्।**

सेयं द्विधाऽपि वर्णेषु न सम्भवति। अन्योन्यदेशपरिहारेण वृत्तिर्हि देशपौर्वा-पर्यम्। सर्वस्य[7] **सर्वेण तुल्यत्वात्। तद् वर्णेषु न सम्भवति। वातातपवत्,** ५०९
आत्मादिवच्च। तथाऽन्योन्यं कालपरिहारेण वृत्तिः कालपौर्वापर्यम्। यदा[1] **एको नास्ति तदान्यस्य भावात्। तदपि नित्यादिषु न सम्भवति, सर्वदा सर्वस्य भावात्। न चान्या गतिः। तत् कथं वर्णपौर्वापर्यं वाक्यं अपौरुषेयं साध्येत।**

तदेतत् क्रमान्यत्त्व **प्रतिपदम्वर्ण्णान्यत्वे** स्यान्नित्या अपि वर्ण्णा प्रतिपदम्भि[2]न्ना इति कृत्वा। **अपूर्वेषाम्वर्ण्णानाम्प्रतिपदमुत्पादाद् वर्ण्णबाहुल्यं**। तस्माद्वा क्रमान्यत्त्वं स्यात्। **तच्चैतदुभयमपि नाभिमतं** मी मा स का ना मेकत्वान्नित्यत्वाच्च वर्ण्णाना। (२६२.)

अपि चेत्यादिना दूषणान्तरमाह। **देशकालाभ्या** य कृत· **क्रमस्तस्य** वर्ण्णे-ष्वभावः कथ। **व्याप्तिनित्यत्ववर्ण्णनात्**। तदुक्त।

"किञ्च शब्दस्य नित्यत्व श्रोत्रजप्रत्यभिज्ञ[3]या।
विभुत्व च स्थित तस्य को व्यवस्येद्विपर्ययमिति"।[1]

वर्ण्णानामाकाशवद् व्याप्तिवर्ण्णनान्न देशकृतः क्रमः। नित्यवर्ण्णनान्न कालकृत·। **सा चेयमित्यादिना** व्याचष्टे। **सा चेयम्वर्ण्णानामानुपूर्वी। देशकृता वा** स्यात्। **यथान्योन्यदेशपरिहारेण** स्थिताना **पिपीलिकादीनाम्पङ्क्तौ। कालकृता वा** स्यादानुपूर्वी। **यथा बीजाङ्कुरादीनां**। यदा[4] बीज न तदाकुरो यदांकुरो न तदा पत्रादय इति **सेयमानुपूर्वी द्विधा**। देशकालकृता **वर्ण्णेषु न सम्भवति**। कुतः (।) व्याप्तेर्न्नित्यत्वाच्च। तत्र न तावद्देशकृतानुपूर्वी **वर्ण्णानां सम्भवति। यस्मादन्योन्यदेशपरिहारेण** भावाना **वृत्तिर्हि देशपौर्वापर्यं। तदित्थम्भूतं** पौर्वा-पर्यम्**वर्ण्णेषु न सम्भवति**। कि कारणं (।) व्यापित्वेन **सर्वस्य** वर्णस्य **सर्वेण** वर्ण्णेन[5] **तुल्यदेशत्वात्। वातातपवत्**। लौकिको दृष्टान्त। शास्त्रीयमाह। **आत्मादि-वच्चेति**। आदिशब्दादाकाशादिपरिग्रह·। **तथा** कालकृतानुपूर्वी वर्ण्णानान्न

---

[1]Kumārila

अनित्या[2]व्याप्तितायां च दोषः प्रागेव कीर्तितः ॥२६३॥

अथ माभूदेष दोष इत्यनित्यानव्यापिनश्च वर्णानिच्छेद्। तावपि पक्षौ प्रागेव निराकृतावित्यपरिहारः।

व्यक्तिक्रमोपि वाक्यं न नित्य[3]व्यक्तिनिराकृतेः।

सम्भवति। यस्मादन्योन्यं कालपरिहारेण वृत्तिः कालपौर्वापर्यं। एतदेव कुतः। **यदेत्यादि**। यस्मिन् काले **एको नास्ति तदान्यस्य भावात्** कारणात्। **तदपि** काल-पौर्वापर्यन्नि[4]त्येषु वर्णेषु न **सम्भवति। सर्वदा सर्वस्य** वर्णस्य **भावात्। न च** देशकालकृतात् क्रमा**दन्या** वर्णानुपूर्वी **गतिः** प्रकारोस्ति। **तत्कथम्वर्णपौर्वापर्यं वाक्यं** यद्भवद्भि**रपौरुषेयं साध्येते**ति।

न च ध्वनिकृतो युगपद्भाविनाम्वर्णाना क्रमो युक्तोऽनित्यत्वप्रसगात्। तदुक्तम् (।)

"अनित्यध्वनिकार्यत्वात् क्रमस्यातो विनाशिता।
पुरुषाधीनता चास्य तद्विवक्षावशा[7]द् भवेदि"ति।[1]

1742

तेनायमर्थो भवति (।) व्यापित्वाद् वर्णाना यौगपद्यमतो व्यापित्वविरोधी क्रम (।) क्रमविरोधि च व्यापित्व। क्रमश्चेद् वर्णानामिष्यते व्यापित्वग्राहि प्रत्यभिज्ञान भ्रान्त स्यात् (।) तथा च देशकालप्रयोक्तृभेदेन वर्णानाम्भिन्नत्वात् कार्यत्वमिति कथमनादित्व क्रमस्य।

तेन यदुच्यते।

"न च क्रमस्य कार्यत्व पूर्वसिद्धपरिग्रहात्।
वक्ता न हि क्रम कश्चित्स्वातन्त्र्येण प्रपद्यते।[1]
यथैवास्य परैरुक्तस्तथैवैनम्विवक्षति।
परोप्येवमतश्चास्य सम्बन्धवदनादिते"ति (।)

तदपास्त। क्रमे सति वर्णैकत्वप्रत्यभिज्ञानस्याप्रामाण्येन प्रत्युच्चारण वर्णानां कार्यत्वात् क्रमस्य च तेभ्योनर्थान्तरत्वात्। न च क्रमः क्रमिणान्धर्म. (।) धर्मस्यापि धर्मिणस्सकाशाद् भेदात् भेदेन श्रोत्रज्ञानेऽवभासः स्यात्। न च भवति। तस्मादयुगपदुत्पन्ना एव[2] भावाः क्रम. तेन प्रत्युच्चारणम्वर्णानामुत्पत्तिभेदात् क्रमभेदेपि। पूर्वदृष्ट एवाय क्रम इति प्रत्यभिज्ञान सादृश्यनिबन्धनं। न प्रत्य-भिज्ञान सादृश्यनिबन्धन। न प्रत्यभिज्ञानं प्रमाणमिति प्रतिपादयिष्यते च। तत्कथ क्रमस्यानादित्वादपौरुषेयत्वमिति। (२६३)

---

[1] Kumārila.

न वर्णानां रूपानुपूर्वी वाक्यम। किन्तर्हि। तद् व्यक्तेः। सा यथा स्ववर्णाभिव्यक्तिप्रत्ययानां क्रमाद् भवन्ती क्रमयोगिनीति तदा[4]नुपूर्वी वाक्यमित्यपि मिथ्या। तस्या नित्येषु प्रागेव निषिद्धत्वात्। कार्यता साक्षाच्छक्त्युपधानेन ज्ञानजननकार्यविशेष एव)[1] समर्था व्यक्तिरित्याख्यातमेतत्।

व्यापारादेव[5] तत्सिद्धेः करणानाञ्च कार्यता ॥२६४॥ 35a

यत् खलु रूपं यत एवोपलभ्यते (।) तस्य तदुपलब्धिनान्तरीयकामुपलब्धिमेवाश्रित्य लोकः कार्यतां प्रज्ञापयति (।) सा वर्ण्येष्यस्ति। सैव चान्यत्रापि (।) तदाश्रयो न विशेषस्तत्कथं तुल्येभ्युपगमनिबन्ध[1]ने न वर्णाः कार्याः। न चैतदुपलब्ध्याश्रया कार्यतास्थितिः (।) किन्तर्हि (।) यत्सत्येव भवतीति। सत्ता-

---

अथ माभूदेष दोष इत्यनित्यान् व्यापिनश्च वर्णानिच्छेत् वे द वा दी। तदाऽनित्याव्यापितायान्दोषः प्रागेव कीर्तितः।

अथेत्यादि[3]ना व्याचष्टे। **माभूदेष** वर्णानुपूर्व्यभाव**दोष इत्यनित्यानव्यापिनश्च वर्णानिच्छेद्** वे द वा दी। अनित्यत्वात् कालकृतपौर्वापर्यमव्यापित्वाद् देशकृतमिदमिति मन्यमान.। **तावप्यनित्याव्यापिपक्षौ प्रागेव**। "अनित्य यत्नसम्भूतम्पौरुषेय कथ न तद्।"(....) इत्यादिना। **सर्वत्रानुपलम्भः स्या**दित्यादिना च यथाक्रमन्निराकृतावित्यपरिहारः। (२६४)

वर्णाना व्यक्तिर[4]भि**व्यक्तिस्तस्याः क्रमोपि वाक्यम्** भवति। यदा कर्मस्था क्रियाभिव्यक्तिस्तदा वर्णाना व्यक्तिविषयत्वक्रमो वाक्यमित्यपि न भवतीत्यर्थ। कस्मात् (।) **नित्यव्यक्तिनिराकृतेः**।

नेत्यादिना व्याचष्टे। न वर्णानां रूपानुपूर्वी स्वरूपानुपूर्वी **वाक्यं** येनायन्दोष. (।) **किन्तर्हि** (।) **तद्व्यक्तेः**। वर्णरूपव्यक्तेर्व्यक्तत्वलक्षणाया यानुपूर्वी तद् वाक्य। तामेव दर्शयन्नाह।[5] **नेत्यादि। सा व्यक्तिर्यथा स्ववर्णाभिव्यक्तिप्रत्ययानां**। येन यस्य वर्णाभिव्यक्तिप्रत्ययास्तालवादिव्यापारास्तेषा **क्रमाद् भवन्ती क्रमयोगिनीति** कृत्वा **तदानुपूर्वी** तेषा व्यक्ताना वर्णानामानुपूर्वी **वाक्यम्** (।) **इत्यपि मिथ्या**। कि कारण(।)**तस्या व्यक्तेर्नित्येषु प्रागेव** सा मा न्य व्य क्ति चि न्तास्थाने **निषिद्धत्वात्**। तदेव स्मारयन्नाह। **कार्यतेत्यादि**। व्यञ्जककृतेन[6] **साक्षाज्जननशक्त्युपधानेन। ज्ञानजननासमर्थाना** घटादीना **कार्यविशेष एव व्यक्तिरित्याख्यातमेतत्**। किञ्च **करणानान्तालवादीना व्यापारादेव तस्माद्धेतोस्तेषाम्वर्णानामुपलब्धेस्तेषाम्वर्णाना कार्यता** प्राप्ता (।) यस्मात्।

---

[1] Restored up to here.

35a श्रया। सा सत्ता कुतः सिद्धा येन कार्यतां साधयेत् (।) न ह्यसिद्धायामस्यामेवं भवतीति। तस्मात् सत्तासिद्धिस्तत्साधनी। सा चोपलब्धिरेव।

सत्यम् (।) एवं यदि तस्य प्राङ् न सत्ता सिद्धा स्यात्। सा हि सत्तासिद्धिः कार्याऽसिद्धिपूर्विका।

यत् खलु रूपं यत एवोपलभ्यते तस्य रूपस्य लोकः कार्यतां प्रज्ञापयतीति सम्ब-
174b न्धः। यत एवोपलभ्यत इति यच्छब्देन यो निर्दि[7]ष्टस्तस्योपलब्धिस्तदुपलब्धिस्त-न्नान्तरीयिकामेवोपलब्धिमाश्रित्येति भिन्नक्रम एवकार। सा यथोक्तोपलब्धि-र्वर्णेष्वप्यस्ति (।) प्रयत्नव्यापारोपलब्धिनान्तरीयकत्वादेव वर्णोपलब्धेः। सा चोपलब्धिरन्यत्रापि कार्यत्वेन प्रसिद्धे वस्तुनि (।) तदाश्रयः कार्यताप्रज्ञप्तेराश्रयः। नातोधिको विशेषः (।) तत्कथन्तुल्ये कार्यताभ्युपगमनिबन्धने न वर्णाः कार्याः।

नेत्यादि पर'।[5] न चैतदुपलब्ध्याश्रया। एकोपलब्धिनान्तरीयिका याऽपर-स्योपलब्धिस्तदाश्रया कार्यतास्थितिः (।) किन्तर्हि (।) यत्सत्येव भवति। यस्मिन् सत्येव यद् भवति। इति एव सत्ताश्रया कार्यतास्थितिः। न च वर्णाना करणेभ्यः सत्ता भवति किन्तूपलब्धिरेवेति मन्यते।

सा सत्तेत्याचा र्यः। सत्ताश्रयस्यैव कार्यता प्रज्ञप्तिरित्यसत्यमेतत्। केवल सा सत्ता कुतः प्रमाणात् सिद्धा येनेय कार्यतां साध[2]येत्। न ह्यसिद्धायामस्यां सत्तायामेवम्भवति। सत्येवास्मिन्दि भवतीत्येवम्भवति। तस्मात् सत्तासिद्धिस्त-त्साधनी। तस्याः कार्यताया साधनी। सा सिद्धिरुपलब्धिरेव सिद्धेर्ज्ञान-स्वभावत्वात्। ततश्च यन्नान्तरीयिकैव यत्सत्तोपलब्धिस्तत्तस्य कार्यमित्येतावत् स्थित (।) तच्च वर्णेष्वपि तुल्यमिति कथ न वर्णा. कार्या.।

सत्यमित्यादि परः। सत्यमेवं करणव्या[3]पारादेव शब्दोपलब्धौ तत्कार्यता स्यात्। यदि तस्य शब्दस्य तालवादिव्यापारात् सत्ता न सिद्धा स्यात्। किन्तु सिद्धैव प्रमाणेन। तथा हि पूर्वं गोशब्द श्रुतवतः पुंसोन्यदा गोशब्दश्रवणे स एवाय गोशब्द इति तत्त्वग्राहिणी प्रत्यभिज्ञोत्पद्यते। तत्त्वग्रहणमेवान्यथा न स्यात्। यदि पूर्वोत्तरश्रवणकालयोरन्तराले शब्दो न स्यादित्यर्थापत्त्या प्राक्छब्दस्य[4] सत्ता सिद्धैव। न च सिद्धिपूर्विका सिद्धि कार्यतासाधनी। किन्तु सा हि सत्तासिद्धिः कार्यत्वप्रज्ञप्तेर्निमित्त या सिद्धिपूर्विका। यथा घटस्य प्रागसतः कुलालादिव्या पारादेव पश्चात् सिद्धिः।

नन्वित्यादि सि द्धा न्त वा दी। एतत् कथयति (।) न तावत् प्रत्यभिज्ञा प्रमाणमिति प्रातिपादयिष्यते तत्कथ सत्ता सिद्धा। भवतु नाम प्राक्छब्दस्य सत्ता सिद्धा। तथा[5]पि शब्दस्य तद्रूपमसिद्धं। कतरत् तद् रूपमित्याह। यत् तथा

ननु तद्रूपमसिद्धमेव यत्तथाभूतविज्ञानाव्यवधानोपयोगि। सिद्धमेव तद[2]न्य-वैकल्यान्नोपयुक्तमिति चेत् (।) **कथमिदानीमुपयुक्तानु(प)युक्तयोरभेदः।**

नापि भेदः स्वभावासंस्पर्शी तस्यैवातिशयस्योपयोगसिद्धेः। तस्याकरणत्व-प्रसंगात्। यस्यैव भावे साध्यसिद्धिः तदेव हि तत्रोपयोगि युक्तं। तदतिशयो-पयोगेप्यस्य तद्वत्प्रसंगः। तस्मादतिशेत एवाव्यवहितसामर्थ्योपयोगोवस्था[3]-भेदस्तदन्यविकल्पान्नोपयुक्तमिति चेत् प्रागेव निषिद्धा। स च करणव्यापारा-देव सिद्ध इति सर्वकार्यतुल्यधर्मा। तस्य तादृशस्य व्यक्तौ सर्वं व्यङ्ग्यं। न वा किंचिदप्यविशेषात्। तथा हि।

स्वज्ञानेनान्यधीहेतुः सिद्धेर्थे व्यञ्जको मतः॥

विधेत्यादि। तथाविधस्य शब्दस्वलक्षणप्रतिभासिज्ञानस्य **व्यवधाने**नोपयुक्त शील यस्येति विग्रह। यदि हि तथाभूत रूप प्राक् सिद्ध स्यात् तदा नित्य शब्दो-पलम्भः स्यात्।

सिद्धमेव तच्छब्दस्य यथोक्तं रूप केवल**मन्यस्य** सहकारिणो **वैकल्या**च्छोत्र-विज्ञाने कारणत्वेन **नोपयुक्तमिति चेत्।**[6]

यद्येव सहकारिसन्निधाने या पश्चात् स्वज्ञाने उपयुक्ता। या प्रयत्नात् प्रागनुपयुक्तावस्था। ते परस्परविरुद्धे। **कथमिदानीमुपयुक्तानुपयुक्तयो**रवस्थ-योर्विरुद्ध**योरभेदः** (।) अपि तु भेद एव ततश्च नानात्वात् स तादृश शब्दस्य स्वभावः कृत इति कार्य एव शब्द. स्यात्।

अथापि स्याद् (।) योसावतिशयो भवति न स शब्दस्यात्मभूतोपि त्वर्थान्तर-मिति पूर्वक[7]स्वभावादप्रच्युत एवासावित्याह। 175a

नापि भेदोऽकारकावस्थात कारकावस्थालक्षणोतिशय **शब्दस्वभावा-संस्पर्शी** शब्दस्वभावान्न व्यतिरिक्त इति यावत्। व्यतिरेके हि **तस्यैवातिशयस्य** शब्दज्ञाने **उपयोगसिद्धेः** कारणत्वसिद्धेस्तस्य शब्दस्याकारणत्वप्रसंगात्। तथा हि **यस्यैव भावे साध्यसिद्धिस्तदेव तत्र** साध्य **उपयोगि युक्तन्नापर**। अतिशयो ज्ञान[1] उपयुज्यते (।) साक्षादतिशये तु शब्द उपयुज्यत इति पारम्पर्येण शब्दोपि ज्ञाने उपयुक्त एवेत्यत आह।

तदतिशयेत्यादि। तस्मिन्नतिशयस्य शब्दस्य**उपयोगेपि** कल्प्यमाने। **तद्वत्प्र-सङ्गः**। ज्ञानवत्प्रसङ्गः। यथा विज्ञाने कर्त्तव्येर्थान्तरभूते नातिशयेन शब्द उपयु-ज्यते। तद्वदतिशयेपि कर्त्तव्येर्थान्तरभूतोतिशय. कल्पनीय। तथा चानवस्था स्याद[2]तोतिशयः शब्दादभिन्न· (।) यतश्चाभिन्नः। **तस्मात्** तदन्यं स्वविषय-ज्ञानजनन शब्दस्वभावमतिशेत **एव**। स्वरूपभेदेन। कोऽ**व्यवहितसामर्थ्यो-**

यथा दीपोन्यथा वापि को विशेषोस्य कारकात्। (२६५)

स्वप्रतिपत्तिद्वारेणान्यप्रतिपत्ति[4]हेतुर्लोके व्यञ्जकः सिद्धो दीपादिवत्। स चेत् प्राक्सिद्धः स्यात्। समानजातीयोपादानलक्षणसिद्धेर्न तस्यैवातिशयस्य ज्ञानहेतोस्तस्य तत्सामग्रीप्रत्ययत्वात्। ये पुनरसिद्धोपलंभनाः कारका एव कुला (ला)दिवद् घटादौ। प्रत्यभिज्ञानादयोपि सिद्धिहेतुवो न हेतुलक्षणं पुष्णन्ति।

पयोगोवस्थाभेदोऽव्यवहितसामर्थ्यं उपयोगो यस्यावस्थाभेदस्येति विग्रहः।

अथ स्यात् (।) नैव विज्ञानजनिकावस्थोत्पद्यते नित्यत्वात् (।) किन्तु तालवादिकमपेक्ष्यासौ ज्ञान जनयतीति (।)

अत आह। **अतिशय[3]**स्येत्यादि। नास्य सहकारिकृतोतिशयोस्तीत्यनतिशयस्य सहकारिण प्रत्यपेक्षा प्रागेव निरस्ता (।) **स च** जनक· शब्दस्वभाव· **करणव्यापारादेव सिद्ध इति** कृत्वा **सर्वकार्यतुल्यधर्मा**। सर्वे कार्ये तुल्यधर्मा यस्येति विग्रह। **तस्य तादृशस्य** कार्यतुल्यधर्मण शब्दस्य **व्यक्ता**विष्यमाणाया **सर्व**मङ्कुराद्यपि **व्यङ्ग्यं** स्यात्। **न वा किंचिद्** व्यङ्ग्य।[4] शब्दोपि कार्य· स्याद् **विशेषाभावात्**।

तथा हि (।) **स्वज्ञानेन** करणेनान्यधीहेतुरर्थो **व्यञ्जको मतः**। कदा (।) **सिद्धेर्ये**। यद्यसौ व्यङ्ग्य कारणाल्लब्धसत्ताको भवति। यथा दीप कुलालादिसिद्धे घटे तज्ज्ञानहेतुर्व्यञ्जक.। अन्यथा वापि यदि व्यङ्ग्य प्रागसिद्धः स्यात्। तदा को विशेषोस्य व्यञ्जकस्य कारकाद्धेतोः (।)

स्वप्रतिपत्तीत्यादिना व्याचष्टे। **स्व[5]प्रतिपत्ति**रेव **द्वार**मुपायस्तेन करणेनान्यस्य घटादे **प्रतिपत्तिहेतुर्लोके व्यञ्जकः सिद्धः। दीपादिवत्। स चेद्** व्यङ्ग्य व्यञ्जकव्यापारात् **प्राक् सिद्धः स्यात्**।

ननु च प्रदीपादिरप्युपलब्धियोग्य घटक्षण प्रागसिद्धमेव जनयति। तत्किमुच्यते स चेत् प्राक् सिद्ध इति (।)

अत आह। **समानजातीये**त्यादि। अनुपलम्भयोग्य पूर्वको घटादिक्ष[6]ण **समानजातीय उपादानक्षणस्तस्य** व्यञ्जकव्यापारात् प्राक् **सिद्धेः** कारणात् स चेत् प्राक् सिद्धः स्यादित्युच्यते। **न तस्यैव** व्यञ्जकाल्लभ्यस्य **ज्ञानहेतोरतिशयस्य** प्राक् सिद्धे. सिद्ध उच्यते। कि कारण (।) **तस्य** यथोक्तस्यातिशयस्य। **तत्सामग्रीप्रत्ययत्वात्**। सा व्यञ्जकसामग्री प्रत्यय कारणं यस्येति विग्रहः। **ये पुनः**
175b **स्वव्यापारात् प्राग् असिद्धस्यो[7]पलम्भकाः कारका एव ते**। किमिव (।) **कुलालादिवद् घटादौ** शब्दस्याप्युपलम्भहेतवः कुलालादितुल्या इति। शब्दोपि घटादिवत् कार्य एव।

नन्वेकदा श्रुतस्य शब्दस्यान्यदा श्रवणे च स एवायमिति तत्त्वं प्रत्यक्षप्रत्यभि-

यदपि किंचिदुत्तराकारप्रतीतिः (।) **अ[5]प्रतीतेः। पूर्वाभिन्नविषया तद्वदित्यादि। तदपि न स्वलक्षणयोरभेदसाधने समर्थं। तत्स्वभावासिद्धेः। सामान्येन**

ज्ञया प्रतीयते। तत्त्वप्रतिपत्त्यन्यथानुपपत्त्या च तालवादिव्यापारात् प्राक् सत्त्व शब्दस्यापि निश्चितमिति कथन्तालवादयो सिद्धोपलम्भना (।) तेन व्यञ्ज[1]का एव युक्ताः।

एवम्मन्यते। प्रथमे क्षणे शब्दग्रहण द्वितीयक्षणे पूर्वगृहीतशब्दाहितसंस्कार-प्रबोधस्ततोन्यस्मिन् क्षणे शब्दस्मरण। तततश्चतुर्थे क्षणे तिरोहिते तस्मिन् स एवाय घटशब्द इति प्रत्यभिज्ञान कथ प्रत्यक्ष स्यादसन्निहितविषयत्वात्।

नापि प्राक्प्रबुद्धसस्कारस्य पुसो वर्ण्णग्राहक प्रत्यभिज्ञान सम्भवति। वर्ण्णस्य साशत्वादित्युक्त। अन्त्यव[2]र्ण्णभागकाले च पूर्ववर्ण्णभागानामसत्त्वेनान्त्यस्यापि वर्ण्णस्यासन्निहितत्वात्। अत एव पदवाक्ययोरपि ग्राहक प्रत्यक्ष प्रत्यभिज्ञान न सम्भवति वर्ण्णसमुदायत्वात् पदादेरन्त्यवर्ण्णकाले च पूर्वपूर्ववर्ण्णानामसत्त्वात् सन्निहितविषयञ्च प्रत्यक्षमिष्यते। तस्मान्न प्रत्यक्ष प्रत्यभिज्ञानम्वर्ण्णपदवाक्येषु तत्त्वग्राहकं सम्भवति (।) अत एव चा चा र्ये ण नो[3]पन्यस्त (।)

भवतु वा तेषु प्रत्यभिज्ञान प्रत्यक्षन्तथापि तत्त्वग्रहणान्यथानुपपत्त्या न तालवादिव्यापारात् प्राक्छब्दस्य सत्त्वकल्पना युक्ता। सदृशापरग्रहणेनापि तत्त्वग्रहणस्य सम्भवात् सदृशापरग्रहणमेवाव्याप्यसिद्धमिति चेत्।

नन्वेकत्वमपि नैव सिद्ध। तत्त्वग्रहणात् सिद्धमिति चेन्न (।) भिन्नेष्वपि लूनपुनर्जातेषु केशेषु तत्त्वग्रहणस्य दर्शनात् सशय एवात। कथम[4]र्थापत्त्या प्राक् सत्त्वकल्पना।

अथ प्रत्यभिज्ञायमानत्वाच्छब्दस्य नित्यत्वम् (।) अनित्यत्वे ह्यनेकत्वात् प्रत्यभिज्ञानमेव न स्यात्। तथा। य परार्थम्प्रयुज्यते स प्रयोगात् प्राग् विद्यमानो यथा वास्यादिच्छिदाया। प्रयुज्यते च शब्द. परप्रत्यायनाय। तस्मात् सोपि प्राग् विद्यत एव चेति (।)

अत आह। **प्रत्यभिज्ञानेत्यादि**। शब्दस्य सदा सत्तासिद्धिहेतवः। **तेपि न हेतुलक्षणं पुष्णन्ति**। तथा[5] ह्यनित्येपि प्रदीपादौ प्रत्यभिज्ञानन्दृष्ट। तस्मादनैकान्तिकमेतत् (।) तथा क्षणिकेपि कर्मणि प्रयोगे दृश्यते। तेन प्रयुज्यमानत्वादित्यपि हेतुरनैकान्तिक एव।

यदपि किञ्चिल्लिङ्ग शब्दस्यैकत्वसाधनायोपादीयते। **उत्तरा** पश्चाद्भाविन्य-**कारप्रतीतिर्या** सा पूर्वाभिन्नविषया। पूर्वया अकारप्रतीत्या एकविषया।

एतेन शब्दानामेकत्वसाधनान्नित्यत्वं[6] साधितमिति मन्यते। अकार**प्रतीतिरिति**

वचने भिन्नविषयत्वस्याप्यविरोधः। एकविषययोश्च प्रतीत्योः पूर्वापरभावायोगात्। सन्निहितासन्निहितकारणत्वेनोत्पादानुत्पादात्। सन्निधानेप्यनुत्पन्नस्यातत्कारणत्वात्। त[6]योर्भिन्नाखिलकारणत्वं। तत्रैकाभेदेपि शक्तस्याप्रतीक्षणात्। युक्तिविरुद्धं पूर्वपरयोः प्रतीत्योरेकविषयत्वं (।) प्रतीतिप्रतिभासस्व-

---

हेतु.। **तद्वदिति** पूर्वाकारप्रतीतिवदित्यादि। आदिशब्दाद् द्रुतमध्यविलम्बितावस्थायामेक एव गकारादिवर्ण्णस्स एवाय गकारादिवर्ण्णो द्रुतादिभेदभिन्न इति प्रतीते· (।) प्रयोगस्तु या या अकारप्रतीति· सा पूर्वाकारप्रतीत्यभिन्नविषया। तद्यथा
176a पूर्वं अकारप्रतीति.। अकारप्रतीतिश्चोत्तराप्यकारप्रतीतिरि[7]ति स्वभावहेतुप्रतिरूपक·। **तदपि** साधनं पूर्वापरयोरकार**स्वलक्षणयोरभेदसाधने न समर्थं**। तथा ह्यकारप्रतीतेरित्ययं हेतुर्विशेषेण वा स्यात् पूर्वाकारप्रतीतिरूपत्वादिति। सामान्येन वा स्यादकारप्रतीतिमात्रत्वादिति। आद्ये पक्षे हेतुरसिद्धः। किं कारण (।) **तत्स्वभावत्वासिद्धेः** पूर्वाकारप्रतीतित्वासिद्धे। यद्वा विशेषेण वा हेतुरुत्तराकारप्रतीतिरूपत्वादिति।

त[1]दपि न साधन। किङ्कारण (।) तत्स्वभावत्वासिद्धे साध्यस्वभावत्वासिद्धेः। अनैकान्तिकत्व व्याप्तेरसिद्धत्वादित्यर्थ·।

अथ **सामान्येन** लिङ्गस्य **वचने भिन्नविषयत्वस्याप्यविरोधः**। अकारप्रतीतिश्च स्यात् पूर्वाकारप्रतीतिविषयाद् भिन्नविषया चेति को विरोध·।

अन्ये त्वकारप्रतीतित्व सामान्य यथा तयोः प्रतीत्योरेवम[2]कारविषयत्वमविरुद्धमिति व्याचक्षते।

किञ्च। **एकविषययोश्च प्रतीत्योः** पूर्वव्यवस्थितैकाकारविषययो. पूर्वोत्तरकालभाविन्योः प्रतीत्योः **पूर्वापरभावः** प्राक् पश्चाद्भावे **विरुध्यते**। कि कारण (।) **सन्निहितासन्निहितकारणत्वेन** यथाक्रम कार्यस्योत्**पादानुत्पादात्**। सन्निहितकारणत्वे च तयोर्युगपद् भावः स्यात्। अथ सन्निहितेपि कार[3]णे पूर्वैवाकारप्रतीतिरुत्पद्यते नोत्तरा। तदा पश्चादपि सा न स्यात्। किं कारण। पूर्वापरप्रतीतिकारण**सन्निधानेप्यनुत्पन्नस्योत्तराकारप्रतीतिविशेषस्यातत्कारणत्वात्**। पूर्वाकारप्रतीतिकारण नास्य कारणमित्यर्थ·। तस्मात् **तयोः** पूर्वापरभाविन्यो· प्रतीत्यो**र्भिन्नाखिलकारणत्वं**। भिन्नमखिल कारणन्तयोरिति विग्रह.।

स्यान्मत (।) तयो[4]रकारप्रतीत्यो· शब्द एवैकः कारण केवल सहकारिसन्निधानक्रमादुत्पत्तिक्रम इति (।)

अत आह। तत्रेत्यादि। **तत्र** तस्मिन् पूर्वोत्तराकारप्रतीत्युत्पत्तिकाले। **एकस्य** कारणस्य स्वरूपेणा**भेदेपि** प्रतीत्योर्युगपद् भाव एव स्यात्। किं कारण (।)

तस्यैकस्य **शक्तस्य** कारणस्य सहकार्य**प्रतीक्षणात्**। ततश्च **युक्तिविरुद्धं पूर्वापरयोः प्रतीत्योरेक[5]विषयत्वं**।

एतेन च सर्वेणोत्तराकारप्रतीते पूर्वाकारप्रतीत्यभिन्नविषयत्वे साध्येनुमान-बाधितत्व प्रतिज्ञाया उक्त। अनुमानन्त्वीदृश। यत् क्रमभावि तन्नैकविषय। यथा क्रमेण भवच्चक्षु श्रोत्रविज्ञान (।) क्रमभाविन्यौ च पूर्वोत्तरे अकारप्रतीती। एकविषयत्वमक्रमभावित्वेन व्याप्तन्तद्विरुद्ध च क्रमभावित्वमिति व्यापकविरु-द्धमेव।

नन्व[6]त्र प्रत्यक्षप्रत्यभिज्ञाबाधितत्वात् प्रतिज्ञाया अनुमानस्योत्थानमेव नास्तीति चेत् (।)

न। स एवायमिति ज्ञानस्य पूर्वापरकालसम्बन्धिविषयत्वेन भेदविषय-त्वात्। अन्यदेव हि पूर्वकालसम्बन्धित्वमन्यदेव चापरकालसम्बन्धित्व। अन्यथा पूर्वकालसम्बन्धित्वाद्वाऽपरकालसम्बन्धित्वस्याभेदेधुना भावाद् भावस्य प्रतिभासो न स्यात्। स एवेति च[7] ज्ञानस्योत्पत्ति स्यात् (।) न स एवायमिति। अपर- 176b
कालसम्बन्धित्वाद्वा पूर्वकालसम्बन्धित्वस्याभेदे पूर्वमस्य प्रतिभासो न स्याद् (।) अयमेवेति च ज्ञानस्योत्पत्ति स्यात् (।) न स एवायमिति।

तस्माद् यत्पूर्वकालसम्बन्धित्वन्तदपरकालसम्बन्धित्वन्न भवति। यच्चापर-कालसम्बन्धित्वन्तत्पूर्वकालसम्बन्धित्व न भवतीति पूर्वापरकालसम्बन्धिविषयत्वेन भेदविषयत्वात् क[1]थम्प्रत्यभिज्ञात प्रतिज्ञाबाधा।

उम्बेक स्वाह। "यदि स एवायमित्येकानुभवस्तथाप्ययमतीतज्ञान-कर्मताऽपरोक्षते एकाधिकरणे गृह्णन् सम्वेद्यते। अथापि प्रत्ययद्वयमिद ग्रहण-स्मरणरूप। तथापि घटस्मरणपटग्रहणयोर्निरन्तरोत्पन्नयोर्विलक्षणमिदम्परस्पर-विषयत्वेन प्रतिभासनात्। अपरोक्ष एव ह्यर्थोतीतज्ञानविशिष्टत[2]या स्मृतौ प्रतिभासते। अतीतज्ञानविषयश्चापरोक्षतया प्रत्यक्षे। तदह स्मराम्येतदिति प्रतिभासनात्। तस्मादनिमिषि(त)दृष्टे. पुरुषस्य यदुत्पत्तिविनाशरहितानुवृत्ता-वसाय स एव बाधक क्षणभङ्गसाधकस्यानुमानस्ये"ति।

तदयुक्तम् (।) उत्तरोत्तरप्रत्यक्षाणा यथाक्रममुत्तरोत्तरवस्त्ववस्थाभेदविष-यत्वेन स एवायमिति तत्त्वारोप[3]स्य भ्रान्तत्वात्। तथा हि प्रथमदर्शिन. प्रत्यक्षे यथाऽपरोक्षावस्था प्रतिभासते नातीतज्ञानविषयावस्था। तथा भूयो दर्शिनोपि। इदानीन्तनेन च रूपेण वस्त्ववस्थितन्न प्राक्तनेन। अवस्थिते च रूपे प्राक्तनरूप-स्यानवस्थानमेव विनाश.। यथा वृद्धावस्थायाम्बालरूपस्य प्राक्तनञ्च रूप-मतीतज्ञानकर्म। इदानीन्तन च रूपम[4]परोक्षमथ च बालाद्यवस्थाया दृष्ट

पुरुषो वृद्धाद्यवस्थाया प्रत्यभिज्ञायत इति कथमतीतज्ञानकर्मताऽपरोक्षते एकाधिकरणे प्रतिभासेते। कथ वाऽपरोक्ष एवार्थोतीतज्ञानविशिष्टतया स्मृतौ प्रतिभासत इत्याद्युच्यते।

यत्राप्यनिमिषदृष्टेश्चिरतरकाल पश्यतोनुवृत्तावसायस्तत्रापीदानीन्तनप्रत्यक्षज्ञानसम्बन्धेनार्थ[6]स्यापरोक्षतोत्पद्यते (।) अतीतज्ञानाभावेनातीतज्ञानकर्म्मतायाश्चेदानीमभाव एव विनाश इति कथमुच्यते (।) उत्पत्तिविनाशरहितानुवृत्तावसाय एव बाधक. क्षणिकत्वानुमानस्येति।

यदप्युच्यते (।) य. प्रतिक्षणमन्यत्वम्वदति तस्य चायम्बाधः प्रत्यभिज्ञानमात्रेणानन्यत्त्वे तु विनष्टस्यापि तत्त्वावगमात्। मृतप्रत्यभिज्ञायामि[6]वेति (।)

तदपि निरस्त। अनन्यत्वस्यैवाभावात्। नापि विनष्टाविनष्टयोरनन्यत्व विरोधात्। न च तत्त्वावगमान्यथानुपपत्यानन्यत्व सादृश्येनापि तत्त्वावगमस्य सम्भवात्। स इत्यङ्शश्च न प्रत्यक्षोऽसन्निहितविषयत्वात्। स्मरणरूपत्वे चास्य न पूर्वदृष्टार्थग्राहित्व स्पष्टप्रतिभासाभावात्। दृष्टार्थाध्यवसायकत्वेन
177a तु स्मृति[7]रूपत्वे भ्रान्तत्व (।) स्व(।)कारभेदेन दृष्टार्थाध्यवसायात्। अयमिति चाशः प्रत्यक्ष इष्यते (।) स्मरणप्रत्यक्षयोश्चैकत्वम्विरुध्यते। तस्मात् पूर्वविज्ञानविषयत्वरहिते पुरोवस्थितेर्थे सादृश्येन पूर्वज्ञानविषयत्वमारोप्य स एवायमिति मानस ज्ञान गृह्णाति। आरोपबलेन चातीतज्ञानकर्मताऽपरोक्षते एकाधिकरणे प्रतिभासेते। मरीचिकाया जलप्रत्यभि[1]ज्ञान इव। आरोपाभावे त्वेते भिन्नाधिकरणे एव प्रतिभासेते। जलस्मरणमरीचिकाग्रहणयोरिव।

तस्मात् स्थितमेतद् (।) भ्रान्तत्वादप्रत्यक्षत्वाच्च न प्रत्यभिज्ञात· क्षणिकत्वानुमानबाधेति। तेन पूर्वोत्तरे अकारप्रतीती भिन्नविषये एव। तथा द्रुतमध्यबिलम्बितानाङ्गकारादिप्रतिपत्तीना भिन्नविषयत्व। द्रुतादिभेदभिन्नगकारालम्बनत्वा[2]त्। गकार एव द्रुतो गकार एव विलम्बित इति गकारैकत्वप्रतीतिस्तु सादृश्यनिमित्तैव।

तेन यदुच्यते।

"न हि द्रुतादिभेदेपि निष्पन्ना सप्रतीयते।
गव्यक्त्यन्तरविच्छिन्ना गव्यक्तिरपरा स्फुटा।
तेनैकत्वेन वर्ण्णस्य बुद्धिरेकोपजायते।
विशेषबुद्धिसद्भावो भवेद् व्यञ्जकभेदत"इति (।)[1]

[1] Kumārila

भावभेदेपि। नामसाम्याद् एकविषयत्वमप्ययुक्तं। घटादिष्वपि प्रसंगात्। तत्र दृष्टविरोधादसाधनत्वमिति चेद् (।) इहापि विरोधाभावः केन सिद्धः। यावत् तथाभिधेयतार्थाभेदेन व्याप्तो न[7] साध्यते तावत् सन्दिग्धो व्यतिरेकः। प्रति- 35b

---

तदपास्त। यतो ध्वनिविशेष एव वर्ण्ण उच्यते। तेन द्रुतो[3]च्चारिता ध्वनिविशेषा द्रुता गव्यक्तिरुच्यते। मध्योच्चारिता मध्यगव्यक्ति (।) विलम्बितोच्चारिता ध्वनिविशेषा विलम्विता गव्यक्ति (।) न तु व्यञ्जेकेभ्यो ध्वनिभ्योन्यो गकार प्रतिभासते (।) गकारो गकार इति तेषु नामसाम्यमेव केवल प्रतीयते। तथा ह्रस्वदीर्घप्लुतादिषु नैकाकार·। यतो ध्वनिविशेषा एव मात्राकाल प्रयुज्यमाना ह्रस्वोका[4]रो भवति। तथापरे ध्वनिविशेषा द्विमात्राकाल प्रयुज्यमाना दीर्घ आकारो भवति (।) त्रिमात्राकाल प्रयुज्यमाना ध्वनिविशेषा प्लुतो भवति। तेन ह्रस्वदीघ्रप्लुताना स्वभावभेद एव प्रतिभासते। न त्वकारोऽभिन्नस्तेषु प्रतिभासते। अकार एव तु मात्रादिकालमुच्चार्यमाणो यथाक्रम ह्रस्वदीर्घप्लुता प्रतीयन्त इति शब्दमात्रमेव[5] केवल। तेन यदुच्यते।

"स्वतो ह्रस्वादिभेदस्तु नित्यवादे विरुध्यते।
सर्वदा यस्य सद्भाव स कथ मात्रिक स्वय।
तस्मादुच्चारणन्तस्य मात्राकाल प्रतीयता।
द्विमात्रम्वा त्रिमात्रम्वा न शब्दो मात्रिक स्वयमि"ति[1] (।)

तदपि निरस्त। ह्रस्वदीर्घप्लुतेष्वकारोकार इत्यनुयायिनोर्ज्ञानाभिधानयोरप्रवृत्ते·। अथापि स्यात् (।) पूर्वोत्तरकाल[6]भाविन्यो प्रतीत्योर्नामसाम्यादेकविषयत्वमिति (।)

अत आह। **प्रतीत्यादि**। पूर्वोत्तरयोरकारप्रतीत्यो· प्रतिभासभेद· पूर्वोत्तररूपतया। स्वभावभेदो द्रुतमध्यविलम्वितादिभेदेन। तस्मिन् **प्रतीतिप्रतिभासस्वभावभेदेपि**। अकारप्रतीतिरकारप्रतीतिरित्येव **नामसाम्यादेकविषयत्वमयुक्तं**। कि कारण (।) **घटादिष्वपि[7] प्रसङ्गात्**। या पूर्वा घटप्रतीतिर्या च पश्चाद् अन्यघटप्रतीतिस्तयोरपि घटप्रतीतिर्घटप्रतीतिरिति नामसाम्यादेकविषयत्व स्यात् (।) तथा चैको घट. सर्वत्र प्राप्नोति। तत्र घटादावेकत्वसाधने दृष्टविरोधो घटादीनामनेकत्वस्य दृष्टत्वात्। तस्मात् तत्रा**साधनमेकत्वस्येति चेत्। इहापि** वर्ण्णेष्वप्येकत्वसाधने **दृष्टविरोधाभावः केन** प्रमाणेन **सिद्धः**। अत्रापि क[1]रणाना प्रतिपुरुषं भेदेन भेद सिद्ध एव (।) लूनपुनर्जातेषु केशेष्विव सादृश्यादेकत्वाध्यवसाय इति यावत्। 177b

---

[1] Śloka-Sphotavāda 50,51

करणभेदं च भिन्नस्वभावः शब्दः श्रुतौ निविशमानो यदैकः साध्यते किन्न घटादयः। तत्रापि शक्यमेवं व्यञ्जकभेदात् प्रतिभासभेद इति प्रत्यवस्थातुं (।)

करणानां समग्राणां व्यापारादुपलब्धितः ॥
नियमेन च कार्यत्वं व्यञ्जके तदसम्भवात्। (२६६)

न हि कदाचिदव्यापृतेषु करणेषु शब्दानुपलब्धिर्न चावश्यं व्यञ्जकव्यापारो र्थ[1]मुपलंभयति (।) क्वचित् प्रकासे (?शे)पि घटाद्यनुपलब्धेः (।) सेयं नियमेनोपलब्धिस्तद्व्यापाराच्छब्दस्य तदुद्भवे स्यादकर्त्तुर्व्यापारेपि तत्सिद्ध्ययोगात् (।)

नामसाम्यादित्यय हेतुरनैकान्तिक इत्याह। **यावदित्यादि**। **तथाभिधेयतेति** अकारप्रतीत्ये (?ति) रकारप्रतीतिरित्येव नामसाम्येनाभिधेयता। **अर्थाभेदेन** विषयैकत्वेन **व्याप्त्या न साध्यते तावत् सन्दिग्धो व्यतिरेकः**। नामसाम्य च स्या[2]द् भेदश्चेति। किञ्च। **प्रतिकरणभेदं** पुरुषभेदेन करणभेद प्रति **भिन्नस्वभावः शब्दः श्रुतौ** श्रोत्रविज्ञाने **निविशमान.** समारोहन् **यदैकः साध्यते किन्न** घटादयोप्येकरूपास्साध्यन्ते। तेपि साध्यन्ता। विशेषोपि वा वाच्य ।

एकत्वेपि शब्दस्य व्यञ्जकभेदात् प्रतिभासभेद इति चेदाह। **तत्रापी**त्यादि। **तत्रापि** भिन्ने घटादौ **शक्यमेवं व्यञ्जकभे[3]दात् प्रतिभासभेद इति प्रत्यवस्थातुं** (।) (२६६)

किञ्च (।) **कारणानां समग्राणां व्यापारात्** परिस्पन्दादिलक्षणान्नियमेन शब्दस्यैव (उप) **लब्धितः** कारणात् **कार्यत्वम्**प्राप्त। कि कारण (।) **व्यञ्जके** हेतौ **तदसम्भवात्**। नियमेन व्यङ्ग्यस्योपलम्भासम्भवात्।

न हीत्यादिना व्याचष्टे। **व्यापृतेषु करणेषु** न हि **कदाचिच्छब्दानुपलब्धिः** किन्तूपलब्धिरेव। **न चावश्यं व्यञ्जकव्यापारो[4]र्थमुपलम्भयति** ग्राहयति। कि कारण। **क्वचिद्** घटादिशून्ये देशे **प्रकाशे** प्रदीपादिलक्षणे सत्यपि **घटाद्यनुपलब्धेः**। तस्मादविकलविज्ञानोत्पादसहकारिकारणस्य पुस । **सेयं** शब्दस्य तद्व्यापारात् कारणव्यापारान्नियमेनोपलब्धिस्तदुद्भवे। करणव्यापाराच्छब्दस्योत्पत्तौ सत्या **स्यात्**। ततश्च जन्य एव शब्दो न व्यङ्ग्य·।

ननु पूर्वं जनन[5]मात्रेण कारकं ज्ञानजननयोग्यत्वेनोत्पादकन्तु व्यञ्जकमेवेत्युक्त। तेन तालवादीना व्यञ्जकत्वमेव युक्त।

नैष दोषो यत· (।) कार्यमात्रमभिप्रेत्य जननमात्रेण कारकं (।) ज्ञानजननयोग्यत्वेन तु व्यञ्जक इत्युक्तं। न तु दृश्यकार्यापेक्षया। तथा ह्यविकलसहकारिकारणस्य पुंसः प्रदीपादिजनको नियमेन प्रदीपादेरुपलम्भक· कार[6]को न व्यञ्जक इत्यदोषः।

व्यापिनित्यत्वादुपलंभ इति चेत् (।) क इदानीं घटादिषु समाश्वासः। तेषान्तथाऽनिष्टेरिति चेत् (।) शब्दः किमिष्टः। तत्समानधर्मा (।) न चास्य कश्चिदतिशय इत्युक्तं। प्रतिषिद्धे च व्यापिनित्यते।

घटादीनां व्यञ्जकान्तरसं[2]भवाददोषः। प्रकासो (?शो) ह्येषां व्यञ्जकः सिद्धः (।) कुलालादीनां व्यंजकत्वे तादृशा एव स्फुरंति (अति) शेरते च ततो व्यञ्जकातिशयात् कारका एव उपकारकस्य गत्यन्तराभावात्।

तदेतत् शब्देष्वपि तुल्यं। तत्रापीन्द्रिययोग्यदेशतादिभ्यः करणानामतिशयात् (।) घटादिकारकधर्मस्य च करणेषु दृष्टेः। तस्यैव प्रदीपादेर्विषयान्तरस्य[3] च

अथ पुन करण शब्दस्याकर्त्तृ। तस्याकर्तुः करणस्य व्यापारेण तत्सिद्ध्ययोगात्। शब्दस्य सिद्ध्ययोगात्। व्यापिन शब्दा नित्याश्च। ततो व्यापिनित्यत्वाच्छब्दाना। व्यञ्जकस्य करणस्य व्यापारात् सर्वत्रोपलब्धि। घटादयस्तु न व्यापिनो नापि नित्या। तेन ते व्यञ्जकव्यापारेण नावश्यमुपलभ्यन्त इति।

य[7]द्येव क इदानीं घटादिषु समाश्वासः। निश्चय.। यथा ते न नित्या नापि 178a
व्यापिन इति। यावता तेपि नित्या व्यापिनश्च भवन्तु। कथ सर्वदा नोपलभ्यन्त इति चेत्। एतच्छब्देष्वपि तुल्य। यत्तत्र प्रतिविधान तद् घटादिष्वपि भविष्यति। तेषां घटादीनान्तथा व्यापिनित्यत्वेनानिष्टेरिति चेत्। शब्दो व्यापिनित्यत्वेन किमिष्टः (।) कस्मादिष्टस्तत्समानधर्मा।[1] घटादिसमानधर्मा। प्रतिषिद्धे च व्यापिनित्यत्वे प्रागिति यत्किञ्चिदेतत्।

घटादीनामित्यादि पर। कारकव्यतिरेकेण व्यञ्जकान्तरसद्भावाददोषः। शब्देन तुल्यत्वप्रसङ्गदोषो नास्ति। व्यञ्जकान्तरमेव दर्शयन्नाह। प्रकाशो ह्येत्यादि। प्रकाशो ह्येषां घटादीना व्यञ्जको लोके सिद्धो न कुलालादय। कुलालादीनां व्यञ्जकत्वे। ते कुलालादय[2]स्तादृशा एव स्यु (।) यथा प्रदीपादयो न नियमेन घटमुपलम्भयन्ति। क्वचित् प्रकाशेपि घटस्याभावात्। तथा कुलालादयोपि भवेयु (।) न चैवम् (।) अतिशेरते च कुलालादय। कुलालादिव्यापारे सर्वदा घटादेर्भावात्। ततो व्यञ्जकातिशयात्। व्यञ्जकाद् भेदेन वृत्ते। कारका एव कुलालादय। कि कारणम् (।) उपकारकस्य गत्यन्तराभावात्। कारक[3]व्यञ्जकत्वव्यतिरेकेण प्रकारान्तराभावात्। तत्र व्यञ्जकत्वे निषिद्धे पारिशेष्यात् कारकत्व कुलालादीनां (।) नैव शब्दस्य करणमुक्त्वान्यद् व्यञ्जकान्तर सिद्ध येन करणमेव शब्दस्य कारक कल्प्येत। तस्माद् घटादिवैलक्षण्याच्छब्दो व्यङ्ग्य एव।

तदित्यादि सिद्धान्तवादी। तदेतद् व्यञ्जकान्तरसम्भवन शब्देपि तुल्यं।

कस्यचिद् व्यञ्जकान्तराभावात्। तत्कारणानि तेषां व्यञ्जकानि स्युः। तस्मान्न व्यक्तिः शब्दस्य।

भवन्ती वा करणेभ्योतिशयवत्ता वा शब्दस्य व्यक्तिः(।) आवरणविगमो विज्ञानं वा गत्यन्तराभावात्। तत्र नातिशयोत्पत्तिरनित्यताप्रसंगात् (।) तस्याः पूर्वापररूपहान्युपजननलक्षणत्वाद् (।) अथ (--)

तद्रूपावरणानां च व्यक्तिस्ते विगमा[4] यदि ॥

यस्मात् **तत्रापि** शब्दे **इन्द्रिययोग्यदे[4]शतादिभ्यः** श्रोत्रेन्द्रियाच्छ्रोत्रयोग्यदेशावस्थानात्। आदिशब्दात् मनस्काराच्च। **करणानामतिशयात्**। अतिशय एव कथमिति चेदाह। **घटादी**त्यादि। ह्यर्थे चशब्द। **घटादेर्ये कारकाः** कुलालादय समग्रास्तेषा यो **धर्मो** नियमेन स्वकार्यारम्भकत्वन्तस्य **करणेषु दृष्टेः**। तान्यपि हि व्यापृतानि शब्दं नियमेन जनयन्ति। तस्मात् तान्यपि कुलालादि[5]वत् कारकाण्येव।

यदि च शब्दस्य व्यञ्जकान्तराभावात् करणानि व्यञ्जकानीष्यन्ते। तदा **तस्यैव** व्यञ्जकस्य **प्रदीपादेर्विषयान्तरस्य च कस्यचिदिति** रसादेर्व्यञ्जकान्तरम्प्रदीपादिर्नास्ति। ततो **व्यञ्जकान्ताराभावात्। तत्कारणानि** प्रदीपादिकारणानि **चैषां** प्रदीपादीना **व्यञ्जकानि स्युः**।

यत एवन्तस्मान्न **व्यक्तिः शब्दस्य** करणेभ्य किन्तूत्पत्तिरेव। **भवन्ती[6] वा करणेभ्यः** सकाशाद् व्यक्तिस्त्रिधा भवेत्। (१) पूर्वावस्थात्यागेन**अतिशयवत्ता वा शब्दस्य व्यक्तिर्भ**वेत्। (२) उपलम्भा**वरणविगमो वा**। (३) शब्दालम्बन (वि)**ज्ञानम्**वा व्यक्ति। प्रकारत्रयव्यतिरेकेण **गत्यन्तराभावात्**।

(१) **तत्र नातिशयोत्पत्तिः** शब्दस्य व्यक्तिर**नित्यताप्रसङ्गात्**। भवत्वति-
178b शयोत्पत्तिर[7]नित्यत्वन्तु कथमिति चेदाह। **तस्या** अतिशयोत्पत्ते **पूर्व**रूपस्य या **हानिरपर**स्य पाश्चात्यस्य रूपस्य य(द्) **उपजननं** तल्ल**क्षणत्वात्**।

(२) द्वितीयपक्षमाह। **अथे**त्यादि। **तस्य** शब्दस्य यज्जनक **रूपन्तस्योपलम्भप्रतिघातीनि** स्तिमितवायवीयावयवसयोगरूपाण्या**वरणानि** (।) **तेषां विगमः** प्रयत्नप्रेरितेन वायुना वियोग। स **यदि** श[1]ब्दस्य **व्यक्तिस्ते** तव मी मा स क स्य मता। तदुक्त।

"प्रयत्नाभिहतो वायु कोष्ठ्यो यातीत्यसंशय।
स सयोगविभागौ च ताल्वादेरनुवर्त्तते॥
वेगवत्वाच्च सोवश्यं यावद्वेगं प्रतिष्ठते।
तस्यात्मावयवानाञ्च स्तिमितेन च वायुना।
सयोगाश्च वियोगाश्च जायन्ते गमनाद् ध्रुवमि"ति॥ (श्लो० शब्द १२२-२४)

अभावे करणग्रामसामर्थ्यं किं न तद्भवेत्। (२६७)

न ह्यावरणस्यांकिंचित्कराणि करणानि समर्थानि नाम। विगमश्चाभावो न चाभावः कार्यं इति निवेदितमेतत्। नापि शब्दस्य नित्यस्य किंचिदावरण(म)-सामर्थ्यादित्युक्तं। तस्मान्नावरणे करणोपक्षेपः (।) नाप्येषामसामर्थ्यं तद्व्यापाराभावे शब्दानुपलब्धेः (।) अतो[5] युक्तमेते यच्छब्दान् कुर्युः (।)

अन्यथा।

शब्दाविशेषादन्येषामपि व्यक्तिः प्रसज्यत ॥
तथाभ्युपगमे सर्व्वकारणानां निरर्थता। (२६८)

सा व्यक्ति कथ क्रियते। यस्मादावरणविगमोऽभावस्तस्मिन्नभावे कथ-चिदप्य[2]कार्ये **करणग्रामस्य** करणसङ्घातस्य **सामर्थ्यं किम्न तद् भवेत्** (।) नैवेति यावत्।

न ह्रीत्यादिना व्याचष्टे। एतदाह (।) **आवरणस्वरूपे** निष्पन्नेऽ**किंचित्कराण्येव करणानि** न हि **समर्थानि** भवन्ति। आवरणविगमेपि न तेषा सामर्थ्यं। यस्माद् **विगमश्चाभावो न चाभावः कार्यं इति निवेदितमेतत् सामर्थ्यचिन्तायां।**

अभ्युपगम्य चैतदुक्त। तदेव ना[3]स्तीत्याह। **नापीत्यादि। न शब्दस्य नित्यस्यानाधेयातिशयत्वात् किञ्चिदावरणमस्ति** येनावरणविगमो व्यक्तिः स्यात्। किं कारण (।) तस्यावरणस्य नित्यवस्तुन्य**सामर्थ्यादित्यप्युक्तं।**

यत एवन्त**स्मान्नावरणे करणानामुपक्षेपः**। करणान्यावरणविगम शब्दस्य कुर्वन्तीत्येतन्नोपन्यसनीयमित्यर्थ.।

नाप्येवं कारणाना शब्दप्रत्य**सामर्थ्यमेव**। कि कार[4]ण (।) **तद्व्यापाराभावे** करणाना व्यापाराभावे **शब्दानुपलब्धेः** (।) **अतो युक्तमेते** करणव्यापारा **यच्छब्दान् कुर्युः** (।)

अन्यथा यदि करणानि न कारकाणि किन्तु व्यञ्जकान्येव। तदा **शब्दावि-शेषादन्येषामपि** घटादीना **व्यक्तिः** कुलालादिभ्य **प्रसज्यते।**

अथ पुनस्तेपि घटादयो व्यज्यन्त एव कुलालादिभिरितीष्यते। तदा **तथा-भ्युपगमे सर्वकारणानाम्निर[5]र्थता।**

तथा हि (।) व्यङ्ग्ये वस्तुन्यतिशयस्य कारको वाऽवरणाभावस्य कारको वा ज्ञानस्य वा कारको व्यञ्जक स्यात्। अतिशयादेर्व्यक्तिस्वरूपस्य चाकार्य-त्वात्। सर्वेषा व्यक्तिकारकाणा स्वरूपकारकाणा च निरर्थता।

यदीत्यादिना व्याख्यान। **यदि** शब्दस्य **करणानि व्यञ्जकानि** कीदृशानि

यदि सर्वकारणसमानधर्माण्यपि कारणादिव्यञ्जकानि न किंचिदिदानीं कार्यं स्यात्। न चैतद् युक्तं वस्तुनोनाधेयविशेषत्वात्। आवरणाभावस्याकार्यत्वाद् वस्तुवदेव तज्ज्ञानस्य सिद्धत्वात्। ज्ञानंप्रति कारकत्वे कस्यचित् तथाभूता[6]नामन्येषामपि तथाभावप्रसंगेन सर्व्वस्य कार्यं(ता) प्रसंगात्।

तस्मादयं कारकाभिमतोर्थकलापो व्यक्तौ न क्रियायामिति व्यर्थ एव स्यात्। तथा चेदमनुपकार्योपकारकमनीहं जगत् स्यात्।

शब्दनित्यत्वे च।

(।) **सर्वकारणसमानधर्माण्यपि** सर्वे कारणाना समाना धर्मा[6] येषा करणानामिति विग्रह। तदा **न किञ्चिद्** घटादिकमपी**दानीं** कस्यचित् कुलालादे· **कार्यं स्याच्छब्देनाविशेषात्।** सर्वस्य व्यङ्ग्यत्वमिष्टमिति चेत् (।) **न चैतद्** युक्त। कि कारण (।) सर्वकारकाणा व्यञ्जकत्वेनाभिमतानामानर्थक्यप्रसङ्गात्। तथाहि व्यञ्जकाना त्रयो विकल्पा। व्यङ्ग्ये वस्तुन्यतिशयस्य वाऽवरणाभावस्य वा
179a ज्ञानस्य वा करणाद् व्यञ्जक स्या[7]दिति।

न तावद् व्यङ्ग्यस्यातिशयकरणाद् व्यञ्जक.। कि कारणम् (।) **वस्तुनो**वस्थितरूपस्य**ानाधेयातिशयत्वात्।** नाप्यावरणविगमकरणात्। **आवरणाभावस्याकार्यत्वात्।** नापि ज्ञानकरणाद् व्यञ्जक। कि कारण। **वस्तुवदेव** तद्विषयस्यापि **ज्ञानस्य** सत्कार्यवादिदर्शने **सिद्धत्वात्।** अथासदेव ज्ञान क्रियते। तदा **ज्ञानंप्रति कारकत्वे कस्यचिद्**विष्यमाणे। **तथाभूतानां** ज्ञानस्य कार[1]कैस्तुल्यधर्माणा**मन्येषामपि** कुलालादीनान्**तथाभावप्रसंगेन**। घटादीन् प्रति कारकत्वप्रसगेन **सर्वस्य** वस्तुन **कार्यताप्रसंगात्।** विशेषो वा वाच्यो येन ज्ञान प्रति कारकत्व न घटादीन् प्रति। न चान्यो व्यक्ते प्रकार सम्भवति।

तस्मादयं कारकाभिमतोर्थकलापो घटादे कस्यचिदपि न **व्यक्ता**वुपयुज्यते। वस्तुनो नाधेयविशेषत्वादिना व्य[2]क्तेर्निषिद्धत्वात्। **नापि क्रियायामु**पयुज्यते। कार्यकत्वानभ्युपगमा**दिति व्यर्थ एव स्यात्।**

तथा चेति कारकाणा वैकल्ये सति। **इदं जगन्निरीहं** निर्व्यापार **स्यात्।** किं भूतम् (।) **अनुपकार्योपकारकं**। न विद्यते उपकार्यमुपकारक च यस्मिन्निति विग्रह·।

किञ्च (।) **शब्दनित्यत्वे** साध्ये (।) **साधनं प्रत्यभिज्ञानम**प्रयोगादि **यन्मत**मिष्ट। यथा नित्य· शब्द एकत्वेन प्रत्य[3]भिज्ञायमानत्वात्। तदुक्त (।) सख्याभावात्। अष्टकृत्वो गोशब्द उच्चरित इति हि वदन्ति। नाष्टौ गोशब्दा इत्यनेनावगम्यते

साधनं प्रत्यभिज्ञानं सत्प्रयोगादि यन्मतं ॥
अनुदाहरणं सर्व्वभावानां क्षणभङ्गतः । (२६९)

क्षणभंगिनो हि सर्वे भावा विनाशस्याकारणत्वादित्युक्तं । वक्ष्यते चोत्पत्तिमंतश्च परतः । सत्ताया आकस्मिकत्वायोगात् । तन्नेवं प्रत्यभिज्ञानं सत्प्रयोगादिकं क्वचिदन्वेति (।) स्थिरैकरूपे परापरस्वभावपरावृत्तिष्वेव दीपादिषु दृष्ट- 36a

---

प्रत्यभिजानन्तीति । सत प्रयोगात् । यत् प्रयुज्यते तत् प्राक् सत् । यथा वास्यादिच्छिदाया । प्रयुज्यते च शब्दोर्थप्रतिपादने तस्मात्सोपि प्रयोगात् प्राक् सन्निति । आदिशब्दात् परार्थमुच्चार्यमाणत्वादित्यादिपरिग्रह । तदुक्त (।) **नित्यस्तु स्या[4]द्दर्शनस्य परार्थत्वात् ।** दर्शनमुच्चारण (।) तत्परार्थमर्थ प्रत्याययितु । उच्चारितमात्र एव विनष्टे शब्दे । न ततोर्थम्प्रत्याययितु शक्नुयादतो न परार्थमुच्चार्येतेति । **अनुदाहरण**मित्यदृष्टान्त । न हि नित्य किंचिदस्ति यत्रैतत्साधनम्वर्त्तेत । कि कारण (।) **सर्वभावानां क्षणभङ्गतः ।**

एतदेव तावत् पद विवृण्वन्नाह । **क्षणभङ्गिनो ही**त्यादि । **विनाशस्याकारणादित्युक्तं प्राक् । वक्ष्यते च** पश्चात् । विनाशद्वारेणानित्यता प्रदर्श्य **उत्पत्ति**द्वारेणापि दर्शयन्नाह । उत्पत्तीत्यादि । **परतः** कारणादुत्पत्तिमन्तश्च भावास्ततोपि न नित्य । परत उत्पद्यन्त इति कुत एतत् । **सत्ताया आकस्मिकत्वायोगात् ।** आकस्मिकत्वे देशादिनियमो न स्यादिति प्रागेवोक्त । **तदिति** तस्मात् **प्रत्यभिज्ञानं सत्प्रयोगादिकं** लिङ्ग ।[6] **स्थिरैकरूपे** वस्तुनि सपक्षभूते । **न क्वचिदन्वेति । अपरापरेणा**न्येनान्येन **स्वभावेन परावृत्तिरुत्पत्तिर्यथा प्रदीपादीनान्तेष्वेव** प्रत्यभिज्ञानादिलिङ्गम्भेदेन व्याप्तन्**दृष्टमिति विरुद्धमेव** । न चात्र दीपत्वादिसामान्यनिमित्त प्रत्यभिज्ञान सामान्यस्य पूर्वमेव निषिद्धत्वात् ।

नेत्यादि पर. । **न** विरुद्ध प्रत्यभिज्ञान (।) कि कारण । अभिन्नात् स्थिरैकरूपाज्जन्म यस्य[7] तस्या**भिन्नजन्मनः** प्रत्यभिज्ञानस्य **दीपादिषु भ्रान्त्या भावात् ।** 179b
भ्रान्ति कथमिति चेत् । **साधर्म्यविप्रलम्भात्** पूर्वोत्तरयो क्षणयोर्यत्सादृश्यन्तेन **विप्रलम्भाद्** वञ्चितत्वात् । एतत्कथयति (।) अभ्रान्त प्रत्यभिज्ञान लिगत्वेनोपात्तन्तच्च नैव प्रदीपादिषु वर्त्तते ।

अभिन्नजन्मेत्या चार्य । **केनावष्टम्भेन** केन प्रमाणेनाभिन्नजन्मप्रत्यभिज्ञान**मित्युच्यते ।** नित्यस्य सामर्थ्याभा[1]वात् । एतच्च प्रत्यक्षस्यापि प्रत्यभिज्ञानस्य दूषणन्द्रष्टव्य । प्रत्यभिज्ञायमानस्याभेदेन प्रतिभासनादिति चेत् (।) न (।) **तस्यैवाभेदस्य सर्वत्र वज्रोपलादिष्वपि पौर्वापर्येण चिन्त्यत्वात् ।** यथा

मिति विरुद्धमेव (।)

न(।)अभिन्नजन्मनः साधर्म्यविप्रलंभात्। भ्रान्त्या दीपादिषु भावाद्(।) अभिन्नजन्मेति केनावष्टम्भेनोच्यते। तस्यैवाभे[1]दस्य सर्वत्र पौर्वापर्येण चिन्त्यत्वात् (।) तथा भेदस्यापीति चेत्। तेनैव संशयोस्तु। न च संशयितात् सिद्धिः। विवेकादर्शनादेकत्वमिति चेत्। न (।) ज्ञानपौर्वापर्येण सदसत्त्वसिद्धेः। स्वभाव-विवेकसद्भावात्।

पूर्वम्बज्रादिषु स्वरूप कि पश्चादपि तदेवाहोस्विदन्यदेव केवल सादश्यादेकत्व-विभ्रम प्रदीपादिष्विवेति चिन्त्यमेतत्। यथा वज्रादिष्वभेदस्य चिन्त्यत्वन्तथा **भेदस्यापि** चि[2]न्त्यत्वा**दिति चेत्**। किम्भेद पौर्वापर्येण प्रतिभासत इत्येतदपि निरूपणीयमेव।

तेनैवेत्याचार्य। यतश्च नैकान्तेन भेदोऽभेदो वावधारयितु शक्यस्तेनैवान-**वधारणेन संशयोस्तु**। प्रत्यभिज्ञायमानेष्वर्थेषु भेदाभेदसशयो भवतु। सशयादेव प्रत्यभिज्ञायमानत्वाद् भेदनिश्चय इति चेदाह। **न च सशयितात्** संशयविषयात् प्र[3]त्यभिज्ञानलिङ्गाच्छब्दस्यैकत्व**सिद्धिः**।

पूर्वक्षणादुत्तरस्य क्षणस्य **विवेकादर्शनाद्** विवेकाप्रतिभासनात् पूर्वोत्तर-कालेषु भावस्यै**कत्वं** सिद्ध**मिति चेत्**।

नेत्यादि प्रतिवचन। तेनायमर्थो भावस्येदानीम्प्रतिभास एव क्षणप्रति-भासः। पूर्वापरकालसम्बन्धित्वेनाप्रतिभासनात्। क्षणस्य च स्वरूपेण प्रतिभास एव पूर्वादिक्षणाद् विवेकेन प्रतिभास[4]स्सु मे रु(?) भिन्नप्रतिभासवान्न त्वविना-भावेन पूर्वादिक्षणात् प्रतिभासमानात्। केवल स विवेको नावधार्यत इति। तदर्थमनुमान प्रवर्त्तते। तदाह न वज्रादिष्वविवेकस्यादर्शनमस्ति। किं कारण (।) **पौर्वापर्येण** वज्रादि**ज्ञानाना** पूर्वापरभावेन वज्रादे **सदसत्त्वसिद्धेः**। तथा हि (।) वज्राद्यालम्बनमुत्तर ज्ञान प्रागभवत् स्वकारणविशेषस्य प्रागसत्त्वं साध[5]यति। पश्चाद् भवच्च सत्त्वमित्येव ज्ञानपौर्वापर्येण वज्रादिषु सदसत्त्वसिद्धे। **विवेक-सद्भावाद्** भेदसद्भावात्।

एतदेव स्फुटयन्नाह। **यदीत्यादि**। **अपराण्युत्तरकालभावीनि ज्ञानानि प्राक्** पूर्वज्ञानकाले **सन्निहितकारणानि** स्यु **पूर्वज्ञानवज्जातान्येव स्युः** (।) न चैवं। तस्मादजातानि तु तानि ज्ञानानि प्राक्। स्वकारणस्य **वैकल्यं सूचयन्ति**। अन्यथा य[6]दि तेषां कारण प्रागपि स्यात्। तत्समर्थम्वा भवेदसमर्थम्वा। यदि

यद्यपराणि ज्ञानानि प्राक् सन्निहितकारणानि पूर्वज्ञानवद् या(?जा) तान्येव स्युः। अजातानि तु कारणवैकल्यं सूचयन्ति। समर्थस्य जननादसमर्थस्यापि पुनः सामर्थ्याप्रतिलंभात्(।) प्र[2]तिलंभे च स्थैर्ययोगात्। तदयं सत्प्रयोग इत्यपि जननमेव प्रयोक्तुः सामर्थ्यात्। स्वयं समर्थे तस्यानुपयोगात्। प्रयोग इत्यपीष्टसाधनसमर्थोत्पादनमेव (।) समानजातीयोपादानापेक्षमनपेक्षं वा वास्यादिप्रयोगवत्। कर्मादिप्रयोगवच्च कथ्यते।

यो हि मन्यते। समक्षे प्रत्यभिज्ञानं प्रत्यक्षमेव (।) ततः प्रत्यक्षादेव स्थैर्य[3]-

---

समर्थं प्रागपि जनयेत्। किं कारण (।) **समर्थस्य जननात्**। अथासमर्थम् (।) पश्चादपि न जनयेत्। कस्माद् (।) **असमर्थस्याप्य**नाधेयातिशयत्वेन **पुनः** कुतश्चित् **सामर्थ्य(।)प्रतिलम्भात्**। अथ कुतश्चित् सामर्थ्यं प्रतिलभेत। तदा सामर्थ्यस्य **प्रतिलम्भे वा स्थैर्ययोगात्**। पूर्वासमर्थस्वभावहाने[7]रन्यस्य च समर्थ- 180a
स्योत्पादात्।

तस्मात् क्रमभावीनि विज्ञानानि स्वविषयस्यापि क्रम साधयन्तीति सर्वपदार्थानाम्भेदसिद्धेरनित्यत्व (।) स एवायमिति ज्ञान तु सदृशदर्शननिमित्त।

यत एवन्त**स्मादयं सत्प्रयोग इत्यपि** योय द्वितीयो हेतुरुच्यते। तेनापि शब्दस्य **जननमेवो**च्यते। किं कारण (।) **प्रयोक्तुः** सकाशाच्छब्दस्य **सामर्थ्यात्**। अभिमत[1]कार्यकरणे शब्दस्य सामर्थ्यप्रतिलम्भादित्यर्थं। अन्यया यदि प्रयोक्तुर्व्यापारात् प्रागेव वास्यादिक शब्दो वा स्वकार्ये समर्थं स्यात्तदा **स्वयं सामर्थ्ये तस्य** प्रयोक्तुर**नुपयोगात्** पुरुषानपेक्षाणा स्वयमेव वास्यादीना प्रवृत्ति स्यात्। न च भवति। तस्मात् प्र**योग इत्यपि**। **इष्ट**स्याभिमतस्यार्थस्य च्छिदादे **साधनं** सिद्धिस्तत्र **समर्थ**स्वभावस्योत्पा**दन[2]मेव** वास्यादे **कथ्यते**। किम्भूतमुत्पादन (।) समानजातीय सदृशमुपादान पूर्वं कारणभूत क्षणमपेक्षत इति "**समानजातीयोपादानापेक्षं** वा**स्यादिप्रयोगवत्**। छिदादिषु प्रयुज्यमानाना वास्यादीना समानजातीयपूर्वक्षणापेक्षणात्। **उपादानानपेक्ष वा**। **कर्मादिप्रयोगवच्च**। आदिशब्दाद् वीणादिशब्दपरिग्रह.। न हि क्र[3]र्मादिषु प्रथम प्रयुज्यमानेषु पूर्वसदृशक्षणापेक्षास्ति।

योपि मन्यते (।) मा भूत् प्रत्यभिज्ञानमनुमान व्यभिचारात् यत् पुरोवस्थिते वस्तुनि **समक्षे प्रत्यभिज्ञानन्तत्प्रत्यक्षं** प्रमाण। **ततः प्रत्यक्षादेव** प्रमाणाद् भावाना **स्थैर्यसिद्धिरिति। तदप्युत्तरत्र निषेत्स्यामः**।

अनया दिशा स्थैर्यसाधनायोपनीतः **कुहेतुर्द्र**ष्टव्य। यस्मा**न्नैवं कश्चिद् सा[4]-**

सिद्धिरिति। तदप्युत्तरत्र निषेत्स्यामः।

दूष्यः कुहेतुरन्योपि;

नैव कश्चिद् धर्मो यः समानजाती(य)मन्वेति। सर्व्वधर्माणामेतदवस्थत्वात्। सर्वस्थैर्यप्रतिज्ञायाश्च यथाभिधानं युक्तिविरोधादन्येपि नित्यहेतवो वाच्यदोषाः।

बुद्धेरपुरुषाश्रये।
बाधाऽभ्युपेतप्रत्यक्षप्रतीतानुमितैः समं।[1](२७०)

यदि व्यक्तिर्बुद्धिस्तदानुपूर्वी वाक्यं तस्या[4] अपौरुषेयत्वप्रसाधने। बुद्धीनां पुरुषगुणत्वाभ्युपगमात्। समयोऽस्य बाध्यते।

प्रत्यक्षं खल्वे(?त्व)प्येतद् यदि ता बुद्धयः। पुरुषसंख्यातेभ्यः पुरुषगुणेभ्यो वा मनस्कारादिभ्यो भवन्तीति। न च कार्यता नामान्या भावाभावाविशेषाभ्यां।

धनधर्मोस्त स्थैर्यसाधनो यः समानजातीयं स्थिरैकस्वभाम्वस्त्वन्वेति। कस्मात् (।) **सर्वधर्माणामेतदवस्थानात्।** अपरापरस्वभावहान्युत्पादस्वभावत्वात्। **सर्वस्या. स्थैर्यप्रत्यभिज्ञायाश्च युक्तिविरोधादनुमानविरोधात्।** कथ (।) **यथाभिधानं।** यथेह शास्त्रे क्षणिकत्वसाधनमभिहितमभिधास्यते च। तथा युक्तिविरोधात् कारणा**दन्येपि** प[5]रपरिकल्पिता स्थैर्यसाधन**हेतवो वाच्यदोषाः।**

एवन्तावद् व्यक्तिक्रमो वाक्य नेति प्रक्रम्य व्यक्तिस्त्रिविधा कल्पिता। शब्दस्यातिशयोत्पादन। तदावरणविगमो (।) ज्ञान चेति। तत्र नित्यत्वाच्छब्दस्य नातिशयोत्पादन। आवरणाभावस्य चाकार्यत्वान्नाप्यावरणविगमो व्यक्तिरिति विकल्पद्वये प्रतिक्षिप्ते। ज्ञान व्यक्तिरित्यवशिष्यते।

(३) तदा च व्यक्तिक्र[6]मो वाक्य। बुद्धीनामानुपूर्वी वाक्यमापद्यते।

न चैतद् युक्तम् (।) अबुद्धिस्वभावत्वाद् वाक्यस्य। तथाप्यभ्युपगम्योच्यते। व्यक्तिक्रमस्य च वार्क्यस्यापौरुषेयत्वे साध्ये बुद्धेरेवापौरुषेयत्व साध्य स्यात्। तत्र **बुद्धेरपुरुषाश्रये** पुरुषानाश्रयणे साध्ये प्रतिज्ञाया **बाधा।** कै· (।)
180b **अभ्युपेतप्रत्यक्षप्रतीतानुमितैः सममे**ककाल अभ्युपेतेनाभ्युपगतेन[7]। प्रत्यक्षप्रतीतेनानुमितेन च। **तदानुपूर्वी** बुद्ध्यनुपूर्वी **वाक्यं**। सा च नार्थान्तर बुद्धिभ्य इति **तस्या** आनुपूर्व्या **अपौरुषेयस्वप्रसाधने**। बुद्धेरेवापौरुषेयत्व साधित स्यात्। तत्र **च समयः** सिद्धान्तोस्य मी मा स क स्य **बाध्यते**। कि कारण (।) **बुद्धीनां** स्वसिद्धान्ते **पुरुषगुणत्वेनाभ्युपगमात्।**

प्रत्यक्षबाधान्दर्शयन्नाह। **प्रत्यक्षं खल्वप्येतद् यदि ता बुद्धयो मनस्कारा[1]दिभ्यो भवन्तीति।** आदिग्रहणादिन्द्रियपरिग्रह। कीदृशेभ्यो मनस्कारादिभ्यः

स च भावः प्रत्यक्षः (।) अभावोप्यनुपलब्धिलक्षणप्रत्यक्षसामर्थ्यसिद्ध इति वक्ष्यामः। तत एव पु[5]रुषकार्यता बुद्धीनामनुमेयान्वयव्यतिरेकिलिंगत्वावस्याः (।)

आनुपूर्व्याश्च वर्णेभ्यो भेदः स्फोटेन चिन्तितः॥
कल्पनारोपिता सा स्यात् कथं वा (ऽ)पुरुषाश्रया। (२७१)

वर्णव्यतिरेकिण्यानुपूर्वी स्फोटविचारानुक्रमेणैव प्रतिविहिता (।) नापि सा वर्णस्वभावा। वर्णस्वभावस्य एतद्विकल्पानतिक्रमात्। अतद्रूपेषु तद्रूप-

---

पुरुष इति व्यवहारलाघवार्थं कृतसकेतेभ्य। एतत्स्वमतेनोक्त। **पुरुषगुणेभ्यो** वेति व्यतिक्रम्य पुरुषस्य गुणेभ्य। एतत्तु परमतेनोक्त। तस्मात् मनस्कारादिभ्य उत्पद्यमानाया बुद्धे कार्यत्व प्रत्यक्षसिद्धमिति तस्या अपौरुषेयत्वे साध्ये प्रत्य[2]क्षबाधा।

स्यान्मत (।) कार्यताया अप्रत्यक्षत्वान्न प्रत्यक्षबाधेति चेदाह। नन्वित्यादि। कारणाभिमतस्य भाव एव भाव तदभावे चाभाव इत्येतौ **भावाभावविशेषौ। ताभ्यां नान्या कार्यता** भावस्य (।) **स** यथोक्तो **भावः प्रत्यक्ष**सिद्ध। तदभावे त्वभाव कथ प्रत्यक्षसिद्ध इति चेदाह। **अभावोपि**। **अनुपलब्धिरेव लक्षण** स्वभावो यस्याभावस्येति विग्रह सोपि **प्रत्यक्ष[3]सामर्थ्यसिद्धं इत्युत्तरत्र वक्ष्यामः**। तदन्यविविक्तरूपम्भावमेव प्रतिपादयत् प्रत्यक्ष सामर्थ्यादभाव गमयतीति सामर्थ्यग्रहण कृत। यतश्च मनस्कारादिभावाभावाभ्या बुद्धिभावाभावौ। **तत एव** तद्भावभावित्वात् **पुरुषकार्यता बुद्धीनामनुमेया**। कि कारणम् (।) **अन्वयव्यतिरेकिलिंगत्वावस्याः** कार्यताया। तदनेनानुमानबाधोक्ता।

अथ स्यान्न व्यक्ति[4]क्रमो वाक्य। किन्तु वर्णानुपूर्वी वाक्यमित्यत आह। **किं चेत्यादि। वर्णेभ्यः** सकाशा**दानुपूर्व्या भेदः स्फो टे ने** ति पूर्वोक्तेन स्फोटविचारेण। अभिन्नापि प्रागेव निषिद्धा (।) भेदाभेद च मुक्त्वा वस्तुनो नान्या गतिरस्ति। तदा च व्यापिनाम्वर्णानामानुपूर्वी **कल्पनारोपिता स्यात्। कथं वा** तदानीम**पुरुषाश्रया**। पुरुषाश्रयैव स्यात्।

वर्णेत्यादि[5]ना व्याचष्टे। **वर्णेभ्य** सकाशाद् **व्यतिरेकिणी** भिन्नस्वभावा**नुपूर्वी**। पूर्वोक्तेन **स्फोटविचारानुक्रमेणैव प्रतिविहिता**।

वाक्यन्न भिन्नम्वर्णेभ्यो विद्यतेनुपलम्भनाद् (।) इत्यादिना दूषणेनानुपूर्व्यपि प्रतिक्षिप्ता।

नापि सा वर्णस्वभावा। सरो रस इति प्रतिपत्तिभेदभावप्रसङ्गात्। न चापि सा तत्त्वान्यत्त्वाभ्यामवाच्या। **वस्तुस्वभावस्यैतद्विकल्पान[6]तिक्रमात्**। तत्त्वान्यत्त्व-

समारोपप्रतिभासिन्या[6] **बुद्धेरयं विभ्रमः स्यादानुपूर्वीति। सा च कथमपौरुषेयी बुद्धिर्विठपनप्रत्युपस्थानाद्।**

(ङ) निर्हेतुको विनाशः

अपि चात्यंतिकस्य कस्यचित् स्वभावस्याभावाद् भवता ध्वनिनाऽनात्यन्तिकेन भवितव्यं। स चाहेतुकोन्यहेतुको वा। नित्यं भवेन्न च पुरुषव्यापारात् (।) तस्मात् पौरुषेयः।

कथमिदं गम्यतेऽनात्यन्तिको ध्वनिरन्यो वा भाव इति।

36b **सत्तामात्रानुबन्धित्वान्नाशस्यानित्यता ध्वनेः ॥**

न हि नाशो भावानां कुतश्चिद् भवति। तद् भावस्वभावो भवेद् भावस्यैव स्वहेतुभ्यः तद्धर्मणो भावात्।

विकल्पानतिक्रमात्। तस्मा**दतद्रूपेषु** वस्तुभूतभिन्नानुपूर्वीरहितेषु वर्णेषु **तद्रूपसमारोपप्रतिभासिन्या** आनुपूर्वीसमारोपप्रतिभासिन्या **बुद्धेरयम्विभ्रमः स्यादानुपूर्वीति। सा चानुपूर्वी कथमपौरुषेयी** पौरुषेय्येव। कि कारण (।) **बुद्धेर्विठं**
181a (?)**पनेन** व्यापारेण **प्रत्युपस्थापनात्**। सन्दर्शितत्वात्।[7]

अपि चात्यन्तिकस्य नित्यस्य **कस्यचित्स्वभावस्याभावात्। भवता** विद्यमानेन **ध्वनिना** शब्देनावश्यमनात्यन्तिकेनास्थिरेण **भवितव्यं। स च** ध्वनि**रहेतुकः** स्यात्। पुरुषव्यतिरेकेणान्यो हेतुरस्येत्यन्यहेतुको वा। तत्राहेतुकत्वे **नित्यम्भवेत्**। अन्यानपेक्षणात्। अन्यहेतुकत्वे तु **न च पुरुषव्यापाराद्** भवेत्। भवति च पुरुषव्यापारात्। **तस्मात् पौरुषे**[1]**य** इति गम्यते।

कथमित्यादि पर। **अनात्यन्तिको ध्वनिरन्यो वा** पृथिव्यादिकाभाव **इति** कथमिद गम्यते।

सत्तेत्या चार्य। **नाशस्य सत्तामात्रानुबन्धित्वात्**। कारणा**दनित्यता ध्वनेः**। सन्नित्येव कृत्वा नाशो भवति न कारणान्तरमपेक्षते। सश्च शब्द। तस्मान्न नित्य इति समुदायार्थ।

कस्मात् सत्तामात्रानुबन्धी विनाश इत्याह। **न हीत्यादि**। यस्मा**न्न**[2] **भावानां नाशो** नाम धर्मान्तर **कुतश्चिन्नाशकारणाद् भवति**।

यत एवं (।) **तदिति** तस्माद् **भावस्वभाव** एव नाशो **भवेत्**। कुत एतद् (।) **भावस्यैव स्वहेतुभ्यः** सकाशात् **तद्धर्मणो** विनाशधर्मणो **भावादुत्पत्तेः**। एकक्षणस्थितिधर्मकत्वमेव विनाशः (।) तच्च हेतुभ्य एवोत्पद्यत इति यावत्।

न च भावविशेषस्वभावस्तस्य निषेत्स्यमानत्वात् (।) तस्माद् भावमात्र-स्वभावः स्यात्। तेन शब्दोन्यो वा सत्ताभाजनः सर्व्व एव भावोऽनात्यन्तिक इति सिद्धं।

न सिद्धं (।) तस्यैव विनाशस्यापरजन्मासिद्धेः। तथा हि (।) अग्निना काष्ठं दण्डेन घट इति वि[1]नाशहेतवो भावानां दृश्यन्तेऽन्वयव्यतिरेकानुविधान हेतुत-द्वतोर्लक्षणमाहुः।

न (।) पूर्वस्य स्वरसनिरोधेऽन्यस्य विशिष्टप्रत्ययाश्रयेण विकृतस्योत्पत्तेः।

कृतकानामेव सता विनाशो नान्येषा सता। तदुक्त (।) "सदका[3]रण वन्नि-त्यमि" ति(।)

न चेत्यादि। न च भावविशेषस्य कस्यचित्स्वभावो विनाश। कि कारण (।) **तस्योत्तरत्र निषेत्स्यमानत्वात्। तस्माद् भावमात्रस्वभावः स्याद्** विनाश। सत्तामात्रस्वभाव स्यात्। **तेन** कारणेन **शब्दोन्यो वा सर्व एव भावः सत्ताभाजनः** सत्ताधार सन्निति यावत्। **अनात्यन्तिक इति सिद्ध।**

न सिद्धमिति प[4]र। कि कारण (।) **तस्यैव विनाशस्यापरजन्मासिद्धेः।** परस्माज्जन्म परजन्म। न परजन्मापरजन्म। तस्यासिद्धे। विनाशस्याहेतुकत्वा-सिद्धेरिति यावत्।

तथा ह्यग्निना काष्ठं दग्ध। **दण्डेन घटो** भग्न **इति विनाशहेतवो**ऽन्यादय काष्ठादीनाम्**भावानान्दृश्यन्ते।** तथा ह्यग्न्यादिभावे काष्ठादीना नाशस्तदभावे चानाश इ[5]त्यन्वयव्यतिरेकानुविधानं नाशस्यास्ति। एतच्च **हेतुतद्वतोर्हेतुमतो-र्लक्षणमाहुः।** तदुक्त।

"अभिघाताग्निसयोगनाशप्रत्ययसन्निधि।
विना, ससर्गिता याति विनाशो न घटादिभिरि"ति (।)[2]

नेत्यादिना प्रतिषेधति। नाग्न्यादय काष्ठादेर्विना करणाल्लोके विनाश-हेतव प्रतीयन्ते। किन्तु **पूर्वपूर्वस्य** काष्ठादिक्षण[6]स्य **स्वरसनिरोधे** स्वयमेव निरोधे सति। **अन्यस्योत्तरस्य** क्षणस्य **निकृतस्य** भस्मादि**रूपस्योत्पत्ते**रग्न्यादय काष्ठा-दीना विनाशहेतव प्रज्ञायन्ते न तु विनाशस्य करणात्। कुत पुनस्तस्य विकृत-स्योत्पत्तिरित्याह। **विशिष्टेत्यादि। विशिष्टः प्रत्ययो**ऽग्न्यादि· सहकारी **तदाश्रयेण।**

अभ्युपगम्या[7]पि ब्रूम (।) **अस्तु वाग्निः काष्ठविनाशहेतुः (।) स नाशोग्नि-** 181b

अस्तु वाग्निः काष्ठविनाशहेतुः। स नाशोग्निजन्मा किं काष्ठमेवाहोस्विदर्थान्तरं॥

अग्नेरर्थान्तरोत्पत्तौ भवेत् काष्ठस्य दर्शनं। (।२७२॥)
अविनाशात्स एवास्य विनाश इति चेत्कथं।

किमित्यर्थान्तरादर्थान्तरजन्मनि काष्ठमभूतं नाम। न[2] दृश्यते वातिप्रसंगो ह्येवं स्यात। स एवास्य विनाश इति चेत् (।) यदि स एवाग्निजन्माऽभावस्तदिदमभूतत्वान्न दृश्यत इति।

भवतु तस्येदन्नामाभाव इति तथापि। कथमन्योऽन्यस्य विनाशः (।) न हि कस्यचिदर्थस्य नामकरणमात्रेण काष्ठं न दृश्यत इति युक्तं। न चान्योऽन्यविनाशोतिप्रसंगात्। विशेषाभावात् तस्यार्थान्तरत्वेन[3] वस्तुभूतस्य तदन्येभ्यः। काष्ठे-

---

जन्मा। अग्नेर्जन्म यस्येति विग्रह। **किं काष्ठमेवाहोस्वित्**काष्ठा**दर्थान्तरन्तत्राग्ने**र्विनाशकम्(।)

हेतोस्सकाशान्नाशस्या**र्थान्तरस्योत्पत्तौ भवेत् काष्ठस्य दर्शनं**। कि कारणम् (।) **अविनाशात्**। काष्ठस्य **किमित्यर्थान्तरात्** काष्ठा**दर्थान्तरस्य** नाशस्योत्पत्तौ **जन्मनि** सति **काष्ठमभूतं** विनष्ट **नाम**।[1] नैवाभूतमिति यावत्।

यदि नामाविनष्टन्तथाप्यर्थान्तरोत्पत्या तस्य दर्शनमिति चेदाह। **न दृश्यते वेति** (।) किमिति **न दृश्यते**। दृश्यत एव। यदि त्वर्थान्तरोत्पत्यार्थान्तर विनष्ट **न दृश्यते वा**। त**दातिप्रसङ्गो ह्येवं स्यात्**। अर्थान्तरस्य यस्य कस्यचिदुत्पत्या सर्वमभूत स्यात्। न वा दृश्येत। **स एव** पदार्थोग्निजन्मा। न सर्व·। **अस्य** काष्ठस्य **विनाशो**[2] लोके विनाशरूपतया प्रतीते**रिति** यावत्।

एतदेव ग्रहणकवाक्य **यदी**त्यादिना व्याचष्टे। **यदि स एवाग्निजन्मा** काष्ठस्या**भावो** विनाश। त**दिति** तस्मा**दिदं** काष्ठम**भूतत्वाद्** विनष्टत्वा**न्न दृश्यत** इति।

भवत्वित्यादिना प्रतिषधति। **भवतु तस्याग्निजन्मनोर्थस्येदन्नाम** सज्ञा यदिद**मभाव इति। तथापि** नाममात्रेण **कथमन्यान्यस्य**[3] विनाश। **न** हि **कस्यचिदर्थस्या**ग्निजन्मनो विनाश इति **नामकरणमात्रेण काष्ठं न दृश्यत इति युक्तं।**

ननु लोकप्रतीतत्वाद्विनाश एवासौ न तस्य विनाश इति नामकरणमात्रमित्यत आह।

न चान्यः पदार्थोऽन्यस्य **विनाशोऽतिप्रसंगात्**। सर्वे पदार्था· काष्ठस्य विनाश· स्याद् (।) एतच्चानन्तरोक्तमेव स्मरयति।

ऽग्निकृतः स्वभावो विनाशो न सर्व्व इति चेत् (।) काष्ठ इति कः सम्बन्धः। आश्रयाश्रयिसम्बन्धश्चेत् (।) न (।) तस्य निषेत्स्यमानत्वात्। जन्यजनकभावश्चेदग्नेरिति किं काष्ठादेव भावात्(।)तदपेक्षत्वादुत्पत्तेरदोष इति चेद् (।) अनतिशयलाभिनः कापेक्षा। लाभे वाऽपरकाष्ठजन्म स्यात् पूर्व्वमप्रच्युति[4]कारणं तथैव दृश्येत। तत एवाग्नेः पूर्व्वविनाश इति चेत्(।) कः पूर्व्वेणास्य सम्बन्ध

एवम्मन्यते। यथा[4] सर्वपदार्थानामर्थान्तरत्वात् न काष्ठविनाशरूपतया प्रतीतिस्तथाऽग्निकृतस्याप्यर्थान्तरत्वान्न काष्ठविनाशरूपतया प्रतीति स्यात्।

स्यादेतद् (।) यद्यर्थान्तरत्वादग्निकृतस्यार्थस्य न विनाशरूपता। धूमस्यापि तर्ह्यग्निकार्यता न स्यादर्थान्तरत्वाद् घटवत्। भवति च तदर्थान्तरत्वाविशेषेऽप्यग्निकृतस्य काष्ठविनाशरूपता भवि[5]ष्यतीति (।)

अत आह। **अविशेषात्**। **तस्याग्निकृतस्य** वस्तुभूतस्य काष्ठादर्थान्तरत्वेन **तदन्येभ्यो** घटादिभ्यो **विशेषाभावात्**। कथम्विनाशरूपता निवृत्तिरूपत्वाद् विनाशस्येति भाव। धूमस्य त्वर्थान्तरत्वेऽप्यग्निकार्यत्व युक्तमेव। अर्थान्तरस्याग्निकार्यत्वेन सह विरोधाभावादिति यत्किञ्चिदेतत्।

काष्ठेग्निकृतः स्वभावो नाशो न[6] सर्व घटादिस्ततो नातिप्रसग **इति चेत्**।

काष्ठेऽयमग्निकृतो विनाश **इति** काष्ठविनाशयो **कस्सम्बन्ध.**। परस्परमनुपकार्योपकारत्वात्। नैव सम्बन्धोस्ति।

काष्ठमाश्रय आश्रयोस्यास्तीत्याश्रयी विनाश। तन **आश्रयाश्रयिसम्बन्धोस्तीति चेत्**।

नैतदेव। तस्याश्रयाश्रयिसम्बन्धस्य **निषेत्स्यमानत्वात्**।

विनाशो[7] जन्य। तस्य काष्ठ जनक। ततो नाशकाष्ठयो**र्जन्यजनकभाव-** 182a
सम्बन्धश्चेत्।

तदाग्नेरिति किं। अग्ने सकाशान्नाशो भवतीति किमुच्यते। कि कारण (।) **काष्ठादेव** तस्य नाशस्य **भावादुत्पत्ते**।

तदपेक्षादग्न्यपेक्षात् काष्ठान्नाशस्योत्**पत्तेरदोषः**। अग्निकृतो नाशो न स्यादिति यो दोष उक्त स नास्तीति **चेत्**।

वह्ने सकाशाद(न)**तिशयलाभि**[1]**नः** काष्ठस्य वह्निम्प्रति **कापेक्षा**। नैव काचित्। वह्ने सकाशात् काष्ठस्यातिशय**लाभे वाऽपरस्य** द्वितीयस्य **काष्ठ**स्यातिशयसज्ञकस्य **जन्म स्यात्**। तथा च **पूर्वकाष्ठमप्रच्युतिकारण**। नास्य प्रच्युतिकारणमस्तीति विग्रह। **तथैव** प्राग्वद् **दृश्यते**।

स्यादेतद् (।) यत एवाग्नेरतिशयवतो द्वितीयस्य काष्ठस्य जन्म। **तत एवाग्नेः**

इति स एव प्रसंगोऽपर्यवसानश्च (।)

तदवश्यं विनाशसम्बन्धयोग्यमुत्तरमतिशयं प्रत्युपकुर्वाणोग्निरपूर्व्वमेव जनयतीति पूर्व्वन्तदवस्थं दृश्येत। काष्ठविनाश इति च काष्ठाभाव उच्यते (।) **न चाभावः कार्यः तत्कारी वा कारक**[5] **एवेत्यनपेक्षणीय एवेत्युक्तं।**

स्वभावाभावस्य च ततो भेदे। ततो निवर्त्तमानस्य भावस्य स्वभाव एव समर्थितः स्यादिति कथमभूतो नाम।

तस्मान्न (।)

अन्योन्यस्य विनाशास्तु काष्ठं कस्मान्न दृश्यते ॥ (२७३)

पूर्वस्य का[2]ष्ठस्य **विनाश इति** (चेत्)।

कः पूर्वेण काष्ठेनास्य वह्निकृतस्य विनाशस्य सम्बन्ध **इति स एव प्रसंगः।** काष्ठ इति कः सम्बन्ध इत्यनन्तरमेवोक्त ।

अथाप्याश्रयाश्रयिभावादिकमाश्रीयते। तदा तस्य निषेत्स्यमानत्वादित्यादि सर्व पुनरावर्त्तते इत्यपर्यवसानश्च प्रसङ्ग स्यात्।

तदिति तस्मा**दवश्यं विनाशसम्बन्धस्य योग्यञ्च** काष्ठस्यो[3]**त्तरमतिशयं प्रत्युपकुर्वाणोग्निरपूर्वमेव** काष्ठञ्**जनयतीति पूर्वं** काष्ठन्त**दवस्थन्दृश्येत**इत्युपसहार.।

किञ्च। **काष्ठविनाश इति काष्ठाभाव उच्यते**(।)**न चाभावः कार्यः**। विधिना कार्यत्वोपगमे तस्य भावत्वप्रसङ्गात्। तस्मादभाव करोति भावन्न करोतीति। क्रियाप्रतिषेधमात्र। तथा च **तत्कारी** चाभावकारी वाकार **एव** क्रियाप्रति[4]षेधमात्रत्वा**दिति** कृत्वा काष्ठविनाशेन वह्न्यादि**रनपेक्षणीय इत्युक्तं सामान्यतद्वतोराधाराधेयचिन्ता**स्थाने।

किञ्च (।) **स्वभावाभावस्य** काष्ठादिस्वभावस्य योऽभावो नाशस्तस्य **ततः** काष्ठादिस्वभावाद् **भेदेभ्युपगम्यमाने**। ततोर्थान्तरादभावात् काष्ठादिर्भावो निवर्त्तते। **ततस्तस्मादभावन्निवर्त्तमानस्य** काष्ठादे **स्वभाव एव समर्थितः**[5] **स्यात्**। असतो निवर्त्तमानस्य सत्त्वमेव समर्थित स्या**दिति** कृत्वा **कथमग्न्यादिकृतेन** विनाशेन काष्ठादि**रभूतो नाम।**

यत एवन्त**स्मान्न अन्योन्यस्य विनाशः**। अर्थान्तरमर्थान्तरस्य न विनाश इत्यर्थं ।

अभ्युपगम्यापि ब्रूम (।) अस्त्वन्यो विनाशस्तस्मिन्नर्थान्तरे वह्निकृते **काष्ठन्तदवस्थमेवेति कस्मान्न दृश्यते**। एतदेव साधयन्नाह। **कोय**[6]**म्विरोध**।

कोऽयमर्थान्तरभावकाष्ठदर्शनयोर्विरोधः ॥

तत्परिग्रहत[6]श्चेत् न तेनानावरणं यतः ।

यदि तेनार्थान्तरेण परिगृहीतमिति का[6]ष्ठं न दृश्येत। तत्काष्ठस्यावरणमित्यापन्नं। न चैतद् युक्तम् (।) आवरणं हि दर्शनं विबध्नीयान्नाभिघातादीनि द्रव्यसामर्थ्यानि(।)सर्व्वप्रति(ब)न्धे च।

अग्निजनितस्य विनाशस्यार्थान्तरस्य यो **भावः**। यच्च **काष्ठस्य दर्शनन्तयोः**। तथा च काष्ठन्तदवस्थ दृश्येत।

ननु"योसावर्थान्तर भावो वह्निकृत स काष्ठविनाश । विनाशरूपतया प्रतीते । विनाशश्चाभावो यश्च काष्ठाभाव । स काष्ठविरोधिरूप एव क्रियते। न चायमर्थान्तरत्वाद् घटवद् विरोधिरूपतया कर्त्तुमशक्य[7] (।) न हि घटवदर्था- 182b
न्तरत्वाद् धूमोग्निकार्यो न भवति। तस्माद् यथार्थान्तरभूतोपि धूमोग्निना क्रियते, तथा विरोधिरूपो विनाश क्रियते। ययोश्च परस्परपरिहारेण विरोधस्तयोरेकभाव एवापरस्यादर्शनमिति कथमग्निकृतस्यार्थान्तरस्य विनाशसज्ञितस्य विरोधिनो भावे काष्ठस्य दर्शन स्यादित्युच्यत" इति श ङ्कर ।[1]

तदयुक्त [1] (।) यतोर्थान्तरस्याग्निकार्यत्वेन सह विरोधाभावाद् (।) धूमस्यार्थान्तरत्वेप्यग्निकार्यत्वमविरुद्धमेव। वह्निकृतस्य त्वर्थान्तरस्य भवनधर्मतया भावरूपता। यश्च भाव स कथमभावो व (।) विरोधाद् विनाशश्चाभाव इष्यते। ततोर्थान्तरभावेन विरुद्धो विनाश । न चार्थान्तरस्यापि विनाशरूपतया प्रतिभासनात्। काष्ठादिविनाशरू[2]पता। स्वरसनिरोधो हि निमित्तम्विनाशप्रतिभासे।

स्वरसनिरोधानभ्युपगमे तु कथमर्थान्तरस्यापि विनाशरूपतया प्रतिभासो भावरूपत्वादित्यादावेवोक्तं। तत्कथमुच्यते (।) विनाशाख्यस्यार्थान्तरस्य विरोधिन. कृतकत्वात् काष्ठस्यादर्शनमिति। नीरूपत्वे तु विनाशस्य स्याद् भावेन सहाय विरोध (।) किन्तु तदाप्यर्थान्तर[3]त्व हेतुजन्यत्व चास्य न स्यान्नीरूपत्वादेव। तस्मादग्निनार्थान्तरस्य करणे काष्ठन्तदवस्थ दृश्येत।

तेनाग्निकृतेनार्थान्तरेण परिग्रहतः स्वीकारात् काष्ठ न दृश्यत इति **चेत्**।

एव सति तदर्थान्तर काष्ठस्यावरणमिति प्राप्त। तच्च न युक्त (।) **यतो न तेनार्थान्तरेण काष्ठस्यावरणं** सम्भवति।

यदीत्यादिना व्याचष्टे। **तेनार्थान्तरेणाग्नि[4]ना** कृतेन। **तदित्यग्निकृतमर्थान्तर। न चैतदावरणकल्पित युक्तं**। यस्मादा**वरणं हि**। आव्रियमाणेर्थ**दर्शनम्विबध्नीयात्। नाभिघातादीनि द्रव्यसामर्थ्यानि** विबध्नीयात्। अन्धकारा-

न त्वनेनैव द्रव्यं विनाशितं स्यात्। सर्वशक्तिप्रच्यावनात् पुनस्तत्राप्यग्नाविव प्रसंगादनवस्था।

अप्रच्युतेषु वा चास्याभिघातसामर्थ्यादिषु। सता वान्येनास्य न किञ्चिन्ना-
37a **शितं।[7] यदि चाग्निसमुद्भवस्य विनाशाख्यस्यार्थस्य परिग्रहात् काष्ठं न दृष्टं॥**

विनाशस्याविनाशित्वं स्यादुत्पत्तेस्ततः पुनः॥ (२७४)
काष्ठस्य दर्शनं;

अवश्यं ह्युत्पत्तिमता विनाशेन विनष्टव्यं। तस्मिन् विनष्टे पुनः काष्ठादीना-मुन्मज्जनं स्यात्।

हन्तृघाते चैत्रापुनर्भवः (।)

वृतानां घटादीनामभिघातादिदर्शनात्। तत्र स्वदेशे परस्योत्पत्तिविबन्धोभिघात। आदिशब्दाद् गन्धरसादिपरिग्रह। अथावर[5]ण सर्वसामर्थ्य काष्ठस्य निबध्नीयात्। तदा **सर्वप्रतिबन्धे चाभ्युपगम्यमाने। न त्वनेनैवावरणेन काष्ठ-ग्नाशितं स्यान्न** वह्निना। कि कारण (।) तेनैवास्य काष्ठस्य **सर्वशक्तिप्रच्यावनात्**। तथा च सति **पुनस्तत्राप्यग्निकृतेर्थान्तरे नाशहेतावग्नाविव प्रसंगात्**। काष्ठविनाश प्रति योग्नौ दोषो विस्तरेणोक्त सोर्थान्तरेणाप्य[6]ग्निकृतेन काष्ठ-नाशे क्रियमाणे स्यात्। तथा **चानवस्था**। तेनाप्यर्थान्तरेणाग्निकृतेन नाशेना-परमर्थान्तरन्नाशाख्य कर्त्तव्यन्तेनाप्यपरमित्यनवस्था स्याद्।

अथ मा भूदेष दोष इत्यप्रच्युता एव काष्ठस्याभिघातादिसामर्थ्यादय।

तदाप्य**प्रच्युतेषु वास्य** काष्ठस्या**भिघातसामर्थ्यादिषु। सता वा** तेना**न्येना**ग्नि-
183a जनि[7]तेन काष्ठस्य **किं विनाशितं** येन तदावरणन्तथा च काष्ठ दृश्येत। **यदि चेत्यादि**। (।) **अग्नेः समुद्भवो** यस्येति विग्रह। अग्निसमुद्भूतेन **विनाशा-ख्येनार्थेन परिग्रहादित्यर्थ**। तदा **विनाशस्य विनाशित्वं स्यात्**। कि कारणम् (।) **उत्पत्तेः**। उत्पत्तिमत्वाद् विनाशोपि काष्ठवद् विनाशी स्यादिति यावत्। **ततो** विनाशविनाशात् **पुनः काष्ठस्य दर्शनं** स्यात्।

अ[1]**वश्य**मित्यादिना व्याचष्टे। **उत्पत्तिमता** सता काष्ठ**विनाशेनावश्यं विन-ष्टव्य। तस्मिन्** काष्ठनाशे **विनष्टे** सति **पुनः काष्ठादीनामुन्मज्जनं स्यात्**। प्रादुर्भावो भवेत्।

हन्तृघातेत्यादिना परमाशकते। **चैत्रस्य** यो हन्ता तस्य **हन्तृघाते** सति **यथा**। हतस्य **चैत्रस्यापुनर्भावः (न)** पुनरनुत्पत्ति। **अत्रापि** काष्ठनाशे विनष्टेप्येवं काष्ठ-स्यापुनर्भाव इ[2]ति चेत्।

यथाऽत्राप्येवमिति चेत् हन्तुर्नामरणत्वतः (।२७५)

विनाशविनाशेपि न वस्तुनः प्रत्यापत्तिः (।) न हि हन्तरि हतेपि तद्धतः प्र[1]स्युज्जीवतीति चेत् (।) न (।) हन्तुस्तद्घातहेतुत्वात्। न ब्रूमो विनाश-हेतोरग्निदण्डादेर्निवृत्तौ भावेन भवितव्यमिति। किन्तर्हि (।) भावाभावस्या-त्यन्तानुपलब्धिलक्षणस्य। तन्निवृत्तौ कान्या गतिः स्वभावस्थितेः। हन्ता हि चैत्रस्य न नाशकल्पः (।) किन्तर्हि (।) दण्डादिकल्पः। नाशकल्प ह्यस्य मरणं तन्निवृत्तौ स्यादेवास्य पुनर्भवः॥

अनन्यत्वे विनाशस्य स्यान्ना[2]शः काष्ठमेव तु (।)
तस्य सत्त्वादहेतुत्वं नातोन्या विद्यते गतिः॥ (२७६)

हन्तुरित्यादिना प्रतिविधत्ते। नेद समाधान युक्त। कि कारण (।) **हन्तुरम-रणत्वतः**। न हि हन्ता चैत्रस्य मरणस्वभाव। किन्तर्हि (।) मारयिता। ततो युक्त यत् तन्नाशे चैत्रस्यापुनर्भवन। मरणे त्वनिवृत्तेऽवश्य पुनर्भवन स्यात्।

विनाशेत्यादिना व्याचष्टे। **विनाशस्य विनाशेपि न वस्तुनः प्रत्यापत्तिर्न** पूर्वरूपगमन। यस्मान्न हि[3] **हन्तरि हतेपि तद्धतस्तेन** हन्त्रा पुरुषेण हत **प्रत्यु-ज्जीवति**। **नायम्परिहारो** युक्त। कस्माद् (।) **हन्तुः** पुरुषस्य **तद्घातहेतुत्वात्**। तस्य चैत्रस्य यन्मरणन्तद्धेतुत्वात्। न त्वसौ हन्ता मरणस्वभाव।

एतदेव स्पष्टयन्नाह। **नेत्यादि**। **नाशहेतोरग्निदण्डादेर्निवृत्तौ** सत्या-म्विनष्टेन **भावेन** पुनर्**भवितव्यमिति न ब्रूमः**। एवमभिधाने भवेदेष परि[4]हार। **किन्तर्हि** (।) वह्न्यादिना काष्ठादेर्**भावस्याभावो** य क्रियते **तस्य**। किम्भूतस्य (।) **अत्यन्तानुपलब्धिलक्षणस्य**। कर्म्मस्था च क्रियात्रोपलब्धि। तत्प्रतिषेधे-नात्यन्तानुपलब्धि सर्वसामर्थ्यविरह उच्यते। **तस्यै**वभूतस्याभावस्य **निवृत्तौ** सत्या। स्वभावावस्थिते सकाशाद् भावस्य **कान्या गतिः**। **स्वभावस्थितिरेव** गतिरिति यावत्।

हन्तरि तु विनष्टे न[5] युक्त पुनर्भवन। यस्माद्**हन्ता हि चैत्रस्य न नाशकल्पः**। **किन्तर्हि** (।) **दण्डादिकल्पः** दण्डादितुल्य नाशहेतुत्वात्। **नाशकल्प ह्यस्य** चै-त्रस्य **मरणं** (।) **तन्निवृत्तौ** तस्य नाशकल्पस्य मरणस्य निवृत्तौ **स्यादेवास्य** चैत्रस्य **पुनर्भावः**।

एवन्तावत् नाशस्यार्थान्तरत्वे दोष उक्त।

अनर्थान्तरत्वमधिकृत्याह। **अनन्यत्वेपी**त्यादि। वस्तुनो **नाशस्यानन्य-[6]त्वेपि स्यान्नाशः काष्ठमेव तु**। **तस्य** च काष्ठस्य स्वहेतोरुत्पन्नस्य **सत्वात्**। न

अनर्थान्तरभूतो विनाशः काष्ठात्। तदेव तद् भवति। तच्च प्रागेवास्तीति किमर्थ(?त्र सामर्थ्य)म्वन्ह्वादीनां। तस्मात् तदनुपकारात् तेन नापेक्षन्ते कथं चिन्नाप्यस्येवमिति सम्बन्धमर्हति। तस्योपकारनिबन्धनत्वाद् (।) अन्यथाति-प्रसंगात्।

पारंपर्येणोपकारेप्य[3]वश्यमयं. विकल्पोन्वेति (।) तत्किमुपकारोर्थान्तरमा-होश्वि(?स्वि)त् तदेवेति। तदर्थान्तरत्वेपि तस्येति पुनरुपकारत्वादिपर्यनुयोग-स्तदवस्थः। तथाऽनन्यत्त्वे। तस्मात् सतो रूपस्य तत्त्वान्यत्त्वाव्यतिक्रमात्। उप-कारोत्पादनस्य च रूपनिष्पादनलक्षणत्वात्। तदतत्क्रियाविकलो न कर्तेवेति[4]

वह्न्यादिभि. किञ्चित् कर्त्तव्यमिति तत्स्वभावस्य नाशस्याहेतुत्वं। नातस्तत्त्वा-न्यत्वविकल्पान्नाशस्य वस्तुधर्मस्य विद्यतेन्या गतिः।

अनर्थान्तर इत्यादिना व्याचष्टे। **काष्ठादनर्थान्तरभूतो** यदा **विनाशस्तदा**
183b **तदेव** काष्ठमेव तद्विनाशाख्यम्वस्तु[7] **भवति**। **तच्च** काष्ठादि। वह्न्यादिसन्निधा-नात् **प्रागेवास्तीति**। **किमत्र** काष्ठादौ विनाश्ये **सामर्थ्यम्वह्न्यादीनामिति** द्रष्टव्य। क्वचिद् दण्डादीनामिति पाठ स तु घटादीन् पुरोधाय व्याख्येय। **तस्मात् तदनुकारात्**। तत्र काष्ठादौ विनाशहेतूनामनुपकारात् **तेन** काष्ठादिना विनाशहेतवो **नापेक्ष्यन्ते कथंचित्** केनापि रूपेण।[1] **नाप्यस्य** काष्टादे**रिवम्वह्न्-यादिक** विनाशहेतु**रिति सम्बन्धमर्हति**। कि कारण (।) **तस्योपकारनिबन्धनत्वात्**। **अन्यथो**पकारमन्तरेण सम्बन्धकल्पनायामतिप्रसंगात्। सर्वं सर्वस्य सम्बन्धी स्यात्।

स्यादेतत् (।) न साक्षाद् वन्ह्यादि काष्ठादेरुपकारक: किन्तु तत्सम्बन्धि-भूतोपकारकरणादिति (।)

अत आह। **पारम्पर्येणे**त्यादि। वह्न्यादिना काष्ठादे स[2]म्बन्धिभूत उपकार क्रियते न साक्षादिति (।) एव **पारम्पर्येणोपकारेपि** कल्प्यमानेऽवश्यमयम्विकल्पो-न्वेत्यनुगच्छति। स किम्पारम्पर्येणाप्युपकारोर्थान्तरमाहोस्वित् **तदेव** काष्ठादिक-मिति। तत्र **तस्मात्** काष्ठादेरर्थान्तरत्वेप्युपकारस्य। **तस्य** काष्ठादेरयमुपकार **इति** कस्सम्बन्ध इति। तत्र काष्ठादौ तस्याग्निकृत**स्योपकार**स्योपकारकत्व[3] **पर्यनुयोज्यं**। तदन्तरेण सम्बन्धाभावात्। आदिशब्दात् तत्राप्यपरोपकारकल्पने-त्यनवस्थादोषादिपरिग्रह.। **तथानन्यत्वेप्युपकारस्य तदवस्थः पर्यनुयोगः** स्यान्नाश. काष्ठमेवेत्यादिना य उक्त. **तस्मात् सतो** विद्यमानस्य **रूपस्य तत्त्वान्यत्त्वाव्य-तिक्रमात्** कारणात्।

स्यादेतत् (।) सतो रूपस्य तत्त्वान्यत्त्वाव्यतिक्रमाद् विनाशहेतुकृतं तूपकारो[4]-त्पादनमसदेवेति (।)

न कस्यचिद्धेतुरहेतुश्च नापेक्षते। तस्मात् स्वयमयं भावस्तत्स्वभाव इति सिद्धः॥

अहेतुत्वेपि नाशस्य नित्यत्वाद् भावनाशयोः (।)
सहभावप्रसङ्गश्चेदसतो नित्यता कुतः॥ (२७७)

स्यादेतत् (।) यद्यपि विनाशोऽहेतुकः सोवश्यं नित्य इति। भावस्तदभा(व)लक्षणो विनाशश्च सह स्यातामिति। न (।) तस्य नित्यं नि[5]त्यधर्मायोगात्। न ह्यसत्ययं विकल्पः संभवति। तयोर्वस्तुधर्मत्वात् तद्विनाशस्य चाकिंचित्त्वात्। भवतो हि केनचित् सहभावः स्यात्। न च विनाशो भवति। तस्मादवदोषः॥

असत्त्वेऽभावनाशित्वप्रसङ्गोपि न युज्यते।
यस्माद् भावस्य नाशेन न विनाशनमिष्यते॥ (२७८)

अत आह। **उपकारे**त्यादि। **रूपनिष्पादनलक्षण**त्वात्। सद्रूपनिष्पादनलक्षणत्वात्। ततश्च तद्वा वस्तु तेन विनाशकेन कर्त्तव्यमन्यद्वा। उभयथा चोक्तो दोष इति। **तवतत्क्रियाविकलो** नाशहेतुर्न **कर्तेवेति न कस्यचिद्धेतुः**। **अहेतुश्च** दण्डादि **नापेक्ष्यते** विनश्वरेण घटादिना। **तस्मात् स्वयं** सत्तामात्रेणा**यम्भावस्तत्तत्स्वभावो**[5] विनश्वरस्वभाव **इति**।

प्रध्वसाभावन्नाश गृहीत्वा परस्य चोद्यमाशकते। **अहेतुत्वेपी**त्यादि अहेतुर्हि भवन्नित्यम्भवेत्। **नित्यत्वाच्च** भावकालेपि नाशो भवेदित्येवम्**भावनाशयोः सहभावप्रसङ्गश्चेत्**।

नायन्दोष (।) कि कारणम् (।) **असतः** प्रध्वसलक्षणस्य नाशस्य **नित्यता कुतः**।

स्यादेतदित्यादिना व्याचष्टे। **यद्यपि** नाशः क्षणिकवादिनोऽहेतुकः **सोवश्यं नित्य इति** कृत्वा **भावस्तदभावलक्षणो** विनाशनिवृत्तिरूप। **विनाशश्च** तदभावलक्षणो भावनिवृत्तिरूप। एकस्य **सह स्यातामिति**।

नैतदेव। कस्मात् (।) **तस्याभावस्यावस्तुत्वेन नित्यादिधर्मायोगात्। न ह्यसत्ययन्नित्यानित्यविकल्पस्सम्भवति। तयोर्नित्ययोर्वस्तुधर्मत्वात्। विनाशस्य च** भावनिवृत्तिलक्षणस्याकि[7]ञ्चित्त्वात्। 184a

कि च (।) **भवतो** ह्युत्पद्यमानस्य नित्य सत्त्वात् **केनचित् सहभावः स्यात्** (।) **न च विनाशो भवति**। केवलमेकक्षणस्थितिधर्मा भाव स्वयमेव न भवतीति क्रियाप्रतिषेधमात्रमेतत्। **तस्मादवदोषो**नन्तरोक्त।

पुनरपि पराभिप्रायमाशकते। यदि विनाशो सन्निष्यते तदा विनाशस्या-

कथमसन् विनाशो भावं नाशयेद् (।) **अतो विनाशी भावः**[6] **स्यादित्यप्य-प्रसंग एव** (।) **विनाशाद् भावनाशानभ्युपगमात्। यो हि विनाश इति किंचिन्ने-त्याह। स कथं ततो भावनाशमिच्छेत्।**

कथमिदानीमसति विनाशे भावो नष्टो नाम। न ह्यसद्विनाशास्तामपे-क्षन्ते प्रत्युत्पन्नावस्थायां(।) **न हि यो येन**(ा)**तद्वान् स तेन तथा व्यपदिश्यते**
37b **प्रतीयते वा** (।) **यथाश्वो विशा** (? षा) **णेन। न वै विनाशो नास्त्येव। स तु नास्ति यो भावस्य भवति। भाव एव तु क्षणस्थितिधर्मा विनाशः। तमस्य स्वभावं उत्तरकालं विभावयन्तो विनाशोऽस्य भूत इति यथाप्रतीति व्य-पदिशन्तीत्युक्तं। न हि भावस्य किञ्चित् कदाचिद् भवति** (।) **स एव केवलं**

सत्त्वे सत्यभावनाशित्वप्रसंगः। भावस्य नाशित्व न स्यादित्ययमपि[1] प्रसङ्गो न **युज्यते। यस्माद् भावस्य नाशेनार्थान्तरेण** नास्माभि**र्विनाशनमिष्यते।**

कथमित्यादिना व्याचष्टे। **कथमसन् विनाशो भावं नाशयेद**सतो व्यापारा-योगात्। **अतः** कारणाद**विनाशी भावः स्यादित्यप्रसंग एव**। किं कारणम् (।) **विनाशादर्थान्तरभूताद् भावस्य नाशानभ्युपगमात्।**

यो हीत्यादिनैतदेव समर्थयते। **यो हि** वादी **विनाश इ**[2]**ति किंचिन्नेत्याह। स कथन्ततो** नि स्वभावान्नाशाद् **भावस्य नाशमिच्छेत्** (।) नेच्छेत्।

कथमित्यादि पर। **असत्यविद्यमाने विनाशे कथम्भावो नष्टो नाम**। नैव विनष्ट स्यात्। तथा हि **प्रत्युत्पन्नावस्थायाम**सद्विनाशा। **असद्विनाशो** येषा-मिति विग्रह। ते न हि नष्टा गण्यन्ते। यदा च भावस्य नाशो नास्ति तदा कथन्तेन स व्यपदिश्यते नाशवा[3]निति। **न हि यो येन** स्वभावेना**तद्वान्** असम्बन्धवान्। **स** पदार्थ**स्तेना**सम्बन्धिना **तथा व्यपदिश्यते**। तद्वानिति व्यपदिश्यते शब्देन। **प्रतीयते वा** ज्ञानेन।

नेत्यादिना परिहरति। **न वै** भावस्य **नाशो नास्त्ये**वापि त्वस्त्येव नाश। कथन्तर्हि नास्तीत्युच्यते। **स तु नास्ति** नाशो **यो भावस्य भवति।**
यदि विनाशो न भवति कथन्तर्हि विनाशोस्तीत्युच्य[4]त इति (।)

आह। **भाव एव तु क्षणस्थितिधर्मा**। एकक्षणस्थायी **नाशः**।

यदि भाव एव नाश कथन्तर्हि भावस्य नाशो भूत इति लोको व्यपदिशतीति(।)

अत आह। **तमस्ये**त्यादि। **अस्य** भावस्य **तमे**कक्षणस्थायिस्वभाव सदृशाप-रोत्पत्तिविप्रलम्भादुपलक्षित। **उत्तरकालं** सन्तानोच्छित्तावनुपलम्भेनास्थितिप्रति-पत्त्या। **विभावयन्तो** निश्चिन्वन्त। **विना**[5]**शोस्य** भावस्य **भूत इति यथा प्रतीति व्यपदिशन्ति** व्यवहारिण पुरुषा **इत्युक्तं** प्राक्।

स्वहेतुभ्यस्तथाभूतो भवति। तन्न केनचिद् भवता स नष्टः। किन्तर्हि (।) स्वभाव एवास्य येन स नष्टो नाम (।)

कथन्तर्हि (इ) दानीमहेतुको विनाशः (।) भवतीत्युच्यते।

नश्यन् भावो प[2]रापेक्षः इति तज्ज्ञापनाय सा।
अवस्थाऽहेतुरुक्तास्या भेदमारोप्य चेतसा ॥ (२७९)

न भावो जातो परस्मान्नाशं प्रतिलभते (।) तथाभूतस्यैव स्वयंजातेरित्य-परापेक्षधर्मान्तरप्रतिषेधार्थन्तत्स्वभावज्ञापनेनार्थान्तरमिव धर्मिणो धर्मं चेतसा

यस्मान्न हि भावस्य निष्पन्नस्य किञ्चिद्रूपान्तरम्विनाशाख्यमन्यद्वा **कदाचिद् भवति। स एव** भाव **केवलं स्वहेतुभ्यस्तथाभूत** एकक्षणस्थायी **भवति। तदिति** तस्मान्न **केनचिद्विनाशाख्येन भवता। स** भावो **नष्टो** नाम। **किन्तर्हि** (।) **स्वभाव एवास्य** भावस्य स एक[6]क्षणावस्थानशील। **येन स** भावो **नष्टो नाम**। अन्यथा स्वयमतत्स्वभावत्वेन्यसन्निधानेप्यनाशात्।

यदि नाशो नाम न किञ्चित्। **कथन्तर्हीदानीमहेतुको नाशो भवतीत्युच्यते** भवद्भि.। यस्य हि स्वभाव एव नास्ति तस्य किम**हेतुकः** सहेतुको वेति चिन्तया। 184b
भावस्य नाश इति व्यतिरेको वा कथ।

नश्यन्नित्यादिना परिहरति। **भावो नश्यन्[7]**परापेक्ष। पर विनाशहेतु नापेक्षत **इति** कृत्वा। न **ज्ञापनायेत्यपरापेक्षत्वज्ञापनाय। सा** नाशा**वस्थास्माभिर-हेतुरुक्ता**। तस्या नाशावस्थायाश्**चेतसा** विकल्पबुद्ध्या भावाद् **भेदं** व्यतिरेक-**मारोप्य** (।)

एतदुक्तम्भवति (।) अहेतुको भावस्य विनाशो भवतीति सहेतुकोस्य **विनाशो** न भवतीत्यर्थ।

नेत्यादिना व्याचष्टे। **न भावो जातः** सन्**नपरस्माद्** विनाशहेतो**र्नाश[1]ं प्रति-लभते**। कि कारण (।) **तथाभूतस्यैव** नश्वरस्वभावस्यैव **स्वयं** सत्ताहेतोरेव **जातेरुत्पत्ते। इति** हेतोरपरमन्यम्विनाशहेतुत्वेन कल्पितमपेक्षत इत्यपरापेक्ष.। तथाभूतश्चासौ धर्मश्च विनाशाख्य। **अपरापेक्षधर्मस्तस्य प्रतिषेधार्थं**। सहेतुकविनाशप्रतिषेधार्थमिति यावत्। **तत्स्वभावज्ञापनेने**ति भावस्य विनश्वर-स्वभावज्ञा[2]पनेन। **स्वभाव एव** तथोच्यत इत्यनेन सम्बन्ध। **तथोच्यत** इत्यहेतु-कोस्य विनाशो भवतीत्युच्यते। कदाचित्तन्मात्रजिज्ञासाया। भावस्यान्यस्मात् किम्विनाशो भवति न चेत्ये**तावन्मात्रजिज्ञासायां**। केन प्रकारेणोच्यते। **धर्मिण** सकाशाद् **अर्थान्तरमिव** विनाशाख्य **धर्मं चेतसा** बुद्ध्या **विभज्यास्य** भावस्य विनाश इति विभाग कृत्वा। **तदेतद्** यथोक्तेन[3] प्रकारेणाभावादव्यतिरिक्त-

विभज्य तन्मात्रजिज्ञा(सा)यां स्वभाव एव तथोच्यते। तदेतत् मन्दबुद्धयः क्वचि[3] त्तथादर्शनात् घोषमात्रविप्रलब्धा नाशं गुणं तस्य च[1] भावमारोप्य सहेतुकमहेतुक वा। अप्रतिष्ठिततत्त्वया भावचिन्तयात्मानमाकुलयन्ति।

स्वतोपि भावेऽभावस्य विकल्पश्चेदयं समः।

नन्वपरभावित्वेपि विनाशस्य स्वत एव भावस्य भवतोयं तत्त्वान्यत्त्व विकल्प स्तुल्यः। तदा किमर्थान्तरभावे भावो न दृश्यते[4]ऽनर्थान्तरत्वेपि तदेव तद् भवति तन्न किंचिदस्य जातमिति कथं विनष्टो नाम।

नन्वत्र।

न तस्य किञ्चिद् भवति न भवत्येव केवलम् ॥२८०॥

न्नाशित्वन्तत्वतो व्यवस्थापितमपि **मन्दमतयो** नाश गुण धर्म समारोप्यात्मान माकुलयन्तीत्यनेन सम्बन्ध ।

कस्मात् पुनस्त एवमाकुलयन्तीत्याह। **क्वचि**दित्यादि। राज्ञः पुरुष इत्यादौ व्यतिरेकविभक्तिप्रयोगे **तथादर्शनात्**। सम्बन्धिनोर्विभागदर्शनात्। इहापि भा[4]वस्य नाशो भवतीत्यनेन **घोषणामात्रेण विप्रलब्धाः**। भावस्य व्यतिरिक्त **नाशं गुणं** धर्म **समारोप्य। तस्य च** यथा कल्पितस्य गुणस्य **भावं** सत्ता **समा रोप्य**। त नाशाख्य गुण **सहेतुकमहेतुकम्वा** दर्शनभेदेन समारोप्य **भावचिन्तय** वस्तुचिन्तया। किभूतया (।) **अप्रतिष्ठिततत्त्वया**। अप्रतिष्ठितन्तत्त्व यस्या चिन्ताया। तयात्**मानमाकुलयन्ति**।

स्व[5]तोपीत्यादिना पराभिप्रायमाशकते। यस्यापि स्वयमेवाहेतुको नाशो भवति। तस्यापि **स्वतोप्यभावस्य** विनाशस्य **भावे**ङ्गीक्रियमाणे। अयन्तत्त्वान्यत्त्व लक्षणो **विकल्पश्चेत**स ।

नन्वित्यादिना व्याचष्टे। न परभावित्व**मपरभावित्व**महेतुकत्वेपीत्यर्थः। **भाव स्य** वस्तुनो यो **नाशस्तस्य स्वत एव भवतः। अयन्तत्त्वान्यत्त्वविकल्प[6]स्तुल्यः** (।)

किमर्थान्तरन्नाशो भावादुत भाव एवेति। तत्र यद्यर्थान्तर**न्तदा किमर्था न्तरस्य** नाशस्य **भावे** सत्तायाम्**भावो न दृश्यते**। अथानर्थान्तर विनाशस्तदान **र्थान्तरत्वेपि तदेव** घटादिकमेव **तन्नाशाख्यम्भवति। तत्तस्मान्न किञ्चिदस्य** पदार्थस्य **जातमिति कथं विनष्टो नाम।**

नन्वित्यादिना परिहरति। **अत्र** प्रस्तावे। उक्त (।) किमुक्त (।) **न तस्य**
185a भावस्य **किंचि[7]द्** व्यतिरिक्तम्वा नाशाख्य धर्मरूपम्**भवति**। कथन्तर्हि विनाशी भाव इत्याह। **न भवत्येव केवलमित्युक्त** प्राक्।

इत्युक्तं (।) **न ह्ययं विनाशोऽन्यो वा कश्चिद् भवतीत्याह। किन्तर्हि** (।) **स एव भावो न भवतीति। यदि हि कस्यचिद् भावं ब्रूयान्न भावोनेन निर्वर्तितः स्यात्** (।) **तथा भावनिवृत्तौ प्रस्तुतायाः[5]मप्रस्तुतमेवोक्तं स्यात्। न हि कस्यचिद् भावेन भावो न भूतो नाम। तदा न भूतो यदि स्वयन्न भवेत्। न भवतीति च प्रसज्य**

एतदेव स्फुटयन्नाह। **न हीत्यादि। न ह्ययम**हेतुकविनाशवादी भावस्य स्वहेतोर्निष्पन्नस्य कश्चिद् भावरूपोऽभावरूपो वा **विनाशोन्यो** वा स्थित्यन्यथात्वादिको धर्मो **भवतीत्याह। किन्तर्हि स एव भावो न भवतीति** भावनिवृत्ति[1]मात्रमाह। तेनायमर्थः (।) प्रथमे क्षणे भावोऽभूतो भवति। द्वितीये क्षणे तस्य न भावो भवति नाभावो वा। नापि स्वरसहानिर्वा भवति। केवल स्वयमेव निवर्त्तते।

यदि पुनर्नाशाभिधानेन **कस्यचिद्धर्मस्य भाव**मुत्पाद **ब्रूयान्न भावोनेन** वादिना **निर्वर्तितः स्यात्**। भावनिवृत्तिर्न कथितेति यावत्। **तथा** च **भावनिवृत्तौ प्रस्तुतायाम**र्थान्तरस्यान्यस्य[2] विधानाद**प्रस्तुतमेवोक्तं स्यात्**। कि कारण (।) **न हि कस्यचिद्** विनाशाख्यस्याभावस्य भावनिवृत्तिरूपस्य वा **भावेनोत्पादेन भावः** पदार्थो **न भूतो नाम**। येन तद्विधानेन भावस्य स्वनिवृत्ति स्यात्।

एतदुक्तम्भवति। यथा भावस्य विज्ञानभावे भावो न निवर्त्तते केवलन्तद्विज्ञानन्तत्सम्बन्धि स्यात्। तथा भावस्य निवृत्तिर्भवतीत्यभ्युपगमे स एव निवृत्या[3]ख्यो धर्मस्तत्सम्बन्धी स्यान्न तु भावो निवर्त्तेतेति कथमस्य निवृत्तिः स्यात्। तस्मात्तदा स भावो **न भूतो निवृत्तो यदि स्वयं न भवेत्।**

तेन यदुच्यते। नन्वभवनमपि यदि भावस्य न भवति। तदाऽविनाशित्वं। अथ भवति। तद्भिन्नम्वा स्यादभिन्नम्वाऽनयोश्च पक्षयोर्भावस्य सर्वदा दर्शन स्यादविनाशात्। तस्मान्नाभावस्य विनाश (।) कथन्तर्हि भाव. सर्वदा न प्र[4]तीयते प्रमाणाभावादिति (।)

तदपास्त। दृश्यस्य हि सत्तायाः प्रमाणविषयत्वेन व्याप्तत्वात्। तदभावादभाव। भावे वावश्य प्रमाणविषयत्वमिति कथमप्रतिपत्तिः। अथादृश्यरूपतयास्य भावस्तदा तर्हि दृश्यरूपताया निवृत्ति। सा च भावाद्भिन्नाऽभिन्ना वा (।) अनयोश्च पक्षयोर्भावस्य दर्शन स्यादिति दोषस्तदवस्थ एव। तस्माद् भावस्याभवन[5]मपि न भवति। नाप्यविनाशित्वदोष। स्वरूपेण निवृत्ते।

ननु भावनिवृत्तेर्नीरूपत्वेन रूपिणो भावादन्यत्त्वमिति चेत्।

ननु यस्य रूपमेव न विद्यते तस्य कथमन्यत्त्व। तत्किमेकत्वमस्तु। तदपि नास्त्यरूपत्वात्। तस्माद् भावेन सहास्यास्तत्त्वान्यत्त्वनिषेधमात्र क्रियते। शशविषाणवत्।

प्रतिषेध एष न पर्युदासः। अथेहापि कस्यचिद् भावे न प्रतिषेधपर्युदासयो-रूपभेदः स्याद् (।) उभयत्र विधेः प्राधान्याद्(।)एवं वा प्रतिषेधात् कस्यचित् पर्युदासोपि क्वचिन्न स्याद्। यदि हि किंचिन्निवर्त्तेत तदा तद्व्यतिरेकि संस्पृ[6]-श्येत। तत्पर्युदासेन। तच्च नास्ति सर्वत्र निवृत्तिर्भवतीत्युक्ते कस्यचिद् भावस्यैव प्रतीतेः। तेषां च तेनार्थान्तरभावः एवोक्तः स्यात्। न तयोः परस्परं विवेकोऽ-विवेके च न पर्युदासः। तदेवं व्यतिरेकाभावादन्वयोपि न स्यात् (।) तस्यैक-

---

नत्वेवमपि कथ द्वितीयक्षणे भावो न भवती[6]तीष्यते (।) यतो यदि द्वितीय-क्षणे भावस्तदा कथन्तत्र नास्तीतीष्यते विरोधात्। अथ नास्ति तदा कथ भावो नास्तीत्युच्यतेऽसत्त्वादिति।

तदयुक्त। यत प्रथमेपि क्षणे भावो भवतीति लोकेभिधीयते। तत्र च यदि भाव· कथम्भवतीत्युच्यते। तस्मात् सर्वत्र बुद्धिस्थमेव भाव कृत्वा विधिप्रतिषेध-व्यवहार इति यत्किञ्चिदेतत्।

तस्मात् स्थितमेतत् (।) तदा स भावो न भूतो यदि स्वय न भवेदिति।

185b ननु स्वयम्भावो न भवतीत्यनेनापि वाक्येन स्वयमेवाभावो भावस्य भवती-त्युच्यते। तदा च स एव दोष इत्यत आह। **न भवतीति चे**त्यादि। चशब्दो यस्मा दर्थे। यस्माद् भावो न भवतीति च **प्रसज्यप्रतिषेध एष । न पर्युदासः**। यत्र-प्रसक्तस्य निवृत्तिमात्रमेव क्रियते न वस्त्वशस्य सस्पर्श स प्र[1]सज्यप्रतिषेध । यत्र त्वेकनिषेधेनान्यविधान स पर्युदास । अन्यथे**हापि** प्रसज्यप्रतिषेधेपि **कस्यचिद्व**-स्तुनो **भावे**। विधाने सति। न **प्रतिषेधपर्युदासयो रूपभेदः** स्वभावभेद **स्यात्**। प्रसज्यप्रतिषेध प्रतिषेधशब्देनोक्त । कि कारणम् (।) **उभयत्रापि** प्रसज्ये पर्युदासे च। **विधेः प्राधान्यात्**।

यदि च प्रसज्यप्रतिषेधेपि विधि[2]स्तदा प्रतिषेध एव नास्ति। **एवं चाप्रति-षेधात् कस्यचित् पर्युदासोपि न स्यात् क्वचित्**। कि कारणम्। **यदि हि कि-ञ्चिद्वस्तु कुतश्चिन्निवर्त्तेत। तदा तद्व्यतिरेकि**। निवर्त्तमानाद् वस्तुनो व्यतिरेकि **संस्पृश्येत। तत्पर्युदासेन** निवर्त्यमानपर्युदासेन। यथाऽब्राह्मणमानयेति ब्राह्मण-पर्युदासेन क्षत्रियादे सस्पर्शात्(।) **तच्च** कस्यचिन्निवर्त्तनमेव **नास्ति**। कि कारण (।) **सर्वत्र**[3] कस्यचिन्निवृत्तिर्भवतीत्युक्तेपि न भावव्यवच्छेद· **कस्यचित्** प्रतीयते-ऽपि तु निवृत्तिशब्देनापि कस्यचिद् **भावस्यैव प्रतीतेः**। न चानेन वादिना भावस्य निवृत्तिं ब्रुवाणेनापि निवृत्तिर्नैवोक्ता किन्त्वर्थान्तरभाव **एवोक्तः स्यात्**। तथा च यस्य पर्युदासेन यद्विविक्तमुच्यते **न तयोः परस्परविवेकः** सिद्ध·। असति च **विवेके न पर्युदासः**।[4] तदन्यविवेकेनान्योपाद·नलक्षणत्वात् पर्युदासस्य। **तदेवं**

स्वभावावस्थितिलक्षणत्वात्। तत्स्थितिश्च तदन्यव्यतिरेके सति स्यात्। स च नास्तीत्य[7]प्रवृत्तिनिवृत्तिकं जगत् स्यात्। तस्माद् यस्य नासो (?शो) भवती- 38a
त्युच्यते। स स्वयमेव न भवतीत्युक्तं स्यात्। न वै घोषसाम्याद् विषयान्तरदृष्टो विधिः सर्वत्र योजनामर्हति। न हि गर्वभ इति नामकरणाद् बालेयधर्मा मनुष्येपि योज्याः। तथा न चैत्रस्य पुत्रो भवतीत्यत्र दृष्टो विधिर्विनाशेपि विरोधात्। एवं चाभिधानेपि प्रयोजनमावेदितमेव (।) अतः (।)

भावे ह्यो[1]ष विकल्पः स्याद्विधेर्व्वस्त्वनुरोधतः ॥

यथोक्तेन प्रकारेण **व्यतिरेकाभावादन्वयोपि न स्यात्**। अन्वय कस्यचिदर्थस्यानुगमो विधानन्तन्न स्यादित्यर्थ। कि कारण (।) **तस्यान्वयस्यैकस्वभावस्थितिलक्षणत्वात्। तत्स्थितिश्चैक**स्वभावस्थितिश्च **तस्मादन्यस्य व्यतिरेके** परिहारे **सति स्यात्। स च** तदन्यव्यतिरेको[5] **नास्ति** त्वन्मतेन। इति एव शब्दाद**प्रवृत्तिनिवृत्तिकं जगत् स्यात्**। शाब्दस्य विधिप्रतिषेधव्यवहारस्याभाव· स्यात्। न चैवमित्यवश्य कस्यचिद् व्यवच्छेदमात्र शब्दवाच्यमभ्युपगन्तव्य।

यतश्चैवन्त**स्माद् यस्य** भावस्य **नाशो भवतीत्युच्यते स स्वयमेव न भवतीत्युक्तं स्यात्** (।) न पुनरस्य धर्मान्तर किञ्चिन्नाशो नाम विधीयते। चैत्रस्य पुत्र इत्यत्र यथा[6] वास्तवो भेदस्तथा भावस्य नाश इत्यत्रापि व्यतिरेकविभक्तेस्तुल्यत्वादित्यत आह। **नेत्या**दि। **न वै घोष**मात्रेण चैत्रस्य पुत्र इत्यनेन शब्देन **साम्याद् विषयान्तरदृष्टो विधिः**। चैत्रस्य पुत्र इत्यत्र दृष्टोविधिर्वास्तवो य स **सर्वत्र** भावस्य नाश इत्यत्रापि **योजनामर्हति** (।) शब्दप्रवृत्तिमात्रेण वस्तुयोजनाया अयोगात्।

एतदेव **न ही**त्या[7]दिना प्राह। कस्यचित् पुरुषस्य **गर्वभ इति नामकरणात्** 186a
बालेयधर्मा गर्दभस्य धर्मा **मनुष्येपि न हि योज्याः। तथा न चैत्रस्य पुत्रो भवतीत्यत्र** वाक्ये **दृष्टो विधिरर्थान्तरस्य** पुत्रस्य विधान दृष्टमिति **नाशेपि** योज्य। भावस्य नाशो भवतीत्यत्रापि भावाद् व्यतिरेको नाशो विधेय। कि कारणम्(।) **विरोधात्**। नाशस्याभावरूपत्वादभावस्य भवन[1]विरोधादित्युक्त।

यदि नाशो नार्थान्तर कस्माद् भावस्य नाशो भवतीत्येवमभिधीयत इति (।)

अत आह। **एवं चे**त्यादि। भावस्य नाश इत्य**भिधानेपि प्रयोजनमावेदितमेव**। "अर्थान्तरमिव धर्मिणो धर्म चेतसाविभज्य तन्मात्रजिज्ञासाया स्वभाव एव तथोच्यत"[1] इत्यादिना निवेदितत्वात्।

तस्मादभावस्याकिचित्त्वात् तत्त्वान्यत्त्वविकल्पो न तुल्यः[2]। अतो **भावे**

भावोऽवश्यं भवन्तमपेक्षते (।) **स च स्वभाव एव। नि**(:)**स्वभावस्य क्वचिद् व्यापारे समावेसा**(?शा)**भावाद्**(।)**व्यापार इति हि तथाभूतस्वभावोत्पत्तिः** (।) **सा निःस्वभावस्य कथं स्यात्। कथमिदानीं भवत्यभावः शशविषाणमित्यादिव्यवहारः। न वै शशविषाणं किंचिद् भवतीत्युच्यते। अपि त्वेवमस्य न भवतीति भावप्रति**[2]**षेध एव क्रियते।**

अपि च व्यवहर्त्तारः एतदेवं व्यापारवदिव समारोप्यादर्शयन्ति प्रकरणेन केनचित्। न तु तत्तथा (।) **सर्वार्थनि** (?वि)**वेचनं हि तत्र तत्त्वमन्यत्त्वं न**

वस्तुनो भवने **एष** तत्त्वान्यत्त्व**विकल्पः स्यात्**। कि कारणम् (।) भवनस्य **विधेर्वस्त्वनुरोधतः**।

नन्वतिशयोत्पत्तावपि स एव तस्यातिशय उत्पन्न इति कथं नष्टो नाम (।) **तेन नायं तदवस्थो नष्टो नाम। येन स्वयं न भवति। तेन नष्टो नार्थान्तरोत्पादादित्युक्तं। न ह्यतिशयोत्पत्त्या स्वयं न भूतो नाम**(।)**अभावस्य सर्वातिशयोपाख्या निवृ**[4]**त्त्या सर्वभावधर्मविवेकलक्षणत्वात्। भावस्य चोत्पत्तिसमावेशलक्षणत्वात्।**

भाव इत्यादिना व्याचष्टे। **भावो** भवनमुत्पाद इति यावत्। **सोवश्यम्भवन्तमपेक्षते**। भवितारमपेक्षते (।) भवितारमन्तरेण भवनस्याभावात्। **स च** भाव **व्यापारे स्वभाव एव** वस्त्वेव। कि कारण (।) **निः**[3]**स्वभावस्य क्वचिद्** भवतीत्यादिके **समावेशाभावात्**। सम्बन्धाभावात्। न च व्यापारो नामार्थान्तर। किन्तु **व्यापार इति** हि **यथाभूतस्वभावोत्पत्ति**विशिष्टस्वभावोत्पत्ति. (।) **सा** चोत्पत्ति**र्निःस्वभावस्य** नाशस्य **कथं स्यात्**।

यदि नि स्वभावस्य नास्ति व्यापारसमावेश. **कथमिदानीम्भवत्यभावः शशविषाणमित्यादिव्यवहारः** श[4]शविषाणमभावो भवतीति भवनलक्षणेन व्यापारेण व्यवहार इत्यर्थः। आदिशब्दाद् वन्ध्यासुतोऽभावो भवतीति परिग्रह ।

नेत्यादिना परिहरति। **न वै शशविषाणं किंचि**दभावोन्यद्वा **भवतीति** विधि**नोच्यते। अपि त्वेवमिति** शशविषाणमभावो भवतीत्यनेन वाक्येनास्ये**ति** शशविषाणस्याभावो भवति (।) भावो **न भवतीति भावप्रति**[5]**षेध एव क्रियते। अपि च व्यवहर्त्तारः** पुरुषा । **एत**च्छशविषाणादिक**मेवम**भावो भवतीति **व्यापारवदिव समारोप्यादर्शयन्ति। केनचित् प्रकरणेन**। कि शशविषाणादिकमभावो भवति न भवतीति प्रस्तावसमाश्रयेण। **न तु तच्छ**शविषाणादिक व्यवहारमात्रेण **तथा** व्यापारयुक्तम्भवति। यस्मात् **सर्वार्थविवेचनं** सर्वार्थस्वभाव[6]विरहस्**तत्र** शशविषाणादौ **तत्त्वं। न** त्वसत **कस्यचिद्** भवनादे **समावेशः**।

कस्यचित् समावेशः। न खल्वेवं विनाशो वस्तुनि तद्भावाद्(।)असावपि यदि वक्तृभिरेवं ख्याप्येत न तु स्वयं तथा। तदा न किञ्चित् न भवतीतीष्टमेव तस्मा[3]त् स्वयं भवन् स्वभावो विकल्पद्वयं नातिवर्त्तते तत्त्वमन्यत्त्वमिति।

च. पुद्गल-चिन्ता

अतत्त्वमेव स्वभावस्यान्यत्त्वमिति। न हि रूपरसयोरप्यन्यदेव परय(?) स्परमन्यत्त्वं। स्वभावाप्रतिबन्धोऽन्यत्त्वमिति चेत्(।)कोयं प्रतिबन्धो नाम येन स च न स्यान्नान्यश्च(।)अजन्मेति चेत् सर्व्वकार्यकारणानां परस्परमवाच्यता स्या[4]त् (।) तथा च सर्वः सर्वस्य कथंचिदुपयोगीति न कश्चिदन्यः स्यात्। एवं चावाच्य-

---

सहेतुकोपि विनाश एवम्भविष्यतीति चेदाह। नेत्यादि। **एवं** शशविषाणवत् सर्वार्थविरहलक्षणो **विनाशः** परेष्ट.। कि कारणम् (।)**वस्तुनि** तस्य विना- 186b
शस्य **भावा**दुत्पत्ते.। यश्च भवति स कथमभावो विरोधात्।

यदि पुन**रसावपि** विनाशो नि स्वभाव एव केवल[7] **वक्तृभिरेवम्**भवतीति व्यापारवानिव **ख्याप्यते**। **न तु स्वयन्तथा**भवनधर्मा नीरूपत्वादस्य। **तदे**वमिष्यमाणेऽभावो भवतीत्यपि ब्रुवाणेन। **न किञ्चिद् भवतीतीष्टमेव**। क्रियाप्रतिषेधमात्रत्वादस्य वाक्यस्य। **तस्मात् स्वय**मनध्यारोपितेनाकारेण क्वचिद् वस्तुनि **भवन् स्वभावो विकल्पद्वयं नातिवर्त्तते तत्त्वमन्यत्त्वं चेति** प्रकारान्तराभावात् ०॥ (२८०)

रूपादिस्कन्धस्वभाव पुद्गलो न भव[1]त्यथ च रूपादिभ्यो नान्य·। तस्म तत्त्वान्यत्त्वमतिवर्त्तत एव स्वभाव इति चेत्।

तन्न (।) यस्मा**दतत्त्वमेवा**ततत्स्वभावत्वमेव **स्वभावस्यान्यत्त्वमिति।**

यदि पुद्गलोपि न स्कन्धस्वभावस्तदा स्कन्धेभ्योन्य एव। यतो **न हि** प्रसिद्धान्यत्त्वयो **रूपरसयोरप्यन्यदेव परस्परमन्यत्त्वं** (।) किन्त्वतत्स्वभावत्वमेवान्यत्त्वन्तच्च पुद्गलेप्यस्तीति सोपि स्कन्धेभ्योन्य एवेष्टव्य ।

नन्वतत्स्वभावत्वे[2]पि परस्पर **स्वभावाप्रतिबन्धोन्यत्त्वमिति चेत्**। स च-प्रतिबन्ध. पुद्गलस्य स्कन्धेष्वस्ति ततो तत्स्वभावत्वेपि नान्यत्त्व स्कन्धेभ्य· पुद्गलस्येति ।

कोयमित्यादिना प्रतिषेधति। **कोयं प्रतिबन्धो नाम** पुद्गलस्य स्कन्धेषु **येन** प्रतिबन्धेन। **स च न स्या**दिति स्कन्धस्वभाश्च पुद्गलो न स्यात्। **नान्यस्व**भावश्च स्कन्धेभ्य.। अन्य. स्वभावोस्येति विग्रहः।

स्कन्धेभ्य· पुद्गलस्य ज[3]न्म तदेव **जन्म** प्रतिबन्ध **इति चेत्**।

तेत्यपि कार्यकारणभाव एव शब्दान्तरेणोक्तः स्यान्नार्थभेदः। स्वभावाननुगमत्वमन्यत्त्वं ब्रूमः। न स्वभाववतां परस्परमस्त्येवेत्यन्यत्त्वमेव। न च तज्जन्मलक्षणात् स्वभावप्रतिबन्धादन्यः प्रतिबन्धो नामानायत्तस्य व्यभिचा[5]राविरोधात् ततो धर्मभेदाच्च।

अन्यत्त्वं ज्ञानकृतः प्रतिबन्ध इति चेत् (।)

स्यादेतत् (।) यत्प्रतिपत्तिनान्तरीयकं यज्ज्ञानं तद्गतौ नियमेन तत्प्रतिभासात् तदतद्रूपमप्यवाच्यमिति

न (।) तस्य निःस्वभावत्वात्। स्वयं स एव वेति भि(?हि) तस्य स्वभावो यः प्रतिभाति। अतत्स्वभावत्वेस्य तद्वत्प्रतिभासप्रसंगात्। अप्रतिभासमानस्य च

एव सति कार्यत्वात् स्कन्धेभ्य. पुद्गलस्य तत्त्वान्यत्त्वेनावाच्यत्वमिष्ट। तथा च सति **सर्वकारणानाम्परस्परमवाच्यता स्यात्। तथा चे**ति कार्यत्वादवाच्यत्वे। **सर्वः सर्वस्य कथंचि**दिति साक्षात् पारम्पर्येण **चोपयोगीति** सर्वत्र कार्यकारणभावान्न च **कश्चित्** कुतश्चि**दन्यः स्यात्। एवं चा**नन्तरोक्तेनावाच्यतालक्षणेना**वाच्य**[4]**-तेत्यपि** ब्रुवता **कार्यकारणभाव एव शब्दान्तरेणोक्तः स्यान्नार्थभेदः** कश्चित्। अन्यत्त्वन्तु न निषिद्धमेव। यस्मात् **स्वभाव**यो परस्परम**ननुगमन**ममिश्रीभवन**मन्यत्त्वम्ब्रूमः**। स च स्वभाविनानुगम. **स्वभाववतां** सर्वपदार्थानां**मस्त्येवे**ति **परस्परमन्यत्त्वमेव**। न चान्य प्रतिबन्ध. पुद्गलस्य स्कन्धेषु। यस्मान्न हि **जन्मलक्षणाज्जन्मस्वभावात् स्वभावप्रतिबन्धादन्यः**[5] **प्रतिबन्धो नाम**। कि कारणम्(।) **अनायत्तस्य** तदुत्पत्त्या तत्राप्रतिबद्धस्य। तेन सह यो **व्यभिचारस्तस्याविरोधात्**। ततोप्रतिबन्धात् पुद्गलस्य स्कन्धेभ्योन्यत्त्व। **धर्मभेदाच्चा**न्यत्त्व। तथा ह्यवाच्यत्वं पुद्गलस्य धर्मः स्कन्धानान्तु परस्परम्वाच्यत्वमिति धर्मभेद.।

यद्यपि न जन्मकृत. प्रतिबन्धस्तथापि पुद्गलस्य स्कन्धेषु **ज्ञानकृतः प्रतिबन्ध इति चेत्।**

स्यादित्यादि[6]नैतदेव व्याचष्टे। यस्य रूपादे प्रतिपत्ति**र्यत्प्रतिपत्ति**स्तया **नान्तरीयक**मविनाभावि **यज्ज्ञान** यस्य पुद्गलस्य ज्ञान। **तद्गता**विति रूपादिगतौ **नियमेन** तस्य पुद्गलस्य **प्रतिभासनात्**। ज्ञानकृत. प्रतिबन्धस्तथा हि रूपशब्दादिग्रहणेनैव पुद्लग्रहणमिष्यते। चक्षुरादिविज्ञानविज्ञेयत्वात् पुद्गलस्येति। तेन
187a ज्ञानकृतात् प्रतिबन्धात्। तत्पु[7]द्गलाख्यम्वस्तु स्कन्धेभ्योन्यत्त्वेना**वाच्यमतद्रूप**मप्यस्कन्धस्वभावमपि।

नेत्यादिना प्रतिषेधति। **न** पुद्गलस्य रूपादिप्रतिपत्तिनान्तरीयक ज्ञान। किं

वृश्यस्याभावाव[6]वृश(?श्य)त्वेपि न तद्रूपं ज्ञानमिति कस्य किमायत्ता प्रतीतिः। न च यद् यदायत्तप्रतीतिकं तस्य स्वभावप्रतिभास एव नश्यति (।) प्रकाशायत्त-प्रतीतीनामिव नीलादीनां। का वा तस्य प्रत्यासत्तिस्तत्र यत् तस्मिन्ननात्मरूपे प्रतीयमाने स स्वयं प्रत्युपतिष्ठते।

अतिप्रसंगो ह्येवं स्यात् प्रतीयमानस्य तदुपादानस्य[7] तदुपादनतेति चेत्। कोय- 38b
मुपादानार्थः। न कार्यकारणभावो न ह्यपगमादभ्युपगमे वा न कार्यकारणे ऽन्यो न्यप्रतीतिप्रत्युपस्थापने। प्रतीतेरेव (।) तन्नान्तरीयकता प्रत्यासत्तिरिति चत् (।)

कारणं (।) तस्य पुद्गलस्य रूपादिस्वभावमपहाय **निःस्वभावत्वात् स्वयं**। यस्मात् **स एव हि तस्य स्वभावो यो** रूपादिरूप. **प्रतिभाति**।

अथारूपादिस्वभाव पुद्गल·। तदाऽरूपादि**स्वभावत्वेऽस्य** पुद्गलस्या**तद्[1]व्**-रूपादिवत् पृथक्**प्रतिभावप्रसङ्गात्**। न च प्रतिभासते ततो नास्त्येव पुद्गल.। यतो **वृश्यस्याप्रतिभासमानस्य चाभावात्**। अथादृश्य पुद्गल इष्यते (।) तदा **अवृश्यत्वेपि** पुद्गलस्येष्यमाणे **न तद्रूपं** ज्ञानन्न पुद्गलाकार **ज्ञानमिति कस्य किमायत्ता प्रतीतिः**। न रूपादिज्ञाननान्तरीयक पुद्गलज्ञानमित्यर्थ·। तथा च न ज्ञानकृतः प्रतिबन्ध इति भाव.[2]।

रूपाद्यायत्तप्रतीतित्वादेव पृथक् पुद्गलो न प्रतिभासत इति चेद् (।)

आह। **न चेत्यादि। यद् वस्तु यदायत्तप्रतीतिकं** यत्प्रतिबद्धोपलम्भनन्**तस्य स्वभावप्रतिभास एव** न च **नश्यतीति** सम्बन्ध.। **किमिवेत्याह। प्रकाशेत्यादि**। यथा **नीलादीनामालोकप्रतिबद्धज्ञानानामालोके** प्रतिभासमानेपि स्वप्रतिभासो न नश्यति। आलोकव्यतिरेकेण तेषा प्र[3]तिभासनात्। तद्वत् पुद्गलस्यापि स्यात्॥

अपि च **का वा तस्य** पुद्गलस्य **प्रत्यासत्ति**· सम्बन्धस्तत्र स्कन्धे। **य**दिति येन प्रत्यासत्तिकारणेन **तस्मिन्**स्कन्धेऽ**नात्मरूपे**ऽपुद्गलस्वभावे प्रतिभासमाने **स्वय-म्प्रत्युपतिष्ठते**। आत्मान ग्राहयतीति यावत्।

अतिप्रसंगो ह्येवं स्यात्। अप्रतिबद्धे प्रतिभासमाने यदि नियमेन पुद्गल प्रतिभासेत। तदा यस्य कस्यचि[4]त्प्रतिभासनेन्योप्यत्यन्तासम्बन्ध प्रतीयत इत्यर्थ। **प्रतीयमानस्य** पुद्गलस्य **तदुपादानता**रूपाद्युपादानताप्रत्यासत्तिरिति **चेत् (।) कोयमुपादानार्थः**। **न** तावत् पुद्गलस्य रूपादीनाञ्च यथाक्रमञ्**कार्य-कारणभावः**। तस्यानभ्युपगमात्। कार्यकारणभावाभ्**युपगमे वा न** रूपादिदर्शने नियमेन पुद्गलस्य दर्शन। कि कारण (।) यतो[5] **न कार्यकारणे। अन्योन्य-प्रतीतिप्रत्युपस्थापने**। यथा कार्यात् कारणप्रतीतिस्तथा न कारणात् कार्यप्रती-

ननु सैवासति प्रतिबन्धे न युक्तेत्युच्यते। नाकार्यकारणयोः कश्चित् प्रतिबन्ध इति चोक्तं। यत्प्रतिपत्तिनान्तरीयकं यज्ज्ञानमित्यपि तज्ज्ञाने सति स्यात्। न हि यो वि[1]ज्ञाने स्वरूपासंसर्गिणि न भासते। तस्य किंचिज्ज्ञानं। तदभावान्न सिध्यति। अवाच्यतालक्षणमर्थरूपस्य। तद्भवता वस्तु(तः) तत्त्वान्यत्त्वभाजा भवितव्यं।

यस्य तु विनस्यु(?श्य)तो भावस्य न किंचिद् भवति। तेन (।)

न भावो भवतीत्युक्तमभावो भवतीत्यपि ॥[2] (२८१)

यदप्ययं भावस्याभावो भवतीत्याह। तदपि भावो न भवतीत्येवोक्तं भवति। एवं हि स निर्वर्तितो भवति। प्र[2]तिषेधे विधेरसंभवात्। तत एवास्य विनाशे न कश्चिद्धेतुः। तथा हि (।)

तिर्भवतीत्यर्थं। न पुद्गलस्य रूपादिनान्तरीयकता किन्तु पुद्गलस्य या प्रतीतिस्तस्या। **तन्नान्तरीयकता** रूपादिनान्तरीयकता।

सैव प्रत्यासत्तिरिति चेत्।

ननु सैव प्रतीतेस्तन्नान्तरीयकता। रूपादिषु पुद्गलस्यासति **प्रतिबन्धे न यु[6]क्तेत्युच्यते।**

अकार्यकारणयोरपि पुद्गलरूपाद्यो प्रतिबन्धो भविष्यतीति(।)

अत आह। **अकार्यकारणयोर्न कश्चिद्** वास्तव **प्रतिबन्ध इत्यसकृदुक्तं यत्प्रतिपत्तिनान्तरीयकं यज्ज्ञानमित्यपि** यदुच्यते। **तज्ज्ञाने** रूपादिविवेके। पुद्गलज्ञाने **सति स्यात्।** तच्च नास्ति। यतो **यः** पुद्गले **विज्ञाने** स्वरूपेण न प्रति**भासते**
187b **स्वरूपासंसर्गिणान्यासस[7]र्गेणेत्यर्थं। तस्य किञ्चिज्ज्ञानं न** हीति सम्बन्ध.। **तदभावाद्** यथोक्तज्ञानाभावा**दर्थरूपस्य** पुद्गलाख्यस्या**वाच्यतालक्षणं न सिध्यति।**

तदिति तस्माद् **वस्तुतः** परमार्थत क्वचिद् **भवता** केनचिदर्थेन तत्र **तत्त्वान्यत्वभाजा भवितव्यं।** वस्तुनो गत्यन्तराभावात्। **यस्य तु** क्षणिकवादिनो **विनश्यतो भावस्य न किञ्चिद् भवति** केवल स भाव स्वयमेव न भवती[1]ति मत। **तेनाभावो भवतीत्यपि** ब्रुवता **न भावो भवती**ति प्रतिषेधमात्रमे**वोक्तं** न कस्यचिद् विधान। ततो नाभावप्रति क्षणिकवादिनस्तत्त्वान्यत्वविकल्पस्यावतारोस्तीति मन्यते।

यदपीत्यादिना व्याचष्टे। **यदप्ययं** क्षणिकवादी **भावस्याभावो भवतीति** विधिसस्पर्शिनेव शब्देनाह। **तदपि भावो न भवतीत्येवोक्तं भवति। एवं हि स** भा[2]वो **निर्वर्तितो भवति** यदि किञ्चिन्न विधीयते। कि कारण (।) **प्रतिषेधे** भावमात्रव्यवच्छेदे **विधेरसम्भवात्।**

यतश्च विनश्यतो भावस्य न कश्चिद् वस्तुधर्मो भवति। **तत एवास्य** भावस्य **विनाशे न कश्चिद्धेतुः। तथा हि** विनश्यता भावेना**पेक्षेत परो** विनाशहेतु। **यदि**

अपेक्षते परः कार्यं यदि विद्येत किञ्चन ।
यदकिञ्चित्करं वस्तु किं केनचिदपेक्ष्यते ॥ (२८२)

सति हि कार्ये कारकं भवति। न च नश्यतो भावस्य किंचित् कार्यमित्युक्तं। तस्माद् यो नाम नाशहेतुः स भावे न किंचित् करोतीति[3] अकिंचित्करोनपेक्षणीयः (।) कथमनुत्पन्नातिशयः। तदवस्थ एव भावः कथं नष्टो नाम।

तस्मान्नाभावे कस्यचिद् भावोपक्षेपोऽन्यस्य (।)

एतेनाहेतुकत्वेपि ह्यभूत्वा नाशभावतः ।
सत्तानाशित्वदोषस्य प्रत्याख्यातं प्रसञ्जनं ॥ (२८३)

योपि मन्यते (।) अहेतुकेपि विनाशेऽभूत्वास्य भावात् सत्ताऽनित्यत्वं च दुर्निवार[5]म् (।) अभूत्वा भवन्नहेतुको भवतीत्यपि विरुद्धत्वमिति। सोप्यनेनैव

तेन भावस्य **कार्यं** कर्त्तव्यम्विद्येत **किञ्चन**। न तु किञ्चित् कार्यमस्ति। तस्मादकिञ्चित्करम्वि[3]नाशकारण । **यच्चाकिञ्चित्करम्वस्तु । तत्किं केनचिदपेक्ष्यते**। नैवापेक्ष्यते ।

सतीत्यादिना व्याचष्टे। सति हि कर्त्तव्ये **कारकम्भवति। न च नश्यतो भावस्य किंचित् कार्यमित्युक्तं। तस्माद् यो नाम** कश्चिन्नाशहेतुः **स भावे न किञ्चित् करोतीत्यकिञ्चित्करो नापेक्षणीयो** विनाशहेतु ।

तत्कथमित्यादि पर । यदि विनश्यतो नातिशय कश्चिदुत्पद्यते। **कथ[4]**मिदानीमनुत्पन्नातिशय । **अनुत्पन्नोतिशयोस्ये**ति विग्रह । **तदवस्थ एव** पूर्वरूपावस्थ एव **भावो विनष्टो नाम।**

नन्वित्यादि सि द्धा न्त वा दी। विनाशहेतो सकाशाद् भावस्यातिशयोत्पत्तावप्यङ्गीक्रियमाणाया **स एव तस्यातिशयो** नाशाख्य । **उत्पन्न इति** स भावः **कथं नष्टो नाम**। न ह्यन्यभावेन्यस्य नाश । यत एवन्तेन कारणेनाय[5]म्भावस्तदवस्थो **न नष्टो नाम**। किन्तु **येन** यस्मात् **स्वयं न भवति तेन नष्टो नार्थान्तरस्य** नाशाख्यस्योत्पादादित्यनन्तरमेवोक्तं। यतो **न हि** नाशाख्यस्यातिशयस्योत्पत्त्या भाव **स्वयं न भूतो नाम**। कि कारणम् (।) **अभावस्य सर्वे** येतिशयाः। सामर्थ्यलक्षणा । याश्चोपाख्याः व्यपदेशास्तेषा **निवृत्त्या**। सर्वसामर्थ्यव्यपदेशनिवृत्त्येत्यर्थ'। **सर्वस्य भावध[6]र्मस्य** भवनरूपस्य धर्मस्य यो **विवेको** विरहस्तल्लक्षणत्वात्। **भावस्य चोत्पत्तिसमावेशलक्षणत्वात्**। यस्माद् भवतीति भाव उच्यते। तेनोत्पत्तियोगी भाव । यतश्चैवन्तस्मान्नाभावे भावस्य विनाशे **कस्यचिदन्यस्य भावो** भवनन्तस्योपक्षेपः। न कस्यचिद् भवनमित्यर्थ ।

प्रत्याख्यातः। कस्यचिद् भावानभ्युपगमात्॥

यथा केषाञ्चिदेवेष्टः प्रतिघो जन्मिका(?)नां तथा।
नाशस्वभावो भावानां नानुत्पत्तिमतां यदि॥ (२८४)

अथ स्याद् (।)भवतु नाम नाश(:)स्वभाव एष भावानां य इमे क्षणस्थितिधर्माणः। स तूत्पत्तिमतामेव भविष्यति (।)न हि स्वभाव इति सर्व्वः सर्वस्य स्वभावो भवति प्रतिघात्मतावत्।

सत्यमेव तथापि॥

स्वभावनियमाद्धेतोः स्वभावनियमः फले।
नानित्ये रूपभेदोस्ति भेदकानामभावतः॥२८५॥

188a **एतेने**ति स्वभावप्रतिपादनेन। अहेतु**कत्वेपि** नाश[7]स्याऽनीक्रियमाणे स नाशः प्रथममभूत्वा भवतीत्येवमभूत्वा **नाशस्य भावतः** कारणात् तस्य नाशस्याकुरादिवत् सत्ता स्यात्। नाशित्व चेति। **सत्तानाशित्वदोषस्य** यत् **प्रसञ्जनन्तत्प्रत्याख्यातमेतेने**व।

योपीत्यादिना व्याचष्टे। **अहेतुकेपि नाशे**ऽस्य नाश**स्याभूत्वा भावात् सत्ताऽनित्यत्वं च दुर्निवारं। अभूत्वा भवन्नहेतुको भवतीत्यपि विरुद्धं** कादाचित्कस्या[1]हेतुत्वविरोधात्। **सोपि** दोषोपन्यासोऽ**नेने**व विनाशस्य नीरूपत्वप्रतिपादनेन **प्रत्याख्यातः**। किं कारण (।) विनाशकाले **कस्यचिद्** धर्मस्य **भावानभ्युपगमात्।**

यथा तुल्ये वस्तुत्वे **केषांचिदेव जन्मिना**मुत्पत्तिमता **प्रतिघो** नाम स्वदेशे परस्योत्पत्तिविबन्धलक्षण **इष्टो** न सर्वेषां। **तथा भावानामुत्पत्तिमता**मेव **नाशस्वभावो** भवतु (।) न त्वनुत्पत्तिम[2]तामाकाशादीनां। तथा च "यत् सत्तत्क्षणिक"मित्येतद् व्यभिचारीति।

अथेत्यादिना व्याचष्टे। **भवतु नाम। स्वभाव एष भावानां** (।) कोसौ स्वभाव इत्याह। **य इमे क्षणस्थितिधर्माणः**। क्षणस्थितिर्धर्मो येषामिति विग्रहः। **स तु** क्षणस्थितिधर्मस्वभाव **उत्पत्तिमतामेव** भावानाम्भविष्यति। न त्वनुत्पत्तिमतामाकाशादीनां।

यस्मान्न **हि स्वभाव इत्येव** कृ[3]त्वा **सर्वः सर्वस्य स्वभावो भवति। प्रतिघात्मतावत्**। यथा प्रतिघात्मता वस्तुस्वभावत्वेपि न सर्वस्य भवति तद्वदित्यर्थः।

सत्यमित्या चार्य.। सर्वः सर्वस्य स्वभावो न भवतीति सत्यमेतत्। **तथाप्ययं** सप्रतिघस्य जनकोऽय नेति **स्वभावनियमाद्धेतोः स्वभावनियमः फले**ऽयं प्रतिघोऽय नेति। **नानित्ये** तु नानित्यत्वावि[4]षये कृतकाना **रूपभेदोस्ति** येन कस्यचिन्न-

न वै प्रतिघोऽन्यो वा स्वभावोऽकस्मात् प्रतिनियमवान्। यादृशी तु स्वहेतोः शक्तिस्थितिः। तादृशं फलं भवतीति हेतुस्वभावनियमात् फलस्वभावनियमः।

आकस्मिक[7]त्वेप्यस्योक्ते दोषः प्रतिघात्मता हेतुस्वभावप्रतिनियमवन्न नश्व- 39a
रजननप्रतिनियतस्वभावं भावं पश्यामो येन तज्जन्मा तथा स्यान्नान्यः (।) सर्वा-
कारजन्मनां विनाशदर्शनात्।

नन्विमप्यनिश्चेयमेव सर्वाकारजन्मानो नश्यन्तीति। तासामनिःशेषदर्श-
नात्। विचित्रशक्तयो हि सामग्र्यो दृश्यन्ते। तत्र काचित् स्यादपि याऽनश्व-

---

श्वर. स्वभाव· स्यान्नान्यस्य (।) कि कारणम् (।) अनित्यस्वभावस्य **भेदकानां** हेतूनामभावतः। सर्वेषाम्विनश्वरस्वभावस्य जननादितियावत्।

ननु नाशस्वभावो भावानान्नानुत्पत्तिमतां यदीति चोद्य प्रकृत। न च तत्रानित्ये रूपभेदोस्ति भेदकानामभावत इत्ययम्परिहारो युक्तः। न ह्याकाशा[5]दीना स्वहेतुकृतो विनश्वरस्वभावोनुत्पत्तिमत्त्वात्। तत्कथ सत्त्यमित्याद्युक्तमिति।

एवम्मन्यते (।) यथा सत्त्व व्यभिचार्युक्तन्तथा कृतकोपि कश्चिन्नश्वर कश्चिन्नेत्याशकते। तेनादावेव कृतकत्वस्य व्यभिचारन्तावत् परिहर्त्तुं सत्त्यमित्याद्युक्तमित्यदोषः।

नेत्यादिना व्याचष्टे। **अन्य** इति सनिदर्शनादिकः। **अकस्मा**दिति हेतुमन्तरेण **नि[6]यमवान्**। क्वचित् स्यात् क्वचिन्नेति। **यादृशी तु** प्रतिनियतविषया। प्रतिघादिधर्म्मजनकस्य **हेतोः शक्तिस्थितिः**। शक्तिनियमस्तादृशं हेतुशक्त्यनुरूप **फलम्भवतीति** कृत्वा **हेतुस्वभावनियमात् फलस्वभावनियम** इष्ट.। **आकस्मिकत्वे** तु निर्हेतुकत्वेस्य फलस्वभावनियमस्योक्तो **दोषः**। देशकालप्रकृतिनिवमो न युज्यत इति।[7] तस्मात् **प्रतिघातात्मताया** हेतुस्तस्य **स्वभावस्तस्य** 188b
प्रतिनियमवत्। न **नश्वरजननप्रतिनियतस्वभावं** हेतुभूतम्भावस्य **पश्यामः**। कश्चिदेव नश्नरं जनयेन्न सर्वमित्येव नश्वरजनने प्रतिनियत स्वभावो यस्य भावस्येति विग्रह। **येन** हेतुप्रतिनियमेन। **तज्जन्मा** विनश्वरजननाद्धेतोर्जन्म यस्य स तथा स्यान्नश्वरः स्यान्नान्यो य[1]स्तद्विलक्षणहेतुजन्मेति। कि कारण (।) **सर्वाकारजन्मनां नाशदर्शनात्**। सर्वाकारेभ्यो हेतुभ्यो जन्म येषामिति विग्रहः।

नन्वित्यादि परः। **सर्वाकारेभ्यो** हेतुभ्यो **जन्म** येषाम्भावानान्ते **नश्यन्ती-तीदमप्यनिश्चेयमेव**। कि कारण (।) **तासां** हेतुसामग्रीणामवग्दर्शनैरनिःशेष-**दर्शनात्** साकल्येनादर्शनात्। कस्याश्चित् सामग्र्या नश्वरजनिकाया[2] दर्शनाद-दृष्टा अपि तज्जातीयतया तथाभूता निश्चीयन्त इति चेद् (।)

रात्मानं जनयेत्।

न (।) ज्ञेयाधिकारा[1]द्ये कदाचित् क्वचित् केनचिज्ज्ञाताः सन्तो न ज्ञायन्ते। तेषां सत्तानुबन्धी नाश इति ब्रूमः (।) त एव कृतका अनित्याः साध्यन्ते। न ह्ययं संभवोस्ति। यत्ते ज्ञानजननस्वभावाः पुनरनष्टा न जनयेयुरपेक्षेरन्वा परं। तज्जननस्वभावस्य निष्पत्तेः (।) न च तेषु। न (।) यत्केषु कस्यचित् कदाचित् ज्ञानं निवर्त्तेत। न चैवंभूतं किंचिदस्ति। सर्वस्य केनचित् कदाचि[2]ज्ज्ञानात्। ज्ञानमात्रार्थक्रियायामप्यसामर्थ्याद् वस्त्वेव न स्यात् (।) तथा हि। तल्लक्षणं वस्त्विति

आह **विचित्रे**त्यादि। **विचित्रा शक्तिर्यासामिति** विग्रह। **सामग्र्यो दृश्यन्ते। तत्र** विचित्रशक्तिषु सामग्रीषु मध्ये **काचित्** सामग्री **स्यादपि या भावमनश्वरात्मानं जनयेत्।**

नेत्यादिना परिहरति। अय च परिहारो नाशस्वभावो भावाना नानुत्पत्तिमता। यदीत्यत्रापि चो[3]द्ये द्रष्टव्य साधारणत्वात्। नायन्दोष (।) कस्मात् (।) **ज्ञेयाधिकारात्।**

एतदेव स्पष्टयन्नाह। ये **कदाचित्** काले **क्वचिद्** देशे **केनचित्** पुरुषेणार्था **ज्ञाताः सन्तः** पुनर्न **ज्ञायन्ते तेषां सन्तानानुबन्धी नाश इति ब्रूमः**। ये चाज्ञाता सन्तो ज्ञायन्ते ज्ञाता वा पुनर्न ज्ञायन्ते (।) **त एव कृतका अनित्यास्साध्यन्ते**। अनेन च कृतकत्वस्य क्षणिकत्वेन व्याप्ति सत्त्वादि[4]त्यनेन निश्चीयत इत्युक्तम्भवति।

ननु च यद्यपि ते ज्ञातास्सन्तो न ज्ञायन्ते तथापि कथन्तेषामनित्यत्वमिति (।)

अत आह। यस्मान्न **ह्यस्ति सम्भवो यत् ते ज्ञानजननस्वभावाः** पूर्वम्**पुनरनष्टास्तस्मिन्नेव** स्वभावे स्थिता **न जनयेयुः**।

सहकार्यभावान्न जनयन्तीति चेद् (।)

आह। **अपेक्षेरन्नापरं**। न ह्यस्य सम्भवोस्तीति सम्बन्ध·। कि कारण (।) **तज्ज[5]ननस्वभावस्य निष्पन्नत्वात्।**

अथ स्यात् (।) तेष्वनपेक्षेष्वपि कस्यचित् कदाचिज्ज्ञानम्भविष्यतीति (।)

अत आह। **न च तेषु** नैव तेषु ज्ञानजननस्वभावेषु व्यवस्थितेषु सहकार्यनपेक्षेषु **कस्यचित्** पुस। **कदाचित्** काले किचिज्ज्ञानं **निवर्त्तेत। सर्वस्य** सर्वदा स्वविषयाणि ज्ञानानि जनयेयु। न चैव। कदाचित् ज्ञानदर्शनात्। ततश्च ज्ञानमजनय[6]न्तो जनकस्वभावात् प्रच्युता इति गम्यते।

यत्तर्ह्यज्ञेय कृतकमकृतकम्वा तन्नैवम्भविष्यतीति (।)

अत आह। **ने**त्यादि। न चैवभूतमज्ञेय किचिदस्ति। कि कारण (।) **सर्वस्यार्थस्य केनचित्पुरुषेण कदाचिज्ज्ञानात्**। अथ तज्ज्ञानमपि न जनयेत्। तदा

वक्ष्यामः। तस्य च विनाशाव्यभिचारात्मसत्तानुबन्धी ॥

प्रत्याख्येयाऽत एवैषां सम्बन्धस्यापि नित्यता।

अत एव च यथोक्ताद् वस्तुमात्रानुबन्धाद् विनाशस्य शब्दवत् सम्बन्धनित्यतापि प्रत्याख्येया॥

(च) कुमारिलमत-निरासः

(क) अपौरुषेयत्वे दोषाः

या च शब्दशक्तियोग्यताख्यार्थप्रतिप[3]त्त्यन्त्याश्रयो जै मि नी यै र्वर्ण्यते सार्थान्तरमेव न भवति। तथा हि (।) योग्यतेति रूपातिशय एव भावानामित्यावेदितं प्राक्।

अस्तु वार्थान्तरं। तथापि॥

सम्बन्धदोषैः प्रागुक्तैः शब्दशक्तिश्च दूषिता॥ (२८६)

उक्तो हि सम्बन्धार्थान्तरवादेऽनेकप्रकारो दोषः। तेनैव सा शब्दशक्तिर्दूषितेति न पुनरु[4]च्यते। अपि च।

ज्ञानमात्रार्थक्रियायामप्यसामर्थ्ये तत्सामर्थ्यरहितम्वस्त्वेव न स्यात्।[7] तथा हि 189a
तल्लक्षणमर्थक्रियासामर्थ्यलक्षणम्वस्त्विति वक्ष्यामः। तस्य चार्थक्रियासमर्थस्य वस्तुन क्रमेणार्थक्रिया कुर्वतो विनाशाव्यभिचारादहेतुत्वाच्च विनाशस्य सत्तानुबन्धी विनाश सिद्ध। अत एवानन्तरोक्तात् सर्वभावाना क्षणिकत्वसाधनाच्छब्दार्थयोस्सम्बन्धस्यापि नित्यता प्रत्याख्येया। दूष्या।

(ने)त्यादिना व्याचष्टे। अत एव यथोक्ताद् विनाशस्य वस्तुमात्रानु[1]बन्धात्। शब्दवद् (।) यथा शब्दस्य नित्यता प्रतिक्षिप्ता तद्वत् सम्बन्धस्यापि नित्यता प्रत्याख्येया।

एवन्तावत् सम्बन्ध व्यतिरिक्तमभ्युपगम्य दोष उक्तोऽधुनाऽव्यतिरिक्त एव सम्बन्धो न युज्यत इति (।)

आह। या च शब्दशक्तिर्योग्यताख्या योग्यतासज्ञितार्थप्रतिपत्त्याश्रयो जै मि नी यै र्व र्ण्यते। सा योग्यताशब्दार्थान्तरमेव न भवति। तथा हि भावानास्व[2]भावातिशय एव विवक्षितार्थक्रियासमर्थो योग्यतेत्यावेदित प्राक्। "समर्थं हि रूप शब्दस्य योग्यते" त्यादिना।

तेन शब्दस्यानित्यत्वे योग्यताया अप्यनित्यत्वमव्यतिरेकादिति भाव.।

नाऽपौरुषेयमित्येव यथार्थज्ञानसाधनं।
दृष्टोऽन्यथापि वह्न्यादेरदुष्टः पुरुषागसा ॥ (२८७)

भवन्तु नामापौरुषेया वैदिकाः शब्दास्तथापि। संभाव्यमेवैषामयथार्थज्ञानहेतुत्वं। न हि पुरुषदोषोपधानादेवार्थेषु ज्ञानविभ्रमः। [1]तद्रहितानामपि प्रदीपादीनां नीलोत्पलादिषु वि[5]तथज्ञानजननात्। तदिमे शब्दाः संस्कारनिरपेक्षाः प्रकृत्या नार्थेषु प्रतिभानहेतवः स्युः (।) स्वभावविशेषाद् वह्न्यादिवत्। वितथव्यक्तयश्च नियमेन। नियमकारणाभावादयुक्तमिति चेद् (।) अवितथव्यक्तिनियमे किं कारणं। तस्माद् यथार्थव्यक्तिनियमवत्। प्रकृत्याऽयथार्थव्यक्ति-

---

अस्तु वा शब्दादर्थान्तरं योग्यता। **तथापि शब्दशक्तिश्च दूषिता** वेदितव्या। कै. (।) **सम्बन्धदोषैः प्रागुक्तैः**।

उक्तो हीत्यादिना व्याचष्टे। **सम्बन्धः** सम्बन्धिभ्योर्था[3]न्तरमित्येवम्वादे-**ऽनेकप्रकारो दोष उक्तः**।

"सम्बन्धिनामनित्यत्वान्न सम्बन्धेस्ति नित्यता" इत्यादिना। तेनैव प्रागुक्तेन दोषेण शब्दशक्तिरपि सम्बन्धरूपेण कल्पिता दूषितेति कृत्वा **न पुनः पृथगुच्यते** दोष.।

तदेव **नापौरुषेयो** वेद.।

भवतु नामापौरुषेयस्तथापि न तस्य सत्यार्थता निश्चेतु शक्या। यस्माद-**पौरुषेयमित्येव** कृत्वा **न** वै[4]दिकम्वचन **यथार्थज्ञानसाधनं**। अविपरीतार्थज्ञानहेतुः। यस्मात् **पुरुषागसा** पुरुषदोषेणा**दुष्टो वह्न्यादिना** (।) आदिशब्दाज्ज्योत्स्नादि (।) **अन्यथापि दृष्टो** वितथज्ञानहेतुर्दृष्ट इत्यर्थः।

भवत्वित्यादिना व्याचष्टे। **भवन्तु नामापौरुषेया वैदिकाः शब्दास्तथापि सम्भाव्यमेवैषां** वैदिकाना शब्दाना**मयथार्थज्ञानहेतुत्वं**। यतो **न हि पुरुषदोषोपधानादेव**। पुरुषदोषे रागादिभिरुपधानात्। सस्कारादेव। **अर्थेषु** ज्ञाप्येषु ज्ञापकाना शब्दाना **ज्ञानविभ्रमो** ज्ञानविपर्यास.। प्रकृत्यापि मिथ्याज्ञानजननस्य सम्भाव्यत्वात्। यस्मात् **तद्रहितानामपि** पुरुषदोषोपधानरहितानामपि **प्रदीपादीनाम्वितथार्थज्ञानजननात्**। आदिशब्दाज्ज्योत्स्नादीना (।) कुत्र (।) **नीलोत्प[6]लादिषु**। तथा हि रात्रौ प्रदीपो नीलोत्पले रक्तप्रतिभासज्ञानहेतुः। ज्योत्स्ना पीते वस्त्रे शुक्लज्ञानहेतुः। **तदिति** तस्मा**दिमे** वैदिकाः **शब्दाः** पुरुष**संस्कारनिरपेक्षाः** स्युरिति सम्बन्ध. **प्रकृत्या** च स्वभावेन **चार्थेषु प्रतीतिहेतवो** ज्ञानहेतवः स्युः।
189b किं कारण (।) **स्वभावविशेषात्** स्वरूपविशेषात्। किमिव (।) **वह्न्यादिवत्**।[7]

नियमः किन्न कल्प्यते (।) अथवा वह्न्यादिवदेवा[6]र्थेषूभयज्ञानहेतुत्वं स्यात्। न ह्यपौरुषेया अपि वह्न्यादय एकत्र यथार्थज्ञानहेतवोपि सर्वत्र तथा भवन्ति। तथा शब्दानामप्यपौरुषेयत्वेप्युभयं स्यात्।

भवतु बह्न्यादीनां कृतकत्वाद् यथाप्रत्ययमन्यत्रान्यथात्व। न पुर्नानत्येषु शब्देष्वेतदस्ति।

नन्वेवंविधः तत्राप्यस्त्येव धर्मः (।) तेषामपि संकेतवलादन्य[7]व्यावृत्तेः। कार्यजननस्वभावस्थितावेषां समयादेरपेक्षणीयस्याभावात्। ततः प्रतीतिरर्थेषु सर्वस्य सर्वदा स्यात्। न चास्ति। तस्मान्न शब्दाः स्थितस्वभावा इति।

अपि च।

वितथव्यक्तयश्च स्युर्नियमेन। वितथा व्यक्तयोर्थप्रतिपत्तयो येभ्य शब्देभ्य इति विग्रह। वितथव्यक्तय एव सदा वैदिका शब्दा इत्यस्य नियमस्य कारण नास्ति (।) ततो **नियमकारणाभावाद्** वितथव्यक्तय एव वैदिका शब्दा इत्येतत् कल्पन-**मयुक्तमिति चेत्**। तवापि मी मा स क स्यावितथज्ञानहेतवो वैदिका शब्दा इत्य-स्मिन्नवितथव्यक्तिनियमे **कि कारणं** (।) नै[1]व किञ्चित्। **तस्मात्** त्वन्मतेन **यथार्थव्यक्तिनियमत्वात् प्रकृत्या** स्वभावेना**यथार्थव्यक्तिनियमः किन्न कल्प्यते।**

अथ**वा** यथा वह्न्यादयो घटादिषु नीलोत्पलादिषु **चार्थेषु** यथायोग सत्यासत्य-ज्ञानहेतवस्तथा वैदिकाना शब्दाना**मर्थेषु** मिथ्येतरज्ञानहेतुत्वेनो**भयज्ञानहेतुत्वं स्यात्**। यस्मान्न **ह्यपौरुषेया अपि वह्न्यादयो** वनदवचन्द्रालोकादिरूपा। **एकत्र**[2] घटादौ दिवा **यथार्थज्ञानहेतवोपि** सन्त **सर्वत्र** नीलोत्पलादावपि रात्रौ। **तथा भवन्ति** यथार्थज्ञानहेतवो भवन्ति। **तथा** वैदिकाना **शब्दानामप्यपौरुषेयत्वेप्युभयं स्यात्**। यथार्थायथार्थज्ञानहेतुत्व स्यात्।

भवत्वित्यादि पर। **वह्न्यादीनां कृतकत्वात्** कारणाद् **यथाप्रत्ययं** यस्य यद्भ्रान्तिकारण। तद्वशा**दन्यत्र** नीलोत्पलादौ। **अन्यथात्वं** वितथज्ञान[3]हेतुत्व **न पुर्नानत्येषु शब्देष्वेतत्** सहकारिप्रत्ययबलेन मिथ्याज्ञानहेतुत्व**मस्ति**। नित्याना सहकारिबलेनान्यथा प्रवृत्त्यसम्भवात्।

नन्वित्यादि सि द्धा न्त वा दी। **एवंविध** इति सहकारिबलेनार्थेष्यन्यथा परि**वृत्तिलक्षणोस्त्येव धर्म्मः** (।) **तत्रापीति** वैदिकेष्वपि शब्देषु। कि कारण (।) **तेषामपि** वैदिकाना **संकेतबलादन्यथावृत्तेः** पुरुषेच्छानुविधायि[4]सकेतबले-नान्यथा प्रतीतिजननादित्यर्थ।

अथ सकेतबलान्न तेषामर्थेषु परावृत्तिरिष्यते। किन्तु नित्यत्वात् स्वभावत एव स्वविषयज्ञानजननस्वभावा वैदिका शब्दा। तदा **कार्यस्य** स्वविषयज्ञानस्य

न ज्ञानहेतुतैव स्यात् तस्मिन्नकृतके मते ।
नित्येभ्यो वस्तुसामर्थ्यान्न हि जन्मास्ति कस्यचित् ॥[6] (२८८)

यद्यकृतकः शब्दो न तस्मादर्थेषु प्रतीतिरेव स्यात् प्रतीतिजन्मेतरकालयोस्तुल्यरूपस्य प्रतीतिर्ज[1]न्मनि सामर्थ्यसंभावनाऽयोगात्। एवमयञ्जनको नैवमिति विवे(च)नीयस्य रूपभेदस्याभावात्। न यादृशोस्याजनकस्तादृश एव जनको युक्तोऽन्यापेक्षापि निषिद्धैव। तस्मान्न नित्यानां क्वचिज्ज्ञानजननसामर्थ्यं। कदाचिदजनने नित्यमजननप्रसंगात्। कार्यसातत्यादर्शनाच्च (।) न ते कथं विकर्त्तार इत्युक्तं प्राक्।

यो **जननस्वभावस्तत्र स्थितौ चैषां** वैदिकाना शब्दाना **समयादेः** (।) आदिशब्दादन्यस्यापि करणव्यापारादेरपेक्षणीयस्याभावात् कारणात्। **ततो** वै[5]दिकाच्छब्दात्**प्रतीतिर्ज्ञानमर्थेषु सर्वस्य** पुस **सर्वदा स्यात्। न चास्ति** सर्वस्य सर्वदार्थप्रतीति । **तस्मान्न** वैदिका **शब्दा** अर्थप्रतीतिप्रतिष्ठितस्वभावा किन्तु समयादिकमपेक्ष्यन्त एवेति। तेपि मिथ्याज्ञानस्य हेतव इति तदवस्थो दोष ।

अपि च (।) **तस्मिन्** शब्देऽकृतके **मते** इष्टे सति **न ज्ञानहेतुतैव स्यात्।** यस्मान्न हि **नित्येभ्यो वस्तुसामर्थ्यात्** स्वरू[6]पोपधानसामर्थ्येन **जन्मास्ति कस्यचित्।** ज्ञानस्यान्यस्य वा (।)

यद्यकृतक इत्यादिना व्याचष्टे। **यद्यकृतकश्शब्दो** वैदिकस्ततो**र्थेषु प्रतीतिरेव न स्यात्।** कि कारण (।) **प्रतीतीत्यादि**। इतरदजन्माजन्म च इतरच्चेति विग्रह । तयो कालो **प्रतीतेर्जन्मेतरकालयोस्तुल्यरूपस्य** नित्यत्वादेकरूपस्य **प्रती-**
1902 **तिर्जन्मनि सामर्थ्यसम्भावनाऽयोगात्**। प्रतीतेर[7]जन्मकाले यत्तस्य जनक रूपन्तस्मिन्नेव स्वभावे स्थितस्य जनकत्वविरोधात्। कि कारणम् (।) **एवमनेन** रूपे**णायं** नित्याभिमतो **जनको नैवमनेन** रूपेणाजनक **इत्येव विवेचनीयस्य** पृथग् व्यवस्थाप्यस्य **रूपभेदस्य** स्वभावभेदस्या**भावात्**। नित्यस्य सर्वदैकरूपत्वात्।

एकस्वभावोपि पूर्वमजनक पश्चाज्जनको भविष्यतीति चेद् (।)

आह **ने**त्यादि। **अस्य**[1] नित्यस्याजनको **यादृशः** स्वभावस्**तादृश एव जनको न युक्तः**। एकरूपत्वात्। सहकारिणमधिक प्राप्य पश्चाज्जनयतीत्यादि मिथ्या। यतो**न्यापेक्षापि** सहकार्यपेक्षापि नित्यस्य **निषिद्धैव** प्राक्।

यत एव**न्तस्मान्नित्यानां** शब्दाना **क्वचिद**र्थेषु पुरुषे **ज्ञानजननसामर्थ्यं**। कि कारण (।) **कदाचिज्ज्ञानस्याजनने** सति पश्चादपि तत्स्वभावत्वा**न्नित्यमजननप्रसङ्गात्**।[2]

अथ माभूदेष दोष इति नित्य स्वकार्यं कुर्वन्त्येवेतीष्यते।

या अप्येता नित्याभिमतेष्वाकाशादिषु प्र[2]तिपत्तयस्ता अपि न तत्स्वभाव-भाविन्यः(।) तथा हि (।)

विकल्पवासनोद्भूताः समारोपितगोचराः ।
जायन्ते बुद्धयस्तत्र केवलं नार्थगोचराः (। २८९)

स्वलक्षणविषया हि बुद्धिर्नियमेन तद्योग्यतोपस्थानानुविधायिनीति। तस्मिन् सत्यस्याः कारणे योग्यता भवत्येव। तद्यदि नित्यानां पदार्थानां स्वलक्षणे कस्यचित् ज्ञानं स्यात् (।) **सर्वस्य सर्वदा स्यात्।**[3] **कार्यं विशेषा हि व्यक्तयः कथंचित् क्वचिदुपयुज्यमानास्तदुपजननयोग्यतातिशयप्रतिलंभहेतुं वस्तुविशेषमपेक्षन्त इति युक्तं। तथाऽकार्यविशेषो नित्यो भावः केनचिद् गृह्यमाणोतत्कारणापेक्षो यदि ग्रहणमस्य जनयेत् युक्तं यत्तेनैव गृह्येत। तच्च स्थितस्वभावत्वान्न**

तदपि नास्ति। स्वविषयज्ञानकार्यस्य **सातत्यादर्शनाच्च। न ते** शब्दाः कथचित् केनचित् प्रकारेण **कर्त्तार इत्येतच्चोक्तं प्राक्।**

स्यादेतत् (।) नित्येभ्योप्याकाशादिभ्यो बुद्धयो भवन्त्येव कस्यचित् कदाचिदिति (।)

अत आह। **या अप्येता नित्याभिमतेष्वाकाशादिषु प्रतिपत्तयो** बुद्धयो भविष्यन्तीतीष्यते। **ता अपि[3]न तत्स्वभावभाविन्यो** नाकाशादिस्वभावायत्तजन्मान। नित्याना क्रमयौगपद्याभ्यामर्थक्रियाविरोधात्।

किम्पुनरुत्पत्तौ तासा निमित्तमिति (।)

आह। **न हीत्यादि**। अनादि समानजातीयो यो **विकल्पस्तेनाहिता** या **वासना** शक्तिस्तत **उद्भूता** उत्पन्ना। यथागम **समारोपितो** य आकाशाद्याकारस्तद्**गोचरा**रास्तत्प्रतिभासिन्य एव **केवलं** गता। तत्र[4] बाह्यत्वेन कल्पितेष्वाकाशादिषु **जायन्ते। न** तु ता **बुद्धयोर्थगोचरा** नाकाशादिस्वलक्षणविषया।

स्वलक्षणेत्यादिना व्याचष्टे। स्वलक्षणविषया हि बुद्धिर्नियमेन तस्य स्वलक्षणस्य **योग्यता** सामर्थ्यन्तस्योपस्थानं सन्निधानन्तदनुविधायिनी तद्भाव एव भावि**नीति** कृत्वा। **अस्या** बुद्धेर्यत् कारण स्वलक्षण योग्य समर्थन्त**स्मिन् कारणे** योग्ये **सति** सा[5] बुद्धिर्भ**वत्येव। तदेव** न्याये स्थिते **यदि नित्यानां पदार्थानां स्वलक्षणे कस्यचित्** पुसो **ज्ञानं स्यात्।** तदा नित्य कारणस्य सन्निधात् **सर्वस्य** पुस **सर्वदा स्यात्।**

नापि सहकार्यपेक्षया नित्याना कस्यचित् कदाचिज्ज्ञानजननन्तथा हि **कार्यो** जन्य सहकारिभि**र्विशेषो** यासा व्यक्तीनान्ता **हि व्यक्तयः कथंचिद्देशकालावस्था**नियमेन **क्वचित्** कार्ये **उप[6]युज्यमाना** हेतुत्व प्रतिपद्यमानास्तस्य कार्यस्योपजनने

सम्भवतीति।

सर्वेण समं वा गृह्येत।[4] **न वा केनचिदिति। सन् केनचिद् दृष्टो न नित्यः कश्चिदतीन्द्रियः स्यात्। न चैतदस्ति। तस्मादर्थसामर्थ्यानपेक्षाः समारोपित-गोचराः। आन्तरमेवोपादानं विकल्पवासनाप्रबोधमाश्रित्य बाह्यार्थशून्या भ्रान्तय एवाकाशादिषु सर्वस्य संभवन्तीति। तस्मान्नापरवृत्तिधर्माणः शब्दाः (।)**

तत्त्वे वा। कुत एतदवितथ[5] **प्रतीतय एवेति। न हि "अग्निर्हिमस्य भेषज" मित्यादिषु शीतप्रतिघातसामर्थ्यं लोकप्रसिद्धमग्नेः ग्या (?ज्ञा) प्यत इति सर्वं तथा भवति (।) लोकस्य स्वेच्छाकृतसंकेतानुव्यवहारात् (।) किमयं लोकः**

योग्यो योतिशय आत्मभूतस्तस्य **प्रलम्भे हेतुम्वस्तुविशेषं** सहकारिणमिति यावत्।

तथेत्यनित्यत्ववत्। नित्यो **भावो कार्यविशेषो**नाधेयातिशय **केनचित्** पुसा **गृह्यमाणस्तत्कारणापेक्षः** ग्रहणसहकारिकारणापेक्षो **यदि ग्रहणमस्य** पुसो **जनयेत्।**

190b **युक्तं यत्ते**[7]**नैव** पुसा **गृह्येत** नान्येन सहकारिप्रतिनियमात्। **तच्च** सहकार्यपेक्षया जननं नित्यस्य **न सम्भवति।** कि कारण (।) **स्थितस्वभावत्वाद्।** नित्यस्य सहकारिणा नाधेयातिशयत्वादिति यावत्।

ततश्च नित्य जननस्वभावे स्थितत्वात् **सर्वेण** पुसा **सममेककाल गृह्येताथ** सर्वेणाजनकत्वान्न गृह्येत। तदा स एवास्य स्वभाव इति **न वा केनचित्** पुरुषेण कदाचिद् गृह्ये[1]त। **इति** हेतोस्**सन्** विद्यमानो नित्यो भावो यदि **केनचित्** योगिनापि **दृष्टस्तदा न कश्चिन्नित्योऽतीन्द्रियः स्यात्सर्वेषामवश्य** केनचिद् दर्शनात्। तथा चासौ नित्य सर्वपुरुषाणामिन्द्रियग्राह्य एवं स्यात् सर्वपुरुषम्प्रति ज्ञानजनन-सामर्थ्याविशेषात्। **न चेदं** सर्वपुरुषग्राह्यत्वन्नित्यस्यास्ति। **तस्मादर्थसामर्थ्यान-पेक्षा** आकाशादिस्वलक्षणसामर्थ्यानपे[2]क्षका **समारोपितगोचराः।** यथागमम-ध्यारोपिताऽकाशाद्याकारप्रतिभासिन्य इत्यर्थं। **आन्तरमेवोपादान**कारणमाश्रित्य कीदृश **विकल्पवासनाप्रबोधं।** आकाशादिविकल्पनानादिता। या आहिता वासना तस्या प्रबोध कार्योत्पादन प्रत्याभिमुख्य। यत एवार्थसामर्थ्यानपेक्षा अत एव **बाह्यार्थशून्या भ्रान्तय एवाकाशादिषु सर्वस्य** पुसो **भ**[3]**वन्ति।**

स्थितमेतत् (।) नास्ति नित्येभ्य कार्योत्पाद इति। शब्दात्तु दृश्यते **कदा-चिज्ज्ञानकार्यन्तस्मान्नापरावृत्तिधर्माणः शब्दाः।** एकरूपताया अपरावृत्तिरेव धर्मो येषामिति विग्रह। किन्तु ज्ञान ज्ञान प्रत्यर्था भिन्नवृत्तय एव।

अथ नित्यमेकरूपा एव तदा **तत्त्वे वा।** एक रूपत्वे वाऽभ्युपगम्यमानेऽवि-**तथार्थ**प्रतीतय एव वैदिका शब्दा इति **कुत एतत्। अ**[1]**वितथा अर्थप्रतीतिर्येभ्य इति विग्रहः।**

स्वसंकेतमनुविदधदेवं प्रत्येत्याहोस्विच्छब्दस्वभावस्थितेरिति संदेहः (।) लोकेच्छ-यापि परावर्त्यमानाः शब्दाः पुनरन्यत्रा[6]न्यथा दृश्यन्त इति। लोकप्रसिद्धच-नुविना(धा ?)नेपि संभवत्येवैषामन्यथाभावः। तस्मात् कस्यचिदवैपरीत्यदर्शनेपि सर्व्वेषां तथाभावो न सिध्यति।

(ख) कृतकत्वेऽपि दोषाः

अकृतकस्वभावत्वेपि ह्येषां कश्चिन्मिथ्यार्थनियतोपि स्यादिति स्वभावापरि-ज्ञानात् सर्वत्र संशयः स्यात्।

स्यान्मतम् (।) "अग्निर्हिमस्य भेषज"मित्यादिवैदिकवाक्यस्यावितथत्वात् सर्वस्यावितथत्वमिति (।)

अत आह। **न** हीत्यादि। **न ह्यग्निर्हिमस्य भेषजं** प्रतिपक्ष **इत्येवमादिषु** वेदवाक्येष्वग्ने **शीतप्रतिघातसामर्थ्यम्**वेदवाक्यात्। प्रागपि यथासकेत **लोक-प्रसिद्धं ख्याप्यत इति** कृत्वा **सर्वमदृष्टार्थमपि** वेदवा[5]क्यन्तथा **भवति**। अवित-थम्भवति। लोकप्रसिद्धे ह्यर्थे लोकस्य सकेतानुसारेण व्यवहारो दृष्ट ि ततो-**लोकस्य स्वेच्छाकृतो** य **संकेतस्तेनानु** पश्चाद् व्यवहारकाले **व्यवहारात्**। सन्देह एव किम**यं लोकः स्वसंकेतमनुविदधत्**। अनुसरन्।

अग्निर्हिमस्य भेषजमित्यादिवाक्या**देवम्प्रत्येत्य**ग्ने शीतापनोदसामर्थ्यमिति निश्चिनोत्या**होस्विच्छब्द[6]स्वभा**व**स्थितेः** शब्दस्य स्वभावेन प्रकृत्या सामर्थ्यनियमा-देव प्रत्येतीति। यदा च दृष्ट एवार्थे वैदिकस्य शब्दस्य स्वतोर्थप्रतिपादनशक्ति-स्सन्दिग्धा तदात्यन्तपरोक्षेप्यर्थे नितरा सम्भाव्यत इति भाव।

नन्वनादिलोकप्रसिद्धचनुविधानेनैव वैदिकाना शब्दानामर्थवत्ता न च तत्र सन्देह प्रतिभासत इति (।)

अत आह। **लोकेच्छया परावर्त्यमा[7]ना** यथासमयमर्थेषु निवेश्यमाना पुन- 191a
रन्यत्र देशादिपरावृत्तावन्यथेत्यर्थान्तरनिवेशेन परावर्त्यमाना शब्दा **दृश्यन्ते**। इति हेतो**र्लोकप्रसिद्ध्यानुविधानेप्य**ङ्गीक्रियमाणे **सम्भवत्येवैषां** वैदिकाना शब्दा-नामन्यथाभावो मिथ्यात्व। प्रसिद्धेरेवानियतत्वात्।

तस्मात् कस्यचिद् वैदिकस्य वाक्यस्या"ग्निर्हिमस्यभेषज"मित्यादिकस्यावै-**परीत्यदर्शने[1]पि सर्वेषां** वेदवाक्यानान्तथाभावस्सत्यार्थत्वन्न **सिध्यति**।

अकृतकत्वादेव सत्यार्थत्वमिति चेद् (।)

मिथ्यात्वं कृतकेष्वेव दृष्टमित्यकृतं वचः।
सत्त्यार्थं व्यतिरेकस्य विरोधिव्यापनाद् यदि॥ (२९०)

40a **अथ[7] यन्मिथ्यार्थं वचनं तदखिलं कृतकमिति हेतुव्यतिरेकेण साध्यव्यतिरेकस्य व्याप्तेरन्यत्रासम्भवादकृतकं सत्यार्थमिति स्याद् विनाप्यन्वयेन। यो हि येनाव्याप्तस्तत्र तद्व्यतिरेकः शंक्येत। न च विरुद्धयोरेकत्र सम्भवोस्त्यसंभवे विजातीयस्य गत्यन्तराभावाद् (।) इष्टार्थसिद्धेस्तत्साधनत्वाच्च लिंगस्य। व्यर्थमन्वयदर्शनं। व्यतिरेकमात्रेणैव सिद्धे[1]रिति।**

सत्यमेतद् (।) यदि विपक्षयोर्व्याप्यव्यापकभावः सिध्येत् स तु न सिद्धो

आह। **अकृतकस्वभावत्वेह्येषां** वैदिकाना शब्दाना **मिथ्यार्थनियतोपि कश्चिच्छब्द** स्यात्। इतिहेतो स्वभावपरिज्ञानादय सत्यार्थोय मिथ्यार्थ **इत्येव** विवेकेन **शब्दस्वभावानिश्चयात् सर्वत्र** शब्दे **संशयः स्यात्**। सत्यार्थम्वैदिकम्वाक्यमकृतक[2]-त्वादिति प्रयोगे क्रियमाणेन्वयाभावात्।

व्यतिरेकिप्रयोगमाह। **मिथ्यात्व**मित्यादिना। **मिथ्यात्वं कृतकेष्वेव दृष्टमिति** हेतोरकृतकम्वचः **सत्यार्थं यदी**ति सम्बन्ध। कि कारण (।) **व्यतिरेकेस्य विरोधिव्यापनात्**। अकृतकस्य हेतोर्यो व्यतिरेक कृतकत्वन्तेन सत्यार्थत्व यत्साध्यन्तस्य विरोधिमिथ्यात्वन्तस्य व्यापनात्। व्यतिरेकस्येति कर्त्त[3]रि षष्ठी। हेतुव्यतिरेकेण कृतकत्वेन सत्यार्थविरोधिनो मिथ्यार्थत्वस्य व्याप्तत्वात्। वैदिके शब्देऽकृतकत्वात् कृतकत्वनिवृत्तौ मिथ्यार्थत्वनिवृत्ते सत्यार्थत्व सिध्यत्येव।

यथेत्यादिना व्याचष्टे। यत्किञ्चि**न्मिथ्यार्थम्वचः तदखिलन्निःशेष कृतकमिति** कृत्वा। **हेतो**रकृतकत्वस्य **व्यतिरेकेण** कृतकत्वेन **साध्यव्यतिरेकस्य**। साध्य स[4]त्यार्थत्व तस्य व्यतिरेको मिथ्यात्वन्तस्य **व्याप्तेरन्यत्रा**कृतके मिथ्यार्थत्वस्या**सम्भवात्** कारणा**दकृतकं सत्यार्थमिति स्याद् विनाप्यन्वयेन**। सत्यार्थम्वैदिकम्वचो कृतकत्वादित्यत्र प्रयोगे यद्यप्यन्वयो नास्ति। तथाप्यन्वयेन विना सिध्यत्येवेत्यर्थ। यस्माद् **यो ह्यर्थो** मिथ्यात्वलक्षणो **येन** कृतकत्वेना**व्याप्तस्तत्र** मिथ्यात्वे **तद्व्यतिरे**[5]कस्तस्याव्यापकस्य कृतकत्वस्य व्यतिरेको कृतकत्वलक्षणो धर्म **आशंक्येत**ायमपि मिथ्यात्वे भवेदिति। तच्चेह नास्ति कृतकत्वेन मिथ्यार्थताया व्याप्ते। **न च** विरुद्धेन व्याप्ते विरुद्धस्य सम्भवो यतो न च **विरुद्धयोः** कृतकत्वाकृतकत्वयो**रेकत्र** मिथ्यात्वे **सम्भवोस्ति**। तेनाकृतके सत्यार्थत्व **विजातीयस्य** मिथ्यार्थत्वस्या**सम्भवे**। सत्यार्थमिथ्या[6]र्थत्वाभ्या नान्या गतिरस्तीत **गत्यन्तराभावादकृतकत्वेन** सत्यार्थ एव भवितव्यमित्यकृतकत्वा**विष्टा-**

यस्मात्।

हेतावसम्भवेऽनुक्ते भावस्तस्यापि शङ्क्यते।
विरुद्धानाम्पदार्थानामपि व्यापकदर्शनात्॥ (२९१)

यदि हेतोः साध्यविपक्षेऽभावः सिध्येत् साध्यव्यतिरेकं हेतुव्यतिरेको व्याप्नुयात्। न च तत्र तस्यासंभवे प्रमाणं पश्यामः। न चाविरुद्धो विधिः प्रतिषेधसाधनो युक्तोऽतिप्रसंगात्। न चै [2]कत्र दृष्टस्यान्यत्र सम्भव एव पृथग्विरुद्धसहभाविनामपि दर्शनात्। अनित्यवत् प्रयत्नानन्तरीयकेतरयोर्न च तथा-

---

र्थस्य सत्यार्थत्वलक्षणस्य **सिद्धेः** किमन्वयेन। **तत्साधनत्वाच्च लिङ्गस्य** इष्टार्थसाधनत्वाच्च लिङ्गस्य **व्यर्थमन्वयदर्शनं**। कस्माद् (।) यथोक्तविधिना **व्यतिरेकमात्रेणैव** साध्यसिद्धेरिति।[7] 191b

सत्यमेतदित्या चार्य। विपक्षाद्धेतोर्व्यतिरेके सिद्धे सति साध्य सिध्येदिति सत्यमेतत्। **यदि** सत्यार्थताऽकृतकत्व**विपक्षयो**र्मिथ्यात्वकृतकत्वयो**र्व्याप्यव्यापकभावः सिध्येत्**। तदा कृतकत्वेन व्याप्तान्मिथ्यार्थत्वादकृतकन्निवर्त्तते। **स तु** व्याप्यव्यापकभावो विपक्षयोर्न **सिद्धः**। कि कारण।[1] **यस्मात्** मिथ्यात्वेऽकृतकत्वस्या**सम्भवे**ऽसम्भवनिमित्त बाधके **हेतावनुक्ते** सति। **भावस्तत्स्यात्तस्याप्य**कृतकत्वस्य मिथ्यात्वे **शक्यते**। अकृतक च स्यान्मिथ्यार्थ चेति। (२९० ab)

ननु च मिथ्यात्वे कृतकत्व दृष्ट (।) यत्र च कृतकत्वन्तत्र कथमकृतकत्वमिति (।)

अत आह। **विरुद्धाना**मित्यादि। **विरुद्धानामपि पदार्थानामेकव्यापकदर्शनात्।** यथा प्रयत्ना[2]प्रयत्ननान्तरीयकाणामनित्यानामेकेन कृतकत्वेन व्याप्ति।

यदीत्यादिना व्याचष्टे। **यद्यकृ**तकत्वाख्यस्य **हेतोस्साध्यविपक्षे** मिथ्यार्थत्वेऽ**भावः सिध्येत्तदा साध्यस्य** सत्यार्थत्वस्य **व्यतिरेक** मिथ्यात्व। **हेतुव्यतिरेकः** हेतोरकृतकत्वस्य व्यतिरेक कृतकत्वाख्यो **व्याप्नुयात्**। **न च तस्या**कृतकत्वस्य **तत्र** मिथ्यार्थतायाम**सम्भवे** बाधक **प्रमा**[3]**णं पश्यामः**।

अकृतकत्वादेव वेदस्य मिथ्यार्थतायामवृत्तिरिति चेद् (।)

आह। **न चे**त्यादि। मिथ्यार्थत्वेना**विरुद्धस्या**कृतत्वस्य **विधि**र्मिथ्यार्थता**प्रतिषेधस्य साधनो युक्तः**। कस्माद् (।) **अतिप्रसङ्गात्**। एव हि यस्य कस्यचिद् विधानेन यस्य कस्यचिदभाव प्रतीयेत।

कृतके दृष्टस्य मिथ्यात्वस्याकृतके कथ वृत्तिरिति चेद् (।)

आह। **न चैकत्र** कृतके **दृष्टस्य** मिथ्यात्वस्य पु[4]नरन्यत्राकृतके**ऽसम्भव** एव (।) किन्तु सम्भव एव। कि कारणम् (।) **पृथग्विरुद्धसहभाविनाम्पृथगिति**

विधस्यादर्शनादसत्त्वमेव।

यस्मात् (।)

नासत्तासिद्धिरित्युक्तं सर्वतोनुपलम्भनात्।
असिद्धायामसत्तायां संदिग्धा व्यतिरेकिता॥ (२९२)

न ह्ययं पुरुषमात्रकः सर्वं द्रष्टुं समर्थो येनास्य दर्शननिवृत्या न तथा स्यात्। यस्य ज्ञानं [3]ज्ञेयसत्तां न व्यभिचरति स एवं ब्रुवाणः सो (?शो) **भेतादर्शनान्नास्तीति। तदिमे स्वभावदेशकालविप्रकर्षेण सन्तोनुपलक्ष्याः स्युः। तथा हि** (।) **कोत्यन्तपरोक्षेर्थे सम्वादनमितरद्वा सर्वदर्शी वचनस्याकृतकस्येतरस्य वा विभावयितुं समर्थः। प्रतिपादितं चैतत्**(।) **क्वचित्तथा दृष्टानामप्यर्थानां पुनः कथञ्चिदन्यथाभावो यथा क्वचिद् देशे[4] मधुराणि निम्बफलाणि** (?नि)

व्यक्तिभेदेन विरुद्धसहभाविनाम्विरुद्धैरर्थैरेकत्र भाविना**मपि दर्शनात्। अनित्यत्ववत् प्रयत्नानन्तरीयकेतरयोरि**तरदप्रयत्नानन्तरीयक। अनित्यत्व प्रयत्नानन्तरीयकत्वेन सह दृष्टमप्रयत्नानरीयकत्वेन सह दृश्यते।

य[5]द्येवमकृतके मिथ्यात्वस्यादर्शनादभाव स्यादिति (।)

अत आह। **न च तथाविधस्येत्यकृतकस्य** सतो मिथ्यात्वस्या**दर्शनादसत्त्वमेव।**

यस्मान्न विपक्षे हेतो**रसत्तासिद्धिः सर्वतोनुपलम्भनादित्युक्तं** प्राक्। ततश्चा**सिद्धायां** विपक्षाद्धेतो**रसत्तायां सन्दिग्धविपक्षाद् व्यतिरेकिता।**

न हीत्यादिना व्याचष्टे। **अयम्पुरुषमात्रक** इत्यर्वा[6]ग्दर्शी **सर्वम्वस्तु द्रष्टुं समर्थो येनास्य** पुसो **दर्शननिवृत्या न तथा स्यात्**। अदृष्टो न स्यात्। यस्माद् (।) **यस्य** हि पुसो **ज्ञानं ज्ञेयसत्तां न व्यभिचरति**। सदित्येव कृत्वा यस्य सर्वस्मिन् ज्ञ-(?ज्ञे)ये ज्ञान प्रवर्त्तते तस्य ज्ञान ज्ञेयव्यापक निवर्त्तमान ज्ञेयमपि निवर्त्तयति। **अतोसावदर्शनान्नास्तीत्येवं ब्रुवाणः शोभेत**। न सर्वम् (।) **तदिति**। तस्माद्
1922a (।) **इमे** भावा **स[7]न्तोप्यनुपलक्ष्याः** अपोह्या स्यु। कथ (।) **स्वभावदेशकाल-विप्रकर्षेण**। स्वभावश्च देशश्च कालश्च तैर्विप्रकर्षो व्यवधानमिति विग्रह। **सन्नपि** कश्चिद्देशकालाभ्या स्वभावेन च विप्रकृष्ट पिशाचादिवत्। (२९१)

ननु कालव्यवहितानामतीतानागतानामनुपलम्भादसत्व युक्तमभावादेव। सत्य (।) केवलमतीतानागतानामिदानीमनुपलम्भेपि क[1]दाचित् सत्त्व भूत कदा-चिद् भविष्यतीत्यनुपलम्भाभाव इति।

तथा हीत्यादिनैतदेव बोधयति। **को ह्यसर्वदर्शी। अत्यन्तपरोक्षेर्थे वचनस्याकृत-कस्य सम्वादनं। इतरस्य** कृतकस्य वचनस्यात्यन्तपरोक्षेर्थे। **इतरद्वेत्यसम्वादन भावयितुं** निश्चेतु **समर्थः** (।) नैव। परेण कृतकस्यासम्वादनमिष्टमिति द्वयमुक्तं।

संस्कारविशेषादामलकीफलानि च। न चेदानीमतद्दर्शिना तानि प्रतिक्षेप्त-(व्य)न्येवेति। तस्मादकृतकं च स्यान्मिथ्यार्थं चेति विरोधं पश्यामः (।)

न हीयमनुपलब्धिरदृश्यात्म(स्वभाव)साधिकेत्युक्तं। तेन यत्किंचित् मिथ्यार्थं तत्सर्वं पौरुषेयमित्यनिश्चयादव्याप्तिः (।) तथा हि (।)

अन्वयो व्यतिरेको वा सत्त्वं वा साध्यधर्मिणि।
तन्निश्चयफलैर्ज्ञानैः सिद्ध्यन्ति यदि साधनं ॥ (२९३)

तथा चोक्तं (।) "य एव तूभयनिश्चितवाची स साधनं दूषणं वा नान्यतर-

---

स्यादेतद् (।) एकस्य[2] वेदवाक्यस्य सम्वाददर्शनात् सर्वत्र वेदे सम्वादनमिति (।) अत आह। **प्रतिपादितं चैतच्छ्लेषवदनुमानचिन्तायां** पूर्वमेव। किं **प्रतिपादितमित्याह। क्वचिदित्यादि। क्वचिद्** देशकाले वा। **तथेत्येतेन** प्रकारेण **दृष्टानामर्थानां पुनरन्यथाभावः**। पूर्वदृष्टाकाराद् वैपरीत्य। एतदेवाह। **यथेत्यादि संस्कारविशेषात्** क्षीरमध्वादिप[3]रिष्का(रा)दिलक्षणात्। **आमलकीफलानि च क्वचिद्देशे मधुराणीति** सम्बन्ध। **न चेदानीमतद्दर्शिना**। मधुरनिम्बफलाद्यदर्शिना। **तानि मधुराणि निम्बफलानि प्रतिक्षेप्तव्यान्येव**। तथा वेदवाक्यानाम्मिथ्यात्व यदि नाम दृष्टन्तथापि न शक्यम्प्रतिक्षेप्तु। **तस्मादकृतकं च स्यान्मिथ्यार्थं** चेत्यकृतकमिथ्यार्थत्वयोर्न **विरो[4]धम्पश्यामः**।

ननु मिथ्यार्थतायामकृतकत्वस्यानुपलम्भादभाव इत्यत आह। **न हीयमनुपलब्धिरदृश्यात्म**स्वदृश्यस्वभावेर्थेष्वभावस्य साधिकेत्युक्त प्राक्। यतश्चाकृतकत्वस्य न मिथ्यात्वेऽभाव सिद्ध। **तेन यत्किंचिन्मिथ्यात्वन्तत्सर्वं पौरुषेयं। इति** एवम्मिथ्यार्थत्वस्य कृतकत्वेना**व्याप्तिः**। किङ्कारणम**निश्चयात्**। अकृत-[5]कत्वस्य मिथ्यार्थत्वे व्यतिरेकानिश्चयादित्यर्थ। न चानिश्चितव्यतिरेकाद्धेतोस्सकाशात् साध्यसिद्धि·।

तथा हि स्वसाध्येन हेतोर**न्वयो** व्याप्ति। **व्यतिरेको वा** विपक्षाद् व्यावृत्तिर्वा। **सत्वं वा** हेतो **साध्यधर्मिणि**। पक्षधर्म्मीमित्यर्थ। एतानि च त्रीणि रूपाणि **ज्ञानैः** प्रमाणै**र्यदि सिध्यन्ति** कीदृशैस्त**न्निश्चयफलै**स्तस्य रूपत्रयस्य नि[6]श्चय फल येषामिति विग्रह। तदा तानि त्रीणि रूपाणि विवक्षितस्य साध्यस्य **साधनम्भवन्ति। यथोक्तमाचार्य** दि ग्ना गे न। **य एव हयुभयनिश्चितवाची**। वादिप्रतिवादिभ्या निश्चितस्य हेतुलक्षणयुक्तस्यार्थस्य वाचकः **स साधनन्दूषणम्वा**। असिद्धत्वादिलक्षणयुक्तस्यार्थस्य वाचक शब्द· प्रतिवादिना दूषणाभिप्राये[7]ण प्रयुक्त·। **नान्यतरप्रसिद्धः सन्दिग्धवादो** वादिप्रतिवादिभ्या- 192b
मन्यतरप्रसिद्धस्य सन्दिग्धस्य चोभयोरन्यतरस्य च यो वाचकः शब्दः स न साधन

प्रसिद्धः सन्दिग्धवाची पुनः साधनापेक्षत्वादि"ति। को ह्यदृष्टविरोधस्य संभवं प्रत्याचक्षीत। तदयं व्यतिरेकः संशयादसाधनं (।)

अपि च।

यत्र साध्यविपक्षस्य वर्ण्यते व्यतिरेकिता।
स एवास्य सपक्षः स्यात् सर्वो हेतुरतोन्वयी ॥ (२९४)

यत्किंचि[6]न्मिथ्यार्थं तत्सर्वं पौरुषेयमिति। हेतुविपक्षेण साध्यविपक्षस्य व्याप्तिः (।) तदभावेऽभावसिद्धौ स्यात्। भवतस्तेन व्याप्त्ययोगात्। यैव च विजातीययोर्व्यावृत्तिसिद्धिः। सैवान्वयस्थितिः। विपक्षव्यवच्छेदलक्षणत्वात् साध्य-

---

नापि दूषण। कि कारण (।) **पुनः साधनापेक्षत्वात्**। अनिश्चितस्य निश्चयार्थं पुन प्रमाणापेक्षत्वात्। न चाकृतकत्वेन सह मिथ्यार्थत्वस्य विरोधो निश्चितो येनाकृतके मिथ्यात्वस्य व्याति[1]रेक सिद्ध स्यात्।

अथ स्याद् (।) अकृतकत्वादेव वेदे मिथ्यात्व न भवतीति चेद् (।)·

आह। **को** हीत्यादि। यस्मात् **को हि** सचेता अकृतकत्वेन सहा**दृष्टविरोधस्य** मिथ्यात्वस्य **सम्भवस्**वेदवाक्येषु **प्रत्याचक्षीत**। **तदिति** तस्मा**दयम**कृतकत्वस्य हेतोर्यथोक्तो **व्यतिरेको न साधनं**। कि कारण (।) **संशयात्**। इतश्च व्यतिरेकी हेतोर्नास्तीति दर्शय[2]न्नाह।

अपि चेत्यादि। यत्र विषये **साध्यविपक्षस्य**। साध्य सत्यार्थत्वन्तद्विपक्षस्य मिथ्यात्वस्य **वर्ण्यते व्यतिरेकिता**। यत्कृतक न भवति तन्मिथ्यार्थन्न भवतीति। य एव मिथ्यार्थत्वव्यवच्छेदस्य विषय। **स एवास्य** कृतकस्य हेतो. **सपक्षः स्याद्** (।) **अतः** कारणात् **सर्वो हेतुरन्वयी**। अन्वयव्यतिरेकी (।) व्यतिरेकस्य प्रकृतत्वात्। न व्यतिरे[3]क्येवेत्यर्थ।

ननु साध्यधर्मसामान्येन समानोर्थ सपक्ष साधर्म्यदृष्टान्त उच्यते। न चायमिहास्ति (।) तत्कथ स एवास्य सपक्ष स्यादित्युच्यते।

सत्य (।) सपक्षसाध्यत्वेनान्वय एव सपक्ष उच्यते। अत एवाह (।) **सर्वो हेतुरतोन्वयीति**।

यदित्यादिना व्याचष्टे। **यत्किञ्चिन्मिथ्यार्थन्तत्सर्वंम्पौरुषेयमिति**। एव **हेतो**रकृतकत्वस्य **विपक्षेण** कृत[4]कत्वेन **साध्यविपक्षस्य** मिथ्यात्वस्य या **व्याप्तिः** सा **तदभावे** कृतकत्वाभावे मिथ्यात्वस्या**भावसिद्धौ** सत्या **स्यात्**। कि कारण (।) कृतकत्वाभावे **भवतो** मिथ्यार्थत्वस्य **तेन** कृतकत्वेन **व्याप्त्ययोगात्**। तस्माद् व्याप्तिमिच्छता। मिथ्यार्थत्वस्य कृतकत्वनिवृत्त्या निवृत्तिरेष्टव्या। **यैव च** साध्यसाधन**विजातीययो**र्मिथ्यात्वकृतकत्वयो**र्व्यावृत्तिसि[5]द्धिः**। कृतकत्वनिवृत्या

स्य। प्रतिषेधद्वयाच्च विधिसिद्धिरिति। काऽनन्वयाव्यतिरेकव्याप्तिसिद्धिः। तन्न कश्चिद्धेतुरनन्वयो नाम। एकव्यवच्छेद[7]स्य विजातीयसिद्धिनान्तरीयकत्वात। 40b

अनित्यनिरात्मतादिव्यवच्छेदेपि तथा स्यात्।

न (।) व्यतिरेकव्यवच्छेदस्य भावरूपत्वात्। न भावरूपव्यवच्छेदे भावानुषंगः। अभावव्यवच्छेदस्तु नियमेन भावोपस्थानः। भावाभावयोरन्योन्यविवेकरूपत्वाद्(।)अभावरूपस्तु व्यतिरेकः (।) स व्यतिरिच्यमानो भावमुपस्थापयति।

मिथ्यार्थत्वन्निवर्त्तत इत्येवरूपा। **सैवा**कृतकस्य हेतो सत्यार्थत्वेनान्वयस्थितिर-**न्वयव्यवस्थितिः**। कि कारणम् (।) **विपक्षव्यवच्छेदलक्षणत्वात् साध्यस्य** सत्यार्थत्वस्य। विपक्षो मिथ्यात्वन्तस्य कृतकत्वनिवर्त्तनो कृतके यो व्यवच्छेदो व्यावृत्तिस्तल्लक्षणत्वात्।

किञ्च (।) सत्यार्थताप्रतिषेधो मिथ्यार्थत्व। त[6]स्य च मिथ्यार्थत्वस्याकृतके यदा प्रतिषेध कृतस्तदा **प्रतिषेधद्वय**ञ्जात। अस्मा**च्च** सत्यार्थताव्यवच्छेदरूपात् प्रतिषेधद्वयात् सत्यार्थता**विधिसिद्धे**रिति हेतो **कानन्वया**न्वयरहिता। साधनव्यतिरेकेण कृतकत्वेन साध्य**व्यतिरे**कस्य मिथ्यात्वस्य व्याप्तिसिद्धिर्नैवान-न्वया **व्याप्तिसिद्धिः**।

तदिति तस्मान्न **कश्चिद्धेतुरन[7]न्वयो नाम**। किन्तु सर्वोन्वयव्यतिरेकवानेव। 193a
कि कारणम् (।) **एकव्यवच्छेदस्या**कृतके मिथ्यार्थत्वव्यवच्छेदस्य। **विजातीय-सिद्धिनान्तरीयकत्वात्**। मिथ्यार्थता विजातीयस्य सत्यार्थत्वस्य या सिद्धिस्तन्नान्तरीयकत्वात्।

यद्येकव्यवच्छेदस्तद्विजातीयसिद्धिनान्तरीयकस्तदाऽ**नित्यनिरात्मादिव्यवच्छे-देपि** अनित्यताया निरात्मताया आदिशब्दाद् दुःखत्वादीनाञ्च। य[1]दा क्वचिच्छशविषाणादौ व्यवच्छेद क्रियते तदापि **तथा स्यात्**। मिथ्यार्थताव्यवच्छेदेन सत्य(।)र्थसिद्धिवदनित्यत्वादिविजातीयानान्नित्यसात्मकसुखत्वादीना सिद्धि स्यात्। न चैतदिष्ट (।) तथात्रापि माभूदिति परो मन्यते।

नेत्यादिना परिहरति। नायन्दोष। कि कारण (।)**व्यतिरेकव्यवच्छेदस्य भावरूपत्वात्**। व्यतिरेकोऽभावो (।) अभावस्य च यो व्य[2]वच्छेदो निवृत्तिस्तस्य भावरूपत्वात्। अभावनिवृत्त्या भावव्यवस्थेति यावत्। तदनेनभावलक्षणमुक्त। अस्मादेव वचनादिदमप्यर्थादुक्तम्भवति। भावव्यवच्छेदस्याभावरूपत्वादिति। तदनेन भावाभावयोस्तावल्लक्षणमुक्त। तत्र यस्मिन् व्यवच्छिद्यमाने। न भावानुषङ्गः। यस्मिश्च व्यवच्छिद्यमाने भावानुषङ्गस्तद्दर्शयन्नाह। **न भावेत्या**[3]दि। **भावस्वभावस्य व्यवच्छेदे** सति न **भावानुषङ्गो** न भावस्याक्षेप.। भावो न भव-

नैव नैरा[1]त्म्यादयः स्वभावविशेषात्। क्रियाभोगाधिष्ठानास्वतन्त्रो ह्यात्मा निरात्मा (।) तत्स्वातन्त्र्यलक्षणत्वादात्मनः।

तद्रूपं नैरात्म्यन्नात्मनिवृत्तिमात्रमन्यथा निरुपाख्ये कृतकत्वाद्ययोगान्न ततो नैरात्म्यसिद्धिः स्याद् (।) आत्मव्यवच्छेदेन निरात्मनो भावस्य परामर्शादवोष इति चेत् (।) पर्युदासेन वस्तुसंस्पर्शात्तदेव वस्तुरूपं नैरात्म्यमायातं।

तीति तत्प्रतिषेधस्यैव सम्भवात्। **अभावव्यवच्छेदस्वभावस्य** विरहमात्रस्य **तु यो व्यवच्छेदस्स नियमेन भावस्योपस्थापनो** भावस्याक्षेपक.। किङ्कारणम् (।) **भावाभावयोरन्योन्यं यो विवेको** विरहस्तद्रूपत्वात्। तत्स्वभावत्वात्। भाव[3] विवेकस्याभावरूपत्वाद[4]भावविवेकस्य च भावरूपत्वादित्यर्थ ।

एवन्तावद् भावाभावव्यवच्छेदयोर्भावानाक्षेपाक्षेपकत्व[1]मुक्त्वा प्रकृत योजयत्यभावरूपस्त्वित्यादिना। सत्यार्थतायास्तु यो **व्यतिरेको** मिथ्यार्थतालक्षण । **स** सत्यार्थताऽभावरूपा स **व्यतिरिच्यमानः** कृतकत्वनिवृत्या निवर्त्तमानो **भावं** सत्यार्थतालक्षण**मुपस्थापयत्य**कृतके ।

यदि तु सत्यार्थ[5]त्वविपरीतरूप मिथ्यार्थत्वम्परेणाभ्युपगम्यते। तदा वेदवाक्येषु कृतकनिवृत्तौ मिथ्यात्व[2]मेव न स्यान्न तु सत्यार्थत्वन्ततश्चानर्थक्य स्यादिति वक्ष्यति। तस्मादवश्य सत्यार्थता भाव**रूपा**[3]। मिथ्यार्थतालक्षणो धर्म एष्टव्य (।) स च व्यतिरिच्यमानस्सत्यार्थताया भावमुपस्थापयति। **नैवं नैरात्म्यादयो** विरहरूपा· (।) कि कारण (।) **स्वभावविशेषात्**। [6]स्वभावविशेषो हि नैरात्म्य। तमेवाह। **क्रिया** शुभाशुभकरण। **भोगः** सुखदु खानुभवस्तयोरधिष्ठानं स्वीकारस्तत्रास्वतन्त्रः परवशो **ह्यात्मा** स्वभावो **निरात्मा**। स्वभावपर्यायोत्रात्मशब्दः। कि पुनः कारणम् (।) एवभूत. स्वभावो निरात्मा भवतीत्याह। **तत्स्वातन्त्र्ये**त्यादि। **तस्मिन्** क्रियाभोगाधिष्ठाने यत्**स्वातन्त्र्यं** तल्**लक्ष (ण)**[4]**त्वात्**। तत्स्व-
193b भावत्वादेव**आत्मनः**[7] परै· कल्पितस्य। अतस्तद्वैधर्म्येणास्वतन्त्रस्वभावो निरात्मा भवतीत्यभिप्राय·।

यत एवन्तदिति तस्माद् **रूपं** स्वभावो **नैरात्म्यं नात्मनिवृत्तिमात्रं**[1]। **अन्यथा** यदि निवृत्तिमात्र[1] नैरात्म्य स्यात्तदा नि स्वभावत्वान्निरुपाख्यमेव तद् भवेत्। **निरुपाख्ये** च **कृतकत्वादेः** (।) आदिशब्दात्प्रयत्नानन्तरीयकत्वादेर्वस्तुधर्मस्य **हेतोरयोगात्**। **ततः** कृतकत्वादेर्हेतोस्स[1]काशान्नैरात्म्य गति**र्नैरात्म्यसिद्धिर्न**

---

[1] B. **भावानाक्षेपकत्वमुक्त्वा**। [2] B. **मिथ्यार्थत्वमेव**। [3] B. **रूपो**।
[4] B. [5] B. **नात्मव्यवच्छेदमात्रं**—added [6] B. **स्वातन्त्र्यः**।

यस्यापि नाभावरूपो व्यति[2]रेकस्तस्य भावरूपव्यवच्छेदे भावसिद्धिः स्यादिति नान्वयानुषङ्गः। तथा नैरात्म्येपि न भावसिद्धिः स्यात्।

यथा "नेदं निरात्मकं जीवच्छरीरं प्राणादिमत्वादि"ति। विपक्षयोर्व्याप्यव्यापकभावचिन्तायामप्राणादिमत्व एव नैरात्म्यं दृष्टं (।) तदभावे च नास्तीति स्वयं न भवदपि प्राणादीनां नात्मनि सिद्धिमुपस्थापयति।

स्यात्। इष्यते च (।) तस्मान्न बौद्धस्यात्मविरहमात्र नैरात्म्य। न व्यवच्छेदमात्र विवक्ष्यते (।) किन्त्वात्मव्यवच्छेदेन **निरात्मनो भावस्य** वस्तुनो निरात्मशब्देन **परामर्शादभिधानात्** कृतकत्वादेस्सकाशान्नैरात्म्यगतिर्न प्राप्नोतीत्ययम**दोष इति चेत्**। एवमप्यात्मप**र्युदासेन वस्तुसंस्पर्शात्**। **तदेवास्मदुक्तम्वस्तुरूपम्भा[2]**वस्वभावन्**नैरात्म्यमायातं**। न च भावव्यवच्छेदे भावान्तरानुषङ्ग । तस्माद् बौद्धाना शशविषाणादौ नैरात्म्यव्यवच्छेदेपि नात्मनो भावसिद्धि । तेन यदुक्त"मनित्यनिरात्मताव्यवच्छेदेपि तथा स्यादि"ति तत्परिहृत।

यस्यापि नै या यि का दे **नाभावरूप** आत्म (।) **व्यतिरेकः** (।) किन्तर्हि (।) स्वभावाभाव एव **तस्य** नैयायिकादे**र्भावरूपस्य**[3] नैरात्म्यस्य **व्यवच्छेदे नात्मनो भावसिद्धिः स्यात्। इति** हेतो शशविषाणादौ नैरात्म्यव्यवच्छेदेप्यात्मनो **नान्वयानुषङ्गः**। आत्मनान्वयोनुगमो न भवतीत्यर्थ । यथा च शशविषाणादौ नैरात्म्यव्यवच्छेदेप्यात्मनो नान्वयानुगम**स्तथा** जीवच्छरीरेऽ**नैरात्म्येपि** नैरात्म्याभावेपि **नात्मनो भावसिद्धिः स्यात्**।

अथवान्यथा व्याख्यायते। मी मा स को क्तव्यतिरेकिनिराकरणप्रस्तावेन नैयायिकोक्तमपि व्यतिरेकिण निराकर्त्तुमाह। **यस्यापी**त्यादि। यस्यापि नैयायिकादे**र्नाभावरूप** आत्मा **व्यतिरेकः** (।) किन्तर्हि (।) नैरात्म्यम्भावस्वभाव एव। **तस्यै**वम्वादिनो नैयायिकस्य **भावरूपस्य** नैरात्म्यस्य **व्यवच्छेदे नात्मनो भावसिद्धिः स्यात्**। भा[5]वव्यवच्छेदे भावान्तरानुषङ्गाभावात्। **इति** हेतोर्यत्र प्राणादिमत्वन्तत्रात्मेति **नान्वयानुषङ्गः**। यथा च नान्वयानुषङ्ग**स्तथा** साध्यधर्मिण्य**नैरात्म्येपि** नैरात्म्यनिवृत्तावपि **नात्मनो भावसिद्धिः** स्यात्।

एतदेव प्रयोगपूर्वकन्दर्शयन्नाह। **यथे**त्यादि। **इदं जीवच्छरीरं न निरात्मकं प्राणादिमत्वादिति** । आश्वासः प्राण । आदिशब्दात्[6] प्रश्वासादिपरिग्रह । अत्र प्रयोगे जीवच्छरीरस्य सात्मकत्व साध्यन्न चोभयसिद्ध.। स पक्षभूत आत्मास्तीति नान्वयश्चिन्त्यते । केवल साध्यस्यात्मनो हेतोश्च प्राणादिमत्त्वस्य **यथाक्रम यौ विपक्षौ** नैरात्म्यमप्राणादिमत्व च **तयोर्व्याप्यव्यापकभावचिन्तायां** क्रियमाणायाम**प्रमाणादिमत्व एव नैरात्म्यं दृष्टन्तदभावे** व्यापकस्या[7]प्राणादि- 194a

तथा साध्ये[3]पि प्राणादिभिर्व्युदस्यमानं स्यात् केवलं। नैरात्म्येऽभावात् प्राणादयस्तन्निरसना नात्मोपस्थापनास्तत्र भावासिद्धेः। न च नैरात्म्यनिवृत्यात्मसिद्धिः। विपक्षव्यतिरेकदर्शनेपि प्रसंगात्।

तत्र विपर्ययव्याप्तिर्व्यतिरेकासिद्धौ तत्सिद्धिरेव चान्वयसिद्धिः (।) असिद्धितद्व्यतिरेकनिवृत्तिसिद्धावपि तदसिद्धिरिति साध्ये[4]पि प्रसंगः। तन्न अनन्वया व्यतिरेकव्याप्तिः (।)

मत्त्वस्याभावे **च** व्याप्य नैरात्म्य। प्राणादिमति **नास्तीति** न्यायात्। **स्वयं न भवदपि** नैरात्म्य **प्राणादीनां** हेतुत्वेनाभिमतानामात्मनि सपक्षभूते **न सिद्धिमुपस्थापयति**। नैरात्म्यस्य भावरूपस्य व्यवच्छेदेप्यनात्म[1]लक्षणस्य भावस्यानाक्षेपात्। तत सत्यपि व्यतिरेकेन्वयानुषङ्गाभावाद् व्यतिरेक्येव हेतु प्राणादिरिति न या यि क स्येष्टसि[1]द्धिरेवेयता ग्रन्थेन दर्शिता।

एतस्मिन्नभ्युपगमे दोषमाह। **तथेत्यादि**। अप्राणादिमत्वनिवृत्त्या प्राणादिभ्यो निवर्त्त्यमानमपि नैरात्म्य। यथा प्राणादीनामात्मनि सपक्षभूते न सिद्धिमुपस्थापयति। **तथा साध्येपि** जीवच्छरीरे **प्राणादिहेतुभिर्न्नैरात्म्य व्युदस्यमानं केवलं स्यात्**। न त्वात्मन उपस्थापक।

एतदेव ग्रहणकवाक्य स्प[2]ष्टयन्नाह। **नैरात्म्येऽभावादित्यादि**। **नैरात्म्ये** प्राणादीनामभावात् **प्राणादयस्तन्निरसना** नैरात्म्यमात्रव्यवच्छेदका **नात्मोपस्थापकाः**। कि कारण (।) **तत्र** सात्मके प्राणादेर्भावासिद्धेः। **न च** जीवच्छरीरे **नैरात्म्य**स्यात्मविरुद्धस्य **निवृत्त्यात्मसिद्धिः**। कि कारण (।) **विपक्षान्नैरात्म्यात्** प्राणादे**र्व्यतिरेकदर्शनेपि** क्रियमाणे सपक्षेप्यात्मनि प्रा[3]णादीना सिद्धि**प्रसङ्गात्**।

यत एव (।) **तस्मान्न विपर्ययव्याप्तिः**। सात्मकत्वप्राणादिमत्वविपक्षयोर्नैरात्म्यात् प्राणादिमत्त्वयोर्न व्याप्तिसिद्धिरित्यर्थ। कदा (।) नैरात्म्यात् प्राणादे**र्व्यतिरेकासिद्धौ**। एव हि हेतुविपक्षेणाप्राणादिमत्त्वेन साध्यविपक्षस्य नैरात्म्यस्य व्याप्तिसिद्धि स्यात् यदि प्राणादिभ्यो नैरात्म्य। निवर्त्तेत। सा च निवृ[4]त्तिरन्वये सति स्यात्। तदाह (।) **तत्सिद्धिरेव चेत्यादि**। **तस्य** व्यतिरेकस्य **सिद्धिरेवान्वय सिद्धिः**। तन्नान्तरीयकत्वात्तस्य। व्यतिरेकसिद्धिरेवान्वयसिद्धरुक्ता।

अथान्वयसिद्धिर्नेष्यते। तदाऽ**सिद्धौ** चान्वयस्य। तद्व्यतिरेकवृत्तिसिद्धावपि। **तस्यात्मनो व्यतिरेको** नैरात्म्यन्तस्य प्राणादे सकाशा**न्निवृत्तिसिद्धावपि। तदसिद्धिस्तस्यात्मन[5]स्सपक्षभूतस्यासिद्धिरिति** कृत्वा **साध्येपि** जीच्छरीरे नैरा-

---

[1] B. ०प्यात्मलक्षणस्य।

मिथ्यार्थतायास्तु पौरुषेयत्वेन व्याप्त्याऽपौरुषेयान्निवृत्तावपि न सत्यार्थत्वं प्रकारान्तरसंभवात्। द्वैराश्ये न शब्दानामेतत् स्यादेकनिवृत्तौ गत्यन्तराभावात्। ते त्वनर्थका अपि स्युरिति नेष्टसिद्धिः (।)

अर्थप्रतीतेर्नानर्थका इति चेत्। नैष पुरु(ष)व्यापारः स्यात्। अर्थान्तर-विकल्प[5]वद् (।) यथाऽतदर्थत्वेपि भरतोर्वश्यादिचरितादिकमर्थमन्ये अन्यथा व्याचक्षते। तदनुसारेण च केषांचित् प्रतीतिस्तथा यमनर्थकेष्वर्थविकल्पः पुरुषकृतः स्यात्। न शब्दस्वभावकृतः। पुरुषोपदेशापेक्षणाच्चार्थान्तरवदेव (।) न हि प्रकृ-

---

त्म्यनिवृत्तावप्यात्मनोऽसिद्धिप्रसंगः। तदिति तस्मादन्वयाऽन्वयरहिता **न व्यतिरेकव्याप्तिः** साध्यसाधनविपक्षयोर्न व्याप्तिरित्यर्थ ।

अभ्युपगम्यापीति तु ब्रूम । भवतु नामानन्वया विपर्ययव्याप्ति । जीवच्छरीराच्च नैरात्म्यनिवृत्तौ सात्मकत्व जीवच्छरीरस्य प्रकारान्तराभा[6]वात्। सत्यार्थतासाधने त्वकृतके हेतावयम्प्रकारो न सम्भवतीत्याह। **मिथ्यार्थतायाः** इत्यादि। **मिथ्यार्थतायास्तु** साध्यविपक्षभूताया **पौरुषेयत्वेन व्याप्त्या** हेतुभूतया शब्दादपौरुषेयान्निवृत्तावपि **न सत्यार्थत्वम**कृतकस्य सिध्येत्। कि कारण (।) सत्यार्थत्वव्यतिरेकेणानर्थक्यस्य **प्रकारान्तरस्य सम्भवात्**[7]। सत्यार्थत्वमिथ्यार्थ- 194b
त्वे **न द्वैराश्ये** तु **शब्दानामेतत्** स्यात्। मिथ्यार्थत्वनिवृत्तौ सत्यार्थत्व स्यात्। कि कारणम् (।) **एकनिवृत्तौ** मिथ्यार्थतानिवृत्तौ सत्यार्थताव्यतिरेकेण **गत्यन्तराभावात्**। द्वैराश्यमेव तु नास्ति गत्यन्तरसम्भवाद् (।) अतस्ते शब्दा **अनर्था अपि स्युरिति नेष्टसिद्धिर्न** सत्यार्थतासिद्धि ।

शब्देभ्योर्थप्रतीतेः कारणान्नानर्थका **इति चेत्**।[1] **नाय** स्वाभाविकोर्थप्रत्यय **किन्त्वेष पुरुषव्यापारः स्यात्**। सकेत पुरुषव्यापारस्तत्फलत्वात्पुरुषव्यापार इत्यभेदेनोक्त पुरुषव्यापारात् स्यादित्यर्थ । किम्वत्। प्रसिद्धादर्थादर्थान्तरविकल्पवत्।

एतदेव व्याचष्टे। **यथे**त्यादि। जै मि नी यै रिष्टेनार्थेन **भ र तो र्व श्या दि-चरितादिकस्यातदर्थत्वेपि** तद्भरतचरितमुर्वशीचरि[2]त। आदिशब्दादन्यस्यापि पु रू र व श्चरितादेर्ग्रहण। द्वितीयेनादिग्रहणे न भरतादीना चरितादन्यदप्यवस्थाविशेषादि**कमर्थमन्ये** मी मा स का लोकप्रसिद्धादर्थादन्यथा **व्याचक्षते**। भरतो यूप । उर्वशी पात्री। अरणिर्वेत्यादिना ।

व्याख्यातृविकल्पिताद् अर्थप्रतीतिर्न भवत्येवेति चेद् (।)
आह। **तदनुसारेणे**त्यादि। व्याख्यातृभि[3]कल्पितार्थानुसारेण। **केषांचिच्छ्रोतृणा प्रतीतिर्भवत्येव** (।) **तथे**ति भरतादिशब्दव्याख्यावत्। स्वभावादनर्थकेष्वपि वेदवाक्येष्वर्थविकल्पः पुरुषकृतः स्यान्न शब्दस्वभावकृतः। कि कारणं (।) वैदिके-

त्या प्रकाशनास्तमपेक्षन्ते वह्न्यादयः (।) पुरुषस्तु स्वसमयव्यापारमाचक्षाण उपदिशतीति न्याय्यं (।) पुरुषसमितनि[6]सर्गसिद्ध्योरुपदेशापेक्षणादन्यविशेषाच्चैको नैसर्गिकोन्यस्तु पौरुषेय इति दुरवसानम् (।)

अस्ति विशेषः प्रमाणसमाण (?न)सम्वाद इति चेद् (।) एतदुत्तरत्र निषेत्स्यामः (।) नात्यन्तपरोक्षेर्थे प्रमाणान्तरवृत्तिरिति। समानधर्मिणोरर्थयोः प्रमाण-
41a सम्वादमात्रविशेषाद् एकत्रापौरुषेयत्वे[7] बहुतरमिदानीमपौरुषेयं। सन्ति पुरुषकृतान्यपि वाक्यानि कानिचिदेवं विधानीति तेष्वपि प्रसंगः।

तद्वदेषामप्यभिमतार्थवत्ता पौरुषेयी च स्यात्। प्रमाणानुरोधिनी च।

भ्योर्थप्रतिपत्तौ पुरुषस्य जै मि नि प्रभृतेरुपदेशापेक्षणात्। किमिव (।) अर्थान्तरवदेव। भरतोर्वश्यादिशब्दानामर्थान्तरविकल्पवदि[4]त्यर्थ। स्वभावतोर्थप्रतिपादनेपि पुरुषोपदेशमपेक्षिष्यन्त इत्यपि मिथ्या। यतो न हि प्रकृत्या स्वभावेनार्थप्रकाशनास्तं पुरुषोपदेशमपेक्षन्ते वह्न्यादयः। पुरुषस्तु स्वमात्मीय समयव्यापारसकेतसामर्थ्येनाचक्षाणः परस्मै उपदिशति। यथाय शब्दोस्मिन्नर्थे मया प्रयुक्त इति न्याय्य (।) न तु प्रकृत्यार्थप्रकाशने पु[5]रुषोपदेशो न्याय्य।

अथ पुरुषसमितार्थवन्निसर्गसिद्धोपि वेदोर्थेषु पुरुषोपदेशमपेक्षते। तदा यश्च पुरुषेण समितः सकेतितो यश्च निसर्गेण स्वभावेन सिद्धोर्थः। तयोर्द्वयोरपि पुरुषोपदेशापेक्षणं प्रत्यविशेषात्। अन्यश्च कश्चिद्विशेषो नास्ति येनाय पुरुषसमितोय निसर्गसिद्ध इति प्रतीयेत। अतः कारणादे[6]को वैदिकोर्थे नैसर्गिक। निसर्गे भव इत्याध्यात्मादित्वाट्ठक्। अन्यो लौकिकशब्दोर्थे पौरुषेय इति दुरवसानं। दुर्बोध। विभागसाधकप्रमाणाभावात्।

अस्ति विशेषो निसर्गसिद्धस्य वैदिकस्य को(पि) प्रमाणसम्वाद। प्रमाणान्तरानुगमन। यस्तु नैव स पौरुषेय इति चेत्। एतदुत्तरत्र निषेत्स्यामो यथा
195a नास्त्यन्तप[7]रोक्षेर्थे प्रमाणान्तरवृत्तिरित्यादिना ग्रन्थेन। पुरुषोपदेशापेक्षणादिना च समानधर्मणोर्लौकिकवैदिकयो. प्रमाणसम्वादमात्रविशेषादेकत्र वैदिकेऽपौरुषेयत्वेन कल्प्यमाने। बहुतरमिदानीं लौकिकमेकवाक्य प्रमाणसम्वाद्यपौरुषेयं कल्प्य स्यात्। यस्मात् सन्ति पुरुषकृतान्यपि वाक्यानि कानिचिद् "अनित्या वत सस्कारा"[1] इत्येवमादी[1]नि। एवम्विधानीति प्रमाणसम्वादीनीति कृत्वा तेष्वपौरुषेयत्वप्रसंगः।

अथ प्रमाणसम्वादिनोपि लौकिकस्य पौरुषेयत्वन्तदा तद्वदेषामपि वैदिकाना

---

[1] धम्मपदे

अपि चेदं (।) मन्त्रा अपौरुषेयाश्चेति व्याहतम्पश्यामः। तथा हि॥

समयत्वे हि मन्त्राणां कस्यचित् कार्यसाधनं[१]।

युक्तं(।)यद्येते मन्त्राः कस्यचित् समयो यथा मत्प्रणीतमेतदभिम[1]तार्थोपनिबन्धनं वाक्यमेवं नियुञ्जानमनेनार्थेन योजयामीति। परार्थपरतानुरोधेनान्यतो वा कुतश्चिद्धेतोः स्यात्। तदा मन्त्रप्रयोगात् कदाचिदर्थनिष्पत्तिर्युक्ता। कविसमयादि(व) पाठकानां।

अथापि भावशक्तिः स्यात् अन्यत्राप्यविशेषतः ॥२९५॥

न वै पुरुषसमयान्मन्त्रेभ्योर्थसिद्धिः (।) किन्तर्हि (।) भावस्वभाव एष (।) यदि न क्व[2]चिन्नियुक्ताः फलदाः(।)

शब्दानामभिप्रेतार्थवत्ता **पौरुषेयी च स्यात् प्रमाणानुरोधिनी च** प्रमाणासम्वादिनी चेति न विशेष पश्यामो वैदिकाना शब्दाना लौकिकेभ्य ।

वैदिकाना शब्दाना मन्त्रत्वादेवापौरुषे[2]यत्वमिति दर्शयन्नाह। **अपि चेत्यादि। व्याहतं** परस्परविरुद्ध। तथा हि (।) **मन्त्राणां कस्यचित्**पुरुषस्य **समयत्वे** प्रतिज्ञाव्यवस्थापितत्वे सति **कार्यसाधनं युक्त**मभिमतकार्यसिद्धिर्मन्त्रप्रयोगाद् युक्तेति।

यद्येत इत्यादिना व्याख्यान। **एते मन्त्रा यदि कस्यचित्** प्रभाववत. कर्त्तु **समयः** स्यादिति वक्ष्यमाणेन सम्बन्ध । समयव्यवस्थापितत्वात्स[3]मय इत्युच्यन्ते। कथ पुनरसौ समय कृत इत्याह। **परार्थे**त्यादि। **परार्थपरता** परार्थप्रधानता। कृपालुतेति यावत्। **तस्या अनुरोधेन। अन्यतो वा कुतश्चिद्** यश प्रभृतेर्**हेतोः** कृत. **स्यात्**। कीदृशोसौ समय इत्याह। **यथे**त्यादि। **यथा मत्प्रणीतमेतद् वाक्यं** (।) कि भूतम् (।) **अभिमतार्थोपनिबन्धनं**। मन्त्रस्य कर्त्तुरभिमतो योर्थो विधिविशेष[4]. । आवाहनविसर्जनादिलक्षण. स निबन्धन प्रवृत्त्यङ्ग यस्मिन् वाक्ये तत्तथोक्त। **एव**मित्यनेनानुक्रमेण **नियुंजानं** प्रयुजान पुरुषम**नेनार्थेन** पुरुषाभिमतेन फलेन **योजयामीति** समय स्यात्। **तदा मन्त्रप्रयोगात् कदाचित्** विधिसमाप्तौ। अभिमतार्थनिष्पत्तिः स्यात्। **कविसमयादिव**। यथा केनचित् काव्य कृत्वैव समयः कृतः (।) मत्प्रणी[5]त काव्य य पठति। तस्मै मयेद दातव्यमित्यतस्तत्कृतकाव्यपाठकानां यथा प्रतिज्ञातार्थनिष्पत्तिस्तद्वत् ।

अथ भावशक्तिः शब्दस्वभावस्यैव सा तादृशी शक्तिर्येनाभिमतम्फलम्भवति। न यथाभिमतात् पुरुषसमयात्। तदा स्यादन्यत्रापि। यथा कथचित्प्रयुक्तान्मन्त्रादपि। कि कारण (।) वर्णात्मकस्य मन्त्रस्याविशेषतः।

नेत्यादि व्याख्यान[6]। **न वै पुरुषसमयाद्धेतोर्मन्त्रेभ्योर्थ (सिद्धिः)** । **किन्तर्हि (।)भावस्य** वर्णरूपस्य मन्त्रस्य **स्वभाव एष (।) यदि न** मन्त्राः कस्यचिद्

तर्त्तहि रूपं वर्ण्णानां सर्वत्राविशिष्टमिति यथा कथंचित् प्रयुक्तादपि फलं स्यात्। वर्ण्णा एव हि मन्त्रा नान्यत् किञ्चित्।

तत्क्रमो मत इति चेत् (।)

क्रमस्यार्थान्तरत्वञ्च पूर्व्वमेव निराकृतं।

न वर्ण्णव्यतिरिक्तोन्यः क्रम इति निवेदितमेतत्। अव्यतिरेके च वर्ण्णा एव मन्त्रास्ते चाविशिष्टाः सर्वत्रेति[3] सर्वदा फलदाः स्युः(।)

उपप्लवस्त्वल्पीयसोपि क्रमस्य भ्रंशाद् दृष्टः (।) कस्यचिदनुष्ठानाद् देवता-सन्निधेरसाकल्येन विराधनाच्च। सर्वभ्रंशे तु कस्यचिदेव समयस्याननुष्ठानाव-सन्निधेर्नार्थानर्थौ।

विधिपूर्वन्नियुक्ताः **फलदाः**।

तत्तर्हीत्यादि (।) सिद्धान्त वादी। **तर्त्तहि** मन्त्राख्यान **वर्ण्णानां रूपं सर्व-त्रेति** विधिरहिते काले। विपरीतादिप्रयोगे वाऽविशिष्टमिति। **यथाकथंचित्पा-**
195b ठानु[7]क्रम विधि चोल्लघ्य **प्रयुक्तादपि** मन्त्रादभिमत **फलं स्यात्**। यस्माद् **वर्ण्णा एव हि मन्त्रो नान्यत् किञ्चिद्** वर्ण्णव्यतिरिक्त।

तत्क्रमो वर्ण्णक्रमो न वर्ण्णा एवेति **चेत्** (।)

तदसत् (।) यस्माद् वर्ण्णेभ्य **क्रमस्यार्थान्तरत्वं च** वर्ण्णानुपूर्वी वाक्य चेदि-त्यत्रान्तरे **पूर्वमेव निराकृतं**।

नेत्यादि व्याख्यान। **वर्ण्णेभ्य** क्रमस्या**व्यतिरेके च वर्ण्णा एव मन्त्रास्ते च**[1] वर्ण्णा **अविशिष्टाः सर्वत्र** प्रतिलोमपाठादाविति **सर्वथा** यथाकथञ्चित् प्रयुक्ता **फलदाः स्युः**। न च फलदा भवन्ति। न केवल विधिभ्रशे न फलदा· प्रत्युतानर्थ-कारिण एव भवन्तीत्याह। **उपप्लव** इत्यादि। उपद्रव। **उपप्लवः**। तु शब्दो-तिशये। **अल्पीयसोपि** विधि**क्रमस्य भ्रंशाद् दृष्टः**। स च पुरुषसमयत्वे मन्त्राणा युज्यते। नापौरुषेयत्वे[2]।

कस्यचित् समयत्वेपि कथमुपप्लव इति चेदाह। **कस्यचिदित्यादि**। मन्त्रस्य कर्त्रा ये विधयो निर्दिष्टास्तेषा मध्ये **कस्यचिद्विधेरनुष्ठानाद् देवतायाः** सन्नि-धिर्भवति। ततस्**सन्निधेरन्यस्य** विधिविशेष**स्यासाकल्येनासम्पादनेन**। देवताया **विराधनात्** खेदना**च्चो**पप्लव· स्यात्। तत्रावीतरागा देवता। विरागिता स्वय-मेवानर्थं करोति। वीतरा[3](गा.) तु न स्वय। तदभिप्रसन्नास्त्वन्ये देवतादयः कुर्वन्तीति द्रष्टव्य।

यत्र मन्त्रे न कश्चिदपि विधिः क्रियते तत्र कथमिति (।)

आह। **सर्वेत्यादि**। **सर्वविधिभ्रंशे तु कस्यचिदेव समयस्य** मन्त्रप्रणेतृकृतस्य

किं च। क्रमस्यार्थान्तरत्वेऽनर्थान्तरत्वे वा वर्ण्यात्मनस्तत्क्रमात्मनो वा मन्त्रस्यार्थहेतोरकृतकत्वान्नित्यस्य[4] नित्यं सन्निधानमिति॥

नित्यन्तदर्थसिद्धिः स्यात्;

यतो हि भावशक्तेः फलोत्पत्तिः साऽविकलेति न फलवैकल्यं स्यात् (।)

न हि कारणसाकल्ये कार्ये वैकल्यं युक्तं। तस्याकारणत्वप्रसंगात्। न केवलात् मंत्रप्रयोगादिष्टसिद्धिस्तस्य विधानापेक्षत्वादिति चेत् (।)

असामर्थ्यमपेक्षणे[2] ॥२९६॥

यदि हि मन्त्रादन्यतो वा कथंचित् क्वचित् स्वभावातिशयमासादयेयुः। स तत्र समर्थोपेक्षः स्यात् (।) न च नित्येष्वेतदस्तीत्युक्तं। तत्किमय(म)समर्थो पेक्ष्यत इत्यनपेक्षाः सदा कुर्युः। न वा कदाचिदनतिशयात्।

विधेरनुष्ठानाद् देवताया असन्निधेर्नार्थानर्थौ।

किंचेत्यादिना दोषान्तरमाह। निवारित क्रमस्यार्थान्तरत्व। भवतु वा वर्ण्येभ्य क्रमस्यार्थान्तरत्वमनर्थान्तरत्वम्वा। तत्रानर्थान्तरत्वे क्रमस्य वर्ण्यात्मा वर्ण्यस्वभाव एव मन्त्र। अर्थान्तरत्वे तु तत्क्रमात्मा। वर्ण्यक्रमात्मा। तस्य वर्णात्मनस्तत्क्रमात्मनो वा मन्त्रस्य कीदृशस्यार्थहेतोः पुरुषार्थकारणस्य हेतुभिरकृतत्वान्नित्यस्य नित्यं सन्निधानमिति कृत्वा नित्यन्तदर्थसिद्धिः स्यात्। तेभ्यो मन्त्रेभ्य. पुरुषार्थस्य निष्पत्ति स्यात्। किङ्कारण (।) यतो यस्या हि भाव[5]शक्तेर्मन्त्रशक्ते सकाशात् मन्त्रसाध्यस्य फलस्योत्पत्तिः सा भावशक्तिरविकलेति न फलवैकल्यं स्यात्। यस्मान्न हि कारणस्य साकल्ये सति कार्यस्य वैकल्यमसत्त्व युक्तं। कि कारणं (।) तस्याविकलस्य कारणस्य कार्यमकुर्वतो कारणत्वप्रसङ्गात्। नित्यत्वेपि मन्त्राणा न केवलान्मन्त्रप्रयोगादिति मन्त्रसम्बन्धादिष्टसिद्धिः। किङ्कारण (।) तस्य मन्त्रस्य विधा[6]नापेक्षत्वादिति चेत्। तदयुक्त यस्मान्मन्त्रस्य विधानापेक्षत्वेऽभ्युपगम्यमाने तस्यापेक्षणीयस्य विधानादेर्मन्त्र प्रत्यसामर्थ्यमनाधेयातिशयत्वान्मन्त्रस्य।

तद्व्याचष्टे। यदि हीत्यादि। विधानादिभि[र्मन्त्र कल्पो[1]] विधिस्तस्मादन्यतो वेति कुतश्चित्सहकारिण स्थानविशेषादेस्सकाशात् कञ्चित् स्वभावातिशयमासादयेयुर्लभेरन्।[7] तदा सहकारी तत्रोत्पाद्ये मन्त्रस्य स्वभावातिशये 196a
समर्थोपेक्ष्यः स्यात्। न च नित्येष्वेतदतिशयोत्पादनमस्तीत्युक्तं प्राक्। तत्किमय सहकार्यतिशयोत्पादन प्रत्यसमर्थो मन्त्रैरपेक्ष्यत इति कृत्वानपेक्षा मन्त्राः सदा कार्यं कुर्युः। यदि[1] कारकस्वभावा (।) नो चेन्न वा कदाचित् कार्यं कुर्युरनति-

---

[1] In the margin.

(ग) नित्यत्वे दोषाः

सर्वस्य साधनं ते स्युर्भावशक्तिर्यदीदृशी ।
प्रयोक्तृभेदापेक्षा च नासंस्कार्यस्य युज्यते ॥ (२९७)

यदि भावशक्त्यैव मन्त्राः[6] **सिद्धिप्रदा न ते कञ्चित् परिहरेयुः। यजमानमन्यं वा। न ह्यन्यं प्रति स्वभावोऽतद्भावो भवति। तस्य तेनानपकर्षणात्। अन्येन चानुत्कर्षणात्। केनचित् सह कार्यकारणभावायोगात्। प्रत्यासत्तिविप्रकर्षाभावात्। अत एवास्यासंस्कार्यत्वात् प्रयोक्तापि नास्ति (।) यतः प्रयोक्ता फलमश्नुवीत् (?त) ॥**

41b **संस्कार्यस्या**[7]**पि भावस्य वस्तुभेदो हि भेदकः ।**

शयात् स्वभास्य सर्वदा तुल्यत्वात्।

कि च (।) **सर्वस्य** पुस पातकादियुक्त[1]स्यापि **साधनं** फलहेतवस्ते न मन्त्रा **स्युः**। समयनिरपेक्षा **यदीदृशी** मन्त्राणाम्भावशक्तिः। अथ स्याद् यजमानेनैव प्रयुक्ताः फलदा इति (।)

अत आह। **प्रयोक्तुर्भेदो** विशेषो यजमानत्वन्तदपेक्षा **च। नासंस्कार्यस्य** मन्त्रस्य **युज्यते। यदि भावशक्त्यैव** समयानपेक्षया **मन्त्राः** फलदा **न ते** मन्त्रा. फलदान प्रति **कञ्चित्** पुरुष **परिहरेयुः**। **अन्यं वा** शूद्रादि[2]क। यस्मान्न **ह्यन्यमयजमान प्रति स्वभावो** मन्त्राणा कार्यकरणस्वभावोऽतद्भावो **भवत्यजनकस्वभावो** भवति। कि कारण (।) **तस्य** जनकस्वभावस्य **तेना**ब्राह्मणेन चानपकर्षणात्। अखण्डनात्। **अन्येन** च यजमानादिना**नुत्कर्षणात्**। अतश्च कारणात् **केनचित्** पुरुषेण **सह** मन्त्राणा **कार्यकारणभाव**योग । **तदयोगाच्च** यथाक्रम ब्राह्मणेनान्ये[3]न च मन्त्राणा **प्रत्यासत्तिविप्रकर्षाभावात्** सर्वस्य साधन स्युरिति। **अत एव** न नित्यत्वादेवास्य मन्त्रस्यासंस्कार्यत्वात् **प्रयोक्ता**। कार्ये नियोक्ता कश्चिद् ब्राह्मणोन्यो वा **नास्ति यतः प्रयोक्ता** मन्त्रसाध्य **फलमश्नुवीत** लभेत ब्राह्मण एव नान्य·। तथा हि यथा शूद्रादिरपाठको न किंचित्करोतीति न प्रयोक्ता तथा ब्राह्मणोपि (।) तत संस्काराप्रतिपत्तेरिति।

कि[4]ञ्च **संस्कार्यस्याप्याधेयातिशयस्यापि भावस्य वस्तुभेदो** हि कारणभेदो **हि भेदको** न च ब्राह्मणशूद्रादीना स्वभावभेदः परमार्थतोस्ति। केवलं लोकव्यवहारकृतो विप्रशूद्रादिभेद·। तेन लोकव्यवहारभिन्नाना ब्राह्मणादीनां **प्रयोक्तृणाम्भेदान्नियमो** मन्त्रशक्तौ **न** सम्भवति। येन ब्राह्मण एव फलमासादयेन्न शूद्रः।

प्रयोक्तृभेदान्नियमः शक्तौ न, समये भवेत्॥ (२९८)

आधेयविशेषे बाह्यनित्याभावास्तद्धेतोः स्वभावभेदे ततः समासादितातिशयत्वादन्यत्रान्यथा स्युः। नाभेदे (।) कारणाविशेषे कार्याविशेषात्। विशेषे तस्याहेतुकत्वप्रसंगादित्युक्तप्रायं।

तदिमे मन्त्राः स्वभावातिशयात् फलदायिनः। कार्या अपि न शूद्रादिप्रयोगेप्यन्यथा स्युः।[1] शूद्रविप्राभिधानयोः पुरुषयोः स्वभावाभेदात्। न हि पुरुषेच्छानुविधायिनो नामव्यवहारभेदात्। स्वभावभेदानुबन्धिनामर्थानामन्यथात्वमस्ति। तयोर्जातिभेद इति चेत्। स खल्वाकृतिगुणशक्तिभेदे इष्टो गवाश्ववत्। अनुपदेशं चैनं लोकः प्रतिपद्यते। न तद्वदनयोः कंचिदपि गुणं नियतं पश्या-

---

क्व तर्ह्ययन्नियमः स्या[5]दिति (।)

आह। **समये भवेत्**। यदा समयो मन्त्रस्तदा समयस्य कर्त्ता वस्तुस्वभावानपेक्ष समय करोति। यथालोके ये ब्राह्मणा. प्रसिद्धास्तेभ्य एव प्रयोक्तृभ्य फलन्दास्यामि नान्येभ्य इति स्यान्नियमः।

आधेयेत्यादिना व्याख्यान। आधेयो जन्यो **विशेषो** येषान्ते भावा.। **तद्धेतो**र्विशेषहेतो· **स्वभावभेदे** सति। **ततो** विशेषहेतो· सका[6]शा**दासादितातिशयत्वादे**कत्रान्यथाभूतः पुनर**न्यत्र** कारणान्तरे**ऽन्यथा स्युर्न** त्व**भेदे** कारणस्यान्यथाभावः। कि कारण **कारणाविशेषे** सति **कार्यस्याविशेषात्**।

अथ कारणाविशेषे कार्यस्य विशेषस्तदा विशेषे कार्यस्याप्यभ्युपगम्यमाने। **तस्य विशेषस्याहेतुकत्वप्रसंगादित्युक्तप्राय**।

तदिति तस्मा**दिमे मंत्राः कार्या** अप्य**नि**[7]त्या अपि। हेतुकृतात् **स्वभावभे-** 196b
दात् **फलदायिनो**ऽपि **न शूद्रादिप्रयोगेप्यन्यथा स्यु**रफलदा स्यु·। किं कारण (।) **शूद्र** इति **विप्र** इति ब्राह्मण इत्य**भिधानं** संज्ञा **ययोः पुरुषयोस्तयोर्बुद्धीन्द्रियदेहेषु स्वभावभेदाभावात्**। प्रतिव्यक्ति स्वलक्षणभेदोस्तीति चेत् (।) न। तस्य ब्राह्मणेष्वपि प्रतिव्यक्ति सम्भवात्।· जातिकृतस्तु भेदो नास्तीत्युच्यते।

नन्वयं ब्राह्मणोऽय[1] शूद्र इति लोके नामभेदोस्ति। तथा सम्मानादिव्यवहारभेदश्च (।) तत स्वभावभेदोवसीयत इति। चेद् (।)

आह। **न हीत्यादि। पुरुषेच्छानुरोधिनो** ब्राह्मणादिनामभेदात् सत्कारादिव्यवहारभेदाच्च **स्वभावभेदानुबन्धिनां** यथा कारणमुत्पन्नेन स्वभावभेदेनानुगतानामर्थानामन्यथात्वं। न हि स्वभावभेदोस्तीति सम्बन्धः।

तयोर्ब्राह्मणशद्रयोः पुरुष[2]योर्जातिभेदोस्तीति चेत्।

मोऽपश्यन्तश्च कथं भेदं[2] प्रतिपद्येमहि।

योप्ययं नामभेदान्वयो लोके प्रतीतिभेदः सो सत्यपि जातिभेदे व्यापार-

---

तन्नैव। यस्मात् **स खल्वित्यादि**। सामान्यनिषेधान्निषिद्धैव जाति (।) केवलमभ्युपगम्योच्यते। **स खलु** भवन्नपि जातिभेदस्त्रिधा **इष्टः**। **आकृतिगुण-शक्तिभेदे** सति। **गवाश्ववत्**। गवाश्वस्येव गवाश्ववत्। तत्राकृतिभेदः सस्थान-विशेष स प्रतिव्यक्ति भेदवतीष्वपि गोष्वनुगामी विद्यते (।) नाश्वव्यक्तिषु। गुणभेदो (?द·) क्षीरादीना[3] रसवीर्यविपाकादिभेदेन स च समानजातीयासु व्यक्तिष्वनुगामी दृष्ट। न विजातीयासु। शक्तिभेदानुरूपकार्यसामर्थ्यलक्षण। यथा गवान्दोहादिसामर्थ्यं नाश्वाना। तदेव समानजातीयव्यक्त्यनुगामिनामा-कृत्यादिभेदानामुपलम्भात् काम गवाश्वादिष्वस्तु जातिभेदो नैव ब्राह्मणादिषु प्रतिनियत आकृत्यादिभेदोस्ति (।) येन जातिभेद[4] कल्प्येत। सकृच्च गवादिषु व्युत्पन्नो देशकालादिभेदेप्यनुपदेशमित्युपदेशमन्तरेणैनं जातिभेद **लोकः प्रति-पद्यते**। अयङ्गौरयमश्व इति। **नैव** ब्राह्मणादिभेदमनुपदेश प्रतिपद्यते। **तद्वदिति** गवाश्ववत्। **अनयोर्ब्राह्मणशूद्रयो कंचिदपि** गुण विनियत समानजातीयास्वेव व्यक्तिषु स्थित**म्पश्यामः**। गुण[5]ग्रहणमुपलक्षण। एवमाकृतिभेद शक्तिभेद च विनियत न पश्याम। **अपश्यन्तश्चाकृत्यादिभेदं कथं** शूद्रविप्रयोर्जातिभेद **प्रतिपद्येमहि**। नैवेति यावत्। तथा ह्यध्ययनशौचाचारादिविशेषः सर्वो व्यभि-चारी। यश्च गौरपिङ्गलकेशत्वादिलक्षण आकारभेद. कल्प्यते स ब्राह्मणेष्वपि केषुचिन्नास्ति। शूद्रेषु च विद्यते केषुचि[6]त्।

यदि न जातिभेद. विप्रशूद्रयो· कथन्तर्ह्यय ब्राह्मणादिशब्दश्रवणाद् भिन्ना प्रतीतिर्भवतीति (।)

आह। **योपीत्यादि**। **नामभेदान्वयो** ब्राह्मणादिसज्ञाविशेषहेतुको **योप्ययं प्रतीतिभेदो** [बुद्धिभेदो अय ब्राह्मणोऽय शूद्र][1] इति प्रतीतिभेदो**सत्यपि जाति-**
197a **भेदे व्यापारविशेषानुष्ठानाज्जपहोमादिक्रियाविशेषानुष्ठानात् स्यात्। अन्व[7]-याच्चेति**। तथाभूतव्यापारानुष्ठायिन. कुलादुत्पत्तेश्च। **वैद्यवणिग्व्यपदेशा-दिवत्**। यथा तुल्यजातीयेषु शुद्रेषु तस्य तस्य व्यापारविशेषस्यानुष्ठानाद-न्वयाच्च वैद्यादिव्यपदेशा. प्रवर्त्तन्ते (।) न तावता जातिभेद.। तद्वत् ब्रा[1]-ह्मणादिष्वपि स्यात्।

---

[1] In the margin.

विशेषानुष्ठाने। अन्वयाच्च स्याद् वैद्यवणिग्व्यपदेशादिवत्।

तदिमे विशिष्टेन प्रयुज्यमाना मन्त्रास्ततोऽविशिष्टमेव स्वभावमासादयन्ति। तेनाविशेषेणैव फलदा (:) स्युः। यदा तु समयादेभ्यः[3] फलन्तदायमदोषः समयकारस्य रुचेः फलोत्पत्तिनियमात् (।) स्वभाववृत्तयो हि भावास्तन्मुखेन प्रसंगमर्हन्ति। न पुरुषेच्छावृत्तयस्तेषां कथंचिद् वृत्तेः।

यदपि प्रयोक्ता फलमश्नुत इति प्रयोगं समीहितार्थयोग्यस्योत्पादनं। संतान-परिणामनं वा पश्यामस्तदुभयम्विशेषज[4]न्मनि स्याद्(।)अन्यथा (।)

अनाधेयविशेषाणां किंकुर्वाणः प्रयोजकः।

येन ततः कश्चित्फलमश्नुतेऽन्यो न (।)

तदिति तस्मादिमे मन्त्रा अविशिष्टेन ब्राह्मणशूद्रादिना प्रयुज्यमानास्ततो ब्राह्मणादेरविशिष्ट[1]मेव स्वभावमासादयन्ति। तेन कारणेनाविशेषेणैव शूद्रादिषु फलदाः स्युरित्युपसहार । तदेव मन्त्राणाम्भावशक्त्या फलोत्पादने(ना)य दोषो यदा तु यथोक्तात् पुरुषसमयादेभ्यो वैदिकेभ्योन्येभ्यो वा मन्त्रेभ्य. फलमिष्यते। तदायमविशेषेण फलदा. स्युरित्ययमदोषः। कि कारण (।) समयकारस्य मन्त्र-प्रणेतू रुचेः फलोत्पत्ति[2]नियमात्। समयकारस्यैवमभिरुचित य ईदृशो ब्राह्मण-व्यपदेशभागेवम्विध नियममनुतिष्ठति तस्यैवाह फलयोगेन प्रत्युपस्थितो नान्येभ्य इत्येव रुचे फलनियामक । पर्यनुयोग । तथा हि(।) स्वभाववृत्तयो भावा· पुरुषव्यापारानपेक्षा वस्तुस्थित्यैव कार्यकारिण इत्यर्थ । ते तन्मुखेन स्वभावद्वारेण प्रसंगमर्हन्ति[3]। यथा स्वभावविशेषादिहाप्येव किन्न भवतीति। न पुरुषेच्छा वृत्तयो भावा. प्रसगमर्हन्ति । किङ्कारण (।) तेषां पुरुषाणा स्वेच्छानुविधायिना यथाकथंचिद् वृत्तेः।

यदपि विशिष्टः प्रयोक्ता मन्त्रफलश्नुत इत्युच्यते। तत्रापि प्रयोगमेव लक्षण पश्यामः। यथा समीहिते पुरुषार्थे योग्यो यो मन्त्रस्वभावस्तस्योत्पादनं। उत्पन्नस्याप्यु[4]त्तरोत्तरविशेषोत्पादनेन सन्तानपरिणामनमन्यथात्वम्वा तदुभयमु-त्पादनम्विपरिणमन वा विशेषजन्मनि विशेषोत्पत्तौ सत्या स्यात्। अन्यथा विशेषानुत्पत्तावनाधेयातिशयानां मन्त्राणा। किं कुर्वाणः प्रयोजकः (।) नैव।

येनेत्यादिना व्याचष्टे। येन कारणेन ततो मन्त्रप्रयोगात् कश्चित् प्रयोक्ता ब्राह्मण· फलमश्नुतेऽन्यः शू[5]द्रादिर्नाश्नुते । नोत्पादनम्मन्त्राणा प्रयोग किन्त्वभिव्य-क्तिः प्रयोगो यदीष्यते। साभिव्यक्ति प्रगेव सा मा न्य चि न्ता यां[1] निराकृता।

---

[1] In the margin.

प्रयागो यद्यभिव्यक्तिः सा प्रागेव निराकृता ॥ (२९९)

न हि नित्यानां काचिदभिव्यक्तिरित्युक्तं यतोभिव्यंजकः प्रयोक्ता स्याद् (।)

व्यक्तिश्च[1] बुद्धिः सा यस्मात् स फलैर्यदि युज्यते ।

स्याच्छ्रोतुः फलसंबन्धो वक्ता हि व्यक्तिकारणं ॥ (३००)

न हि शब्दस्यान्यतः स्वरूपपरिणामो व्यक्तिर्नावरणविगमनं (।) **किन्तु तद्विषया प्रतीतिः** (।) **अश्रूयमाणेऽव्यक्तव्यपदेशात्। तत्र यदि बुद्धिहेतुर्वक्ता स्यात्। तत्तुल्यं श्रोतर्यपीति। सोपि फलं वक्तृवदश्नुवीत्** (?त)। **न हि वक्तुः कश्चिदन्यस्तद्भावोन्यत्र तद्बुद्धिहेतुत्वात्। परोपाधिबुद्धिः**[6] **श्रोतुर्न वक्तुरिति विशेष इति चेत्** (।) **कः पुनरुपयोगो वक्तुः श्रोतरि येनोपाधिरिष्यते। ततः शब्द-. श्रुतिरिति चेत्** (।) **ननु तदेवेदं पर्यनुयुज्यते। कथं तत इत्यसम्बन्धाद् विषयोपन-**

तद्व्याचष्टे। **न हि नित्यानाम्पदार्थाना काचिदभिव्यक्तिरित्युक्तं। यतः** कारणा**दाभिव्यञ्जकः** शब्दस्य **प्रयोक्ता स्यात्** ।

भवतु वाभिव्यक्ति. (।) सा च तावद् योग्यतोत्पत्तिनित्यत्वात् । किन्तु **व्यक्तिश्च** श[6]ब्दविषया **बुद्धिः सा यस्मात्** पुरुषात् प्रयोक्तु **स** पुरुषो मन्त्र**फलैर्यदि युज्यते। स्याच्छ्रोतु**रपि **फलसम्बन्धः**। योन्येन पठ्यमान मन्त्र श्रृणोति केवल। तस्यापि मन्त्रफलेन योग. स्यान्न तु वक्तुरेव। यस्मात् **वक्ता हि व्यक्तिकारणं** ज्ञानकारणमतश्च फलेन प्रयुज्यते। तच्च मन्त्रविषयज्ञानकारणत्व श्रोतुरपि
197b तुल्य[7]मिति सोपि वक्तैवेति कस्मान्न फलेन युज्यते।

न हीत्यादिना व्याचष्टे। **न हि** नित्यस्य **शब्दस्यान्यतः** कारणात् **स्वरूपपरिणामः** स्वरूपान्यथात्वम्व्यक्ति.। **नाप्यावरणविगमनं व्यक्तिः**। नित्यस्यावरणानुपपत्ते:। **किन्तु तद्विषया** शब्दविषया **प्रतीतिर्बुद्धिरभिव्यक्ति** । कि कारणम् (।) **अश्रूयमाणे** शब्देऽ**व्यक्तव्यपदेशात्**। न ह्यनुपल[1]भ्यमानः शब्दोभिव्यक्त इत्युच्यते। **तत्रैव** व्यवस्थिते **यदि** शब्दविषय**बुद्धिहेतुर्वक्ता स्यात्**। तदा **तच्छब्दविषय**बुद्धिहेतुस्वभाववक्तृलक्षण **श्रोतर्यप्यस्तीति सोपि** श्रोता मन्त्रप्रयोगसम्भवमभिमत **फलम्वक्तृवदश्नुवीत। न हि वक्तुः कश्चिदन्यस्तद्भावो** वक्तृत्वभावोन्यत्र **तद्बुद्धिहेतुत्वात्**। शब्दबुद्धिहेतुत्वात्। अतो नास्ति वक्तृश्रोत्रो शब्द[2]ज्ञानहेतुत्वे विशेष इति तुल्य. फलसम्बन्ध स्यात्। परो वक्ता। उपाधिर्हेतुर्यस्या बुद्धे । **सा परोपाधिबुद्धिः श्रोतुर्न वक्तुः** परोपाधिर्बुद्धिः। **इति** हेतोर्वक्तृश्रोत्रोर्**विशेष इति चेत्। कः पुनरुपयोगः** सामर्थ्यम्**वक्तुः श्रोतरि** बुद्धिजननम्प्रति। **येनो**पयो-

---

[1] In the margin.

यनादयमस्य श्रावकः स्यात्। तच्च न शक्यं। तस्य कथञ्चिदप्यपरिणामात्।

[1](इन्द्रियसंस्कारादयोऽप्युक्ताः। मां[1] श्रावयति अहं श्रावयामीति प्रत्ययद्वयाद् 521b
वक्तृश्रोत्रोर्भेद इति चेत् अनुपकार्योपकारकं भ्रान्तिमात्रम्। तस्मात् तद्भावेऽति-
प्रसंगः[2] स्यात्। अन्यत्रापि भ्रान्त्या प्रत्ययदर्शनात्। सर्वथा उपकाराभावे च
तथा प्रत्ययो न युक्तः। सर्वेषां परस्परं एवं प्रसंगात्[3]। भ्रान्तिरपि कुतश्चिदुप-

---

गेनोपाधिरिष्यते वक्ता। ततो वक्तु. सकाशाच्छब्दश्रुतिः शब्दोपलब्धि. श्रोतुर्भवत्यतो[3]सौ वक्ता उपाधिरिति चेत्।

ननु तदेवेदं पर्यनुयुज्यते कथन्ततो वक्तु सकाशाच्छब्दश्रुति श्रोतुर्भवति। कथ च ततो न भवेत्। सम्बन्धाभावात्। उपकार्योपकारकभावाभावात्। तदभावमेव दर्शयन्नाह। विषयोपनयाद् विषयसन्निधापनादयम्वक्तास्य श्रोतु श्रावकः स्यात्। श्रावयिता भवेत्। तच्च प्रत्युपस्थापन न शक्यन्तस्य श[4]ब्दस्य। नित्यस्य कथंचिदप्यपरिणामात्। अन्यथात्वाभावात्।

श्रोतुरिन्द्रियसस्कारङ्कुर्वन्नावरणविगमन वा शब्दस्य सम्पादयन् व्रजेदुपयोगम्वक्तेति चेत् (।)

तन्न। यस्मादिन्द्रियसंस्कारादयोप्युक्ताः प्रतिक्षिप्ता। "इन्द्रियस्य स्यात् संकार. शृणुयान्निखिलन्तदि"[२]त्यादिना। मामयम्वक्ता श्रावयतीति श्रोतुः प्रत्ययो बुद्धिरहमेनं श्रोतार श्राव[5]यामीति वक्तु. सप्रत्ययो भवति (।) अत प्रत्ययद्वयाद् यथायोगम्वक्तृश्रोत्रोर्भेद इति चेत्।

अनुपकार्येत्यादिना प्रतिषेधति। मा श्रावयत्यह श्रावयामीति भ्रान्तिमात्रमेतत्। किम्भूतमनुपकार्योपकारक। उपकार्य श्रोता। उपकारको वक्ता न भवति यस्मिन् भ्रान्तिमात्रे तत्तथोक्त। नित्ये च शब्दे बुद्धिजन्मनि पुस· सर्वथा व्या[6]पाराभावादनुपकार्योपकारकभाव. प्रतिपादित.। तस्मादेवभूताद् भ्रान्तिमात्रात्तद्भावे। वक्तृश्रोतृभेदभावेऽतिप्रसङ्गः। सर्वस्याश्रावयितुरशृण्वतश्चैव स्यात् (।) किङ्कारण। अ[न्यत्राप्युन्मत्तादौ विनैव शब्द][१] श्रवणेन भ्रान्त्याऽह शृणोमीत्यादिप्रत्ययदर्शनात्। तस्मात् सर्वथोपकाराभावे च तथाप्रत्यय इत्यह श्राव[7]यामीत्यादि 198a
प्रत्ययो न युक्तः। किं कारण (।) सर्वेषां परस्परमनुपकार्योपकारकाणामेवमहमत· शृणोमीत्यादि प्रसङ्गात्। यथा तर्ह्युन्मत्तेषु भ्रान्त्या प्रत्ययोत्पत्तिस्तथा नित्येष्वपि भवत्वि[ति चेदाह। भ्रान्तिरित्यादि। भ्रान्ति][१] रपि या पुरुषस्योन्मत्तस्य भवति सापि स्वस्थावस्थाया कुतश्चित् पुरुषादुपकारे सति तथा प्रत्ययोत्पत्तौ तदाहि[1]त-

---

[1] Restored. [२] प्र० वा० १।२५८ [3] In the margin.

कारे सति अन्यत्रापि कयाचित् प्रत्यासत्त्या भवति। सापि पारम्पर्येण न स्यात्।

तस्माद् वक्तृश्रोत्रोर्व्यक्तिहेतुत्वे विशेषा[4]भावात् तुल्यः फलेन सम्बन्धः स्यात्। अपि च।

अनभिव्यक्तशब्दानां करणानां प्रयोजनम्।
मनोजपो वा व्यर्थः स्याच्छब्दो हि श्रोत्रगोचरः ॥३०१॥

श्रोत्रग्रहणलक्षणस्य शब्दस्यातिक्रमेऽतिप्रसंगात्।

नन्वेवमपि सामान्ये प्रसंगः।

न ब्रूमः शब्द एवेति। शब्दस्त्ववश्यं तल्लक्षणः। तस्य लक्षणान्तरा[6]भावात्। तत्र यदि शब्दात्मनां मन्त्राणामभिव्यक्तिहेतुः प्रयोक्ता जापी मनोजापी

संस्कारवशेन पुनरुन्मत्तावस्थायामन्यत्राप्यवक्तर्यपि। कयाचित् प्रत्यासत्त्या केनचित्सादृश्येन भवति। सापि भ्रान्तिर्नित्येषु मन्त्रेष्वत्यन्त पारम्पर्येणाप्यनुपकारे न स्यात्।

तस्मादित्यादिना प्रकृतमुपसहरति। यथोक्तविधिना वक्तृश्रोत्रोर्व्यक्तिहेतुत्वे। शब्दज्ञानहेतुत्वे विशेषाभावात्तुल्यो मन्त्रफलेन सम्बन्धः स्यात्। नित्येषु व्य[2]क्तिहेतुत्वमपि नैवास्ति (।) केवलमभ्युपगम्यैवमुच्यते।

अपि चेत्यादिना दूषणान्तरमाह। अनभिव्यक्तः(न)श्रोत्रविषयन्नीतः शब्दो यै. करणैस्तालवादिभिस्तान्यनभिव्यक्तशब्दानि। तेषा करणानां प्रयोजनं व्यापारणं व्यर्थं स्यादिति लिङ्गविपरिणामेन सम्बन्ध·। यत्रौष्ठादिप्रस्पन्दमात्रेण उपाशुजप क्रियते। स व्यर्थः स्यादिति वाक्या[3]र्थ। यत्रौष्ठादिप्रस्पन्दोपि नास्ति केवल मनसा मन्त्रचिन्तन स मनोजपः। वा शब्द समुच्चये। मनोजपश्च व्यर्थः स्यात्। यस्माच्छब्दो हि श्रोत्रगोचरः श्रोत्रग्राह्य एव शब्द· (।) शब्दस्वभावश्च मन्त्र·। उपाशुमानसयोश्च जपयो· श्रोत्रग्रहणाभावादशब्दत्वम् (।) अशब्दत्वाच्चामन्त्रत्व च जपन् कथ फलवान् स्यात्। गृह्यत इति ग्रहण। श्रो[4]त्रग्राह्य इत्यर्थः। तदेव लक्षणं यस्य शब्दस्य स तथोक्तः। तदतिक्रमेतिप्रसंगात्। श्रोत्रग्राह्य शब्दं मुक्त्वा मनोजपादेर्ज्ञानात्मकस्य शब्दत्व इष्यमाणे रसादीनामपि शब्दत्वं स्यात्।

नन्वेमपि श्रोत्रगोचरस्य. शब्दस्वभावत्वे शब्दत्वसामान्ये शब्दस्वभावताप्रसङ्गः।

नेति सि द्धा न्त वा दी। न ब्रूमः श्रोत्रगोचर. शब्द एवेति। शब्दस्त्व[5]वश्यन्तल्लक्षणः श्रोत्रग्रहणलक्षण इति ब्रूमः। कस्मात्। तस्य शब्दस्य श्रोत्रग्राह्यत्व-

वा न मन्त्रफलेन युज्यते।[7] न हि तदा श्रोत्रेण कंचिदर्थं विभावयामः। 522a
न चाशब्दात्मा मन्त्रः।

पारम्पर्येण तज्जत्वात् तद् व्यक्तिः सापि चेन्मतिः।

न हि मनसा[1]ध्यायतोऽपि मन्त्राभासा बुद्धिः श्रवणाद् ऋते। ततः शब्द-प्रभवत्वात्। सापि शब्दव्यक्तिरेव। एवं अनवस्था स्यात्। शब्दार्थविकल्पानां[2] अपि परम्परया प्रसूतिरस्तीति तेऽपि तथा स्युः।

ते तथा स्युस्तदर्था चेदसिद्धं कल्पनान्वयात् ॥३०२॥

म्मुक्त्वा लक्षणान्तराभावात्। तत्रैतस्मिन् शब्दस्वलक्षणे यदि शब्दात्मनां शब्द-स्वभावानाम्मन्त्राणामभिव्यक्तिहेतुः शब्दस्वरूपग्राहिज्ञानहेतु· पुरुष. प्रयोक्ते-ष्यते यस्य फलेन सम्बन्ध। तदानभिव्यक्तश्रुतिविषयाणां। श्रुतिविषय. शब्द.[6] सोनभिव्यक्तो यै· कारणैरिति विग्रह·। तेषां कारणाना प्रयोक्ता। ओष्ठादिस्प-न्दमात्रेण व्यापारयिता। उपांशुजापी न मन्त्रफलेन युज्यते नापि मनसा जपन् मन्त्रफलेन युज्येत। यस्मान्न हि तदा उपाशुमौनजपकाले श्रोत्रेण कंचिदर्थं शब्दाख्यम्विभावयामो गृह्णीम·।

मानसोपि जपो मन्त्र इत्याह। न च मान[7]सो विकल्पोऽशब्दात्मा मन्त्रः। 198b
शब्दस्य श्रोत्रग्राह्यत्वापौरुषयत्वनित्यत्वेनाभ्युपगमात्। तद्विपरीतत्वाच्च विक-ल्पस्य।

पारम्पर्येत्यादिना पराभिप्रायमाशकते। याप्युपाशुमनोजापकाले मन्त्रा-भासा मतिर्बुद्धिस्सापि तद्व्यक्तिः। तस्य शब्दस्य व्यक्तिज्ञान। कस्मात् (।) पारम्पर्येण तज्जत्वात्। शब्दजातत्वात्। तथा हि तस्य प्राक् शब्दज्ञानमुत्पन्न-न्तेन ज्ञानेन चाहितस[1]स्कारस्य क्रमेण मनोजपे शब्दप्रतिभासोत्पत्ते।

नेत्यादिना व्याचष्टे। न हि मनसा ध्यायतोपि जपिनो या मन्त्राभासा बुद्धिः सा श्रवणादृते। शब्दश्रवण विना। ततः शब्दप्रभवाच्छब्दादुत्पत्तेस्सापि मनो-जपकाले मतिः शब्दव्यक्तिरेव शब्दज्ञानमेव। ततश्च मन्त्रस्वभावत्वात् मनो-जपादेः प्रयोक्ता फलवान् स्यादिति भाव। एवमि[2]ति पारम्पर्येण मन्त्रत्वेऽन-वस्था स्यात्।

तमेवाह शब्देत्यादि। मन्त्रलक्षणाच्छब्दादर्थविकल्पाः शब्दार्थविकल्पाः। तथा हि (।) "अग्नये स्वाहा" (।) इत्युक्ते। अग्निर्ज्वलद्भासुरादिरूप इत्यादि-विकल्पाः कदाचिदुत्पद्यन्ते। तेषामपि परम्परया शब्दप्रसूतिरस्तीति तेपि विक-ल्पास्तथा स्युर्मन्त्रव्यक्तिलक्षणाः प्रयोगाः स्युः। शब्दप्रभवापि सती या तदर्था[3]-

न ब्रूमः सर्वा शब्दप्रभवा बुद्धिस्तद्व्यक्तिरिति। या तद्विष[3]या सा तस्य व्यक्तिः। मनोविकल्पस्य शब्दविषयत्वमसिद्धम्। न हि स्वलक्षणानां विकल्पानां वृत्तिरिति निवेदयिष्यामः।

ते हि अनपेक्षितवाह्यार्थोप[4]निधये यथास्वं स्वविकल्पवासनाप्रबोधाद् भवन्ति। बाह्यापायानागमे च भावात्। न हि यो यस्य सत्तोपधानं नापेक्षते[5] स तस्य हेतुरहेतुश्च कथम्। तस्मान्न मनोविकल्पः शब्दव्यक्तिः, यतः तद्वान् प्रयोक्ता स्यात्।

तत्प्रसूता तद्विषया च बुद्धिः तद्व्यक्तिः[6]। तदाश्रयः प्रयोक्तेत्यत्रापि श्रोत्रे

स शब्द अर्थ विषयो यस्या इति विग्रह। सैव चेन्मतिर्मन्त्रव्यक्तिर्न चार्थविकल्पा ये शब्दविषयाः। असिद्धमिति सि द्धा न्त वा दी। शब्दविकल्पस्यासिद्ध शब्दस्वलक्षणविषयत्व। किं कारण (।) कल्पनान्वयात्। सजातीयविकल्पहेतुकत्वात्। अध्यारोपिताकारविषया एव मनोविकल्पा।

नेत्यादिना व्याचष्टे। न ब्रूमः सर्वा शब्दप्रभवा[4] बुद्धिस्तद्व्यक्तिः शब्दव्यक्तिरिति (।) किन्तु या तद्विषया शब्दविषया विकल्पबुद्धिः। सा तस्य शब्दस्य व्यक्तिरिति।

तदेतदसत्। यतो मनोविज्ञानस्य तद्विषयत्वं शब्दविषयत्वमसिद्धं। यस्मान्न हि स्वलक्षणशब्दानां वृत्तिरिति निवेदयिष्यामः यदि बाह्योर्थो विकल्पानां न हेतुः कथन्तर्ह्युत्पद्यन्त इति (।)

आह। ते हीत्यादि। ते हि विकल्पा यथा[5] स्वमिति यस्य यो वासनाप्रबोधो हेतुः। विज्ञानप्रतिष्ठितत्वेनान्तरात्। विकल्पवासनाप्रबोधाद् भवति। अनपेक्षितो बाह्यार्थोपनिधिः सन्निधानं यैरिति विग्रहः। कस्मात्। बाह्येत्यादि। अपायो निरोधः। अनागमोनुत्पत्ति। बाह्यस्य निरोधेऽनुत्पत्तौ च विकल्पानाम्भावात्। यतश्चार्थमन्तरेण भवन्ति तस्मान्नार्थहेतवः। कि कारण[6](।) न हि यो यस्य सत्तोपधानं सत्तासन्निधान नापेक्षते सोनपेक्ष्यमाणस्तस्य निरपेक्षस्य हेतुरहेतुश्च विकल्पानां कथम्विषयो नैव। यत एवं न शब्दविषयो विकल्पस्तस्मान्न मनोविकल्पो [मनोजल्या(?पा)दिलक्षणः][1] शब्दव्यक्तिर्यतो येन। तद्वान्। मनोजपवान् पुरुषः। मन्त्रस्य प्रयोक्ता स्यात्। नैव स्यादिति यावत्।

199a शब्दाभिव्य[7]क्तिमभ्युपगम्यापि दोषमाह। शब्दप्रसूता तद्विषया च बुद्धिः शब्दव्यक्तिस्तदाश्रयस्तस्या व्यक्तेराश्रयो यत. पुरुषस्तस्मात् प्रयोक्तेत्यत्रापि पक्षे उक्तं। किमुक्त (।)[1]श्रो [त्रप्रयोक्तृत्वप्रसङ्ग इति श्रोता]पि हि शब्दप्रसूता-

---

[1] In the margin.

च प्रसंग इत्युक्तम्। तस्मिन् न ज्ञाने च प्रयोगे शब्दे पुरुषे व्याप्रियते। तस्य ज्ञानजननात्। न पुरुषः शब्दे[7]। तदात्मनि अनुपकारात्। एवं पुरुषः शब्दानां 522b
प्रयोक्तेत्यलौकिकोऽयं व्यवहारः।

सर्वथा[1] शब्दस्वभावानां मन्त्राणां प्रयोगात् फलावाप्तौ व्यर्थो मनोजपः। विकल्पस्य शब्दस्वरूपासंस्पर्शात्।

(घ) *समयकारणामुक्त्या फलविशेषः*

स्वसामान्यस्वभावानामेकभाव[2]विवक्षया।
उक्तेः समयकारणामविरोधो न वस्तुनि ॥३०३॥

समयकारा हि स्वलक्षणं इन्द्रियविषयं सामान्यलक्षणञ्च विकल्पप्रतिभासं यथाव्यवहारं संवृत्या[3] संकलय्य यथासमयं अर्थं निष्पादयेदिति समयमारोच-

---

यास्तद्विषयाया बुद्धेः स्वसन्तानभाविन्या आश्रयस्तथा च तस्यापि मन्त्रफलेन योगः[1] स्यादिति।

किं च नित्याना मन्त्राणा नातिशयोत्पादन प्रयोग किन्तु तद्विषयं ज्ञान प्रयोगः। तस्मिन्न ज्ञाने च प्रयोगेभ्युपम्यमाने शब्दः पुरुषे व्याप्रियते। कथ (।) तस्य पुरुषस्य ज्ञानजननात्। न पुरुषः शब्दे व्याप्रियते। कस्मात्। तदात्मनि नित्ये शब्दात्मनि कथचिदपि पुरुषेणानुपकारात् कारणात्। अथ च पुरुषः शब्दानां प्रयोक्तेत्य[2]लौकिकोयं व्यवहारः। लोके हि यो यत्र व्याप्रियते स तस्य प्रयोक्तेत्युच्यते।

सर्वथेत्यादिनोपसहारः। यदि साक्षाच्छब्दप्रसूता बुद्धिः शब्दबुद्धिः। अथ पारम्पर्येण (।) सर्वथा शब्दस्वभावानां मन्त्राणां प्रयोगात् तद्विषयज्ञानजननात् फलावाप्ताविष्यमाणाया व्यर्थो मनोजपः। किङ्कारणम् (।) मनोजपलक्षणस्य विकल्पस्य शब्दस्वरू[3]पासंस्पर्शात्।

यस्यापि समयात् फलन्तस्यापि कथम्मनोजपो न व्यर्थ इत्याह। स्वस्वभाव शब्दस्वलक्षणम्विकल्पप्रतिभास्याकारः सामान्यस्वभावन्तेषां स्वसामान्यस्वभावानामेकभावविवक्षया। दृश्यविकल्पयोरेकीकृत्य समयकारणामुक्तेर्मन्त्रप्रणयनात् मनोजपो व्यर्थः स्यादित्ययमविरोधः। समयकारस्याभिप्रायस[4]म्पादनेन फलनिष्पत्तेः। न तु वस्तुन्यविरोधः किन्तु विरोध एव। तथा हि (।) शब्दस्वलक्षणाद् वस्तुन फलावाप्तौ मनोजपो व्यर्थस्तस्यावस्तुसंस्पर्शात्।

समयेत्यादिना व्याचष्टे। शब्दस्वलक्षणं श्रोत्रेन्द्रियविषयं सामान्यलक्षणञ्च विकल्पप्रतिभासं यथाव्यवहारं लोकव्यवहारानतिक्रमेण संवृत्या संकलय्येति

यन्ति। एवं न मनोजपादौ दोषः। वस्तुस्वभावात्तु फलोत्पत्तौ अतत्स्वभा[4]संस्पर्शे न स्यात्। यदुक्तं न वर्णेभ्योऽन्याऽऽनुपूर्वीति।

आनुपूर्व्यामसत्यां स्यात्सरो रस इति श्रुतौ।
न कार्यभेद इति चेद्;

न हि सरो रस इत्यादि[5]पदेषु कश्चिद् वर्णभेदः।

(ङ) *वर्णानुपूर्विफलचिन्ता*

न च व्यतिरिक्तमन्यत्, यतः कार्यभेदः स्यात्। भिन्नां च तयोः प्रतिभां आनुपूर्वीमेव चातुल्यां पश्यामः। न च कारणस्याभे[6]दे कार्यभेदो युक्तः। तस्माद् भेदवती सा यतः प्रतीतिभेदः। सत्यम्।

आस्ति सा पुरुषाश्रया॥३०४॥

विकल्पबुद्ध्या दृश्यविक[5]ल्पयोः शब्दस्वलक्षणसामान्याकारयोरेकीकृत्य **समय-मारोचयेत्**। यो वाचा मनसा चाभिलपनम्मत्प्रणीतस्य मन्त्रस्यानुतिष्ठति तस्या-यम्मन्त्रो **यथासमयमर्थन्निष्पादयेदिति** (।) ततो य एन मन्त्रम्वाचा मनसा चाभि-लपति तस्य यथासमय चार्थं **निष्पादयेदिति न मनोजपादौ दोषः**। आदिग्रहणा-दुपाशुप्रयो[6]गादिपरिग्रह.। **वस्तुस्वभावात्तु** शब्दस्वभावात् मन्त्रात् **फलोत्पत्ता**वि-ष्यमाणायामतत्स्वभावसंस्पर्शे सति मनोजपादौ न फल स्यात्।

यदुक्तमित्यादिना पराभिप्रायमाशकते। यदुक्तम् (।) "वर्णा एव हि मन्त्र" इत्यत्रान्तरे।

न वर्णेभ्योन्या काचिदानुपूर्वीति तत्रोच्यते। **आनुपूर्व्यामसत्यां सर इति**
199b **श्रुतौ रस इति श्रुतौ** च न **कार्यभेदः**[7] प्रतीतिभेदलक्षणः स्यादिति चेत्। यस्मान्न **हि सरो रस इत्यादि पदेषु कश्चिद्वर्णभेदः**। य एव हि वर्णा. सर इत्यत्र पदे। त एव रस इत्यत्र पदे।

न च व्यतिरिक्तमन्यत् पदमस्ति **यतः कार्यभेदो** बुद्धिभेदलक्षणः **स्यात्**। अस्ति **च** कार्यस्य भेदः। यतो **भिन्नाञ्च तयोस्सरो** रस इति पदयोः **प्रतिभां** बुद्धिम्पश्याम। **आनुपूर्वीमे[1]व चातुल्यां** भिन्नान्तयो पश्यामो वर्णा पुनस्त एव। **न च कारणस्य वर्णस्याभेदे कार्यभेदो** बुद्धिभेदलक्षणो **युक्तः**। **तस्माद्** वर्णाभेदेप्यस्ति **भेदवती** प्रतिपदम्भिन्ना। सेत्यानुपूर्वी। **यतः** प्रतिपदम्भेदवत्या आनुपूर्व्या अय सर इत्या-दिपदेषु **प्रतीतिभेदो** बुद्धिभेदः।

सत्यमिति सि द्धा न्त वा दी। सत्यं प्रतिपदम्भेदवत्यस्त्यानुपूर्वी[2]। केवल

तथा हि ।

यो यद्वर्णसमुत्थानज्ञानजाज्ज्ञानतो ध्वनिः ।[7] 523a
जायते तदुपाधिः स श्रुत्या समवसीयते ॥३०५॥
तज्ज्ञानजनितज्ञानः स श्रुतावपटुश्रुतिः ।

सानुपूर्वी **पुरुषाश्रया** पौरुषेयी। अव्यतिरिक्तैव वर्णेभ्यः। वर्णाश्च प्रतिपदमन्ये चान्ये चोत्पद्यन्ते कारणभेदात्। केवलन्तेषु सादृश्यादेकत्वाध्यवसायो मन्दमतीना।

एतदेव दर्शयन्नाह। **तथा हीत्यादि**। अयमत्र समुदायार्थ । वक्तृस्थेन पूर्वपूर्ववर्णसमुत्थापकचित्तेनोत्तरोत्तरवर्णसमुत्थापक चित्तञ्जन्यत इति समुत्था[3]पकचित्तक्रमात्। तत्समुत्थाप्यानाम्वर्णानामुत्पत्तिक्रम क्रमोत्पन्नैश्च वर्णै· स्वविषयाणि क्रमभावीन्येव श्रोत्रविज्ञानानि साक्षाज्जन्यन्ते। क्रमभाविन्य एव वर्णालम्बना स्मृतयश्च पारम्पर्येण। ततो वर्णाना समुत्थापकज्ञानक्रमाद् या क्रमे कार्यता। स्वविषयज्ञानेषु च या क्रमेण कारणता सैवानुपूर्वीति व्यवस्थाप्यत इति।[4]

सम्प्रत्यव (?) पदार्थो विभज्यते (।) यो ध्वनिर्जायत इति सम्बन्ध.। यथा सर इत्यत्र पदे सकारात् परोऽकार.। कुतो जायते (।) **यद्वर्णसमुत्थानज्ञानजाज्ज्ञानतः**। पूर्वकालभावी वर्ण· सकार.। यश्चासौ वर्णश्चेति यद्वर्णः। यद्वर्णस्य समुत्थान कारण समुत्तिष्ठतेनेनेति कृत्वा। यद्वर्णसमुत्थानं । यद्वर्णसमुत्थानञ्च तज्ज्ञान चेति कर्मधारय । तस्मा[5]ज्जात यज्ज्ञान। तद् यद्वर्णसमुत्थानज्ञानज ज्ञान। तस्माज्ज्ञानतो **जायते**। सकारस्य समुत्थापक यज्ज्ञानन्तस्मादकारसमुत्थापक ज्ञान यदुत्पन्नन्तेनाकारो जन्यत इत्यर्थ·। एवमन्योपि पूर्वपूर्ववर्णसमुत्थानज्ञानजादुत्तरोतरो वर्णो जायत इति योज्य। एवन्तावद् वक्तृसन्तानस्थस्य समुत्थानज्ञानस्य क्रमाद् वर्णाना [6]क्रमेणोत्पत्ते कार्यत्वमुक्त। ते च क्रमेणोत्पन्ना. श्रोतृसन्तानस्थाना स्वविषयज्ञानाना क्रमेण हेतवो भवन्तो ज्ञायन्त इति दर्शयन्नाह। **तदुपाधिरित्यादि**। पूर्वो वर्ण उपाधिविशेषण [यस्योत्तरस्य वर्णस्य][1] स तथोक्तः। स इत्युत्तरो वर्ण **श्रुत्या** श्रोत्रज्ञानेन **समवसीयते** गृह्यते।

ननु च पूर्वो वर्ण उत्तरवर्णकाले[7] नैवास्ति (।) तत्कथन्तदुपाधि [पूर्व 200a
वर्णोपाधि]रुत्तरो वर्णो गृह्यत इति (।)

आह। **तज्ज्ञानजनितज्ञान** इति। तेन पूर्ववर्णविषयेण ज्ञानेन जनितं स्वविषय ज्ञान यस्येति विग्रहः।

---

[1] In the margin.

अपेक्ष्य तत्स्मृति पश्चात् स्मृतिमाधत्त आत्मनि ॥३०६॥
इत्येषा पौरुषेय्यैव तद्धेतुग्राहिचेतसाम् ।
कार्यकारणता वर्णे ह्यानुपूर्वीति कथ्यते ॥३०७॥

चित्तसमुत्थाना वाग्विज्ञप्तिः वर्णपदवाक्यानीति । तत्र[2] सकारसमुत्थापक-

---

एतदुक्तम्भवति । सकारालम्बनं यदा [श्रोत्रविज्ञान तस्मिन्नेवकाले][1] अकारसमुत्थापनचित्तेनाकारो जनितस्तेनाकारस्सकारालम्बनश्च प्रत्यय. समानकालः । तत्र साकारालम्बने[1]न श्रोत्रविज्ञानेन सहकारिणाऽकार. स्वविषय ज्ञान जनयन् पूर्ववर्ण्णोपाधि· प्रतीयत इत्युच्यत इत्यर्थ । तदेवं पूर्वज्ञानेन सहकारिणा जनितात्मज्ञान. । स इत्युत्तरो वर्ण्ण (।) कीदृश श्रवणकाले । **अपटुश्रुति**रित्यत्वरित शनै शनैरुच्चारितो यदा वर्ण्णो भवति । तदाऽपट्वी मन्दचारिणी प्रविभक्तवर्ण्णग्राहिणी श्रुति. श्रो[2]त्रविज्ञान यस्य शब्दस्येत्यपटुश्रुति. । यस्यामवस्थायाम्विभक्ता वर्ण्णा अवधार्यन्त इति यावत् । अति त्वरितन्तूच्चार्यमाणे विभक्तवर्ण्णापरिच्छेदात् कुत. क्रमेण स्मृतिजननमित्यस्य सन्दर्शनार्थं । अपटुश्रुतिग्रहणं । स एवभूतो वर्ण्ण किकारीति (।)

आह । **अपेक्ष्य तत्स्मृतिं** पूर्ववर्ण्णस्मृति । **पश्चादाधत्ते** । जनयति **स्मृतिमात्मनि** । स्वविषये[3] । पारम्पर्येणेति द्रष्टव्य ।

एतेन च स्वविषयाणि ज्ञानानि प्रति वर्ण्णाना क्रमेण कारणतोक्ता । **इत्युक्तेन क्रमेणैषा कार्यकारणता । वर्ण्णेष्विति** वर्ण्णाधारा वर्ण्णानामिति यावत् । **पौरुषेयेप्येव** । पुरुषकृतैवानुपूर्वीति लोके **कथ्यते** ।

किमपेक्षया वर्ण्णाना **कार्यता कारणता** चेत्याह । **तद्धेतुग्राहिचेतसा**मिति । हेतवश्च ग्राहीणि[4] चेति द्वन्द्व । तेषाम्वर्ण्णाना हेतुग्राहीणीति षष्ठीसमास. । पश्चाच्चेत शब्देन विशेषणसमास । वर्ण्णहेतव. क्रमेण यदि चेतासि तेषा सम्बन्धेन वर्ण्णाना क्रमेण कार्यता । तैश्चेतोभिर्वर्ण्णानाञ्जन्यत्वात् । तेषा वर्ण्णाना ग्राहीणि यानि चेतासि । तेषा सम्बन्धेन वर्ण्णाना क्रमेण कारणता । वर्ण्णैस्तेषाम्वर्ण्णग्राहिणा चेतसा जन्य[5]त्वात् ।

चित्तेत्यादिना व्याचष्टे । **चित्तं समुत्थानं** कारण यस्या **वाग्विज्ञप्ते**स्सा तथोक्ता । वागेव विज्ञप्तिः परविज्ञापनात् (।) सा च त्रिधा लोक इत्याह । **वर्ण्णे**त्यादि **वर्ण्णाः पदं वाक्यं** चेत्यभिधान यस्येति विग्रहः । तत्राक्षराणि वर्ण्णाः । अर्थावच्छिन्नो वर्ण्णसमुदायः पद । पदसमुदायो वाक्य । **तत्रेत्यादि** सर इत्यत्र

---

[1] In the margin.

चेतसा समनन्तरप्रत्ययेनाकारोत्थापनचित्तं जन्यते। तथा रेफाकारविसर्जनीयोत्थापकानि पूर्वपूर्वप्रत्ययानि।[3]

पदे यञ्च व[6]र्ण्णा सकारस्तस्मात् परो अकारस्ततो रेफस्तस्मादकारस्तस्मात्परो विसर्जनीय इति। **तत्र सकारस्य समुत्थापनं** कारण यच्चेत। तेन **चेतसा समनन्तरप्रत्ययेन**। समनन्तरग्रहणमालम्बनप्रत्ययव्यवच्छेदार्थं। **अकारोत्थापनचित्तं**। अकार उत्थाप्यते **जन्यते** येन चेतसा। तदुत्पाद्यते। **तथेत्युक्तेन** क्रमेण[7] **रेफाकारविसर्जनीया उत्थाप्यन्ते** यैश्चित्तैस्तानि **पूर्वपूर्वप्रत्ययानि**। पूर्व पूर्व चित्त प्रत्यय कारण येषामिति विग्रह.। तत्राकारसमुत्थापनचेतसा रेफ उत्पद्यते। रेफसमुत्थापनचेतसा समनन्तरप्रत्ययेनाकार। अकारसमुत्थापनचेतसा विसर्जनीय उत्पाद्यत इति। 200b

ननु चेदम्पदमुच्चारयामीति विवक्ष[1]या पदमुच्चार्यते। तेनैकयैव विवक्षया वर्ण्णक्रम उच्चार्यते। न तु वर्ण्णाना प्रत्येक विवक्षापूर्वकत्वमप्रतीते. (।) तत्कथमुच्यते (।) सकारादिसमुत्थापकचित्तेनाकारादिसमुत्थापक चित्त जन्यत इति।

एवम्मन्यते (।) वर्ण्णोच्चारणे तावदयमेव क्रम। पदोच्चारणेपि प्रथममयमेव क्रम (।) तथा हि (।) सकारविवक्षया सकारमु[2]च्चारयत्येवमुत्तरोत्तरवर्ण्णविवक्षयोत्तरोत्तरम्वर्ण्णमुच्चारयति। अभ्यासात्तु पदोच्चारणे पदविवक्षैवैका कारणमित्येके।

अन्ये त्वन्यथा (।) पदोच्चारणे। एकैवविवक्षा कारणमिति (।)

सत्यमेतत्। केवल सकारोच्चारणकालेऽवश्य चित्त विद्यतेऽन्यथा मरणप्रसङ्गात्। तदेव च चित्त सकारसमुत्थापकमुच्यते तदन[3]न्तर सकारस्योत्पत्ते। एवमुत्तरोत्तरवर्ण्णेषु चित्तसमुत्थापकत्व द्रष्टव्यमिति। अत्र च "सकारसमुत्थापकचेतसा समनन्तरप्रत्ययेनेत्या"दिना ग्रन्थेनैककर्त्तृक एव वर्ण्णक्रमोर्थप्रतीतिहेतुर्न भिन्नकर्त्तृक इत्युक्तम्भवति। तेन यदुच्यते म ण्ड ने न।

"कार्यकारणभावश्चेत् क्रमस्तद्ग्राहिचेतसा।
तद्धेतुरात्मभेदो वा वक्तृभे[4]देपि धीर्भवे"दिति (स्फोटसिद्धिः ३१)

तदपास्त। भिन्नकर्त्तृकवर्ण्णग्राहिचेतसामात्मभावस्यार्थप्रतीतिहेतुत्वानभ्युपगमात्।

यच्चाप्युक्त म्म ण्ड ने न (।) "अथ समुत्थापकचित्तक्रमेण वर्ण्णक्रमादर्थप्रतीतिस्तथापि स च क्रमो ज्ञापकत्वाज्ज्ञानमपेक्षते। दृश्यते च तिरोहितव्यवहितवक्तृप्रयुक्ताच्छब्दादर्थज्ञान(।)न च तत्र समुत्थापकचित्तकार्यकारणता[5] कश्चन निश्चेतुमर्हति। चक्षुरेकत्वे हि सा निश्चीयेतान्तरेण शब्दज्ञानात्। न च तिरोहित-

तद् इमे वर्णा अन्यान्यहेतव स्वकारणानुपूर्विजन्मानः।

श्रुतिकालेऽपि यदा मन्दचारिणः पूर्ववर्णज्ञानसहकारिप्रत्यया[4]पेक्षाः स्वज्ञानं जनयन्ति, तदा पूर्वस्मरणापेक्षा एव स्मृतिमुपलीयन्ते। भिन्नकार्यकारणप्रत्यय-

---

व्यवहितयोर्वक्तुरेकत्वे प्रमाणमस्ती"ति।

तदयुक्त। यतस्तिरोहितव्यवहितावस्थायाम्वक्तुरेकत्व कैश्चिदवधार्यत एव। तथा हि (।) देवदत्तो मा शब्दयति न यज्ञदत्त इति लोके प्रतीतिपूर्विकैव प्रवृत्तिर्दृश्यते। यत्र नावधारण न तत्र[6] प्रवृत्तिरितीष्टसिद्धिरेव।

अपि च स्फो ट वा दिनोपि तिरोहितावस्थादौ कथ स्फोटाभिव्यक्तिर्व्यञ्जकाना वर्णानामेककर्त्तृकत्वानवधारणात्। अवश्य च तत्र स्फोटाभिव्यक्ति[रेष्टव्या। अन्यथार्थावगतिर्न स्या][1] दिति कैश्चिदवधार्यत एव (।) यत्किञ्चिदेतत्।

तदिति तस्मादिमे **वर्णा अन्यान्यहेतव** इति। अन्यदन्यत्समुत्थापक चित्त
2012a हेतुर्येषा[7]मित्यर्थ· । **स्वकारणानि** समुत्थापकान्येव ज्ञानानि तेषामानुपूर्वी क्रमस्तस्या **जन्म** येषान्ते तथोक्ता.। कारणक्रमात् क्रमभाविनो वर्णा इत्यर्थ.। इयता च (।)

यो यद्वर्णसमुत्थानज्ञानजाज्ञातो ध्वनि· (।) इत्येतद्व्याख्यातं।

[स श्रुत्या समवसीयत][2] इत्येतद् विवृण्वन्नाह। **श्रुतीत्यादि। श्रुतिकालेपि** श्रवणकालेपि **यदा मन्दचारिण** इति यदा नातिद्रुतमुच्चार्यन्त इत्य[1]र्थ.। **पूर्ववर्णालम्बन ज्ञानन्तदेव सहकारिप्रत्ययस्तमपेक्षन्ते** ये वर्णास्ते तथोक्ता.।

त एवभूता. कि कुर्वन्ति (।) **स्वज्ञान** स्वविषय श्रोत्रविज्ञान **जनयन्ति। तथा** हि (।) सकारालम्बन श्रोत्रविज्ञान यस्मिन्नेव काले तथैवाकारोप्यकारसमुत्थापनचेतसा जनितस्तेनाकार. सकारालम्बन च ज्ञानमेककालन्तस्मादकारः सकारालम्बनज्ञानेन सहकारिणा[2] स्वविषय ज्ञान जनयति (।) एवमन्येष्वपि वर्णेष्वय न्यायो योज्य ।

तदेति यदा स्वविषयमनुभवज्ञान जनितवन्तस्तदा **पूर्ववर्णविषय** यत् **स्मरणन्तदपेक्षा एव स्मृतिमुपलीयन्ते** स्मृतावारोहन्ति। येनैव क्रमेणानुभूतास्तेनैव **क्रमेण** स्मर्यन्त इत्यर्थ । स एषो युगपदभावलक्षणो वर्णाना स्वभाव इति सम्बन्ध.। कीदृश इत्याह। **भिन्नेत्यादि[3]**। पूर्वपूर्वविज्ञानजन्यत्वाद् भिन्नः **कार्यभावः**। उत्तरोत्तरज्ञानस्य हेतुत्वाद् भिन्न **कारण**भावश्च येषा सकारादिसमुत्थापकज्ञानानान्तानि भिन्नकार्यकारणभावानि। तान्येव **प्रत्यया** हेतव.। तेभ्यो **निर्वृ-**

---

[1] In the margin.

निर्वृत्तिधर्मा भिन्नजननधर्मा[5] च स हि वर्णस्वभावः पुरुषसंस्कारभेदभिन्नः क्रम इत्युच्यते।

अन्यदेव ततो रूपं तद्वर्णानां पदापदम्।
कर्तृसंस्कारतो भिन्नं[6] सहितं कार्यभेदकृत् ॥३०८॥

त्तिरुत्पत्ति· सैव **धर्मो** लक्षण यस्य स्वभावस्येति विग्रह। एतेन तद्धेतुचेतास्यपेक्ष्य वर्णाना कार्यत्वमुक्त।

तद्ग्राहिचेतास्यपे[4]क्ष्य कारणत्वमाह। **भिन्नस्य** विज्ञानकार्यस्य निर्वर्त्तन **जननं** स एव **धर्मो** लक्षण यस्य स्वभावस्येति विग्रह। **स** एवभूतो **वर्णस्वभावः पुरुषसंस्कारभेदभिन्नः** पुरुषप्रयत्नभेदभिन्न. **क्रम इत्युच्यते।**

ननु क्रमो वर्णाना धर्मस्तेन कथ स एवभूतो वर्णस्वभाव क्रम इत्युच्यते।

एवम्मन्यते (।) न युगपदुत्पन्नाना क्रमोस्त्यप्रतीते। तस्माद्[5] युगपदुत्पन्नानामेव वर्णाना क्रम·। अयुगपदुत्पन्नाश्चेद् वर्णा इष्यन्ते त एव लोके क्रमो न वर्णेभ्योर्थान्तरभूतोसावप्रतीते। नापि तेषा क्रम एको धर्मोऽसहभावात्। नापि प्रत्येक धर्म क्रमोप्रतीते। तस्मादयुगपदुत्पन्ना एव वर्णा क्रम इत्युच्यते इत्युक्त। केवलमेषा क्रम इति कल्पितोय व्यवहार। न च य एव सर इति पदे[6] क्रमो लोके प्रतीयते स एव रस इति पदे। नापि क्रमव्यतिरिक्त पूर्वापरवर्णाना स्वरूप। तस्मात् प्रतिपद वर्णानामन्यदेव स्वरूप। लोकश्च सर इति पदाद् रसपदस्यान्यत्वमवधारयत्येव।

तेन यदुच्यते म ण्ड ने न।

"उत्पत्तिवादिनो वर्णा कामन्ते सन्तु भेदिन।
न त्वसाधारणस्तेषाम्भेदोर्थज्ञानकारण।" (स्फोटसिद्धि. ३०)

तस्यानवधारणात् सकेतकाले[7] चादृष्टत्वादिति (।) 201b

तदपास्त। यतस्सर इति वर्णक्रमाद् रस इति वर्णक्रमो भिन्न एवावधार्यते। नापिक्रमव्यतिरेकेण वर्णा प्रतिभासन्ते। तस्मात् क्रमभेदावधारणमेव वर्णभेदावधारण (।) केवल रसपदाद् रसपदान्तरस्य भेद सादृश्यान्नावधार्यते (।) अत एव सकेतकाले दृष्टत्वात् रसपदार्थप्रतिपादक युक्तम् (।) एवमन्यस्यापि पदस्येति यत्किञ्चिदेतत्।

एतदेव [1] दर्शयन्नाह। **अन्यदेवे**त्यादि। यतो **वर्णानां** स्वभावो यथोक्त· क्रम **इत्युच्यते ततः** कारणात्। **तदिति** सादृश्यादेकत्वेनाध्यवसितमपि **रूपम्**वर्णानामन्यदेव **पदं पदं** प्रतिपद। कि कारण (।) **कर्तृसंस्कारतो भिन्नं** यत. (।) समुत्थापकचित्तमेव कर्तृ तस्य शक्तिभेदाद् भिन्न। **सहितमिति** पूर्वोत्तरक्रमेणो-

तस्मान्न खल्वेक एव स्वभावो वर्णानां पदेषु कर्तृचित्तसंस्कारभेदेन भेदात्।
523b **स परस्परसहितः[7] कार्यभेदस्य हेतुः।**

सा चानुपूर्वी वर्णानां वर्तते रचनाकृता।
इच्छाऽविरुद्धसिद्धीनां स्थितिक्रमविरोधतः॥३०९॥

कार्यकारणप्रत्ययोत्पन्न[1]स्वभावविशेषो वर्णानामानुपूर्वीत्युक्तम्। सा च पुरुष-वितर्कविचारकृतेति अनवस्थितक्रमाः। इच्छाऽविरुद्धसिद्धिक्रम[2]त्वात्। कर्म-

---

च्चारितं। **कार्यभेदकृ**दिति। बुद्धिभेद करोति[2](।)

न च "वर्णा निरर्थकास्सन्त" इति (१।२४१) पूर्वमेव प्रतिपादित (।) तत्कथम्वर्ण्णस्वरूप सहित कार्यभेदकृदित्युच्यते।

अत्रैके मन्यन्ते (।) प्रतिपदम्वर्ण्णाना स्वरूपम्भिन्न पौरुषेयम्वाचक। नापौरुषेयमिति (।) यदाह (।) सत्यम् (।) अस्ति सा किन्तु पुरुषाश्रयेति ( )।

तदयुक्तम् (।) वर्ण्णाना सहितासहितानामर्थप्रतिपादकत्वात्। तस्मादयमभिप्रायः (।) यदि परमार्थतो वर्ण्णक्रम· स्या[3]त् तदासावेकपदादिरूपतया कल्पितोर्थस्य प्रतिपादक· स्यात्। यतश्चैकेन विकल्पेन विषयीकृता क्रमिणो वर्ण्णा· प्रतिपादका अत एवैकविकल्पावभासित्वात्। क्रमिणाम्वर्ण्णाना रूप सहित कार्यभेदकृदित्युच्यते इत्यदोष। यतश्च समुत्था[पकभेदाद् भेद]। **तस्मान्न खल्वेक एव स्वभावो वर्ण्णानां** सरो रस इत्यादि**पदेषु**। कि कारण (।) **कर्तृचित्त-संस्कारभेदेन भेदात्**। कर्तृ च तच्चित्तज्ञातस्य संस्कारभेद समनन्तरप्रत्ययभेदेन शक्तिभेदस्तेन वर्ण्णाना स्वभावस्य भेदात्। **स** च वर्ण्णानाम्प्रतिपदम्भिन्न· स्वभाव. क्रमरूप एकविकल्पारूढत्वात्। **परस्परसहितः कार्यभेदस्यार्थविषयबुद्धि-भेदस्य हेतुः**।

या चैव कार्यकारणता लक्षणानुपू[4]र्वी **सा चानुपूर्वी वर्ण्णानां** प्रवृत्तेत्युत्पन्ना **रचनाकृत**· पुरुषात्। रचना करोतीति **रचनाकृत्** तस्मात्। कस्मादित्याह। **इच्छे-**त्यादि। पुरुषेच्छया येषा वर्ण्णानाम**विरुद्धा सिद्धिस्तेषां स्थितस्य क्रमस्य विरोधतः**।

कार्येत्यादिना व्याचष्टे। **कार्यकारणभूता**श्च ते **प्रत्यय**याश्चेति विग्रहः। वर्ण्णसमुत्थापकचित्तान्येवमुच्यन्ते। तानि हि पूर्वविज्ञानापेक्षया कार्य[5]भूतान्युत्तर-विज्ञानापेक्षया कारणभूतानि। तेभ्य **उत्पन्नः स्वभावविशेष आनुपूर्वीत्युक्तं**। **सा चानुपूर्वी** पुरुषस्य यौ वितर्कविचारौ **तत्कृतेति** कृत्वा**नस्थितक्रमा** वर्ण्णा.। किमिदमिदं वेति विमर्शाकारो विकल्पो वितर्क.। इदमेवेति निश्चयाकारो विचारः। कस्मान्न स्थितक्रमा। **इच्छे**त्यादि। इच्छया अविरुद्धा सिद्धिर्यस्य **क्रमस्य स इच्छाऽविरुद्धसि[6]द्धिः**। इच्छाविरुद्धसिद्धिः **क्रमो** येषान्ते तथोक्ताः।

विशेषानुक्रमवत्।

न हि देशकालयोः स्थितिक्रमवान् हिमवद्विन्ध्यमलयानां वा बीजांकुरादीनां स्वेच्छया क्रमरचना[3] शक्यते कर्त्तुम्। तस्मात् पुरुषधर्मसख्यातविकल्पानुक्रमे सति (भावात्) असति चाभावात्।

कार्यकारणता सिद्धेः पुंसां वर्णक्रमस्य च।
सर्वो ब्रर्णक्रमः पुंभ्यो दहनेन्धनयुक्तिवत् ॥३१०॥

सतीन्धने दाहवृत्ते असति चाभावात्। अदृष्टेन्धनोऽपि न ह्यनिन्धनः, तद्देशकालनियमस्यायोगात्। नियमे सति[5] तस्यैवेन्धनत्वात्, इन्धनस्य दहनोपादान-

---

तद्भावस्तस्मात्। तथा हि (।) यथेच्छम्वर्णाना क्रमो व्यवस्थाप्यते। किमिव (।) **कर्मविशेषानुक्रमवत्।** यथा कर्मविशेषाणामाकुञ्चनादीनामिच्छा व्यवस्थिते क्रमस्तद्वत्। 202a

न हीत्यादिना वैधर्म्यमाह। देशकालयोरिति देशेस्थित[1]. . . . . **[1]मरचना शक्यते कर्त्तुं** न ही ति सम्बन्ध। न हि हि म व त्स्थाने वि न्ध्यो भवतु म ल य स्थाने विन्ध्यादि रित्येव पूर्वमङ्कुरो भवतु पश्चाद् बीजात्तज्जनकमिति पुरुषेच्छया शक्यते विपर्यास कर्तु। वर्णास्तु शक्यन्ते यथेच्छ विपर्यासयितु। **तस्मान्न** व्यवस्थितक्रमा वर्णा। तत ए [व. . . . . (३०८)

. . . . का[2]र्यकारणभूते **विकल्पानुक्रमे सति** वर्णक्रमस्य भावादसति **च** विकल्पानुक्रमे वर्णक्रमस्याभावात्। लौकिकवाक्येषु **पुंसाम्वर्णक्रमस्य च कार्यकारणतासिद्धिः**। पुरुष· कारण वर्णानुक्रम कार्य·। तत कार्यकारणतासिद्धे कारणादन्योपि वैदिक **सर्वो वर्णं** [. . . . .]3 ति सर्वो **दहन इन्धनपूर्वक** एवेति **युक्तिस्तद्वत्।**

सतीत्यादिना व्याचष्टे। सतीन्धने दाहवृत्ते दह्यतेनेनेति दाहो दहन एवोक्त। **असतीन्धने** दहनस्याभावात्। क्वचिद् दहनेन्धनयो· कार्यकारणभावसिद्धौ सत्या**मदृष्टेन्धनोपि** यस्यापि दहनस्येन्धन न दृष्ट सापि [. . . . .]4त्। तदा **तस्य** दहनस्याहेतोर्देश**नियमस्य कालनियमस्यायोगात्।** सर्वत्र सर्वदा भावः स्यात्। अथ नियमेनैव

---

[1] One side of the leaf is torn, about 32 letters in every line are missing.

लक्षणत्वाच्च। तथायमपि वर्णक्रमो पुरुषप्रयत्नं यदि नापेक्षेत, तदा निरालम्बः स्वयं प्रकाशेत्[6]**। प्रत्यत्नेनापि न शक्येत, अतत्प्रच्छेदात्। क्वचित् शक्तौ सर्व-**
5242 **स्तथा स्यात्, विशेषाभावात्। तद्भावभाविनोऽविशिष्टस्य चातत्कृतौ**[7] **सर्वत्र कार्यकारणभावश्च निराकृतः स्यात्। अन्वयव्यतिरेकलक्षणत्वात् तस्य। लक्षणान्तरं वाच्यम्**[1]**। घटादीनि च सर्वाणि वस्तूनि कृत्रिमाकृत्रिमानि प्रसजन्ति। तत्राप्येवं कल्पनायाः सम्भवात्। विशेषाभावाच्च। तानपि, परादर्शनपूर्वकमेव**

क्वचिद्देशादौ भवतीतीष्यते। तदा देशादिनियमे च दहनस्येष्यमाणे **तस्यैव** देशादे-**रिन्धनत्वात्**। किं कारण (।) **दहनेत्यादि**। दहनस्योपादान क[. . .. .]5 नपेक्षत्वे देशकालनियमायोगा-**स्तथायमपि वर्णक्रमो** हेतुभूत **पुरुषप्रयत्न यदि नापेक्षेत। तदा निरालम्बो** निरा-श्रय पुरुषप्रयत्नानपेक्षः **स्वयं प्रकाशेत** वर्णक्रममुच्चारयामीत्येवम्पुरुषस्य **प्रय-त्नेपि न शक्येत** वर्णक्रम· प्रकाशयितुं। कस्माद् (।) अत [त्र.. . .. .]6 क्रमे पुरुषस्य शक्तिस्तदा **क्वचि-च्छक्तावि**ष्यमाणाया **सर्वो** वैदिकोपि वर्णक्रमस्**तथा स्यात्** पौरुषेय स्यात्। कस्मात् (।) लौकिकवैदिकवर्णानुक्रमयो**र्विशेषाभावात्**। विषाद्यपनयनादिलक्ष-णस्य विशेषस्य लौकिकेष्वपि दृष्टे।

किञ्च **तद्भावभाविनः** पुरुष[.. .. .. 202b .... .विषा]7 [1]द्यपनयनादिना लौकिकवर्ण्णक्रमाद-**विशिष्टस्य च** वैदिकवर्ण्णक्रमस्यातत्कृतौ प्रकर्षेण कृतौ। **सर्वत्रेति** यत्रापि पुरुष-कृतत्वमिष्टन्तत्रापि **कार्यकारणभावश्च निराकृतः स्यात्**। कस्माद् (।) अन्वये-त्यादि। तद्भावे भावोन्वय. (।) तदभावेऽभावो **व्य ति रे कः** (।) **तल्लक्षणत्वा-त्तस्येति** का[र्यं... ... .]1कार्यता नेष्यते (।) तदा तद्भावभावित्व-व्यतिरिक्त कार्यकारणभावस्य **लक्षणान्तरम्वाच्यं**। यद्विरहाद् वैदिकाना पुरुष-प्रयत्नेन सह कार्यकारणभावो न स्यात्। न चान्यल्लक्षण कार्यकारणभावस्यास्ति।

अथ तुल्ये कार्यकारणभावलक्षणे लौकिको वर्णक्रम. कृत्रिम इष्टो थे[.... .. ..]2: **प्रसजन्ति**। कि कारण (।) **तत्रापि** घटादिष्**वेवं कल्पनाया** वैदिकशब्दक्रमवत् कल्पनायाः **सम्भवात्**। यथा पुरुषव्यापारेण स एव वैदिकः क्रमो व्यज्यत इति कल्पना। तथा घटादयोपीति।

---

[1] Illegible.

अन्यः करोति, एवं तर्हि अविदितकर्तारश्च केचित्, सर्वे वा केषांचित् अक्रियाभिनिवेशोऽस्तु। तस्मात् वर्णानुपूर्वीयं[3] **प्रसिद्धिकार्यकारणभावश्च वस्तुधर्मानतिक्रमात्, सर्वा पुरुषकृता।**

तत एव।

असाधारणता सिद्धा च पुंसां क्रमकारिणाम्[4]**।**
अतो ज्ञानप्रभावाभ्यां अन्येषां तदभावतः॥३११॥

अयं वर्णानां क्रमो विषनिर्घातादिसमर्थो नान्य इति जानीयात्, तदा तं तथैव

विशेषाभावाच्च। न हि पुरुषव्यापारानुविधायित्वेन घटादे सकाशा[. . . . . .]३ स्तस्य विशेष इति चेदाह। **तानित्यादि**। **तानपि** घटादीन् परै पूर्वकै कुलालादिभिर्घटादीना रचना। तस्या- **दर्शनं पूर्वमेव**। तान् दृष्टवैवेति यावत्। **अन्यः** पाश्चात्योपि कुलालादि **करोति**। नानुपदेश। परोपदेशपूर्विका च येषा प्रतिपत्तिस्तेषामपौरुषेयत्वे [. . . . . वै]४ दिक क्रम कर्त्तुरस्मरणादपौरुषेय इष्ट। **एवन्तर्हि** घटादयोप्यविदितकर्त्तारश्च **केचित्**। बहुतरकालाच्छन्नदेशे घटादयो दृश्यन्ते (।) न च तेषा कर्त्ता स्मर्यते। तस्मात् तुल्ये पुरुषव्यापारानुविधाने यद्यपौरुषेयो वैदिकक्रमस्तदा सर्वेषा घटादीनामक्रि[. . . . .]५यथा वा कर्त्तुरस्मरणाद् वैदिकक्रमस्याक्रिया। एव **केषांचित्** कदाचित् घटादीनामस्मर्यमाणकर्त्तृकाणा**मक्रियाभिनिवेशोस्तु**। न चैव (।) **तस्मान्न** चैवेय लौकिकी वैदिकी च **वर्णानुपूर्वी** पुरुषकृतेति सम्बन्ध। कस्मादिति (।) आह। **प्रसिद्धेत्यादि**। **प्रसिद्धिः कार्यकारणभावो** [. . . . . .वि]६शेषणसमास। तेषा **धर्मः** स्वकारणान्वयव्यतिरेकानुविधानन्तस्यानतिक्रमात्।

यत एव पौरुषेया मन्त्रास्तत **एव** प्राकृतेभ्य. पुरुषेभ्यो **साधारणता** विशिष्टता **सिद्धा**। केषा (।) मन्त्राख्य**क्रमकारिणां पुंसां**। मत्रसज्ञितम्वर्ण्णक्रम कुर्वन्ति ये। तेषा केना [. . . . . ..]७मस्य परिज्ञान। समीहितार्थसम्पादन- 203a
शक्ति. **प्रभावः**। कि कारणम् (।) अन्येभ्योसाधारणतेत्याह। **अन्येषां** प्राकृतादीनां पुरुषाणान्तयोः। ज्ञानप्रभावयोरभावतः।

अयमित्यादिना व्याचष्टे। **वर्णानामयं क्रमो विषनिर्घातादिसमर्थो नान्य इत्येवं**विभागेन **यद्यन्योपि** प्राकृतपुरुषो **जानीयात् तदा** तम्वर्ण्णक्रमन्त**थैव** विभागे-

प्रतिपद्येत। न चैवम्। तस्मादयं अनुक्रमः स्वभावतः कार्यकृत् तथापि कश्चिदेव विज्ञात इति परोक्षार्थ[6]दर्शी पुरुषो भवति। न ह्ययमर्थक्रियासमर्थ इति न हि शक्यं प्रत्येतुम्। असंकीर्णस्य लिङ्गविशेषस्यासिद्धेः।

›24b **प्रत्यक्षेण तु अनुपदिष्टयोर्मन्त्रामन्त्रयोर[7]परिज्ञानात्। उपदेशेऽपि केनचिदप्याकारेण स्वभावविवेकाप्रतीतेरन्यत्र, कार्यसंवादाच्च। तस्य च कार्यस्य प्राग् द्रष्टुमशक्यत्वात्[1]।**

न चायं क्रमः स्वभावतः कारकः, कस्यचिद् आशुसिद्धेः, अन्यस्य चिरात् सिद्धेः,

---

नैव **प्रतिपाद्ये**[1]तानुतिष्ठेत् (।) **न चैवं** प्रतिपद्यते (।) **तस्मादयं** मन्त्राख्यो वर्ण्यानुक्रमः **स्वभावतो** यदि नाम **कार्यकृदभ्युपगतो** मी मा स कै स्तथापि **कश्चिदेव** पुरुषैरतीन्द्रियशक्तिभेदयुक्तो **विज्ञात इति** कृत्वास्ति **परोक्षार्थदर्शी पुरुषो** यो मन्त्रन्तत्सामर्थ्यन्तदनुष्ठानञ्च वेत्ति।

यद्यपि सत्यतप प्रभाववता समीहितार्थसाधन वचन मन्त्र इत्युक्त (।) तथाप्यभ्युप[2]गम्योच्यते (।) **स्वभावतोपि** कार्यकृन्मन्त्र इति। कार्यकृन्मन्त्रकरणेन वा मन्त्रफलशक्तिज्ञानेन वा पुरुषातिशय इत्युक्तम्भवति। अनुमानात् मन्त्रामन्त्रपरिज्ञानात् परोक्षदर्शिनोऽभाव इत्यत्राह। **न** हीत्यादि। **अयमर्थः** (।) वर्ण्यानुक्रमलक्षणो विषाद्यपनयने **समर्थो**ऽयन्तु वर्ण्यानुक्रमो न समर्थ **इति**। एव **न हि शक्यं** लिङ्गात् प्रत्येतुं। कि कारण (।) म[3]न्त्रामन्त्रविभागेना**संकीर्णस्य लिङ्गविशेषस्यासिद्धेः**।

ननु च वर्ण्यरूपयोर्मन्त्रामन्त्रयो प्रत्यक्षेण ग्रहणे फलदानशक्तिरपि तदव्यतिरेकात् प्रत्यक्षगृहीतैवेति (।)

अत आह। **प्रत्यक्षयो**रित्यादि। **अनुपदिष्टयो**रित्यय मन्त्रो नायम्मन्त्र इत्येवमकथितयो**रपरिज्ञानात**। अयम्विषाद्यपनयने शक्तोऽयमशक्त इत्येवमनिश्चयात्। **उपदेशे**[4]पीति (।) यदि नाम केनचिदुपदिष्टम्भवत्यय मन्त्र एवकार्यकारीति। तथापि कथचित् **केनचिदप्याकारेण** मन्त्रस्य य· **स्वभावविवेक**स्तस्या**प्रतीतेर**निश्चयात्। उपदेशस्याप्रामाण्यात्। **अन्यत्र कार्यसम्वादात्**। मन्त्रसाध्यकार्यप्राप्त्या त्वयम्मन्त्र इति निश्चय स्यात्। **तस्य च** मन्त्रस्य साध्यस्य **कार्यस्य** करणात् **प्रागिति** मन्त्रानुष्ठात् प्राग् **द्रष्टुमशक्यत्वात्**।[5] तदानीन्तस्य सत्वादिति भावः। न चानिश्चितस्य मन्त्रस्यानुष्ठान सम्भवति। तस्मादवश्य मी मा स केनातीन्द्रियार्थदर्शी पुरुषोभ्युपगन्तव्यो यो मन्त्रामन्त्रस्वभाव विवेचयति (।) अन्यथा मन्त्रानुष्ठान न स्यात्।

न चायम्मन्त्राख्यो वर्ण्यक्रमः स्वभावतो विषाद्यपनयनादेः **कारकः** किन्तु

अन्यस्य व्रतचर्याद्यपेक्षणाच्च। एकस्मादपि कर्मणः[2] कयोश्चिदर्थानर्थयोर्दर्शनात्। वहतामपि मन्त्राणां कस्यचिद् विसंवादात्। न ह्ययं प्रकारः स्वभावे युक्तः, स्वभावस्य सर्वत्राविशेषात्[3]। पुरुषस्तु स्वेच्छावृत्तिः सत्त्वसभागताविवशात् सेवाविशेषाद् वा कंचिद् अनुगृह्णाति नापरमिति युक्तम्।

व्रतचर्या[4]भ्रंशादिना धर्माधर्मोपचये धर्माधर्मात्मनोः प्रकृत्या सिद्धयसिद्धी चेत्।

पुरुषसमयात्। कि कारण (।) **कस्यचिन्मन्त्रानुष्ठायिन** पु[6]रुषस्याशुमन्त्रसिद्धेः **अन्यस्य** तत्तुल्यमन्त्रक्रियानुष्ठायिन· **चिरात् सिद्धेः**। स्वतो हि फलदानेऽय काल-भेदो न युज्यते मन्त्रस्य केनचिदुत्कर्षानुत्कर्षाकरणात्। **अन्यस्य** पुरुषस्य मन्त्रात् फलनिष्पत्तौ **व्रतचर्याद्यपेक्षणान्न** स्वभावतो **मन्त्र** कारक। व्रत मन्त्रकल्पविहितो नियमस्तस्य चरणमनुष्ठान। अपिशब्दाद्धोमादिप[7]रिग्रह। स्वभावतो हि 203b
फलदाने। कि व्रतचर्याद्यनुष्ठानेनापेक्षितेन। ततोतिशयानुत्पत्ते। **तथैकस्मादपि** मन्त्रविषयाज्जपहोमादि**कर्म्मणः** सकाशात् **कयोश्चित्** पुरुषयोस्तुल्य विधि-मनुतिष्ठतोरप्येकस्यार्थदर्शनादन्यस्या**नर्थदर्शनान्न** स्वभावत फल। स्वभाव-तस्तु फलदाने तुल्योर्थयोग स्यात्। **वहतामपीति** (।) विषाद्यप[1]नयन कुर्व-तामपि **मन्त्राणां** पुनः कालान्तरे तेनैव पुरुषेण प्रयुक्ताना **कस्यचित्** कार्यस्य **विस-म्वादादकरणात्। न ह्ययं प्रकारो** वस्तुस्वभावे **युक्तः** (।) कि कारण (।) **स्वभा-वस्य सर्वत्र** पुरुषादौ **तुल्यत्वात्**। यो हि यस्य स्वभावो न स कञ्चिदपेक्ष्य स्वभावो भवति। यदा तु पुरुषकृतात् समयात् फलमिष्यते तदायमदोष। तथा हि (।) **पुरुषस्तु** म[2]न्त्रसमयस्य कर्त्ता। **स्वेच्छावृत्ति**रिति कृत्वा **कंचित्** पुरुषम**नुगृह्णाति नापरमिति युक्तं**। केन कारणेन। **सत्त्वसभागताविशेषात्**। मन्त्रक्रिया-नुष्ठातु सत्त्वस्य मन्त्रप्रणेत्रा सह सभागता तुल्यशीलाचारादिना। आदिशब्दा-दुपप्रदानादिपरिग्रह। तद्वशात्तदनुरागात्। **सेवाविशेषाद्वा**। जपहोमादिना देवताराधन सेवाविशेषस्त[3]स्माद्वा। **कञ्चिदनुगृह्णाति** पुरुष। **नापरं** सत्त्व-सभागतादिरहित।

व्रतेत्यादिना परमाशकते। नियमस्यानुष्ठान **व्रतचर्या**। व्रतचर्या च व्रत-चर्याभ्रङशश्चेति विरूपैकशेष.। **आदि**शब्द. प्रत्येकमभिसम्बध्यते। व्रतचर्या-दिना व्रतचर्याभ्रशादिना चेत्यर्थ·। व्रतचर्यादिना **धर्मो**पचये सति सिद्धिरिति सम्बन्ध.। तथा **प्र[4]कृत्या** स्वभावेन **धर्मात्मनो** वा पुस **सिद्धिः**। व्रतचर्याभ्रङ्-शादिना त्वधर्मोपचये सति। **अधर्मात्मनो** वा प्राकृत्या पुरुषस्यासिद्धिरिति वाक्यार्थो योज्यः। स्वभावतोपि मन्त्रात् फलनिष्पत्तौ यथोक्तेन प्रकारेण **सिद्ध्यसिद्धि**भेदो भविष्यतीति परो मन्यते।

न। धर्मवि[5]रुद्धानामपि क्रौर्यस्तेयद्वीन्द्रियसमापत्तिहीनकर्मबहुलानां डाकिनी-भगिनीतन्त्रादिषु दर्शनात्। तैरपि मन्त्रसिद्धिविशेषात्। न च एवं विधो[6] धर्म-स्वभाव इति यथावसरं निवेदयिष्यामः।

5252a **मैत्रीशौचधर्मप्रदानां तन्निमित्तमेव कस्याश्चिदसिद्धेः, विपर्ययेण च सिद्धेः[7]। न च एकरूपाद्धि कर्मणः तद्विरोधी धर्मोऽधर्मश्च युक्तः। कथमिदानीं अध-**

नेत्यादिना प्रतिषेधति। न धर्मापेक्षात् मन्त्रात् फलसिद्धि। किं कारण (।)**धर्मविरुद्धानम[5]पि** मन्त्रसिद्धिहेतूना व्रताना **डा कि नी भ गि नी तन्त्रादिषु दर्शनात्**। डा कि नी तन्त्रे। चतुर्भगिनीतन्त्रे। आदिशब्दात्। चौर्यहेतुषु कम्बु-कि नी तन्त्रादिषु दर्शनात्। कानि[*]पुनस्तानि धर्मविरुद्धानीत्याह। क्रौर्येत्यादि। **क्रौर्यं** प्राणिबधः। **स्तेयं** चौर्यं। **द्वि(?द्वीं)द्रियसमापत्तिर्मैथुन। हीनकर्म** मार्जारा-शुचिधूमप्रदानादि। आदिशब्दादन्यस्यापि धर्म[6]विरुद्धस्य ग्रहण। तानि क्रौर्या-दीनि **बहुलानि** भूयासि येषा व्रतानान्तानि तथोक्तानि। **तैश्च** तथोक्तैर्व्रतैर्मन्त्र-**सिद्धिविशेषात्**। तथा हि (।) डा कि नी तन्त्रे समयव्यवस्था। यदा प्राणिन हत्वा खादति तदा मन्त्रसिद्धिमासादयति। तथा कम्बु कि नी तन्त्रे स्तेयाचर-
2042a णात् सिद्धिरुक्ता। तथा मैथुनाचरणात् सिद्धिप्रदा काचिद्देवतेति भगिनी[7]तन्त्रा-न्तरे क्वचित् समय।

क्रौर्याद्येव धर्मो भविष्यतीति चेद् (।)

आह। **न चेत्यादि। एवम्विधो** क्रौर्यादिलक्षणो **धर्मस्वभाव इति यथा-वसरं** पश्चान्**निवेदयिष्यामः**। एवन्तावदधर्मादपि सिद्धिर्दृष्टा।

धर्मादपि सिद्धिर्न दृष्टेत्याह। **मैत्री**त्यादि। सत्वाना हितसुखचिन्तन-**म्मै त्री। शौ चं** द्विविध। बाह्यमान्तरञ्च। बाह्य स्नानादि। आन्तर स्तेयादि-निवृत्तिः। दा[1]नादिना परानुग्रहो धर्म। मैत्रीशौचधर्मा परे प्रदानानि येषान्ते तथोक्ता। तथाभूताना पुरुषाणा। **तन्निमित्तमेव** मैत्र्यादिकमेव **निमित्तं** कृत्वा **कस्याश्चित् सिद्धेरिति** मैत्रीविपर्ययेण या लभ्या तस्या **असिद्धेः। विपर्ययेण च** द्वेषादिना पुनः **सिद्धेः**। न धर्मोपचयापेक्षात् मन्त्रात् फलसिद्धिरिति। द्वेषादि-समुत्थितोपि क्रौर्यादिर्मन्त्रवि[2]धानेनानुष्ठितस्सन् धर्म एवेति (।)

अत आह। **न चेत्यादि**। एकरूपाद्धि सादिलक्षणात् **कर्मणः** सकाशात् **स तद्विरोध्यधर्मविरोधी धर्मो युक्तः**। अधर्मश्चेति मन्त्रविधानादन्यत्र तत एव हिंसादेः सकाशादधर्मश्च **न युक्तः**। न ह्यधर्महेतोर्धर्मो भवति विरोधात्। तथा हि (।) येनैव द्वेषाद्याशयेन मन्त्रविधानादन्यत्र हिंसादिकुर्वतोऽधर्मो भवति। [3]तेनै-वाशयेन मन्त्रविधानानुष्ठानेपि हिंसादिकं क्रियत इति कथन्तस्य धर्माङ्गत्वमिति।

र्मात्मनो व्रतादेः धर्मस्य फलमि[1]ष्टं अश्नुते।

न चैतस्य व्रतादेस्तदिष्टं फलं विपाकः, किन्तु पूर्वकृतस्य, ब्रह्महत्यादेशानुष्ठानात् ग्रामप्रति[2]लम्भवत्। तस्य तु अधर्मात्मनो व्रतस्यागामि फलं नेष्टम्। स तु मन्त्रादिप्रयोगः तस्येष्टफलस्य कर्मणः कथञ्चित् प्रकारेण उपकारात्[3] पाचकः। चित्रत्वादुपकारशक्तेः।

पुरुषविशेषाश्रयविपाकधर्मा धर्मः, तेन कृतः स[4] तथाऽऽराधनेन फलति।

यदि द्वेषादिकृतत्वान्मन्त्रविधानेनानुष्ठितोपि क्रौर्यादिरधर्म एव **कथमिदानीमधर्मात्मनो व्रतादेरिति** पूर्वोक्तात्। क्रौर्यादिलक्षणाद् व्रतात्। आदिशब्दादन्यस्मान्निहीनादशुचिधूपदानादिलक्षणात्। धर्मस्य **फलमिष्टसम्भोगादिलक्षण कथमश्नुते[4]** भजते जापी।

नेत्यादि सि द्धा न्त वा दी। न चैतस्याधर्मात्मनो व्रतादेस्तदिष्टं फलम्विपाकः कर्मफल। **किन्तु पूर्वकृतस्य** शुभस्य कर्मणो विपाक (।) किम्वदिति (।) आह। **ब्रह्महत्याया आदेशस्तस्यानुष्ठानात्** सम्पादनात्। **ग्रामप्रतिलम्भवत्।** यथा कश्चित् कञ्चित् पुरुष नियुक्ते। मारयेम ब्राह्मण अहन्ते ग्रामन्दास्यामीति। स तस्यादेशस्यानुष्ठाना[5]द् ग्राम प्रतिलभते। न च तद् ब्रह्महत्याया फल। किन्तु तद्ब्र(ह्म)हत्याचरणेनाराधित पुरुष सहकारिण प्राप्य पूर्वक शुभमेव कर्म तथा फलति।

अधर्मात्मनस्तर्हि तस्य व्रतस्य किफलमित्याह। **तस्य तु** क्रौर्यादिलक्षणस्या**धर्मात्मनो व्रतस्यागामि** भविष्यज्जन्मभावि फलमिष्ट नरकादि।

यदि शुभस्य कर्मण इष्ट फल किन्तेनाधर्मात्मना **मन्त्रादिप्र[6]योगेणापेक्षितेनेति** चेद् (।)

आह। **स** त्वधर्मात्मा। डा कि नी **मन्त्रादिप्रयोगः**। आदिशब्दात् क्रौर्यादिव्रतप्रयोगः। **तस्येष्टफलस्य** शुभस्य **कर्मणः**। इष्टम्फल यस्य कर्मण इति विग्रह। **कथञ्चित्** केनचित् **प्रकारेणोपकारात् पाचकः** फलस्य दायकः।

कथं पुनः कुशलस्याकुशलमुपकारकम्भवतीति (।)

आह। **चित्रत्वादुपकारशक्तेः।[7]** सहकारिभावो हि चित्रः। कदाचित् कुश- 204b
लस्याकुशल सहकारि। अकुशलस्यापि कुशल। यथात्यर्थमुदारकुशलकारिणो न नरकादिदुःखफलमशुभ कर्म कुशल सहकारि प्राप्येहैव जन्मनि। व्याध्यादिदुःखमात्र दत्वा क्षीयते। अधर्मात्मको मन्त्रादिप्रयोगः। कथचिदिष्टफलस्य कर्मण उपकारक इत्युक्त।

यत्र येन प्रकारेणोपकारस्तन्दर्शयन्नाह। **पुरुष[1]विशेषो** मन्त्रस्य प्रणेता स

तत्प्रयोगोपकारविपाकधर्मणः तत्फलस्य कर्मणः कृतत्वात्।

विनाऽपि विशेषपुरुषेण[5] तस्यैवोपकारात् फलमिति चेत्।

नैतदेवम्। पुरुषस्य आकारस्वभावचर्याऽधिमोक्षस्य वैयर्थ्यप्रसंगात्। तस्याप्युपकारकत्वे सिद्धः[6] पुरुषविशेषोऽसाधारणगुणः। तदधिमुक्तेरेव विषकर्मादि-
525b **करणात्। तस्मान्न मन्त्राः पुरुषप्रणीता अपि तदुपयोगनिरपेक्षाः[7] स्वभावेन फलदाः।**

(च) *आप्तचिन्ता*

येऽपि तन्त्रविदः केचिन्मन्त्रान्कांश्चन कुर्वते।

एवाश्रयस्तेन विपाक फलदानं स एव धर्मः स्वभावो यस्य स पुरुषाश्रयविपाकधर्मा। **धर्म** इति पुण्यविशेष। **तेनेति** पुरुषेण **कृतः** पूर्वजन्मनि। **स तथा तदाराधनेनेति**। स धर्मस्तथा क्रौर्याद्याचरणात्। तदाराधनेन मन्त्रप्रणेतृपुरुषाराधनेन **फलतीति**।

एतदेव स्पष्टयन्नाह। **तदित्यादि**। **तेन** मन्त्रप्रणेत्रा पुरु[2]षेण विहिता क्रौर्ययुक्तव्रतादि**प्रयोगस्तेनोपकारः**। कर्मण परिपोषः। **तेन विपाकः** फलदान धर्म स्वभावो यस्य तस्यैव**धर्मणः**। **तत्फलस्येति**। इष्टफलस्य **कर्मणः कृतत्वात्** कारणात्। तदाराधनेन फलतीति।

विनापि मन्त्रप्रणेत्रा पुरुवेण तदुपकारात्। **तस्यैव** यन्त्रस्य केवलस्य जपादिना व्यापारेणोपकारान्मन्त्रात्फ[3]लमिति **चेत**। ततश्च पुरुषाराधनेन फलतीति यदुक्तन्तदयुक्तमिति परो मन्यते।

नेत्यादि सि द्धा न्त वा दी। नैतदेवं। किङ्कारणं (।) **पुरुषेत्यादि**। मन्त्रप्रणेतुः **पुरुषस्याकारो** वर्णसंस्थानादिः। **स्वभावः** शान्तरौद्रादिः। **चर्या** कायवाग्व्यापारलक्षणा चेष्टा। तेषामाकारादीना**मधिमोक्षो**ऽधिमुक्तिस्तस्या **वैयर्थ्यप्रसङ्गात्**। मन्त्रस्याधिष्ठाता पुरुषश्चेन्ना[4]स्ति। किमर्थन्तस्याकारादीनधिमुच्येत्। अथेष्यते **तस्यापि** पुरुषस्य**उपकारकत्वन्तदा** तस्यापि मन्त्रप्रणेतुः पुरुषस्य मन्त्रात् फलसिद्धि प्रत्युपकारकत्वेऽङ्गीक्रियमाणे **सिद्धः पुरुषविशेषोसाधारणगुणः**। असाधारणा गुणा अस्येति विग्रहः। किं कारण (।) **तदधिमुक्तेरेव** पुरुषविशेषाकारस्वभावचर्याधिमुक्तेरेव **विषकर्मादिक[5]रणात्। तस्मान्न मन्त्राः पुरुषप्रणीता अपि तदुपयोगनिरपेक्षाः** पुरुषविशेषोपयोगनिरपेक्षा **स्वभावेन** प्रकृत्यैव **फलदाः**। किन्तु पुरुषविशेषोपयोगसापेक्षा एव।

यद्यसाधारणगुण एव पुरुषो मन्त्रस्य प्रणेता। कथ प्रभावादिविशेषरहिता **अपि तन्त्रविदो मन्त्रान्** भाषन्त इति (।)

प्रभुप्रभावस्तेषां स तदुक्तन्यायवृत्तितः ॥३१२॥

रथ्यापुरुषा अपि केचन तन्त्रज्ञा स्वयं कृतैर्मन्त्रैः किञ्चित् कर्म कुर्वन्ति। तथान्योऽपि मन्त्रस्य प्रणेताऽनतिशयश्च स्यादिति चेत्।

न। तेषां प्रभाववतैवा[2]धिष्ठानात्। तत्कृतं हि समयमनुपालयन्तः तदुपदेशेन च वर्तमानाः। तत्समयोपदेशनिरपेक्षाणां असामर्थ्यात्। तत्रापि तदाकारध्यानादेरेव प्रयोगात्। तस्मात् तदधिष्ठानमेव तत् तादृशमुन्नेयम्। अपि च।

अत आह। **येपी**त्यादि। मन्त्रप्रतिबद्धा[6]नि शास्त्राणि तन्त्राणि तानि विदन्तीति ते **तन्त्रविदः केचिदद्यत्वेपि मन्त्रानपूर्वान् कांश्चन कुर्वते**। तन्न **तेषां केवलानामसामर्थ्यं**। किन्तु यत् तन्त्रमाश्रितास्ते तस्य तन्त्रस्य प्रणेता य· पुरुषातिशयस्तस्य **प्रभोः** स्वामिन स **प्रभावः** सामर्थ्य। कस्मात् (।) **तदुक्तन्यायवृत्तितः**। तस्मात् प्रभुणा यस्तेभ्यस्समयादिको न्याय उपदिष्टस्तस्यानुवर्त्तनात्। प्रभु[7]- 205a
स्तुष्टस्तत्प्रणीतानपि मन्त्रानधितिष्ठतीति भाव·।

रथ्यापुरुषेत्यादिना पूर्वपक्षोपन्यासपूर्वक कारिकार्थं व्याचष्टे। **रथ्यापुरुषा अपी**ति सामान्यपुरुषा अपि **केचन** गारुडिकप्रभृतयो मन्त्रलक्षणतन्त्रज्ञाः **किञ्चिव्** विषादिशमनलक्षण **कर्म कुर्वन्ति**। न च ते विशिष्टा सुरापानाद्यनुष्ठानात्। **तथान्यो**पीति प्रभाववत्त्वेनाभिमतो **मन्त्रस्य प्र[1]णेताऽनतिशयश्च स्यात्**। रथ्यापुरुषवदतिशयरहितश्च स्यात् मन्त्राणा च कर्त्तेति। तथा च प्रभाववान् पुरुषो न सिध्यतीति मन्यते।

नेत्यादिना परिहरति। न प्रभावरहितानां मन्त्रकरणं (।) ये तु रथ्यापुरुषा अपि मन्त्रान् कुर्वन्ति **तेषां** पुरुषाणा **प्रभाववतैव** तन्त्रस्य प्रणेत्राधिष्ठानात् **मन्त्रकरणसामर्थ्यं**।

एतदेव दर्शयन्नाह। **तत्कृतं हीत्यादि**। तेन प्र[2]भावातिशयवता पुरुषेण कृत**समयमनुपालयन्तो** रक्षन्त·। **तदुपदेशेन चे**ति प्रभावयुक्तपुरुषोपदेशेन च **वर्तमाना** मन्त्रक्रियासमर्था. कुत एतत्।

तदित्यादि तस्य प्रभावतो यस्**समयः**। यश्चोपदेशस्तत्र **निरपेक्षाणां** पुसा मन्त्ररचनाया**मसामर्थ्यात्**। तत्र समयो यस्यातिक्रमात् पुनर्मण्डलप्रवेशादि. कर्त्तव्यो जायते। ततोन्यद्विधा[3]नामुपदेश इत्यनयोर्भेदः। **तत्रापी**ति रथ्यापुरुषकृतेष्वपि मन्त्रेषु **तदाकारध्यानादेव**। प्रभाववतः। पुसश्चाकारध्यानादे(रे)व (।) आदिशब्दात् स्वभावचर्याध्यानस्य परिग्रहः। तेन मन्त्रस्य **प्रयोगात्** प्रवर्त्तनात्। यत एवन्त**स्मात्तदधिष्ठानमेव** प्रभाववत्पुरुषाधिष्ठानमेव **तत्तादृशमुन्नेयं** बोद्धव्यं। यत्ते स्वयंकृतैर्मन्त्रैः कर्म कुर्वन्तीति।

तादृशः प्रभाववानेव, तदन्यैरसाधारण[4]शक्तित्वात् पुरुषातिशय एव समर्थितः स्यात्।

कृतकाः पौरुषेयाश्च मंत्रा वाच्याः फलेप्सुना।

न हि अकृतकानां प्रयोगः सम्भवति, न चाप्रयुक्तेभ्यः[5] फलम्। एवं, पुरुषाधिष्ठानमन्तरेण असम्भवत्फलानां फलदर्शनात्, प्रयोगात् फलमिच्छता मन्त्रा कृतकाः पौरुषेयाश्च वाच्याः।[6] कृतसमयकाव्यवत्।

अशक्तिसाधनं पुंसामनेनैव निराकृतम् ॥३१३॥

प्रतिपादिता हि पुरुषकृता मन्त्रास्तदधिष्ठानाच्च फलदाः। तद्, अस्ति

अपि च[4] (।) केचित् तन्त्रज्ञा मन्त्र कुर्वन्तीत्यभिदधता **पुरुषातिशय एव समर्थितः स्यात्**। यस्मात् सोपि **तादृशस्तन्त्रज्ञो** मन्त्रस्य कर्त्ता **प्रभाववानेव**। **तदन्यैर**तन्त्रज्ञैः पुरुषैरसाधारणशक्तित्वादिति कृत्वा। यतश्च पुरुषाधिष्ठितानामेव मन्त्राणा फल। तस्मात् **कृतकाः पौरुषेयाश्च** फलदा इत्येवम्मन्त्रा **वाच्याः फलेप्सुना**। मन्त्राद् फलमिच्छता न नित्या म[5]न्त्राः किन्तु कृतका कृतकत्वेपि न फलदाने पुरुषनिरपेक्षा इत्यर्थद्वयमादर्शयितु कृतका पौरुषेयाश्चेति द्वयोपादान।

न ह्रीत्यादिना व्याचष्टे। न हि नित्यानाम्वैदिकाना मन्त्राणा **प्रयोग** उच्चारण **सम्भवत्य**नाधेयातिशयत्वात्। न चा**प्रयुक्तेभ्यो** मन्त्रेभ्य **फलमि**ति कृत्वा **प्रयोगात् फलमिच्छता कृतका मन्त्रा वाच्याः। पौरुषेयाश्च**।[6] पुरुषाधिष्ठिताश्च फलदा वाच्याः। किं कारण (।) **पुरुषाधिष्ठानमन्तरेण** विनान्यतो भावशक्त्यादे**रसम्भवत्फलानाम्मन्त्राणां** पुरुषाधिष्ठानादेव **फलदर्शनात्**। यथा च न भावशक्त्या मन्त्रेभ्यः फलोत्पत्तिस्तथा प्रतिपादित (।)

"सर्वस्य साधनन्ते स्युर्भावशक्तिर्यदीदृशी"त्यादिना (१।२९७)।

205b निदर्शन चाह। यो मदीय काव्याद्येव पठिष्यति[7] तस्य मयायमर्थः सम्पादनीय इत्येवकृतः **समयो** यस्मिन् **काव्यादौ** आदिशब्दाच्छिल्पस्थानादौ। स कृतसमय काव्यादिः तस्मिन्निव तद्वत्। यथा तत्र काव्यादिपाठकाना पुरुषाधिष्ठानात् फलन्तद्वन्मन्त्रेष्वपीत्यर्थ। **पुंसाम**तीन्द्रियार्थदर्शनं प्रति **शक्ति**र्नास्तीत्येवमशक्तिसाधनमसामर्थ्यस्य **साधनं** यन्नाम किञ्चित् मी मा स कै रुच्यते तत्सर्वं**मनेनैव** म[1]न्त्रकारिणां ज्ञानप्रभावातिशयसाधनेन **निराकृतं**।

प्रतिपादिता ह्रीत्यादिना व्याचष्टे। **प्रतिपादिता हि पुरुषकृता मन्त्रास्तदधिष्ठानाच्च फलदा** मन्त्रा इत्येतदपि प्रतिपादित।

न च सर्वे पुरुषा मन्त्रान् कर्त्तुमधिष्ठातु वा शक्ताः। **तद**िति तस्मा**दस्ति कश्चिद**तिशयवान् पुरुषो मन्त्रस्य कर्त्तेति। तस्यातिशयवतः पसः **प्रतिक्षेपसाधनान्यपि**

कश्चिदतिशयवान् इति तस्य प्रतिक्षेपसाधनान्यपि प्रतिव्यूढानि। 526a

बुद्धीन्द्रियोक्तिपुंस्त्वादि साधनं यत्त वर्ण्यते।
प्रमाणाभं[1] यथार्थास्ति न हि शेषवतो गतिः ॥३१४॥

यत्तु बुद्धीन्द्रियोक्तिपुंस्त्वादित्यादि पुरुषातिशयप्रतिक्षेपसाधनं तत्तु अगमकमेव[2]। प्रतिक्षेपसामान्यसाधनेऽयोगात्।

न ह्यतीन्द्रियेषु तद्दर्शिनः प्रतिक्षेपः सम्भवति। सतामप्येषामज्ञानात्। अत एव विरोधस्या[3]सिद्धेः। अविरोधिना च एकत्र सम्भवाविरोधादित्युक्तम्।

प्रतिव्यू[2]ढानि प्रतिक्षिप्तानि। एतेन च परोक्तस्यातिशयप्रतिक्षेपसाधनस्य न विरुद्धाव्यभिचारित्वमुद्भाव्यते (।) किन्तर्हि पुरुषातिशयप्रतिक्षेपसाधनानि वस्तुबलायातानि न सन्त्येवेत्यनेन व्याजेन कथ्यते। न हि वस्तुबलायात पुरुषातिशय निराकर्त्तुं किंचित् साधनमस्ति।

ननु चेदमस्ति विवक्षित पुरुषो नातिशयवान् बुद्धिमत्त्वात्। इन्द्रियवत्वात्। व[3]चनात् पुंस्त्वात्। रथ्यापुरुषवदिति (।)

अत आह। **बुद्धीन्द्रियेत्यादि**। बुद्धिश्चेन्द्रिय च **उक्तिश्च पुंस्त्वं** चेति द्वन्द्वः। **आदिशब्दात्** प्राणादिमत्त्वादि। पुरुषातिशयनिराकरण**साधनं यत्तु वर्ण्यते** (।) तत्सर्वं **प्रमाणाभं** प्रमाणाभासमनैकान्तिकमिति यावत्। कि कारण (।) विपक्षवृत्ते. सन्देहेन सर्वस्य शेषवत्त्वात्। **न हि शेषवत** इत्यनैकान्तिकत्वात्। **यथार्थेत्यवि[4]परीता गतिरनुमेयप्रतिपत्तिरस्ति।**

यत्त्विवत्यादिना व्याचष्टे। **यत्तु पुरुषातिशयप्रतिक्षेपसाधनन्तत्त्वगमकमेवेति** सम्बन्ध.। तत्पुन साधन। **बुद्धीन्द्रिययोगादित्यादि**। कस्मादगमकमित्याह। **प्रतिक्षेपेत्यादि**। प्रतिक्षेपश्च सामान्य च **प्रतिक्षेपसामान्ये**। तयो. साधने तयो**रयोगात्**। तथा हि (।) बुद्धिमत्त्वादिना साधनेन नास्ति [5] पुरुषातिशय इति प्रतिक्षेपो वा साध्येत। यद्वा योसौ पुरुषातिशय स रथ्यापुरुषै. समान इतीतरपुरुषसामान्य साध्येत।

तत्र **न** हीत्यादिना प्रतिक्षेपसाधनस्याभावमाह। **न ह्यतीन्द्रियेष्वर्थेष्वतद्दर्शिनो**तीन्द्रियार्थादर्शिन· **प्रतिक्षेपः सम्भवति**। कि कारण (।) **सतामप्येषा**मतीन्द्रियाणामर्थानामवगिदर्शनस्या**ज्ञानात्**। तस्मान्ना[6]दर्शनमात्रात्प्रतिक्षेप इति भाव·।

नापि विरुद्धविधानात् पुरुषातिशयस्य प्रतिक्षेपः यस्मा**दत एवा**तीन्द्रियत्वादेव पुरुषातिशयस्य बुद्धित्वादिना हेतुना। द्विविधस्यापि **विरोधस्यासिद्धेः। अविरोधिना च** वक्तृत्वादिना पुरुषातिशयस्य**ैकत्र सम्भवाविरोधादित्युक्तं प्राक्।**

नापि इतरेण सामान्यसिद्धिः, विशेषासम्भवस्य ज्ञातुं अशक्यत्वात्।[4] ईदृशेषु अनुपलब्धेर्हेतुत्वप्रतिक्षेपात्।

पुंस्त्वादिसाम्येऽपि कस्यचित् अतिशयस्य दर्शनात्, सम्भवद्विशेषेऽपि सामान्यासिद्धेरित्यपि उक्तं (प्राक्)।

तस्मादनुमानमेतद् विपक्षवृत्तेरदर्शनेऽपि, व्यतिरेकस्य सन्देहाद् शेषवदसमर्थम्[6]।[1] अपि चैवंवादिनो जैमिनीयाः स्वमेव वादं विधुरयन्ति।

अर्थोयं नायमर्थो न इति शब्दा वदन्ति न।
526b कल्प्योयमर्थः पुरुषैस्[7]ते च रागादिसंयुताः ॥३१५॥
स एकस्तत्त्वविन्नान्य इति भेदश्च किकृतः।

206a नापीत्यादिना सामान्यसाधनस्याभावमाह। नापीतरे[7]णार्वाग्दर्शिना पुरुषेण तस्यातिशयवतः सामान्यसिद्धिस्तुल्यतासिद्धि.। कि कारण (।) अतीन्द्रियदर्शनादिलक्षणस्य विशेषस्य यो सम्भवस्तस्य ज्ञातुमशक्यत्वात्। ईदृशेषु च परसन्तानवर्त्तिषु पुरुषमात्राप्रत्यक्षेष्वतीन्द्रियार्थदर्शनादिषु। या काचिदसम्भवप्रसाधन्यनुपलब्धिरुपादीयते। तस्या अनुपलब्धेः प्रागेव हेतुत्वप्रतिक्षेपात्।

कि च (।) पुंस्त्वादि[1] साम्येपि यथास्व सस्कारात् कस्यचित् प्रज्ञामेवादेरतिशयदर्शनात् तथान्यस्याप्यतिशयस्य सम्भाव्यत्वात्। तस्मात् सम्भवद्विशेषा. पुरुषासम्भवद्विशेषे चेतरपुरुषसामान्यासिद्धेरित्यप्युक्तं प्राक्।

तस्माच्छेषवदनुमानमेतद् वक्तृत्वाद्यसमर्थं पुरुषातिशयासम्भवप्रतिपादनाय। विपक्षवृत्तेरदर्शनेपि।

यदि नाम विपक्षे पुरुषातिशये वक्तृ[2]त्वादेर्वृत्तिर्न दृश्यते। तथापि बाधकाभावेन व्यतिरेकस्य सन्देहादसमर्थं। अपि चैवंवादिन इति नास्त्यतीन्द्रियार्थदर्शी पुरुष इत्येववादिनो जै मि नी याः स्वमेव वादमिति कथचिदतिशयवतो जै मि न्यादे· सकाशाद् वेदार्थगतिर्भवतीति पुरुषातिशयाभ्युपगमवाद पुनर्नास्त्यतीन्द्रियार्थज्ञ· पुरुष कश्चिदित्यनया स्ववाचा विधुरयन्ति[3] बाधन्तेऽतिशयवत्पुरुषप्रतिक्षेपेण वेदार्थगतेरसम्भवात् (।) तथा हि (।) अयमर्थोऽस्माकन्नायमर्थ इति स्वयम्वैदिका· शब्दा न वदन्ति। तेनाग्निहोत्रशब्दाना योभिमतोर्थः स कल्प्यो भवेत् पुरुषै र्मी मा स कै·। तच्च नास्ति। यतस्ते हि पुरुषा रागादिसंयुता रागादियुक्ताः। ततो न तत्कल्पितोऽर्थ· प्रमाण।

अथ तस्य वेदार्थस्य कश्चि ज्जै मि न्या दि[4] रेव वेत्ता कल्प्येत। तत्रैकपुरुषो-

---

[1] Bam-po-bcug-gcig-pa=एकादशात्मिकम्

तद्वत्पुंस्त्वे कथमपि ज्ञानी कश्चित्कथं न वः ॥३१६॥

न वैदिकाः शब्दा एत भवन्तो ब्राह्मणा[1] अयमस्माकमर्थो ग्राह्यो नान्य इत्येवं विक्रोशन्ति। अनभिव्यक्तार्थविशेषसंसर्गा एव श्रुतिं अभिपतन्ति। तत्र एकः पुरुषः कञ्चिदर्थं कल्पयत्यन्योऽपि अपरम्।

न च कश्चित् शब्दानां स्वभावप्रतिनियमः येन एकार्थानुक्रिया नापरस्य। किन्तु समयवशात्[3] तं तं आविशन्तो दृश्यन्ते। तेषां अविदितार्थनियमानां तत्त्वं अत्यक्षावेशात् कश्चिद् दोषोपप्लुतोऽविद्वानेव आचष्टे नापर[4] इति न न्याय्यम्।

भिमतस्तत्ववित्'। वेदार्थतत्त्वज्ञो नान्यः पुरुष इति किंकृतः। नात्र किञ्चित् कारणमस्ति मी मा स क स्य पुरुषत्वाविशेषात् सर्वो वा वेत्ति। न वा कश्चिदिति भावः।

अथ पुरुषत्वादिसाम्येप्यसाधारणशक्तियुक्तो वैदिकाना शब्दानामतीन्द्रियैरर्थैः सह सम्बन्धस्य वेत्ता कश्चिज्जै मि न्यादि· कल्प्यते (।) तदा **तद्वज्जैमि[5]न्यादिवत्। पुंस्त्वे** पुरुषत्वे तुल्योपि **कथमपीति** निर्निमित्तमन्योपि **कश्चिज्ज्ञानी** ज्ञानातिशयवान्। कस्मान्न **वो** न युष्माकमभिमतो जै मि न्या दिवदन्योपि ज्ञानवान् **प्रसज्यत** इति यावत्।

नेत्यादिना व्याचष्टे। **एत** आगच्छत **भवन्तो ब्राह्मणा अयमस्माकमर्थो** भवद्भिर्ग्राह्यो **नान्य इत्येवंवैदिकाः शब्दा न विक्रोशन्ति** न कथयन्ति येन तेभ्योर्थगतिः स्यात्।[6] केवलमित्यवधारणे। **अनभिव्यक्तार्थविशेषसंसर्गा एव श्रुतिं** श्रोत्रविज्ञानमभिपतन्त्यारोहन्ति (।) अनभिव्यक्तोर्थविशेषेण सह ससर्ग सम्बन्धो येषामिति विग्रह.। **तत्राज्ञातार्थसम्बन्धेषु** शब्देषु श्रुतिमभिपतत्स्वेकः **पुरुषः** स्वय **कञ्चिदर्थं** स्वेच्छानुरूप **कल्पयत्यन्योपि** पुरुषोपरमर्थ **कल्पयतीत्यनिर्णय** एव पदार्थस्य।[7]

206b

स्वाभाविकः शब्दानामर्थसम्बन्धस्तेनैकार्थप्रतिनियमो भविष्यतीत्याह। **नेत्याह। न च कश्चिच्छब्दानां स्वभावप्रतिनियमः** स्वभावेन प्रकृत्यार्थैस्सह सम्बन्धो **येनानेकार्थकल्पनायामपि** केवल **समयवशात्** तन्तमर्थमाविशन्तो वाच्यत्वेनोपाददाना **दृश्यन्ते। तेषाम्वैदिकानां** शब्दा[1]ना कश्चित् **तत्त्वमाचष्टे नापर इति न न्याय्यमिति** सम्बन्ध·। कीदृशानाम**विदितार्थनियमानां**। अविदितोर्थनियमो येषामिति विग्रहः। कि कारणम् (।) **अत्यक्षावेशात्**। अतीन्द्रियस्य स्वर्गादिसाधनस्यार्थस्य विषयत्वेनात्मसात्करणात्। न ह्यतीन्द्रियार्थस्य शब्दस्यार्थनियममर्वाग्दर्शनः शक्तो ज्ञातु। तत्राविद्वानेव। रागादिदोषोपप्लुतः। **क[2]श्चिज्जै**मि नि. श व र स्वा मी वा। तेषा शब्दानान्तत्त्वमाचष्टे। अस्यायमेवार्थ इति

अथ कुतश्चिद् बुद्धीन्द्रियादीनां स एव वेत्ति नापरः। तस्य कुतोऽयमतीन्द्रिय-ज्ञानातिशयः[5]। तथाऽन्योऽपि देशकालस्वभावविप्रकृष्टानामर्थानां द्रष्टा किमसम्भवी दृष्टः। यतो न हि तत्प्रतिक्षेपसाधनानि कानिचित् नैनं उपलीयन्ते[6]। तत्साधन-सम्भवेऽपि यथायमस्य विशेषः, तथान्यस्यापि स्यादित्यनभिनिवेश एव युक्तः।

527a **यस्य प्रमाणसंवादि वचनं सोर्थं[7]विद्यदि।**
न ह्यत्यन्तपरोक्षेषु प्रमाणस्यास्ति सम्भवः ॥३१७॥

नापरः। अपरोपि पुरुषो जै मि न्याद्यविशिष्टो न तत्त्वमाचष्ट इति भेदव्यवस्थान न न्याय्यमयुक्तित्वात्।

अथ कुतश्चिदनिर्देश्यरूपाद् बुद्धीन्द्रियादीनाम् (।) आदिशब्दादभ्यासस्या-तिशयात् कारणात् **स एव** जै मि नि प्रभृतिर्वेदार्थम्**वेत्ति नापरः** प्राकृत. पुरुष इ[3]तीष्यते। तदा **तस्य** जै मि नि प्रभृते· **कुतोयमतीन्द्रियज्ञानातिशयः**। अतीन्द्रियस्य वेदार्थतत्त्वस्य ज्ञानातिशयोन्यैरविदिततत्त्वैरविशिष्टस्य।

भवतु वा जै मि नि प्रभृति. पुरुषोतीन्द्रियार्थस्य वेत्ता। **तथा** जै मि न्यादि-**वदन्योपि** पुरुषातिशयो बौ द्धा द्य भिमतो **देशकालस्वभावविप्रकृष्टानामर्थानां द्रष्टा। किमसम्भवी**। कस्मादवि[4]द्यमानो **दृष्टो** येन प्रतिक्षिप्यते। सोप्यती-न्द्रियार्थदर्श्यस्त्वितीष्यता। न चेदभिमतोपि जै मि न्यादिर्मा भूत्। **यतो न हि तत्प्रतिक्षेपसाधनानि**। बौ द्धा द्यभिमतपुरुषातिशयप्रतिक्षेप**साधनानि** पुरुषत्वा-दीनि **कानिचित्** सन्ति (।) यानि **नैनम्**वेदार्थविवेककारिण जै मि नि प्रभृति **नोपलीयन्ते**। न विषयीकुर्वन्ति। किन्तूपली[5]यन्त एव। तेषामपि पुरुषत्वा-दियोगात्।

अथ पुरुषत्वादिसाधनसम्भवेपि जैमिन्यादे**र्विशेष** इष्यते। तदा **यथायम**तीन्द्रियवेदार्थविवेचनलक्षणे **विशेषोस्य** जैमिनिप्रभृतेरिष्ट। **तत्साधनसम्भवेपी**ति। तस्यातीन्द्रियार्थदर्शिपुरुषप्रतिक्षेपसाधनस्य पुरुषात्वादे· सम्भवेपि। **तथान्यस्यापि** पुरुषस्यातीन्द्रिया[6]र्थदर्शन **स्यादित्यनभिनिवेश एव** भवता मी मा स का नां **युक्तः**।

नातीन्द्रियार्थदर्शीति कृत्वा जै मि नि प्रभृतेर्वेदार्थज्ञानमिष्टमपि तु। **यस्य वाक्य प्रमाणसम्वादि। स** पुरुषो वेदार्थविद् **यदीष्यते**।

जै मि नि प्रभृतेरेव च वेदार्थविवेचन कुर्वतो वचन प्रमाणसम्वादीति परो मन्यते।

527a नेत्या द्या चा र्यः। नेदमुत्तर युक्त य[7]स्मान्नह्यत्यन्तपरोक्षेषु वेदार्थेषु स्वर्गा-दिसाधनत्वेषु **प्रमाणस्यास्ति सम्भवः**।

स्यादेतद्। न वयं पुरुषप्रामाण्याः कस्यचिद् वेदव्याख्यानेऽनमभिनिविष्टाः। किन्तर्हि[1]। अन्यप्रमाणसंवादात्। बहुष्वपि व्याख्यातृषु यः प्रमाणं प्रत्यक्षादिकं संस्यन्दयति सोऽनुमन्यत इति।

तन्न। अदृष्टादिषु अतीन्द्रियेषु प्रमाणान्तरावृत्तेः। तदवृत्तेरेव हि तत्प्रतीत्यर्थं आगम उपयाच्यते। अन्यथा सत्यपि तस्मिन् यदि अर्थे प्रमाणान्तरस्यावृत्तिः अप्रतिपत्तेः। ततश्च केवलात् प्रतिपत्तेरसाधनमेवागमः स्यात्।

केवलादन्यतोऽपि अतीन्द्रियेषु अप्रतिपत्तिरिति चेत्[4]।

कथमतीन्द्रियश्च नाम प्रत्यक्षादिविषयश्च। ते पुनः स्वविषयेऽपि आगममपेक्ष्यैव साधकाश्चेत्, अनागमोग्न्यादि[5]प्रत्ययो धूमादेर्न स्यात्। न वै आगमे

स्यादेतदित्यादिना व्याचष्टे। **न वयं पुरुषप्रामाण्याः कस्यचिज्जैमिन्यादेर्वेदव्याख्यानमभिनिविष्टाः** (।) **किन्तर्हि** (।) **प्रमाणसम्वादाद्** व्याख्यानमभिनिविष्टाः। एतदेव व्यनक्ति। **बहुष्वपि** वेद**व्याख्यातृषु** मध्ये। **यो** वेदस्य व्याख्याता। यथा व्याख्यातेर्थे **प्रमाणं प्रत्यक्षा**[1]**दिकं संस्यन्दयति** योजयति **स** तादृशो व्याख्याता**नुमन्यते**ङ्गीक्रियते नान्य **इति**।

तन्नेत्यादिना प्रतिषेधति। धर्माधर्मावदृष्टं। आदिशब्दात् स्वर्गादिसाधकत्वेष्व**तीन्द्रियेषु** प्रत्यक्षादि**प्रमाणान्तरावृत्तेः**। न वेदार्थे कस्यचित् प्रमाणसम्वादि वचनं। यस्मात् **तद**सम्भवादेव हि। अत्यन्तपरोक्षे प्रत्यक्षादिप्रमाणस्यासम्भवादेव हि। **त**[2]**त्प्रतीत्यर्थ**न्तस्यातीन्द्रियस्य प्रतीत्यर्थमा**गमः उपयाच्यते** प्रार्थ्यते। **अन्यथे**ति यद्यागमगम्येऽप्यर्थे प्रमाणान्तरसम्वादादेवार्थनिश्चयस्तदा **सत्यपि तस्मिन्नागमे तद्गम्येर्थे यदि प्रमाणान्तरस्यावृत्तिः** स्यात् (।) तदा प्रमाणान्तरावृत्तावागमात् केवला**दप्रतिपत्तेः**। **ततश्चे**ति प्रमाणान्तरात्**केवला**दित्यागमरहितार्थ**प्रतिपत्तेरसा**[3]**धनमेवागमः स्यात्**। प्रमाणान्तरभावाभावाभ्यामेवार्थप्रतिपत्तेर्भावाभावात्। **केवलादागमनिरपेक्षादन्यतोपि** प्रत्यक्षादे. प्रमाणा**दतीन्द्रियेर्थे प्रतिपत्तिः** किन्त्वागमसहितात् प्रत्यक्षादेरतीन्द्रियार्थ**प्रतिपत्तिरिति चेत्**।

कथमिति सि द्धा न्त वा दी। **कथमतीन्द्रियश्च नाम** स्वर्गादिसिद्धचुपाय. **प्रत्यक्षादिविषयश्च** विरोधा[4]त्।

स्यान्मत (।) नैवात्यन्तपरोक्षेर्थे प्रत्यक्षादीना साधकत्व किन्तु **ते पुनः** प्रत्यक्षादयः **स्वविषयेप्यात्मीये** विषयेप्या**गममपेक्ष्यैव साधकाश्चेत्** तथा चागमस्यैव प्रामाण्यमिति परो मन्यते।

अनागमेत्यादि सि द्धा न्त वा दी। नास्मिन्नागमोस्तीत्य**नागमोग्न्यादिप्रत्ययो धूमादे**र्लिङ्गान्न **स्यात्**।

प्रवृत्ते प्रमाणान्तरमन्विष्यते। किन्तु सैवागमस्य प्रवृत्तिर्न ज्ञायत इति चेत्। स्वयं प्रसाधने समर्थस्य[6] तदागमोपधानं कमतिशयं पुष्णाति। असमर्थन्तु आगम-
527b **प्रवृत्तिमपि नैव साधयिष्यति। सा चातीन्द्रियेणार्थेन सम्बद्धा आगमप्रवृत्तिरती[7]-न्द्रिया कथमन्येन सिद्धा।**

अन्यच्च एवं आगमलक्षणं स्यात। तथा हि।

यस्य प्रमाणसंवादि वचनं तत्कृतं वचः।
स आगम इति प्राप्तं निरर्थाऽपौरुषेयता ॥३१८॥

तुल्येऽपि आगमवादे प्रमाणबलादागमस्यापि क्वचिदर्थ आगमत्वे प्रमाण-संवादिवचनं आगमलक्षणं स्यात्। नापुरुषक्रिया। तस्याः सर्वार्थेषु तुल्यत्वे[2]ऽपि

नेत्यादि परः। **न वै आगमेतीन्द्रियेष्व[5]र्थेषु प्रवृत्ते** प्रत्यक्षादिप्रमाणमागमविषयेन्विष्यते। येनायन्दोषः। स्यात्।

ततश्च केवलात् प्रतिपत्तेरसाधनमेवागमः स्यादिति। **किन्तु सैवागमस्या-**तीन्द्रियेष्वपि **प्रवृत्तिर्न ज्ञायते**। तेनागमप्रवृत्ति प्रत्यक्षादिकमपेक्षत **इति चेत्।**

स्वयमित्यादिप्रतिवचनन्तदास्य प्रत्यक्षादेः स्वयमतीन्द्रियार्थ**प्रसाधने समर्थस्य तदागमो[6]पधानन्तस्यागमस्योपधानं** सन्निधान प्रत्यक्षादेः **कमतिशयं पुष्णाति** येनागमप्रवृत्तिमतीन्द्रियेर्थे ज्ञापयति।

अथातीन्द्रिये प्रत्यक्षाद्यसमर्थं (।) ततो **समर्थन्तु** प्रत्यक्षादि **आगमप्रवृत्ति-मपि नैव साधयिष्यति** यतो यथा स्वर्गादिसाधकमतीन्द्रियन्तथा **सा चातीन्द्रिये-**
207b **णार्थेन सम्बद्धा आगमप्रवृत्तिरतीन्द्रिया। कथम[7]न्येन** प्रत्यक्षादिना **सिद्धा**। नैव सिद्धा। येन तदर्थं प्रत्यक्षादिरन्विष्यत इति यत्किञ्चिदेतत्।

बहुष्वपि व्याख्यातृषु यः प्रमाण प्रत्यक्षादिक सस्यन्दयति तस्य भाषितं गृह्यत इति ब्रुवतो पौरुषेयत्वादागमलक्षणा**दन्यश्चैवमागमलक्षणं स्यात्**। एतदेवाह। **तथा** हीत्यादि। **यस्य** पुरुषस्य **वचनं प्रमाणसम्वादि। तत्कृतन्तेन** पुरुषेण संस्कृतं **वच[1]** आगम **इति प्राप्तं**। वचनस्य च सस्कारस्तदर्थस्य प्रमाणानुगृहीतत्वख्यापन। इदन्तदन्यदागमलक्षण। तथा च **निरर्था** व्यर्थाऽपौरुषेयता आगमलक्षणत्वेनेष्टा।

तुल्येत्यादिना व्याचष्टे। यश्च प्रमाणसम्वादिवचनेन पुरुषेणार्थः कल्पितो यश्चेतरेण तयोरर्थयोस्तुल्येप्यपौरुषेयत्वा**गमवादे** सति **प्रमाणबलादागमस्यापौ[2]-**रुषेयस्यापि **क्वचिदर्थे** प्रमाणसम्वादिन्या**गमत्व** इष्यमाणेऽग्निहोत्रादिवाक्यानां **प्रमाणसम्वाद आगमलक्षणं स्यात्। नापुरुषक्रिया**। अपौरुषेयत्वमागमलक्षणं न स्यात्। किङ्कारण (।) **तस्या** अपुरुषक्रियाया अभिमताऽनभिमतेषु पुरुषोप-दिष्टेषु **सर्वार्थेषु तुल्यत्वेपि प्रमाणेनाबाधनात् प्रतिपत्तेरिष्टत्वात्।**

प्रमाणेनाबाधनात् प्रतिपत्तेः। तद्भावेऽपि अन्यत्रान्यप्रमाणसंवादिनि अनिष्टत्वात्।

अपि च।

यद्यत्यन्तपरोक्षेर्थेऽनागमज्ञानसम्भवः।[3]
अतीन्द्रियार्थवित्कश्चिद्वस्तीत्यभिमतं भवेत् ॥३१९॥

यदि पुरुषस्य परोक्षेऽर्थे आगमानपेक्षं ज्ञानयाथातथ्यं इष्यते, तदा[4] पुरुषाः संति अतीन्द्रियार्थदृश इतीष्टं स्यात्। प्रत्यक्षपूर्वकाणां प्रमाणस्यातद्दर्शनेऽसम्भवात् प्रत्यक्षावृत्तेः। तेषु प्रमाणान्तरासम्भवेऽतदालम्बन[5]प्रतीतय आगमः प्रमाणम्। प्रमाणान्तरस्य वृत्तिः प्रत्यक्षमन्वाकर्षतीति पुरुषातिशयोऽनिवार्यः स्यात्। तस्मान्नास्त्यतीन्द्रिये प्रमाणान्तर[6]वृत्तिः। अत एव आगमस्यार्थविशेषे[1] वृत्त्यपरिज्ञानात्। अयं जैमिनिरन्यो वा।

एतदुक्तम्भवति।[3] प्रमाणसम्वादित्वेनागमार्थप्रतिपत्तेरिष्टत्वादित्यर्थः। तद्भावेप्यपौरुषेयत्वभावेपि तुल्येन्यत्राप्रमाणसम्वादित्यर्थे प्रतिपत्तेरनिष्ठत्वात् प्रमाणसम्वादो वचनानामागमलक्षण स्यात्।

यदि चात्यन्तपरोक्षेर्थेऽनागमज्ञानसम्भव आगमनिरपेक्षस्य ज्ञानस्य सम्भवः। तदातीन्द्रियार्थवित् कश्चिदस्तीति स्वमभिमतम्भवे[4]त्।

यदि पुरुषस्य जै मि न्या देर्वेदार्थमाख्यातु परोक्षेर्थे स्वर्गादिसाधनोपाये आगमानपेक्ष ज्ञानयाथातथ्यं ज्ञानस्यावैपरीत्यमिष्यते। तदा जै मि न्यादिवदन्येपि पुरुषाः सत्यतीन्द्रियार्थदृश इतीष्टं स्यात्।

स्यादेतत् (।) नातीन्द्रियमर्थ प्रत्यक्षतो जानात्यपि त्वनुमानेन ज्ञात्वोपदिशतीति (।)

तन्न। यत (।) प्रत्यक्षपूर्वकाणामनुमानादीनाम[5]सम्भवात्। कदाऽतद्दर्शने तेन प्रत्यक्षेणातीन्द्रियस्यादर्शने (।) प्रत्यक्षेत्यादिनैतदेव स्पष्टयति। तेष्वतीन्द्रियेष्वर्थेषु प्रत्यक्षावृत्तेः कारणात् प्रत्यक्षपूर्वकाणा प्रमाणान्तराणामसम्भवात्।

अतदालम्बन प्रतीयत इति तस्य प्रत्यक्षादेरालम्बनम्विषय। न तदालम्बनमतदालम्बनं प्रत्यक्षाद्यविषयन्तस्य प्रतीयते निश्चयार्थमाग[6]मोन्विष्यत इत्यध्याहार। प्रमाणान्तरस्य त्वनुमानादेरतीन्द्रियेर्थे वृत्तिः प्रत्यक्षमतीन्द्रियविषयमन्वाकर्षति साधयति। प्रत्यक्षपूर्वकत्वादनुमानादेः। इति हेतो. पुरुषातिशयोतीन्द्रियाणामर्थाना द्रष्टा मी मा स कै रनिवार्यः स्यात्। निवारितश्च। तस्मान्नास्त्यतीन्द्रियेर्थे प्रमाणान्तरवृत्तिः।

अत एवेति प्रमा[7]णान्तरावृत्तेरेवागमस्य वेदस्यातीन्द्रिये स्वर्गादिसाधनत्व- 208a
लक्षणेर्थविशेषे या वृत्तिस्तस्या अनिश्चयात्। अयं जै मि नि रन्यो वा श ब र स्वा

---

[1] Bar-la-? Khyad-par-la.

528a स्वयं रागादिमान्नार्थं वेत्ति वेदस्य नान्यतः ।[7]
न वेदयति वेदोपि वेदार्थस्य कुतो गतिः ॥३२०॥

सर्व एव हि वक्ता पुरुषोऽनतिक्रान्तदोषभ्रान्तिस्तमतीन्द्रियार्थविशेषप्रति[1]नियमं न वेत्ति स्वयं, नाप्येनं अन्यो वेदयति तस्यापि तुल्यप्रसंगतः । न हि अन्धेन आकृष्यमाणोऽन्धः पन्थानं प्रति[2]पद्यते । नापि स्वयं वेदः स्वार्थं विवृणोति[1] उपदेशवैयर्थ्यप्रसंगात् ।

तद् (अयं) अपरिज्ञातार्थ[3]शब्दगडुः, एवं शल्यभूतोऽसद्दर्शनस्नायूपनिबद्धो दुरुद्धरः दुःखमासादयति ।

तेनाग्निहोत्रं जुहुयात्[4] स्वर्गकाम इात श्रुतौ ।
खादेच्छ्वमांसमित्येष नार्थ इत्यत्र का प्रमा ॥३२१॥

क्वचिदपि अर्थे प्रत्यासत्तिरहितस्य "अग्निहोत्रं जुहुयात् स्वर्गकाम" इत्यादेः[5]

म्यादिः पुरुषः । **स्वयमिति** परोपदेशनिरपेक्षः । वेदस्यार्थं **न वेत्ति** । **रागादिमान्** यतः । रागादिमत्त्वमपरिज्ञानकारण । **अन्यतोपि न** वेत्ति वेदस्यार्थन्तस्याप्यस्य पुरुषस्य रागादिमत्त्वात् । **वेदोपि** स्वयमर्थं **न वेदयति**[1] न प्रकाशयति । तेन **वेदार्थस्य कुतो गतिः** । नैव गतिरस्ति । यस्मात् **सर्व एव हि पुरुषोनतिक्रान्तो** रागादि**दोष**कृतो विप्लवो **भ्रान्तिर्यस्येति** विग्रहः । तमिति वेदस्या**तीन्द्रियार्थप्रतिनियममयमेवास्यार्थो** नायमित्येव **न वेत्ति स्वयं** । **नाप्येनं** रागादिमन्त पुरुष**मन्यः** पुरुषो **वेदयति तस्याप्यन्यस्य** तुल्यप्रसंगत· । रागादिमत्त्वेन तस्याप्यज्ञत्वादित्यर्थ· ।[2] यतो **न ह्यन्धेन** स्वयममार्गज्ञेनाकृष्यमाणोऽन्धः **पन्थानं प्रतिपद्यते** । **नापि स्वयमुपदेशनिरपेक्षो वेदः स्वार्थं प्रकाशयति** । कुतः (।) **उपदेशवैयर्थ्यप्रसंगात्** । जै मिन्या दि व्याख्यानस्य निष्फलत्वप्रसगात् ।

तत्तस्मादयमपरिज्ञातार्थो वेदाख्य· **शब्दगडुः** । घाटामस्तकयोर्मध्ये मासपिण्डो गडुरुच्यते निष्फलत्वात् । तद्वद्वैदिकोपि शब्दोऽपरिज्ञाता[3]र्थत्वेन निष्फलत्वात् । गडुरिव गडुः । **एव**मिति किमस्यायमर्थोथवायमिति सशयात् तदभिप्रसन्नस्य **शल्यभूतो** दु खहेतुरतस्तमगीकृतवेदम्पुरुष **दुःखमासादयति** स्थापयति । कीदृशोऽसद्दर्शनमेव **स्नायुः** शिरा । **तेनोपनिबद्धस्तत** एव केनचित् कारुणिकेनाप्यपनेतुमिच्छता **दुरुद्धर** इत्युपहसति ।

तेनेत्यपरिज्ञातार्थत्वेनाग्निहोत्रञ्जु[4]हुयात् स्वर्गकाम इति श्रुतौ वेदवाक्ये **खादेच्छ्वमांसमित्येष नार्थः** किन्त्वन्योभिमतोर्थ **इत्यत्र का प्रमा**। नैव किञ्चित् प्रमाण ।

---

[1] Rnam par-ḥgrel-par-byed-pa.

भूतविशेषे यथाभिमतं घृतादि प्रक्षिपेदित्यर्थे खादेच्छ्वमांसं इत्यस्य नातिशयं पश्यामः। परोक्षदैशिकानि वचनानि यथाभिप्रायं[6] तथाऽस्माभिः प्रतिपद्यते, आहोस्विद् विपर्ययमिति।

नायं सर्वत्र तुल्यः प्रसंगः स्यात्। उपदेष्टुः स्वयं अभिप्रायप्रकाशेनन[7] सदुप- 528b
देशसम्भवात्। न ह्ययं शब्दानामदैशिकानां सम्भवति।

लोकप्रत्यायनाभिप्रायश्च ब्रुवाणो लोकसंकेतप्रसिद्धिं अनुपालयति[1]। ततोऽपि तत्प्रतीतिः स्यात्। नापौरुषेयाणां शब्दानाम्। तत्र कस्यचिद् विवक्षाया अभावात्।

क्वचिदित्यादिना व्याचष्टे। "अग्निहोत्रं जुहुयात् स्वर्गकाम" इत्यादि वाक्यस्य क्वचिदपि वाच्यत्वेनाभिमतेर्थे **प्रत्यासत्तिरहितस्य**ानभिमतेर्थे विप्रकर्ष-रहितस्य वास्तवस्य सम्बन्धस्य निराकरणादुभयाभाव.। **भूतविशेषेग्नौ य[6]थाभि-मत**मिति मन्त्रादिपूत **घृतादि प्रक्षिपेदित्ययमर्थो** न पुन **श्वमांसं खादेदित्ययमर्थ** इति **नातिशयम्पश्यामः।**

नन्वय यथोक्तः। सर्वत्र पौरुषेयेप्यागमे समान प्रसङ्ग.। तमेव दर्शयन्नाह। **परोक्षो दैशिको** वक्ता। येषाम्वचनानामागमानान्तानि तथोक्तानि। तेषामर्थं यथाभिप्रायमिति यथा दैशिकाभिमत। इदानीन्तना अ[6]दृष्टदैशिका. पुरुषाः समनुयन्त्यवगच्छन्त्याऽहोस्विद् **विपर्ययन्दैशिकाभिप्रायविपरीतमिति** नियमाभावात् सर्वत्र सशय इति मन्यते।

नेत्यादिना परिहरति। **नायं सर्वत्र प्रसंगः। उपदेष्टुरागमस्य प्रणेतुरभिप्राय-प्रकाशनेनेति** प्रथम प्रकाशयतानेन स्वाभिप्रायस्तत्कालसन्निहितेभ्य श्रोतृभ्यः कथितोस्य वचनस्यायमर्थ इति।[7] तेपि श्रोतारोन्येभ्यः प्रकाशयन्ति तेप्यन्येभ्य 208b
इत्याचार्योपदेशे पारम्पर्यस्य **सम्भवात्। न ह्ययम**भिप्रायकथनलक्षणो वैदिकाना **शब्दानामदैशिकाना**मित्यपौरुषेयाणा **सम्भवति** दैशिकस्याभावात्।

इतश्च पौरुषेयेषु यथा प्रसिद्धार्थसम्भवो यस्मादागमस्य प्रणेता लोको मया बोधनीय इति **लोकप्रत्यायनाभिप्रायश्च ब्रुवाणो लोके** यस्मिन्नर्थे शब्द[1]स्य **संकेत-स्तस्य प्रसिद्धिमनुपालयति** रक्षत्यन्यथा विफलन्तस्य प्रकाशन स्यात्। **ततोपि** लोकप्रसिद्धसकेतानुपालनादपि **तदर्थसिद्धि· स्यात्।** पुरुषप्रणीतस्यागमस्यार्थ-सिद्धिः स्यात्। अपिशब्दात् पूर्वोक्ताच्च सम्प्रदायसम्भवात्। **नापौरुषेयाणां शब्दानां** यथोक्तेन प्रकारेणार्थसिद्धि। कि कारण। **तत्र** वैदिकेषु शब्देषु **कस्यचित्** पुसः समीहाभ(ा)[2]वात्। वचनहेतोर्**विवक्षाया अभावात्।** एवन्तावत् सप्र-दायादिसम्भवेन पौरुषेयस्यागमस्यार्थपरिज्ञानसम्भवात् तुल्यप्रसगता नास्तीत्यु-क्तम् (।)

अपि च न्यायमेव अनुपालयन्तः पंडिता हेयोपादेय[2]साश्रयार्थे प्रवर्त्तन्ते। न प्रवादमात्रेणेति न समानः प्रसंगः। तच्च यथावसरं प्रतिपादयिष्यामः।

ननु यो लोकसन्निवेशादिरयुक्तिविषयो[3]प्यर्थः सम्भवनीयपुरुषवचनात् प्रतिपद्यते।

न। अप्रत्ययात्। न हि क्वचित् असन्देहात् सर्वत्र तथा स्यात्। सन्देह-

---

अधुना न्यायानुसारेणैव पौरुषेयाणामर्थनिश्चयो भवतीत्याह। **अपि चे**त्यादि। **न्यायमेव** युक्तिमेवानुपालयन्तः **पण्डिताः** प्रेक्षापूर्वकारिणो बौ द्धा **हेया**दिषु **संघ**टन्ते। हेयस्य साश्रयस्य त्या[3]गाय। **उपादेय**स्य साश्रयस्योपादानाय **प्रवर्त्तन्ते**। तत्र हेय दु खमुपादेयो मोक्षः। तयोराश्रयो यथासख्यं कर्मक्लेशास्तत्त्वज्ञानञ्च।

एतदुक्तम्भवति (।) अनेकार्थत्वसम्भवेपि शब्दाना युक्तियुक्त पुरुषार्थोपयोगिनमेवागमार्थन्निश्चिन्वन्ति सौ ग ता न परोपदेशमात्रेण (।) ततोयमदोष इति (।)

तदेवाह (।) **न प्रवादमात्रेणेति**। न बृद्धाना प्रवाद[4]मात्रेणेति **न समानः प्रसंगः। तच्च** न्यायानुपालनपूर्वकमेवागमे प्रवर्त्तन **यथाऽवसरं प्रतिपादयिष्यामः** पश्चात्।

यदि न्यायानुपालनेनागमार्थनिश्चयोऽत्यन्तपरोक्षे तर्ह्यागमार्थे निश्चयो न स्यादित्याह। **नन्वि**त्यादि। **लोकसन्निवेशादि**रिति भाजनलोकस्य पृथिव्यादे सन्निवेशादि। यथोक्त (।)

"तत्र भाजनलोकस्य सन्निवेशमुशन्त्यध.।[5]
लक्षषोडशकोद्वेधमसख्यम्वायुमण्डलमि"त्यादि।[1]

आदिशब्दात्। दानहिंसादिचेतनानामिष्टानिष्टफलदानादि।

देशस्वभावादिविप्रकृष्टत्वाद**युक्तिविषयोप्यर्थः** प्रतिपद्यते भवद्भिर्बौद्धैः (।) कुतः (।) **सम्भवनीयपुरुषवचनात्**। यस्य प्रत्यक्षानुमानगम्येर्थे वचनमविसम्वादि। तस्य तृतीयस्थाने वचन सत्यार्थत्वेन सम्भाव्यते। तस्मात्[6]सम्भावनीयात् पुरुषवचनादर्थः प्रतिपद्यते। तथा च न न्यायानुपालनपूर्विकाऽगमार्थे प्रवृत्तिरिति समान एव प्रसग इति मन्यते।

नेत्यादिना परिहरति। नात्यन्तपरोक्षोर्थः पुरुषवचनात् प्रतिपद्यते। कि कारणम् (।) **अप्रत्ययात्** तद्विषयप्रमाणाभावेनानिश्चयात्। प्रत्यक्षादिविषये **सम्वादा-**
209a **दत्यन्तपरोक्षेपि** सम्वादो निश्चीयत इत्यपि[7] मिथ्या यतो **न हि क्वचित्** प्रत्यक्षा-

---

[1] Abhidharmakośa, ch.3

दर्शनात् तत्प्र[4]वृत्तेः संवादेन व्याप्त्या सिद्धेश्च। इदमागमलक्षणमगत्या वृष्टमिति नातो निश्चयः। तत् न प्रमाणमागम इत्युक्तं (प्राक्)।

अपौरुषेयाणां[5] शब्दानामर्थज्ञानं न संप्रदायात्, न युक्तेः, नापि लोकात्। न हि तत्राप्रतिपत्तिः न्याय्या। स चेत् प्रसिद्धो लोकवादः प्रतीतिहेतुः।

प्रसिद्धो लोकवादश्चेत्,
तत्प्रतीतिहेतुः।)[1]

तत्र कोतीन्द्रियार्थदृक्। 36a
अनेकार्थेषु शब्देषु येनार्थोयं विवेचितः ॥३२२॥

न ह्ययं लोकव्यवहारोऽपौरुषेयाच्छब्दार्थसम्बन्धात्। किन्तर्हि (।) समयात्

दिविषये प्रमाणसम्वादादस्खलितो दृष्ट इति कृत्वा सर्वन्तदुपदिष्टमयुक्तिगम्यमपि तथा भवति। कि कारण (।) तत्प्रवृत्तेरित्यादि। तस्य पुरुषातिशयस्य वचनप्रवृत्तेरविसम्वादेन व्याप्त्या सिद्धेर्विपर्यये बाधकप्रमाणाभावात्। ननु भवतापि(।)

"प्रत्यक्षेणानुमानेन द्विविधेनाप्यबाधनम्" (।१।२१८) इत्यादिनैकदेशावि-सम्वा[1]दनमागमलक्षणमिष्टमिति (।)

अत आह। अगत्या चेत्यादि। प्रमाणगम्यार्थाविसम्वादेनात्यन्तपरोक्षेप्यवि-सम्वादिवचनमितीदमागमलक्षणमगत्येष्टमागमात् प्रवृत्तौ वरमेव प्रवृत्त इति। नातो यथोक्तादागमादतीन्द्रियार्थनिश्चयस्तस्याप्रामाण्यात्। तदिति तस्मान्न प्रमाणमागम इत्युक्त प्राक्।

तदेवमपौरुषेयाणा शब्दानामर्थज्ञानन्नाचा[2]र्यसंप्रदायात्। दैशिकस्याभावात्। न युक्तेस्सकाशादत्यन्तपरोक्षेर्थे प्रमाणाप्रवृत्ते.। नापि लोकादर्थप्रतीतिर्लोक-प्रत्यायनाय प्रयोगाभावेन लोकसकेतानुसरणायोगादिति। तत्रापौरुषेयेषु शब्दे-ष्वर्थानामप्रतिपत्तिरेव न्याय्या। तत्रापि वैदिके शब्दे प्रसिद्धो लोकवादो यथा ग्न्यादि शब्दाद् दाहपाकादिसमर्थेर्थे प्रवर्त्तन्त इत्यादि।[3]

यो लोकव्यवहारस्स चेद् वेदार्थप्रतिपत्तिहेतुः।

उत्तरमाह। तत्रेत्यादि। तत्र लोकेऽविद्यात्वे कः पुरुषोतीन्द्रियार्थदृक्। येनातीन्द्रियार्थदृशाऽनेकार्थेषु शब्देष्वेकार्थप्रतिनियमाभावादाशक्यमानार्थविशेषेषु वैदिकेष्वर्थोयमतीन्द्रियो विवेचितो विभक्तोयमेवास्यार्थो नायमिति (।) नैव तादृश. कश्चिदस्ति।

न हीत्यादिना व्याचष्टे। न ह्ययं लोकव्य[4]वहारोपौरुषेयादकृतकाच्छ-

---

[1] Restored.

स्वशास्त्रकारसमयात् पा णि नी यादिव्यवहारवत्। उपदेशापेक्षणात्। न ह्यपौरुषेये तस्मिन्नुपदेशो युक्तस्तस्य केनचिदज्ञानात्। अतीन्द्रियत्वात्। ऐन्द्रियत्वे स्वयं प्रतिपत्तिप्रसंगाद् रूपादिवत्। उपदेशे च पुरुषाणां स्वतन्त्र[1](र)णां यथातत्त्वमुपदेशेनाविसंवादस्यासिद्धेरनाश्वासः।

वेदवत् तद्व्याख्यानमपौरुषेयं संप्रदायाविच्छेदागतं ततोर्थसिद्धिरिति चेत्। न (।) तस्यापि शब्दात्मकत्वे तुल्यः पर्यनुयोगः (।) कथमस्यार्थो विदित इति। पुरुषो हि स्वयं समितानां शब्दानामर्थं भृंगग्राहिकयापि तावदबुधं बोधयेदित्यस्ति

ब्दार्थसम्बन्धाद् भवति (।) **किन्तर्हि** (।) अभिप्रायकथनलक्षणात् **समयात्**। किमिव (।) **स्वशास्त्रकारे**त्यादि। **स्वशास्त्रकारा**णा पा णि नि प्रभृतीना **समयात्** सकेतात्। तत्समयानुसारिणा **पा णि नी या दीनां** वृद्धिगुणसज्ञादि**व्यवहारवत्** कि कारणम् (।) **उपदेशापेक्षणात्**।

यदि हि लौकिकोपि व्यवहारो निसर्गसिद्ध स्यात् तदा प[5]रोपदेशन्नापेक्षेत। न च यथा सामयिकात् सम्बन्धादुपदेशापेक्षादर्थप्रतीतिस्तथाऽपौरुषेयादपि सम्बन्धादुपदेशापेक्षादेव वेदार्थप्रतीति (।) यतो **न ह्यपौरुषेये तस्मिन्** वैदिके शब्दार्थसम्बन्धे पर**ोपदेशो युक्तः**। किङ्कारण (।) **तस्य** वेदार्थस्य **केनचिदपि** पुरुषेणाज्ञानादज्ञाना च वेदार्थस्या**तीन्द्रियत्वात्**। तदुक्त।

"श्रेय साधनता ह्येषान्नि[6]त्यम्वेदात् प्रतीयते।
तादूप्येण च धर्मत्वन्तस्मान्नेन्द्रियगोचर। (श्लो० चो० १४)
श्रेयो हि पुरुषप्रीति सा द्रव्यगुणकर्मभि।
चोदनालक्षणै साध्या तस्मात्तेष्वेव धर्मते"ति। (,, १९१)

ऐन्द्रियकत्वे तु वेदार्थस्याभ्युपगम्यमाने **स्वय**मुपदेशमन्तरेण वेदार्थस्य **प्रतीति-**
209b **प्रसङ्गात्**। **रूपादिवत्**। यथा रूपादीनामैन्द्रियकत्वादुपदेशमन्तरेण प्रतीतिस्तद्वत्।[7]

अथातीन्द्रियेपि वेदार्थे निश्चयार्थमुपदेशोऽभ्युपगम्यते। त**दोपदेशे च**। वेदार्थोपदेष्टृणां **पुंसां स्वतन्त्राणा**मिति रागाद्यभिभवेन सम्यग्ज्ञानाभावाद् यथेच्छ प्रवृत्ताना **यथातत्त्वमुपदेशेनाविसम्वादस्यासिद्धेरनाश्वासो** न निश्चयो वेदार्थे। न ह्यज्ञा यथातत्त्वमुपदेष्टु समर्था इति। न पुरुषा. स्वेच्छयोपदिशन्ति।

किन्तु **वेदवद् वेदव्याख्यानमप्यपौरु[1]षेय**मुपदेशपरम्परायातलक्षणात् **संप्रदाया-विच्छेदादागतं**। ततो यथोक्ताद् वेदव्याख्यानाद् वेदार्थसिद्धिरि**ति चेद्**।(।)

उत्तरमाह। **तस्यापी**त्यादि। **तस्यापि** वेदव्याख्यानस्य **शब्दात्मकत्वे** शब्द-स्वभावत्वे वेदेन **तुल्यः पर्यनुयोगः**। **कथमस्या**पौरुषेयस्य वेदव्याख्यान**स्यार्थो विदित इति** कुतोस्माद् वेदार्थनिश्चय। पौरुषेये त्वागमे नायन्दोषो[2] यत. **पुरुषो हि**

पौरुषेयाणामर्थगतावुपायः। अपौरुषेयस्तु शब्दो[2] नैवं करोति (।) न चास्य कश्चित् क्वचित् सम्बन्धनियमं ज्ञातुमीश इत्यप्रतिपत्तिरेव तदर्थस्य।

अपि च (।) वेदस्तद्व्याख्यानं वा पुरुषेण पुरुषायोपदिश्यमानमनष्टसम्प्रदायमेवानुवर्त्तत इत्यत्रापि समयः स (?श) रणं। आगमभ्रंशकारिणामाहोपुरुषिकया तद्दर्शनविद्वेषेण वा तत्प्रतिपन्नखलीकरणाय धूर्तव्यसनेन[3] अन्यतो वा कुतश्चित् कारणादन्यथारचनासम्भवात्।

अपि चात्र भवान् स्वमेव मुखवर्ण्णं स्ववादानुरागान्नूनं विस्मृतवान्। "पुरुषो रागादिभिरुपप्लुतोऽनृतमपि ब्रूयादिति नास्य वचनं प्रमाणमि"ति। तदिहापि किन्न प्रत्यवेक्ष्यते संभवति न वेति। स एवोपदिस (?श)न्नुपप्लवात् वेदं वेदार्थं

स्वयं समितानां सकेतिताना शब्दानामर्थ भृङ्गग्राहिकयापीत्यस्य शब्दस्यायमर्थ इत्यनेन तावदबुधमज्ञ पुरुष बोधयेदित्यस्ति पौरुषेयाणां शब्दानामर्थगतावर्थज्ञाने उपायो नापौरुषेयाणा। तथा ह्यपौरुषेयस्तु शब्दो नैवं करोति यथाय ममार्थो रागादिमता ग्राह्य इति। न चास्यापौरुषेयस्य शब्दस्य कश्चि ज्जै मिन्या[3]दी रागादिमान् क्वचिदतीन्द्रियेर्थे सम्बन्धनियमं ज्ञातुमीशः शक्त इति। अप्रतिपत्तिरेव तदर्थस्य वेदार्थस्य।

अपि च (।) भवतु नामापौरुषेयो वेदस्तद्व्याख्यानञ्च तथापि रागादिमता पुरुषेण पुरुषायोपदिश्यमानमनष्टसंप्रदायमेवाद्यत्वेप्यनुवर्त्तत इति (अत्रापि) प्रमाणाभावात् समयः शपथादि शरणं। आगमभ्रंशकारिणामित्यादिना सप्र[4]दायविच्छेदेन रचनान्तरसम्भवमेव समर्थयते। आगमभ्रशकारिणा पुसामन्यथा। पूर्वरचनावैपरीत्येन रचनादर्शनादिति सम्बन्ध। अन्यथा रचनाया कारणमाह। आहोपुरुषिकयेत्यादि। आहोपुरुषिकयेत्यहमानित्वेन। यथा सा ख्य नाशकमा ध वे न साख्यसिद्धान्तस्यान्यथा रचन कृत। तद्दर्शनविद्वेषेण वान्यथा रचनासम्भवात्।[5] यथा म हा या न विद्विष्टाना महायानप्रतिरूपकसूत्रान्तररचन। तत्प्रतिपन्नखलीकरणायेति। तस्मिन् दर्शने य प्रतिपन्नः पुरुषस्तस्य खलीकारायान्यथारचनासम्भवः। तत्प्रतिपन्नखलीकार एव कथ। धूर्तव्यसनेन। व्यसनमिदन्धूर्त्ताना यत्पर खलीकर्तव्य इति। अन्यतो वा कुतश्चिल्लाभादिकात्।

अपि चात्र वेदार्थनिर्ण्णये। भवा[6]न् वे द वा दी। स्ववादानुरागात्कारणात्। स्वमेव मुखवर्ण्णं। मुख वर्ण्णयति शोभयतीति मुखवर्ण्णं। स्वाभ्युपगमस्त नूनम्विस्मृतवान्। येन रागादिमलिनेभ्य पुरुषेभ्यो वेदार्थनिर्ण्णय प्रार्थ्यते।

पुरुष इत्यादिना मुखवर्ण्णमाचष्टे। यस्मात् पुरुषो रागादिभिरुपप्लुतो विपर्यस्तोऽनृतमपि ब्रूयादिति कृत्वा नास्य पुरुषस्य वच[7]नम्प्रमाणमिति (।) 210a

वान्यथाप्युपदिशेदिति।[4] **श्रूयन्ते हि कैश्चित् पुरुषैरुत्सन्नोद्धृतानि शाखान्तराणि। इदानीमपि कानिचिद् विरलान** (?)**ध्येतृकाणि। तद्वत्प्रचुराध्येतृकाणामपि कस्मिंश्चित् 'काले कथंचित् संहारसंभवात्। पुनः संभावितपुरुषप्रत्ययात् प्रचुरतोपगमनसंभावनासम्भवाच्च। तेषाञ्च पुनः प्रतानयितृणां पुरुषाणां कदाचिदधीतविस्मृताध्य**[5]**यनानां अन्येषां सम्भावनाभ्रंशभयादिनाऽन्यथोपदेशसम्भवात्। तत्प्रत्ययाच्च तद्भक्तानामविचारेण प्रतिपत्तेः बहुष्वप्यधे** (?ध्ये)

तदनृतवादित्वमिहापि वेदार्थसम्प्रदायानुक्रमे। जै मि न्यादिना पुरुषेण क्रियमाणे **किन्न प्रत्यवेक्षते सम्भवति न वेति**। यस्मात् **स एव** पुरुषो रागादिमान् जै मि नि-प्रभृति**र्वेदम्वेदार्थम्वोपदिशन्** रागाद्युपप्लवात् कारणादन्यथाप्युपदिशेदिति मिथ्यार्थाशका नैव निवार्यते।

आशकाकारणान्येव दर्शयन्नाह। **श्रूयन्ते हीत्यादि** [1]**कैश्चित् पुरुषैर्या** ज्ञ व ल्क्य प्रभृतिभि**रुत्सन्नोद्धृतानि**। उत्सन्नान्यन्तरितानि सन्ति वेदस्य **शाखान्तराणि**। उद्धृतानि स्मृत्वा स्मृत्वा पुनरारचितानि। तानि च यथातत्त्व स्मृत्वोद्धृतानीति किमत्र प्रमाण। **इदानीमपि कानिचिद्** आ हू र क प्रभृतीनि शाखान्तराणि **विरलाध्येतृकाणि**। स्वल्पाध्येतृकानि (?णि) दृश्यन्ते। ते कतिपयाध्येतारो न समारोप्योपदिशन्ती[2]ति किमत्र प्रमाण। यथा विरलाध्येतृकाणि शाखान्तराणि दृश्यन्ते। **तद्वत् प्रचुराध्येतृकाणामपि** बहुतराध्येतृकाणामपि शाखान्तराणा **कस्मिंश्चि**दित्यतिक्रान्ते **काले संसारसम्भवात्**। अल्पाध्येतृकत्वसम्भावनासम्भवात्। तेषा प्रागपि प्रचुराध्येतृकत्वे प्रमाणाभावात्। इदानीन्तर्हि कथ प्रचुराध्येतृकाणि तानीत्यत आह। **पुन**रित्यादि।[3] **पुनः** कालान्तरेणाप्तत्वेन **सम्भावितस्य पुरुषस्य प्रत्ययात्** प्रामाण्यात् तदन्यासम्भावितपुरुषाध्ययनवैपरीत्येन सहृतानामध्येतृणा **प्रचुरतोपगमनस्य** बाहुल्योपगमनस्य या **सम्भावना** तस्या. **सम्भवा**दनिश्चय।

किञ्च। ये ते पुरुषा विरलीभूता. शाखान्तराणा प्रतानयितार**स्तेषां प्रतानयितृणामन्यथोप**[4]**देशसम्भवा**दिति सम्बन्ध। तथा चानाश्वास इत्यभिप्राय। कीदृशानां प्रतानयितृणा **कदाचिदधीतविस्मृताध्ययनानां**। अधीत सद् विस्मृतमध्ययन यैस्ते तथोक्ता। यथाधीत विस्मृतास्सन्तस्तेऽन्यथापि प्रतानयेयुरित्यर्थ.। केन कारणेनेत्याह। **अन्येषान्तदभिप्रसन्नानामध्येतृणान्तस्मिन्नध्यापयितरि**। या महत्वसम्भाव[5]**ना**। **तस्या भ्रंशभयात्**। यद्यहमन्यथापि नोपदिशेय। **नूनमेते** मय्याप्तसम्भावना **जहा** (? जह)तीति। आदि शब्दादाहोपुरुषादिकात् अन्यथोप-

तृषु सम्भावितात् पुरुषाद् बहुलं प्रतिपत्तिदर्शनात्। ततोपि कथंचिद् विप्रलम्भसम्भवात्।

किञ्च (।) **परिमितव्याख्यातृपुरुषपरम्परामेव चात्र भवतामपि श्रृणुमः। तत्र क[6]श्चित् द्विष्टाज्ञधूर्त्तानामन्यतमः स्यादपीति अनाश्वासः।**

तस्मान्नापौरुषेयाद् व्याख्यानान्नापि सामयिकाल्लोकव्यवहाराद् वेदार्थसिद्धिः।

असामयिकत्वेपि नानार्थानां शब्दानां व्यवहारे दर्शनात्। कस्यचिदप्रसिद्धार्थस्याप्रसिद्धस्य वा पुनर्व्युत्पत्तिदर्शनेन सर्वत्र तदासं(?शं)काऽविनिवृत्तेः (।)

सर्व्वेषां यथार्थनियोगेप्यवैगुण्येन यथासम[7]म्(?)यं प्रतीतिजननात्। इष्टा-

---

प्रतानयन्तु नाम तेऽन्यथा। तथाप्यध्येतारो न तथा प्रतिपद्येरन्नित्याह। **तदित्यादि। तस्य** सम्भावितस्य पुरुषस्य **प्रत्ययाच्च** तदुक्तानाम। सम्भावितप्रणेतृ[6]पुरुषाभिप्रसन्नानामविचारेण वेदाध्ययनप्रतिपत्तेरन्यथासप्रदायसम्भव। पुरुषप्रामाण्यात् प्रवृत्तिमेव साधयन्नाह। **बहुष्वप्यध्येतृषु** मध्ये **सम्भावितात् पुरुषाद् बहुलं लोके प्रवृत्तिदर्शनात्।**

ननु सम्भावितात् प्रतिपत्तौ सम्वाद एवेत्यत आह। **ततोपि** सम्भावितात् पुरुषात् **कथञ्चित्** केनचित् कारणेन सम्भा[7]वना भ्रशभयादिना। **विप्रलम्भस्य** 210b विसम्वादस्य **सम्भवात्।**

उपचयहेतुमाह। **किंचेत्यादि। परिमिताश्च ते व्याख्यातृपुरुषाश्च तेषा परम्परामेवात्र** वेदव्याख्याने **भवतां** मी मा स का ना **श्रृणुमः। तत्र** तेषु मध्ये **कश्चिद्** वेदस्य व्याख्याता **द्विष्टादीनामन्यतमः स्यात्।** कश्चिद् वेददर्शने विद्विष्ट सोन्यथाप्युपदिशेत्। तथा कश्चिदज्ञ[1] धूर्त्तो वा। तथा च वेदव्याख्यायाम**नाश्वासः।**

यत एवन्त**स्मान्ना**पौरुषेयाद् वेद**व्याख्यानाद्** वेदार्थसिद्धि। **नापि सामयिकात्** साकेतिकाल्**लोकव्यवहाराद्वेदार्थसिद्धिः।** लोकस्य रागाद्युपप्लुतत्वात्।

भवन्तु वा निसर्गसिद्धा वैदिका शब्दास्समयनिरपेक्षा.। एवमप्य**सामयिकत्वे**भ्युपगम्यमाने। **व्यवहारे नानार्थानां** गवादिशब्दानान्दर्श[2]नात्। सर्वत्र वैदिकेपि शब्दे न तदाशकाऽनिवृत्तेरिति सम्बन्ध·। नानार्थाशकाया अनिवृत्तेरित्यर्थ। लौकिकानामेव नानार्थत्वन्न वैदिकानामिति चेदाह। **कस्यचिदित्यादि।** तस्यापि वैदिकस्य **कस्यचिद प्रसिद्धार्थस्येति** यत्र शब्द· प्रसिद्धो नार्थस्तस्या**प्रसिद्धस्य** वा स्वरूपेण शब्दस्य। **पुनर्व्युत्पत्तिप्रदर्शनेनार्थः** कल्पनीय. पुरुषै.। त[3]था च सति पुन· कि यथा स्थितमेवार्थं पुरुषो वैदिकानां शब्दानामुपदिशति किम्वाविपरीतमिति **सर्वत्र** नानार्था **शङ्काया अनिवृत्तेः।**

अनिष्टेर्थे प्रयुक्ता अपि वैदिकाश्शब्दा न तत्र प्रतीतिं जनयन्तीत्यप्ययुक्त।

निष्टयोरविशेषात्। अविशिष्टानां सर्व्वार्थेष्वेकमर्थमत्यक्षसंयोगमनत्यक्षदर्शिनि पुरुषसामान्ये को विवेचयेद् यतो लोकात्प्रतीतिः स्यात्।

36b **अपि च। स्वयमप्ययं न सर्व्वत्र प्रसिद्धिमनुसरति।**[8] **यस्मात् (।)**

स्वर्गोर्वश्यादिशब्दश्च दृष्टो रूढार्थवाचकः।

अनेनैव वर्ण्यमानः। मनुष्यातिशायिपुरुषनिकेतेतिमानुषसुखाधिष्ठानो नानोपकरणः स्वर्गः (।), तन्निवासिन्यप्सरसा (?।) उ र्व सी (?शी) नामेति लोकवादः (।) तमनादृत्यान्यामेवार्थकल्पनामयं कुर्वाणः शब्दान्तरेषु कथं प्रसिद्धिं प्रमाणयेत्।

तत्राविरोधादभ्युपगम इति चेत्। न। अत्राप्यतीन्द्रिये विरोधसिद्धेः।

यत· **सर्वेषां** शब्दाना लौकिकाना वैदिकाना च **यथार्थन्नियोगेपि**। वीप्सायामव्ययीभाव। यस्मिन् यस्मिन्नर्थे नियोगस्सकेत[4]स्तस्मिन् सत्यप्य**वैगुण्येन** तत्र तत्रार्थे **यथासमयं** यथासकेतं **प्रतीतिजननात्**। न चानिष्टेन्यथाप्रतीतिजनन। यत **इष्टानिष्टयो**रर्थयो· प्रत्यासत्तिविप्रकर्षाभावेन प्रतीतजननस्या**विशेषात्**। ततश्चा**विशिष्टानां सर्वार्थेषु** वैदिकाना शब्दानामे**कमर्थं** किम्विशिष्ट**मत्यक्षसंयोगं**(।) शब्देन सह सम्बन्धो यस्य स[5] तथोक्त·। **अनत्यक्षदर्शिनि**। अर्वाग्दर्शिनि **पुरुषसामान्ये को विवेचयेत्**(।) नैव कश्चिद् विवेचयेत्। **यतो लोकात् प्रतीतिः** स्यात्।

अपि च(।)अय मी मा स क **स्वयमपि न सर्वत्र** वेदे **प्रसिद्धिमनुसरति**। येन प्रसिद्धाल्लोकप्रवादाद् वेदार्थगति स्यात्। कि कारण। **यस्मात् स्वर्गोर्वश्यादिशब्दश्च**। स्वर्गशब्द उर्वर्शी शब्द। आदिशब्दान्न्द न व ना[6] दि शब्दश्चा**रूढार्थ**स्याप्रसिद्धार्थस्य **वाचको**ऽनेन वेदवादिना **निर्वण्र्यमानो** व्याख्यायमानो दृष्ट। तथा हि प्राकृत**पुरुषातिशायिनो** ये **पुरुषं** विशेषास्तेषा **निकेतः** स्थान। मानुषातिक्रान्त सुखमतिमानुष तस्या**तिमानुषस्य सुखस्याधिष्ठान**माश्रय·। नाना-
211a प्रकाराण्युपकरणान्युपभोगवस्तूनि यस्मिन्। स **नानोपकरणः**[7] स्वर्ग इति लोकप्रवाद **तन्निवासिनी** स्वर्गनिवासिन्य**प्सरा उर्वर्शी नामेति लोकप्रवादः**। **तं** लोकप्रवाद**मनादृत्य** मनुष्येष्वेव निरतिशया प्रीति **स्वर्गः**। उर्वशी चारणि·। पात्री वेत्यादिना। लोकप्रसिद्धादर्था**दन्यामेवार्थकल्पनामयं** जै मि न्यादि **कुर्वाणो**ग्निहोत्रादि**शब्दान्तरे**ष्वर्थनिर्णये। **कथं प्रसिद्धिं प्रमाणयेत्**। नैव प्रमाणयेदि[1]ति यावत्।

तत्राग्निहोत्रादिशब्देषु लोकप्रसिद्धार्थकल्पनाया **अविरोधात्** प्रतीतस्यैवार्थस्या**भ्युपगम इति चेत्**। स्वर्गोर्वश्यादिशब्देषु तु प्रसिद्धार्थाभ्युपगमे प्रमाणविरो धादनभ्युपगम इति परो मन्यते।

अन्यत्रा[1]**प्यविरोधस्य दुरन्वयत्वात्। विरुद्धामप्यग्निहोत्रात् स्वर्गावाप्ति मान्द्यादयं न लक्षयेदपि। विरोधाविरोधौ च बाधकसाधकप्रमाणवृत्ती (।) तौ चात्यक्षे नाभिमते। तत्कथं तद्वशात् प्रतीतिः।**

न च वचनवृत्तिरेवाविरोधोऽन्यत्रापि प्रसंगात्। अपौरुषेय आगमस्तस्य प्रवादा(द)र्थसिद्धिस्तत्र पुनर्विरोधचिन्तायामनाश्वास आगमे स्यात्। सत्यपि

नेत्यादिना सि द्धा न्त वा दी। भेदमनन्तरोक्त युज्यते। यस्मा**दत्रापि** स्वर्गोर्वश्यादिशब्देषु लोकप्रसिद्धे**तीन्द्रियेर्थे**भ्युपगम्यमाने। प्रमा[2]णेन **विरोधासिद्धेः** न ह्यत्र प्रत्यक्षमनुमान वा बाधक प्रमाणमस्ति। **अन्यत्रापी**त्यग्निहोत्रादिशब्देष्वपि लोकप्रसिद्धार्थकल्पनाया**मविरोधस्य दुरन्वयत्वात्**। साधकप्रमाणाभावेन दुर्बोधत्वात्।

एतदेव साधयन्नाह। **विरुद्धामपि** यथाप्रसिद्धाम**ग्निहोत्रात् स्वर्गावाप्ति मान्द्यादयं** जै मि न्या दिर्न **लक्षयेदपि** कदाचिदिति सशय। कि च (।) **विरो**[3]**धाविरोधौ च** नान्यावेव (।) किन्तर्हि (।) **बाधकसाधकप्रमाणवृत्ती**। यथोक्तस्यानुपलम्भाख्यस्य बाधकस्य प्रमाणस्य वृत्तिर्विरोध। साधकस्य प्रत्यक्षानुमानस्य प्रमाणस्य वृत्तिरविरोध। ते च विरोधविरोधस्वभावे। बाधकसाधकप्रमाणवृत्ती। **अत्यक्षे**ऽतीन्द्रिये वस्तुनि **नाभिमते**। न हि देशादिविप्रकृष्टेषु स्वर्गादिसाधनेषु बाधक साधक **च**[4] प्रमाण प्रवर्त्तते। यदा **चैवन्तत्कथं** नैव **तद्वशा**दिति विरोधाविरोधवशात्। विरोधवशात् स्वर्गादिशब्देषु प्रसिद्धार्थप्रतीतिरविरोधवशाच्चाग्निहोत्रादिशब्देषु प्रसिद्धार्थ**प्रतीतिः**।

अथ मत (।) न साधकप्रमाणवृत्तिरविरोधोतीन्द्रियेर्थे कि त्वागमसज्ञितस्याग्निहोत्रादिवचनस्य लोकप्रसिद्धार्थवाचकत्वेन प्रवृत्तिरेवाविरोध इति (।)

अत आह।[5] **न चे**त्यादि। लोकप्रसिद्धार्थवाचकत्वेनाग्निहोत्रादि**वचनस्य प्रवृत्तिरेवाविरोधो न च**। कि कारणम् (।) **अन्यत्रापि** स्वर्गोर्वश्यादिशब्देष्वपि स्वर्गादिवाचकत्वेन प्रवृत्तेरविरोध**प्रसङ्गात्**। तथा हि (।) स्वर्गोर्वश्यादिशब्दा-स्थानाप्सरोविशेषादिष्वेव प्रवृत्ता लोके दृश्यन्ते। ततश्चाविशेषादुभयत्र प्रसिद्धार्थपरिग्रहोस्तु। न चैकत्रापि।

कि च (।) **अपौ**[6]**रुषेयो** वेदाख्य **आगमः** स च स्वमर्थ स्वय न प्रकाशयति किन्तु **तस्या**गमस्य लोक**प्रवादादर्थसिद्धि**रभ्युपगम्यते। **तत्र पुन**र्लोकप्रसिद्धचङ्गीकरणेपि **विरोधचिन्तायां** क्रियमाणाया **सर्वत्रागमेऽनाश्वासः** स्यादतीन्द्रिये विरोधाविरोधयोर्निश्चेतुमशक्यत्वात्।

अनाश्वासमेव साधयन्नाह। **सत्यपी**त्यादि। **सत्यपि तस्मिन्नपौरु**[7]**षेय** 211b

तस्मिन्नत[2]थाभावादर्थस्याप्रमाणवृत्तेरन्यस्यापि शंकनीयत्वात्।

तदुक्तम् (।) **"अग्निहोत्रं जुहुयात् स्वर्गकाम" इत्यत्र श्वमांसभक्षणचोदनाविकल्पो भवत्विति। स न भवति प्रदेशान्तरेषु तथार्थस्य वचनात्।** न (।) **तस्यार्थापरिज्ञानात्। प्रदेशान्तरेष्वपि तथाविधार्थकल्पनाया अनिवार्यत्वात्।**

यदि हि क्वचिद् विदितार्थो[3]यमपौरुषेयः शब्दराशिः स्यात् तदा ततोर्थप्रतीतिः स्यात्। ते तु बाहुल्येप्यन्धा एव सर्व इति यथेष्टं प्रणीयन्ते। तस्मात् (।)

शब्दान्तरेषु तादृच्चु तादृश्येवास्तु कल्पना ॥ (३२२)

यादृश्यग्निहोत्रं जुहुयात् स्वर्गकाम इत्यस्य वाक्यस्य।

अपि च।

प्रसिद्धिश्च नृणां वादः प्रमाणं स च[4]नेष्यते।

आगमे। स्वर्गादिशब्दवाच्यस्य स्वर्गाद्यर्थस्यातथाभावात्। **तथाभावस्तथात्व** (।) यथा लोकेप्रसिद्धस्वर्गार्थग्रहण**मतथाभावाद**प्रसिद्धार्थग्रहणादन्यस्याप्यग्निहोत्रादिशब्दस्य **शंकनीयत्वात्**। किमस्य लोकप्रसिद्ध एवार्थ किम्वा स्वर्गादिशब्दवदन्य एवेति। एतदेव कुत (।) **प्रमाणवृत्तेः**। न ह्यत्र लोकप्रसिद्धार्थग्रहणे प्रमाण प्रवर्त्तत इति।[1]

यदुक्तमित्यादि·पर। यदुक्तम् (।) **"अग्निहोत्रं जुहुयादि"त्यत्र** वाक्ये **श्वमांसभक्षणस्य चोदना**भिधानन्तस्य **विकल्पः** कल्पना **भवत्विति। स** दोषो **न भवति**। कि कारणम् (।) वेदस्यैव **प्रदेशान्तरे तथे**ति भूतविशेषे घृतादिक प्रक्षिपेदित्येवमस्याग्निहोत्रादिवाक्यास्या**र्थचर्च्चनात्**। व्याख्यानात्।

नेत्यादि सि द्धा न्त वा दी। **ने**दमुत्तर युज्यते। **तस्य** प्र[2]देशान्तरस्थस्य व्याख्याभूतस्य वाक्यस्या**र्थापरिज्ञानात्**। ततश्च **प्रदेशान्तरेष्वपि** व्याख्याभूतेषु **तथार्थकल्पनाया** इति। श्वमासभक्षणकल्पनाया **अनिवार्यत्वात्**।

यदीत्याद्यस्यैव समर्थन। **यदि ह्ययमपौरुषेयो** वेदाख्य **शब्दराशिः क्वचित्** प्रदेशान्तरे **विदितार्थः स्यात् तदा ततो** विदितार्थात् प्रदेशान्तरात् परिशिष्ट**स्यार्थप्रतीति स्यात्**। या[3]वता **ते तु** वैदिका शब्दा **बाहुल्येप्यप**रिज्ञानार्थत्वादन्धा **एव सर्व इति** कृत्वा पुरुषेण **यथेष्टं प्रणीयन्ते** व्याख्यायन्ते।

यत एवन्त**स्माच्छब्दान्तरेषु तादृक्षि**वति। अग्निहोत्र जुहुयादित्यादि वाक्यानाम्व्याख्याभूतेषु **तादृश्येवास्तु कल्पना**। कीदृशी (।) इत्याह। **यादृश्यग्निहोत्रञ्जुहुयात्स्वर्गकाम इत्यस्य** कल्पना कृता प्रदेशान्तरेपि श्वमासभक्षणकल्प[4]नास्त्विति यावत्।

अपि च प्रसिद्धिश्च नान्यदेव किचित्। किन्तर्हि (।) **नृणां** पुरुषाणा **वादः**

ततश्च भूयोऽर्थगतिः किमेतद् द्विष्टकामितं[4] ॥ (३२३)

न प्रसिद्धिर्नामान्यान्यत्र जनप्रवादात् (।) **ते च सर्वे जना रागाद्यविद्यापरीतत्वादसंभावनीययाथातथ्यवचनाः** (।) **तदेषां प्रवादो न प्रमाणं।**

न हि कस्यचिदपि सम्यग्(?क्)**प्रतिपत्तेरभावे बाहुल्यमर्थवद् भवति। पा र सी क मातृमिथ्याचारवत्।**

तेषामेव पुरुषाणां वचनात् पुनः परोक्षार्थसंप्रतिपत्तिरिति क[5]थं तदेव युगपद् द्वेष्यं च काम्यं च।

अर्थे प्रसिद्धिमुल्लंघ्य कल्पने न निबन्धनं।
प्रसिद्धेरप्रमाणत्वात् तद्ग्रहे किंन्निबन्धनं ॥ (३२४)

प्राप्तप्रतिलोमनेनान्यत्र प्रवृत्तिर्गुणदोषसन्दर्शनेन युक्तेति प्रसिद्धेरन्वय इति

स च वाद **प्रमाणन्नेष्यते** भवता। सर्वपुरुषाणा रागाद्युपप्लुतत्वात्। **भूय** इति पुन.। **ततश्च** लोकप्रवादादप्रमाणत्वेन पूर्व व्यवस्थापितात् पुनर्वेदार्थ**गतिरिति** युगपत्**किमेतद्विष्टकामितं**। यदेव वस्त्वप्रमाणत्वेन द्विष्ट। तदेव पुन.[5] प्रतिपत्तिहेतुत्वेन कामितमभिलषितमिति परस्परविरोध.।

न प्रसिद्धिर्नामान्या जनप्रवादात्। किन्तु जनप्रवाद एव प्रसिद्धि.। **ते च सर्वे जना असम्भावनीययाथातथ्यवचना** असम्भावनीय याथातथ्यमविपरीतत्व यस्मिन् वचने। तदसम्भावनीय**याथातथ्यं वच**न येषामिति विग्रह। कि कारण (।) **रागाविद्यापरी**[6]**तत्वात्**। रागाविद्याभ्या व्याप्तत्वात्। **त**दिति तस्मा**देषां** जनाना **प्रवादो न प्रमाणं।**

बाहुल्याज्जनस्य तत्प्रवाद. प्रमाणमित्यपि मिथ्या। यत. (।) **न हि** बहूना जनानाम्मध्ये **कस्यचिदे**कस्यापि पुरुषस्य **सम्यक्प्रतिपत्तेरभावे** सति लोकस्य **बाहुल्यमर्थवद्** भवति प्रयोजनवद् भवति। किमिव (।) **पा र सी के**त्यादि। यथा बहुभि. पारसीकै**र्मा**[7]**तरि** मैथुनाचरणान्न तन्न्याय्यम्भवति। एव बाहुल्येपि रागादि- 212a
मतामतीन्द्रियेर्थे वचनमप्रमाणमेवेति।

अथ **तेषामेव** रागादिमता **पुरुषाणां वचनात् पुनः परोक्ष**स्याग्निहोत्रादिशब्दवाच्यस्यार्थस्य **प्रतिपत्तिरिति। कथन्तदेव युगपदे**कस्मिन्नेव काले **द्वेष्यं च काम्यं च** युज्यते।

अग्निहोत्रादिशब्दस्य यस्मिन्नर्थे लोक**प्रसिद्धिस्तामुल्लंघ्य**[1] त्यक्त्वा। ततोर्थान्तरस्य श्वमासभक्षणादे **कल्पने न निबन्धनं** कारणमिति। तस्मात् प्रसिद्धिरेव गृह्यत इत्येतदप्ययुक्त। यत. **प्रसिद्धेरप्रमाणत्वात् तद्ग्रहे** प्रसिद्धिग्रहे **किंन्निबन्धनं** (।) नैव किञ्चिदिति प्रसिद्धेरपि ग्रहो माभूदिति।

चेत्। न (।) प्राप्तेः प्रमाणवृत्तिलक्षणत्वात्। यत्किंचनग्रहणं हि प्रसिद्धिमप्रमाणय[6]तस्तन्मुखेन प्रतीतिः (।) न्यायात् प्राप्तिप्रतिषेधात् तुल्या स्वपरविकल्पयोरुभयथापि वृत्तिरिति कः प्रसिद्धावनुरोधः।

अपि चेयम् (।)

उत्पादिता प्रसिद्धैश्च शङ्का शब्दार्थनिश्चये।
यस्मान्ना(ना)र्थवृत्तित्वं शब्दानां तत्र दृश्यते॥ (३२५)

न (।) प्रसिद्धेरेकार्थनिश्चयः शब्दानान्तत एव शङ्कोत्पत्तेः। नानार्था हि
37a **शब्दा लोके दृश्यन्ते। लोकवादश्च प्रतीतिः। अत एव नानार्थते[7]ति। ततो नियमो**

प्राप्त्येत्यादिना पूर्वार्द्धन्तावद् व्याचष्टे। प्रसिद्ध्या **प्राप्त**स्यार्थस्य **प्रतिलोमनेन** त्यागेनान्यत्राप्रसिद्धेर्थे[2] **प्रवृत्तिर्गुणदोषदर्शने** सति **युक्ता**। यदि प्राप्तेर्थे दोषदर्शन स्यादप्राप्ते च गुणदर्शन। न चाग्निहोत्रादिशब्दाना प्रसिद्धेर्थे दोषदर्शनमस्त्यप्रसिद्धे वा गुणदर्शनन्तत **प्रसिद्धे**रेवान्वयोनुगमन**मिति चेत्।**

नेत्यादिना प्रतिषेधति। एतच्च पश्चार्द्धस्य विवरण। **नै**तदेव (।) किङ्कारण (।) **प्राप्तेः प्रमाणवृत्तिलक्षणत्वात्**[3]। साधकेन हि प्रमाणेनार्थस्य प्राप्तिनिश्चीयत इति प्राप्ते. प्रमाणवृत्तिलक्षणत्वमुच्यते। न च प्रसिद्धि प्रमाण येन सिद्धोर्थो न्यायप्राप्त स्यात्। ततश्च तामेना **प्रसिद्धिमप्रमाणयतो** मी मा स क स्य **तन्मुखेन** प्रसिद्धिद्वारेणाग्निहोत्रादिशब्दवाच्यस्यार्थस्य या **प्रतीतिः** सा यत्किञ्चन ग्रहणमप्रमाणकत्वात्। यथा[4]कथञ्चित् तद्ग्रहणमित्यर्थ।

ततश्चाग्निहोत्रादिशब्दस्य लोकप्रसिद्धोर्थो न्यायप्राप्तो न भवतीत्येव **न्याया**ल्लोकप्रसिद्धस्यार्थस्य **प्राप्तिप्रतिषेधात्** कारणादग्निहोत्रादिशब्दानामिच्छयार्थ परिकल्पनीय.।

तत्र मी मा स कैरग्निहोत्रादिशब्दाना योर्थ परिकल्प्यते दहनद्रव्यादिलक्षणो यश्च परेण श्वमासभक्षणलक्षणस्त[5]यो **स्वपरविकल्पयोरुभयथा**पीति यदि प्रसिद्ध्यनुपालनमथ नानुपालनन्तथापि प्रमाणाभावादिच्छया परिग्रहे **तुल्या वृत्ति**रिति कृत्वा **कः प्रसिद्धानुरोधो** येन प्रसिद्धेरर्थकल्पना क्रियते।

अपि च (।) **प्रसिद्ध्यै**व सर्वशब्दानामर्थनिश्चये। इयन्नानार्थत्वेन **शंकोत्पादिता**। कि कारण (।) **यस्मान्ना(ना)र्थ**वृत्तित्वमग्न्यादि**शब्दानान्तत्र** प्रसिद्धौ **दृश्यते**।

नेत्यादिना व्याचष्टे। **न प्रसिद्धेस्सकाशादेकार्थनिश्चयः शब्दानाम्वैदिकानां**। कि कारण (।) **ततं एव** प्रसिद्धेरेव **शंकोत्पत्तेः**। तथा हि **नानार्था** अग्न्यादि**शब्दा लोके दृश्यन्ते**। तच्च नानार्थदर्शन लोकवादो **लोकप्रवादश्च प्रतीतिरत एव-**

न युक्तः।

अन्यथासंभवाभावान्ना[1]नाशक्तेः स्वयं ध्वनेः।
अवश्यं शङ्कया भाव्यं नियामकमपश्यतां॥ (३२६)

इत्यन्तरश्लोक (।)

तस्मादविदितार्थविभागेषु शब्देष्वेकमर्थमत्यक्षसंयोगमनालम्बनसमारोपन्निश्चित्य व्याचक्षाणो जै मि निः तद्व्याजेन स्वमेव मतमाहेति न तीर्थकरान्तरादस्य विशेषम्पश्यामः।

तथा हि (।) तदर्थवचनव्यापारस (?शू)न्यस्य तत्सामारोपेणाभिधानं न स्वम्वचनम(ति)शेते। तत्कारिणा केवलम्मिथ्याविनीततैवात्मनः समुद्योतिता

लोकवादान्ना(ना)र्थतेति कृत्वा **ततो** लोकवादाद् वैदिकाना शब्दानामेकार्थ[7]**नियमो** 212b **न युक्तः।**

अनियतार्थत्वमेव द्रढयन्नाह। **अन्यथे**त्यादि। **स्वयं** स्वभावतो **नानाशक्ते**रनेकार्थप्रतिपादनयोग्यस्य **ध्वने** शब्दस्या**न्यथासम्भवाभावात्**। अभिमतादर्थादर्थान्तरे वृत्तिरन्यथा। तस्या अर्थान्तरवृत्तेरसम्भवोन्यथाऽसम्भवस्तस्याभावात्। प्रतिषेधद्वयेन विधेरभ्युपगमादन्यथापि सम्भवस्य भावादिति यावत्। ततश्चातीन्द्रि[1]यार्थवृत्तिषु वैदिकेषु शब्देष्व**वश्यम**नेकार्थवृत्तित्वेन **शंकया भाव्यं**। केषा **नियामकम--पश्यतां** पुसा प्रतिनियतविषयसाधक प्रमाणमपश्यता। (३२६)

यत एव**न्तस्माद्** (।) **अविदितः अर्थविभागो** येषामिति विग्रह। **तेष्व**विदितार्थविभागेषु **शब्देष्वेकमर्थ**मभिमत (।') कि भूतम् (।) **अत्यक्षसंयोगं**। अत्यक्षोतीन्द्रियस्सयोग शब्देन सह सम्बन्धो यस्येति वि[2]ग्रह। आलम्बन प्रमाणन्तदभा**वादनालम्बनो** नि प्रमाणक**स्समारोपो** यस्य स तथोक्त। **तमेव** भूतमर्थम्**विनिश्चत्य व्याचक्षाणो जै मि निः**। **तद्व्याजेनेति** वेद एव प्राहेति वेदोपक्षेपेण **स्वमेव मतमाहेति** कृत्वा यस्तीर्थ्य(?र्थ)करो निर्व्याजमेवमाह। अहमेव स्वयम्वदामीति। तस्मात् **तीर्थ्य**(?र्थ)**करान्तरादस्य** जै मि नेर्न **विशेषं पश्यामः**।

अविशेषमेव[3] साधयन्नाह। **तथा हीत्यादि**। स चासावर्थश्चेति **तदर्थस्तस्य** प्रकाशन**म्वचनं**। तत्र **व्यापार**स्सामर्थ्यन्तेन **शून्यस्य** रहितस्य वेदस्य। **तत्समारोपेणेत्यर्थप्रकाशन**व्यापारसमारोपेण .. . एवम्वक्तीति यदभिधानन्त (.. ...) स्ववचनमेव तस्य तदिति यावत्। **तत्कारिणा** वचनव्यापारशून्ये वेदेर्थप्रकाशनव्यापारसमारोपकारिणा जै मि नि ना **केव[4]लम्मिथ्याविनीततैवात्मनः समुद्द्योतिता स्यात्**। न तु पौरुषेयाद् वचनादस्य विशेष'।

स्यात्।

तथा हि।

एष स्थाणुरयमार्ग्ग इति वक्तीति कश्चन।
अन्यः स्वयम्ब्रवीमीति तयोर्भेदः परीक्ष्य(?क्ष्य)तां। (३२७)

निरभिप्रायव्यापारवचने स्थाणौ समारोप्योपदिशतः स्वतन्त्रस्य वा(।)स्ववृत्तिवचनोपगमे न कश्चिद्विशेषोऽन्यत्र जडस्य प्रतिपत्तिमान्द्यात्।

अपि च (।) अर्थनियमे सत्येनं जै मि नि र्जानीयात्। स एव शब्दस्य (।)

सर्व्वत्र योग्यस्यैकार्थद्योतने नियमः कुतः।

न हि शब्दस्य स्वभावतः कश्चिदर्थः स्वभावनियतः सर्व्वत्र योग्यत्वात्। अयोग्यत्वे च तदप्रच्युतेरविधेयस्य पुरुषाणां क्वचिदुपनयनापनयनासम्भवात्।

एतदेव स्फुटयन्नाह। **तथा हि**त्यादि। क पन्था पा ट लि पु त्र गच्छतीति पृष्ट **कश्चन** पुरुष आह। न जाने स्वयमह केवलमेष **स्थाणुरयं मार्ग इति वक्ती**त्येवमेको मार्गोपदेशसामर्थ्यशून्यस्थाणुव्याजेन मार्गमाचष्टे। **अन्य**स्त्वाह। न स्थाणोर्वचनसामर्थ्य[5]मस्त्यहमेव **स्वयं** ज्ञात्वाय मार्ग इति **ब्रवीमीति**। **तयो**रेवमभिदधतो स्वयम्वचन**भेदः परीक्ष्यतां** यद्यस्ति नैवास्तीत्यभिप्राय।

निरभिप्राय इत्यादिना व्याचष्टे। अभिप्राय इद चेद च करिष्यामीति चेतना। तत्पूर्वक प्रयत्नो व्यापार। **अभिप्राय**श्च **व्यापार**श्च **वचनं** च। तानि **न** विद्यन्ते यस्मिन्स तथोक्त.। **तस्मि**न्नेवम्भूते **स्थाणौ** मार्ग[6]प्रकाशकत्व **समारोप्योपदिशत** एकस्य पुस **स्वतन्त्रस्य वा** स्थाणुनिरपेक्षस्यापरस्य मार्गमुपदिशत इति सम्बन्ध। एतयोर्द्वयो पुरुषयो **स्वयम्वचनोपगमे न कश्चिद्विशेषोन्यत्र जडस्य प्रतिपत्तिमान्द्यात्** जडस्य श्रोतु प्रतिपत्तिमान्द्यमेव विशिष्यते। यतोभिप्रायादि-
2132a शून्यस्य स्थाणोर्वचन प्रतिपद्यते स्थाणुरेव वक्तीति। एव[7] जै मि नेर्वेदव्याजेन स्वमत ब्रुवतो जड· प्रतिपत्तिमान्द्यात् वेद एवं ब्रूत इति प्रतिपद्यते।

अपि च वैदिकस्य शब्दस्यै**कार्थ**प्रति**नियमे सत्येन**मेकार्थप्रतिनियम **जै मि नि**र्जानीयात्। यावता **शब्दस्य वाचक**स्य **सर्वत्रार्थे** वाचकत्वेन **योग्यस्यैकार्थद्योतने नियतिः कुतो** नैव। **न हि शब्दस्य कश्चिदर्थः स्वभावेन** निसर्गसिद्ध्या **नियतो**स्ति। किं कारण (।) **स[1]र्वत्र** वाच्येर्थे **योग्यत्वा**च्छब्दस्य।

अथ पुनर्न योग्यता सर्वत्रार्थे शब्दस्य तदाप्य**योग्यत्वे च तदप्रच्युते**रयोग्यतास्वभावान्नित्यस्य शब्दस्याप्रच्युते कारणात् **पुरुषाणामविधेय**स्यानायत्तस्य **क्वचिदर्थे उपनयन**म्वाचकत्वेन नियोजन। नियुक्तस्याप्य**पनयनं**। नेदानीमयं **शब्दो** वाचक इति तस्या**सम्भवात्**। भवति च (।) तस्मात् सर्वत्र शब्दा यो[2]ग्या

ज्ञातावातीन्द्रियाः केन विवक्षावचनादृते ॥ (३२८)

पुरुषप्रणीते हि शब्दे कयाचिद् विवक्षया स ताङ् कदाचिद् के(न)चिन्निवेदयेदपीति विवक्षापूर्वकाणां शब्दानामर्थनिय[3]मः प्रतीयेतापि। अपौरुषेये तु विद्यमानोप्यर्थनियमः कथम्विज्ञेयः स्वभावभेदस्याभावात्। सति वा प्रत्यक्षस्य स्वयम्प्रतीतिप्रसङ्गात्। अप्रत्यक्षत्वेपि केनचित् ज्ञातुमशक्यत्वात्। न चास्तिकश्चिद्विशेषः। सर्वशब्दा हि सर्वार्थप्रत्यासत्तिविप्रकर्षरहिताः।

ततस्तेषाम् (।)

विवक्षा नियमे हेतुः सङ्केतस्तत्प्रकाशनः।
अपौरुषेये सा नास्ति तस्य सैका[4]र्थता कुतः ॥ (३२९)

इत्येकार्थद्योतन नास्ति।

भवतु वा वैदिकानामेकार्थनियमस्तथाप्यतीन्द्रियमर्थनियम पुरुषो ज्ञातुमशक्त·। तदेवाह। **ज्ञाता वातीन्द्रिया अर्थाः केन** पुरुषेण। न हि मी मा स कोतीन्द्रियार्थदर्शिनं कञ्चिदिच्छति। **विवक्षावचनाद् ऋते** (।) विवक्षाया प्रकाशनम्वचनम्विवक्षावचनन्तेन विना। वक्तुरभिप्रायकथनमन्तरेणातीन्द्रिया नैव केनचि[3]ज्ज्ञाता इत्यर्थ·।

पुरुषेत्यादिना व्याचष्टे। **कयाचिद् विवक्षया पुरुषेण प्रणीते** उच्चारिते **शब्दे** स पुरुषस्ताम्विवक्षा **कदाचित्** क्वचिच्छ्रोतरि **निवेदयेदिद** मया वाच्यत्वेन विवक्षितमिति। **विवक्षापूर्वकाणां शब्दानामर्थे नियमः प्रतीयेतापि। अपौरुषेये तु** शब्दे विवक्षापूर्वं केनचिदप्रयुक्ते **विद्यमानोप्यर्थनियमः कथं ज्ञेयः** (।) नैव कथचित्। कि[4] कारण (।) **स्वभावभेदस्याभावात्**। न हि वैदिकस्य शब्दस्य कश्चित् स्वभावो भिन्नोस्ति स एकत्राभिमतेर्थे नियतो यद्दर्शनादिष्टार्थप्रतीति स्यात्। **सत्यपि वा** स्वभावभेदे स स्वभावभेद प्रत्यक्षो वा स्यादप्रत्यक्षो वा। न तावत्प्रत्यक्ष (।) किङ्कारण (।) **प्रत्यक्षस्य** स्वभावस्योपदेशनिरपेक्षस्य। **स्वयं प्रतीतिप्रसंगात्**। अथाप्रत्यक्ष· (।) **अप्रत्यक्षत्वेपि** प्रमाणान्तर[5]स्याभावेन **केनचि**दप्यर्वाग्दर्शनेन **ज्ञातुमशक्यत्वात्**।

अभ्युपगम्यैतदुक्त। **न चास्ति कश्चिद् विशेषो** य एकार्थप्रतिनियतः। **सर्वशब्दा हि सर्वार्थप्रत्यासत्तिविप्रकर्षरहिताः।**

न हि केचिच्छब्दाः क्वचिदर्थे प्रत्यासन्ना विप्रकृष्टा वा **भावतो**ऽपि तु **तेषां** शब्दाना सर्वार्थेषु स्वभावतस्तुल्यानामेकार्थनियमे वक्तु**र्विवक्षा हेतुः**। **संकेतस्तत्प्रका[6]शन** इति तस्याश्च विवक्षाया· प्रकाशनः सकेतः। तथा ह्ययमर्थो (?र्थः) तेन विवक्षित इति संकेतादवगम्यते। **सा च** विवक्षा**पौरुषेये** शब्दे **नास्ती**ति कृत्वा

विवक्षया हि शब्दोऽर्थेषु नियम्यते न स्वभावतः। तस्याद(? तस्या)प्रतिबन्धेन सर्वत्रतुल्यत्वात्। यत्रापि प्रतिबन्धस्तदभिधानानियमाभावात्। सर्वशब्दैः करणानामभिधानप्रसङ्गात्। तस्माद् विवक्षाप्रकाशनायाभिप्रायनिवेदनलक्षणः सङ्केतः क्रियते। अपौरुषेये तु न विवक्षा न सङ्केतः कस्यचिदभिप्रायाभावा (त्)-दति न नियमो न तज्ज्ञानम्।[5]

स्वभावनियमेऽन्यत्र न योज्येत तया पुनः।

यदि सङ्केतनिरपेक्षः स्वभावत एवार्थेषु शब्दो निलीनः स्यात्। उक्तमत्र (।) अप्रतिबन्धाद् नियत इति।

अपि च। स्वाभाविके वाच्यवाचकभावे न पुनर्विवक्षया (।)

यथेष्टन्न नियुज्येत संकेतश्च निरर्थकः (३३०)।

तस्यापौरुषेयस्य शब्दस्य **सा** यथोक्ता **एकार्थता कुतः** (।) नैव।

विवक्षा हीत्यादिना व्याचष्टे। **विवक्षया** हेतुभूतया **शब्दोर्थेषु नियम्यते**
213b ऽस्यैवार्थस्याय वाचक इति। **न** तु **स्वभावतः** (।) कि कारण (।) **तस्य** श[7]ब्दस्य क्वचिद् वस्तुन्य**प्रतिबन्धेन** सम्बन्धरहितत्वेन कारणेन **सर्वत्रार्थतुल्यत्वात्। यत्रापि** शब्दस्य **प्रतिबन्धः** स्थानकरणेषु तत शब्दानामुत्पत्तेरभिव्यक्तेर्वा। **तेषामपि** करणाना **सर्वैः शब्दैरभिधाननियमभावात्।** न हि सर्वे शब्दा **करणानामेवाभिधायका**। करणाभिधायी पुन शब्द करणानि प्रतिपादयेदपीति सर्वग्रहण।

यत एवन्त**स्माद् वि**[1]**वक्षाप्रकाशनाय संकेतः क्रियते** (।) कीदृश (।) **अभिप्रायनिवेदनलक्षणः**। वक्तुरभिप्रायप्रकाशनलक्षण'। **अपौरुषेये** तु शब्दे **न विवक्षा** नियामिका। **नापि संकेत**स्तत्प्रकाशन। कि कारण (।) पुरुषनिवृत्तेरेव **कस्यचिदभिप्रायस्याभावादिति** कृत्वा **नैकार्थनियमो** वैदिकाना शब्दाना। नियमे वा। **न तज्ज्ञानं** नैकार्थप्रतिनियमज्ञान कस्यचित्। अर्थे स्व[2]भावत एकार्थनियता वैदिका शब्दा न विवक्षात।

तदा **स्वभावनियमे**भ्युपगम्यमाने स शब्दोन्यत्रार्थे **तया** विवक्षया **न वियुज्यते**।

यदीत्यादिना व्याचष्टे। **यदि संकेतनिरपेक्षः स्वभावत एव शब्दोर्थेषु निलीनो** युक्त **स्यात्। उक्तमत्रो**त्तर (।) "क्वचिद्वस्तुन्य**प्रतिबन्धादनियत**" इति।

अपि च (।) **स्वाभाविकेन** निसर्गसिद्धे **वाच्यवाचकभावे**ऽभ्युपगम्यमा[3]ने। **न पुनर्विवक्षया यथेष्टं** शब्दोन्यत्रार्थे **नियुज्यते**। न हि रूपप्रकाशने स्वभावतो नियत चक्षु शब्दप्रकाशने नियोक्तु शक्यते। नियुज्यते च यथेष्टं शब्द (।) तस्मान्न स्वभावनियतः। हस्तसज्ञादिवत्। स्वभावतोर्थप्रतिनियमे शब्दानां **संकेतश्च**

स्यात्। न हि स्वभावभेद इन्द्रियगम्यः स्वप्रतीतौ परिभाषादिकमपेक्षते। नीलादिभेदवत्। तदपेक्षप्रतीतयस्तु न वस्तुस्वभावाः (।) किन्तर्हि (।) सामयिका राजचिह्नादिवत् (।) यः सामयिकः स्वभावनियतो युक्तस्तस्येच्छावृत्तेः।

अत एव सङ्केतात्। स्वभावविशेषस्य व्यक्तौ च नियमः कुतः (।) स्वेच्छावृत्तिः सङ्केतः स इहैव कर्तुं शक्यते नान्यत्रेति नोपरोधोऽस्ति। स पुरुषैः स्वेच्छया क्रियमाणस्तमेव स्वभावं व्यनक्ति नान्यमिति न नियमोऽस्ति॥

यत्र स्वातंत्र्यमिच्छाया नियमो नाम तत्र कः।
द्योतयेत् तेन सङ्केतो नेष्टामेवास्य योग्यतां॥ (३३१)

इत्यत्यन्तरश्लोकः।

निरर्थो निष्फल स्यात्। यतो न हि स्वभावभेदः स्वभावविशेष इन्द्रियगम्यः स्वप्रतीतौ परिभाषा[4]दिकं। परिभाषा सकेत। आदिशब्दात् सकेतस्मृत्यादिपरिग्रह। किमिव (।) नीलादिभेदवत्। यथा नीलादिविशेषा स्वप्रतीतौ सकेतादिक नापेक्षन्ते तद्वत्। तदपेक्षप्रतीतयस्तु सकेतापेक्षप्रतीतयस्तु ये। ते न वस्तुस्वभावाः। न वस्तुनो निसर्गसिद्धा विशेषा. (।) किन्तर्हि (।) सामयिकाः सकेतकृता। किमिव (।) राजचिह्नादिवत्। यथा राज्ञा[5] स्वप्रतीतये समिता ध्वजादयश्चिन्हभेदाः। आदिशब्दाद्धस्तसज्ञादिपरिग्रह। यश्च सामयिकस्स स्वभावनियतो युक्तः। निसर्गसिद्धो न युक्तः। कि कारण (।) तस्य सामयिकस्य पुरुषस्य पुरुषेच्छया प्रवृत्तेः।

वैदिकस्य शब्दस्यार्थे निसर्गत एव स्वभावविशेषो नियत स तु सकेतेन व्यज्यत इति चेद् (।)

आह। अत एवेत्यादि। यस्मादिच्छावृत्तिस्स[6]ङ्केतोऽत एव कारणात्। संकेतादेकार्थनियतस्य स्वभावविशेषस्य व्यक्तौ नियतिः कुतः (।) नैव।

तद् व्याचष्टे (।) स्वेच्छावृत्तिस्संकेतस्स इहैवाभिमतेर्थे कर्तुं शक्यते नान्यत्रेति नोपरोधोस्ति (।) न वाचकमस्ति। ततश्च स सकेत पुरुषैः स्वेच्छया क्रियमाणस्तमेवैकार्थनियत स्वभावं व्यनक्ति नान्यमिति न नियमोस्ति।

यत्र संकेते स्वातन्त्र्यमिच्छाया[7] नियमो नाम तत्र कः। नैवास्ति नियम 214a
इत्यर्थ। तेनानियतत्वेन कारणेनास्य वैदिकस्य शब्दस्येष्टामेवाभिमतार्थविषयामेव। योग्यतां संकेतो न द्योतयेदिति।

तदेवमपौरुषेयत्व नागमलक्षणमिति प्रतिपादितम्।

(३) जैमिनिमत-निरास.

वेदैकदेशसंवादित्वे न सर्वस्य प्रामाण्यम्

यस्मात्किलेदृश सत्त्यं यथाग्निः शीतनोदनः ।
वाक्यं वेदैकदेशत्वादन्यदप्यपरोऽब्रवीत् ॥ (३३२)

अन्यस्त्वपौरुषेयमागमलक्षणम्परित्यज्यान्यथा प्रामाण्यम्वेदस्य साधयितुकामः-
37b **प्राह। अवितथानि वेदवाक्यानि। यत्राप्रतिपत्तिः।[8] वेदैकदेशत्वाद् यथा (।) "अग्निर्हिमस्य भेषजमि"त्यादि वाक्यमिति (।)**

तस्येदं (।)

रसवत्तुल्यरूपत्वादेकभाण्डे च पाकवत् ।
शेषवद् व्यभिचारित्वात्तिप्तं न्यायविदेदृशं ॥ (३३३)

स्वयमीदृशमा चार्ये णानुमानं नैयायिकशेषवदनुमानव्यभिचारमुद्भावयता

इदानीमेकदेशाविसम्वादनमागमलक्षण दूषयितुमुपन्यस्यति। **यस्मा**दित्यादि। **किल** शब्दोनभिप्रायद्योतक ।[1] **अग्निः शीतनोदनः** शीतस्य निवारक । एतेनाग्निर्हिमस्य भेषजमित्येतद्वाक्यं यथा सत्य तथान्यदपि **वाक्यम**ग्निहोत्रादिक जुहुयादित्यादिकमवितथमेतत् साध्य। **वेदैकदेशत्वादि**ति हेतु । एवम**परो** वृद्ध मीमास को **ब्रवीत्**। उक्तवान्।

अन्यस्त्वित्यादिना व्याचष्टे। **अन्यस्तु** मीमासक । यथोक्तदोषोपहतत्वात्। **अपौरुषेयमागमलक्ष[2]णं परित्यज्यान्यथा प्रामाण्यम्वेदस्य साधयितुकामः प्राह। अवितथानी**त्यादि। **यत्राप्रतिपत्ति**रिति येषु वेदवाक्येष्ववितथत्वेन बौद्ध स्याप्रतिपत्तिस्तान्यवितथानीत्यनेन विशेषस्य पक्षीकरणात्। **वेदैकदेशत्वादि**ति। सामान्यस्य हेतुत्वेनोपादानान्न प्रतिज्ञार्थैकदेशता हेतोरस्ति। **यथा** (।) **"अग्निर्हिमस्य भेषजं" प्रतिपक्ष इत्यादि** वाक्यव(त्)[3]। आदिशब्दाद् द्वादश मासा सम्वत्सर इत्यादिवाक्यपरिग्रह ।

उत्तरमाह। **तस्ये**त्यादि। **तस्य** वादिन **इदं** साधन शेषवत्। कस्माद् (।) **व्यभिचारित्वात्। ईदृशम**नुमान **न्यायविदा** आचार्यदिग्नागेन प्रमाणसमुच्चये प्रतिक्षिप्तमिति सम्बन्ध । किमिव शेषवदित्याह। **रसव**दित्यादि। यथा। स्वादितेन फलेन तुल्यरूपत्वादनास्वादित[4]मपि फल तुल्यमित्येतदनुमान शेषवत्। तद्वत्। अदृष्टा अपि तण्डुला पक्वा एकभाण्डे पचनात्। दृष्टपक्वतण्डुलवदित्येवमे**कभाण्डे च पाकवत्। यथै**व तदनुमान **शेषवत्** तथा मीमासको क्त मिति।

स्वयमित्यादिना व्याख्यान। **ईदृशमनुमानं स्वयमाचार्येण**सासाधनमुक्तमिति

तुल्यरूपतया फलानां तुल्यरससाधनवत्। एकस्थाल्यान्तर्गमाद् दृष्टवददृष्ट-तण्डुलपाकसाधनवच्चासाधनमुक्त। तदसाध[1]त्वन्यायश्च पूर्व्वमेवोक्तः।

उक्तञ्चेदमागमलक्षणमस्माभिः। तत्तु सर्वस्य शक्यविचारस्य विषयस्य यथास्वं प्रमाणेन विधिप्रतिषेधविशुद्धो (?सिद्धौ) नान्तरीयकताभावेपि शब्दा-नामर्थेषु च संशयितस्य प्रवृत्तिः (।) तत्र कदाचिदविसम्वादसम्भवात्।

नन्वन्यत्र दृष्टप्रमाणोपरोधस्य पुरुषस्य प्रवृत्तिरिति। यः पुनः प्राकृतविषयस्य

सम्बन्ध। क्व (।) **नै या यि का** ना **शेषवदनुमा**[5]**नस्य व्यभिचारमुद्भावयता** प्र मा ण स मु च्च ये। किमिव। यथा **तुल्यरूपतया** हेतुभूतयाऽनास्वादितानामपि **फलानामास्वादितफलेन। तुल्यरससाधनवत्। एकस्थाल्यन्तर्गमादिति** च हेतुना। **दृष्टपरिपक्वतण्डुलवददृष्टतण्डुलाना पाकसाधनवत्। तदसाधनत्वन्याय-श्चेति** तस्य शेषवतोनुमानस्यासाध(न)[6]त्वन्यायश्च। यस्मादर्शनमात्रेण व्यतिरेक प्रदर्श्यत इत्यादिना **पूर्वमेवोक्तः**। ननु च (।)

"आप्तवादाविसम्वादसामान्यादनुमानता" (प्र० वा० १।२१८)

इत्यादिना आचार्य दि ग्ना ग नाप्येकदेशाविसम्वादनमागमलक्षणमुक्त-मेवेति (।)

आह। **उक्तं चेदमित्यादि। उक्तं चेदम्** (।)

"एकदेशाविसम्वादिरूपमागमलक्षणम् (।)"

अस्माभिर्नाय[7] पुरुषो नाश्रित्यागमप्रामाण्यमाप्तुं समर्थ" इत्यत्रान्तरे। 21 (b)

तत्रैकदेशाविसवादनमागमलक्षण नात्यन्तप्रसिद्धैकविषयसत्यताश्रयमपि तु **तत्त्वागमलक्षण** योऽर्थादर्शनेन प्रमाणत शक्यपरिच्छेद। अशेषो विषयस्तस्य **सर्वस्य शक्यविचारस्य विषयस्य** (।) शक्यो विचारोस्येति विग्रह। **यथास्वं प्रमाणेन विधिप्रतिषेधस्वीकृत**[1]सिद्धिवत् (?) विशुद्धा शास्त्रे प्रत्यक्षविषयत्वे-नाभिमताना प्रत्यक्षत्व। यथा बौ द्ध सि द्धा न्ते बुद्ध्यादीना। तथा वस्तु-बलायातानुमानविषयाभिमताना वस्तुबलानुमानविषयत्व। यथा दु खसत्यादीना। आगमापेक्षानुमानविषयाभिमताना च तथाभाव। त्रिविधस्य विषयस्य यथास्व प्रमाणेन विधिसिद्धि। प्रत्यक्षादिप्रमाणा वि[षय][2] ता नाम प्रत्यक्षादित्व यथास्व प्रमाणेन प्रतिषेधसिद्धि। एव विधिप्रतिषेधसिद्धौ सत्याम्परिशिष्टेष्व-त्यन्तपरोक्षेष्वर्थेषु **शब्दानां नान्तरतीयकताभावे** सम्बन्धाभावे **सत्यपि** वरमगत्या **संशयितस्य** पुरुषस्य **प्रवृत्तिस्तत्रेति** सर्वस्मिन् वस्तुन्यदृष्टव्यभिचार आगमे **कदाचिदविसम्वादसम्भवात्।**

नन्वन्यत्रेति (।) यत्रागमे यथोक्तविषयश[..... .त][3]प्रत्यक्षादिविषयेपि

वह्नेः शीतप्रतिघातसामर्थ्यस्याभिधानं सत्यार्थम्प्रद[2]र्श्य सर्वं सत्यार्थमाह शास्त्रं शक्यपरिच्छेदेपि विषये प्रमाणविरोधाद् बहुतरमयुक्तमपि (।)

नित्यस्य पुंसः कर्त्तृत्वं नित्यान्भावानतीन्द्रियान् ।
ऐन्द्रियान्विषमं हेतुं भावानां विषमां स्थिति ॥ (३३४)
निवृत्तिञ्च प्रमाणाभ्यामन्यद्वा व्यस्तगोचरं ।
विरुद्धमागमापेक्षेणानुमानेन वा वदत ॥ (३३५)
विरोधमसमाधाय शास्त्रार्थं चाप्रदर्श्य सः ।
सत्यार्थं प्र(ति)जानानो जयेद्धाष्टर्च्येन बन्धकीं ॥ (३३६)

अप्र[3]च्युतानुत्पन्नपूर्व्वापररूपः पुमान् कर्त्ता क्रमेण कर्म्मणाऽकर्म्मफलानाञ्च

दृष्टः प्रमाणेनोपरोधो वा। येन पुरुषेण तस्य **पुरुषस्य** प्रवृत्तिर्न युक्तेत्येवमागमलक्षणमुक्तमस्माभि ।

यः पुन र्मी मा स कादि. **प्राकृतपुरुषाणा विषयस्य वह्नेर्यच्छीतप्रतिघातसामर्थ्यन्तस्याभिधानमग्निर्हिमस्य** भेषजमित्येतद् वाक्यम्वेदैकदेशभूत **सत्यार्थं**। दृष्टान्तत्वेनोपदर्श्य स[4]र्वं **सत्यार्थम्वेदलक्षण** शास्त्रमित्याह। किम्भूत शास्त्र **शक्यपरिच्छेदे** प्रमाणगम्येपि **विषये प्रमाणविरोधाद् बहुतरमयुक्तमपि** तदेवभूत शास्त्र प्रतिजानानो मीमासकादिर्जयेद् धार्ष्टर्च्येन बन्धकीमिति वक्ष्यमाणेन सम्बन्ध ।

बहुतरमयुक्तमपीत्युक्तन्तद्दर्शयन्नाह। **नित्यस्ये**त्यादि। वददित्येतत्पद सर्वत्र सम्बन्ध(नीया)[5] नित्य कर्त्ता पुरुषोस्तीत्येवन्नित्यस्य **पुंसः कर्त्तृत्वम्वदच्छास्त्र**। तथा **नित्यान् भावान्** वदत्। **अतीन्द्रियान**प्रत्यक्षानर्थान**ैन्द्रियान्** प्रत्यक्षान् वदत्। तथा **विषम**मयुक्त **हेतुं** भावाना वदत्। तथा **भावानाम्विषमां स्थिति**। **निवृत्तिञ्च** भावानाम्विषमाम्वदत्। एतच्च वृत्तौ स्पष्टयिष्यामः। यथोक्तादन्यद्वा वस्तु **व्यस्तगोचरं**। व्यस्त प्र[6]तिक्षिप्तो गोचरोवकाशो यस्य तत्तथोक्त। केन व्यस्तगोचरमित्याह। **प्रमाणाभ्यां** प्रत्यक्षानुमानाभ्या निरस्त(म)सम्भवमिति यावत्। तदेवम्भूत वस्तु वदत्। **तथागमापेक्षेणानुमानेन विरुद्धम्वदच्छास्त्र**। तदेवमनेकायुक्तार्थाभिधायक शास्त्र **सत्यार्थं प्रतिजानानो** वादी। **जयेद् धाष्टर्च्येन बन्धकीं**।

5a किमकृत्वा प्रतिजानान[7] इत्याह। **विरोध**मित्यादि। शक्यविचारे वस्तुनि शास्त्रस्य **विरोधमसमाधाय**परिहृत्य पुरुषशास्त्रप्रवृत्तौ निमित्त **शास्त्रार्थञ्च सम्बन्धानुगुणोपायपुरुषार्थलक्षणमप्रदर्श्य प्रतिजानानः**।

अप्रच्युतेरित्यादिना व्याचष्टे। **अप्रच्युतं पूर्वं** रूप। **अनुत्पन्नं चापर रूपं**

भोक्ता (।) समवायिकारणाधिष्ठानभावादित्याह वेदः ।(।)

तच्चायुक्तमित्यावेदितप्रायं। नित्यत्वं च केषांचिद् भावानामक्षणिकस्य वस्तुधर्मातिक्रमादयुक्तं। अप्रत्यक्षेणैव(? क्षाण्येव)सामान्यादीनि प्रत्यक्षाणि (।) जन्मस्थितिनिवृत्तिश्च विषमाः(।)पदार्थानामनाधेयविशेषस्य प्रागकर्तुः परापेक्षया जनक[4]त्वं (।) निष्पत्तेरकार्यरूपस्याश्रयवशेन स्थानं (।) कारणाच्च विनाश

यस्येति विग्रह । ईदृश. किल **पुमान्** सुकृतदुष्कृताना **कर्मणां क्रमेण[1] कर्त्ता। कर्मफलानां च भोक्ता**। केन प्रकारेण भोक्ता कर्त्ता चेत्याह। पूर्वकर्मजनितसुखदु खादिसम्वित्ति प्रति समवायिकारणभावेनात्मा कर्म फलानाम्भोक्ता । तदुक्त।

"सुखदु खादिसम्वित्तिसमवायस्तु भोक्तृते"ति।

शुभाशुभकर्मकरणे ज्ञानप्रयत्नादिक प्रति अधिष्ठानभावेनात्मा कर्मणा कर्त्ता। तदुक्तं (।)

"ज्ञानयत्नाभिसम्बन्ध क[2]र्तृत्वन्तस्य भण्यत" इति।

आदिग्रहणात्। जडरूपस्याप्यात्मनश्चेतनायोगेन भोक्तृत्व गृह्यते। तदुक्तम् (।)

"भोक्ता च चेतनायोगात् चेतन न स्वरूपत" इति।

तदेव **समवायिकारणाधिष्ठानभावादिनेत्याह** वेद । **तच्चैतदयुक्तमित्यावेदितप्रायं**। स्वयमेव शास्त्रकारेण नित्याना कार्यकारणभावासम्भवन्दर्शयता। **नित्यत्वं चायुक्तं केषां(चद् भा)[3] वानाम्वेद** आहेति सम्बन्धनीय। कस्मादयुक्तम्(।) **अक्षणिकस्य** क्रमयौगपद्याभ्यामर्थक्रियाविरोधेन **वस्तुधर्मातिक्रमात्**। अर्थक्रियासमर्थं हि वस्तु। तच्चार्थक्रियासामर्थ्यमक्षणिकस्य न सम्भवतीत्य सदेव (।) तत्कुतस्तस्य वस्तुधर्म । **अप्रत्यक्षाण्येव सामान्या**दीनीति (।) आदिशब्दात् क्रियागुणादीनि **प्रत्यक्षाणी**त्याह वेद । **जन्म** च स्थितिश्च **नि(वृ)[4]त्तिश्च** ताश्च भावाना**म्विषमाः** प्राह वेद । जन्मनो वैषम्येण विषयो हेतुर्भावानामुक्तः सूत्रे।

तमेव विषम हेतुमाह। **अनाधेयस्ये**त्यादि। नित्यत्वा**दनाधेयातिशयस्य प्रागि**त्यर्थक्रियाकालावस्थाया पूर्वम**कर्तुः** पश्चात् **परापेक्षया** सहकार्यपेक्षया। **जनकत्व**माह वेदः। तच्चैतदयुक्तमिति विस्तरेण प्रतिपादित[5]।

निष्पत्तेरित्यादिना विषमस्थित्यभिधायित्वम्वेदस्याह। स्वहेतुतो **निष्पत्तेर्निष्पन्नत्वादकार्यरूपस्य** भावस्याश्रयवशेन **स्थान**माह वेद.। तच्चैतदयुक्त सर्वनिरशंस्य नान्यबलेन स्थानमिति प्राक् प्रतिपादित।

विषमा निवृत्तिन्दर्शयन्नाह। **कारणाच्च** विनाशहेतो सकाशाद् भावानाम्वि-

इत्यादिकमन्यदपि प्रत्यक्षानुमानाभ्यां प्रसिद्धविपर्ययमागमाश्रयेण चानुमानेन बाधितमग्निहोत्रादेः पापशोधनसामर्थ्यादिकं।

तस्यैवंवादिनो वेदस्य सर्वत्र शास्त्रशरीरे प्रमाणविरोधमप्रतिसमाधाय सम्बन्धानुगुणोपायपुरुषार्थाभिधाना[5]नि च शास्त्रधर्म्मानप्रदर्श्य अत्यन्तप्रसिद्ध-विषयसत्यताभिधानमात्रेण प्रज्ञाप्रकर्षदुरवगाहगहने निरत्ययता भावयितुकामो

नाश इत्याह वेद । तच्चायुक्तम ( )[6]द्विनाशस्येति प्रतिपादित।

एवमादिकमन्यदपि सदित्याह वेद । किभूत (।) **प्रसिद्धविपर्ययं**। असत्त्व हि सत्त्वविपर्यय । प्रसिद्धो विपर्ययो यस्य (।) केन (।) **प्रत्यक्षानुमानाभ्यां** (।) तस्य सत्त्वमाह वेद इत्यर्थ । **अग्निहोत्रादेः** (।) आदिशब्दात् तीर्थस्नानादे **पाप-**
215b **शोधनसामर्थ्यादिकम**ाह वेद । अत्राप्यादिशब्दाद् धर्मोपचया[दि .][7] **गमाश्रयेणानुमानेन बाधितं**। तथा हि (।) अधर्मो रागादिरूपस्तत्प्रभव च कर्मे-त्यागमव्यवस्था। द्वयमप्येतदग्निहोत्रादिना न बाध्यत इति कथमधर्मस्य तेन विशुद्धि । धर्मवृद्धिर्वा कथन्नत (।) धर्मस्यालोभादितत्प्रभवकर्मस्वभावत्वात्। तीर्थस्नानादीना चातत्स्वभावत्वात्। आदिशब्दादन्यदप्येवजातीयकमयुक्ताभि-धान द्रष्टव्य।

तस्यैव [. .][1]। **वादिनो वेदस्य सर्वत्र** प्रत्यक्षादिविषये त्रिविधेपि **शास्त्रशरीरे** शास्त्रप्रतिपाद्ये वस्तुनि। **प्रमाणविरोधमसमाधायापरिहृत्य। शास्त्रे** प्रवृत्त्यङ्गभूता **धर्मास्तानप्रदर्श्य**।

के पुनस्ते धर्मा इत्याह। **सम्बन्धेत्यादि**। परस्पर पदार्थाना सङ्गतार्थता **सम्बन्धः**। शक्यसाधन उपाय । **अनुगुणोपायः**। य शास्त्रे **पुरुषार्थसाधन** उ[क्त दृ][2] ष्टस्स मुरुषेण साधयितु शक्यत इति यावत्। अभ्युदयनि-श्रेयसं पुरुषार्थ । सम्बन्धश्चानुगुणोपायश्च पुरुषार्थश्चेति द्वन्द्व । तेषा**मभिधा-नानि**।

ननु विरोधासमाधानादेव शास्त्रस्याग्राह्यत्वमुक्तन्तत्कि शास्त्रधर्माप्रद-र्शनेनोक्तेन।

एवम्मन्यते (।) प्रत्यक्षानुमानविषये विशुद्धमुपदर्श्य कदाचिदन्यत्र सम्ब-न्धादिरहिते ब्रू [.][3] दर्थं शास्त्रधर्माप्रदर्शनमुक्त।

एव सम्बन्धाद्यभिधानानि च शास्त्रधर्मानप्रदर्श्यात्यन्तप्रसिद्धविषयसत्यार्थ-**ताभिधानमात्रेणे**त्यत्यन्तप्रसिद्धो विषयो वह्नने शीतापनोदसामर्थ्य तस्याभिधान सत्यन्तेन सत्याभिधानमात्रेण। प्रज्ञाप्रकर्षेणापि दृ खेनावगाह्यत इति **प्रज्ञाप्रकर्ष-दुरवगाहः**। तत एव **गहनन्तस्मिन्**तथाभूतेपि (विष)[4]येऽत्यन्तपरोक्षेपीति यावत्।

बन्धकीमपि प्रागल्भ्येन विजयते। काचित् किल बन्धकी स्वयं स्वामिना विप्रतिपत्तिस्थाने दृष्टोपालब्धा। सा तम्प्रत्युवाच। "पश्यत मातः पुरुषस्य वैपरीत्यं (।) मयि धर्म्मपत्न्यां प्रत्ययमकृत्वात्मी[6]ययोर्नेत्राभिधानयोर्जलबुद्बुदयोः करोति। तेन जरत्काणेन ग्राम्यकाष्ठहारकेण प्रार्थितापि न सङ्गता। रूपगुणानुरागेण किल मन्त्रिमुख्यदारकङ्कामयेऽहमिति" (।) एवंजातीयकमेतदपि वह्नेः शीतप्रती-

---

निरत्ययतां सत्यार्थता **साधयितुकामो** मी मा स को **बन्धकीमपि . प्रागल्भ्येन** धार्ष्ट्येन **विजयते** (।) यादृशीञ्च बन्धकीम्विजयते ना **कञ्चि**दित्यादिना दर्शयति। **बन्धकी** दुश्चारिणी। **स्वयं स्वामिना विप्रतिपत्तिस्थाने दृष्टे**ति विप्रतिपत्त्यवस्थायान्दृष्ट्वा परपुरुषेण सङ्गता त्वमित्यु**पालब्धा** सती। **सा तँ** स्वामिन **प्रत्युवाच**। प्रत्यु [त्त . . ।][5] कथ प्रत्युवाचेत्याह। **पश्यतँ**-त्यादि। पार्श्वस्था स्त्रियो मात इत्यनेनामन्त्र्यन्ते (।) **मातः पश्यत पुरुषस्य** मदीयस्य स्वामिनो **वैपरीत्य**। ननु पश्यतेति लोड्मध्यमपुरुषबहुवचनान्तमेतत्। ततश्च मातृशब्दादपि बहुवचनमेव युक्तम्मातर इति (।) तत्रैके प्रतिपन्ना मातृशब्देनामन्त्रितैकवचनान्तेन समानार्थो मात शब्दोस्ति। वि[.][6] स्वरप्रतिरूपकाश्च निपाता इत्यनेन न्यायेन। स चाव्ययत्वात् सर्वेषु वचनेषु तुल्यरूप इति बहुवचनेनापि पश्यत शब्देन सम्बध्यमानो मातरित्येव प्रयुक्त इति। अन्ये तु पश्यत मातर पुरुषस्येति पठन्ति। धर्मस्य साधनभूता पत्नी धर्मपत्नीति मध्यपदलोपी समास। **मयि धर्मपत्न्यां प्रत्ययमकृत्वा आत्मीययोर्जलबु[द्बुद .])[7] द्वाञ्जलबुद्बुदयोर्द्वयोर्नेत्राभिधानयो करोति** प्रत्ययमिति प्रकृत। नेत्रमित्यभि- 216a
धान ययोरिति विग्रह। परपुरुषेणासगते कारणमाह। **तेने**त्यादि। जरश्चासौ काणश्चेति **जरत्काणः**। वृद्धकाणेनेत्यर्थ। तत्र जरद्ग्रहणेन वयोवैकल्यमुक्त। पर रूपस्थान चक्षुरिति तद्वैकल्यात् काणग्रहणेन वैरूप्य। **ग्राम्यग्रहणेन** वैदग्ध्यादिगुण[1]वैकल्य। **काष्ठहारक**ग्रहणेन कृच्छ्रजीवित्वात् दारिद्र्यमुक्त। तदेव वृद्धत्वादिगुणयुक्तेन पुरुषेण सङ्गत्यर्थ **प्रार्थितापि** सती। **ना**हन्तेन सह **सङ्गता** प्राक्। **रूपगुणानुरागेण**। रूप प्रासादिकता। गुणो वैदग्ध्यादिको धर्म। रूपगुणयोरनुरागोभिलाषस्तेन हेतुना। **मंत्रिमुख्यदारकं** मन्त्रिप्रधानदारक युवान पुत्र। [मन्त्रिमु][2]ख्यश्चासौ दारकश्चेति विग्रह। तमेवभूत दारक **कामयेहमिति** कथमिद सम्भाव्यते। तत्र वृद्धादिदोषचतुष्टयवैपरीत्येन मन्त्रिमुख्यदारके गुणचतुष्टयमुक्त। रूपग्रहणेन प्रासादिकत्व गुणग्रहणेन वैदग्ध्यादि। मन्त्रिमुख्यग्रहणेनैश्वर्यं। दारकग्रहणेन वयोगुण। एतच्च बन्धक्या धार्ष्ट्यात् प्रेरितमेव केवलस्वम्वच[न न][3] तु युक्तियुक्त। रूपादीनामेव कामहेतु-

कारवचनेन दृष्टप्रमाणविरोधस्याप्यत्यन्तपरोक्षेऽर्थेऽविसम्वादानुमानं।

सिध्येत्प्रमाणं यद्येवमप्रमाण[7]मथेह किं ।
न ह्येकन्नास्ति सत्त्यार्थम्पुरुषे बहुभाषिणि ॥ (३३७)

यथेदमतिदुष्करमत्यन्तसत्त्याभिधानं तथाऽत्यन्तासत्त्याभिधानमपि। तत्रैकस्य
38a **वचनस्य कथञ्चित् संवादेनावशिष्टस्य तद्वचनराशेस्त[8][थाभावे न कश्चित् पुरुषो नाप्तः स्यात्]।**

त्वान्न तु वार्द्धक्यादीनां।

एवंजातीयकमित्यादिना दृष्टान्तार्थं दार्ष्टान्तिके योजयति। **एवंजातीयकमिति** बन्धकीप्रतिवचनतुल्य। **एतदत्यन्तपरोक्षेर्थे** वेदस्याविसम्वादानुमानं (।) किम्भूतस्य वेदस्य शक्यविचारे वस्तुनि **दृष्टप्रमाणविरोधस्य**। दृष्ट. प्रमाणविरोधोस्येति विग्रह। [वह्निशीतनोदन][1]दृष्टान्तेनानुमान। **वह्नेः शीतप्रतीकारवचनेन**। यथाग्निर्हिमस्य भेपजमिति वाक्यमविसम्वादि। तथान्यदपि वेदवाक्यमविसम्वादीति।

तत्र धर्मपत्नीस्थानीयो वेद। विप्रतिपत्तितुल्यन्नित्यस्य पुस. कर्त्तृत्वाद्यभिधानं। नेत्रतुल्ये प्रत्यक्षानुमाने। न च दृष्टव्यभिचारायां पत्न्यां वचन गरीयस्तस्य पुरुषस्य येन [. .][5] यम्विप्रतिपत्ति दृष्ट्वापि स्वदर्शनमप्रमाणीकृत्य तस्या वचन यथार्थं कुर्यात्। एवम्वेदोक्तार्थबाधकयो· प्रमाणयोरप्रमाण्य कृत्वा न वेदस्य पत्नीस्थानीयस्य दृष्टव्यभिचारस्य वचनादत्यन्तपरोक्ष प्रतिपद्येमहीति। (३३६)

अत्रैव दोषान्तरमाह। **सिध्येदित्यादि**। **एवमिति** यथा दृष्टैकसत्याभिधानमात्रेण **यदि** सर्वो वेद। [. **प्र**][6] **माणं सिध्येत्तदा** सर्वं पुरुषस्सर्वत्राथ प्रमाण स्यात्। यस्मान्न हि **पुरुषे बहुभाषिण्येकं** वचन **सत्यार्थं नास्ति** (।) किन्त्वस्त्येव।

यथेत्यादिना व्याचष्टे। **यथेदमत्यन्तमभिधायित्व**। एकान्तेन सत्यवादित्व**मतिदुष्करं**। अत्यन्तदु खेन क्रियत इति कृत्वा। तथा**त्यन्त**। **सत्याभिधानमति-**
216b **दुष्करन्तत्रैव**स्थिते न्याये। **एकस्य** [.... .**वच**][7] **नस्य कथंचिदिति** का क ता ली य न्यायेनापि यस्स**म्वादस्सत्यार्थत्वन्तेन** हेतुना। तस्मादविसम्वादकाद् वचनाद**विशिष्टस्य तद्वचनराशे**रिति यस्य तदेकम्वचनमविसम्वादि दृष्टन्तस्य पुरुषस्य वचनराशे। **तथाभावे**ऽविसम्वादित्वेऽभ्युपगम्यमाने। **न कश्चित् पुरुषो नाप्तः स्यात्**। किन्तु सर्वं एवाप्त स्यात्। न चैव। तस्मान्नैकदेशाविसम्वा[दात्...
..प्रामा][1]ण्यमिति।

[1](अपि च।

नायं स्वभावः कार्यं वा वस्तूनां[6] वक्तरि ध्वनिः।
न च तद्व्यतिरिक्तस्य विद्यते(ऽव्यभिचारिता) ॥३३९॥

न तावद् वचन वाच्यानां स्वभावः। नाप्येषा कार्यम्। तदभावेऽपि वक्तृ-
विवक्षा[7]मात्रेण भावात्, न चान्यः कश्चित् अव्यभिचारी अस्ति। व्यभिचारिणि 534b
च सति ततोऽन्यथापि तत्सम्भवात्। तस्य भावात् तत्प्रतीतिरयुक्ता।

प्रवृत्ति[1]र्वाचकानाञ्च वाच्यदृष्टिकृतेति चेत्।

एवं हि सति वाक्यस्य कार्यमेव, वाचकस्य हि वाच्यदर्शनेन प्रवृत्ते। एवं सति—

अपि च यो नाम कश्चित् कस्यचिद् गमकः स तत्स्वभावस्तज्जन्यो वा सन् गमयेन्नान्यथा। न चायं ध्वनिर्वाच्यत्वेनाभिमताना वस्तूना स्वभावः (।) कि कारण (।) यस्माद् वक्तरि ध्वनि. स्थितो न ह्यन्यस्वभावोन्यत्र वर्त्तते। वस्तनां कार्य वा (।) नाय ध्वनि. (।) कि कारण (।) यस्माद् वक्तरि मतिध्वनिर्भवति। तेनायमर्थ। (।) यस्माद् वक्तुरिच्छामात्रप्रतिबद्धो न बाह्यवस्तु [. . . .][2] इत्यर्थ। न च तद्व्यतिरिक्तस्येति स्वभावकार्यव्यतिरिक्तस्यार्थस्याव्यभिचारिता विद्यते।

नेत्यादिना व्याचष्टे। तावच्छब्द क्रमे। एतद् वक्तृस्थम्वचनं न तावद् वाच्यानामर्थाना स्वभावः। नाप्येषां वाच्यानां कार्यं। कि(ङ्) कारण (।) तदभावेपि। वस्तूनामभावेपि विवक्षामात्रेण भावादुत्पतेर्न च कार्यस्वभावाभ्यामन्यः कश्चित् कस्यचिदव्यभिचारी हेतुरस्ति। वा[. . . .][3] व्यभिचारे च सति शब्दस्य ततोन्यथापीति। तस्माद् बाह्यार्थादन्यथापि वाह्यार्थभावेपीत्यर्थ.। तत्सम्भवात् तस्य शब्दस्य सम्भवात् कारणात्। तस्य शब्दस्य भावात् तत्प्रतीतिर्वाह्यार्थप्रतीतिरयुक्ता।

स्यादेतद् (।) यद्यपि वाच्याद् वस्तुनोर्थान्तर वचनन्तथापि तस्य वाच्यस्य कार्यमेवेति गमकमेव। यस्माद् वाचकाना शब्दाना या प्रवृत्तिरूत्पत्तिरभिव्यक्तिर्वा सा वा[च्य दृ][4]ष्टिकृता। वाच्यस्यार्थस्य यद्दर्शनन्तत्कृता। वाच्ये हि सति तद्दर्शनन्तद्दर्शन (।) तद्दर्शनात् तद्विवक्षा। विवक्षातो वचनमिति पारम्पर्येण वचनमर्थकार्यमिति पूर्वपक्षः।

स्यादेतदित्यादिना व्याचष्टे। तस्माद् वाचकस्य शब्दस्य वाच्यदर्शनेन प्रवृत्तेः

---

[1] Restored.

परस्परविरुद्धार्था कथमेकत्र सा भवेत् ॥३४०॥

यदि[2] एष नियमो वाच्येन वस्तुना विना शब्दो न प्रवर्त्तत[1] इति भिन्नेषु प्रवादेषु एकत्र वस्तुनि विरुद्धस्य स्वभावस्योपसंहारेण वृत्तिर्न स्यात्। न ह्यस्त्यय सम्भवो यदेकः शब्दो निःपर्यायं नित्यश्च स्यादनित्यश्चे[3]ति।

वस्तुभिर्न्नागमास्तेन कथञ्चिन्नान्तरीयकाः।
प्रतिपत्तुर्न्न सि[ध्यन्ति] कुतस्तेभ्यां[ऽर्थनिश्च]यः ॥३४१॥

आगमस्य प्रमाणं तदादर्शिता[4]र्थप्रतिपत्तयेऽज्ञो जनः समन्विष्यति। समधिगतयाथातथ्यानां उपदेशानपेक्षणात्। अतीन्द्रियगुणपुरुषस्य विवेचनेऽसामर्थ्यात्[5]।

एवमित्यादिना प्रतिविधत्ते। **एवं सतीति** यद्यर्थवशेनैव वचनप्रवृत्तेस्सर्वा वचनप्रवृत्ति सत्यार्था .. [5]दैकत्राभिधेये आगमभेदेन **परस्पर विरुद्धार्था सा** वचनवृत्ति **कथम्भवेत्**। नैव भवेत्। सर्वप्रवादेष्वेकार्थैव भवेदिति यावत्।

यदीत्यादिना व्याचष्टे। **यद्येष नियमो** वाच्यम्वस्त्वन्तरेण **वाच्येन वस्तुना विना शब्दो न प्रवर्त्तत इति** तदा परस्परविरुद्धार्थाभिधानाद् **भिन्नेषु प्रवादेषु** सिद्धान्तेष्वेकत्र **वस्तुनि**। नित्यानित्या [दि.... ...वि][6]रुद्धस्य **स्वभावस्योपसंहारेण** समारोपेण वचनवृत्तिर्न **स्यात्**। यतो **न ह्यस्त्यय सम्भवो यदेक. शब्दो निःपर्यायमिति** प्रकारान्तरेण विनेत्यर्थ.। **नित्यश्च स्यादनित्यश्चेति**। शब्दग्रहणमुपलक्षणार्थ (।) तेन घटादिरपि नि पर्यायन्नित्यश्च। नित्यश्च न सम्भवत्येव।
217a भवति च कस्यचित् प्रवादे नित्य शब्द इति [व ...][7]त्तिरन्यस्यानित्य इत्येव सात्मको निरात्मक इत्यादि।

तस्मान्नास्ति शब्दाना बाह्यैरर्थैस्सह सम्बन्ध।

यत एवन्तेन कारणेन **प्रतिपत्तुः** पुरुषस्य। **वस्तुभिः सहागमा नान्तरीयका** अविनाभाविनो [न कथचित्प्रतिपत्तु· सिध्यन्ति **तत्कुस्तेभ्य**] आगमेभ्यो वस्त्वनान्तरीयकेभ्यो[**र्थनिश्चयो** न वा निश्चय। **आगमस्य** प्रमाणा][1] न सर्वोन्वेषने किन्त्वज्ञो **जनः**। **समन्वेषते** किमर्थ (।) **तदादर्शितार्थप्रतिपत्तये**। तेनागमेनोपदर्शितस्यार्थस्य **प्रतिपत्त्यर्थ**। किङ्कारणमज्ञ एव समन्वेषते नान्य इत्याह। **समधिगत याथातथ्य** पदार्थानामविपरीत रूप यैस्तेषामधिगतपरमार्थाना परोप**देशानपेक्षणात्**। येनाप्यज्ञेनान्वेषणीन्तस्य [. ा][2] तीन्द्रिया गुणा यस्य पुरुषस्य **सोतीन्द्रियगुणः** (।) पश्चात् पुरुषशब्देन विशेषणसमास। तस्य **पुरुषस्य विवे-**

---

[1] Mthon-pa-mi-śes-pa.

समीहितार्थसत्तामन्तरेण वाक्यानां वृत्तिं अजानतां)[1] अदृष्टव्यभिचारवचसामपि पुंसां वाचि किमियं यथार्था नेति वेति भवितव्यमेव शंकया।[6] तेन न युक्तं अनेन कस्यचित् किञ्चिदपि निश्चेतुम्।

अस्य।

तस्मा[न्न तन्निवृत्त्यापि वस्त्वभा]वः प्रसिध्यति।

यदुक्तं, सर्वविषयत्वादागमस्य, सति वस्तुनि[7] अविसंवादेनास्य प्रवर्त्तनात्, 535a तन्निवृत्तिलक्षणानुपलब्धिरभावं साधयिष्यतीति। तच्चास्य सर्वविषयत्वमस्ति। वस्त्वन्तरेणावृत्तौ स्यात्। ततः प्रतिपत्तुकामस्याभिमता सिद्धिरित्युक्तम्।[2]

तेनासन्निश्चयफलाऽनुपलब्धिर्न सिध्यति ॥ ० ॥३४२॥

तस्मान्न प्रमाणत्रयनिवृत्तावपि विप्रकृष्टेष्वर्थेष्वनिश्चयः।

वेदप्रमाण्यं कस्यचित् कर्तृवादः स्नाने धर्मेच्छा जातिवादावलेपः। सन्तापा-

---

चनेऽयं सर्वज्ञो नान्यो वा वितथाभिधायीत्येव विभागक्रियायामसामर्थ्यात्। तत्कु- तस्तथाभूतपुरुषप्रणीत वचनमागमत्वेन निश्चित्य प्रवर्त्तेत।

न च सर्वस्य सर्वाणि वचनानि यथार्थं प्रवर्त्तमानानि पर. ३
ना च समीहितोभीष्टो योर्थस्तस्य सत्तामन्तरेणापि वृत्तिम्पश्यतः प्रतिपत्तुः पुरु- षस्य भवितव्यमेव वाचि शंकया। किमियं यथार्था वाङ् नेति वेति। केषा वाचि। अदृष्टव्यभिचारवचसामपि। शक्यविचारे वस्तुन्यदृष्टव्यभिचार वचो येषान्ते- षामपि वाचि। अपिशब्दाद् दृष्टव्यभिचारवचसामपि वाचि सुतरा शकया . ...[4] येन शका तेन कारणेन न युक्तमनेनाज्ञेन प्रतिपत्त्रा कस्यचित् पुरुषस्य वचनेन किञ्चिद् वस्तु निश्चेतुं। यतश्चानिश्चयस्तस्मा- दस्य प्रतिपत्तेस्तन्निवृत्त्याप्यागमनिवृत्त्यापि प्रतिषेध्याभिमतस्य भावस्याभावो न प्रसिध्यति।

यदुक्तमित्यादिना व्याचष्टे। यदुक्त प्राक् (।) सर्वविषयत्वादागमस्य सति वस्तुन्यवि[सम्वादेना. .][5] करणात्। तन्निवृत्तिलक्षणेत्यागमनिवृ- त्तिलक्षणानुपलब्धिः स्वभावादिविप्रकर्षिणोप्यर्थस्याभावं साधयिष्यतीति। तदि- त्यभावनिश्चायकत्वमस्येत्यागमस्य नैवास्यागमस्य। सर्वविषयत्वमस्ति। पुरुषा- र्थासम्बद्धानामर्थानामविषयीकरणात्।

अभ्युपगम्याप्युच्यते। आगमस्य सर्वविषयत्वे [पि यदि [6]यद्य]

---

[1] Restored

रम्भः पापहानाय चेति ध्वस्तप्रज्ञा(नां पञ्च)लिङ्गानि जाड्ये ॥

[1](महानैयायिकेन सकलभूतलवादीभशिरोविक्रमसिंहेनाशेषदिङ्मधुरकीर्तिना आचार्यश्रीधर्मकीर्त्तिना निबद्धा प्रमाणवार्त्तिकप्रथमपरिच्छेदवृत्तिः समाप्ता। मगलम्।)

वृत्ति स्यात्तदा **वस्त्वन्तरेणावृत्तौ** सत्या स्यादागमनिवृत्तिलक्षणस्यानुपलम्भस्याभावनिश्चायकत्व (।) तच्च नास्ति वस्त्वन्तरेणाप्यागमस्य वृत्ते.।

एव च सति **ततोर्थव्यभिचारिण** आगमात् **प्रतिपत्तुकामस्य** पुसोभिमतार्थसिद्धिरित्युक्त। तेन कारणेन विप्रकृष्टेष्वसन्निश्चयफलेत्यसद्व्यवहार [विष
217b . .][7] न सिध्यति।

तस्मान्न प्रमाणत्रयनिवृत्तावपि प्रत्यक्षानुमानागमसज्ञितस्य प्रमाणत्रयस्य निवृत्तावपि देशकालस्वभाव**विप्रकृष्टेष्वर्थेष्वनिश्चय** इत्युपसहार।

अयुक्ताभिधायित्वे दिङ्मात्रन्तीर्थिकानान्दर्शयन्नाह।

(१) **वेद** इत्यादि। इति शब्दो वादशब्दश्चात्र वक्ष्यमाणकस्सम्बन्धनीय। तेनायमर्थ (।) **वेदप्रामा**[ण्य जाड्ये][1] लिङ्ग।

ननु गुणेन षष्ठीसमासप्रतिषेधाद् वेदस्य प्रामाण्यमिति भवितव्य।

नाय दोषो लोकप्रसिद्धानाम्विशिष्टानामेव गुणानान्तत्र ग्रहणात्। अस्य च लिङ्गमधिकरणैतावत्व इत्यादिको निर्देश।

(२) **कस्यचित्** नै या यि का देरीश्वरस्तत्त्वादीना **कर्त्तेत्ययमपि** वादो जाड्ये लिङ्ग।

(३) **तीर्थस्नाने धर्मेच्छा** जाड्यलिङ्गमप[र][2] मोहादिस्तज्जनित च कायवाक्कर्म्म धर्मस्तद्विपरीतञ्च जलसश्लेषमात्रलक्षण स्नानमिति कुतस्ततो धर्मप्राप्ति। विस्तरेण निराकृतश्चायन्तीर्थस्नानवाद आचार्य व सु ब न्धु प्रभृत्तिभिरिति नेह प्रतन्यते।

(४) शीलादिगुणवैकल्येपि ब्राह्मणोहमिति **जातिवादेनावलेपो** दर्पो जाड्यलिङ्गमयुक्तत्वात्। [तथा हि प्र गृ][3]हीत्वा जातिवादावलेप स्यात्। ब्राह्मणेन पित्रा ब्राह्मण्या गर्भे य उत्पादस्त वा समाश्रित्य। तत्र वस्तुभूतसामान्यनिषेधान्न पूर्व पक्ष। नाप्युत्तर ब्राह्मणब्राह्मणीशरीरयोरशुचिस्वभावत्वेन शरीरान्तरादविशेषात्।

---

[1] Restored.

(५) अनशनादिना शरीरपीडन **सन्तापस्तस्यारम्भोनुष्ठान पापहानाय।** **पापस्य** [.][4] **जाड्ये** लिङ्ग। तथा हि (।) सर्वस्य पापस्य निदान लोभद्वेषमोहा। तैश्चाविरुद्ध सन्तापारम्भ इति कुतस्तेन पाप-शुद्धि·।

एतानि **पंच लिङ्गानि जाड्ये**। किविशिष्टे जाड्ये। **ध्वस्तप्रज्ञाने**। प्रमाणा-वलम्बिज्ञान प्रज्ञानन्तद् ध्वस्त यस्मिन् जाड्ये तत्तथोक्त। न्यायानुसारिज्ञान रहित इत्यर्थ·। यथास्थलमुपादानात् पञ्चेत्युक्तम [5] लिङ्गा-नीति ॥०॥

भट्टोद्योतकरादिषु प्रविचयो येषा महान् विद्यते
सद्वस्त्वाकरधर्मकीर्तिजलधेरन्तर्निमग्नम्मन ।
पौर्वापर्यविमर्षिणी स्मृतिरल प्रज्ञापि चोत्कर्षिणी
यत्किञ्चिद् गदिन्तदत्र निपुणैस्तैरेव विज्ञास्यते ॥
अर्थोत्खातपरम्परासु महती वाच प्रसन्नात्मता
यस्यामन्यसुभाषिताऽ [. .][6]नि ।
दर्पाध्मात(?)समस्ततीर्थिकमतध्वसश्च म(वेद्य)ते
टीकेय सुविलक्षणोदितधियामावर्जनीया कथमिति ॥०॥

क ण र्ण क गो मिविरचितायाम्प्रमा(णवार्त्तिकवृत्ति
. प्रमाण)॥०॥

परिशिष्टम् (१)

नाम-सूची

अद्वैतवाद·—११५
अध्ययनः (नैयायिकः) ६०, ६८
अविद्धकर्ण.—१६, २५, ६०, ६८
अष्टकः—४३८ (ऋषि·)
आचार्यः (दिग्नाग.)—५८, ६०, ६३, १६५, ३२७, (दिग्नागोऽपि द्रष्टव्यः)
आचार्य (धर्मकीर्त्तिः)—४१, ५१, ६७, १२६, १७१, १७४, २०३, २१४, २१५, २२४, २२६, २२७, २३७, २३६, २५२, २७५, २८६, ३०६, ३११, ३२६, ३३५, ३४२ ३४५, ३५१, ३६४, ३६५, ३७५, ३८०, ३६१, ४१२, ४२५, ४२७, ४४७, ४४८, ४८६, ४६२, ४६५, ५०५, ५०६, ५१०, ५३२, ५८६
आचार्यीयः (—आचार्य-शिष्य·)—६८, ७२
आर्हताः (—जैनाः)—४४६
आहुरकः (वेद-शाखा)—५६६
ईश्वरसेनः (—धर्मकीर्त्तिगुरुः)—१२, ६१
उद्योतकरः—२०, ४६, ७८, ८४, ६०, ११०, ११६, १४४, १५५, २०७, २२३, २३३, २४३, २४८, २५२, २५३, २६१, २७५, २७७, २८१, २६६, ३०१, ३०५, ३१०, ३१६, ३८८, ३८६, ४५२, ६१६
उर्वशी—५५१, ५६८
उम्बेक —२१, ४६७
कम्बुनीतत्रम्—५७८
कर्णकगोमी—६१६
काणादः—४२८
कीर्त्ति. (—धर्मकीर्त्तिः)—८३
कुमारसम्भवम्—४३८ ४३६,
कुमारिल· (भट्टः)—१७, १८, ८४, ८७, ६४, ११४, १२६, १३६, १४४, (१५५, १८८), ४३८
क्षपणका. (—जैनाः)—३३६
गारुडा —४४६
(जयानन्तभट्ट· ?)—८३
जैना.—१४३
जैमिनिः—१४३, ४३८, ५५२, ५८५, ५८६, ५८६, ५६०, ५६६, ५६६ ६०४
जैमिनीयाः—५३५, ५५१
डाकिनीतंत्रम्—५७८
डिंडिमपुराणम् (जैनानां)—४४८ ४४६
तर्कशास्त्रम्—१४

तीर्थिकाः—६, ७२
दिगबराः—१०६, ३३२, ३३३, ३३६, ३३६ (द्रष्टव्या आर्हता, क्षपणकाः, जैनाः, नग्नाश्च)
दिग्नाग—१, ३, ४, ६, २४, २६, ५७, ६०, १६५, १६६, २००, २०२, २०४, २२७, २४८, २४६, २५३, २६२, ३५०, ३५३, ३८३, ३८६, ३६०, ३६४, ५४५, ६०८, ६०६ (द्र० आचार्य)
धर्मकीर्त्ति—३, ४, ५, ६१८ (द्र० आचार्य.)
नग्ना (जैना)—४४८
निरुक्तकार—२४६
नैयायिका—४६ (अक्षपाद), ११३, १५८, ३५८, ५४६, ५५०, ६०६, ६१८
नैरात्म्यसिद्धि (कर्णकगोमिग्रन्थ)—३२, ८१, ८२, ६२, ६५
नैरुक्ताः—४५८
न्यायमुखम् (दिग्नागस्य)—५८, ७६
पाटलिपुत्रम्—६०४
पाणिनिः—५६४
पुरूरवा—५५१
(प्रमाण-)विनिश्चयः (धर्मकीर्त्ते)—५०
प्रमाणसमुच्चय (दिग्नागस्य)—३, ४, ५७, ६०८, ६०६
बार्हस्पत्यम्—४८८
बौद्धः—११, ४६, ६३, ८०, ११४, ३३०, ४१२, ४४६, ४५०, ४५१, ४७७, ५४६, ५८६, ६०६
भगिनीतत्रम्—५७८
भट्ट (—कुमारिलः)—१७, १८, २४, ८४, ८७, ६४, ११६, १४४, १५५, १८८, २२५, २३३, २३८, २३६, २४१, २४३, २४८, २४६, २५२, २५३, २६६, ३०१ ३०५, ६१६ (द्र० कुमारिल)
भरतः—५५१
भर्तृहरि.—४६४
भारतम्—४४७
मजुनाथ—१
मण्डन (मिश्र)—१०६ ४६८, ८८४, ५६६, ५७१
मदनत्रयोदशी—४५६
मत्रा—४४६
मलय—५७३
महायानम्—२, ५६५
माधव. (—साख्यनाशक)—५६५
माहेश्वरा—४४६
मीमासक—४७, ५०, २०७, ३३०, ४०४, ४०५, ४३४, ४३७, ४३६, ४४०, ४८७, ४८६, ५०२, ५०८, ५३७, ५४६, ५८४, ५८६, ५६७, ५६८, ६०२, ६०५, ६१०, ६१३
मीमासक । बृद्ध-, ६०८
म्लेच्छा—४५६, ४५८
लोकायताः—७२
वसुबन्धुः—६१८
वस्तुवादी—१८७
वामकः—४३८
वामदेवः—४३८
वार्त्तिककारः—१६६ (धर्मकीर्त्ति)

वासुदेवभट्टः—६३
वार्त्तिकम् (प्रमाण-)—३
विनिश्चय । प्रमाण—, ५०
विन्ध्य.—५७३
वेद.—४०४, ४०५, ४०६, ४४७, ४५६, ४५७
वेदवाक्यम्—७२
वेदवादी (जैमिनि)—३२६, ४५६, ४६१, ४६५
वैदिका—४४२, ४४३, ४४४, ४४६, ४४६, ४५०, ४६०
वैदिकवाक्यम्—६६, ७१, ४०७
वैयाकरण—२५८, २४६, ४३४, ४५८, ४८५
वैशेषिका—६६, ६७, ७२, १३२, १७२, १६४, २३२, २६४, ३६२, ४३८
व्यास—४४७
शकर (नैयायिकः)—८०, ५१५
शबरस्वामी—५८५, ५८६
शबरा.—४४६
शास्त्रकार (—धर्मकीर्त्ति) ५
शौक्र—४८८
समन्तभद्र—१, २
साख्या—७४, १६४, २२३, ३२०, ३३०, ३३६, ३५०, ५६५
(साख्यनाशको माधवः)
सूक्तम् (=भगवत्प्रवचनम्)—४
सूत्रान्तरम् (=सूत्रान्तम्)—४८२
सौगता (=बौद्धा.)—४३८, ५६२
स्फोटवादी—५७०
स्याद्वाद—३४२
हिमवान्—५७३
हिरण्यगर्भ—४४६

मुद्रक—जे० के० शर्मा, इलाहाबाद लॉ जर्नल प्रेस, इलाहाबाद
प्रकाशक—किताब महल, इलाहाबाद